॥ श्रीहरिविरचितः ॥

कर्पूरप्रकरः ।

(श्रीजिनसागरसूरिविरचितटीकया संवलितः)

श्रीमद्विजयकमलसूरीश्वरसदुपदेशतः इलादुर्गवासिप्राग्वाटज्ञातीयगांधी मगनलाल-
हीराचन्दत्तेन श्रेष्ठिवर्यहीराचन्द-लक्ष्मीचन्दसत्कद्रव्यसाहाय्येन

प्रकाशयित्री—
श्रीजैनधर्मप्रसारकसभा भावनगर.

इदं पुस्तकमेतत्संसदध्यक्षेण शा० कुंवरजी-आनंदजीत्यनेन
मुम्बापुर्यां निर्णयसागरमुद्रणालये कोलभाटवीथ्यां २३, तमे गृहे रामचंद्र येसू शेडगेद्वारा मुद्रयित्वा प्रकाशितम् ।
वीरसंवत् २४४५. विक्रमसंवत् १९७५. सन् १९१९.

(इदं पुस्तकमधिकारिसाधुसाध्वीनां पुस्तकभाण्डागाराणां चोपदीकरिष्यते)

Printed by Ramchandra Yesu Shedge, at the Nirnaya-sagar Press, 23, Kolbhat Lane, Bombay.
Published by Shah Kuverji Anandji, for Jain Dharmaprasarak Sabha, Bhavnagar.

प्रस्तावना ।

इह खल्वपारसंसारपारावारपरिभ्रम्यमाणजन्तुजातपरित्राणकर्म्मकर्मठाः परोपकारिजननिकरशेखराः श्रीमज्जैनशासननभोभासनभास्करा अप्रतिहतस्वप्रतिभाभरविहसितधिषणधिषणाः पूर्वाचार्याः 'परोपकाराय सतां विभूतय' इत्येनां शिष्टजनभाषितामुक्तिं चेतस्यवधार्य सर्वसाधारणजनोचितान् विविधरसपेशलान् गद्यपद्यात्मकाननेकश औपदेशिकग्रन्थान् विरचयाञ्चक्रुः ।

तथैवायमपि विशुद्ध्यमानसवासनो महात्मा 'मामकीनमेनं ग्रन्थमधीयतां लोकाः, समुपदिशन्तां भव्यात्मनो मुनिप्रवराः, नयन्तां वैराग्यभावनां मनो भव्यासुमन्तः, परिहरन्तामनेकभवनिबद्धं मोहजालं, गृह्णतां च श्रावकधर्म्मं श्रमणधर्म्मं वा, प्राप्नुवन्तु चानुक्रमतोऽजरामरमपवर्ग्गसौख्यं' चेति परोपकारचिकीर्षया नृजन्मप्राप्त्युपदेशादिसप्ताशीतिद्वारात्मकं श्रीकर्पूरप्रकरनामानमेनं ग्रन्थं ग्रथयामास ।

केषां सूरीश्वराणां शिष्यतामापन्नोऽयं महात्मा कदा कतमं महीमण्डलं मण्डयामासेति जिज्ञासायामस्यैव ग्रन्थस्य प्रान्तप्रशस्तौ—

"श्रीवज्रसेनस्य गुरोस्त्रिषष्टि—सारप्रबन्धस्फुटसद्गुणस्य ।
शिष्येण चक्रे हरिणेयमिष्टा, सूक्तावली नेमिचरित्रकर्त्रा १७९ "

इत्यनेन पद्येन श्रीवज्रसेनसूरीणां शिष्यरत्नमसौ श्रीहरिसेनो महात्मेति ज्ञायते, परं कस्मिन् गच्छे कस्मिन् समये वाऽयमजायतेति नैव निर्णीयते सम्यक् ।

नाऽयं ग्रन्थः श्लोकानां शब्दकाठिन्यादिना सर्वसामान्यजनोपकारी, न च कथाविरहितः कथारसनिपिपासूनां साधारणजनानां हृदयोल्लासक इति विज्ञाय खरतरगच्छालङ्कारिणा श्रीजिनसागरसूरिणा गद्यपद्यात्मकनिबद्धविविधविषयकानेककथात्मका वृत्तिर्व्यधायि ।

असावप्याचार्यः कदा कतमं महीमण्डलं स्वकीयैः पादपद्मैः पावयामासेति पर्यालोचने प्रवृत्ते एतदीयवृत्तिप्रान्ते—प्रशस्त्याम्

"श्रीश्रीखरतरगणराजश्रीवर्द्धनसूरिशिष्येण । श्रीजिनसागरगुरुणा, रचिता कर्पूरटीकेयम् ॥ १ ॥"

इत्येतद्वृत्तविलोकनेन "संवत् १४९४ वर्षे माघसुदि ११ गुरुवारे श्रीमद्पाटदेशे श्रीदेवकुलपाटकपुरवरे नरेश्वरश्रीमोकलपुत्रश्रीकुम्भकर्णनृपतिविजयराज्ये श्रीओशवंशे श्रीनवलक्षशाखमण्डनसा० लक्ष्मीधरसुत सा० लाधू तत्पुत्र साधु श्रीरामदेव तज्जाया प्रथमा मेलादे, द्वितीया माल्हणदे, मेलादेकुक्षिसंभूत सा० श्रीसहणपालः । माल्हणदे कुक्षिसरोजराजहंसोपमजिनधर्मकर्पूरवातसघधीतुक (?) सा० सारङ्गः । तदङ्गना हेमादे लखमादे परिवारसहितेन सा० सारङ्गेन निजभुजोपार्जितलक्ष्मीसफलीकरणार्थं निरुपममद्भुतं श्रीमत् श्रीशान्तिजिनवरबिम्बं सपरिकरं कारितं । प्रतिष्ठितं श्रीवर्द्धमानस्वाम्यन्वये श्रीमत्खरतरगच्छे श्रीजिनराजसूरिपट्टे श्रीवर्द्धनसूरिस्तत्पट्टे श्रीजिनचन्द्रसूरिस्तत्पट्टपूर्वाचलसहस्र-

करावतारैः श्रीमज्जिनसागरसूरिभिः" इत्येतल्लेखविलोकनेन च सुस्पष्टं स्पष्टीभवति श्रीमज्जिनसागरसूरिवर्य्यस्याऽस्य वैक्रमीये पञ्चदशे शतके विपुलविपुलाविलासिनीविशालजालस्थलतिलकायिता सत्ता ।

अनेकदुर्मदवादिद्विरदमदमर्दनदक्षाणां स्वपरसिद्धान्ताध्ययनाध्यापनकर्मदक्षाणां जङ्गमकल्पवृक्षाणां विनिर्मायाऽज्ञानतिमिरभास्कर-जैनतत्त्वादर्श-तत्त्वनिर्णयप्रासाद-सम्यक्त्वशल्योद्धार-चिकागोप्रश्नोत्तरादींस्तत्त्वनिचयखचिताननेकशो ग्रन्थानाङ्कुर्वाणदेशीयानेकविद्वज्जनमनःसन्देहसन्दोहनिराकरिष्णूनां त्रिजगज्जेतृमनोजवीरजिष्णूनां विद्वज्जनधुर्याणां भव्याम्भोजप्रबोधसूर्याणां श्रीमतां विजयानन्दसूरीणां पट्टपूर्वाचलभास्कराणां विविधशास्त्रतत्त्वावबोधनाऽपरिश्रान्तचेतस्कानां धैर्यौदार्यगाम्भीर्याद्यनेकगुणगणगरिष्ठानां निखिलविज्ञानिगणवरिष्ठानां श्रीमतां विजयकमलसूरिपुरन्दराणां शिष्यवर्य्येण विज्ञानिजनधुर्येण श्रीमद्दीडरीयप्रमुदितसकलसङ्घप्रदत्तजैनरत्नव्याख्यानवाचस्पतिबिरुदधारिणा परोपकारिणा श्रीमता गुणवता लब्धिविजयमुनिना भूयसा परिश्रमेण संशोधिताऽस्य प्रतिकृतिस्तेन तस्य मुनिवर्य्यस्य महीयांसमुपकारं मन्यामहे वयम् ।

एतेषामेव सूरीश्वराणां वचनामृतसेकसंवर्द्धितामन्दानन्दसन्दोहमकरन्दकन्द इलादुर्ग्गवासिप्राग्वाटज्ञातीयगान्धिमगनलालहीराचन्द्र ईडरीयप्रान्तान्तर्गतगांठियोलग्रामवास्तव्यश्रेष्ठिवर्य्यहीराचन्द्रलक्ष्मीचन्द्रस्य श्रेयोऽर्थमेतत्सत्कमेवार्थमस्य श्रीकर्पूरप्रकरनाम्नो ग्रन्थरत्नस्य मुद्रापणार्थमदाद् अतः सोऽपि भूयसां धन्यवादानां पात्रम् ।

तथैव च सुविहितश्रमणगणनिषेव्यमाणचरणारविन्दयुगलानां प्रावृड्घनगर्जितमत्तमातङ्गनादानुकारिनादानां श्रीमद्वीरविजयोपाध्यायपादानां शिष्येण सूरीश्वरचरणनुजिष्येण अनुयोगाचार्येण कारापितानेकोपधानयोगोद्वहनादिविशुद्धकार्येण श्रीमता दानविजयगणिनाऽप्यनर्गलप्रयासेन सावधानमनसाऽस्य मुद्रणयन्त्रसमागतद्वितीयप्रुफशोधनकर्माऽकार्यतोऽस्यापि महात्मन उपकृतिं न नेष्यामो विस्मृतिपथम् ।

अस्य च ग्रन्थरत्नस्य संशोधनकर्मणि पुस्तकत्रितयमुपलब्धं तत्र प्रथमं जैनाचार्यश्रीमद्विजयकमलसूरिवर्य्याणामेव पुस्तकभाण्डागारसत्कं नातिशुद्धम् ।

द्वितीयमस्मदीयगुरुवर्य्यश्रीमदमरविजयमुनिमतल्लिकानां चित्कोषसत्कं नूतनमनतिशुद्धं च ।

तृतीयं प्रतापगढनिवासिश्राद्धवर्य्यघीयालक्ष्मीचन्द्रसत्कं शुद्धप्रायम् । एतत्पुस्तकत्रयाधारेण संशोधितेऽप्यस्मिन् ग्रन्थे चक्षुर्दोषसञ्जाता मुद्रणयन्त्रनियुक्तशीशकाक्षरनियोजकजनसमाचरिता वा याऽक्षरपतनपरावर्त्तनादिरशुद्धिर्भवेत् तां प्रमार्जन्तु गुणगणसुवर्णपरीक्षणकषपट्टायमानाः सन्तः, नयन्त्वस्मदीयं परिश्रममेनं पठनपाठनवाचनोपदेशनादिना फलेग्रहीतामिति प्रार्थयते—

जैनाचार्यन्यायाम्भोनिधि श्रीमद्विजयानन्दसूरीश्वर (प्रसिद्ध नाम श्रीमदात्मारामजी महाराज) स्याऽन्तिमान्तेवासि–दक्षिणविहारिशान्तमूर्त्ति श्रीमदमरविजयमुनिपुङ्गवचरणारविन्दचञ्चरीकायमाणश्चतुरविजयो मुनिः । स्खल. रुन्नोई ।

"गच्छतः स्खलनं क्वापि, भवत्येव प्रमादतः । हसन्ति दुर्जनास्तत्र, समादधति सज्जनाः ॥"

॥ ॐनमः सर्वसिद्धेभ्यः ॥

॥ श्रीकर्पूरप्रकरस्य विषयानुक्रमणिका ॥

द्वारम्	श्लोकाङ्कः	विषयः	पत्राङ्कः
०	१	मङ्गलाऽभिधेयप्रयोजनानि	१
०	२	द्वारनिरूपकगाथा	२
१	३	आर्यदेशप्रज्ञाववर्णने श्रीआर्द्रकुमारकथानकम्	२
	४	आर्यदेशविशेषमहिमवर्णने आर्यदेशादि प्रदेशिनृपकथा च	६
२	५	तिर्यञ्चवपि धर्मप्रज्ञावात् सज्ञतिप्राप्तौ धरणेन्द्रकथानकम्	८
	६	तिर्यग्गतावपि धर्म्मप्राप्तौ कम्बलशम्बलकथानकम्	१५
३	७	नरज्ञवस्वरूपं, तद्दुष्करता, तत्प्राप्तौ धर्मसाधने मेघकुमारकथा	१७
	८	नरज्ञवप्राप्तेर्विशेषवर्णनेऽष्टपञ्चाशदुत्तरशतकर्म्मप्रकृतिनिरूपणं प्रसन्नचन्द्रराजर्षिकथानकञ्च	१९
४	९	हीनकुलेऽपि कस्यचिद्धर्म्मप्राप्तौ सुलसकथानकम्	२१
	१०	सत्कुलमाहात्म्यवर्णने उदायननृपप्रज्ञावतीराज्ञीकथानकम्	२३

द्वारम्	श्लोकाङ्कः	विषयः	पत्राङ्कः
५	११	साधुसङ्गतौ तामलर्षिकथानकम्	२७
	१२	साध्वसाधुसङ्गतिसद्भूतगुणदोषविषये गिरिशुकपुष्पशुकयोः कथानकम्	२८
६	१३	साधुसङ्गतेर्बोधप्राप्तौ चिलातीपुत्रकथानकम्	२९
	१४	बोधवचःश्रवणगुणनिरूपणे रौहिणेयस्तेनकथानकम्	३१
७	१५	सम्यक्त्वस्वरूपनिरूपणे श्रेणिकनरपतिकथानकम्	३३
	१६	निर्मलसम्यक्त्वपालने सुलसाश्राविकाकथानकम्	३६
८	१७	देवतत्त्वाराधनस्वरूपे सेरुककथानकम्	३८
	१८	त्रिशुद्ध्या जिनस्मरणादिष्टफलप्राप्तौ जीर्णश्रेष्ठिकथानकम्	४०
९	१९	गुरुस्वरूपनिरूपणे श्रीगौतमस्वामिकथानकम्	४२
	२०	कुगुरौ जमालिकथा सुगुरौ वज्रस्वामिकथा च	४३
१०	२१	धर्मस्वरूपनिरूपणे शय्यम्भवकथानकम्	४६
	२२	अविवेकिनां धर्मे प्रमादित्वाविर्भावने शशिराजकथानकम्	४७
११	२३	शक्तौ सत्यां बाह्येऽपि धर्मकरणेऽतिमुक्तमुनिकथा, मदालसापुत्रकथा च	४८

द्वारम्	श्लोकाङ्कः	विषयः	पत्राङ्कः
	२४	शक्तिरहितास्तिर्यञ्चोऽपि केऽपि धर्मं चक्रुरतः शक्तिमता धर्म्मे न प्रमाद्यमित्यत्र बलन्नऽमुन्युपासकारण्यकमृगकथानकम् पुण्याढ्यकथानकञ्च	४९
१२	२५	शमफलनिरूपणे गजसुकुमारमुनिकथानकम्	५२
	२६	क्षमावान् स्वपरयोरपि शुभाय भवति इत्यत्र चण्डरुद्रशिष्यकथानकम् विशालचोरकथानकञ्च	५३
१३	२७	व्रतखण्डने पालने च कण्डरीकपुण्डरीकभ्रातृद्वयकथानकम्	५५
	२८	पापात्मनो निरतिचारव्रतपालनस्यापि निष्फलत्वख्यापने उदायननृपमारकश्रमणवेषधारककथानकम्	५७
१४	२९	अणुव्रतनिरूपणे श्रीआणन्दश्रावककथानकम्	५८
	३०	गृहिधर्ममाहात्म्यवर्णने कामदेवश्रावककथानकम् ।	५९
१५	३१	दयाधर्मपालने निर्दयत्वे च श्रीवज्रायुधचक्रिणः श्रीवीरजिनोपसर्गकारकसङ्गमाऽभिधाधमामरस्य च कथानकम्	६०
	३२	जीवदयायां श्रीनेमिनाथजिनकथानकम्	६२
१६	३३	मृषावादविरमणव्रतपालने श्रीकालिकाचार्यकथानकम्	६४

द्वारम्	श्लोकाङ्कः	विषयः	पत्राङ्कः
	३४	असत्यवचनान्नरकगतिगमने पूजाविधुरत्वे च वसुराजकथा ब्रह्मादिकथा च	६६
१७	३५	स्तेयव्रते दृढप्रहारिकथानकम्	६८
	३६	चौर्यात् कलावतोऽपि लाघवत्वे आम्रचोरकथानकम्	६९
१८	३७	ब्रह्मव्रतगुणनिदर्शनम्	७१
	३८	ब्रह्मव्रतमहिमवर्णने सुदर्शनश्रेष्ठिकथानकम्	७२
१९	३९	परिग्रहाऽपरिमाणे नन्दराजकथानकम्	७७
	४०	परिग्रहाऽसन्तोषे मम्मणश्रेष्ठिकथानकम्	७८
२०	४१	दिग्विरमणव्रताऽनियमे चारुदत्तकथानकम्	७९
	४२	दिग्गमनविरतिरहितस्य न क्वाऽप्यगम्यमित्यत्र कृष्णवासुदेवस्य औपद्यानयनार्थमपरकङ्कागमनकथानकम्	८२
२१	४३	भोगोपभोगव्रते वङ्कचूलकथानकम्	८५
	४४	भोगलोलुपतायां गौतमर्षिकलत्ररतेन्द्रोपाख्यानम्	८९
२२	४५–४६	अनर्थदण्डव्रतेऽशोकचन्द्र (कूणिक) नृपकथानकम्	९०
२३	४७–४८	सामायिकव्रते चन्द्रावतंसककथानकम्	९१

द्वारम्	श्लोकाङ्कः	विषयः	पत्राङ्कः
२४	४९	देशावकाशिकव्रते कोकाशकाकजङ्घकथानकम्	९२
	५०	देशावकाशिकव्रतविशेषवर्णनम्	९४
२५	५१	पोषधव्रतवर्णने मेघरथनृपकथानकम्	९४
	५२	पोषधव्रते सागरचन्द्रकथानकम्	९५
२६	५३–५४	अतिथिसंविभागव्रते शालिभद्रकथानकम्	९६
२७	५५	सप्तक्षेत्र्यां धनवपने संप्रतिनृपकथानकम्	१००
	५६	सप्तक्षेत्रमहिमवर्णने श्रीदत्तराजकथानकम्	१०२
२८	५७–५८	अर्हद्बिम्बनिर्मापणफलम्	१०४
२९	५९	चैत्यविधापनेऽश्वावबोधचैत्यकथानकम्	१०४
	६०	चैत्यविधापनोपदेशे बाहुबलिकथानकम् श्रीभरतचक्रिकारिताऽष्टापदचैत्यकथानकम् च	१०६
३०	६१	इतरशास्त्रेषु विद्यानपि त्रिभुवनहितकारकं श्रुतज्ञानमधीते इत्यत्र श्रीआर्यरक्षितसूरीश्वरकथानकम्	१०७
	६२	श्रुतभक्तिविषये वर्णनम्	१०९

द्वारम्	श्लोकाङ्कः	विषयः	पत्राङ्कः
३१	६३–६४	श्रीसङ्घमहिमवर्णनम्	१०९
३२	६५	सुसाधुभक्तिविषये धनगृहपतिजीवानन्दवैद्यकथानकम्	११०
	६६	मुनीनां भक्तपानवसनासनौषधादीनां दानस्य वैयावृत्त्यस्य च फलम्	११२
३३	६७	साध्वीभक्तिवर्णने पुष्पचूलासाध्वीकथानकं मृगावतीकथानकञ्च	११३
	६८	श्रुतरता साध्व्यपि दुर्बोधहन्त्री भवत्यत्र कुबेरदत्तासाध्वीकथानकम् याकिनीमहत्तरासंबन्धश्च	११९
३४	६९	श्राद्धभक्तौ भरतचक्रिकथानकम्	१२२
	७०	कदाचिच्छ्रावका निःस्पृहाणां साधूनामपि बहुमान्या भवन्त्यत्र श्रीभद्रबाहुस्वामिकथानकम्	१२३
३५	७१	श्राविकास्वरूपवर्णनं श्रीऋषभजिनजननीमरुदेवासंबन्धः	१२५
	७२	अमलशीलपालने सुभद्रासतीकथानकम्	१३०
३६	७३	जिनार्चाविधाने श्रीश्रेणिकनृपकथानकम्	१३२
	७४	जिनपूजां कुर्वतां पुंसां विपद्यपि सुखं भवतीत्यत्र श्रीनलनरपतिदवदन्तीकथानकम्	१३३

द्वारम्	श्लोकाङ्कः	विषयः	पत्राङ्कः
३७	७५	नीतौ श्रीरामनृपकथानकम्	१४६
	७६	न्याय एव ब्रह्मदत्तचक्रवर्त्तिकथानकम्	१५४
३८	७७	विनये नमिविनमिकथानकम्	१५४
	७८	अविनयस्यानादेयतायां वृद्धकरयद्धकथानकम्, नमुचिकथा च	१५५
३९	७९	वैराग्ये सनत्कुमारचक्रवर्त्तिकथानकम्	१५९
	८०	वैराग्यहेतौ सति वैराग्योत्पत्तौ करकंडादिप्रत्येकबुद्धचतुष्ककथानकम्	१६३
४०	८१–८२	सुपात्रदाने चन्दनबालाकथानकम्	१६८
४१	८३	ब्रह्मचर्यव्रते निश्चलतायां श्रीस्थूलभद्रमुनिकथानकम्	१७१
	८४	सुविशुद्धशीलपालकजनप्रशंसायां श्रीवयरस्वामिकथानकम्	१७७
४२	८५	तपःप्रभावेण देवपर्षद्यपि शोभाप्राप्तौ शिवकुमारकथानकम्	१७८
	८६	तपःप्रभाववर्णने नन्दिषेणमुनिकथानकम्	१८०
४३	८७	भावनयाऽपवर्गपदप्राप्तौ वल्कलचीरिकथानकम्	१८३
	८८	भावनाप्रभावाविर्भावने इलापुत्रकथानकम्	१८६
४४	८९–९०	धर्मप्रभावेऽजितजिनसगरचक्रिकथा मल्लिजिनकथा च	१८७

द्वारम्	श्लोकाङ्कः	विषयः	पत्राङ्कः
४५	९१	विषयदुरन्ततायां सत्यकिकथानकम्	१९२
	९२	अतिविषयसेवनया कुगतिप्राप्तौ ब्रह्मदत्तचक्रिकथानकम्	१९४
४६	९३	शब्दविषयदुरन्तताख्यापने शय्यापालककथानकम्	१९८
	९४	सदुपदेशगीतश्रवणे लाज इत्यत्र क्षुल्लककुमारकथानकम्	१९९
४७	९५	रूपविषयदुरन्ततायां कुमारनन्दि (हासाप्रहासा) कथानकम्	२०१
	९६	ब्रह्मचर्यव्रतवता स्त्रीचित्रमपि न निरीक्षणीयमिति वर्णनम्	२०२
४८	९७	रसविषयस्य सेवने त्यागे च मङ्गुसूरिकथानकम् ढण्ढणकुमारमुनिकथानकञ्च	२०२
	९८	महात्मा रसेन्द्रियेण न जीयत इत्यत्र धर्मरुचिमुनिकथानकम् परमतोक्तो वह्निवानलसंबन्धः, नीलकण्ठसंबन्धश्च	२०३
४९	९९	गन्धविषयदुरन्ततावर्णने सुबन्धुमन्त्रिकथानकम्	२०६
	१००	गन्धद्रव्यैः शरीरयत्नः परिहरणीयः, यतो निसर्गतः शरीरं दुर्गन्धतास्थानमिति वक्तव्यतायां लोढक (मृगापुत्र) कथानकम्	२०७
५०	१०१	स्पर्शलम्पटतायां चण्डप्रद्योतनृपकथानकम्	२०९
	१०२	स्पर्शविषयसुखस्य तुच्छत्वख्यापनोपदेशः	२१२

द्वारम्	श्लोकाङ्कः	विषयः	पत्राङ्कः
५१	१०३	व्यसनसप्तकत्यागवर्णने श्रीकुमारपालनृपकथानकम्	२१२
	१०४	सत्कर्माऽप्यतिसेवया व्यसनमेत्यत्र श्रीगौतमस्वामिदृष्टान्तः	२१३
५२	१०५	द्यूतव्यसनदुरन्ततावर्णने पाण्डवकथा	२१४
	१०६	द्यूतव्यसनत्यागोपदेशः	२१५
५३	१०७	मांसभक्षणान्मनुजो नरकादिदुःखभाग्भवत्यत्र हरिनृपकथानकम्	२१५
	१०८	आमिषलोलुपानां हृदि स्नेहो दयाऽपि न स्यादित्यत्र चेल्लणाकथानकम्	२१६
५४	१०९	मद्यव्यसने जीवयशःकथानकम्	२१७
	११०	सुरापानस्य विषमफलवर्णनम्	२१९
५५	१११	वेश्यावशीभूतानां जीवानां दुःखप्राप्तौ कृतपुण्योदाहरणम्	२१९
	११२	वेश्यासंबन्धाद्दुर्गतिगमने कूलवालकमुनिकथानकम्	२२३
५६	११३	मृगयाव्यसने शान्तनुनृपकथानकम्	२२५
	११४	मृगयाव्यसनवर्णने खाण्डवाग्निकथा, जरासुतकथा, श्रीदशरथकथानकञ्च	२२६
५७	११५	चौर्यव्यसनेनाऽत्र परत्र च दुःखसम्भवे सगरचक्रिपुत्रकथानकम्	२२८
	११६	चौर्यकरणेन मृत्युप्राप्तौ मणिकचोरकथानकम् ब्रह्मसंबन्धः, रुद्रसंबन्धश्च	२२९

द्वारम्	श्लोकाङ्कः	विषयः	पत्राङ्कः
५८	११७	परस्त्रीरिरंसाव्यसनदुरन्ततानिरूपणे रावणकथानकम्	२३१
	११८	परस्त्रीसङ्गतिदुष्फलवर्णने चन्द्रकथानकम्	२३२
५९	११९	कषायदुरन्ततावर्णने सुन्नूमचक्रिजमदग्निकथानकम्	२३३
	१२०	कषायपारवश्यात् केचिज्जीवाः कृत्यमकृत्यं वा न जानन्त्यत्र चाणक्यकथा	२३५
६०	१२१	क्रोधजये कूरगडुकमुनिकथानकम्	२३९
	१२२	क्रोधजये क्रोधकरणे च मेतार्यमुनिकथानकं, करकुरुकथानकञ्च	२४०
६१	१२३	मानकरणे नन्दिषेणकथानकं, तारककथा च	२४४
	१२४	मानादवह्लीलनाप्राप्तौ चमरेन्द्रकथानकम्	२४५
६२	१२५	मायावर्णने श्रीवर्द्धमानजिनमुष्टिहतकैतवमित्रायितसुरकथा कर्णनृपकथा श्रीशकथानकञ्च	२४६
	१२६	मायायाः सर्वकषायाधिक्यवर्णनेऽषाढभूतिमुनिकथानकं दुर्दान्तदैत्यकथानकञ्च	२४८
६३	१२७	लोभकषायवर्णने भरतचक्रिकथानकम्	२४९
	१२८	लोभस्य कलिवृक्षौपम्यं कपिलमहर्षिकथानकञ्च	२५१

द्वारम्	श्लोकाङ्कः	विषयः	पत्राङ्कः
६४	१२९–१३०	वर्षाऋमाश्रमणोपदेशः	२५३
६५	१३१–१३२	प्राघुर्णकवन्दनोपदेशः	२५४
६६	१३३–१३४	आषाढचातुर्मासकोपदेशः	२५४
६७	१३५–१३६	पारणकोपदेशः	२५५
६८	१३७–१३८	व्याख्यानप्रारम्भयोग्योपदेशः	२५५
६९	१३९–१४०	पुण्यतिथिवर्णनम्	२५६
७०	१४१	सम्यक्त्वरूपरक्षापर्वोपदेशः	२५७
७१	१४२–१४३	पर्यूषणापर्वोपदेशः	२५८
७२	१४४–१५२	अष्टाह्निकोपदेशः	२५९
७३	१५३	दीपालिकापर्वोपदेशः	२६२
७४	१५४–१५५	व्याख्यानसमर्थनोपदेशः	२६२
७५	१५६	विहारवर्णनम्	२६३
७६	१५७	वर्षाचातुर्मासकस्वरूपम्	२६४
७७	१५८–१५९	कार्त्तिकचातुर्मासकोपदेशस्तत्पारणकोपदेशश्च	२६४

द्वारम्	श्लोकाङ्कः	विषयः	पत्राङ्कः
७८	१६०–१६१	सङ्घार्चनोपदेशः	२६५
७९	१६२–१६३	फाल्गुनचातुर्मासकयोग्योपदेशः	२६६
८०	१६४–१६६	कल्याणकदिवसवर्णनम्	२६६
८१	१६७–१६८	महापूजास्वरूपम्	२६७
८२	१६९–१७०	चैत्यपरिपाटीवर्णनम्	२६७
८३	१७१–१७३	उद्यापनवर्णनम्....	२६८
८४	१७४	ध्वजारोपणद्वारम्	२६८
८५	१७५	अष्टविधजिनपूजाफलम्	२६९
८६	१७६	अष्टमङ्गलस्वरूपम्	२६९
८७	१७७–१७८	मुक्तिवर्णनम्	२७०
	१७९	ग्रन्थकर्त्तुर्नामख्यापकं वृत्तं, टीकाकारप्रशस्तिश्च	२७१

॥ उपोद्घातः ॥

विदांकुर्वन्तु सहृदयाः सज्जनाः यत्केचिद्ग्रन्थाः श्राद्धविध्यादयः स्वस्वविषयनाम्ना केचिन्महावीरचरित्रादयः वर्ण्यमाननायकनाम्ना केचिदुपदेशप्रासादादयो धर्मसंबन्धिविविधविषयकोपदेशतया सामान्येनैवोपदेशनाम्ना केचिद्भक्तामरपञ्चविंशत्यादयः कर्तृनाम्ना केचिच्च नक्तामरादयः आदिपदनाम्नेत्येवं विविधान्निप्रायेणान्वर्थनामानः सुप्रसिद्धा वरिवर्तन्ते, तत्रायं ग्रन्थो विविधधर्मोपदेशविषयोऽपि पूज्यपादेन कर्त्राऽऽदिपदनाम्ना विवक्षितः । अन्ये नक्तामरादय आदिपदनाम्ना प्रसिद्धा ग्रन्थाः केवलं भगवत्स्तुतिविषयाः, नैवमयमपीति स्फुटमेव, अतो नास्य काव्यानि चैत्यादिषु स्तुतिरूपतया पठितुमर्हाणि । मूलकारेण विविधविषयोपरि विविधछन्दोवृत्तमयानि काव्यानि वक्तृश्रोतृजनमनआह्लादकानि प्रायेण सर्वधार्मिकविषयोपदेशकानि सर्वाग्रेण एकोनाशीत्यधिकशतसङ्ख्याकानि कृतानि । तत्र प्रथमेन काव्येन मङ्गलं, द्वितीयेन सप्ताशीतिद्वारनामानि, तदनन्तरं प्रतिद्वारं काव्ययुग्मक्रमेण एकोनसप्ततिर्द्वाराणि निरूपितानि, ततःपरं एकैकं द्वारं क्वचिदेकैकेन क्वचिद् द्वाभ्यां द्वाभ्यां काव्याभ्यां क्वचिच्च तदधिकैरपि काव्यैः यावदुपान्त्याभ्यां काव्याभ्यां चरमं मुक्तिद्वारं वर्णितं, चरमेण च श्लोकेन ग्रन्थकर्त्रा स्वाभिधानमभिहितम् । त्रिषष्टितमद्वारपर्यन्तं प्रतिद्वारं तत्तद्विषयः आगमोक्तदृष्टान्तेन दृढीकृतः, टीकाकारेण च मूलार्थं व्या-

ख्याय मूलोक्तं दृष्टान्तं गद्यपद्यात्मकेन कथानकेन सोपनयं विवृतमित्येतत्सर्वमनुक्रमणिकातोऽवसेयं । ग्रन्थश्चायमुपदेशविषये व्याख्यानादिषु महोपकारकारको भव्यानामिति एतत्पठनपाठनश्रवणकारिणः स्वयमेव ज्ञास्यन्तीति नात्रास्माकं कथनापेक्षा ।

ग्रन्थस्यास्य कर्तुष्टीकाकारस्य च यथाज्ञातं वृत्तान्तं प्रस्तावनातो ज्ञेयम् ।

किंचास्मिन् द्वारनिरूपके द्वितीयस्मिन् श्लोके द्वाराङ्का लेखकप्रमादेनान्येन वा केनचित्कारणेन विपरावर्तिताः, तत् प्रेसकापीकरणावसरे तच्छोधनावसरे च ज्ञप्तस्थत्वेन न ज्ञातं, अन्यदपि च प्रमादस्खलितं पश्चाज्ज्ञातं, अतो द्वितीयकाव्यस्य तृतीयपादान्तं चतुर्थपादं चेत्थं ज्ञेयं—"दानादि ४३ पुष्टिं ४४, शब्द ५० द्यूत ५८ क्रुधादे ६३ र्जयमपि सुकृताहेषु ८२ सत्कर्म ८६ मुक्त्यै ८७ ॥" अन्यच्च चतुःषष्ट्यधिकद्विशततमे पत्रे सप्तपञ्चाशदधिकशततमश्लोकस्येत्थमवतरणं बोध्यं—"उक्तं पञ्चसप्ततितमं द्वारं, अथ वर्षाचातुर्मासस्वरूपमाह" इति ।

ग्रन्थस्यास्य प्रेसकापी प्रथमप्रुफशोधनं च संसद्वास्त्रिणा जेठालालशर्मणा कारितम् । प्रेसकापीशोधनं व्याख्यानवाचस्पतिमुनिश्रीलब्धिविजयेन द्वितीयप्रुफशोधनं च पूज्यपाद पं०श्रीदानविजयगणिभिः कृतमिति तेषां गुरुपादानां महोपकारं मन्यामहे ।

एतद्ग्रन्थमुद्रापणे गणधरगुणविराजितानां पूज्यानां श्रीविजयकमलसूरीश्वराणां सदुपदेशेन प्रस्ता-

वनोक्त-इलाकुर्गवासिना गांधि मगनलाल-हीराचन्देण श्रेष्ठिवर्यहीराचन्द-लक्ष्मीचन्दसत्कद्रव्यसाहाय्यं दत्तमस्त्यतः पूज्यानां महोपकारं साहाय्यदातुश्च धन्यवादं मन्यामहे ।

यन्त्रदोषेण प्रुफशोधकदृष्टिदोषादिना चावशिष्टानि स्खलनानि विद्वद्भिः शोधनीयानि ज्ञापनीयानि च कृपया यतो द्वितीयावृत्तौ तद्विषये यत्यते । इति शम् ॥

संवत् १९७९
भाद्रशुक्ल पञ्चमी

प्रकाशयित्री
श्रीजैनधर्मप्रसारक सभा.
भावनगर.

॥ श्रीहरिविरचितः ॥

कर्पूरप्रकरः ।

(श्रीजिनसागरसूरिविरचितटीकया संवलितः)

स श्रेयसीं श्रियमजस्रमपश्चिमोऽर्हन्, विश्राणयत्वसुमतां बहुभक्तिभाजाम् ।
यन्नामसंस्मरणमस्यति विश्वपङ्का-शङ्कां यथा सुरसरिद्वरवारिपूरः ॥ १ ॥
हंसः खगोऽप्युदकदुग्धविदाविदग्धो, जज्ञे जनेऽत्र समुपासनतोऽपि यस्याः ।
तस्याः स्पृशामि शिरसा चरणारविन्दं, देव्या गिरोऽतिगुरुभक्त्यनुरक्तचित्तः ॥ २ ॥
तस्मै नमः स्वगुरवे यस्मादज्ञानमेति नाशमहो । खरकरकरनिकरादिह तिमिरप्राग्भार इव लोके ॥ ३ ॥
उत्साहयत्यत्र जनानशेषान्, दोषाननादाय गुणान् प्रकाश्य ।
यः सज्जनः सोऽस्तु मम प्रसन्नो, निःसीमसौजन्यपयःपयोधिः ॥ ४ ॥

---

१ अतिप्रशस्याम्. २ खरकरः सूर्यः.

काव्यालयं सौवविरूपशब्दैरुद्भासयत्याशु निविश्य योऽत्र । दोषैकदृष्टिर्न हि दृष्टिमार्गे, स दुर्जनः कौशिकवद्विधेयः ॥ ५ ॥
यदीयदुर्वाक्यपदप्रबन्धान्नीता सतीव व्यभिचारमार्गे । गीर्मे न संसर्गयति प्रधानो, बन्धुः कथं नापि स दुर्जनोऽपि ॥ ६ ॥
मूढोऽपि मूढबोधार्थं प्रसत्त्यात्मीयसद्गुरोः । कर्पूरप्रकरस्येमां वृत्तिं विरचयाम्यहम् ॥ ७ ॥

इह हि शास्त्रप्रारम्भावसरे सन्तः प्रवर्तमानाः समुचितेष्टदेवतानमस्कारपुरस्सरमेव प्रवर्तन्त इति शिष्टाचाराचरणार्थं मङ्गलार्थं विघ्नाभावेन शास्त्रपरिसमाप्त्यर्थं च ग्रन्थकर्ता इष्टदेवतास्मरणार्थमिदमाह—

कर्पूरप्रकरः शमामृतरसे वक्त्रेन्दुचन्द्रातपः, शुक्लध्यानतरुप्रसूननिचयः पुण्याब्धिफेनोदयः ।
मुक्तिश्रीकरपीडनाभ्यसिचयो वाक्कामधेनोः पयो, व्याख्यालक्ष्यजिनेशपेशलरदज्योतिश्चयः पातु वः । १ ।

व्याख्या—व्याख्यायां धर्मदेशनायां लक्ष्यो वीक्ष्यो योऽसौ जिनेशस्य श्रीसर्वज्ञस्य पेशलरदज्योतिश्चयः प्रधानदन्तकान्तिसमूहः स वो युष्मान् पातु रक्षतु । संसृतिसरित्पतिपातादिति शेषः । नाविशेषणा विशेष्यबुद्धिरितिन्यायाद्विशेषणमाह—किंविशिष्टः ? शमामृतरसे उपशमसुधारसे कर्पूरप्रकरः कर्पूरसमूह इव कर्पूरसमूहः । अत्रेवशब्दस्य लुप्तत्वाद् गूढोत्प्रेक्षालङ्कारः । एवं सर्वेषु विशेषणेषु इवलोपो ज्ञेयः । अन्यत्राप्यमृतरसे कर्पूरप्रकरेण श्लाघ्यता स्यादिति । पुनः किंविशिष्टः ? वक्त्रेन्दोर्मुखचन्द्रस्य चन्द्रातप इव ज्योत्स्नेव । पुनः किंविशिष्टः ? शुक्लध्यानमेव तरुर्वृक्षस्तस्य प्रसूननिचय इव पुष्पसमूह इव । पुनः किंविशिष्टः ? पुण्यमेवाब्धिः समुद्रस्तस्य फेनोदय इव फेनोल्लास इव । तथा भूयः किंविशिष्टः ? मुक्ति-

श्रियः सिञ्चिवध्वाः करपीरुने पाणिग्रहणोत्सवेऽभ्रसिचय इवाभ्रवस्त्रमिव, पाणिग्रहणे किल कोराभ्रवस्त्रं शोभनाकारि स्यादिति भावः। पुनः किंविशिष्टः ? वागेव गीरेव कामधेनुस्तस्याः पय इव दुग्धमिवेति काव्यार्थः ॥ १ ॥

अथ प्रस्तुतशास्त्राभिधेयसंबन्धप्रयोजनसूचनार्थमिदमाह—

भव्या लब्ध्वार्यदेशं १ कथमपि २ नृभवं ३ सत्कुलं ४ साधुसङ्गम् ५,
बोधं ६ देवादि १० शक्तीः ११ कुरुत शम १२ यति १३ श्रावकत्व १४ व्रतानि २६ ।
सप्तक्षेत्री ३५ जिनार्चा ३६ नय ३७ विनय ३८ सुवैराग्य ३९ दानादि ४३ पुष्टिं,
शब्द ४९ द्यूत ५७ क्रुधादे ६२ र्जयमपि सुकृताहेषु ७२ सत्कर्म ७७ मुक्त्यै ॥ २ ॥

व्याख्या—हे भव्या ! आर्यदेशं कथमपि महता कष्टेन "चुल्लग पासग धन्ने जूए रयणे य सुमिण चक्के य। कुम्मजुगे परमाणू दस दिट्ठंता मणुयलंभे ॥ १ ॥" एभिर्दृष्टान्तैर्दुर्लभत्वान्नृभवस्य कथमपीत्युक्तं। नृभवं नृजन्म, सत्कुलं प्रधानकुलं, साधुसङ्गं, बोधं ज्ञानं, देवादीन् सम्यक्त्वदेवगुरुधर्मान्, शक्तिं सामर्थ्यं च लब्ध्वा प्राप्य, शमयतिश्रावकत्वव्रतानि सप्तक्षेत्री जिनार्चा नयविनयसुवैराग्यदानादेः पुष्टिं पोषं, शब्दरूपरसगन्धस्पर्शद्यूतमांसमद्यवेश्यापापर्धिचौरीपरस्त्रीसेवाक्रोधमान-मायालोभजयं, अपि पुनः, सुकृताहेषु पुण्यदिवसेषु, सत्कर्म पुण्यकार्यं च मुक्त्यै मोक्षाय कुरुतेति। अत्रानुक्ता अपि चकारा योज्याः। अत्र ग्रन्थे आर्यदेशादीनि सप्ताशीतिद्वाराणि सन्ति, (तानि) यथाक्रमं व्याख्यास्यन्ते। इति वृत्ता-

र्थः । अत्रैतानि द्वाराण्यभिधेयानि । सम्बन्धस्तु वाच्यवाचकलक्षणः, प्रकरणार्थो वाच्यः प्रकरणं वाचकमिति । प्रयोजनं तु द्विविधं, कर्तुः श्रोतुश्च, तदप्यनन्तरपरम्परभेदाद् द्वेधा । तत्र कर्तुरनन्तरं सत्त्वानुग्रहः, श्रोतुश्च प्रकरणार्थज्ञानं । परंपरं द्वयोरपि मोक्षावाप्तिरिति ॥ २ ॥

अथ यथोद्देशस्तथा निर्देश इतिन्यायादाद्यमार्यदेशप्रज्ञावमाविर्भावयितुमाह—

कोऽपि स्याल्लघुकर्मकः सुकृतधीर्देशेऽप्यनार्ये स्वतः,
तस्याप्यार्द्रकुमारवद्गुणचयः किंत्वार्यदेशाश्रयात् ।
द्वाराब्धौ शशिनोऽथ कौस्तुभमणेः सा श्रीः कुतो याऽभव-
द्गङ्गाशालिनि शम्भुमूर्ध्नि कमलागारे हरेश्चोरसि ॥ ३ ॥

व्याख्या—कोऽपि जीवो लघुकर्मकः स्वल्पकर्मा । अनार्येऽपि न विद्यन्ते आर्या गुरवः सुश्रावका वा यस्मिन् सोऽनार्यस्तस्मिन्नपि देशे । स्वतः स्वयमेव सुकृतधीः पुण्यबुद्धिः स्यात् । किं तु परं तस्यापि सुकृतधियोऽपि जीवस्य गुणचयो ज्ञानादिगुणवृद्धिरार्यदेशाश्रयादेव भवति । किंवत् ? आर्द्रकुमारवत् यथाऽऽर्द्रोऽनार्येऽपि देशे सुकृतधीरभूत्, परं गुणचय आर्यदेशाश्रयादेव तस्याभूदिति हृदयं । एतदर्थानुरूपं लौकिकदृष्टान्तद्वयमाह—द्वाराब्धौ द्वारसमुद्रे शशिनश्चन्द्रस्य सा श्रीः शोभा कुतः स्यात् अपितु न स्यात्, या शम्भुमूर्ध्नि शिवशिरसि गङ्गाशालिनि गङ्गाशोभावति अभवदभूत् । अथ

पुनः कौस्तुभमणेः क्षाराब्धौ सा श्रीः कुतः ? या कमलागारे रमालये हरेर्विष्णोरुरसि हृदि अजवदिति । क्षाराब्धितुल्योऽनार्यदेशः, शशिकौस्तुभसमो जीवः, शम्भुमूर्धहर्युरःसम आर्यदेशः, श्रीतुल्यो गुणचय इति । ईदृशी भावना सर्वत्र काव्ये प्राज्ञैः स्वयं कार्या । मया तु ग्रन्थगौरवभयान्न करिष्यते इति वृत्ताक्षरार्थः ॥ ३ ॥

भावार्थः कथयोच्यते—

नाम्नाऽस्ति मगधो देशः पापलेशविवर्जितः । यत्र दुःखमिवान्यायनामाऽपि ज्ञायते न हि ॥ १ ॥ तत्र राजगृहं नाम पुरं सुरपुरोपमम् । यत्सौन्दर्यं वीक्ष्य लङ्का लज्जितेवाब्धिमाविशत् ॥ २ ॥ तृणीकृतऋषभेणिः श्रेणिकस्तत्र भूपतिः । तदङ्गजश्चतुर्बुद्धिबन्धुरोऽभयमन्त्र्यभूत् ॥ ३ ॥ इतश्चाम्भोधिमध्यस्थे देशे आर्द्रकसंज्ञके । आर्द्रकाख्ये पुरे क्षापो बभूवार्द्रककनामतः ॥ ४ ॥ प्रियायामार्द्रकाख्यायां तस्याभूत्तनयो नयी । आख्ययार्द्रकुमारः सोऽलञ्चक्रे यौवनावनिम् ॥ ५ ॥ तस्यार्द्रकमहीभर्तुः श्रेणिकेन सहाभवत् । पारम्पर्यागता प्रीतिस्तन्मानसनियन्त्रणम् ॥ ६ ॥ अन्येद्युः श्रेणिको भूपो दत्त्वा प्राभृतमद्भुतम् । उपार्द्रकं मन्त्रिणं स्वं प्राहिणोत् प्रीतिहेतवे ॥ ७ ॥ मन्त्रिणाऽथोपनीतं तदादाय प्राभृतं नृपः । स्नेहेन श्रेणिकक्षापं सहृष्टः सुष्ठु तुष्टुवे ॥ ८ ॥ तत आर्द्रकुमारस्तमाख्यत् कः श्रेणिकः प्रभो । येनेदृशी तव प्रीतिः समभूदविनश्वरा ॥ ९ ॥ बभाषे भूपतिर्भूपः श्रेणिकोऽस्ति महाबलः । प्रीतिः परम्परायाता तत्कुले मत्कुले तथा ॥ १० ॥ अथार्द्रककुमारस्तं सस्नेहं स्माह मन्त्रिणम् । कोऽप्यनन्त(न्य)गुणः सूनुरस्ति ते स्वामिनो वद ॥ ११ ॥ उवाच सचिवः सूनुः पञ्चामात्यशताग्रणीः । मत्स्वामिनो धियां धाम नाम्नाऽभयकुमारकः ॥ १२ ॥ समं तेन मम प्रीतिरुचितेति विचिन्त्य सः । मन्त्रिणं

स्माह मा यासीर्मामनापृच्छ्य धीसख ॥ १३ ॥ श्रोतव्यं च त्वया तत्र गच्छता वचनं शुचि। ममाऽन्नयं प्रति प्रीतिद्रुमबीजोपमं खलु ॥ १४ ॥ मन्यष्येवमिति प्रोच्य क्षमापदत्ताश्रयं श्रितः । दिनानि कानिचित्तत्र स सुखेनात्यवाहयत् ॥ १५ ॥ अन्यदाऽऽर्हकभूपालो दत्त्वा मुक्ताफलादिकम् । प्राभृतं भूरि स्वनरं व्यसृजत्सचिवं च तम् ॥ १६ ॥ अन्नयेन समं मैत्रीं चिकीर्षन्नार्हकासुतः । मुक्ताद्यदादन्नयाय करे तस्यैव मन्त्रिणः ॥ १७ ॥ तन्नरो मन्त्रिणा साकं प्राप्य राजगृहं पुरम् । श्रेणिकायान्नयायापि ददौ तत्प्राभृतं क्रमात् ॥ १८ ॥ जगौ सचिवराजोऽथो अन्नयस्येति वाचिकम् । त्वयाऽऽर्हककुमारोऽसौ समं मैत्रीं चिकीर्षति ॥ १९ ॥ दध्यौ ततोऽन्नयो जैनधर्मज्ञः पूर्वजन्मनि । विराधितव्रतो जातोऽनार्यदेशेष्वसौ ध्रुवम् ॥ २० ॥ अथ केनाप्युपायेन कृत्वा तं परमार्हतम् । जवात्सफलयाम्येनं सौवसौहार्दपादपम् ॥ २१ ॥ नूनमासन्नभव्यस्य तस्यार्हद्बिम्बदर्शनात् । उत्पत्स्यते पूर्वजातिस्मृतिः सोऽतः प्रभोत्स्यते ॥ २२ ॥ इति ध्यात्वाऽऽद्यदेवस्य प्रतिमां प्राभृतच्छलात् । अन्नयः प्राक्षिपत् पेटामध्ये रत्नमयीं वराम् ॥ २३ ॥ विसृष्टे श्रेणिकेशेन तस्मिन्नार्हकपूरुषे । तां पेटामन्नयो दत्त्वा तस्मायेवं जगाद च ॥ २४ ॥ दत्त्वाऽऽर्हककुमारस्येमां पेटां प्राभृतैर्भृताम् । एतच्च वाचिकं वाच्यं मदीयं तत्पुरस्त्वया ॥ २५ ॥ भूत्वैकाकी रहस्येतां पेटामुद्घाटयेः स्वयम् । तदन्तर्वस्तु पश्येश्च दर्शयेर्न च कस्यचित् ॥ २६ ॥ ॐमित्युक्त्वा पुमानेष गत्वा च स्वपुरे ददौ । स्वस्वामिस्वामिपुत्राभ्यां तत्तद्दत्तमुपायनम् ॥ २७ ॥ तदेवार्हकुमाराय प्रोवाचान्नयवाचिकम् । गत्वा रहसि तां पेटां ततः सोऽप्युदमुञ्चयत् ॥ २८ ॥ तदन्तःस्थामपश्यच्च प्रतिमामादिमार्हतः । दध्यौ च किञ्चिदङ्गस्यान्नरणं किमिदं वरम् ॥ २९ ॥ दृष्टपूर्वमिदं क्वापि ममे (ये) त्येष विचिन्तयन् । जातजातिस्मृतिः पूर्वभवमेवम-

बोधि सः ॥ ३० ॥ ज्ञवादस्मात्तृतीयेऽहं ज्ञवे कौटुम्बिकोऽज्ञवम् । श्रीवसन्तपुरे सामायिको बन्धुमतीपतिः ॥ ३१ ॥ अन्येद्युः सुस्थिताचार्याद्धर्मं श्रुत्वा प्रियायुतः । आत्तव्रतः क्रमाज्ज्ञातो गीतार्थो गुरुसंनिधेः ॥ ३२ ॥ रागवानेकदाऽज्ञूवं पश्यन् बन्धुमतीं प्रियाम् । निजाज्ञिप्रायमाख्यां च पुरस्तस्याः स्वयोषितः ॥ ३३ ॥ सा मत्स्वशीलरक्षार्थं हित्वा प्राणान्निजान् क्षणात् । गृहीतानशना शुक्लेश्यया देवंज्ञूयमैत् ॥ ३४ ॥ वीक्ष्येत्युत्पन्नवैराग्यरङ्गोऽनशनमाश्रयम् । समाधिना मृतिं प्रापाज्ञूवं च त्रिदशस्ततः ॥ ३५ ॥ च्युतस्ततोऽहमुत्पन्नोऽनार्ये ज्ञग्नव्रतोऽथ माम् । प्रतिबोधयिता यः स बान्धवः सद्गुरुश्च मे ॥ ३६ ॥ केनचिज्ज्ञाग्ययोगेनाज्ञयामात्येन बोधितः । मन्दज्ञाग्योऽहमद्यापि यत्तं ऽद्रष्टुंमनीशिता ॥ ३७ ॥ तदनुज्ञाप्य जनकमार्यदेशं व्रजाम्यहम् । इति ध्यात्वाऽऽर्ऽकासूनुः दमापमित्थं व्यजिज्ञपत् ॥ ३८ ॥ सहाज्ञयकुमारेण तात वाञ्छामि दर्शनम् । सोऽप्यवादीन्मा स्म यासीर्वत्स त्वं तत्र सर्वथा ॥ ३९ ॥ बद्धः पित्राज्ञया सोऽथोत्कंठितोऽप्यज्ञयं प्रति । शयने ज्ञोजने याने नापि प्राप रतिं क्वचित् ॥ ४० ॥ तत्रोड्डीय यियासुः स पार्श्वगानेवमब्रवीत् । कीदृग्राजगृहं ऽगं कस्कोऽध्वा तत्र गम्यताम् ॥ ४१ ॥ विज्ञायार्ऽकराजोऽपि पुत्रज्ञावमथादिशत् । रक्षार्थं पञ्चसामन्तशतान्यस्य सुतस्य सः ॥ ४२ ॥ स वाहवाहनव्याजात् पुर्या निर्याय चागमत् । पूर्वसंकेतितं पोतं समारुह्यार्यनीवृतम् ॥ ४३ ॥ प्रेष्य नित्यं पूज्यमानां प्रतिमामज्ञयाय ताम् । प्रव्रज्यामाददानः सोऽथैवं देवतयौच्यत ॥ ४४ ॥ अद्यापि ते ज्ञोगफलमस्ति कर्म प्रतीक्ष्य तत् । ज्ञुक्त्वा च समये दीक्षोररीकार्या महाशय ॥ ४५ ॥ सुरीगिरमनादृत्य चोरीकृत्य स्वपौरुषम् । आर्ऽकिः सो-

१ स्वर्गमगच्छत्. २ असमर्थः.

ऽथ वैराग्यात् प्रव्रज्यां स्वयमग्रहीत् ॥ ४६ ॥ तीव्रं व्रतं स प्रत्येकबुद्धः शुद्धं समाचरन् । श्रीवसन्तपुरं प्राप विहरँश्चान्यदा सुधीः ॥ ४७ ॥ धर्मध्यानपरस्तत्र बाह्यदेवकुले क्वचित् । कायोत्सर्गं विधायाथ तस्थिवान् स यथासुखम् ॥ ४८ ॥ इतश्च नगरे तत्र देवदत्तस्य गेहिनः । च्युत्वा बन्धुमतीजीवस्तनया श्रीमतीत्यभूत् ॥ ४९ ॥ समं मनोरथैः पित्रोर्वर्धमाना दिने दिने । सा श्रीमती क्रमात्प्राप पांशुक्रीडोचितं वयः ॥ ५० ॥ तदा देवकुले तस्मिन् पौरबालालिभिः समम् । क्रीडितुं पतिवरणक्रीडया श्रीमती गता ॥ ५१ ॥ तत्रोचुर्वृणुत वरमिति बाला मिथोऽथ ताः । काचित्किञ्चिदिति स्वैरमखिला वव्रिरे वरान् ॥ ५२ ॥ जगाद श्रीमती वव्रे सख्य एष मया मुनिः । चारु वृतं चारु वृतमित्याख्यद्देवताम्बरे ॥ ५३ ॥ रत्नानि देवताऽवर्षत्तन्वती स्तनितं घनम् । तज्जिंतज्नयाह्वग्ना श्रीमती तन्मुनेः पदि ॥ ५४ ॥ अनुकूलोपसर्गोऽयमिति विज्ञाय चार्ङ्किः । व्यहार्षीदन्यतः क्वापि स्थितिर्नैकत्र यन्मुनेः ॥ ५५ ॥ निषिद्धस्तां रत्नवृष्टिं देव्या गृह्णन्नृपस्तया । जल्पन्त्याऽस्यै वरणके दत्तं वित्तं मयेत्यदः ॥ ५६ ॥ जग्राह ऋविणं सर्वं श्रीमतीजनकोऽथ तत् । श्रीमतीवरणायागुस्ततोऽन्येबहवो वराः ॥ ५७ ॥ वरं वृण्विति सा पित्रा ज्ञापिता श्रीमती जगौ । वरो वव्रे मया साधुर्यः प्रमाणं स एव मे ॥ ५८ ॥ तद्दत्तं गृह्णता तातानुज्ञातं हि त्वयाऽप्यदः । तस्मै दत्त्वा किमन्यस्मै दत्से नेदं श्रुतं हि किम् ॥ ५९ ॥ सकृज्जल्पन्ति नृपाला: सकृज्जल्पन्ति सज्जनाः । सकृत्कन्याः प्रदीयन्ते त्रीण्येतानि सकृत्सकृत् ॥ ६० ॥ स ज्ञाम्यन् नृङ्गवज्ज्ञेयो वत्से कथमितस्ततः । श्रेष्ठिनेत्युदिता श्रीमत्यूचेऽतिचतुरं वचः ॥ ६१ ॥ तदा गर्जिज्नयाह्वग्ना तदंह्रौ लक्ष्म सुन्दरम् । अज्ञाद्यं तात तेनैवोपलक्ष्याम्यधुनापि तम् ॥ ६२ ॥ श्रेष्ठ्याख्यात् पत्तने येऽत्र समागच्छन्ति साधवः । भिक्षां तं ददती तेन्यो मुनिं

तं प्रविलोकय ॥ ६३ ॥ मुनिन्यो ददती दानं द्वादशाब्द्या तु सार्द्रकिम् । दृष्ट्वोपलक्ष्य चावादीन्मुदिता श्रीमती नृशम् ॥ ६४ ॥ तदा वृतो मया नाथ त्वं त्यक्त्वा मां गतो बलात् । उपलब्धोऽधुना पुण्यैर्यास्यसि क्व प्रभो वद ॥ ६५ ॥ दिव्यां वाचं स्मरन् सोऽथ भूभृदाद्युपरोधतः । पर्यणैषीदिमां भावि नान्यथा येन जायते ॥ ६६ ॥ तस्य स्वैरं चिरं भोगान् भुञ्जानस्य तया समम् । गार्हस्थ्यचिह्नवज्जज्ञे सूनुर्वृद्धिमियाय च ॥ ६७ ॥ उवाचार्द्रकुमारोऽथ सहायोऽयमतः परम् । जविता ते सुतोऽहं तु प्रव्रजामि शुभे वद ॥ ६८ ॥ सुतं ज्ञापयितुं तत्तु प्रारेभे तर्कुकर्म सा । तत्पृष्टया तयाऽऽणि तस्य दीक्षामनोरथः ॥ ६९ ॥ बालकोऽपि जगौ मातरधृतिं मा कृथा वृथा । तातं बद्ध्वा धारयिष्ये वाक्यैर्लब्धाक्षरैरहम् ॥ ७० ॥ इत्यादाय तर्कुसूत्रमावेष्ट्य च पितुः क्रमौ । जगौ बालोऽम्ब मा भैषीरयं बद्धः क्व यास्यति ॥ ७१ ॥ सोऽपि दध्यावहो स्नेहानुबन्धः कोऽयमस्य तत् । तावन्त्यब्दान्यहं स्थाता यावन्तस्तन्तुवेष्टकाः ॥ ७२ ॥ गणिता द्वादशाब्दूवन् सूत्रबन्धास्ततः स्थितः । द्वादशाब्दीमसौ पूर्णसन्धश्चैवमचिन्तयत् ॥ ७३ ॥ संसारसागरे मज्जन् व्रतमाश्रित्य पोतवत् । अत्याक्षं तज्जडः कोऽन्यो मत्तोऽज्ञाग्यशिरोमणिः ॥ ७४ ॥ प्राच्ये भवे व्रतं भग्नं मनसैव तथाप्यहम् । बभूवानार्यताभाजी भविन्त्री मेऽथ का गतिः ॥ ७५ ॥ अद्यापि व्रतमादायात्मानं तीव्रतपोऽग्निना । शोधयामीत्यनुज्ञाप्य श्रीमतीं सोऽग्रहीद्व्रतम् ॥ ७६ ॥ गृहान्निर्गत्य सोऽपश्यद्व्रजन् राजगृहे पुरे । स्तेयवृत्तिपरामात्मामात्यपञ्चशतीं च ताम् ॥ ७७ ॥ उपलक्ष्य वन्दितश्च तैर्मुनिः स जगाद तान् । युष्माभिरादृता कैषा जीविका पापकारणम् ॥ ७८ ॥ ते जगुर्वञ्चयित्वा नो यदा त्वं नाथ

१ आत्मनरपञ्चशतीं इति वा पाठः.

निर्गतः । तदादि त्वां मार्गयन्तो जीवामः स्तेयवृत्तितः ॥ ७९ ॥ ज्ञात्वा हहा किमाचीर्णं लोकद्वयविनाशकम् । अथापि गृह्यतां दीक्षा ज्ञवद्वयहितावहा ॥ ८० ॥ प्रबुद्धाँस्ताँश्च प्रव्राज्य श्रीआर्द्रकिमहामुनिः । श्रीवीरं वन्दितुं यातो गोशालोऽग्निमुखोऽजनि ॥ ८१ ॥ ज्वाच च तपोमूलं कष्टं सर्वं मुधैव ते । हेतुर्नियतिरेवात्र शुज्ञाशुज्ञफलस्य यत् ॥ ८२ ॥ सर्वत्र मन्यते हेतुर्नियतिर्यदि ज्ञोस्त्वया । वृथा क्रियाः प्रसज्यन्ते तत्तेऽपीप्सितसिद्धये ॥ ८३ ॥ तथा नियतिवादी त्वं किं स्थानस्थो न तिष्ठसि । ज्ञोजनाद्यर्थसंपत्त्यै किं वा प्रयतसे शठ ! ॥ ८४ ॥ किंच पौरुषमप्यूरीकार्यं नियतिवद्यतः । विशिष्यतेऽर्थनिष्पत्तौ पौरुषं नियतेरपि ॥ ८५ ॥ वृश्चिकाद्वृश्चिकोत्पत्तिर्गोमयादपि सा ज्ञवेत् । बलिष्ठा नियतिर्येन पौरुषं नियतेरपि ॥ ८६ ॥ इत्थं गोशालकं साधुः स चकार निरुत्तरम् । स्तुतश्च तत्र मिलितैः खेचराद्यैर्गुरुस्वरम् ॥ ८७ ॥ अथार्द्रकिमुनिर्हस्तितापसाश्रममागमत् । तापसास्तत्र हत्वेज्ञं मांसमश्नन्ति नित्यशः ॥ ८८ ॥ प्राहुश्च बहुज्ञिर्धान्यैर्मत्स्याद्यैर्वा हतैश्च किम् । वरमेको हतो हस्ती काद्रोऽत्येति यतो बहुः ॥ ८९ ॥ ततो धर्ममयैर्वाक्यैस्तानज्ञान् प्रतिबोध्य सः । प्रव्राज्य च प्रतस्थेऽग्रे वन्दितुं चरमं जिनम् ॥ ९० ॥ तदाऽज्ञयान्वितोऽन्यागाद्श्रेणिकोऽवन्दताथ तम् । तज्गुणान् वर्णयन्नूचेऽज्ञयस्तेन महात्मना ॥ ९१ ॥ विनाऽपि कारणं मेऽज्ञूरुपकारी त्वमेव ज्ञोः । यत्त्वया धर्मबन्धो सा प्रेषिता प्रतिमाऽऽर्हती ॥ ९२ ॥ अहं जातिस्मरीज्ञूया ज्ञूवं तां वीक्ष्य चार्हतः । अर्हद्धर्मप्रदानान्मे किं किं दत्तं नहि त्वया ॥ ९३ ॥ ततः प्रमुदिताः सर्वे श्रेणिकेशाज्ञयादयः । तं मुनिं प्रीतचित्ताः स्वं वन्दित्वा ययुराज्ञयम् ॥ ९४ ॥ ततो राजगृहे गत्वा नत्वा

चान्तिमतीर्थपम् । क्रमात्समाधिना मृत्वा स प्रापन्नाश्वतीं श्रियम् ॥ ९५ ॥ एवं विचार्य चतुराः प्रवरार्यदेशायत्तां समस्त-गुणसंपदमत्र लोके । प्राक्पुण्यसंचयवशादधिगम्य चार्यक्षेत्रं पवित्रयत मानवजन्म सौवम् ॥ ९६ ॥

॥ इत्यार्द्रकुमारनिदर्शनम् ॥

अथार्यदेशस्यैव विशेषमहिमानमाह—

आर्यं देशमवाप्य धर्मरहितोऽप्यन्यस्य धर्मक्रियाम्,
धर्मस्थानमहाँश्च वीक्ष्य सुगुरोः श्रुत्वा च धर्मं क्वचित् ।
बोधं याति कुलोत्थनास्तिकमतो भूपः प्रदेशी यथा,
सत्यं चन्दनसङ्गिनः क्षितिरुहो नान्येऽपि किं चान्दनाः ॥ ४ ॥

व्याख्या—धर्मरहितोऽपि पुण्यविकलोऽपि पुमान् आर्यदेशमवाप्य लब्ध्वाऽन्यस्य श्रावकादेर्धर्मक्रियां धर्मकर्म च पुन-र्धर्मस्थानमहान् पौषधागारादिषु सम्यक्त्वव्रतादिप्रतिपत्तिश्रीकल्पवाचनाप्रज्ञापनाद्युत्सवान् वीक्ष्य चान्यत् क्वचित् धर्मं श्रुत्वा निशम्य बोधं सम्यक्त्वं याति प्राप्नोति, यथा प्रदेशी भूपः प्रदेशी राजा बोधं याति स्म । यदुक्तम्—

"नरयगइगमणपरिहत्थए कए तह पएसिणा रन्ना । अमरविमाणं पत्तं तं आयरियप्पभावेणं ॥ १ ॥"

किंविशिष्टः सः ? कुले उत्थमुत्पन्नं नास्तिकमतं लोकायितदर्शनं यस्य स तथा—

"पिब खाद च चारुलोचने, यदतीतं वरगात्रि तन्न ते । न हि भीरु ! गतं निवर्तते, समुदयमात्रमिदं कलेवरम् ॥ १ ॥"

इत्यादि नास्तिकमतप्रक्रिया। तथा सत्यं सम्यगेतत् चन्दनसङ्किनश्चन्दनसंसर्गवन्तोऽन्येऽपि धवखदिरपलाशादयोऽपि क्षितिरुहो वृक्षाः किं चान्दनाश्चन्दनसंबन्धिनो न स्युः? अपि तु स्युरेवेत्यक्षरार्थः।

इह प्रस्तावादार्यदेशास्तन्नतनगराणि महान्ति च तद्विपक्षभूता अनार्यदेशाश्च लिख्यन्ते—

"रायगिहं १ मगह १ चंपा २ अंगा २ तह तामलित्ति ३ वंगा य ३ । कंचणपुरं ४ कलिंगा ४ बाणारसि ५ चेव कासी य ५ ॥ १ ॥ साकेय ६ कोसला ६ गयपुरं च ७ कुरु ७ सोरियं ८ कुसट्टा य ८। कंपिल्लं ए पंचाला ए अहिछत्ता १० जंगला चेव १० ॥ २ ॥ बारवई ११ य सुरठ्ठा ११ मिहिल १२ विदेहा य १२ कञ्च १३ कोसंबी १३। नंदिपुरं १४ संमिश्रा १४ ऋद्धिलपुर १५ मेव मलया य १५ ॥ ३ ॥ वइराम १६ वच्छ १६ वरुणा १७ अच्छा १७ तह मुत्तियावई १८ दसन्ना १८। सोत्तिमईया १ए चेई १ए वीयभयं २० सिंधुसोवीरा २०॥ ४॥ महुरा य २१ सूरसेना २१ पावा २२ भंगी य २२ मासपुर २३ वट्टा २३। सावत्थी य २४ कुणाला २४ कोसीवरिसं च २५ लाढा य २५ ॥ ५ ॥ सेय विया चिय नयरी २६ केई अद्धं च आरियं भणियं। इत्थुप्पत्ति जिणाणं चक्कीणं रामकन्हाणं ॥ ६ ॥

एतासु गाथासु पूर्वाणि पूर्वाणि पुरीनामानि उत्तराणि उत्तराणि देशनामानि। इत्येते सार्धाः पञ्चविंशतिदेशा आर्या ज्ञेयाः। एतद्विपरीता अनार्या अपि केचिल्लिख्यन्ते। तद्यथा—

सग जवण सबर बब्बर कय मुरु य गेडुगोडुएक्किणया। अरवागहेण रोमय पारसए संखसिय चेव ॥ १ ॥ कुंबिलवस उवक्कस भिल्लिंद पुलिंद कुंच भमर रुया। कोवाय वीए बुंबुए मालव दमिला कुलाघा य ॥ २ ॥ किक्कय किराय

हयमुह खरमुह गयमुहयमिंढयमुहा य । हयकन्ना गयकन्ना अन्ने वि यणारिया बहवे ॥ ३ ॥ पावा य चंरुकम्मा अणारिया निग्घिणा निरणुतावी । धम्मे त्ति अक्कराइं सुमिणे वि न नज्जए तेहिं ॥ ४ ॥

॥ इत्येतेऽनार्यदेशाः । अपरेऽपि बहवः सन्त्यनार्याः, परं ग्रन्थगौरवन्नयादत्रमतिविस्तरेण । प्रकृतं प्रस्तुमः । प्रसङ्गतस्तमन्निधाय न्नावार्थः कथयाऽन्निधीयते—

सूर्यान्नेशोऽमरोऽन्येत्यानुज्ञाप्य च जगद्गुरुम् । दिव्यं नाट्यविधिं चक्रे गौतमादिपुरोऽन्यदा ॥ १ ॥ ततोऽवग्गौतमो वीरं स्वामिन् कोऽयं सुरोत्तमः । प्राप केनेदृशीमृद्धिमद्भुतां धर्मकर्मणा ॥ २ ॥ स्वाम्यूचे श्वेतवीपुर्यां प्रदेशीति नृपोऽन्नवत् । सूर्यकान्ता तस्य न्नार्या सूर्यकान्ताख्यया सुतः ॥ ३ ॥ मन्त्री चित्रोऽन्नवत्तस्य श्रावस्त्यां स गतोऽन्यदा । श्रीकेशिगणन्नृत्पार्श्वे श्राद्धधर्मं प्रपन्नवान् ॥ ४ ॥ स्वस्वामिप्रतिबोधाय सूरिं विज्ञप्य सादरम् । आनीय बहिरुद्याने स्वपुर्याः स त्वतिष्ठिपत् ॥ ५ ॥ ऊचे च नाथ मन्नाथः क्रूरः पापपरः कुधीः । बोध्यः कथमपि प्रातरिहायातः कुमार्गगः ॥ ६ ॥ मय्यप्यमात्ये न्नविता यद्यसौ नरकातिथिः । कथमस्य प्रसादानामहं स्यामनृणस्ततः ॥ ७ ॥ अथासौ न्नूपतिं प्रातर्वाहवाहनिकान्नलात् । तत्र निन्ये यत्र सूरिर्धर्मं ब्रूते सन्नास्थितः ॥ ८ ॥ विश्रामकाम्यया तत्र द्रुमछायामुपागतः । सचित्रमाह किं मुण्को रारटीत्ययमुच्चकैः ॥ ९ ॥ न वेद्मि नाथ तत्रैव गत्वा निश्चीयते परम् । तेनेत्युक्तो महीनाथोऽश्रौषीत्तद्धर्मदेशनाम् ॥ १० ॥ उवाच च न चास्त्यात्मा परलोकस्तथैव हि । प्रमाणान्नावतस्तेन किं धर्मेण कृतेन नोः ॥ ११ ॥ सूरिराहात्मकर्मादि परोक्षत्वान्न चेन्मतम् । तत्ते पितामहाद्यास्ते स्युरसंन्नवन्नाजनम् ॥ १२ ॥ गिरा परप्रबोधार्थं कथ्यन्तेऽर्था ह्यती-

न्द्रियाः । तत्ते प्रत्यक्षमानस्य न युक्तं वक्तुमप्यहो ॥ १३ ॥ तथेच्छादिगुणाधारमात्मानं धर्मिणं विना । धर्मत्वेनात्र चैतन्य-
मन्यथा नैव जायते ॥ १४ ॥ जिघ्रेन्द्रियात्तज्ज्ञावानुसन्धातारं विना न हि । इच्छास्मृत्यादयो ज्ञावाः संज्ञवन्ति कदाऽ-
प्यमी ॥ १५ ॥ समारम्ज्ञोपायिनां तु फलेन विषमाः क्रियाः । त्यजन्ति नाविनाज्ञावमदृष्टेन कथञ्चन ॥ १६ ॥ अहम-
स्मीति या बुद्धिः स्वसंवेदनमानजा । तयाऽध्यक्षेऽपि जीवे ते कथं मुह्यति शेमुषी ॥ १७ ॥ तस्याशुज्ञशुज्ञध्यानात् पाप-
पुण्यचितिर्ज्ञवेत् । ततो दुःखं सुखं ज्ञुङ्क्ते जीवोऽसावन्यजन्मनि ॥ १८ ॥ जातश्रद्धो मनागेष ज्ञूपः स्माहेति शिष्यवत् ।
श्वज्ञेऽगान्मे पिता क्रूरो धर्मिष्ठाम्बा पुनर्दिवम् ॥ १९ ॥ सूरिराज तयोः पुत्रः प्रियोऽहं साम्प्रतं कथम् । नैत्य बोधयतो
मां तौ यद्यस्त्यात्माऽन्यजन्मगः ॥ २० ॥ सूरिः प्रत्याह ते गुप्तिक्षिप्तवज्ञानकोऽवशः । आयातुं कर्मज्ञिर्बद्धः क्षमो नैरयिकः
कथम् ॥ २१ ॥ कामासक्ता पूर्णकामा संक्रान्तप्रीतिरुच्चकैः । नरानायत्तकृत्या[1] ते साम्बाऽऽयात्यमरी कथम् ॥ २२ ॥
शतानि पञ्च चत्वारि योजनानां व्रजेन्नृणाम् । दुर्गन्ध ऊर्ध्वमायान्ति तेन नान्येऽपि निर्जराः ॥ २३ ॥ ज्ञूयो ज्ञूपोऽन्य-
धात्सूरे चौर एको मया वने । प्रक्षिप्य कुंज्ञिकान्तस्तद्द्वारं नीरन्ध्रितं ज्ञृशम् ॥ २४ ॥ मृतः स वीक्षितस्तत्र कृमिव्याप्त-
कलेवरः । तदात्मनिर्गमोऽन्यात्मागमस्तत्राज्ञवत् कथम् ॥ २५ ॥ आत्मा निरीक्षितश्चूर्णपेषं पिष्ट्वापि तस्करे । परं किमपि
नाज्ञाद्दं तत्सदृक्षं कदाप्यहम् ॥ २६ ॥ बध्वा व्यापादिते चौरे मयैकस्मिँस्तदेक्षितम् । सदसज्जीवजन्यं न प्राक् पश्चाच्च
तुल्यान्तरम् ॥ २७ ॥ सूरिरूचेऽथ नीरन्ध्रकुंज्ञ्यन्तर्वाद्ययेद्यदा । शङ्खं पुमान् कथं तस्य ध्वनिराकर्ण्यते बहिः ॥ २८ ॥ मूर्त-

१ नराणामनधीनं कृत्यं यस्याः सा ।

त्वमन्तरा तस्मिन्नान्निधात्यान्निघातिते। स्यातामव्यन्निचारिण्यौ शब्दः पौन्नलिकस्तनः॥२९॥ ध्वनिर्मूर्त्तोऽपि सूक्ष्मत्वात् कुंन्य-न्तर्निःसरन् बहिः। नोन्मूलयति संदेहममूर्त्तस्यात्मनः कथम् ॥ ३० ॥ नाऽलोकितः क्वचिन्नह्यर्यत्पिष्टेऽरणिदारुणि। अस्त्ये-वासौ तथा तत्र जीवं राजन् विन्नावय ॥ ३१ ॥ तुलावातेन नापूर्णे दृतौ पूर्णेऽपि न्निद्यते। यथा तथैव किं राजन्नात्म-न्यपि विचिन्त्यते ॥ ३२ ॥ मूर्त्तानामपि सूक्ष्माणामेवं नानागतिर्यदि। महाराजात्मनस्तस्मादमूर्त्तस्य तु का कथा ॥ ३३ ॥ श्रुत्वेत्यादि धराधीशो जगौ संविग्नमानसः। मिथ्यात्वकर्दमे मग्नः साधु साधूद्धृतोऽस्म्यहम् ॥ ३४ ॥ ततः स धर्ममादाय गृहेऽगाद्गृहमेधिनाम्। चिरेण च विरक्तोऽन्नूद्विषयेष्वखिलेष्वपि ॥ ३५ ॥ नरान्तरानुरागेण सूर्यकान्ताऽथ तत्प्रिया। ददौ तस्य विषं तेन स कृतानशनो मृतः ॥ ३६ ॥ चतुःपल्योपमस्थित्या सूर्याऩ्नोऽयं सुरोऽन्नवत्। मुक्तिमाप्ता विदेहेऽदः श्रुत्वा हृष्टोऽथ गौतमः ॥३७॥ इत्यार्यदेशमाहात्म्यमाकर्ण्य नवताधिकम्। सकर्णास्तत्परा धर्मे सामग्र्येषा हि दुर्लभा ॥३८॥

॥ इति प्रदेशिनृपोदाहरणम् ॥

व्याख्यातमिदं प्रथममार्यदेशद्वारं। अथ कथमपीति द्वितीयद्वारस्वरूपमाह। ननु कथमपीति द्वारस्य कोऽर्थः? महता कष्टेनैतद्वक्ष्यमाणं प्राप्य धर्मे मा प्रमाद्यतेति। यतः—

" वच्चइ खणेण जीवो पित्तानिलधाउसिंन्नखोन्नेहिं। उज्जमह मा विसीयह तरतमजोगो इमो दुल्लहो॥ १ ॥ पंचिं-दियत्तणं माणुसत्तणं आयरियजणे सुकुलं। साहुसमागममुणणा सद्दहणा रोग्ग पव्वज्जा॥ २ ॥

इति चेत्तर्हि कथमपीति पदं सर्वत्र द्वारेषु संबध्यते, सुतरामिति चेत्तर्हि कथमस्य सर्वत्र संबध्यमानत्वेन प्रधानत्वान्ना-

दावुपन्यासः ? सत्यं, परमत्राचार्येण छन्दोऽनुरोधेनोद्देशकाव्ये इत्थमुपन्यासः कृतः, ततो यथोद्देशस्तथा निर्देश इति कृत्वा मयापि पूर्वमार्यदेशघारं व्याख्यायाथ कथमपीति व्याख्यायते विचित्रा सूत्राणां कृतिराचार्यस्येति कृत्वा नैतदुष्टमिति । प्रकृतमाह—

उत्सर्पिण्यवसर्पिणीः क्षितिमरुत्तेजोऽप्स्वसङ्ख्या वने-
ऽनन्तास्ता विकले गणेयशरदो जात्या विपत्त्या नयेत् ।
सप्ताष्टौ तु नवाँस्तिरश्चि मनुजे जीवोऽन्तरेऽत्रास्य चे-
ऋर्मस्तऋणेन्द्रवत्स सुगतिं प्राप्नोति तिर्यङ्वपि ॥ ५ ॥

व्याख्या—उत्सर्पिण्यवसर्पिणीः कालभेदान् जीवः प्राणी असङ्ख्याः सङ्ख्यारहिताः क्षितिमरुत्तेजोऽप्सु पृथ्वीवायुतेजोऽम्बुकायजीवयोनिषु जात्या जन्मना विपत्त्या मरणेन नयेदतिवाहयेत् । तथा वने वनस्पतिकाये ता उत्सर्पिण्यवसर्पिणीरनन्ता अन्तरहिता नयेत् । तथा विकले विकलेन्द्रिये द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियजीवमध्ये गणेयशरदः सङ्ख्यातवर्षाणि नयेदिति । तथा तिरश्चि मनुजे तिर्यङ्नरयोनौ सप्त अष्टौ वा नवान्नयेत् । तथा चोक्तम्—

" इह सव्वेसि जियाणं तिरियगई होइ आइमं ठाणं । तिरिया उ थावरा तसा दुह पढमा सुहुमबायरया ॥ १ ॥ सुहुमा उ भूदगाणलवाऊसाहारणत्ति पंचविहा । तह पत्तेयवणेणं संजुया बायरा छद्धा ॥ २ ॥ सुहुमा उ अप्पमिहया

अंतमुहुत्ताउया अदिस्सा य । तणुजोगजुया सव्वत्थ वेयणा सयलल्लोयगया ॥ ३ ॥ अंतमुहुत्तं आरब्भ जाव बावीसवास-सहसाऊ । सत्थहयचक्कुगिप्पा बायरया निययठाणेसु ॥ ४ ॥ विगलेंदियपंचेंदियन्नेएण तसा वि हुंति इह दुविहा । बिति-चउरिंदियविगला असन्नि सन्नि त्ति पंचिंदी ॥ ५ ॥ बितिचउरिंदियसन्नी तणुवयजोगा तिजोगिणो सन्नी । लोया संखिज्ज इमे न्नागे कमवुड्ढवेयणया ॥ ६ ॥ आउं दुइंदियाइसु गुरुबारसमादिणाइगुणवन्नं । उम्मासपुव्वकोडी पल्लतियं लहुमु-हुत्ततो ॥ ७ ॥ सुहुमेसुं पत्तेयं उसप्पिणीउं असंखलोगकया । सव्वेवय कायठिई सबायरेसुं चउसु तेसु ॥ ८ ॥ सत्तरि-सागरकोडाकोडी उसु बायरेसु पत्तेयं । बायरवणम्मि उसप्पिणी उ अंगुलअसंखंसो ॥ ९ ॥ बायरसुहुमनिगोए अड्ढाइज्जा य पुग्गलपरट्टा । सव्ववणम्मि असंखा एयं ववहाररासीणं ॥ १० ॥ थावरकाए सयले पुग्गलपरियट्टया असंखिज्जा । ते आवलिया समयाण हुंति न्नागे असंखिज्जे ॥ ११ ॥ विगलेसुं संखिज्जो कालो सगलेसु सत्तअट्ठवा । एयं उक्कोसेणं अंत-मुहुत्तं जहन्नेणं ॥ १२ ॥ पलियाइं तिन्नि मणुएसु आउमुक्कोसमियरमंतमुहु । सगपुव्वकोडिअहियाइं तिन्नि पलियाइं कायठिई ॥१३॥ एवं परिब्भमंतो अणेगजवगहणगहणसंसारे। कह कह वि जइ वि पावइ धम्मं ता सो सुही होइ ॥१४॥"

अत्रान्तरेऽस्मिन् विचारेऽस्य जीवस्य चेद्यदि धर्मः पुण्यं स्यात्तर्हि सुगतिं प्रधानगतिं तिर्यङ्ष्वपि तिर्यग्योनि-स्थोऽपि प्राप्नोति लभते । किंवत् ? धरणेन्द्रवत्, यथा धरणेन्द्रः प्राग्भवे तिर्यङ्ष्वपि धर्मेण सुगतिं प्राप्तवान् । उत्सर्पिण्य-वसर्पिणीस्वरूपमिदं, यथा—

" कालो द्विविधोऽवसर्पिण्युत्सर्पिणीविभेदतः । सागरकोटिकोटीनां विंशत्या स समाप्यते ॥ १ ॥ अवसर्पिण्यां षडरा

ऽत्सर्पिण्यां त एव विपरीताः । एवं द्वादशभिररैर्विवर्तते कालचक्रमिदम् ॥ २ ॥ तत्रैकान्तसुषमारश्चतस्रः कोटिकोटयः । सागराणां सुषमा तु तिस्रस्तत्कोटिकोटयः ॥ ३ ॥ सुषमदुःषमा ते द्वे दुःषमसुषमा पुनः । सैका सहस्रैर्वर्षाणां द्विचत्वारिंशतोनिता ॥ ४ ॥ अथ दुःषमैकविंशतिरब्दसहस्राणि तावती तु स्यात् । एकान्तदुःषमाऽपि ह्येतत्सङ्ख्या परेऽपि विपरीता ॥ ५ ॥"

इत्यादि ज्ञेयं, इति वृत्ताक्षरार्थः । भावार्थः कथयाविर्भाव्यते । धरणेन्द्रकथा—

स वामेयः शिवायास्तु यस्य ध्यानधनञ्जयः । कमठेन प्रभूताभ्रैः सिक्तोऽप्यभ्रिरवर्धत ॥ १ ॥ अत्रास्ति भरतक्षेत्रे पोतनं नाम पत्तनम् । नेति वक्तुमलं नो यद्यौको बहुपि याचितः ॥ २ ॥ अरविन्दोऽत्र कासारेऽरविन्दमिव भूपतिः । अभूच्चित्रमिदं ह्येष सश्रीकोऽप्यपकण्टकः ॥ ३ ॥ स्वचेतोहारिणी तस्य सर्वदा प्रियकारिणी । आसीदन्येव राज्यश्रीर्धारिणी सहचारिणी ॥ ४ ॥ राज्यावष्टम्भवत्तस्य विश्वभूतिः पुरोहितः । निर्मले मानसे यस्य धर्मः क्रीडति हंसवत् ॥ ५ ॥ तस्य चानुन्धराख्यायां प्रियायां प्रियभाषिणौ । कमठो मरुभूतिश्च जज्ञाते तनयौ वरौ ॥ ६ ॥ कमठस्याभवद्भार्या कुलीना वरुणाख्यया । वसुन्धरा मरुभूतेः सौन्दर्यश्रीर्वसुन्धरा ॥ ७ ॥ स्वगेहद्वारमारोप्य सूनोर्भवविरक्तधीः । विविक्तस्य गुरोः पार्श्वे विहिताराधनः सुधीः ॥ ८ ॥ विश्वभूतिर्विपन्नोऽभूत्सौधर्मे त्रिदशस्ततः । तद्विप्रयोगविधुराऽनुन्धराऽपि व्यपद्यत ॥ ९ ॥ युग्मम् ॥ अथान्यदा हरिश्चन्द्रमुनिमुद्यानसंस्थितम् । कमठो मरुभूतिश्च प्रमोदेन प्रणेमतुः ॥ १० ॥ मुनिः प्रोवाच हे भद्रौ नृभवं प्राप्य दुर्लभम् । विषयादिप्रमादेन मा स्म हारयतं मुधा ॥ ११ ॥ दृष्टान्तैर्दर्शनिश्चायं हारितो दुर्लभोऽस्ति

यत् । तत्प्रमादः क्षणमपि न कार्यो धर्मकर्मणि ॥ १२ ॥ इत्याकर्ण्य विरक्तात्मा विषयेभ्यो गुरूदितम् । धर्मं शिश्ये मरुभूतिर्न पुनः कमठः कुधीः ॥ १३ ॥ समानोत्पत्तिवासानां समानवयसामपि । गुणैः केतकपत्राणामिव साम्यं न जायते ॥ १४ ॥ अथो भवघ्याभीतचेतसौ मदनातुरौ । वसुन्धराकमठौ तु दुराचारौ बभूवतुः ॥ १५ ॥ तज्ज्ञात्वा वरुणोत्पन्नकोपाऽथ मरुभूतये । सर्वं निवेदयामास क्रुद्धः सोऽपि स्वचेतसि ॥ १६ ॥ ग्रामान्तरगमव्याजादापृच्छ्य कमठं ततः । गत्वा कियद्भुवं पश्चान्न्यवर्तत स कोपवान् ॥ १७ ॥ ततः कार्पटिकीभूय गत्वाऽथ कमठालयम् । याचित्वा संस्थितस्तत्रापश्यत् कमठचेष्टितम् ॥ १८ ॥ कुपितेन ततस्तेन तन्नृपाय निवेदितम् । तं सोऽप्यारक्तकैः क्रुद्धो दुराचारमबन्धयत् ॥१९॥ दुर्वाद्ये वाद्यमानेऽथ खरारोपपुरस्सरम् । परिभ्राम्याभितो भूपः पुरात्तं निरवासयत् ॥ २० ॥ भ्रातर्येष दधत्क्रोधं प्रतिकर्तुमनीशिता । इतस्ततो वने भ्राम्यन्नगमत्तापसाश्रमम् ॥ २१ ॥ आत्मीयं दुःखमाख्यायादाय दीक्षां च तापसीम् । शिवतापसपार्श्वे स तेपेऽज्ञौ दुस्तपं तपः ॥ २२ ॥ इतश्च मरुभूतिस्तां निरीक्ष्य कमठापदम् । दध्यौ हाऽहं मूढबुद्धिरकार्षं सोदरेऽपि किम् ॥ २३ ॥ अद्यापि क्षमयामीति सोऽगमत् कमठान्तिके । पपात च महाप्रीत्या क्रमयोस्तस्य दुर्मतेः ॥२४॥ मत्कृतं दुष्कृतं भ्रातः क्षन्तव्यमिति जल्पतः । तस्योपरिं शिलामेकाममुचत्सोऽतिरोषणः ॥ २५ ॥ शिलाघातेन तेन स्वतपसा सह चूर्णितः । आर्तध्यानान्मृतः सोऽप्यभूद्विन्ध्याद्रौ करीश्वरः ॥ २६ ॥ वरुणापि स्फुरत्कोपा प्राप्य मृत्युं महार्त्तितः । तस्येभस्य प्रिया जाता करिणी सुन्दराकृतिः ॥ २७ ॥ इतश्च भववैराग्यादरविन्दमहीपतिः । समन्तभद्रसूरीणां

संविधे व्रतमग्रहीत् ॥ २८ ॥ विहरन् विधिवत्सोऽथ प्रतिमा नन्तुमार्हतीः । सार्थे सागरदत्तस्य चचालाष्टापदं प्रति ॥२९॥ अन्तरा गच्छतस्तस्य सार्थस्याग्निमुखोऽजनि । करिणीगणविभ्राजी मरुभूतिकरीश्वरः ॥ ३० ॥ तर्जिरवज्रीतोऽथ सार्थलोकोऽखिलः क्षणात् । जीवग्राहं पलायिष्ट कस्य नेष्टं हि जीवितम् ॥ ३१ ॥ विबुध्यावधिना बोधसमयं तस्य हस्तिनः । अरविन्दमुनिर्नीत्युज्झितः प्रतिमया स्थितः ॥ ३२ ॥ आगच्छन्नपि स क्रोधात् करी पार्श्वगतः पुनः । तत्तपःश्रीप्रभावेण समीपेऽस्थाद्विमत्सरः ॥ ३३ ॥ स मुनिः पारितोत्सर्गः तं बोधयितुमित्यवक् । किं नोः स्मरसि न स्वीयं मरुभूतिभवं द्विप ॥ ३४ ॥ अरविन्दनृपं प्रत्यभिजानासि च मां न किम् । तज्जन्मप्रतिपन्नं मा विस्मार्षीर्धर्ममार्हतम् ॥ ३५ ॥ पीयूषयूषसभ्रीचीं पीत्वा तस्य मुनेर्गिरम् । प्राप जातिस्मृतिं हस्ती संविग्नस्तं मुदाऽनमत् ॥ ३६ ॥ भूयः प्रोवाच तं साधुः संसारे नाटकोपमे । रूपान्यत्वमवाप्नोति जीवो नट इव क्षणात् ॥ ३७ ॥ तथाहि श्रावकत्वं तत् क्व ते ज्ञानगुणोज्ज्वलम् । केदं गजत्वमज्ञानस्थानं पश्य करीश्वर ॥ ३८ ॥ किं कृतेनाथ खेदेनाद्यापि धर्मे मतिं कुरु । कषायान् विषयाँश्चैव त्यक्त्वा स्वहितमाचर ॥ ३९ ॥ इत्युक्ते मुनिना धर्मं प्रपन्नः करसंज्ञया । स करी प्राणमत्तं तु भक्तिप्रह्वितमानसः ॥ ४० ॥ वरुणा करिणीजाता तस्थुषी तत्र साऽप्यथ । प्राप्य जातिस्मृतिं धर्मं प्रपेदे गजराजवत् ॥४१॥ विस्मितः सार्थलोकोऽथ मिलितो निखिलोऽपि हि । दृष्ट्वा तन्मुनिमाहात्म्यं जिनधर्मे दृढोऽभवत् ॥ ४२ ॥ अरविन्दमुनिर्गत्वाऽष्टापदाद्राववन्दत । प्रतिमा आर्हतीः सर्वा विहरँश्चान्यतो गतः ॥ ४३ ॥ स करी श्रावकीभूय कुर्वन् षष्ठादिकं तपः । चरँश्च शुष्कपत्रादि विरक्तो

१ समीपे । २ अमृतपूरसमाम् । ३ प्रह्वितं नम्रम् ।

विषयेष्वजूत् ॥ ४४ ॥ इतश्च कमठो दुष्ट आर्तध्यानस्थितो मृतः । कुर्कुटोऽहिरजूत् सर्वसत्त्वजीतिकरो वने ॥ ४५ ॥ सरस्यादित्यतीव्रांशुतप्तं प्रासुकमम्बु सः । पिबन् तेनाहिना दृष्टो मरुभूतिर्द्विपोऽन्यदा ॥ ४६ ॥ तपःश्रमतनुत्वेन दैवान्मग्नः स कर्दमे । निर्यातुमक्षमो दृष्टः कुम्भे दुष्टाहिनाऽमुना ॥ ४७ ॥ ज्ञात्वा तद्विषवेगेन स्वावसानं स कुञ्जरः । सर्वाहारपरित्यागं कृत्वा चेति व्यचिन्तयत् ॥ ४८ ॥ अपराध्यति कर्मैव हेतुमात्रं परो भवेत् । अस्मिन् कुर्कुटसर्पे तन्मा कार्षीर्जीव रे क्रुधम् ॥ ४९ ॥ इत्थं शमरसास्वादाद्धर्मध्यानपरो मृतः । स करीशो महातेजाः सहस्रारे सुरोऽजनि ॥ ५० ॥ प्राप्य धर्मं तदा सापि वरुणा करिणी मृता । द्वितीयकल्पजा देवी जज्ञे तस्य प्रिया वरा ॥ ५१ ॥ कालेन कियताऽऽत्मीयपापाग्निः सोऽतिदुःखितः । कुर्कुटोऽहिर्विपद्याजूज्वारकः पञ्चमावनौ ॥ ५२ ॥ अथ प्राच्यविदेहोर्व्यां सुकच्छे विजये शुभा । समस्ति गिरिवैताढ्यतिलकं तिलका पुरी ॥ ५३ ॥ भोगत्यागस्फुरत्पक्षद्वयी श्रृङ्गारिताधिकम् । कमले कलहंसीव कमला यत्र राजति ॥ ५४ ॥ तत्र विद्याधराधीशो विद्युद्गतिरजूनृपः । यत्प्रतापातपाक्रान्तो गङ्गां त्यजति नेश्वरः ॥५५॥ तस्य रूपादिभिः स्त्रीणां तिलकं तिलकावली । जज्ञे प्रणयिनी सौवप्राणादप्यतिवल्लभा ॥ ५६ ॥ अथ च्युत्वाऽष्टमस्वर्गाद्गजजीवस्तयोरजूत् । तनयः सनयः प्राप्तः क्रमात्तारुण्यमप्यसौ ॥ ५७ ॥ नाम्ना किरणवेगोऽयं पित्रा राज्ये निजे तदा । अभिषिक्तो महातेजाः स्वयं दीक्षां जिघृक्षुणा ॥ ५८ ॥ नृपे विद्युद्गतौ प्रव्रजिते किरणवेगराट् । शशास पैत्रिकीं राज्यसंपदं नीतिशास्त्रवित् ॥५९॥ मुनेः सुरगुरोर्धर्मं निशम्य स नृपोऽन्यदा । प्राव्राजीन्न्यस्य राज्यं स्वं सुते पद्मावतीभवे ॥६०॥

अधिगम्यायमुत्सर्गापवादविधियुग्मकम् । कृतान्ततः[1] कृत्यवेत्ताऽसौ व्यहार्षीन्महातपाः ॥ ६१ ॥ शाश्वतानर्हतोऽन्येद्युः पुष्करद्वीपवर्तिनः । नत्वा खगमनेनागादसौ वैताढ्यसन्निधौ ॥ ६२ ॥ तप्यते स्म तपस्तीव्रं सहमानः परीषहान् । तत्र प्रतिमया तस्थौ चायं साधुः कदाचन ॥ ६३ ॥ उद्धृत्य नरकात्सोऽथ कुर्कुटाहिरजायत । महाहिश्चाग्रमज्जन्तून् बहुन् कवलयन् कुधीः ॥ ६४ ॥ वने तत्रान्यदा सोऽथ पर्यटँस्तं समैक्षत । प्रतिमासंस्थितं स्तम्भमिव स्थिरतरं मुनिम् ॥ ६५ ॥ स्मृतप्राग्जन्मवैरेण क्रोधान्धेनामुनाऽहिना । आवेष्टयायं मुनिर्दष्टो यथा चन्दनपादपः ॥ ६६ ॥ विषेण तेन सङ्क्रान्तो दध्यौ चायं मुनिस्तदा । अयं कर्मक्षयायैवोपसर्गो मा विषीद तत् ॥ ६७ ॥ रे जीव यस्त्वया कार्यश्चिरं कर्मक्षयः स तु । अद्यैव कार्यतेऽनेन द्वेष्योऽयं तत्कथं तव ॥ ६८ ॥ इति ध्यायन्मृतः सोऽथ कल्पेऽभूद्वादशे सुरः । नाम्ना जम्बूद्रुमावर्त्तविमाने महिमाद्भुतः ॥ ६९ ॥ इतस्ततो भ्रमँस्तत्र स महाहिर्दवाग्निना । दग्धो नैरयिको धूमप्रभायां समजायत ॥ ७० ॥ इतश्च जम्बूद्वीपेऽत्र प्रत्यग्विदेहमण्डने । सुगन्धे विजयेऽन्वर्थनामिका पूः शुभंकरा ॥ ७१ ॥ वज्रवीर्यनृपस्तत्राप्रयत्नजितशात्रवः । तस्याच्युतस्येव लक्ष्मीर्लक्ष्मीवत्यजनवत् प्रिया ॥ ७२ ॥ जीवः किरणवेगस्य तत्कुक्षावच्युताच्च्युतः । अवातरत्सरस्यां स्नाग्राजहंस इवामलः ॥ ७३ ॥ साऽसूत समये सूनुमनूनश्रीविभूषितम् । पित्रा तस्यान्विधा चक्रे वज्रनाभ इति स्फुटम् ॥ ७४ ॥ कलाकलापं संगृह्णन् कुमुदाह्लीं[2] विकाशयन् । शशीव ववृधे नेत्रप्रीतिदः स कुमारराट् ॥ ७५ ॥ तं प्राप्तयौवनं ज्ञात्वा पिता राज्ये निवेश्य च । स्वयं संयमसाम्राज्यं जग्राह नृपपुङ्गवः ॥ ७६ ॥ वज्रनाभो नृपः सोऽथ भुवं भुञ्जन् क्रमागताम् ।

१ सिद्धान्तात्. २ कुमारपक्षे कुः पृथ्वी तस्या आनन्दश्रेणिम्. चन्द्रपक्षे च कमलश्रेणीम्.

उषाशेषेऽन्यदा दध्यावेवं ज्ञवविरागवान् ॥ ७७ ॥ अहो संसारकान्तारे दुःखानलकरालिते । कथं मृग इव प्राणी प्राप्नोति सुखमद्भुतम् ॥ ७८ ॥ केचित्तथापि विज्ञानविहीनाः सुखकाङ्क्षिणः । पापारम्भे प्रवर्तन्ते वयं विघ्नो न तज्ञतिम् ॥ ७९ ॥ धन्याश्चारित्रपोतेन केचित्संसारसागरम् । उत्तरन्ति महाघोरं ज्ञक्त्या तेभ्यो नमोऽस्तु मे ॥ ८० ॥ नीरोपरि तरत्युच्चैर्निष्पङ्का तुम्बिका यथा । जीवस्तथा तरेऊर्मात्क्षीणकर्ममलो ज्ञवम् ॥ ८१ ॥ तेनाहमपि चारित्रमूरीकृत्यात्मनो हितम् । विदधामीति स्वं राज्यं दातुमाकारयत्सुतम् ॥ ८२ ॥ सूनौ न्यस्य निजं राज्यं स तितीर्षुर्ज्ञवार्णवम् । क्षेमङ्करजिनोपान्ते स्वयं संयममाददे ॥ ८३ ॥ साधयन् परलोकं स ततः पूर्वमिवोरुधीः । गुरुणा सह ज्ञूपीठे विजहार पठन् सुखम् ॥ ८४ ॥ अधीती द्वादशाङ्ग्यां स तपस्तेजःप्रभावतः । अन्यदा व्योमगत्याऽगात् सुकच्छविजयं मुनिः ॥ ८५ ॥ सर्पात्माऽपि तदोद्धृत्य श्वभ्राद्भ्राम्यन् ज्ञवार्णवम् । जिह्मो जज्ञे सुकच्छस्थे ज्वलनाद्रौ कुरङ्गकः ॥ ८६ ॥ जीवान् स संहरन् बाणैर्दृष्ट्वाऽप्यत्रातिदुष्टधीः । प्रतिमास्थं वज्रनाभं मुनिं वीक्ष्येत्यचिन्तयत् ॥ ८७ ॥ अहो मे दर्शनं चास्य ज्ञविष्यत्यशुभायति । ततः प्राग्ज्ञववैरेण तस्य कोपोऽस्फुरद्धृदि ॥ ८८ ॥ पापो बाणेन तं हत्वा मुनिं ज्ञूमौ न्यपातयत् । तस्य पापात्मनः कः स्याद्विवेको मुनिहिंसने ॥ ८९ ॥ दध्यौ स श्रमणोऽदस्तद्वेदनार्त्तः हितौ स्थितः । जीवेदं प्राक्कृतं कर्म तव तेन सहस्व भोः ॥ ९० ॥ एवं ध्यायन् विपद्यासौ मध्यग्रैवेयके सुरः । बभूव ललिताङ्गाख्यः प्रमोदाब्धिनिमग्नहृत् ॥ ९१ ॥ सोऽथो धनुर्धरमन्यो दुरात्मा दुःखितोऽन्वहम् । कुरङ्गको विपद्यागाद्दुर्मनाः सप्तमीं ज्ञुवम् ॥ ९२ ॥ द्वीपेऽत्राथ प्राग्विदेहमंज्ञनं ज्ञुवि विश्रु-

१ रात्रिशेषे प्रातःकाले इत्यर्थः.

तम् । पुरं सुरपुरं नाम्ना गुणैः सुरपुरोपमम् ॥ ९३ ॥ वज्रबाहुर्महीनाथोऽभूत्तस्मिन् वज्रपाणिवत् । धैर्यसौन्दर्यसंपत्त्या यशसा महसाऽपि च ॥ ९४ ॥ तस्यान्वर्थान्निधा जज्ञे प्रेयसी तु सुदर्शना । तत्कुक्षौ वज्रनाभात्मोत्पेदे ग्रैवेयकाच्च्युतः ॥ ९५ ॥ अथापश्यत् सुखं सुप्ता राज्ञी स्वप्नाँश्चतुर्दश । राज्ञा विचारितैस्तैस्तु चक्रभृज्जन्म सूचितम् ॥ ९६ ॥ अथ प्राचीव चण्कांशुं समयेऽसूत सा सुतम् । सुवर्णबाहुरित्याख्यां तस्य चक्रे नृपः क्रमात् ॥ ९७ ॥ लाल्यमानो नृपैर्बाल्यमुल्लङ्घ्य प्राप्तयौवनः । मनःसरसि नो कस्य भानुवत् प्रतिबिम्बितः ॥ ९८ ॥ वज्रबाहुर्भवोद्विग्नो ज्ञात्वा पुत्रं क्षमं ततः । तत्र राज्यं निधाय स्वं व्रताद्दत्याऽकृतार्थयत् ॥ ९९ ॥ सुवर्णबाहुः स्वं राज्यं पालयामास चाखिलम् । हरहारमनोहारिकीर्तिमण्डिततदिङ्मुखः ॥ १०० ॥ अन्येद्युरुपदायाताश्वमारुह्य बहिर्गतम् । क्षापो वेगपरीक्षार्थं सकृत्तं पर्यताम्यत् ॥१०१॥ ततोऽसौ वायुवेगेन यानाकृष्टोऽपि[1] वल्गया । वक्रशिक्षाक्रमाद्राजी दधावे चाधिकाधिकम् ॥ १०२ ॥ अदृशीकृत्य सर्वस्य परिवारस्य भूपतिः । नीतोऽरण्येऽमुना कर्मणेव जीवोऽन्यजन्मनि ॥ १०३ ॥ तृषार्त्तोऽश्वः क्रमाद्दीक्ष्य सरस्तत्र स्थितः स्वयम् । अथोत्तीर्य नृपो वारि तं तृषार्त्तमपाययत् ॥ १०४ ॥ क्षणं विश्रम्य तत्रासौ चलन् क्वापि तपोवने । प्रकुर्वाणां लतासेकं ददर्श मुनिकन्यकाम् ॥ १०५ ॥ तस्याः शरीरसौन्दर्यं वीक्ष्य विश्वातिगं नृपः । दध्यौ केयमहो रूपलावण्योदकदीर्घिका ॥१०६॥ पितामहस्य[2] पाणिभ्यं जराकम्प्रकरस्य किम् । अद्याप्यस्तीदृशं रूपं निर्मिमीते स यन्नृषु ॥ १०७ ॥ रूपं निर्माय निर्माय विधिस्त्रिदशयोषिताम् । नृशं सुशिक्षितः स्थानेऽस्या रूपं त्वीदृशं व्यधात्[3] ॥ १०८ ॥ विद्याधरामरस्त्रैणरूपलेशैरियं कृता।

१ यान् गच्छन्. २ विधातुः. ३ युक्तम्.

विधिना शिष्टिपना लोके कुरुते तेन तद्भमम् ॥ १०९ ॥ क्वास्या रूपमसारूप्यमिदं क्व च कुचेष्टितम् । परं युक्तमिदं वेधा रत्नदोषीति यन्मतः ॥ ११० ॥ नूनं नो मुनिकन्येयं येनास्यां रागि मन्मनः । काचित्क्ष्मापतिकन्येयमत्रायाताऽस्ति कारणात् ॥ १११ ॥ इति ध्यायति भूपेऽथाम्भोजभ्रान्त्या मधुव्रतम् । पपात मालतीवृक्षात्तन्मुखेऽतिसुगन्धिनि ॥ ११२ ॥ कथञ्चिच्चागते तस्मिन् सा स्माह स्वसखीं प्रति । अस्मान्मधुव्रताद्भीतो रक्ष रक्ष सखि द्रुतम् ॥ ११३ ॥ साऽप्यूचे रक्षितुं त्वीशो विना कः स्वर्णबाहुना । तमेव त्वं महीनाथं सम्प्रत्यनुसर प्रियम् ॥ ११४ ॥ को नाम त्वामुपज्ञोता पात्युर्वीं वज्रबाहुजे । इत्थं जल्पन्निलानाथः प्रकटोऽभूत्तयोः पुरः ॥ ११५ ॥ ततो विस्मितयाऽप्रच्छि कुमार्या काश्यपीपतिः[2] । कस्त्वं मूर्त्या विद्यया चासामान्यो लक्ष्यसे वद ॥ ११६ ॥ क्ष्मापोऽहमो बभाषेऽथा ख्यातुमात्मानमात्मना । स्वर्णबाहोर्नृपस्याहं सहायोऽस्मि शुभानने ॥ ११७ ॥ तदाज्ञयाऽहमायातोऽत्राश्रमे विघ्नकारिणाम् । निवारणाय यत्क्ष्मापरक्षणीयं तपोवनम् ॥ ११८ ॥ भूपालोऽयं स एवेति स्मरन्तीं तत्सखीं जगौ । भूपोऽसौ बालिका केन हेतुना क्लिश्यतेऽत्र च ॥ ११९ ॥ निःश्वस्य सा बभाषेऽथो श्यं रत्नपुरप्रभोः । विद्याभृदिन्दोः पद्माख्या पुत्री रत्नावलीभवा ॥ १२० ॥ जनकोऽस्यां मृतो जातमात्रायां तत्पदार्थिनः । युध्यन्ते स्म मिथः पुत्रा लोकोऽभूत्तन्नयातुरः ॥ १२१ ॥ बालामिमां तदादाययौ रत्नावलीह सा । गालवस्य कुलपतेः स्वभ्रातुस्त्वरिताश्रमे ॥ १२२ ॥ अन्येद्युरागमद्दिव्यज्ञानी मुनिरिहोत्तमः । पद्मायाः को वरो भावीत्यप्राक्षीद्गालवोऽथ तम् ॥ १२३ ॥ सोऽप्यूचे वाजिनाऽऽनीतोऽपहृत्यात्रैव चक्रभृत् । परिणेष्यत्यमूं बालां

१ अरः. २ पृथ्वीपतिः.

स्वर्णबाहुर्महानुजः ॥ १२४ ॥ दध्यौ नूपोऽप्यकस्मान्मेऽश्वापहारोऽनवद्यतः । तदेतन्मिषनोपायं नियतं विदधे विधिः ॥१२५॥ ततः क्षापो निजं सैन्यमायाघीक्ष्य सखीयुताम् । विससर्ज स्फुरत्प्रीतिं कुमारीं तां मनोहराम् ॥ १२६ ॥ पद्मापि वलितग्रीवं पश्यन्ती तं पतिं मुहुः । जगाम स्वाश्रमे विश्वं[1] जानती तन्मयं जगत् ॥ १२७ ॥ स्वर्णबाह्वागमे सख्या ख्याते कुलपतिस्ततः । प्रमोदमेदुरोऽन्यर्थ्यं तेन तां पर्यणाययत् ॥ १२८ ॥ क्रमादेष पुरे प्राप्तो रत्नान्यथ चतुर्दश । लब्ध्वा तं विजयं सर्वे साधयित्वा च चक्रयजूत् ॥ १२९ ॥ अन्यदोत्पन्नवैराग्यरङ्गो न्यस्य सुतं पदे । प्राव्राजीत्स जगन्नाथतीर्थनाथान्तिके जवात् ॥ १३० ॥ तप्यमानस्तपस्तीव्रं क्रमाज्ञीतार्थतां गतः । विंशत्या सेवितैः स्थानैरर्हन्नामार्जयत्सुधीः ॥ १३१ ॥ विहरन्नन्यदा क्षीरगिरिपार्श्वे गतोऽथ सः । तस्थौ प्रतिमया शुक्लध्यानाब्धौ मग्नमानसः ॥ १३२ ॥ उद्धृत्य नरकात्सोऽपि तत्रैवाद्रौ कुरङ्गकः । सिंहोऽनवद्यमँश्चागात्तदा तन्मुनिसन्निधौ ॥ १३३ ॥ प्राच्यवैरं स्मरन् रौद्राकृतिस्तं चक्रजृन्मुनिम् । अहँश्चपेटया सिंहस्ततोऽसावपतद्भुवि ॥ १३४ ॥ दध्यौ च जीव रे सत्त्वं कुरु माऽस्मिन् क्रुधं विधाः । दुःखेऽपि महतां सत्त्वं मित्रवत्सहगामि यत् ॥ १३५ ॥ चिरं पूर्यं त्वया दीक्षाग्निग्रहे पूरितेऽमुना । अद्यैवास्मिन् कथं कोपो हा[2] रो जीव प्रयुज्यते ॥ १३६ ॥ इति ध्यायन्मुनिः कृत्वाऽऽलोचनां धर्मसऋसम् । समादायात्यजद्देहमिक्षुकूर्चकवत्सुधीः ॥ १३७ ॥ विदीर्णे हरिणा देहे स विपद्योदपद्यत । महाप्रभविमाने स्राक् प्राणते निर्जरो दिवि ॥ १३८ ॥ हरिर्मृत्वा दुरात्माऽसौ चतुर्थे नरकेऽगमत् । तस्माद्धृत्य तिर्यक्षु भ्रान्त्वा विप्रसुतोऽजनि ॥ १३९ ॥ जातमात्रस्य

१ सकलम्. २ अग्निः.

तस्यापि विपन्नौ पितरौ ततः । सकृपैर्जीवितो लोकैः स क्रमात्प्राप यौवनम् ॥ १४० ॥ नाम्ना कठ इति प्राप्य वैराग्यं दुःखगर्भितम् । सोऽथात्र तापसीभूय पञ्चाग्न्यादितपोऽकरोत् ॥ १४१ ॥ अथाऽत्र भरतक्षेत्रे पुरी वाणारसी वरा । लोकोऽस्त्येकोऽपि नो शोकं यत्र स्वप्नेऽपि पश्यति ॥ १४२ ॥ अश्वसेनो नृपस्तत्र यत्प्रतापाज्जनध्वजे । प्रभयाऽन्यधिके कैः कैर्नारिभिः शल्यभायितम् ॥ १४३ ॥ वामाख्या महिषी तस्य प्राणेभ्योऽप्यतिवल्लभा । शुभाकृतिः परं चित्रं खड्गास-क्तिपरा न यत् ॥ १४४ ॥ च्युत्वा ततश्चैत्रकृष्णचतुर्थ्यां शशिनि स्थिते । विशाखायां चक्रिजीवो वामाकुक्षावववातरत् ॥ १४५ ॥ चतुर्दशमहास्वप्नसूचितार्हत्त्ववैभवः । सुखं सुखेन गर्भोऽसौ वर्धितो वामया ततः ॥ १४६ ॥ पौषासितद-शम्यां सा विशाखास्थविधौ सुतम् । महानिशायां सुषुवे नीलाभं सर्पलाञ्छितम् ॥ १४७ ॥ दिशः प्रसन्नतां भेजुर्दिव्य-दुन्दुभिध्वनिः । सुखासिका तदा श्वभ्रवासिनामप्यजायत ॥ १४८ ॥ ततश्च दिक्कुमारीभिः सूतिकर्मणि निर्मिते । इन्द्रैः संभूय मुदितैश्चक्रे जन्ममहो महान् ॥ १४९ ॥ नृपोऽस्य मुदितो मातुर्गर्भगेऽस्मिन्नहीक्षणात् । पार्श्वे ध्वान्तेऽपि रात्रौ तत् पार्श्व इत्यभिधां व्यधात् ॥ १५० ॥ धात्रीभिर्लाल्यमानोऽसौ क्रमेण प्राप्तयौवनः । प्रसेनजितः पुत्रीं तु परिणिन्ये प्रभावतीम् ॥ १५१ ॥ तया समं स भुञ्जानो भोगान् वातायनस्थितः । सपूजोपस्करान् यातोऽन्यदाऽपश्यद्बहिर्जनान् ॥ १५२ ॥ निजान् जगौ च कोऽद्यास्त्युत्सवो बहिरयं जनः । येन याति प्रमोदेन ततस्तेऽपि जगुर्मुदा ॥ १५३ ॥ पञ्चा-ग्न्यादितपस्तप्यमानः कश्चित् कठाह्वयः । आयातोऽस्ति तपस्वी तमर्चितुं यात्ययं जनः ॥ १५४ ॥ प्रभुरप्यगमत्तत्र तस्य दर्शनकौतुकी । पञ्चाग्नितपसिस्थं तं ददर्श च कठं शठम् ॥ १५५ ॥ दह्यमानमहिं ज्ञानत्रयभृत्त्रिजगत्पतिः । अग्निकु-

एकान्तरक्षिप्तकाष्ठमध्यस्थमैक्षत ॥ १५६ ॥ तद्वीक्ष्य सहसाऽऽख्यत्स दयानिधिरदः प्रभुः । अहो पापमहो पापं यत् कृपा न तपस्यपि ॥ १५७ ॥ प्रणयिन्या विना भोगरङ्गो वाङ्गं विनात्मना । यथा सैन्यं विना राज्ञा तथा धर्मो विना दयाम् ॥ १५८ ॥ यद्यारेऽत्रे स्वस्य कष्टं किमन्येषां करोषि तत् । विषात्सुधोद्भव इव धर्मः प्राणिवधात् कथम् ॥ १५९ ॥ निशम्येति कठोऽवोचत् रोषताम्रमुखेक्षणः । कं रे मूर्ख कुमाराहं कुर्वे प्राणिवधं वद ॥ १६० ॥ अथ तत्प्रत्ययार्थं स्वैः पुंभिर्दारु विदार्य सः । कञ्चित्तत्रार्धदग्धाङ्गमहिमेकमदर्शयत् ॥ १६१ ॥ प्रभोर्वाक्यामृतं पीत्वा नमस्कारमवाप्य च । मृत्वा समाधिना सोऽहिर्धरणोऽभूदहीश्वरः ॥ १६२ ॥ स्तूयमानो जनैः स्वामी ततोऽगात्सौवर्वेश्मनि । विषण्णो दुस्तपं तेपे तपोऽज्ञानहतात् कठः ॥ १६३ ॥ अथ मेघकुमारेषु मृत्वा भवनवासिषु । जायते स्मासुरो मेघमाली त्यज्ञानकष्टतः ॥१६४॥ स सांवत्सरिकं दानं दत्त्वा भवविरक्तधीः । विशाखाभे विभुः पौषाद्यैकादश्यां कृताष्टमः ॥ १६५ ॥ त्रिंशत्या राजपुत्राणां समं मैत्रीमुपेयुषाम् । केशानुन्मूल्य नत्वा च सिद्धान् श्रामण्यमाश्रयत् ॥ १६६ ॥ युग्मम् ॥ द्वितीयेऽह्नि प्रभुः कोपकटाख्ये सन्निवेशने । कृत्वा पारणकं धन्येऽन्यगृहे व्यहरद्भुवि ॥ १६७ ॥ अन्येद्युर्नगरासन्नतापसाश्रमसन्निधौ । कूपोपकण्ठे न्यग्रोधाधोऽस्थात् प्रतिमया विभुः ॥ १६८ ॥ प्राच्यवैरं तदा स्मृत्वा मेघमाल्यसुराधमः । सिंहान् विभुमुपद्रोतुं विचक्रे च गजादिकान् ॥ १६९ ॥ परं न तैस्तिलतुषमात्रं प्रभुरुपद्रुतः । चुर्णीभवेद् दृशदिव किं वैडूर्यमणिः क्वचित् ॥ १७० ॥ जातामर्षस्ततः पापो विभुं मज्जयितुं जले । विचक्रे खे महाघोरं गर्जन्तं स घनाघनम् ॥ १७१ ॥

१ पौषस्य आद्या संक्रान्तिमासापेक्षया कृष्णा या एकादशी तस्यां, चान्द्रमासापेक्षया तु मार्गशीर्षकृष्णैकादश्याम्.

ततोऽसौ मुशलाकारधाराभिर्वर्षितुं घनः। प्रवृत्तः स्वामिनो नीरं कण्ठदघ्नमभूत् क्रमात् ॥ १७२ ॥ धरणेन्द्रो विवेदाथावधिना त्रिजगत्प्रभोः। कठोपसर्गं सहसाऽऽजगाम च महामनाः ॥ १७३ ॥ जिनं प्रणम्य सोऽधाक्षं वरमंह्योरधोन्यधात्। पृष्ठं पार्श्वौ च पिदधे निजाङ्गेन पुनर्विभोः ॥ १७४ ॥ फणैस्तु सप्तभिश्चक्रे छत्रं शिरसि स प्रभोः। अब्जेऽम्बुमाननालेऽस्थात्सुखं स्वाम्यथ हंसवत् ॥ १७५ ॥ दृष्ट्वा तथाऽप्यमर्षेण वर्षन्तं मेघमालिनम्। धरणोऽवगरे पापेत्यारेभे किमनर्थकृत् ॥ १७६ ॥ प्रभोः सहिष्णोर्भृत्योऽहं सहिष्ये न ह्यतः परम्। कृतं किमागस्तेऽनेन यज्ज्वलन् रक्षितोऽस्म्यहम् ॥ १७७ ॥ शत्रुर्निष्कारणोऽस्यत्र मित्रे निष्कारणे प्रभौ। यदेवं कृतवाँस्तत्ते भाव्यनर्थकरं भृशम् ॥ १७८ ॥ निशम्येति स भीतस्तं धरणं वीक्ष्य सेवकम्। समं कोपेन संहृत्य मेघं चाह्नमयत् प्रभुम् ॥ १७९ ॥ दुष्कर्मशङ्कितं मां त्वं रक्ष रक्ष क्षमानिधे। इत्युक्त्वा स निजं धाम जगाम जिनपं स्तुवन् ॥ १८० ॥ निवारितोपसर्गोऽगात्स्वस्थानं धरणोऽप्यथ। काशीं गत्वाश्रमपदोद्यानेऽस्थाच्छातकीतले ॥ १८१ ॥ चैत्रकृष्णचतुर्थ्यां स विशाखायां जिनेश्वरः। कृताष्टमतपाः प्राप केवलज्ञानमुज्ज्वलम् ॥ १८२ ॥ युग्मम् ॥ ततः समागताः सर्वे सुरेन्द्राश्चलितासनाः। चक्रुः समवसरणं त्रिप्राकारविराजितम् ॥ १८३ ॥ तत्र सिंहासनस्थोऽथ चक्रेऽसौ धर्मदेशनाम्। तां निशम्य लघुलोका अणुव्रतमहाव्रते ॥ १८४ ॥ सङ्घं चतुर्विधं स्वामी स्थापयित्वा ततो भुवि। विजहारैनवह्नव्याम्भोजन्मानि विकाशयन् ॥ १८५ ॥ सहस्राः स्वामिनोऽभूवन् दीक्षिताः षोडशर्षयः। अष्टत्रिंशत्सहस्राणि साध्वीनां गुणसंभृताम् ॥ १८६ ॥ श्रद्धालूनां लक्षमेकं चतुःषष्टि

---

१ इनः सूर्यस्तद्वत्.

सहस्रयुक् । त्रिलक्षी श्राविकाणां तु सहस्राः सप्तविंशतिः ॥ १८७ ॥ अथ मोक्षगमं मत्वा सम्मेतशिखरे विभुः । श्रावणस्य सिताष्टम्यां विशाखास्थे विधौ ययौ ॥ १८८ ॥ मासिकं तु तपः कृत्वा त्रयस्त्रिंशन्मुमुक्षुयुक् । मुक्तिं जगाम निष्कर्मा श्रीपार्श्वजिननायकः ॥ १८९ ॥ त्रिंशद्वर्षाणि गार्हस्थ्ये व्रतित्वे सप्ततिस्तथा । इति वर्षशतं सर्वायुरभूत्तस्य चार्हतः ॥१९०॥ सुगन्धिद्रव्यैस्तद्वक्राः संस्कृत्य स्वामिनो वपुः । कृत्वा नन्दीश्वरे यात्रां जग्मुः स्थानं निजं निजम् ॥ १९१ ॥ धरणोऽपि ततश्च्युत्वा लब्ध्वा जन्म नृणां ततः । क्रमेण शिवसौख्यानि लप्स्यते धर्मकर्मणा ॥ १९२ ॥ एवं कथमपि प्राप्य भव्या नरभवादिकम् । धर्मकर्मसु सर्वत्र मा भवन्तु प्रमादिनः ॥ १९३ ॥

॥ इति श्रीपार्श्वनाथचरितान्तर्गतं धरणेन्द्रचरितम् ॥

अथात्रैव द्वारे विशेषमाह—

कालप्राणिभवा अनादिनिधनास्तत्सर्वजातौ सदा,
जीवेन भ्रमता मुहूर्त्तमपि हि प्राप्तं न किञ्चिद्धितम् ।
मुक्ताशुक्तिकयेव वारि मणिकृद्धाऊौ क्वचिद्दैवत-
स्तत्प्राप्याथ सकम्बलेन शबलेनोद्गेव धार्यं श्रिये ॥ ६ ॥

व्याख्या—कालप्राणिभवाः कालजीवभवा अनादिनिधना न विद्यते आदिर्निधनं प्रान्तश्च येषां ते तथा । तत्ततः सर्वजातौ एकेन्द्रियादियोनौ सदा सर्वदा जीवेनात्मना भ्रमता पर्यटता मुहूर्त्तमपि हितं पुण्यं हि निश्चितं किञ्चित्

स्वल्पमपि न प्राप्तं । अथ पुनः क्वचित् क्वापि तञ्चितं प्राप्य श्रिये अर्थात् मोक्षलक्ष्म्यै धार्य्यं धरणीयं । कयेव किं ? मुक्ताशुक्तिकया मणिकृत् मुक्ताफलकारि वारि जलमिव वार्धौ समुद्रे केनेव ? जवणा वृषभेणेव । किंनाम्ना ? शबलेन शबलनाम्ना । किंविशिष्टेन शबलेन ? सकम्बलेन कम्बलोद्वणा सहितेनेति वृत्ताक्षरार्थः ॥ ६ ॥ भावार्थः कथयाह—

समस्ति भरतक्षेत्रमएकनं मथुरापुरी । सर्वदा यत्र सर्वोऽपि जनः पापपराङ्मुखः ॥ १ ॥ यत्रालोक्य कलाकेलिकेलि-[1]वापीमिवाङ्गनाम् । श्यामानाङ्गीं मनोमीनो योगिनामपि मज्जति ॥ २ ॥ जिनदासाभिधस्तत्र श्रेष्ठी श्रेष्ठिशिरोमणिः । क्रीरुति भ्रमरीवार्हद्भक्तिर्यन्मानसाम्बुजे ॥ ३ ॥ सान्वयाख्याऽभवत्तस्य साधुदासीति वल्लभा । तस्याः कयाचिदाङ्गीर्या[2] जैर्य दानादिनाऽजनि ॥ ४ ॥ आङ्गीर्याः सदनेऽन्येद्युर्जज्ञे पाणिग्रहोत्सवः । निमन्त्रितौ तदा प्रीत्या श्रेष्टिनौ प्राहतुस्त्वदः ॥ ५ ॥ आयातुं नौ क्षणस्तत्र नास्तीत्यागम्यते कथम् । विवाहार्हं परं वस्तु दास्ये तत्र यदिष्यते ॥ ६ ॥ अथाङ्गीर्या श्रेष्ठिदत्तं शृङ्गारादिकमाददे । ततस्तस्या विवाहोऽभूत्सरङ्गो मुदिता च सा ॥ ७ ॥ ततः प्रीतेन तन्नर्त्रा वृषभौ द्वौ त्रिवार्षिकौ । कम्बलः शबलश्चेत्युपनीतौ श्रेष्ठिनः पुरः ॥ ८ ॥ वृषावनाददानस्य श्रेष्ठिनोऽथ प्रसह्य सः । द्वारे बध्वा ययौ मैत्री तादृशामीदृशी यतः ॥ ९ ॥ जिनदासस्ततो दध्यौ मुञ्चाम्येनौ वृषौ यदि । तन्नरैर्योजयिष्येते हलादिषु दुरात्मभिः ॥ १० ॥ किं कुर्वे ही सुदुष्पाप्यौ मनागविरतस्य मे । मूर्खमैत्र्या पातितोऽस्मि कीदृशे व्यसनेऽनया ॥ ११ ॥ ततः कृपापरीतान्तःकरणः स धनी वृषौ । पयस्तृणादिना प्रासुकेनापुष्यदनारतम् ॥ १२ ॥ सोऽष्टम्यां च चतुर्दश्यां

१ कलाकेलिः कामदेवस्तस्य क्रीडावापीमिव. २ स्त्रीनाम्नि. ३ मैत्री.

पौषधस्थ उपोषितः । शृण्वतोरेतयोर्धर्मशास्त्रमार्थापयत् खलु ॥ १३ ॥ धर्माकर्णनतो जातौ शुभभावाविमौ ततः । भुङ्क्ते यत्राहि न श्रेष्ठी भुञ्जाते तत्र तौ च न ॥ १४ ॥ श्रेष्ठी दध्यावियत्कालं पुष्टौ तावनुकम्पया । अथ साधर्मिकावेतौ वाढं पोष्यौ मयान्वहम् ॥ १५ ॥ ततो दिने दिने श्रेष्ठी भक्तिं वृषभयोस्तयोः । चक्रे न तद्धिया ह्येतौ पशू किंतु स्वबान्धवौ ॥ १६ ॥ जातोऽन्यदाऽथ भणमीरवणयक्षालये महः । वाहवाहनकेलौ चारब्धा ग्राम्यैस्तदा जनैः ॥ १७ ॥ जिनदास-सुहृत्कोऽप्यनापृच्छ्य वृषभाविमौ । गृहीत्वाऽयोजयद्भव्यां पापः सोऽलमवाहयत् ॥ १८ ॥ तद्वेगेन वाहकेभ्यां जनाः कृतपणा जिताः । मुदितेनामुना जातत्रोटौ बद्धौ च तद्गृहे ॥ १९ ॥ अथ तत्पार्श्वमागात्स श्रेष्ठी तौ वीक्ष्य चेतसि । विखिन्नश्चिन्तयामास किमकारि दुरात्मना ॥ २० ॥ सवेपथू बहुश्वासावाराव[1]वारद्धताङ्कितौ । तौ वीक्ष्य प्राह सस्नेहं करुणामन्थरेक्षणः ॥ २१ ॥ अहो वृषौ क्वचित् कार्यौ वैरिभावो न साम्प्रतम् । उपकारेऽपकारे हि न सतां जिघ्यते मनः ॥ २२ ॥ अथ तृणाम्भसी श्रेष्ठिदत्ते तौ नादतुर्मनाक् । विवेकिनावनशनं चिकीर्षन्तौ वृषोत्तमौ ॥ २३ ॥ तद्भावमिङ्गितैर्ज्ञात्वाऽनशनं श्रेष्ठ्यदात्तयोः । प्रहृष्टौ तावपि प्रीत्याऽङ्गीचक्रतुरदस्ततः ॥ २४ ॥ श्रेष्ठिदत्तान्नमस्कारान् शृण्वन्तौ तौ समाधिना । विपद्य जग्मतु (जग्मतुः) र्नागकुमारेषु सुनिर्जरौ ॥ २५ ॥ इतश्च भगवान् वीरो विहरन्नवनीतले । गङ्गा-तरङ्गिणीं रङ्गत्तरङ्गामागमत् क्रमात् ॥ २६ ॥ सिद्धदत्तनाविकेन सज्जितां नावमीशिता । तां तितीर्षुः समारोहदपरेऽपि तथा जनाः ॥ २७ ॥ यावन्नौर्गन्तुमारेभे कौशिकोऽवासयत्तदा । हेमिलाह्वः शकुनवित्प्रोचे श्रेयोऽत्र नेक्ष्यते ॥ २८ ॥ मरणा-

१ आरा शस्त्रविशेषस्तस्या वारेण समूहेन ये कृतास्तैर्व्याप्तौ आराधारेति पाठः साधुः. २ शब्दमकरोत्.

न्तमत्र कष्टं सर्वैः प्राप्यमहोऽचिरात् । महात्मनो महिम्नाऽस्य ततो मोहोऽस्ति किं तु नः ॥ २९ ॥ तस्मिन्नेवं वदत्येवा-गाधेऽम्बुनि जगाम नौः । सुदाढो नागकुमारोऽपश्यत्तत्र स्थितं प्रभुम् ॥ ३० ॥ स्मृतप्राग्जन्मवैरोऽसौ क्रोधेनेदमचिन्त-यत् । सोऽयं येन हतः सिंहोऽहं त्रिपृष्ठजन्मवान्तरे ॥ ३१ ॥ आसन्नमवसानं मे यद्यप्यस्ति तथाऽप्यहम् । प्राग्वैरं साध-याम्यद्य पश्चाद्यद्भाव्यमस्तु तत् ॥ ३२ ॥ ध्यात्वेत्येत्य च सक्रोधं कुर्वन् किलकिलारवम् । संवर्तकमहावातं सुदाढो व्यक-रोत्तदा ॥ ३३ ॥ निपेतुः पादपास्तेन गिरयोऽपि चकम्पिरे । लोलत्कल्लोलमालाभिर्गाङ्गमुच्चलितं पयः ॥ ३४ ॥ गाङ्गैस्त-रङ्गैरुत्पातिनिपातिभिरियं तु नौः । जदाच्यत न्याच्यतेजशुण्मोत्पाटितवृक्षवत् ॥ ३५ ॥ ततो भीतो जनोऽशेषः संस्मर्तुं स्वस्वदेवताः । आरेभे दीनचेतस्को हाहारवपरायणः ॥ ३६ ॥ तदा कम्बलशबलावेहेतामवधेः प्रभोः । विधीयमानमे-तेन सुदाढेनोपसर्गकम् ॥ ३७ ॥ कृत्यैरन्यैः कृतं चार्हदुपसर्गनिवारणम् । शुभायतीति ध्यात्वा तौ तत्रैवाजग्मतुः क्षणात् ॥ ३८ ॥ सुदाढेन समं योद्धुमेकः प्रववृते सुरः । निन्ये नदीतटे नावं परश्चोत्पाट्य पाणिना ॥ ३९ ॥ जितो महर्द्धिकोऽ-प्यायुःप्रान्ते सोऽथ गलद्बलः । ताभ्यां ततो गतो नष्ट्वा सुदाढो भयविह्वलः ॥ ४० ॥ पुष्पगन्धादिवृष्टिं तौ विधाय जिनमूर्धनि । तत्स्तुत्या मुखरमुखौ जग्मतुः स्थानमात्मनः ॥ ४१ ॥ एवं विज्ञाय विबुधा दुर्लभमासाद्य मर्त्यजन्म मुधा । मा हारयत कृतार्थीकुरुततरां धर्मकर्मचयैः ॥ ४२ ॥

॥ इति कम्बलशबलसुरकथानकम् ॥

व्याख्यातमिदं कथमपीति द्वितीयं द्वारं । अथ क्रमायातं नरत्नवस्वरूपद्वारं विवरीषुराह—

क्षेत्रे नामलवालुके च लवणाकीर्णे च रोहेद्यथा,
बीजं किञ्चिदिहाखिले च फलति क्षात्रे च नानाफलैः ।
देवे नैरयिके तिरश्चि मनुजे श्रेयःप्रसूतिस्तथा,
तस्मान्मेघकुमारवन्नरत्नवेऽनन्तश्रिये त्वर्यताम् ॥ ७ ॥

व्याख्या—अमलवालुके निर्मलवालुके क्षेत्रे बीजं यथा न रोहेन्नोप्तञ्चेत् । च पुनर्लवणाकीर्णे लवणव्याप्ते क्षेत्रे न रोहेत्, प्रत्युत नश्यति च बीजमिति भावः । इह क्षेत्रेऽखिलेऽखेटिते किञ्चित् फलति । च पुनः क्षात्रे क्षात्रसहिते क्षेत्रे नानाफलैर्विविधफलैर्बीजं यथा फलति, तथा तेन प्रकारेण देवे देवगतौ नैरयिके नरकगतौ तिरश्चि तिर्यग्गतौ मनुजे मनुष्यगतौ श्रेयःप्रसूतिः पुण्योत्पत्तिर्भवति । तस्मात्कारणान्नरत्नवे नृजन्मनि सति त्वर्यतां उद्यस्यतां, धर्मे इति शेषः । यतः—

"देवा विसयपसत्ता नेरइया निच्चदुक्कसंतत्ता । तिरिया विवेगविगला धम्मसमग्गा पुणो मणुया ॥ १ ॥"

तथा चार्षम्—

"चत्तारि परमंगाणि दुल्लहाणि य जंतुणो । माणुसत्तं सुई सद्धा संजमम्मि य वीरियं ॥ २ ॥ सुरनारया दुगइया तिरिक्कजोणी हवंति चउगइया । मणुया पंचमगइया सुउत्तभा तेण मणुयगई ॥ ३ ॥ सुरनारएसु संमत्तमत्थि तिरिएसु

देसविरई वि । सव्वविरई उ मणुयत्तणम्मि तो वण्णिमो एयं ॥ ४ ॥ जे संमुच्छिममणुया ते उ असंखा न तेहिँ अहिगारो । जे पुण गब्भयमणुया संखिज्जा तेहिँ इह पगयं ॥ ५ ॥"

इत्यादिसिद्धान्तोक्तिन्निर्मनुष्यत्वं दुर्लभं लब्ध्वा सर्वसुगतिप्राप्तिहेतुं च मत्वा धर्मकर्मणि सर्वथा प्रमादो न विधेयः । किमर्थं ? अनन्तश्रिये मोक्षार्थं । किंवत् ? मेघकुमारवत् , यथा मेघकुमारो नृजवेऽनन्तश्रिये त्वरितवानित्यक्षरार्थः ॥ ७ ॥

जावार्थः कथयाविर्जाव्यते—

श्रेयोराजगृहे राजगृहे श्रीश्रेणिकेशितुः । धारिण्याः प्रणयिन्याः सञ्जज्ञेऽजूज्ञाग्ययोगतः ॥ १ ॥ गजस्वप्नाख्यातजाग्यसंपद्दोहदमद्भुतम् । उत्पादयन्मेघवृष्टौ पुरे जमणलक्षणम् ॥ २ ॥ युग्मम् ॥ नृपादेशात् पूरितेऽस्मिन् देवमाराध्य मन्त्रिणा । अजयेनासूत मेघकुमार इति सा सुतम् ॥ ३ ॥ अन्यदा देशनां श्रुत्वा श्रीमद्वीरजिनेशितुः । यौवनस्थोऽपि संविग्नः पितरौ स व्यजिज्ञपत् ॥ ४ ॥ ताताद्य तीर्थकृद्धर्मदेशना संश्रुता मया । ततोऽस्मि जवज्जीतोऽहं शिष्यां कर्तुमना व्रतम् ॥ ५ ॥ यत्प्रातस्तन्न मध्याह्ने यत्तत्र निशि तन्न हि । विलोक्यतेऽत्र संसारे तज्जागो विषयेषु कः ॥ ६ ॥ कथं नामातिरिच्यन्ते विषया न विषादपि । मात्राधिका यतोऽनन्तमृत्युदाश्च निषेविताः ॥ ७ ॥ ताताद्य मामनुमन्येथा यथा दीक्षां श्रयाम्यहम् । जवज्जीरुर्महावीरपादोपान्ते हितावहाम् ॥ ८ ॥ पितरावप्यदोऽवोचत्तां वत्स नेषत्करं व्रतम् । कथं तत्कदलीगर्जमृदुदेहश्चरिष्यसि ॥ ९ ॥ मेघोऽप्यूचे जवोद्विग्नो व्रतं दुष्करमप्यहम् । करिष्ये दुष्करं किञ्चिदीरैरूरीकृतं हि न ॥१०॥

---

१ आज्ञया. २ मध्याह्ने. ३ माम्. ४ अवदताम्. ५ सुकरं न.

धारिण्यवक् कथं वत्स पालितं लालितं सुतम् । त्वां व्युत्सृजामि सहसा प्राणेभ्योऽप्यतिवल्लभम् ॥ ११ ॥ सोऽवक् पित्रोरङ्कतोऽप्यङ्गिन्ते मृत्युः सुतं प्रसूः[1] । तन्मृत्युं ग्लपयन् दीक्षादत्याऽहं किं न हर्षदः ॥ १२ ॥ अथ तं श्रेणिकोऽप्याख्यद्व्रतं यद्यपि लास्यसि । तथाप्यादाय मद्राज्यं समाधिं कुरु मे दृशोः ॥ १३ ॥ ॐमित्युक्तेऽमुना राज्ये नृपो मेघं न्यधात् क्षणात् । पुनस्ते किं करोमीति हर्षितोऽसौ जगाद च ॥ १४ ॥ मेघोऽप्याख्यत् प्रभो मह्यमानयस्व व्रतार्थिने । रजोहरणपात्रादिधर्मोपकरणं वरम् ॥ १५ ॥ विमना अपि तद्भूपः तत्सर्वं चानयत् क्षणात् । मेघोऽपि वीरपादान्ते गत्वा व्रतमशिश्रियत् ॥ १६ ॥ रात्रौ मेघकुमारोऽथानुज्येष्ठं न्यस्तसंस्तरे । सुप्तः संघट्टितो गच्छदागच्छन्मुणांह्रिभिः ॥ १७ ॥ सोऽथव्यचिन्तयत् पादैर्निःस्वं मां घ्नन्त्यमी कथम् । स्वमेव पूज्यं सर्वत्र दीक्षां त्यजयामि तत्प्रगे ॥ १८ ॥ इत्थं ध्यायन् कथमपि मेघोऽतिक्रम्य शर्वरीम् । व्रतं त्यक्तुमनाः स्वामिसमीपमगमत् क्रमात् ॥ १९ ॥ सर्वज्ञः स्माह तन्नावं ज्ञात्वा केवलसंविदा । व्रतभारेण खिन्नः किं स्मरसि प्राग्भवान्न किम् ॥ २० ॥ इतो वैताढ्यसुव्यासीर्गजस्त्वं तृतीये भवे । मेरुप्रभाख्यो दावार्त्तः पातुमम्भः सरस्यगाः ॥ २१ ॥ प्रतीभेन हतः पङ्कमग्नस्त्वं तत्र दुर्बलः । विपद्येभोऽभवः सप्ताहान्ते विन्ध्ये तयाख्यया ॥ २२ ॥ दावाग्निं वीक्ष्य जातिं च स्मृत्वोन्मूल्य तृणादिकम् । नद्यास्तीरेऽकरोर्यूथरक्षार्थं स्थण्डिलत्रयम् ॥ २३ ॥ दावाग्नौ ज्वलितेऽन्येद्युरधावः स्थण्डिलान्यभि । पूर्वायातैर्भृता दृष्टा मृगाद्यैः स्थण्डिलोऽभयी ॥ २४ ॥ तां व्यतीत्य तृतीये त्वं गत्वाऽस्थाः स्थण्डिले ततः । देहकण्डूयनार्थं त्वमुदक्षेप्सीः क्रमं च भोः ॥ २५ ॥ तवोत्क्षिप्तस्य

१ हे मातः.

तस्यांहेः शशकः कोऽप्यधोऽपपत् । कृपालुस्त्वं तथा वीक्ष्य तं चोत्क्षिप्तपदा स्थितः ॥ २६ ॥ दवे शान्ते ह्यहात्सार्धा-
द्ययुर्जीवा यथास्पदम् । क्षुत्पिपासार्दितः पातुं पयस्त्वमपि धावितः ॥ २७ ॥ चिरोत्क्षेपणखिन्नैकक्रमत्वान्न्यपतो भुवि ।
क्षुत्तृट्क्लेशार्दितो मृत्युं त्र्यहात्त्वं प्राप्तवाँस्ततः ॥ २८ ॥ तत्कृपापुण्यतो राजपुत्रो जातोऽसि साम्प्रतम् । प्राप्तं कथञ्चि-
न्मानुष्यं वृथेदं नयसे कथम् ॥ २९ ॥ शशमेकमपि त्रातुं तदा कष्टं तथा स्थितः । मुन्यंह्रिघट्टनाकष्टात् कथं नष्टोऽसि
सम्प्रति ॥ ३० ॥ एकप्राण्यभयं दत्त्वा त्वमाप्तः फलमीदृशम् । सर्वप्राण्यभयदाने प्रपन्ने मा प्रमादय ॥ ३१ ॥ इति
प्रभुगिरा मेघकुमारोऽभूद् दृढो व्रते । स मिथ्यादुष्कृतं दत्त्वा तेपे तीव्रतरं तपः ॥ ३२ ॥ सम्यगाराध्य चारित्रं मृतोऽ-
नुत्तविजये सुरः । ततश्च्युत्वा विदेहेषूत्पद्यासौ मोक्षमेष्यति ॥ ३३ ॥ एवं विचार्य चतुरा लब्धे नृभवेऽत्र मा प्रमादयत ।
तदशक्तिर्दृष्टान्तैः समस्त्ययं दुर्लभो जगति ॥ ३४ ॥

॥ इति मेघकुमारकथा ॥

अथ नृभवधारस्यैव विशेषमाह—

वेलाकूले महति नृभवे प्राक् प्रसन्नेन्दुवक्त्र–ज्जीवामूढश्लथदृढधियः क्षीणते कर्मवस्तु ।
क्रूरा गुप्तिः कुगतियुगली वर्णकः स्वर्दुरन्तो, येनान्ते स्याच्छिवपुरमुरुस्फूर्त्ति तेषां क्रमेण ॥ ८ ॥

व्याख्या—वेलाकूले वेलाकूलरूपे शुभाशुभसर्ववस्तु प्राप्तिकारकत्वान्नृभवे नरजन्मनि महति गरिष्ठे जीवाः प्राणिनो मूढश्लथदृढधियः मन्दमध्यस्थिरबुद्धयः तत्प्रसिद्धमष्टमूलप्रकृत्यष्टपञ्चाशदधिकशतोत्तरप्रकृतिभेदभिन्नं कर्मरूपं वस्तु

क्षीणते क्षयं कुर्वते । कर्मवस्तु चेदं द्विविधं मूलप्रकृत्युत्तरप्रकृतिभेदात् । तत्र मूलप्रकृतयोऽष्टौ ज्ञानावरण १ दर्शनावरण २ वेदनीय ३ मोहनीया ४ यु ५ र्नाम ६ गोत्रा ७ न्तराय ८ भेदात् । उत्तरप्रकृतयोऽष्टापञ्चाशदुत्तरं शतं । तत्र मतिज्ञानावरणं १ श्रुतज्ञानावरणं २ अवधिज्ञानावरणं ३ मनःपर्यवज्ञानावरणं ४ केवलज्ञानावरणं ५ इति पञ्चधा ज्ञानावरणं । चक्षुर्दर्शनावरणं १ अचक्षुर्दर्शनावरणं २ अवधिदर्शनावरणं ३ केवलदर्शनावरणं ४ निद्रा ५ निद्रानिद्रा ६ प्रचला ७ प्रचलाप्रचला ८ स्यानर्द्धिः ९ इति नवधा दर्शनावरणं । सातवेदनीयं १ असातवेदनीयं २ चेति द्विधा वेदनीयं । क्रोधमानमायालोभाश्चत्वारोऽपि संज्वलन १ प्रत्याख्याना २ प्रत्याख्याना ३ नन्तानुबन्धि ४ भेदैर्गुणिताः षोडश कषायाः १६, हास्य १ रत्य २ रति ३ भय ४ शोक ५ जुगुप्सा ६ पुंवेद ७ स्त्रीवेद ८ नपुंसकवेदा ९ ख्या नव नोकषायाः, सम्यक्त्वं १ मिश्रं २ मिथ्यात्वं ३ चेत्यष्टाविंशतिभेदं मोहनीयं । देवायु १ र्नरकायु २ स्तिर्यगायु ३ र्मनुष्यायु ४ श्चेति चतुर्विधमायुः । देवगति १ र्नारकगति २ र्मनुष्यगति ३ स्तिर्यग्गति ४ श्चेति चतुर्धा गतिः, एकद्वित्रिचतुःपञ्चेन्द्रियादिभेदैः पञ्चधा जातिः ९, औदारिकवैक्रियाहारकतैजसकार्मणभेदैः पञ्चधा शरीराणि १४ शीर्षादीन्यङ्गानि अङ्गुल्यादीन्युपाङ्गानि शेषाण्यङ्गुलिपर्वादीन्यङ्गोपाङ्गानि चेति अङ्गोपाङ्गनाम त्रिविधं १७, औदारिकेण औदारिकबन्धनं १ औदारिकेण तैजसबन्धनं २ औदारिकेण कार्मणबन्धनं ३ औदारिकेण औदारिकतैजसकार्मणबन्धनं ४, एवं वैक्रियेण वैक्रियबन्धनं १ वैक्रियेण तैजसबन्धनं २ वैक्रियेण कार्मणबन्धनं ३ वैक्रियेण वैक्रियतैजसकार्मणबन्धनं ४, एवं चत्वारो भेदा आहारकबन्धनस्यापि इत्येवं द्वादश १२, तथा तैजसतैजसबन्धनं १३ तैजसकार्मणबन्धनं १४ कार्मणकार्मणब-

न्धनं १५ इत्येवं पञ्चदशधा बन्धननाम ३२, औदारिकवैक्रियाहारकतैजसकार्मणसंघातनभेदात् पञ्चधा संघातनं ३७, वज्रर्षभनाराचं १ ऋषभनाराचं २ नाराचं ३ अर्धनाराचं ४ कीलिका ५ सेवार्त्त ६ चेति षोढा संहननं ४३, समचतुरस्र १ न्यग्रोधपारिमांडल्य २ सादि ३ वामन ४ कुब्ज ५ हुंड ६ भेदैः षोढा संस्थानं ४९, कृष्ण १ नील २ लोहित ३ हारिद्र ४ शुक्ल ५ भेदैः पञ्चधा वर्णनाम ५४, सुरभिदुरभिभेदाभ्यां द्विविधं गन्धनाम ५६, तिक्त १ कटु २ कषाय ३ म्ल ४ मधुर ५ भेदात् पञ्चधा रसनाम ६१, गुरु १ लघु २ मृदु ३ कठिन ४ स्निग्ध ५ रूक्ष ६ शीतो ७ ष्ण ८ भेदैरष्टधा स्पर्शनाम ६९, तथाऽगुरुलघुनाम ७०, उपघातनाम ७१, पराघातनाम ७२, देवनारकतिर्यङ्मनुष्यानुपूर्विकारूपा चतुर्विधाऽऽनुपूर्वी ७६, उच्छ्वासनाम ७७, आतपनाम ७८, उद्योतनाम ७९, शुभविहायोगति ८० रशुभविहायोगतिश्च ८१, त्रसनाम ८२, स्थावरनाम ८३, बादरनाम ८४, सूक्ष्मनाम ८५, पर्याप्तनाम ८६, अपर्याप्तनाम ८७, प्रत्येकनाम ८८, साधारणनाम ८९, स्थिरनाम ९०, अस्थिरनाम ९१, शुभनाम ९२, अशुभनाम ९३, सुभगनाम ९४, दुर्भगनाम ९५, सुस्वरनाम ९६, दुःस्वरनाम ९७, आदेयनाम ९८, अनादेयनाम ९९, यशःकीर्तिनाम १००, अयशःकीर्तिनाम १०१, तीर्थंकरनाम १०२, निर्माणनाम १०३ इत्येतत्र्युत्तरं शतं नामकर्मणः स्यात्। उच्चैर्गोत्रनीचैर्गोत्रभेदाद्विविधं गोत्रं। दानलाभभोगोपभोगवीर्यान्तरायरूपं पञ्चविधमन्तरायं इत्येताः सर्वाः संकलिता अष्टपञ्चाशदुत्तरं शतं कर्मप्रकृतयः कर्मस्वभावाः स्युः। यतः—

"प्रकृतिस्तु स्वभावः स्यात् स्थितिः कालावधारणम्। अनुभागो रसो ज्ञेयः प्रदेशो दलसञ्चयः॥ १॥"

इति । तथा स्थितिस्तु मोहनीयस्य सप्ततिकोटीकोट्यः सागरोपमाणां । ज्ञानावरणीयदर्शनावरणीयवेदनीयान्तरायाणां प्रत्येकं त्रिंशत्कोटीकोट्यः सागराणां । नामगोत्रयोस्तु विंशतिः कोटीकोट्यः सागरोपमाणां । आयुषस्तु त्रयस्त्रिंशत्सागरोपमाणि इत्येताः कर्मणां स्थितयः । मधुरमधुरतरातिमधुरशोभनरसैः कटुकटुकतरातिकटुककश्मलरसैः इत्यनुभागः । "अनुभागो रसो ज्ञेय" इतिवचनात् । श्यामसिश्रस्वरूपात्युज्ज्वलपुद्गलदलैः, तथा लघ्वतिलघुरूपगुरुकातिगुरुकदलैरिति प्रदेशः । "प्रदेशो दलसञ्चयः" इत्युक्तेः । एभिः कारणैः पूर्वोक्ताः प्रकृतयः पूर्वोक्तस्थितिका जीवेन बध्यन्त इति सिद्धान्तोक्तेर्जीवाः कर्मवस्तु क्रीणते इत्यत्र कर्मणो वस्तूपमानमिति । किंवत् ? प्राक् प्रसन्नेन्दुवत् यथा प्रसन्नचन्द्रः प्राक् पूर्वं, केवलोत्पत्तेरिति शेषः, कर्मवस्तु शुभाशुभरूपं क्रीतवान् । येन कर्मवस्तुना क्रीतेन तेषां मूढश्लथदृढधियां जीवानां अन्ते प्रान्ते क्रमेण यथासङ्ख्यं वक्ष्यमाणरूपतया, मूढधियां कुगतियुगली नरकतिर्यग्रूपा क्रूरा दुःखदायित्वात् गुप्तिः गुप्तिगृहरूपा स्यान्नवेत् । तथा श्लथधियां वर्णकः प्रधानः स्वः स्वर्गः पुरन्तो दुःखावसानः स्यात् "तं सुरविमाणविहवं" इत्याद्युक्तेः स्वर्पुरन्तः कथ्यते । नन्वव्ययानां लिङ्गादिनियमाभावात्कथमत्र पुष्पिंगनिर्देशः ? यतः—"सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु । वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥ १ ॥" सत्यं, परमत्र वाच्यलिङ्गानुसारेण विशेषणे पुंस्त्वमदुष्टं । तथा दृढधियां शिवपुरं मोक्षनगरं उरुस्फूर्ति गरिष्ठबलं स्यादित्यर्थः । भावार्थं तु कथयाह—(प्रसन्नचन्द्रराजर्षिकथा).

श्रीपोतनपुराधीशः प्रसन्नेन्दुर्महाबलः । न्यस्य बालं सुतं राज्ये प्राव्राजीत्स्वामिनोऽन्तिके ॥ १ ॥ तप्यमानस्तपः साकं

विहरँश्चरमार्हता । असौ क्रमेण राजर्षिर्गीतार्थः समजायत ॥ २ ॥ समं तेनर्षिणा वीरस्वामी राजगृहेऽगमत् । तत्र तं वन्दितुं चोत्कः[1] श्रेणिकः प्राचलन्मुदा ॥ ३ ॥ सैन्याग्रे द्वौ नरौ तस्यान्वर्थौ सुमुखदुर्मुखौ । वार्त्तयन्तौ मिथो मार्गे पश्यन्तावागतौ क्रमात् ॥ ४ ॥ मुनिं प्रसन्नचन्द्राख्यमेकपादस्थितं तदा । आतापनापरं चोर्ध्वबाहुमर्काहितेक्षणम् ॥ ५ ॥ युग्मम् ॥ तं वीक्ष्य सुमुखोऽवादीन्मुनेरस्य तपस्यतः । स्वर्गापवर्गशर्माणि करस्थानीव भान्त्यहो ॥ ६ ॥ प्रत्याह दुर्मुखश्चास्य नैव नामापि गृह्यते । बालो न्यस्तः सुतो राज्येऽमुना यद्भ्रुता व्रतम् ॥ ७ ॥ स चोपद्रूयते भूपैः परैस्तत्राधुना गतैः । पल्योऽप्यस्य क्वचिज्जग्मुः को धर्मो वर्ण्यतेऽस्य तत् ॥ ८ ॥ मन्त्रिणोऽप्यस्य दानादिलोभेन कुमरं[2] च तम् । मुक्त्वा तैर्मिलिता भूपैरन्यायातैः सहाधुना ॥ ९ ॥ ध्यानाकाननदावाग्निं निशम्यास्य वचस्तँतम्[3] । दध्यौ प्रसन्नचन्द्रर्षिः सहसेत्युल्बसत्क्रुधा ॥ १० ॥ तेऽकृतज्ञा दुराचारा मन्त्रिणो मे नराधमाः । साम्प्रतं चक्रिरे नेदं मत्सूनोः सत्कृता अपि ॥ ११ ॥ तत्राभविष्यं यद्यद्याशिक्षयिष्यममूँस्ततः । विकल्पैर्व्याकुलोऽमीभिः प्रसन्नो व्यस्मरद्व्रतम् ॥ १२ ॥ मनसा राजमान्येष प्रवृत्तो योद्धुमञ्जसा । श्रेणिको विनयेनैनं तत्रायातोऽप्यवन्दत ॥ १३ ॥ ध्यानावस्था प्रसन्नेन्दोरहो अस्येति चिन्तयन् । श्रेणिकः श्रीमहावीरं गत्वा नत्वेति पृष्टवान् ॥ १४ ॥ यदा प्रसन्नचन्द्रर्षिर्ध्यानस्थो वन्दितो मया । विपद्येत तदा चेत्स क्व यायाद्वद मे प्रभो ॥ १५ ॥ सप्तमावनिमित्युक्ते नाथेन श्रेणिकोऽस्मरत् । नो मुनेर्नरकं किं तु मया सम्यक्श्रुतं न हि ॥ १६ ॥ क्षणान्तरे पुनः प्रोचे स्वामिनं श्रेणिको नृपः । म्रियते साम्प्रतं चेत्स प्रसन्नः क्व प्रयाति तत् ॥ १७ ॥ सर्वार्थ-

१ उत्सुकः. २ कुमारम्. ३ विस्तृतम्.

सिद्धिमेतीति स्वाम्यपि स्माह तत्त्ववित्। विधा किं व्याकरणमित्यूचे नृयोऽपि नृपतिः ॥ १८ ॥ स्वाम्यवग्ध्यानन्नेदेन विधा व्याकरणं त्विदम्। तदा दुर्मुखवाण्याऽसौ क्रुद्धः साधुः स्वचेतसि ॥ १९ ॥ मनसा युध्यमानोऽसौ समं सामन्तमन्त्रिभिः। तदा श्वन्नगतेर्योग्यः प्रसन्नो वन्दितस्त्वया ॥ २० ॥ त्वय्यत्र संगतेऽज्ञासीत्स क्षीणान्यायुधानि मे। रिपुं हन्मि शिरस्त्रेणाधिमूर्धं पाणिमक्षिपत् ॥ २१ ॥ लुञ्चितं स्वं शिरः स्पृष्ट्वा प्रबुद्धोऽसौ स्मृतव्रतः। किमारब्धं मयाऽकार्यमित्यकार्षीत्स्वगर्हणाम् ॥ २२ ॥ इत्यालोच्य प्रतिक्रम्य शुन्नध्यानं जगाम सः। प्रश्ने द्वितीये सर्वार्थसिद्धियोग्यो बन्नूव च ॥ २३ ॥ तदा प्रसन्नचन्द्रर्षेः समीपे देवदुन्दुन्नेः। निनादमिश्रः संजातो महान् जयजयारवः ॥ २४ ॥ प्रन्नो किमिदमित्युक्तः श्रेणिकेन जगौ जिनः। तस्य केवलमुत्पेदे शुन्नध्यानेन सम्प्रति ॥ २५ ॥ कुर्वते केवलज्ञानमहिमां तस्य निर्जराः। दुन्दुन्निध्वनिपूर्वोऽयं श्रूयते तज्जयारवः ॥ २६ ॥ इति स्वामिगिरा हृष्टः श्रेणिकः स्वगृहेऽगमत्। चिरं प्रसन्नचन्द्रर्षिर्विहृत्य शिवन्नागन्नूत् ॥ २७ ॥ इति श्रुत्वा बुधाः सर्वसंपदामास्पदे नृणाम्। नवे लब्धे सदा कार्यः प्रयत्नो धर्मकर्मणि॥२८॥

॥ इति प्रसन्नचन्द्रकथा ॥

प्राप्तेऽपि नृन्नवे सत्कुलान्नावेन न हीप्सितधर्मप्राप्तिर्नवतीति व्यतिरेकेण सत्कुलमाहात्म्यमाह—

तत्तादृशान्नव्यपितुः सुतोऽप, धर्मालसो यत्सुलसोऽनवन्न।
न किं विषाद्देर्विषहन्मणिः किं, पङ्कान्न वा श्रीसदनं सरोजम् ॥ ९ ॥

१ व्याख्यानं कथनमित्यर्थः.

व्याख्या—यत् सुलसः तत्तादृशाज्ञव्यपितुः सुतोऽपि तादृशो महिषपञ्चशतीहन्ता योऽसावज्ञव्यः पिता कालसौकरिकः। यदुक्तम्—

"जह जह तेसिं इंदियमणोबलं तह तहायरो पावे। ता तेहिंतो मन्ने पवरं एगिंदियत्तं पि ॥ १ ॥ जेसि न देवपयासो न गुणावासो गुरूण मंवासो। नूणं ताण नरत्तं नरगणणापूरणनिमित्तम् ॥ २ ॥"

तस्य सुतोऽपि पुत्रोऽपि धर्मालसो धर्मे प्रमादी नाज्ञवत्, तत्किं दुष्कुलमाहात्म्यमपि तु न, किं तु सुलसप्राक्पुण्यानामेव माहात्म्यमिति शेषाऽध्याहारः। यदुक्तम्—

"मज्झ ठिई पुण एसा अणुसंगेणं हवंति गुणदोसा। जक्किर पुण्णपावा अणुसंगेणं न घिप्पंति ॥ ३ ॥"

किंच "पितेव जायते पुत्रः" इति वचोऽपि न सार्वत्रिकं सर्वत्र तथात्वानुपलब्धेरिति। ननु सत्कुलवर्णनमुपक्रम्याज्ञव्यपितृकुलोत्पन्नः सुलसो धर्मालसो नाजूदिति वदता सत्कुलमाहात्म्यनिरासः स्वयमेव कृतः लाज्ञमिङ्गतो मूलहानिर्जाता तस्येति चेन्न किञ्चिदेतत्, ग्रन्थकर्तुरज्ञिप्रायापरिज्ञानात्। कोऽयमज्ञिप्राय इति चेदुच्यते—ये जना लब्धेऽपि सत्कुले सुलसाद्यालम्बनं गृहीत्वा सत्कुलमहिमानं न मन्यन्ते तान् प्रत्युच्यते सुलसादीनां पुण्यप्राप्तौ न दुष्कुलं हेतुः, किंतु पुण्योपचय इति ज्ञापनात्तत्कुलग्रहो निरस्तः। तदेवाह दृष्टान्ताभ्यां—विषाहेर्विषयुक्तसर्पस्य विषहृन्मणिर्विषापहारि रत्नं किं न स्यात्? अपि तु स्यादेव। वाऽथवा पङ्कात् कर्दमतः श्रीसदनं लक्ष्मीगृहं सरोजं कमलं किं न स्यात्? अपि तु स्यादेव। इति वृत्ताक्षरार्थः। ज्ञावार्थं तु कथयाह—

सुलसकथा—

पुरे राजगृहे जज्ञे कालसौकरिकान्निधः। शौनिकः पापपुण्यादिविचारणपराङ्मुखः ॥ १ ॥ दया यस्य मनोवृत्तिं न स्वप्नेऽपि स्पृशत्यलम्। चारित्रश्रीरिव ध्यानाज्ञानव्यासक्तचेतसाम् ॥ २ ॥ जरव्यासङ्गिनस्तस्मात्सुतोऽभूत्सुलसाभिधः। सुवृत्तो जनतानन्दी क्षाराब्धेरिव चन्द्रमाः ॥ ३ ॥ तस्याजयकुमारस्य संसर्गान्निश्चलं मनः। धर्मे बभूव किं नो हि शुभं स्यात्संगतेः सताम् ॥ ४ ॥ कालसौकरिकोऽन्येद्युः संजाते नरकातिथौ। कुटुम्बभारमारोप्य सुलसे स्वजना जगुः ॥ ५ ॥ यथा भवत्पिताऽत्याक्षीन्नैव हिंसां कदाचन। तथा त्वयापि न त्याज्या सा नोल्लङ्घ्यः कुलक्रमः ॥ ६ ॥ सुलसः प्राह को हिंसां भवद्व्ययविनाशिनीम्। मनस्वी कुरुते दुःखदायिनीं विषवल्लिवत् ॥ ७ ॥ वरं भिक्षाटनान्यासो वरं हालाहलादनम्। वरं प्राणपरित्यागो न हिंसाजीविका वरम् ॥ ८ ॥ ततः साक्षेपमूचुस्ते काऽसौ तेऽहो विदग्धता। कुलक्रमोल्लङ्घनाघाद्[2]धैनो मन्यसेऽधिकम् ॥ ९ ॥ स्वयं मुमूर्षवः सर्वे प्राणिनः सन्ति भूतले। अतस्तेषां वधे पापं पश्यामो नैव किञ्चन ॥ १० ॥ किंच पश्वादयः सन्ति भवेऽत्र क्षुत्तृषार्दिताः। मारितास्तेऽसिना यान्ति [3]स्वस्तत्तेषां वधो मुदे ॥ ११ ॥ अतः प्राणिवधे पापं न स्यात्स्याद्यदि तर्हि तत्। सर्वं विज्ञप्य लास्यामो वयं द्रव्यमिवाखिलाः ॥ १२ ॥ ततश्च विस्मितो दध्यौ सुलसोऽमी कथं जगाः। वदन्त्यज्ञानतोऽप्यापि सन्मार्गे योजयाम्यमून् ॥ १३ ॥ ततोऽन्यत्र दिने त्यक्त्वा कुठारेण निजक्रमम्। सुलसस्तच्छ्यथाक्रान्तो विलपन्नित्युवाच तान् ॥ १४ ॥ भवन्तः स्वजनाः पूज्या अहं दुःखार्दितोऽधुना।

१ ध्यानस्याज्ञानेन व्याप्तचित्तानाम्. २ वधजनितं पापम्. ३ स्वर्गम्.

तद्गृह्यतां विज्ञज्येयं स्तोका स्तोका व्यथा मम ॥ १५ ॥ विहस्य ते जगुर्वत्स त्वद्व्यथाग्रहणे कथम् । समर्थाः स्मो वयं तेन स्वयं त्वं जुङ्क्ष्व सम्प्रति ॥ १६ ॥ ततः सकोपमाख्यत्स मद्व्यथाग्रहणेऽक्षमाः । यूयं चेत्तर्हि मत्पापमादास्यध्वे विज्ञज्य किम् ॥ १७ ॥ इति तद्वचसा बुद्धास्ते प्रापुर्धर्ममार्हतम् । सोऽपि धर्ममतिर्मृत्वा जज्ञे सुगतिज्ञाजनम् ॥ १८ ॥ इत्थं केचि-दुष्कुलेऽपि जाताः स्युः पुण्यबुद्धयः । न प्रायस्तत्र तद्वस्यं शस्यं सत्कुलमेव हि ॥ १९ ॥

॥ इति सुलसकथा ॥

अथान्वयेन सत्कुलमाहात्म्यमाह—

बोधाय सद्धर्मकुलोद्भवाः स्त्रियोऽप्युदायनस्येव पुरा प्रज्ञावती ।
सत्तीर्थता किं जलधेर्न गङ्गया, सद्वृत्तता वा शशिनो न राकया ॥ १० ॥

व्याख्या—सद्धर्मकुलोद्भवाः प्रधानधर्मवत्कुलोत्पन्नाः स्त्रियोऽपि नार्योऽपि पुंसो बोधाय धर्मप्राप्तये भवन्ति । कस्य केव ? उदायनस्य प्रज्ञावतीव, यथोदायनस्य प्रज्ञावती स्त्री पुरा पूर्वं जिनधर्मप्राप्तयेऽभूत्तथा । जलधेः समुद्रस्य गङ्गया सत्तीर्थता प्रधानतीर्थत्वं किं न स्यात् ? अपि तु स्यादेव । वा पुनः सद्वृत्तता प्रधानवर्तुलता शशिनश्चन्द्रस्य राकया पूर्णिमया किं न स्यात् ? अपि तु स्यादेव । इत्यक्षरार्थः । भावार्थस्त्वयम्—

इहास्ति भरते देशः सिन्धुसौवीरसंज्ञकः । यस्येन्यनिधिभिर्मन्ये रत्नगर्भेति भूरभूत् ॥ १ ॥ तत्र वीतभयं नाम पत्तनं सान्वयाख्यया । अस्ति स्वस्तिकरं लक्ष्मीलीलागृहमिवाम्बुजम् ॥ २ ॥ तत्रोदायनभूनाथः सनाथः सर्वसंपदा । यत्प्रता-

पार्यमा चित्रं शत्रुपद्मोदयापहः ॥ ३ ॥ सिन्धुसौवीरमुख्येषु देशेषु षोऽशस्वपि । यः स्वामी त्रिषष्ट्यधिकशतत्रयपुरां तथा ॥ ४ ॥ अन्येषामाकरादीनां प्रभुश्च गुरुविक्रमः । महासेनादिकदशद्धितिभृत्सेवितक्रमः ॥ ५ ॥ धराधनस्य तस्यासीत्प्रेयसी श्रेयसीतरा । नाम्ना च वपुषा चापि महादेवी प्रभावती ॥ ६ ॥ गुणैरनूनस्तत्सूनू राज्योद्धारधुरन्धरः । अग्नीचिसंज्ञको जज्ञे भागिनेयश्च केशिकः ॥ ७ ॥ इतश्च नगरे तत्र कोऽपि पोतवणिग्वरः । आगमत् प्रतिमारम्यसमुद्गककरः परः ॥ ८ ॥ चतुष्पथेऽथ संस्थाप्य महाभाण्डमिवातुलम् । तत्समुद्गकमित्युच्चैः स चक्रे घोषणामिमाम् ॥ ९ ॥ देवाधिदेवप्रतिमामिमां गृह्णीत भो जनाः । यत्प्रसत्त्याम्बुधिर्जज्ञे सुतरो दुस्तरोऽपि मे ॥ १० ॥ श्रुत्वेत्युदायनो भूपः प्रागात्तापसंगतः । अन्येऽपि तापसा विप्रा आययुः साकं त्रिदण्डिनः ॥ ११ ॥ स्मारं स्मारं हरिहरविरञ्च्यादीन्निजान् सुरान् । देवाधिदेवबुद्ध्या ते आजघ्नुस्तं समुद्गकम् ॥ १२ ॥ अयःकुठारैराहन्यमानं न बिभिदे मनाक् । तत्काष्ठसंपुटं भूपस्तत्सपौरो विभिष्मिये ॥ १३ ॥ भर्तुर्भोजनकालातिक्रमं मत्वा प्रभावती । मध्याह्ने प्राहिणोद्दासीं नृपाह्वानकृते निजाम् ॥१४॥ ततो भूभृत्तदाश्चर्यदर्शनाय प्रभावतीम् । समाकार्य जगौ सर्वं वृत्तान्तं तमिहाद्भुतम् ॥ १५ ॥ श्रुत्वा प्रभावती देवी विचार्य निजचेतसि । साख्यद्देव नं[1] देवाधिदेवोऽर्हन् परमेश्वरः[2] ॥ १६ ॥ तस्येह प्रतिमा स्वामिन् भाविनी भवनाशिनी नामभिर्ननु हर्यादेः स्फुटीभवति सा कथम् ॥ १७ ॥ इमां तां दर्शयिष्यामि प्रतिमामर्हतोऽद्भुताम् । अहं स्मरणमात्रेण

१ देवाधिदेवोऽर्हन्नेति काकुः. २ क्वचित्प्रत्यन्तरेऽयं श्लोक इत्थं वर्तते—

साख्याद्देव न देवाधिदेवाः स्युः केशवादयः । एक एव स देवाधिदेवोऽर्हन् परमेश्वरः ॥ १६ ॥

लोकाः पश्यत कौतुकम् ॥ १८ ॥ राजाज्ञया ततो यक्षकर्दमेनाभिषिच्य तम् । समुक्षकं महादेवी सप्रणाममदोऽवदत् ॥ १९ ॥ देवाधिदेव श्रीअर्हन् प्रातिहार्याष्टकोत्कट । ध्वस्ताष्टादशदोष ! त्वं देहि मे दर्शनं निजम् ॥ २० ॥ इति राज्ञीगिरा सिद्धमन्त्रस्मृत्येव स स्वयम् । उज्जिग्नः सहसा सूर्योदये पाथोजकोशवत् ॥ २१ ॥ गोशीर्षचन्दनमयी तन्मध्ये देवनिर्मिता । प्रतिमा ददृशेऽम्लानमालाजारिण्यलंकृता ॥ २२ ॥ तत्क्षणान्महती जज्ञेऽथोन्नतिर्जिनशासने । प्रज्ञावत्या मुदा सा च प्रतिमा प्रणता स्तुता ॥ २३ ॥ राज्ञा विसृष्टः सत्कृत्य बन्धुवत्पोतवाणिजः । प्रतिमान्तःपुरे नीता प्रीतेनोत्सवपूर्वकम् ॥ २४ ॥ विमानवन्मनोहरं स विहारमकारयत् । अतिष्ठिपच्च धात्रीशः प्रतिमां तत्र तां मुदा ॥ २५ ॥ तदादि तं जिनं नित्यं भक्तितोऽपूजयन्नृपः । पत्या समं प्रज्ञावत्यपि नाट्यं तत्पुरोऽकरोत् ॥ २६ ॥ देव्या अन्यदिने क्षापोऽपश्यन्नृत्तक्षणे क्षणात् । कबन्धमेव निःशीर्षं नृत्यन्तं गीतगानकृत् ॥ २७ ॥ ततः स चकितोऽकस्मात् स्थितो गानविधेस्तदा । रुष्टा ततो जगौ देवी केयं ते नाथ चातुरी ॥ २८ ॥ यदकाण्डे कृतस्तालभङ्गोऽयं त्वयकाऽधुना । सविषादं जगादाथ तथ्यं तत्कारणं नृपः ॥ २९ ॥ साप्याख्यद्धुर्निमित्तेनामुनाऽऽयुर्मेऽल्पकं प्रभो । मृत्युभीर्नार्हतीं मां तु व्रतार्थं प्रेरयत्यदः ॥ ३० ॥ इति धर्मपरा साथान्यदा दास्या समानयत् । जिनार्चार्थं कृतस्नाना स्वे धौतश्वेतवाससी ॥ ३१ ॥ तयाऽऽनीते च ते एव राज्ञी भ्रान्त्या निरैक्षत । रक्ते ततोऽनवसरप्राप्त्या तस्यां चुकोप सा ॥ ३२ ॥ दर्पणेनाताम्रयच्च मृता सा तत्क्षणादपि । दृष्ट्वा वस्त्रे ततः शुभ्रे राज्ञी खिन्नेत्यचिन्तयत् ॥ ३३ ॥ पञ्चेन्द्रियवधादाद्यं हा मया खण्डितं

१ चैत्यम्.

व्रतम् । महापापक्रियायोगादहं स्यां नरकातिथिः ॥ ३४ ॥ निरागः[1]स्त्रीवधो भ्रान्त्या मां व्रते त्वरयत्ययम् । दुर्निमित्तद्वयं चैतद्राज्ञी राज्ञे व्यजिज्ञपत् ॥ ३५ ॥ दुर्निमित्तद्वयं मेऽद आयुरल्पत्वसूचकम् । मां विसर्जय तन्नाथ व्रते विघ्नं विधेहि मा ॥ ३६ ॥ देव्येति साग्रहं भूपः प्रोक्तोऽवक् प्रेमपूरितः । कुरु स्वरुचितं देवि परमेकं वचः शृणु ॥ ३७ ॥ स्वर्गे स्वर्गित्वमाप्ता त्वं बोधयेर्मामधर्मकम् । ॐमिति प्रतिपद्याथ साऽग्रहीद्व्रतमार्हतम् ॥ ३८ ॥ चिरं चारित्रमाचर्य कृतसंलेखनाविधिः । देवोऽभूदादिमे कल्पे मृत्युमाप्ता प्रभावती ॥ ३९ ॥ देवाधिदेवप्रतिमा साऽथान्तःपुरसंस्थिता । तथैव पूज्यते देवदत्तया कुब्जया सदा ॥ ४० ॥ भूपं तापसभक्तं तं क्रमाज्ज्ञातमवेद्य सः । सुरस्तापसरूपेणागात्तद्बोधविधित्सया ॥ ४१ ॥ सुधातिशायिसुस्वादफलढौकनपाणिकम् । नृपस्तापसभक्तस्तं तापसं बह्वमानयत् ॥ ४२ ॥ भुक्त्वा तानि सुगन्धीनि पेशलानि फलानि सः । पृष्टो भूपेन लब्धानि कैतानि भगवन् वद ॥ ४३ ॥ तापसः स्माह भूपास्ति दूरस्थित इतः पुरात् । एतादृक्फलसंशोभी आश्रमो नन्दनोपमः ॥ ४४ ॥ क्षितिपः प्रत्यवक् तं च दर्शयर्षेऽथ मामपि । एकाकी चालितस्तेन स्वशक्त्या स्वर्गिणा ततः ॥ ४५ ॥ प्रदर्श्योपवनं किञ्चिद्रम्यं तत्रानयन्नृपम् । दध्यौ सोऽथ मनोहारिफलमुद्यानमेतकम् ॥ ४६ ॥ इहत्यास्तापसा मेऽमी गुरवः पूर्वसंगताः । अतोऽमीषां फलानां मे वाञ्छा पूर्णीभविष्यति ॥ ४७ ॥ चिक्षेप क्षितिपो यावत्करं तेषु फलेष्वथ । तावत्ते तापसाः क्रुद्धाः प्रहन्तुं तं दुढौकिरे ॥ ४८ ॥ स तस्कर इव क्षापः कुध्यमानः पलायितः । पुरःस्थितांस्ततोऽग्राहीत् साधून् सिद्ध्येकसाधकान् ॥ ४९ ॥ प्राप्तस्तद्वरणं तैः स रक्षितः क्षितिभृन्नयात् ।

१ निरपराधस्त्रीवधः.

दध्यावेन्निर्वञ्चितोऽहं कथमाजन्मपोषितैः ॥ ५० ॥ अदृष्टपूर्वैरप्येभिः कथं त्रातोऽस्मि साधुभिः । अतो मे शरणं चैत-द्धर्मोऽस्तु सुपरीक्षितः ॥ ५१ ॥ इति ध्यायन्तमेवामुं प्रज्ञावत्यमरो नृपम् । प्रकटीभूय जैनेन्द्रधर्मेऽकुरुत निश्चलम् ॥ ५२ ॥ अर्हद्देवदयामूलधर्मसद्गुरुभक्तिभाक् । तदाद्युदायनो जज्ञे सुश्रावकशिरोमणिः ॥ ५३ ॥ अथ गन्धारदेशस्य श्राद्धो गन्धा-रसंज्ञकः । वैताढ्याचलमूलेऽगाच्छाश्वतार्हन्निनंसया ॥ ५४ ॥ उपवासत्रयेणाथ तुष्टा शासनदेवता । कृतकृत्यं विधायामुं वैताढ्याद्रितलेऽमुचत् ॥ ५५ ॥ सत्कामितगुटिकानां ददौ चाष्टोत्तरं शतम् । सोऽथैकां गुटिकां क्षिप्त्वा मुखे वीतभयेऽग-मत् ॥ ५६ ॥ देवाधिदेवप्रतिमा प्रणता तेन भक्तितः । तत्र दास्या कुब्जिकया दर्शितानन्ददायिनी ॥ ५७ ॥ तीर्थसेवा-कृते तस्य तत्र श्राद्धस्य तिष्ठतः । पित्तातीसारसंभूतं जज्ञे वपुरपाटवम् ॥ ५८ ॥ साधर्मिकधिया दास्या तया स प्रगुणी-कृतः । तस्यै ता गुटिका दत्त्वा संविग्ना व्रतमाददे ॥ ५९ ॥ तया कुरूपया रूपकृतेऽथैका गुटी मुखे । क्षिप्ता जाता सुरू-पाद्याऽचिन्त्या दैवी गतिर्यतः ॥ ६० ॥ स्वर्णवर्णेन देदीप्यमाना साप्सरा इव । जनैर्विलोक्य स्वर्णाङ्गुलिकेत्यूचेऽति-विस्मितैः ॥ ६१ ॥ दध्यौ सा मेऽनुरूपेण रूपं पत्या विनाऽफलम् । पितेव भूपतिर्मेऽयं नृपास्त्वन्येऽस्य सेवकाः ॥ ६२ ॥ पतीकरोमि तच्चैकप्रद्योतं चैकशासनम् । इत्येकां गुटिकां क्षिप्त्वाऽऽस्येऽपैतीयत्तमेव सा ॥ ६३ ॥ तद्रूपं गुटिकादेव्याऽ-श्लाघि प्रद्योतका (ना) ग्रतः । तत्प्रार्थनार्थमादिष्टो दूतस्तेन निजो जवात् ॥ ६४ ॥ तत्र गत्वाऽर्थिता दासी तत्कृते तेन साऽन्यधात् । मम दर्शय प्रद्योतं तेनाज्ञाणि नृपाय तत् ॥ ६५ ॥ निश्यारुह्यानिलवेगं प्रद्योतस्तत्र जग्मिवान् । परस्परं

१ नंतुमिच्छा निनंसा. २ पतिमैच्छत्.

तयोर्जज्ञे प्रेमोच्चैर्दर्शनादपि ॥ ६६ ॥ आगच्छ मत्पुरं देवि सेति प्रद्योतकोदिता । सा जगौ यां विना नाथ क्षणार्धं प्राणि-
मीह न ॥ ६७ ॥ देवाधिदेवप्रतिमां तां मुक्त्वाऽन्यत्र यामि न । तदन्या प्रतिमा काचिदानेतव्या त्वयेदृशी ॥ ६८ ॥
मुक्त्वा तामत्र प्रतिमामिमां नीत्वा च गम्यते । प्रतिश्रुत्येति प्रद्योतो रात्रिशेषे स्वमैत् पुरम् ॥ ६९ ॥ ततः प्रधानश्रीख-
एमदारुणा प्रतिमार्हतः । निर्मापिता यथा दृष्टा विशिष्टा तेन जूजृता ॥ ७० ॥ संप्राप्तकेवलेनाथ कपिलेन महर्षिणा ।
प्रत्यष्ठाप्यत देवाधिदेवस्य प्रतिमा ततः ॥ ७१ ॥ पुष्पैस्तां पूजयित्वा सोऽनिलवेगेजमूर्धनि । आरोप्य च नृपोऽचालीत्
स्वयं तत्पृष्ठिमध्यगः ॥ ७२ ॥ क्षणात्स्वमनसा सार्धं गत्वा वीतजये पुरे । प्रतिमामर्पयामास दास्याः प्रद्योतजूपतिः ॥ ७३ ॥
साऽथ तां तत्र संस्थाप्य चैत्ये प्राच्यां प्रगृह्य च । आरुरोहानिलवेगे प्रद्योतेन समं गजे ॥ ७४ ॥ वेगादवन्तीं प्राप्ताजूषिषये-
ष्वतिरागिणी । अथो विदिक्तो जायलस्वामी तत्रागतो वणिक् ॥ ७५ ॥ गोशीर्षचन्दनमयी प्रतिमा सा जिनेशितुः ।
दत्ता दासीनृपालाज्यां वणिजस्तस्य चार्चितुम् ॥ ७६ ॥ अन्येद्युर्धरणादेशात् कम्बलः शम्बलः सुरौ । प्राप्तौ तां प्रतिमां
नन्तुं जायलेनेत्थमर्थितौ ॥ ७७ ॥ जवने धरणेन्द्रस्य प्रतिमाः सन्ति शाश्वतीः । ता मां दर्शयतं सद्यः प्रसद्य त्रिदशौ
युवाम् ॥ ७८ ॥ ततस्तौ विदिशानद्या विवरेण क्षणादिमम् । नीत्वा पातालदेशे ता वन्दयामासतुः क्षणात् ॥ ७९ ॥
धरणेन्द्रो जगौ तुष्टो दृष्ट्वा तं परमार्हतम् । किञ्चिद्याचस्व यद्देवदर्शनं स्यादमोघकम् ॥ ८० ॥ जायलोऽजिदधौ मेऽस्ति
सर्वं पूर्णं परं कुरु । स्थिरत्वमेव मन्नाम्नो ह्येष मेऽस्ति मनोरथः ॥ ८१ ॥ धरणोऽथावदन्नूच चएमप्रद्योतजूपतिः । देवाधि-
देवप्रतिमामुद्दिश्य नगरं नवम् ॥ ८२ ॥ वासयिष्यति तत्र त्वन्नाम स स्थापयिष्यति । ततस्ते निश्चलं जावि नामैवं नगर-

ङ्गलात् ॥ ८३ ॥ युग्मम् ॥ तत्रैषा ज्ञायलस्वामी आदित्य इति वादिभिः । जनैर्मिथ्यात्विनी रम्या प्रतिमा पूजयिष्यते ॥ ८४ ॥ श्रुत्वेति ज्ञायलः स्माह विषण्णो धरणं प्रति । पूजयिष्यति मन्नाम्ना यदेतां तन्न सुन्दरम् ॥ ८५ ॥ धरणः प्राह मा ज्ञङ विषादाविशदो ज्ञव । एतद्दुश्चेष्टितं सर्वं दुःषमाया अवेहि ज्ञोः ॥ ८६ ॥ अथ तेनैव मार्गेण नीत्वा तौ त्रिदशौ क्षणात् । ज्ञायलं कृतकृत्यं स्वस्थाने मुमुचतुर्मुदा ॥ ८७ ॥ इतश्च नगरे वीतज्ञये ज्ञून्नृपुदायनः । जिनार्चावसरे वीक्ष्य प्रतिमां म्लानमालिकाम् ॥ ८८ ॥ दध्यौ न प्रतिमा सेयं ध्रुवमन्यैव काचन । सज्ञनै[2] इव यत्तस्यां सुमनोम्लानिरैक्षत ॥ ८९ ॥ चित्रितेवात्र या दासी सदाऽऽसीदग्रतः स्थिता । साऽपि क्वापि पलायिष्ट शर्वरीव दिनोदये ॥ ९० ॥ गतदानरसा जङ्घुः करिणः कृपणा इव । इहागादनिलवेगस्तन्मन्ये गन्धसिन्धुरः ॥ ९१ ॥ तज्ञन्धसिन्धुरारूढो नूनं प्रद्योतज्ञूपतिः । प्रतिमां देवदत्तां चाहार्षीन्निश्येत्य दस्युवत् ॥ ९२ ॥ अथोदायनज्ञून्नर्ता सहितो दशभिर्नृपैः । प्रद्योतनृपतिं कोपात् प्रत्यचालीन्महाबलः ॥ ९३ ॥ मरुज्ञूमौ क्रमात् प्राप्तं सैन्यमौदायनं यदा । तदा तृष्णातुरं जज्ञे दुराढ्यस्येव[3] मानसम् ॥ ९४ ॥ पतन्तः सैनिकाः सर्वे स्खलन्तो मद्यपा इव । किञ्चिद्दिनेऽपि पश्यन्ति तृष्णान्धा घूकवन्न हि ॥ ९५ ॥ प्रज्ञावतीसुरो ज्ञूपोदायनस्मरणादपि । तत्राजगाम किं दूरं चासन्नं स्नेहशालिनाम् ॥ ९६ ॥ पुष्करत्रितयं काव्यवत्तेनाकारि सज्ञसम् । तत्सर्वं तज्ञसास्वादात्सैन्यं सज्ञमजायत ॥ ९७ ॥ सोऽथ स्वं धाम देवोऽगादुदायननृपोऽपि च । ज्ञज्ञयिन्या बहिः पुर्याः प्राप्तस्तस्थौ महाबलः ॥ ९८ ॥ दूतास्येनोदायनस्यावन्तीशस्य परस्परम् । तत्राजायत तत्कालं रथसंग्रामसङ्गरः[4] ॥ ९९ ॥

१ विषादेन मलिनः. २ परस्त्रियां सज्जन इव. ३ दरिद्रस्य. ४ सङ्गरः प्रतिज्ञा.

सङ्ग्रामैकरथारूढोऽथोदायनमहीपतिः । टंकारयन् धनुर्नादै रणक्षोणिमुपागतः ॥ १०० ॥ तं विज्ञाय रथाजय्यमवन्तीश उदायनम् । आरूढोऽनिलवेगेऽनमागतस्तज्जिगीषया ॥ १०१ ॥ तं समीक्ष्य गजारूढमुदायननृपोऽन्यधात् । असत्यसन्धो जातोऽपि त्वं पाप न नविष्यसि ॥ १०२ ॥ इत्युक्त्वा मण्डलीभ्रान्त्योदायनो भ्रमयन् रथम् । प्रसारयन् शरासारं प्रद्योतं प्रत्यढौकत ॥ १०३ ॥ वेगेनानिलवेगस्य धावमानस्य तं प्रति । उदायनेन विद्धानि शरैरंहितलानि तत् ॥ १०४ ॥ तच्च-थार्त्तः करी गन्तुमक्षमः स क्षमातले । पतितः पातयित्वेनाद्बबन्ध तमुदायनः ॥ १०५ ॥ व्यधापयत नालेऽङ्कं दासीप-तिरिति स्फुटम् । प्रतिमां तां समानेतुमगाच्च विदिशापुरीम् ॥ १०६ ॥ तां नत्वा पूजयित्वा चारेऽने लातुमुदायनः । सा सुराचलचूलेव न चचाल कथञ्चन ॥ १०७ ॥ तां प्रत्युवाच नूपोऽथ विशेषार्चापुरःसरम् । किमनाग्योऽस्म्यहं देव यत्त्वं नैषि पुरे मम ॥ १०८ ॥ तदधिष्ठायको देवोऽवग्मा नूप विषीद नोः । पांशुवृष्ट्या पुरं नावि स्थलं ते तेन नैम्यहम् ॥ १०९ ॥ तदाज्ञामिति स प्राप्य प्रत्यचालीन्निजां पुरीम् । मार्गे प्रस्थानरोध्यासीद्वर्षाकालो दुरुत्तरः ॥ ११० ॥ अवस्क-न्दन्नयाऽऽलीवप्रान् कृत्वाऽनितः स्थिताः । ते दशापि रसानाथाः सेवमाना उदायनम् ॥ १११ ॥ प्रद्योतो बन्धनस्थोऽथ नुञ्जानो नूनुजा समम् । पृष्टः सूदेन किं तेऽद्य नोज्यं पर्युषणादिने ॥ ११२ ॥ मृत्युभीतो जगौ चण्डः कोऽयं प्रश्नोऽद्य सूद मे । सोऽवक् पर्युषणाऽद्यास्ति राजेन्द्रस्तदुपोषितः ॥ ११३ ॥ सोऽवादीन्मेऽप्यनक्तार्थः पर्व पर्युषणाऽद्य चेत् । श्रावकौ मेऽपि यन्मातापितरौ संबनूवतुः ॥ ११४ ॥ सूदो जगौ नृपस्योचे नूनृच्छूर्तोऽस्ति एषकः । बद्धेऽस्मिन्न प्रतिक्रा-

१ रथेन जेतुमशक्यम्. २ असत्यप्रतिज्ञः ३ न आगन्ता‍मि. ४ घाटीन्नयात्.

न्तिर्मम शुध्यति किं पुनः ॥ ११५ ॥ मुक्त्वा स द्दामितस्तेन दत्तस्तस्मै च मालवः । बद्ध्वाङ्कुन्नादनाय ज्ञाले पट्टो हिरण्मयः ॥ ११६ ॥ ज्ञूपा मुकुटबद्धाः प्राग्बद्धपट्टास्ततोऽज्ञवन् । वर्षाव्यतिक्रमे प्राप्तः सौवं पुरमुदायनः ॥ ११७ ॥ तत्रावसद्भिग्लोको यो वाणिज्यार्थमागतः । ततो दशपुरं नाम पुरं जज्ञे मनोहरम् ॥ ११८ ॥ प्रद्योतेनाथ तीर्थेशप्रतिमार्चनहेतवे । पुरं संस्थाप्य नव्यं तज्ज्ञायलाज्ञिधया ददे ॥ ११९ ॥ इतश्चागत्य धात्रीशमुदायनमवोचत । देवः प्रज्ञावतीसंज्ञः प्रतिमाधृतिकारणम् ॥ १२० ॥ राजन्नेषाऽप्यसामान्या प्रतिमा जीवदर्हतः । ज्ञक्त्याऽर्च्या तीर्थमेतत्तु महामुनिप्रतिष्ठितम् ॥ १२१ ॥ ततस्तां पूजयन् ज्ञूपो ज्ञक्त्या निर्वेदमागतः । चित्तेऽन्तिमजिनं चक्रे प्रव्रज्याग्रहणोद्यतः ॥ १२२ ॥ तदा तदाशयं स्वामी विहरन्नवनीतलम् । ज्ञात्वाऽऽगमद्दीतज्ञयपुरं सुरपुरोपमम् ॥ १२३ ॥ ततो हृष्टो नृपो ज्ञक्त्या नत्वा तं तीर्थनायकम् । प्रविव्रजिषुरध्यासीदिति तद्राज्यदित्सया ॥ १२४ ॥ सूनवेऽज्ञीच्यज्ञिख्याय यदि राज्यं ददाम्यदः । तज्ञवाम्यधुनाऽहं च दुर्गदुर्गतिमार्गदः ॥ १२५ ॥ ध्यात्वेति ज्ञागिनेयाय केशिसंज्ञाय दत्तवान् । राज्यं स्वयं जिनोपान्ते लक्षौ दीक्षामुदायनः ॥ १२६ ॥ तप्यमानस्तपस्तीव्रं वपुर्वत्कर्म शोषयन् । अज्ञूदुदायनोऽन्येद्युः कुपथ्यव्याधिपीडितः ॥ १२७ ॥ उक्तो वैद्यैः स राजर्षिरेतच्छाध्युपशान्तये । सेवस्व गुणरत्नानां साधो दधि महोदधे ॥ १२८ ॥ गोकुलेष्वेष सुलज्ञदधिज्ञिद्देषु कानिचित् । दिनान्यत्र विहृत्यागान्मुनिर्वीतज्ञये पुरे ॥ १२९ ॥ तदा केशिनृपः प्रोचे सचिवैः पापिज्ञिः प्रज्ञो । व्रतोद्विग्नो मातुलस्तेऽयं राज्यादित्सयाऽऽगमत् ॥ १३० ॥ सोऽवग् राज्यं निजं ज्ञाति सैष चेद्ज्ञातु सत्वरम् । तैरूचे नाथ नो वेत्सि राजधर्मो हि नेदृशः ॥ १३१ ॥ जनकान्मातुलाज्ज्ञातुरपरस्मादपि प्रज्ञो । यद्बलाद्बृह्यते राज्यं कस्तत्त्यजति हस्तगम् ॥ १३२ ॥ इति मन्त्रिगिरा केशिनृप-

स्तुष्टोऽथ साधवे । कयापि पशुपाल्याऽस्मै सविषं दध्यदापयत् ॥ १३३ ॥ प्रज्ञावतीसुरेणाथ विषं संहृत्य ज्ञापितः । स मुनिर्दधिलाज्ञोऽयं सविषस्तेन तं त्यज ॥ १३४ ॥ तस्मिन्मुक्ते पुना रोगः स तस्य ववृधे मुनेः । ऋयो ग्रहीतुमारेजे दधि तन्निजिघृक्षया ॥ १३५ ॥ ततो वारत्रयं तेन सुरेण विषसंहृतिः । चक्रेऽन्यदा तु सविषं तत् प्रमादात् स ऋक्तवान् ॥ १३६ ॥ विलेसुरश्च तद्देहे विषवेगास्ततो मुनिः । बुध्ध्वाऽऽयुषोऽन्तमाहारपरीहारं स निर्ममे ॥ १३७ ॥ प्रपाल्यानशनं मासमेकं सध्यानमानसः । केवलज्ञानमासाद्य स मुनिः शिवमागमत् ॥ १३८ ॥ प्रज्ञावतीसुरोऽथेति ज्ञात्वा क्रुद्धोऽधिकं हृदि । पांशुवृष्ट्या वीतभयं पुरं स्थलमिवाकरोत् ॥ १३९ ॥ ऋगता प्रतिमा साऽभूत् कपिलर्षिप्रतिष्ठिता । तन्निवासिजना जाताः प्रायः कुगतिभाजनम् ॥ १४० ॥ मुनेः शय्यातरः कोऽपि कुम्भकृत् पापवर्जितः । तं नीत्वा स सुरश्चक्रे शाण्पल्यामधीश्वरम् ॥ १४१ ॥ इति निशम्य जनाः कुलयोषितामनुपमाममितां च गुणस्थितिम् । अधिगते सति सत्कुलसङ्गमे, कुरुत धर्मविधौ विविधोद्यमम् ॥ १४२ ॥

॥ इति श्रीउदायनराजर्षिकथानकम् ॥

लब्धेऽपि सत्कुले साधुसङ्गस्यैव प्राधान्यं स्यादिति पञ्चमं साधुसङ्गद्वारमाह—

जीवादितत्त्वविकलैर्विपुलैस्तपोभिर्मुक्तो न तामलिरजातसुसाधुसङ्गः ।
कः स्वर्णसिद्धिमधिगच्छति कूटकक्कैः को वाऽम्बुधिं तरति जर्जरयानपात्रैः ॥ ११ ॥

१ तस्य व्याधेर्निग्रहेच्छया. २ दधि.

व्याख्या—तामलिस्तामलिनामा मुनिर्विपुलैर्विस्तीर्णैर्जीवादितत्त्वविकलैर्जीवादिनवतत्त्वज्ञानरहितैस्तपोभिर्न मुक्तो न मुक्तिं गतः। तत्रैतुं विशेषणमुखेनाह—किंभूतः सः? अजातसुसाधुसङ्गः अनुत्पन्नमहामुनिसङ्गः। यदुक्तं—"सट्ठिं वाससहस्स" इत्यादि। ननु "देहे कट्ठं महाफलं" इतिवचनात् कथं स विपुलैरपि तपोभिर्न मुक्तः? सत्यं, परं तस्याज्ञानाद्यज्ञानान्तःकरणत्वान्महातपसोऽप्यल्पमेव फलमभूत्, "अन्नाणतवो त्ति अप्पफलो" इत्युक्तेः। एतदेवाह—कः पुमान् कूटकल्पैर्व्यर्थीकरसज्ञावनाभिः स्वर्णसिद्धिमधिगच्छति प्राप्नोति? अपि तु न कोऽपि। तथा जर्जरयानपात्रैर्जीर्णपोतैः कोऽम्बुधिं समुद्रं तरति? अपि तु न कोऽपि। इत्यक्षरार्थः। भावार्थं कथयाह (तामलिऋषिकथा)—

तामलिप्तीमभूत् पुर्यामिभ्यस्तामलिनामतः। द्विजिह्व इव दोषाणां संपदामेकमास्पदम्॥ १॥ संसारासारतां प्रेक्ष्यान्येद्युः संविग्नमानसः। तथाप्यज्ञानदोषेण तपस्यां तापसीं दधौ॥ २॥ ग्रामं ग्रामं पुरे भिक्षां ग्राहं ग्राहं गतो वने। एवं विचिन्तयामास निर्विवेकः स तापसः॥ ३॥ जीवा जलस्थलाकाशचराः सर्वे बुभुक्षिताः। भुञ्जेऽहं कथमेकाकी तेभ्यः किञ्चित्ततो ददे॥ ४॥ अतः स्वानीतभिक्षायाश्चक्रे भागचतुष्टयम्। एकः स्वस्यापरे तेषां जीवानां कल्पितास्त्रयः॥ ५॥ दत्त्वा जलस्थलाकाशचरेभ्यः सोंऽशकत्रयम्। स्वांशमम्भसि त्रिःसप्तकृत्वः प्राक्षालयज्जरुः॥ ६॥ ततस्तं नीरसं स्वांशं भुञ्जानोऽज्ञानकष्टतः। षष्टिं वर्षसहस्राणि सोऽतिनिन्ये कुधीनिधिः॥ ७॥ तथापि नास्य संजज्ञेऽज्ञानात् कर्महयो बहुः। स कृतानशनः प्रान्ते मृत्वेशानेऽथ वज्यभूत्॥ ८॥ तपसा तावन्मात्रेण जनाः सज्ञानिनोऽपरे। सप्त सिध्यन्ति नैकोऽ-

प्यसौ सिद्धोऽज्ञानयोगतः ॥ ९ ॥ यतः—यदज्ञानात् क्षिपेत् कर्म बह्वीर्निर्वर्षकोटिभिः । तत्कर्मोच्छ्वासमात्रेण त्रिगुप्तो ज्ञानवान् क्षिपेत् ॥ १० ॥

॥ इति श्रीतामलिऋषिकथा ॥

पुनरस्यैव विशेषमाह—

गिरिपुष्पशुकाविवामलोऽङ्गी, गुणनाशोदयभाग्जनसङ्गात् ।
जलदाम्बु विषं सुधा च न स्यात्, कनकऽौ च किमिक्षुकानने च ॥ १२ ॥

व्याख्या—अमलोऽङ्गी निर्मलो जीवो जनसङ्गान्मूर्खपण्डितयोगात् गुणनाशोदयभाग् भवति। यदुक्तं श्रीआवश्यकादौ—

"अंबस्स य निंबस्स य दुन्हं पि समागयाइं मूलाइं । संसग्गीइ विनट्ठो अंबो निंबत्तणं पत्तो ॥ १ ॥"

एवं जनसङ्गाद्गुणनाशभाक् स्यात्, तथा ज्ञसङ्गाद्गुणोदयभाक् च स्यादिति । यदुक्तम्—

"उत्तमजणसंसग्गी सीलदरिद्दं पि कुणइ सीलड्ढं । जह मेरुगिरिविलग्गं तणं पि कणगत्तणमुवेइ ॥ १ ॥"

इति भावः । काविव ? गिरिपुष्पशुकाविव यथा गिरिशुको जिह्मसङ्गान्निर्गुणोऽभूत् पुष्पशुकस्तु तापससङ्गाद्गुणवान-भूदिति भावः । तथा चोपदेशमालायामपि—

"गिरिसुयपुप्फसुयाणं सुविहिय आहरण कारणविहिन्नू । वज्जिज्ज सीलविगले उज्जुयसीले हविज्ज जई ॥ १ ॥"

इति । एतदेवाह लौकिकोदाहरणाभ्यां—जलदाम्बु मेघजलं कनकऽौ धत्तूरकवृक्षे वृष्टं सत् विषं किं न स्यात् ? अपि

तु स्यादेव। च पुनरिक्षुकानने इक्षुवने सुधाऽमृतं च किं न स्यात्? अपि तु स्यादेव। इत्यक्षरार्थः। भावार्थं कथयाऽऽह—

काचिच्चुकाङ्गना भूध्रकन्धराकंदरान्तरे। मुक्त्वाण्मकघयं कुत्रचिद्वने च स्वयं गता ॥ १ ॥ ततोऽण्मकघयाज्जातं शुकयुग्मं मनोरमम्। एको गिरिशुकश्चान्यो नाम्ना पुष्पशुकोऽभवत् ॥ २ ॥ त्रिद्वैस्तत्रागतैर्वेश्मानीतो गिरिशुको निजम्। गृहीतस्तापसैः पुष्पशुकस्तत्रागतैः क्रमात् ॥ ३ ॥ गुण्यभून्मुनिसङ्गात्स त्रिद्वसङ्गात्स निर्गुणः। स्यातां गुणागुणौ साध्वसाधुसंसर्गतोऽङ्गिनाम् ॥ ४ ॥ इतश्च कोऽपि भूशक्रो वक्रशिक्षितवाजिना। नीतोऽरण्यं सुवेगेनेन्द्रियेणात्मेव दुर्गतौ ॥ ५ ॥ तं भ्राम्यन्तं वने वीक्ष्य त्रिद्वान् गिरिशुको जगौ। चिन्तामणिमिवामूल्यममुं गृहाण भो नृपम् ॥ ६ ॥ श्रुत्वेति भूपतिर्नीतो नंष्ट्वाऽगात्तापसाश्रमे। तं वीक्ष्य तापसान् पुष्पशुकः प्रोचे मृदुस्वरम् ॥ ७ ॥ भोः पश्यत भवद्भाग्याकृष्टं भूपमिहागतम्। अभ्युत्थानादिकामस्य प्रतिपत्तिं विधत्त च ॥ ८ ॥ तन्निशम्य नृपः स्वस्थीभूतस्तं विस्मितोऽवदत्। तव तस्य शुकस्यैष भेदः किमिति सोऽप्यवक् ॥ ९ ॥ माताऽप्येका पिताऽप्येको मम तस्य च पक्षिणः। अहं मुनिभिरानीतः स चानीतो गवाशिभिः ॥ १० ॥ गवाशनानां स गिरः शृणोति, अहं तु राजन्मुनिपुङ्गवानाम्। प्रत्यक्षमेतद्भवताऽपि दृष्टं, संसर्गजा दोषगुणा भवन्ति ॥ ११ ॥ तदादि सोऽपि भूमीशोऽसत्सङ्गविमुखोऽजनि। इत्यसत्सङ्गतिर्वर्ज्या कार्या सत्सङ्गतिर्बुधैः ॥ १२ ॥

॥ इति गिरिशुकपुष्पशुककथा ॥

---

१ त्रिद्वैः.

साधुसङ्गरूपं पञ्चमं द्वारमभिहितं। सत्यपि सत्कुले सत्यपि च साधुसङ्गे बोधं विना न कार्यसिद्धिरिति हेतोर्बोधं प्रकटयति—

प्राप्याल्पमप्यमलबोधवचश्चिलातीपुत्रो यथाघमलिनोऽपि विभर्त्ति शुद्धिम्।
किं कोटिवेधिरसचन्दनरत्नबिन्दुस्पर्शेऽपि हेम शिशिरं च न तप्तलोहम् ॥ १३ ॥

व्याख्या—अघमलिनोऽपि पापकलुषितोऽपि जीवोऽल्पमपि स्तोकमपि बोधकवचनं प्राप्य शुद्धिं नैर्मल्यं बिभर्त्ति धत्ते। क इव ? चिलातीपुत्रो यथा, यथा चिलातीपुत्रः पापमलिनोऽपि "उवसम विवेग संवर" इति मुनिवचो लब्ध्वा शुद्धिं पापराहित्यं बभार। अल्पेन बोधकवचसा कथमघमलिनः शुद्धिं धत्ते इत्याशंकायामाह—तप्तलोहं कोटिं विध्यतीति कोटिवेधी कोटिलोहवेधको योऽसौ रसस्तस्य स्पर्शेऽपि हेम सुवर्णं किं न स्यात् ? अपि तु स्यादेव। चन्दनरत्नं गोशीर्षचन्दनं तस्य बिन्दुस्तस्य स्पर्शेऽपि च पुनः तप्तलोहं शिशिरं शीतलं किं न स्यात् ? अपि तु स्यादेव। इत्यक्षरार्थः। भावः कथया कथ्यते (चिलातीपुत्रकथा)—

प्रध्वस्तसकलक्लेशो देशोऽस्ति मगधाभिधः। यत्रार्हद्धर्मभूभर्तुः संजातैकातपत्रता ॥ १ ॥ यत्रार्हद्धर्मभूमीशो जित्वा मिथ्यात्वपार्थिवम्। उत्तुङ्गचैत्यव्याजेन जयस्तम्भानुदस्तभत् ॥ २ ॥ तत्रार्हद्धर्मधात्रीशराजधानीव बन्धुरा। पुरी राजगृहमिति वर्तते भुवि विश्रुता ॥ ३ ॥ तत्रासीद्वीरभद्रोह्वासी श्रेष्ठी श्रेष्ठतमो धनैः। विश्वसाधारणं यस्य वसु विश्वं विधोरिव ॥ ४ ॥ तस्यासन् सूनवः पञ्च पञ्चबाणसमाः श्रिया। हितौ पञ्चविधोत्सर्गाधिकारिण इवार्थिनाम् ॥ ५ ॥ मनोरथशतैस्तस्य प्रार्थ्यमाना

१ धनं, चन्द्रपक्षे किरणाः. २ सकलम्. ३ अजय १ सुपात्र २ अनुकंपा ३ उचित ४ कीर्ति ५ रूपपञ्चविधदानाधिकारिणः.

सुताऽजनि । सुसुमेत्याख्यया सर्वसूनुज्योऽप्यतिवल्लभा ॥ ६ ॥ इतश्च तस्य दास्यस्ति चिलातीसंज्ञया तया । सु (सू) तो जातः स नाम्नापि चिलातीपुत्र इत्यभूत् ॥ ७ ॥ सोऽन्यदा सुसुमाख्यायां तनुजायां कुचेष्टितम् । कुर्वन्निरीक्षितस्तेन श्रेष्ठिना कुपितोऽथ सः ॥ ८ ॥ रे दुरात्मन् महापाप महादुष्कर्मकर्मठ ! । पुत्रवत्पालितोऽप्येतत् किं करोषि कुचेष्टितम् ॥ ९ ॥ एवं निर्भर्त्स्य तेनायं गृहान्निःसारितो निजात् । इतस्ततो भ्रमन् कस्याञ्चित् पद्यामथ सोऽप्यगात् ॥ १० ॥ चौर्यादिकर्मकौशल्याच्चिलातीतनयः क्रमात् । संभूय पल्लिवास्तव्यैर्लोकैः पल्लीपतिः कृतः ॥ ११ ॥ युष्मन्यं [1]स्वं सुसुमा मे इत्युक्त्वा तस्करानसौ । अन्यदा तैः समं तस्यां प्राविशद्धनवेश्मनि ॥ १२ ॥ जग्मुर्गृहीतसर्वस्वा दस्यवस्तद्गृहाद्यात् । चिलातीसूनुरप्याशु गृहीत्वा सुसुमां निरैत् ॥ १३ ॥ प्रमीलापगमे श्रेष्ठी दृष्टतच्चेष्टितो धनः । धनं विषण्णस्तनयैः सममाशु तमन्वगात् ॥ १४ ॥ सोऽपि वीक्ष्य तमायान्तमाकृष्टासिं समं सुतैः । पुरोऽप्यनीशिता गन्तुं दध्यावित्यध्वगो हृदि ॥ १५ ॥ ईदृक्कृत्याद्धृताऽप्येषा सुसुमा न हि मे यदि । अपरस्यापि तन्मा भूदियं रूपरमापदम् ॥ १६ ॥ इत्याकृष्य कृपाहीनः कृपाणमतिदारुणम् । सोऽङ्घ्रिनन्नलिनीनालमृदु तत्फलकन्दलम् ॥ १७ ॥ करे कृत्वा शिरः सोऽगात् क्षरद्रुधिरधारया । पथ्यात्मीयदुराचारप्रशस्तिं विलिखन्निव ॥ १८ ॥ क्रमात्तत्रागतः श्रेष्ठी दृष्ट्वा तत्सुसुमावपुः । मूर्छया पतितो भूमावित्यरोदीद्गुरुस्वरम् ॥ १९ ॥ हा वत्से प्रणयातुच्छे [2]येन्नेषद्वचनं मम । यथा त्वद्वाक्सुधापानात् सद्यः स्यां मूर्छितोऽप्यहम् ॥ २० ॥ वसनं वाशनं खाद्यं हृद्यं वा तनुजूषणम् । किं न दत्तं मया येन रुष्टा त्वं न [3]वैच (द) स्यपि ॥ २१ ॥ इत्यादि विलपन्निज्यो

१ धनम्. २ यद्व देहि. ३ वच परिभाषणे इत्यस्य जौवादिकस्य लटि रूपम्, भ्वादेराकृतिगणत्वादिति कथंचित्समाधेयम्.

बोधितस्तनयैर्गृहम् । नीतश्च कृच्छ्रतोऽपत्यमृत्युदुःखं हि दुःसहम् ॥ २२ ॥ चिलातीतनयोऽप्यग्रे गच्छँस्तस्याः शिरः करे । बिभ्रच्च मार्गगं कायोत्सर्गस्थं मुनिमैक्षत ॥ २३ ॥ पप्रच्छ च मुने धर्ममदपवर्णैर्निवेदय । नो चेत्तवापि वेगेन शिरश्छेत्स्येऽसिनाऽमुना ॥ २४ ॥ ऊपशमविवेकसंवर इत्युक्त्वा तेन साधुनोडुीनम् । सोऽपि तदर्थं मनसा विचारयन् स्मेति चिन्तयति ॥ २५ ॥ क्रुद्धावज्वलनालोलज्वलज्ज्वालाकरालिते । कदपद्रुम इवारण्ये कुत्रास्त्युपशमो मयि ॥ २६ ॥ विपाद्य विबलां बालां बिभ्राणं तद्धिरः करे । चाण्डालमिव विप्रो मां विवेको न स्पृशत्यपि ॥ २७ ॥ मनोवचनकायैश्च प्रदुष्टे संवरो वरः । मयि तैलमिव क्वास्ति सिकताकणपीडने ॥ २८ ॥ इति ध्यायन् प्रबुद्धोऽसौ तद्धिरः करवालयुक् । त्यक्त्वा जेजे चोपशमं विवेकं संवरं तथा ॥ २९ ॥ विशुद्धध्यानलीनात्मा निन्दन् स्वकृत्यदुष्कृतम् । तत्रैव स्थितवान् कायोत्सर्गेण स महामुनिः ॥ ३० ॥ तदाऽऽगू[1] रक्तगन्धेन वज्रतुण्डाः पिपीलिकाः । प्रविश्य तान्निर्देहान्तश्चालिनीवद्व्यधायि सः ॥ ३१ ॥ तथाप्यचलितध्यानो यावत्सार्धदिनद्वयम् । नीममप्युपसर्गं तं स सेहेऽदीनमानसः ॥ ३२ ॥ तदालोच्य प्रतिक्रम्य सिद्धाध्यद्धं स्वपातकम् । चिलातीतनयो मृत्वा सहस्रारे सुरोऽजनि ॥ ३३ ॥ यथा चिलातीतनयो दुरात्माप्यदपश्रुतेनाप्यजनविशुद्धः । तथाऽपरे बोधकवाक्यरक्ता जनाः सपङ्का अपि निर्मलीस्युः ॥ ३४ ॥

॥ इति चिलातीपुत्रकथानकम् ॥

१ आगच्छन्.

अथात्रैव द्वारे विशेषमाह—

द्वेषेऽपि बोधकवचःश्रवणं विधाय, स्याद्रौहिणेय इव जन्तुरुदारलाभः।
क्काथोऽप्रियोऽपि सरुजां सुखदो रविर्वा, संतापकोऽपि जगदङ्गभृतां हिताय ॥ १४ ॥

व्याख्या—जन्तुः प्राणी द्वेषेऽपि सति बोधकवचःश्रवणं सुगुरुवचनाकर्णनं विधाय कृत्वा उदारलाभ उत्कृष्टधर्मप्राप्तिवान् स्यात्। क इव ? रौहिणेय इव यथा रौहिणेयचौरो द्वेषेऽपि "अणमिसनयणे"त्यादि श्रीवीरवचः श्रुत्वोदारलाभो जातः। ननु विना श्रद्धानं कथं गुणकारि स्याद्बोधकवचःश्रवणमित्यारेकां दृष्टान्तद्वयेनाधरीकरोति—अप्रियोऽपि कटुकोऽपि क्काथः सरुजां सरोगाणां पुंसां सुखदः सुखदायकः स्यात् रोगहन्तृत्वेन सुखमुत्पादयतीत्यर्थः। वा पुना रविः सूर्यः संतापकोऽपि तापकृदपि जगदङ्गभृतां जगद्वर्तिजन्तूनां हिताय वृष्टिरूपाय स्यात्। यदुक्तं रघुकाव्ये—

"सहस्रगुणमुत्सृष्टुमादत्ते हि रसं रविः। अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ॥ १ ॥ आदित्याजायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः।"

इत्यक्षरार्थः। भावार्थं तु दृष्टान्तेनाह—

रौहिणेयस्तेनकथा—

पुरं राजगृहं नाम्ना श्रियां गृहमिवाद्भुतम्। वैभारगिरिरित्यस्ति तस्य सीम्नि गुरुर्गिरिः ॥ १ ॥ तत्कन्दरोदरस्थायी चौरो लोहखुराख्यया। चाण्डाल इव पापात्मा बभूव भुवि विश्रुतः ॥ २ ॥ पुरे राजगृहे नित्यं पौरौकसि निशि ध्रुवम्।

पिशाच इव चक्रेऽसौ लब्ध्वा बलमुपद्रवम् ॥ ३ ॥ आददानस्ततो द्युम्नं कामयन् स्वपराङ्गनाः । निशान्तमिव कोशं वा स मेने स्वस्य तत्पुरम् ॥ ४ ॥ तस्यानुरूपो रूपेण तनुजोऽजनि तस्करः । रोहिण्यां नामतः पत्न्यां रौहिणेयोऽभिधानतः ॥ ५ ॥ तनयस्तेन स्तेनेनान्यदोक्तो मरणक्षणे । अवश्यं चेद्विधत्से त्वं वत्स किञ्चिद्दामि तत् ॥ ६ ॥ त्वदुक्तमखिलं तात विधास्येऽहं तदादिश । पित्राज्ञां खण्डयेत् को ज्ञस्ततः स मुदितोऽवदत् ॥ ७ ॥ देवैः समवसरणे विहिते यः स्थितोऽन्वहम् । धर्ममादिशते वीरो नाकर्ण्य तद्वचस्त्वया ॥८॥ उपदिश्येति मृत्वाऽसौ जज्ञे दुर्गतिभाजनम् । रौहिणेयः पुनः स्तैन्यं पितेव व्यतनोत् पुरि ॥ ९ ॥ इतश्च विहरन् वीरो विबुधैर्ग्रामपुरादिषु । तत्रागत्य स्थितो व्याख्यासद्मनि त्रिदशैः कृते ॥ १० ॥ जिनो योजनगामिन्या धर्मं दिशति भाषया । रौहिणेयो व्रजन् राजगृहे तद्देशमासदत् ॥ ११ ॥ स दध्यावध्वनाऽनेन यदि याम्यधुना तदा । श्रुत्वा वीरवचोऽहं स्यां पित्राज्ञाभङ्गपातकी ॥ १२ ॥ अन्यतोऽध्वा न चास्तीति विमृश्य मनसि स्वयम् । कर्णौ पिधाय पाणिभ्यां गन्तुमारब्धते स्म सः ॥ १३ ॥ वेगेन गच्छतस्तस्यांह्रौ भग्नः कण्टको दृढम् । तं पादमयमुद्धृत्य गन्तुं दस्युः शशाक न ॥ १४ ॥ नान्यः कश्चिदुपायोऽस्तीत्यपास्य श्रवणात् करम् । उद्धरन् कण्टकं वीरविभोरित्यशृणोद्वचः ॥ १५ ॥ अनिमेषदृशोऽम्लानमाल्या भूमितलास्पृशः । मनःकार्यकृतोऽस्वेदमल्लिनास्त्रिदशा इति ॥ १६ ॥ बहु श्रुतं मयैतद्धिगित्याकृष्याशु कण्टकम् । तथैवापासरत् कर्णौ कराभ्यां स पिधाय च ॥१७॥ नगरे तेन चौरेण मुष्यमाणे सदाऽन्यदा । श्रेष्ठिभिः श्रेणिको भूपः समुपेत्येत्यभाणि च ॥ १८ ॥ त्वय्यीशे सत्यपि श्रीर्नः स्वामिन्निःस्वामि-

१ धनम्.

नामिव । पश्यतामपि गृह्येत दायादैरिव दस्युभिः ॥ १९ ॥ द्वितीयश्लेन वाक्येन लोकानामतिथीकृतः । आकार्यारक्ष-कानाख्यत् क्रोधेनारुणितेक्षणः ॥ २० ॥ दायादीभूय वा चौरीभूयेदं लुण्ट्यते पुरम् । भवद्भिरेव येनासौ दस्युर्भो दीयते न हि ॥ २१ ॥ तेऽवोचन् रौहिणेयाख्यो दस्युर्मुष्णाति कञ्चन । एतान्नागरिकान्नैष धर्तुं दृष्टोऽपि पार्यते ॥ २२ ॥ प्लवङ्ग-वत्स उत्प्लुत्य गेहाद्गेहं भ्रमन्नथ । वप्रमुल्लंघ्य गच्छँश्च मार्गे न क्वापि वीक्ष्यते ॥ २३ ॥ हन्तुं धर्तुं च तं नाथ तस्करं शक्नुमो न हि । एतदारक्षकत्वं स्वं गृहाण धरणीश तत् ॥ २४ ॥ उदञ्चितैकभ्रूसंज्ञेरितो भूविभुनाऽन्वयः । ताँश्च प्रोचे चमूं स्वी-यां सज्जयन्तु पुराद्बहिः ॥ २५ ॥ प्रविशन्निःसरन् वाऽसौ ग्राह्योऽह्नायोपलक्ष्य सः । करीकृत्य तमादेशं निर्गता दण्ड-पाशिकाः ॥ २६ ॥ चमूं ते मन्त्रिणाऽऽदिष्टां गुप्तां बहिरसज्जयन् । पुरीं रुद्धामजानन् स सशङ्कः प्रविशन्निशि ॥ २७ ॥ ज्ञात्वाऽऽकारादिभिश्चौर इत्यसौ सैनिकैर्धृतः । बद्ध्वा च रौहिणेयाख्यो नृपतेरर्पितस्ततः ॥ २८ ॥ युग्मम् ॥ भूपोऽन्वयमुवाचास्य निग्रहः कः स चावदत् । अलोप्त्रस्यास्य बद्धस्य निग्रहो नोचितः प्रभो ॥ २९ ॥ अथाप्राक्षीन्नृपः स्तेनं कः कुत्रत्यः किमाह्वयः । त्वं कीदृग्जीविकः कस्मादिहायातो निरूपय ॥ ३० ॥ प्रत्यूचे सोऽपि भूपालं दुर्गचण्डः कुटु-म्बिकः । शालिग्रामे कार्यवशादिहायातोऽस्मि भूपते ॥ ३१ ॥ उत्सूरे प्रविशन्नत्र रुद्धोऽभीन्निरतत्त्ववित् । बद्ध्वाऽऽनी-तश्च तन्नाथ यथार्थं त्वं विचारय ॥ ३२ ॥ अथ प्रहिण्य तं गुप्तौ ग्रामे तत्र नृपो नरम् । कञ्चित्तस्य प्रवृत्त्यादि ज्ञातुं प्रेष-यति स्म सः ॥ ३३ ॥ सङ्केतं ग्राहितोऽत्येष ग्रामस्तेन पुरापि सः । दीर्घदर्शी भवेत्कापि चौरोऽप्यतिविशालधीः ॥ ३४ ॥ भूभृत्पुंसा तत्स्वरूपं पृष्टो ग्रामोऽन्यथादिदम् । दुर्गचण्डोऽत्र वास्तव्यः क्वापि ग्रामे गतोऽस्ति सः ॥ ३५ ॥ इत्थं नृपनरे-

णोक्तेऽथाज्ञयोऽचिन्तयन्तु किम् । अनेन सूचितं ब्रह्म दुर्लक्ष्यं सुधियामपि ॥ ३६ ॥ सप्तभूममथामात्यः स प्रासादमसज्जयत् । विमानमिव लेखानां रत्नराजिविराजितम् ॥ ३७ ॥ गन्धर्वोद्भासितोद्भासिगीतसङ्गीतकोत्वणम् । अप्सरोभिरिव स्त्रीभिः सुरूपाभिरलङ्कृतम् ॥ ३८ ॥ भित्तिभागसमालम्बिलम्बमाल्यालिभूषितम् । स्वर्गखण्डमिवायातं साक्षात्कौतुकतः क्षितौ ॥ ३९ ॥ त्रिभिर्विशेषकम् ॥ ततोऽजयः सुरापानोन्मत्तं चौरं विधाप्य तम् । परिधाप्य दिव्यवस्त्रे सुशय्यायामशाययत् ॥ ४० ॥ सुरायां परिणतायां ददर्शोत्थित एव सः । दिव्यलक्ष्मीं चमत्कारकरीं निर्हेतुकां तनौ ॥ ४१ ॥ पुंस्त्रीभिरन्नयादेशवर्तिनीभिर्व्यतन्यत । रुचिरं जयनन्दादि वचनं श्रुतिशर्मदम् ॥ ४२ ॥ त्वं विमानेऽधुना नाकी संजातोऽत्र महर्द्धिकः । त्वं नो नाथो वयं विश्वेऽप्येते ते किङ्कराः सदा ॥ ४३ ॥ सुरोऽब्रूवमिहाहं किमिति दध्यौ स यावता । तावतैकोऽवदद्देवः पूर्वसुकृतदुष्कृते ॥ ४४ ॥ निजे निवेदयास्माकं पश्चान्नाथविधिं यथा । दिव्यं त्वां दर्शयामस्त्वमपि भोगाँश्च भुङ्क्ष्व भोः ॥ ४५ ॥ युग्मम् ॥ रौहिणेयोऽथेति दध्यौ सत्यं किमिदमीदृशम् । किं वाऽज्ञयेन मां ज्ञातुं प्रपञ्चोऽयं व्यधीयत ॥ ४६ ॥ कथं निश्चेयमेतत्तु ध्यायता तेन तत् स्मृतम् । श्रीवीरवचनं कण्टकोद्धारसमये श्रुतम् ॥ ४७ ॥ यद्यर्हतः श्रुतं देवस्वरूपं संवदिष्यति । तथ्यं तत्कथयिष्यामि मिथ्या दास्येऽन्यथोत्तरम् ॥ ४८ ॥ ईदृग्बुद्ध्या ददर्शासावेतान् पृथ्वीतलस्पृशः । सनिमेषदृशो म्लानमाल्यान् स्वेदाविलाङ्गकान् ॥ ४९ ॥ ज्ञात्वा तद्ब्रह्म सोऽवोचद्रौहिणेय इमानिति । दानं दत्तं जिनार्चा च कृता सेवा च सद्गुरोः ॥ ५० ॥ चैत्यानि कारितान्युच्चैर्धर्मोऽयं प्राग्भवे कृतः । यत्प्रभावान्मया प्राप्तं विमान-

१ देवानाम्.

मिदमीदृशम् ॥ ५१ ॥ एवं वदन् स तैरूचे किञ्चित् पापमथो वद । स प्राह साधुसंपर्कान्मयाऽकृत्यं कृतं न हि ॥ ५२ ॥ पुनः प्रोचे स तैः स्तैन्यं त्वया किञ्चित् कृतं क्वचित् । तद्वदैकस्वज्ञावेन जन्म याति न कस्यचित् ॥ ५३ ॥ साद्देपमाख्यदेष स्यात्कः स्तैन्यात् स्वर्गञ्जाग् जनः । शिलामारुह्य कोऽपारपारावारं तरत्यहो ॥ ५४ ॥ ततो गत्वाऽखिलं तैस्तज्ञाङ्गे मन्त्र्यज्ञयाय च । निवेदितं तदाऽमात्यो महीपस्येदमन्यधात् ॥ ५५ ॥ स्वामिन्नीदृगुपायैर्यो ज्ञातुं दस्युर्न शक्यते । स दस्युरपि मोक्तव्यो नोचितं नीतिलङ्घनम् ॥ ५६ ॥ इति मन्त्रिगिरा राज्ञा रौहिणेयोऽपि तस्करः । मुक्तो न कपटाटोपपटुभिः के हि वञ्चिताः ॥ ५७ ॥ रौहिणेयस्ततो दध्यौ धिगाज्ञां जनकस्य मे । सार्ववावयसुधास्वादाद्वञ्चितोऽहं यया चिरात् ॥ ५८ ॥ नाज्ञविष्यज्जिनाधीशगौर्मयाऽऽकर्णिता यदि । यमोपान्तं तदाऽयास्यं विविधैर्वधबन्धनैः ॥ ५९ ॥ अनिह्नताऽपि यत्तीर्थनाथवाक्यं मया श्रुतम् । तज्जीविताय मे जातं पीयूषमिव रोगिणः ॥ ६० ॥ प्राणत्राणाय यस्योपदेशलेशोऽपि मेऽज्ञवत् । तस्य सर्वोपदेशः किं कर्ता संसेवितो ननु ॥ ६१ ॥ इति ध्यायन्नसौ गत्वा श्रीमद्वीरजिनान्तिके । प्रभुं प्रणम्य विज्ञप्तिं रौहिणेयोऽतनोदिमाम् ॥ ६२ ॥ तीर्थनाथ तमःस्तोमव्याप्तनेत्रान् जनाँस्तव । गीः प्रकाशयते वर्त्म सावित्रीव विज्ञा विज्ञो ॥ ६३ ॥ अनाप्तो मत्पितावाप्तमानीयत्कालमीश माम् । वियोज्य वाक्सुधास्वादात्तव चौर्ये त्वयोजयत् ॥ ६४ ॥ यत्तदा त्वद्वचोऽश्रौषमनिच्छुरपि तीर्थप । तेन मन्त्राद्धरेणेव त्रातोऽहं व्यालसर्पतः ॥ ६५ ॥ त्वयाऽहं मृतिवक्त्रस्थो यथा रक्षक ! रक्षितः । तथाऽधुनापि मां रक्ष भवाम्भोनिधिमज्जीतितः ॥ ६६ ॥ अर्हंस्तत्कृपया सिद्धिसौधप्राप्ति-

१ सूर्यसम्बन्धिनी.

विधायिनीम् । विदधे साधुसद्धर्मदेशनां मधुराक्षरम् ॥ ६७ ॥ प्रबुद्धो रौहिणेयोऽथ नत्वाऽवक् तीर्थपं विभो । दीक्षादानाय मेऽद्याद्भुत् दृढो बाढं मनोरथः ॥ ६८ ॥ परं किञ्चिन्मेऽस्ति वाच्यं समं श्रीश्रेणिकेशिना । प्रभुं प्रोच्येति तं भूपमुपेत्यासौ जगाद च ॥ ६९ ॥ रौहिणेयः स एवाहं भवन्नगरमोषकः । वीरवाक्यान्मया बुद्धिरभयस्यापि लङ्घिता ॥ ७० ॥ बुद्धोऽथाहं व्रतार्थ्यस्मि तत् प्रेषय निजं नरम् । दर्शयामि यथा सर्वं तत्तद्वोप्त्रं क्षितीश्वर ॥ ७१ ॥ ततश्च भूभृदादेशादभयः पौरलोकयुक् । रौहिणेयालये गत्वा लोकेभ्यो लोप्त्रमार्पयत् ॥ ७२ ॥ परार्थप्रथनेनासौ प्रबोध्य स्वकुटुम्बकम् । दीक्षादानाय श्रीवीरान्तिकेऽगाद्रौहिणेयकः ॥ ७३ ॥ स्वकुटुम्बयुतो भूपकृतनिष्क्रमणोत्सवः । संप्रव्रज्य तपस्तेपे तीव्रं कर्मक्षयोद्यतः ॥ ७४ ॥ प्रान्ते संलेखनां कृत्वा विहितानशनः सुधीः । विपद्य रौहिणेयर्षिर्बभूव त्रिदशोत्तमः ॥ ७५ ॥ एवं जिनेन्द्रवचनामृतपानतो यत्सोऽनन्तमृत्युमजयन्मुनिरौहिणेयः । अन्येऽपि तद्वदिह सार्ववचोऽमृतेन, पीतेन भव्यनिवहा अजरामराः स्युः ॥ ७६ ॥

॥ इति रौहिणेयकथा ॥

व्याख्यातमिदं षष्ठं बोधद्वारं । सति बोधे सम्यक्त्वप्राप्तिर्भवतीति क्रमायातं सम्यक्त्वस्वरूपनिरूपणद्वारं विवरीषुराह–

कोऽप्यन्य एव महिमा ननु शुद्धदृष्टेर्यच्छ्रेणिको ह्यविरतोऽपि जिनोऽत्र भावी ।
पुण्यार्गलः किमितरोऽपि न सार्वभौमो, रूपच्युतोऽप्यधिगुणस्त्रिजगन्नतश्च ॥ १५ ॥

व्याख्या—ननु निश्चितं शुद्धदृष्टेर्निर्मलसम्यक्त्वस्य कोऽप्यपूर्वोऽन्य एव महिमा प्रभावो वर्तते । यद्यस्मात् श्रेणिको

नाम नृपोऽविरतोऽपि प्राणातिपातादिविरतिरहितोऽपि हि निश्चितं अत्र भरतक्षेत्रे भाविचतुर्विंशत्यां जिनः पद्मनाभनामा तीर्थंकृद्भावी भविष्यति सम्यक्त्वगुणलाभयोगात्। पद्मनाभमहावीरयोरिदमन्तरं ज्ञेयं, यत उक्तम्—

"चुलसी वाससहस्सा वासा सत्तेव पंचमासा य। वीरमहापउमाणं अंतरमेयं जिणोद्दिट्ठं ॥ १ ॥"

"महापउम त्ति" पद्मनाभः। इदमन्तरं श्रीमहावीरनिर्वाणपद्मनाभजन्मनोरेव ज्ञेयं। महापुरुषचरितेऽप्युक्तं आगामिदुःषमासुषमाया वर्ष ३ सार्धमास ८ अतिक्रमे—

"चित्तसियतेरसीए चंदे हत्थुत्तराहिं जोएण। होहि त्ति महापउमो अभिसेउं तस्स वीर व ॥ १ ॥"

ततः क्रमेण शेषकल्याणकानि वीरवद्भाव्यानीति। ननु अविरतः श्रेणिकः कथं जिनो भावी चारित्रादिगुणरहितत्वादिति। मैवं, द्रव्यचारित्ररहितानामपि भावचारित्रसद्भावे मुक्तेर्भणनात्। यदुक्तम्—

"भावेण चरित्ताउं सुट्ठयरं दंसणं धरेयव्वं। सिज्झंति चरणरहिया दंसणरहिया न सिज्झंति ॥ १ ॥"

पुनरपि प्राच्याशङ्कां दृष्टान्ताभ्यां निरस्यति—इतरोऽपि सामान्योऽपि जनः पुण्यार्गलः पुण्याधिकः सन् सार्वभौमश्चक्रवर्ती किं न स्यात्? अपि तु स्यादेव। च पुना रूपच्युतोऽपि कुरूपोऽपि अधिगुणो बहुगुणः सन् त्रिजगन्नतस्त्रैलोक्यनमस्यः किं न स्यात्? अपि तु स्यादेव। पुण्याढ्यराज इवेति भावः। इति काव्याक्षरार्थः। भावश्चायं कथ्यते (श्रीश्रेणिककथा)—

राजगृहपुराधीशः श्रेणिको नामतो नृपः। तृणायितं रिपुश्रेण्या यत्प्रतापहुताशने ॥ १ ॥ अन्यदा विहरन् वीरस्वामी

१ सम्यक्त्वसद्भावे.

तत्रागमत् पुरे । पौरवारपरीवारस्तं नन्तुं श्रेणिकोऽप्यगात् ॥ २ ॥ जिनः कृपापरीतान्तःकरणो धर्मदेशनाम् । विधातुमेवमारेभे सुरासुरनृणां पुरः ॥ ३ ॥ यथाऽङ्घिषु हिरण्याङ्घिर्यथा देवद्रुमो द्रुषु । यथा चक्री नृचक्रेषु सुरेषु च सुरेश्वरः ॥ ४ ॥ यथा सुरसरिद्वारि सरित्सु निखिलास्वपि । मुख्यं तथैव सम्यक्त्वं धर्मकार्येषु नूतले ॥ ५ ॥ देवपूजादयादानादिकं सम्यक्त्ववर्जितम् । अजागलस्तनप्रायं धर्मकर्माखिलं नृणाम् ॥ ६ ॥ जनास्तत्प्राप्य सम्यक्त्वं पाट्यं यच्चरणोज्झिताः । सिध्यन्त्यपि महात्मानः सम्यक्त्वरहिता न हि ॥ ७ ॥ इत्याकर्ण्य प्रभोः सम्यक् सम्यक्त्वं श्रेणिको नृपः । जग्राह परमप्रीत्या रत्नं रत्नाकरादिव ॥ ८ ॥ पुनः प्रोचे प्रभुं नूपो बहुकर्माऽहमीश्वर । काङ्क्षित्प्राणातिपातादिविरतिं कर्तुमक्षमः ॥ ९ ॥ यतो मे चरमाम्भोधितिमिमांसादनेऽपि न[1] । वाञ्छा निवर्तते तेन कथं कथय तां श्रये ॥ १० ॥ जिनोऽन्यधत्त धात्रीश तत्सम्यक्त्वे दृढो भव । भाविनी वाञ्छितार्हिस्ते तस्माच्चिन्तामणेरिव ॥ ११ ॥ ततो हृष्टो नृपो नत्वा प्रभुं स्वागारमागमत् । अपालयच्च सम्यक्त्वं विशदं विशदाशयः ॥ १२ ॥ शक्रः सदस्यवक् चेदमनुश्रेणिकमार्हताः[2] । दर्दुराङ्कसुरोऽश्रद्दधत्तैर्दैवैः परीक्षितुम् ॥ १३ ॥ तदागाच्छ्रेणिको नन्तुं प्रभुं व्याख्यानवेश्मनि । सोऽपि देवस्तत्परीक्षाकृते तत्रागमत्क्षणात् ॥ १४ ॥ प्रभोः कुष्ठगलद्देह उपविष्टोऽग्रतो नृपे । पश्यत्यपि स स्वपूतिरसेनान्यर्चयज्जिनम् ॥ १५ ॥ तद्दृष्ट्वा श्रेणिकः क्रुद्धो दध्यौ वध्योऽयमुच्चकैः । पापी यत्तीर्थनाथस्याशातनां वितनोत्यमूम् ॥ १६ ॥ इतश्च तीर्थनाथेन कुष्ठिकोऽज्ञापत द्रुते । म्रियस्वेत्यथ जीवेति द्रुते सति महीभुजा ॥ १७ ॥ म्रियस्व वाऽथ जीवेति द्रुतेऽप्यभयमन्त्रिणा । कालसौकरि-

१ स्वयंभूरमणसमुद्रमत्स्यानां मांसभक्षणे २ विरतिम्. ३ श्रेणिकाद् हीनाः. ४ ऐत् आगच्छत्.

केणाथ क्षुते मा जीव मा मृथाः ॥ १८ ॥ प्रभुं प्रति म्रियस्वेति ज्ञणनात्कुपितो नृपः । इतोऽसावुत्थितः स्थानाद्ग्राह्य इत्यादिशद्भटान् ॥ १९ ॥ देशनान्ते प्रभुं नत्वोत्थितोऽसौ भूमिभृद्भटैः । रुद्धोऽप्यगाद्दिव्यरूपभृत्तेषां पश्यतामपि ॥ २० ॥ भटैर्निवेदिते क्षात्रवृत्ततोऽवग्विस्मितो विभुम् । कः कुष्ठीति जिनः स्माह न कुष्ठी किं तु निर्जरः ॥ २१ ॥ कथमीदृगिति प्रोक्ते भूभृता तीर्थपो जगौ । दर्दुराङ्कः सुरोऽत्रागात्त्वत्सम्यक्त्वं परीक्षितुम् ॥ २२ ॥ चन्दनेनार्चयत्पादौ मदीयौ मेदिनीपते । चक्रेऽन्यद्वैक्रियं सर्वं त्वद्दृङ्मोहनहेतवे ॥ २३ ॥ अथाख्यद्श्रेणिको नाथाशुभमेष त्वया क्षुते । शुभाशुभानि चान्येषां कथयाचीकथत्कथम् ॥ २४ ॥ अथाख्यत्तीर्थपः क्षाप ! तिष्ठस्यद्यापि किं भवे । तूर्णं मुक्तिं प्रयाहीति मां म्रियस्वेति सोऽब्रवीत् ॥ २५ ॥ स त्वां जगाद जीवेति यद्धर्म तव जीवतः । त्वं विपन्नः पुनः क्षाप भविता नरकातिथिः ॥ २६ ॥ धर्मं जीवन् करोति स्याद्विमानेऽनुत्तरे मृतः । जीव म्रियस्व वेत्येषोऽभयामात्यं ततोऽवदत् ॥२७॥ जीवन् करोति पापानि मृतस्त्वाप्स्यति दुर्गतिम् । मा जीव मा मृथारूत्स कालसौकरिकं जगौ ॥ २८ ॥ श्रुत्वेति भूपतिस्तीर्थनाथं नत्वा व्यजिज्ञपत् । त्वय्यहं भ्रातरि भ्रातः कथं स्यां नरकातिथिः ॥ २९ ॥ भगवानब्रवीत्तेति बद्धायुर्वर्तसे पुरा । त्वं तेन नरकेऽवश्यं नरशार्दूल ! यास्यसि ॥ ३० ॥ कर्माशुभं शुभं वा यत्पुरा कृतमिहात्मना । भोक्तव्यं तदयमप्यन्यथा कर्तुं न हीश्महे ॥ ३१ ॥ त्वं भाव्यर्हच्चतुर्विंशतौ भावी जिन आदिमः । पद्मनाभाभिधो भूप तत्खेदं मा कृथा वृथा ॥ ३२ ॥ जगौ श्रीश्रेणिकः स्वामिन् कोऽप्युपायोऽस्ति किं न सः । योऽत्र मां त्रायते श्वभ्राद्व्याघ्रादिव महामणिः ॥ ३३ ॥ बभाषे

१ नरकात्.

जगवान् जूजुग् मुनिन्यो बहुजक्तितः । कपिलानामब्राह्मण्या यदि जिक्षा प्रदाप्यते ॥ ३४ ॥ त्वया चेन्मुच्यते सूनः-
कालसौकरिकेण वा । तदा श्वब्राधिमुक्तिस्ते नान्यथा जायते नृप ॥ ३५ ॥ युग्मम् ॥ सत्यमित्युपदेशं स हारवद्धृदि चोद्-
हन् । प्रजुं प्रणम्य स्वागारं प्रत्यचालीन्नरेश्वरः ॥ ३६ ॥ अत्रान्तरे दर्दुराङ्को जूयो जूपं परीक्षितुम् । साधुं दुष्कर्म कुर्वाणं
कैवर्तवददर्शयत् ॥ ३७ ॥ तं वीक्ष्य प्रवचनस्य म्लानिर्मा जूदिति स्वयम् । निवार्याकार्यतः सामवाक्यैर्जूयो (पो) ऽगम-
द्गृहे ॥ ३८ ॥ स देवोऽदर्शयज्जूयः साध्वीमुदरिणीं नृपः । गृहे शास्त्रनजक्तस्तां गोपयामास सस्वके ॥ ३९ ॥ देवोऽथ प्राह
प्रत्यक्षीजूय तं चारु चारु जोः । न त्वं चलसि सम्यक्त्वात्स्वस्थानादिव पर्वतः ॥ ४० ॥ जूमीश यादृशं शक्रोऽन्तःसज्जं
त्वामवर्णयत् । दृष्टस्तादृश एव त्वं तादृशां न मृषा गिरः ॥ ४१ ॥ ततः समर्पयामास हारं मुक्तामयं वरम् । गोलकद्वय-
मप्याशु तिरोऽजूत्सोऽमरस्ततः ॥ ४२ ॥ हारं दिव्यं महादेव्यै चेद्वणायै नरेश्वरः । तज्गोलकद्वयं हृष्टो नन्दायै तद्वदार्पयत्
॥ ४३ ॥ अस्य दानस्य योग्याऽहमिति नन्दा तदीर्ष्यया । गोलकद्वितयं स्तम्जे आस्फाट्यास्फोटयत्ततः ॥ ४४ ॥ इन्दुयु-
ग्ममिवानर्घ्यमेकस्मात् कुण्मलद्वयम् । क्षौमयुग्मं तथाऽन्यस्मान्निःसृतं जासुरं श्रिया ॥ ४५ ॥ तानि दिव्यानि चत्वारि
नन्दा सानन्दमाददे । महतां जायते लाजोऽचिन्तितोऽनजवृष्टिवत् ॥ ४६ ॥ प्रोचेऽथ कपिलां जूजुग् जिक्षां त्वं यज्ञ
जक्तितः । मुनिन्यस्त्वां करिष्येऽहं निर्जिक्षां यज्ञनादिजिः ॥ ४७ ॥ कपिलाख्यन्मां करोषि सर्वां हेममयीं यदि । हिनस्ति
(स्सि) च तदप्येतदकार्यं न करोम्यहम् ॥ ४८ ॥ कालसौकरिको राज्ञाऽथोचे सूनां परित्यज । यदास्ये स्वं[3] बहु स्वस्य लोजात्

१ हिंसा. २ मात्सिकवत्. ३ धनम्.

सूनां करोषि चेत् ॥ ४९ ॥ कालसौकरिकोऽप्याख्यत् सूनायां नृप कोऽस्ति नु । दोषो जीवन्ति यल्लोका यया मुञ्चे कथं हि ताम् ॥ ५० ॥ सूनावृत्तिं कथं कर्ताऽन्धकूपे क्षिप्त एषकः । इत्येनं क्षेपयामास सोऽन्धकूपे दिवानिशम् ॥ ५१ ॥ ततो मत्वा प्रभोर्भूपः श्रेणिकस्तस्यवेदयत् । विभोऽसौ मोचितः सूनां सौनिकोऽहर्निशं मया ॥ ५२ ॥ जगाद सर्वविद्राजन्नन्ध-कूपेऽपि सोऽवधीत् । महिषाणां पञ्चशतीं निर्माय मृन्मयीं स्वयम् ॥ ५३ ॥ तक्त्वा श्रेणिको वीक्ष्य स जिघ्रन्ततः स्व-यम् । धिगहो कर्म मे प्राच्यं नान्यथा स्याज्जिनोर्गिरा ॥ ५४ ॥ कालेन कियता त्यक्तराज्यो राज्यं जिघृक्षुणा । बद्धोऽसौ कोणिकेनाथ मृत्वा दुर्गतिमागमत् ॥ ५५ ॥ तत उद्धृत्य भाव्यर्हच्चतुर्विंशतिकादिमः । तीर्थनाथः पद्मनाभाभिख्ययाऽत्र भविष्यति ॥ ५६ ॥ इति विज्ञाय सम्यक्त्वे भवन्तु भविका दृढाः । यथा स्वर्गापवर्गश्रीर्वश्या दासीव वो भवेत् ॥ ५७ ॥

॥ इति श्रीश्रेणिककथा ॥

पुनरत्रैव विशेषमाह—

तद्दर्शनं किमपि सा सुलसाऽऽप येन, प्रादाज्जिनोऽपि महिमानममानमस्यै ।
नैर्मल्यतः शशिकला नवकेतकीत्वं, मालातुलां च हरमूर्ध्नि बभार गङ्गा ॥ १६ ॥

व्याख्या—सा प्रसिद्धा सुलसा नाम श्राविका तत् किमप्यपूर्वं दर्शनं सम्यक्त्वमाप लेभे । तद्दर्शनं किं ? येन दर्शनेन कृत्वा जिनोऽपि श्रीमहावीरोऽपि अस्यै सुलसायै अमानमपरिमाणं महिमानं गुरुतां प्रादात् ददौ । तथा चोक्तम्—

"इंदो वि ताण पणमइ हीलंतो नियपरिच्छिवित्थारं । मरणंते वि हु पत्तं सम्मत्तं जे न चुक्कंति ॥ १ ॥ सम्मत्तम्मि य

लब्धे ठ्ठ्याइं नरयतिरियदाराइं । दिव्वाणि माणुसाणि य सुक्कसुहाइं सहीणाइं ॥ २ ॥ अंतोमुहुत्तमित्तं पि फासियं हुज्ज जेहिँ सम्मत्तं । तेसिं अवड्ढपुग्गलपरियट्टो चेव संसारो ॥ ३ ॥"

इत्यादिसम्यक्त्वप्रभावो महान् श्रुत उक्तः । तत्सम्यक्त्वमाहात्म्यमिति भावः । ननु कथं वीतरागोऽस्यै महिमानमदात् स्वस्वरूपहानिप्रसङ्गात् ? यतः—

"नाध्येतव्यं न वक्तव्यं न श्रोतव्यं कदाचन । प्रश्नोत्तरे न कर्तव्ये योगभङ्गाय योगिभिः ॥ १ ॥"

इत्याशङ्कां दृष्टान्ताभ्यां निरस्यति—शशिकला चन्द्रकलिका नैर्मल्यतो निर्मलत्वात् हरमूर्ध्नि शम्भुभाले नवकेतकीत्वं प्रधानकेतकीरूपत्वं बभार दधौ । च पुनर्गङ्गा नैर्मल्यतो हरमूर्ध्नि मालातुलां स्रक्साम्यं बभार । इत्यक्षरार्थः । भावार्थं तु कथयाह

(सुलसाश्राविकाकथा)—

पुरे राजगृहे नाग इत्यभूदृद्धिकोत्तमः । यन्मनःकमलं धर्मवाञ्छा भृङ्गीव नात्यजत् ॥ १ ॥ धर्मकर्मण्यनलसा सुलसानामतोऽभवत् । गेहिनी देहिनीव श्रीस्तस्य सद्दर्शनान्विता ॥ २ ॥ अन्यदाऽचिन्तयन्नागोऽनङ्गजस्य ममाभवत् । अङ्गजोद्वापने वाञ्छा कूपस्थायेव निष्फला ॥ ३ ॥ नोदारमपि तद्वस्यं स्मशानमिव मन्दिरम् । यत्र पुत्रव्रजः क्रीडन्नेदृश्यते धूलिधूसरः ॥ ४ ॥ न बालकालतः शीलं पालितं नेहितं च यैः । पुत्रवक्त्रं तु धिक् तेषां जन्म लोकद्वयाहितम् ॥ ५ ॥ इति चिन्तासरिन्नाथनिमग्नं जीवितेश्वरम् । निरीक्ष्य सुलसाऽजल्पद्बद्धहुंकृतिकृताञ्जलिः ॥ ६ ॥ सनालकमलाकारं करतलपश-

१ स्थगितानि. २ अपुत्रस्य. ३ बालसमयात्.

यालु ते । मुखमाख्याति चिन्तां मे तच्चिन्ताकारणं वद ॥ ७ ॥ नागोऽप्यूचेऽस्मि निःपुत्रः पुत्रवाञ्छा ममास्ति च । पुंत्री-यतो न पुंत्रीयं किञ्चिदौपँयिकं यतः ॥८॥ सुलसा प्राह बह्वीस्त्वं कन्या अन्याः समुद्वह । प्रसूते तासु काऽप्येका पुत्रं ते प्रीति-दायकम् ॥ ९ ॥ जगौ नागोऽपि जायावाँस्त्वयैवास्मिन् भवेऽभवम् । अलमन्याभिर्जायाभिः का कथा तत्तनूरुहाम् ॥ १० ॥ त्वद्देहसंभवं पुत्रं वाञ्छाम्यँस्मि प्रिये ततः । तथा कुरु यथाऽऽवान्यां वीक्ष्यते स्वसुताननम् ॥ ११ ॥ ततः परं विशेषेण कुर्वाणा जिनपूजनम् । आचाम्लादि तपस्तेपे कुस्तपं सुलसा किल ॥ १२ ॥ इतश्चेन्द्रः सभामध्ये प्रशंसामिति निर्ममे । बह्व्योऽत्र श्राविकाः सन्ति न काचित्सुलसासमा ॥ १३ ॥ तच्छ्रुत्वा विस्मितोऽथैको देवोऽगात्तां परीक्षितुम् । साधुरूपेण साऽप्येतं हृष्टा दृष्ट्वाऽऽगतं मुनिम् ॥ १४ ॥ वंदित्वा भक्तितोऽपृच्छत्तदागमनकारणम् । स जगाद ममाख्यातं वैद्येनास्ति त्वदालये ॥ १५ ॥ तैलं यल्लक्षपाकं तद् ग्लानार्थं दीयतां मम । हृष्टा साथ तैलकुम्भमन्यनैषीन्मुनिं ततः ॥ १६ ॥ युग्मम् ॥ स्वशक्त्या पातितो हस्तात्तैलकुम्भः स नाकिना । स्फुटितोऽथ द्वितीयोऽपि तयाऽऽनीतस्तथाऽस्फु-टत् ॥ १७ ॥ तैलकुम्भस्तृतीयोऽपि तयाऽऽनीतोऽस्फुटत्तथा । सा दध्यौ मन्दभाग्याहं यत्तन्नोपकृतं मुनेः ॥ १८ ॥ परं विषण्णा न मनागप्येषा श्राविकोत्तमा । प्रकटीभूय देवोऽथ विस्मितस्तां जगाविति ॥ १९ ॥ शुभे ते श्राविकात्वस्य श्लाघां चक्रे दिवस्पतिः । विस्मितोऽहं ततो देवस्त्वां परीक्षितुमागतः ॥ २० ॥ तुष्टोऽस्मि ते वरं भद्रे वृणु साऽप्यवद-द्यदि । तुष्टोऽसि तदपुत्रायाः पुत्रं मे देहि सुन्दरम् ॥ २१ ॥ दत्त्वा द्वात्रिंशतं देवो गुटिकाश्चान्यधादिति । भद्रयेस्त्वं

१ पुत्रमिच्छतः. २ पुत्रदायिः. ३ उपायः. ४ अस्मीत्यस्मर्थेऽव्ययम्. ५ इन्द्रः.

क्रमादेताः स्युस्तावन्तस्तवाङ्गजाः ॥ २२ ॥ त्वया स्मृतोऽहमेष्यामि पुनः कार्यवशादिति । उक्त्वा तिरोऽभवद्देवः सुलसाऽपीत्यचिन्तयत् ॥ २३ ॥ बहूनां बालकानां मे मर्दन्त्या अशुचिं सदा । अत्येष्यति भूरिकालः क्रमेण गुटिकाऽदनात् ॥ २४ ॥ तदद्य युगपत्सर्वा गुटिका यत्सुतो मम । द्वात्रिंशल्लक्षणोपेत एकोऽपि स्यान्मनोहरः ॥ २५ ॥ ध्यात्वेति युगपत्सर्वास्ताः प्राश्नात्सा गुटीस्ततः । गर्भास्तदुदरे द्वात्रिंशदुत्पन्ना हि दैवतः ॥ २६ ॥ धर्तुं तानक्षमा गर्भास्ततस्तं देवमस्मरत् । सोऽप्यायातः क्षणात् साऽऽख्यत्तस्य गुटिकाकथाम् ॥ २७ ॥ देवोऽवदत्सुते किं ता युगपन्नक्षितास्त्वया । अमोघास्तेन ते पुत्रा द्वात्रिंशन्नाविनः खलु ॥ २८ ॥ मा विषीद सुते गर्भवेदनाऽपहरिष्यते । इत्युक्त्वा तद्व्यथां देवोऽपहृत्यागान्निजास्पदम् ॥ २९ ॥ पूर्णे च समये गर्भं वहन्ती सुलसा सुखम् । द्वात्रिंशतं सुतान्* सूता द्वात्रिंशल्लक्षणान्वितान् ॥ ३० ॥ धात्र्युत्सङ्गगता लाल्यमानास्ते वृष्णिमैयरुः । नवैर्नवैः पयःपानैः सहकाराङ्कुरा इव ॥ ३१ ॥ नागाख्यरथिकक्रोडे क्रीरुक्मिस्तैः कुमारकैः । मानसे मुत्पयोऽसंमाद्बाष्पाम्बुव्याजतो निरैत्[1] ॥ ३२ ॥ इतश्चापश्चिमं तीर्थनाथं चम्पापुरीस्थितम् । चरित्राम्बुधिं नत्वाऽचालीद्राजगृहं प्रति ॥ ३३ ॥ स्वामिना स स्वयं प्रोचे तस्मिन्नस्माकमाज्ञया । सुलसां पुण्यनिर्वाहं पृच्छेर्मधुरया गिरा ॥ ३४ ॥ इच्छामीति प्रपद्यासौ व्योम्ना राजगृहेऽगमत् । दध्यौ चेति गृहद्वारे सुलसायाः स्थितः खलु ॥ ३५ ॥ सुरासुरनराधीशपर्षत्संस्थो जगत्प्रभुः । सुलसापक्षपाती किं परीक्षे तां ततोऽधुना ॥ ३६ ॥ अथ वैक्रियलब्ध्याऽसौ बटुरूपं विकृत्य च । प्रविश्य सुलसागेहे भिक्षामेतामयाचत ॥ ३७ ॥ पात्राय मुनये भिक्षां यच्छामीत्यात्तनिश्चया । सुलसा

* सुतानसूत इति प्रत्यन्तरे. १ निरगच्छत्. २ राजगृहे. ३ सुलसाम्.

याचमानायापि तस्मै न किमप्यदात् ॥ ३८ ॥ ततो निःसृत्य पूःप्राच्यगोपुरद्वारि स स्थितः । विकृत्य वेधसो रूपं सर्वातिशयसंयुतम् ॥३९॥ चतुर्बाहुश्चतुर्वक्त्रो हंसयानोऽम्बुजासनः । धर्मं दिशन्मनोऽहार्षीत्साक्षाद्ब्रह्मेव पूर्विशाम् ॥ ४० ॥ सखीन्निर्बहिरस्त्यत्र ब्रह्मेत्याकारिताऽपि न । जगाम सुलसा मिथ्यादृष्टिसंस्तवशीलुका ॥ ४१ ॥ अम्बमोऽथ दिनेऽन्यस्मिन् याम्यायां शङ्खचक्रभृत् । गदासियुग्विष्णुरूपधरोऽस्थाद्गरुडासनः ॥ ४२ ॥ विष्णुप्रवादतो लोकव्यामोहनकृतोऽपि न । आगच्छत्सुलसा तत्र जिनशासननिश्चला ॥ ४३ ॥ तृतीयदिवसे सोऽथ वारुण्यां वृषभासनः । भस्माङ्गरागो गौरीयुग्धरो भूत्वा स्थितस्ततः ॥ ४४ ॥ धर्मं प्रदिशता तेन लोकः सर्वोऽपि रञ्जितः । तं न वीक्षितुमप्यागात् सुलसा श्राविकोत्तमा ॥ ४५ ॥ उत्तरस्यां दिने तुर्ये प्राकारत्रयराजितम् । कृत्वा समवसरणं जिनीभूत्वा स्थितोऽथ सः ॥ ४६ ॥ तं वन्दितुं विशेषेणान्येत्य धर्मं तु शुश्रुवुः । पौराः परं न सुलसा तत्त्वातत्त्वविदागमत् ॥ ४७ ॥ तां स क्षोभयितुं कञ्चित् प्रैषीत्सोऽप्यागतोऽवदत् । पञ्चविंशो जिनोऽत्रागात्तं नमेऽद्यैहि वन्दितुम् ॥ ४८ ॥ सुलसाऽप्यन्यधाद्धन्द पञ्चविंशो न जातुचित् । जिनेशः स्यादयं कोऽपि पौरान् वञ्चयते नटः ॥ ४९ ॥ एवमप्यचलां वीक्ष्य सुलसां सोऽप्यचिन्तयत् । स्थाने जिनेश्वरेणैषा श्लाघिता नृसुराग्रतः ॥ ५० ॥ के के न चालिताः पौरा मायायाऽत्र मयाऽनया । सम्यक्त्वतः परं नैतामलं चालयितुं त्वलम् ॥ ५१ ॥ अथाखिलं स संवृत्य प्रपञ्चं सुलसाऽऽलये । प्राविक्षत् स्वेन रूपेण परमश्रावकोऽम्बमः ॥ ५२ ॥ तं सा साधर्मिकं वीक्ष्य स्वबन्धोरतिवल्लभम् । अभ्युत्थानादिकां तस्य प्रतिपत्तिं चकार च ॥ ५३ ॥ प्रीतोऽसौ सुलसां

१ नगरजनानाम्.

प्राहाथैका त्वं पुण्यवत्यसि । प्रज्ञुर्वार्तं स्वयं यस्याः स्थितः पर्षदि पृच्छति ॥ ५४ ॥ निशम्य तद्गिरं साथ मुदिता प्राणमत् प्रज्ञुम् । सुधामाधुर्यसध्रीच्या तुष्टुवे च गिरा मुदा ॥ ५५ ॥ पुनः परीक्षितुं सोऽथ तां प्रोचे चतुराशयः । अत्रावतेरुर्ब्रह्माद्या धर्ममादिदिशुश्च ते ॥ ५६ ॥ तान् प्रणन्तुमगुः पौरा धर्मं तेन्यश्च शुश्रुवुः । कौतुकेनापि किं न त्वं गतवत्यसि धर्मिणि ! ॥ ५७ ॥ सुलसाऽप्यवदन्नञ ! किं जानन्नपि जल्पसि । के ब्रह्माद्याः कुदेवाः कं धर्ममाख्यान्त्यधर्मिणः ॥ ५८ ॥ श्रुत्वेति विस्मितो बाढमम्बरुस्तां स्तुवन्मुहुः । स्वं स्थानमगमत्साप्यर्हद्धर्मनिरता ऽभवत् ॥ ५९ ॥ इति सम्यक्त्वमाहात्म्यं निशम्य विबुधा ध्रुवम् । दृढीऽभवन्तु तत्रैव यद्यन्नीष्टाः शिवश्रियः ॥ ६० ॥

॥ इति सुलसाकथा ॥

॥ इति सम्यक्त्वद्वारम् ॥

सम्यक्त्वं खलु देवतत्त्वगुरुतत्त्वधर्मतत्त्वप्रतिपालनरूपमतः पूर्वं देवतत्त्वाराधनस्वरूपं निरूपयति—

दूरेऽर्हतोऽस्तु महनादि नतीज्ययाऽपि, श्रेयः सुरोऽजनि न सेरुकदर्दुरः किम् ।
कल्पद्रुमः स्मरणतोऽपि न किं फलाय, पार्श्वेऽपि किं मृगमदो न हि सौरभाय ॥ १७ ॥

व्याख्या—अर्हतः श्रीजिनदेवस्य महनादि पूजादि दूरेऽस्तु दूरे तिष्ठतु, अर्हतो नतीज्ययाऽपि नमस्करणवाञ्छयाऽपि श्रेयः पुण्यं स्यात् । सेरुकनामविप्रः आर्त्तध्यानमरणाद्दर्दुरो ऽनेकभवं प्राप्तः सन् महनादि विनाऽर्हतः श्रीवीरस्य

१ कुशलम्.

नतीज्ञयाऽपि सुरो देवः किं नाजनि ? अपि त्वजन्येव । ननु नतीज्ञामात्रेण महनादि विना कथमिज्ञामोदकतृप्तिवत् श्रेयःप्रसूतिः स्यात् इति चेन्न, पुष्पादिपूजा द्रव्यार्चा नतीज्ञा तु ज्ञावार्चा, द्रव्यार्चनस्य ज्ञावार्चनादतिहीनत्वात् सुतरां सा स्यात् । उक्तं च—

"मेरुस्स सरिसवस्स य जत्तियमित्तं तु अंतरं होइ । ज्ञावत्थय दव्वत्थय तित्तियं अंतरं जाण ॥ १ ॥ उक्कोसं दव्वथुइं आराहिय जाइ अच्चुयं जाव । ज्ञावत्थएण पावइ अंतमुहुत्तेण निव्वाणं ॥ २ ॥ सुग्गइदुग्गइनारी जगगुरुणो सिंदुवारकुसुमेहिं । पूयापणिहाणेणं उप्पन्ना तियसलोगम्मि ॥ ३ ॥"

एतदेवाह दृष्टान्ताभ्यां—कल्पद्रुमः स्मरणतोऽपि स्मरणमात्रतोऽपि किं फलाय वाञ्छितार्थदानाय न स्यात् ? अपि तु स्यादेव । मृगमदः पार्श्वेऽपि कस्तूरिका समीपेऽपि वर्तमाना (नः) सौरज्ञाय सुरज्ञित्वकरणाय किं न स्यात् ? अपि तु स्यादेव । इत्यक्षरार्थः । व्यासार्थं कथयाह—

सेरुककथा—

कौशाम्बीं नगरीं राज्ञि शतानीकेऽनुशासति । नाम्नाऽऽसीत् सेरुको विप्रो दरिद्रो मूर्खशेखरः ॥ १ ॥ ब्राह्मण्याऽज्ञाणि गर्ज्जिण्या सोऽन्येद्युः सूतिकर्मणे । कान्तानय घृतं मह्यं कथं सह्याऽन्यथा व्यथा ॥ २ ॥ अथाख्यत्सोऽपि मे नास्ति कान्ते काऽप्यमला कला । यया लज्ञे क्वचित् किञ्चित् कलाग्राह्या हि दानिनः ॥ ३ ॥ तं सोवाच याचस्व ज्रूपतिं कान्त ! कामदम् । सोऽथ पुष्पादिना विप्रः प्रवृत्तः सेवितुं नृपम् ॥ ४ ॥ चम्पानाथोऽथ कौशाम्बीं बलैः सर्वैरवेष्टयत् ।

मध्येकौशाम्बि सानीकः शतानीकः स्थितस्तदा ॥ ५ ॥ कालेन बहुना खिन्नसैन्यश्चम्पाधिपोऽन्यदा । वर्षासु स्वालयं गन्तु-
मारेभे राजहंसवत् ॥ ६ ॥ तदा पुष्पार्थमुद्याने प्राप्तो व्यैक्त सेकुकः । यान्तं क्षीणबलं गत्वेति स्वराज्ञे व्यजिज्ञपत् ॥ ७ ॥
शत्रुर्दन्तीव निर्दन्तो याति क्षीणबलस्ततः । स ग्राह्यस्तत्सुखेनेश तस्मायुक्तिष्ठसे यदि ॥ ८ ॥ तच्चश्चारु मन्वानो नृपः
सर्वबलेन सः । निरसार्षीत् शरैर्वर्षन् प्लावयँस्तच्चमूद्रुमान् ॥ ९ ॥ ततः पश्चादपश्यन्ती नष्टा चम्पेशितुश्चमूः । अकस्मात्क-
स्तत्पिपाते द्रष्टुमप्युत्सहेत वै ॥ १० ॥ चम्पानाथोऽपि नंष्ट्वाऽगादेकाकी भयविह्वलः । कौशम्बीशश्च कोशादि तस्य सर्वं
ततोऽग्रहीत् ॥ ११ ॥ प्रविश्य स्वपुरीं हृष्टः शतानीकोऽथ सेकुकम् । जगाद द्विज किं तुभ्यं ददामि वद वाञ्छितम्
॥ १२ ॥ द्विजो जगौ नृपं पृष्ट्वा निजां भार्यां नरेश्वर । याचिष्ये वै यदालोचस्थानमन्यन्न तां विना ॥ १३ ॥ ततो गत्वा-
ऽखिलं भट्टो भट्टिन्यै तद्व्यशंस सः । सा दध्यौ यद्यसौ भूपाद्ग्रहीष्यति पुरादिकम् ॥ १४ ॥ तदा करिष्यते दारानपरांस्त-
दिमं तथा । शिक्षयामि यथा भूरिस्वोन्मत्तोऽसौ भवेन्न हि ॥ १५ ॥ दक्षिणायां तु दीनारस्त्वया ग्रासश्च भोजनम् ।
[1]आलोच्य प्रत्यहं चैको याच्यः सेत्यन्वशात्प्रियम् ॥ १६ ॥ युग्मम् ॥ याचितं तत्तथा तेन दत्तं स्मित्वा नृपेण च । प्रत्यहं
लभमानस्तु स धनैर्ववृधेऽधिकम् ॥ १७ ॥ क्षापमान्योऽयमित्येष न्यमन्यत सदा जनैः । नरा नानुचराः के के प्रसन्ने
स्युर्महीपतौ ॥ १८ ॥ स पूर्वभोजनं वान्त्वा बुभुजे बहुशोऽन्वहम् । दक्षिणालोभतो विप्राः प्रायः स्युरतिलोभिनः ॥१९॥
असौ नित्यमजीर्णान्नवमनाविकृतै रसैः । दूषितत्वक्क्रमाज्ज्ञे कुष्ठी शीर्णाङ्घ्रिपाणिकः ॥ २० ॥ सचिवैरन्यदा भूपो विज्ञप्तो

१ विचारं कृत्वा.

नाथ कुष्ठ्यसौ । अत्रायोग्यः स्थापयितुं संचरिष्णुर्हि कुष्ठरुक् ॥ २१ ॥ सुताः सन्त्यस्य नीरोगास्तेभ्यः कोऽप्यत्र योज्यताम् । पुत्रः पितुः पदे स्थाप्यो राजनीतिरपीदृशी ॥ २२ ॥ एवमस्त्विति तेनोक्ते तथोक्तो मन्त्रिभिर्द्विजः । स्वपदे स्वसुतं न्यस्य स्वयं तस्थौ पुनर्गृहे ॥ २३ ॥ मक्षिकाकुलसंकीर्णो मधुमण्डकवत्सदा । गृहादपि बहिर्विप्रः कुटीरेऽक्षेप्यसौ सुतैः ॥ २४ ॥ वचस्तस्य बहिःस्थस्य न चक्रुस्तनया अपि । भोजनं भ्रष्टराज्यस्येव किं त्वदुर्दारुभाजने ॥ २५ ॥ अथ दध्यौ द्विजः क्रुद्धः श्रीमन्तोऽमी कृता मया । कथमेते जुगुप्सन्ते मामेवं दुर्धियः सुताः ॥ २६ ॥ अमी अपि जुगुप्स्याः स्युर्यथा कुर्वे तथेत्यसौ । विमृश्य स्वान् सुतानूचे कुलाचारमिमं निजम् ॥ २७ ॥ पशुर्देयोऽग्निमन्त्रैकः कुटुम्बस्य मुमूर्षुणिः । अतो मे जीवितोद्विग्नायार्प्यतां साम्प्रतं पशुः ॥ २८ ॥ श्रुत्वेति मुदिताः पुत्राः पशुमानिन्यिरेऽचिरात् । उद्वर्त्योद्वर्त्य सोऽप्यङ्गमन्नेनाचारयत् पशुम् ॥ २९ ॥ ततस्तं कुष्ठिनं जातं हत्वाऽदात्स तनूरुहाम् । मुग्धास्तन्नावमज्ञात्वा ते तन्मांसमभुञ्जत ॥ ३० ॥ स्वार्थाय यामि तीर्थेऽहमित्यापृच्छ्य सुतान् द्विजः । यानरण्ये ततोऽत्यन्तं तृषितो ह्रदमैक्षत ॥ ३१ ॥ नीरं तीरद्रुमायातपुष्पपत्रफलाविलम् । विप्रोऽपाद्भीष्ममध्याह्नार्यमांशुक्षयितं भृशम् ॥ ३२ ॥ यथा यथा पपौ सोऽम्बु विरेकोऽस्य तथा तथा । बभूव सकृमिस्तेन नीरुग् जज्ञेऽचिरेण सः ॥ ३३ ॥ आरोग्यमुदितो विप्रः क्षिप्रं स्वपुरमागतः । पौरैरदृश्यतोद्भूतविस्मयैः सुन्दराकृतिः ॥ ३४ ॥ पृष्टश्च त्वं पुनर्जात श्चोग्रश्रीरभूः कथम् । देवताराधनाज्जात इत्याख्यत्सेकुको द्विजः ॥ ३५ ॥ स स्वसद्म गतोऽदाद्दीक्षितनयान् कुष्ठिनो मुदा । दत्तं चारु मयाऽवज्ञाफलं व इत्यवक् च तान्

१ गच्छन्.

॥ ३६ ॥ पुत्राः प्रोचुस्तमेवं ते त्वया जनक निर्घृणम् । वैरिणेव किमस्मासु विश्वस्तेषु कृतं त्वदः ॥ ३७ ॥ जनैर्विनिन्द्यमानः स बहिर्निःसृत्य जग्मिवान् । पुरे राजगृहे घाःस्थं शिश्राय च निराश्रयः ॥ ३८ ॥ तदा तत्रागतः स्वामी वीरस्तं घारपालकः । अगान्नन्तुमिमं विप्रं नियोज्य निजकर्मणि ॥ ३९ ॥ बलिं दुर्गाग्रतो घाःस्थस्थानस्थः स तदागतम् । यथेष्टं क्षुधितोऽभुङ्क्त जन्मादृष्टमिव द्विजः ॥ ४० ॥ सोऽथ ग्रीष्मोष्मणाऽऽकण्ठभुक्तान्नस्तृषितो भृशम् । तत्स्थानं घाःस्थनीत्याऽगान्न विमुच्य प्रपादिषु ॥ ४१ ॥ धन्यान् वारिचरान् जीवान् जानन् स तृषितो मृतः । वारिचारीति जल्पँश्च पूर्वाप्यां दर्दुरोऽजनि ॥ ४२ ॥ भूयोऽप्यागाज्जिनो वीरो विहरन्निह पत्तने । पौरव्रजः प्रणन्तुं तमव्राजीदतिसम्मदात् ॥ ४३ ॥ स जिनागमनोदन्तं नैकोऽम्नोहारिणीमुखात् । श्रुत्वेति चिन्तयामास मया क्वचिदिदं श्रुतम् ॥ ४४ ॥ भूयो भूयो ध्यायतोऽस्येत्यभूज्जातिस्मृतिस्ततः । सोऽज्ञाद्दर्दुरः पूर्वभवमामरणान्तकम् ॥ ४५ ॥ यथा जना जिनं नन्तुं यान्ति यास्याम्यहं तथा । इत्युत्प्लवन्नसौ मार्गे प्रचचाल शुभाशयः ॥४६॥ तदा श्रीश्रेणिकेशाश्वक्षुरक्षुण्णः स दर्दुरः । मृत्वोत्पेदे शुभध्यानाद्दर्दुराङ्कान्निधः सुरः॥४७॥इतिजिनपतिपदपङ्कजनमनेनेत्यामात्रतोऽप्यसौ देवः । यदि संजज्ञे पूजादिकुर्वतां का कथा तर्हि ४८॥

॥ इति सेरुककथा ॥

अथात्रैव घारे पुनर्विशेषमाह—

ध्यातः परोक्षेऽपि जिनस्त्रिशुद्ध्या, जीर्णान्निधश्रेष्ठिवदिष्टसिद्ध्यै ।
सिन्धुप्रवृच्यै कुमुदौघलक्ष्म्यै, चकोरतुष्ट्यै विधुरत्नगोऽपि ॥ १८ ॥

व्याख्या—परोक्षेऽपि अप्रत्यक्षेऽपि जिनोऽर्हन् त्रिशुद्ध्या मनोवचनतनुनैर्मल्येन ध्यातः स्मृतः सन् इष्टसिद्ध्यै वाञ्छितप्राप्तये स्यात् । किंवत् ? जीर्णाभिधश्रेष्ठिवत् यथा जीर्णनामश्रेष्ठिना ऊर्ध्वस्थः श्रीमहावीरः पारणादिने परोक्षेऽपि ध्यातः सन् इष्टसिद्ध्यै अभूत् । ननु सेवनं विना कथं जिनो ध्यानमात्रेण स्वकुचन्दनाङ्गनादिपदार्थं इवेष्टसिद्धिदो भवेत् ?। यदुक्तम्—

"क्रियैव फलदा पुंसां न ध्यानं फलदं मतम् । यतः स्त्रीभक्ष्यभोगादिध्यानतो न सुखी भवेत् ॥ १ ॥"

अत्रोच्यते—नायमेकान्तः, यतो ध्यानतोऽपि सुतरामिष्टसिद्धेर्दर्शनात् । यतः—

"तव तविए जव जविए बहुवि हु कालेण हुंति सिद्धीउ । निद्दहियकम्मजाले झाणेण च तक्कणा सिद्धी ॥ १ ॥"

तथा लोकेऽप्युक्तम्—

"वीतरागं जनो ध्यायन् भजते वीतरागताम् । इल्लिका भ्रमरीध्यानाद्भ्रमरी जायते क्रमात् ॥ १ ॥"

इति । अस्यैवार्थस्य सत्यतां दृष्टान्तेनाह—विधुश्चन्द्रोऽभ्रगोऽपि आकाशस्थोऽपि सिन्धोः समुद्रस्य प्रवृद्धये स्यात् । कुमुदौघस्य कुवलयव्यूहस्य लक्ष्म्यै विकाशरूपश्रिये स्यात् । चकोराणां पु(तु)ष्टै प्रीतये च स्यात् । इत्यक्षरार्थः । भावं कथयाह—

जीर्णश्रेष्ठिकथा—

अत्रैवास्ति विशालश्रीर्विशाला नामतः पुरी । स्वप्नेऽपि रोचते स्वर्गः सुखिने यज्ञनाय न ॥ १ ॥ जिनदत्ताख्यया तत्र श्रमणोपासकोऽवसत् । कृपालुर्विदितो जीर्णश्रेष्ठीति ऽविणदयात् ॥ २ ॥ इतश्च भ्रमरोद्याने बलदेवालये प्रभुः । पुर्यत्रा-

स्थात्कृतोत्सर्गश्चतुर्मासमुपोषितः ॥ ३ ॥ तत्रोद्यानेऽगमत्तस्यायतने श्रेष्ठिराट् तदा । प्रतिमास्थमपश्यच्च जिनदत्तोऽन्त्यतीर्थपम् ॥ ४ ॥ ब्रह्मस्थोऽयं जिनोऽस्तीति निश्चित्य स जिनेश्वरम् । वन्दित्वा परमप्रीत्या चेतसीति व्यचिन्तयत् ॥ ५ ॥ अद्यास्त्युपोषितः स्वामी प्रतिमासंस्थितः परम् । पारणं यदि श्वः कर्ता ममौकसि शुभं तदा ॥ ६ ॥ सिषेवे स चतुर्मासीं नित्यमित्याशया प्रभुम् । स्ववेश्मनि तदन्ताहे[1] निमन्त्र्येशं जगाम च ॥ ७ ॥ स्वार्थं पूर्वं साधितानि शुद्धधीः प्रासुकानि सः । एषणीयानि भोज्यानि वीक्ष्य साधून्यचिन्तयत् ॥ ८ ॥ प्राङ्गणस्थो जिनदत्तो दत्तनेत्रो जिनाध्वनि । भोज्यान्येतानि शुद्धानि ददेऽहं श्रीजिनेशिने[2] ॥९॥ धन्योऽहं यस्य गेहेऽर्हन् स्वयमद्यागमिष्यति । करिष्यति भवाम्भोधितारणं पारणं तथा ॥ १० ॥ आयातस्य जिनेशस्याग्रिमुखं यास्यते मया । वन्दिष्यते च तत्पादपद्मं विरचिताञ्जलि ॥ ११ ॥ भविष्यति भवोऽयं मेऽद्यापुनर्भवहेतवे । निर्वृत्यै दर्शनमपि पारणं किं पुनः प्रभोः ॥ १२ ॥ यावत्तस्थाविति ध्यायन् स श्रेष्ठी पावनाशयः । जगामाग्रिनवश्रेष्ठिधाम्नि तावज्जिनेश्वरः ॥ १३ ॥ धनी धनमदोद्भीवो दासीं मिथ्यादृगाह सः । दत्त्वा भिक्षामिमं भिक्षुं मंक्षु भद्रे विसर्जय ॥ १४ ॥ कुष्माषान् समुपानीय साऽथ चिक्षेप वेगतः । पाणिपात्रे जिनेन्द्रेण पारणाय प्रसारिते ॥ १५ ॥ चेलोत्क्षेपः कृतो देवैर्दुन्दुभिस्ताडितोऽम्बरे । पुष्पगन्धाम्बुवृष्टिश्च वसुधारा च निर्ममे ॥ १६ ॥ जनैः पृष्टस्त्वग्रिनवश्रेष्ठी माय्येवमन्यधात् । पारणं कारितः स्वामी पायसेन मया स्वयम् ॥ १७ ॥ अहो दानमहो दानं श्रुत्वेत्थं निर्जरध्वनिम् । जनै राज्ञा चाग्रिनवाख्यः श्रेष्ठी सुष्ठु तुष्टुवे ॥ १८ ॥ जिनागमनचिन्तावान् जीर्णश्रेष्ठी तथा

१ चतुर्मासस्यन्तदिने. २ चिन्तयामास भोज्यान्येतानि दास्ये जिनेशिने इति वा पाठः.

स्थितः । देवदुन्दुभिशब्दं स इति श्रुत्वा व्यचिन्तयत् ॥ १९ ॥ मन्दपुण्योऽस्म्यहं हा धिग्मुधा मे भूयान्मनोरथः । मत्सङ्घ यदतिक्रम्यापरत्र स्वाम्यपारयत् ॥ २० ॥ विहरन्नन्यतस्तत्र पारयित्वा जिनोऽप्यगात् । तत्रोद्याने समायातः पार्श्वशिष्योऽथ केवली ॥ २१ ॥ नृपो जनाश्च गत्वा ते प्रोचुः को भगवन्निह । नगर्यां पुण्यसंभारोपार्जको वर्तते जनः ॥ २२ ॥ सोऽन्यधाज्जीर्णश्रेष्ठीति जनोऽप्याख्यदसौ कथम् । पारितोऽभिनवेनान्त्यजिनो नानेन पारितः ॥ २३ ॥ वसुधाराऽप्यभिनवश्रेष्ठिनो मन्दिरेऽपतत् । स महापुण्यसंभारोपार्जकः कथमीश्वर ! ॥ २४ ॥ सोऽप्याख्यद्भावतः स्वामी जिनदत्तेन पारितः । उपार्जि चाच्युते कल्पे जन्मानेनाप्यतो भवात् ॥ २५ ॥ नाश्रौष्यद्दुन्दुभिध्वानं तादृग्भावस्तदा यदि । तर्ह्ययं केवलज्ञानं प्राप्स्यच्छ्यानान्तरं श्रितः ॥ २६ ॥ सम्यग्भावविहीनोऽभिनवश्रेष्ठी त्ववाप सः । वसुधारैहिकं किञ्चित्प्रभुपारणजं फलम् ॥ २७ ॥ भावतोऽभावतस्तीर्थकरपारणजं फलम् । तद्भुत्वा विस्मितो लोकोऽगमत् स्थानं निजं निजम् ॥ २८ ॥ विपद्य जिनदत्तोऽपि लब्ध्वा धाम दिवौकसाम् । मर्त्यजन्म च संप्राप्य क्रमान्मोक्षं प्रयास्यति ॥ २९ ॥ ध्यातो जिनः परोक्षेऽपि यदीत्यजनि शर्मकृत् । प्रत्यक्षं स्तुवतां पुण्यं ज्ञातुं कोऽलं नृणां ततः ॥ ३० ॥

॥ इति जिनदत्तश्रेष्ठिकथा ॥

गतमष्टमं देवद्वारं । अथ क्रमायातं गुरुस्वरूपद्वारं निरूपयति—

नव्यो गुरुः सुरतरुर्विहितामितर्द्धिर्यत्केवलाय कवलार्थिषु गौतमोऽभूत् ।
तापातुरेऽमृतरसः किमु शैत्यमेव, नाप्रार्थितोऽपि वितरत्यजरामरत्वम् ॥ १९ ॥

व्याख्या—गुरुर्गौतमादिर्नव्यो नवीनः सुरतरुः कल्पवृक्षः। नव्यत्वं विशेषणमुखेनाह—विहिता कृताऽमिताऽप्रमाणा ऋद्धिर्येन स तथा। यद्यस्मात् कारणाद्गौतमो गणभृत् कवलार्थिषु ह्री(ह्रै)रेयीकवलेष्वेषु साधुषु केवलाय केवलज्ञानायाभूत्। ननु वाञ्छितादधिकं गुरुः कस्मादप्रार्थितं ददौ ? नैवं, तस्यात्यन्तं परोपकारित्वात् कल्पवृक्षादप्यधिकोऽचिन्तितपूरकत्वाच्च। एतदेवोदाहरणेनाह—अमृतरसः तापातुरे पुरुषे किमु कथं शैत्यमेव शीतलतामेव वितरति ददाति ? किं तु अप्रार्थितोऽपि अयाचितोऽपि अजरामरत्वं जरामरणाभावं किमु न वितरति ? अपि तु वितरत्येव। इत्यक्षरार्थः। भावस्त्वयं कथयोच्यते—(गौतमस्वामिकथा)

जिनान् योऽष्टापदे नत्वोषा वसेदिह जन्मनि। स सिध्यतीति श्रीवीरोक्तं देवा जगदुर्मिथः ॥ १ ॥ तच्छ्रुत्वा गौतमो देववचनप्रत्ययात्तदा। निनंसुर्जिनपानष्टापदे त्वज्ञापयत् प्रभुम् ॥ २ ॥ प्रभुस्तापससंबोधं बुद्ध्वाऽथो भाविनं ततः। अष्टापदेऽर्हतो नन्तुमादिशद्गौतमं मुनिम् ॥ ३ ॥ हृष्टश्चारणलब्ध्याऽथ गौतमोऽष्टापदं ययौ। कोटिन्याद्यास्तमारोढुं तदाऽढौकन्त तापसाः ॥ ४ ॥ चतुर्थकृच्च कोटिन्य आर्जकन्दादिभोजनः। मुनिः सार्धं पञ्चशत्या प्रापाद्यां मेखलां गिरेः ॥५॥ षष्ठकृच्छुष्ककन्दादिपारणो दत्तकोऽपरः। प्रापान्यां मेखलां सार्धं पञ्चशत्या तपस्विनाम् ॥ ६ ॥ सेवालाख्योऽन्योऽष्टमकृच्छुष्कसेवालपारणः। तृतीयां मेखलां लेभे तावद्भिः सह तापसैः ॥ ७ ॥ तेऽक्षमा ऊर्ध्वमारोढुं तत्रास्थुर्यावदुन्मुखाः। गौतमं पीवराकारं तावदैक्षन्त हेमभम् ॥ ८ ॥ तेऽन्योन्यमूचिरे शैलं वयमित्थं कृशा अपि। आरोढुं नेशिनः स्थूल आरोक्ष्यत्येष तत्कथम् ॥ ९ ॥ इति तेषु प्रजल्पत्सु गौतमोऽष्टापदाचलम्। आरोहदभ्रवच्च नागदृश्य इव निर्जरः ॥ १० ॥

ते मिथः प्रोचिरे शक्तिः केयमस्य महामुनेः । एतस्यायातस्य शिष्या भविष्यामोऽखिला वयम् ॥ ११ ॥ गौतमोऽप्यगमत्तत्र नत्वा भरतकारिताः । प्रतिमाः श्रीजिनेन्द्राणां गुरुभक्तिसमाश्रितः ॥ १२ ॥ चैत्यान्निर्गत्य चाशोकद्रुमाधो वन्दितोऽमरैः । उपाविशच्च चिच्छेद सन्देहाँश्चाङ्गभाजिनाम् ॥ १३ ॥ युग्मम् ॥ अतीत्य गौतमोऽथो तां धर्मदेशनया निशाम् । भूधराकुत्तरन् प्रातस्तापसैस्तैः समैक्षत ॥ १४ ॥ तापसास्तं मुनिं प्रोचू रचिताञ्जलयो मुने । तव शिष्यीभविष्यामस्त्वं नो धर्मगुरुर्भव ॥ १५ ॥ तान् स्माह गौतमो वीरस्वामी मम गुरुर्वरः । गुरुः स एव वोऽप्यस्तु केवलज्ञानभासुरः ॥१६॥ अथोपरोधतस्तेषां दीक्षां श्रीगौतमो ददौ । यतिलिङ्गं देवता च सद्यः प्रमुदिता तदा ॥ १७ ॥ श्रीवीरसन्निधौ गन्तुं चेलुस्ते गौतमार्पिणा । कुञ्जरा इव विन्ध्याद्रौ यूथाधिपतिना समम् ॥ १८ ॥ अध्वन्येकत्र सङ्ग्रामे जिह्माकाले गणेश्वरः । पारणायेप्सितं किं वोऽद्यानयामीत्युवाच तान् ॥ १९ ॥ ह्री (ह्रै) रैयीत्युदिते तैस्तु गौतमो निजलब्धितः । पात्रे कृत्वा तां स्वकुक्षिपूर्त्तिमात्रामथानयत् ॥ २० ॥ गणाग्रणीर्जगादैतान्मुनयोऽत्र निषीदत । ह्री(ह्रै)रेय्या यूयमनया सर्वे कुरुत पारणम् ॥ २१ ॥ किं स्यादियत्या ह्री(ह्रै)रेय्या गुरुरेषोऽस्ति नो गुणी । ध्यात्वेति तेऽखिला भोक्तुमुपविष्टा महर्षयः ॥ २२ ॥ तान् सोऽक्षीणमहानसलब्ध्या सर्वानभोजयत् । पश्चात् स्वयं तु भुङ्क्ते स्म तेषां कृतचमत्कृतिः ॥ २३ ॥ दिष्ट्या वीरजिनो लेभेऽस्मानिर्धर्मगुरुर्महान् । पितृतुल्यो मुनिश्चायं बोधिरप्यतिदुर्लभा ॥ २४ ॥ कृतपुण्या वयं बाढमिति भावयतां हृदि । सेवालभोजिनामासीददतामेव केवलम् ॥ २५ ॥ पश्यतां प्रातिहार्यादि दत्तादीनां तु केवलम् । कोटिन्यादीनां श्रीवीरं जज्ञे ज्ञानं समुज्ज्वलम् ॥ २६ ॥ विभुं प्रदक्षिणीकृत्य तेऽगुः केवलपर्षदि । वन्दध्वं वीरतीर्थेशमिति तान् गौतमो जगौ

॥ २७ ॥ मा कार्षीर्वत्स केवल्याशातनामित्यवज्ञिनः । मिथ्याडुष्कृतपूर्वं तान् गौतमोऽक्षमयत्ततः ॥ २८ ॥ दध्यौ श्रीगौतमो जूयो गुरुकर्माऽत्र जन्मनि । नाहं सेत्स्याम्यमी धन्याः सर्वे मद्दीक्षिता अपि ॥ २९ ॥ तदा तमन्यधात् स्वाम्यसमाधिं मा कृथा वृथा । मयि मुक्तिं गते वत्स ज्ञानमाप्स्यसि केवलम् ॥ ३० ॥ ततो हृष्टो गणाधीशः प्रभौ मुक्तिमिते सति । आसाद्य केवलज्ञानं शिवश्रियमशिश्रियत् ॥ ३१ ॥ इति बुध्वा बुधाः सम्यग्गुरुं सुरतरुं नवम् । महर्द्धिदानतो नक्त्या प्रभजध्वं तमेव हि ॥ ३२ ॥

॥ इति श्रीगौतमस्वामिकथा ॥

पुनरत्रैव विशेषमाह—

कुबोधमतयोऽन्नितः कुगुरवो जमाल्यादिवत्, पुनः क्वचन वज्रवत्सुगुरवोऽमला जन्मतः ।
करीरपिचुमन्दवन्न घनसारसच्चन्दना, घना न च खरोष्ट्रवज्जायतुरङ्गनऽहिपाः ॥ ३० ॥

व्याख्या—कुबोधे कुत्सितोपदेशदाने मतिर्बुद्धिर्येषां ते कुबोधमतयः । ईदृशाः कुगुरवो जमाल्यादिवत् अन्नितः सर्वतो बहवः सन्ति । पुनः तथा वज्रवत् वज्रस्वामिसदृशाः सुगुरवः क्वचन क्वापि स्थाने सन्ति, न सर्वत्र । किंरूपाः ? जन्मतो जन्मन आरभ्य अमला निर्मला अखण्डितशीलाः । एतदेवाह—करीरपिचुमन्दवत् करीरनिम्बादिवत् घनसारसच्चन्दनाः कर्पूर-

गोशीर्षचन्दनवृक्षा न घना बहवः सन्ति। च पुनः खरोष्ट्रवत् गर्दभक्रमेलकवत् जयतुरङ्गभद्रद्विपा जयदायितुरङ्गा जात्यश्वा भद्रजातिगजा न सन्ति घना इति भावना सुखभा । इत्यक्षरार्थः । भावार्थस्त्वयं कथाव्याभाविर्भाव्यते (जमालिवक्तव्यस्वामिकथाद्वयम्)—

जमालिनामा जामाता जामेयश्चरमार्हतः। प्रभोर्देशनया बुद्धः प्रियदर्शनया समम् ॥ १ ॥ पञ्चशत्या क्षत्रियाणां जमालिः प्राव्रजत्सह । स्त्रीसहस्रयुता स्वामिपुत्र्यपि प्रियदर्शना ॥ २ ॥ अध्यैष्टैकादशाङ्गानि जमालिर्विहरन् क्रमात् । सहप्रव्रजितानां तमाचार्यं चकृवान् विभुः ॥ ३ ॥ तपोऽतप्यत तीव्रं स व्यहार्षीच्चार्हता सह । चन्दनामनुयान्ती सा व्यहरत् प्रियदर्शना ॥ ४ ॥ अथ प्रभुं प्रणम्योचे जमालिस्त्वदनुज्ञया । विहरामि विहारेणानियतेन जिनेश्वर ॥ ५ ॥ भाव्यनर्थं जिनो ज्ञात्वा श्रीवीरो ज्ञानचक्षुषा । नादाद्युत्तरमेतस्य पृच्छतोऽपि पुनः पुनः ॥ ६ ॥ अनिष्क्रमनुमतं जमालिरिति बुद्धितः । प्रभुपार्श्वान्निर्गत्य व्यहार्षीत्सपरिच्छदः ॥ ७ ॥ श्रावस्तीं विहरन् प्राप्तः सोऽथान्येद्युर्ज्वरार्दितः । सोऽसहः स्थातुमासीनोऽन्तिषत्साधूनदोऽन्यधात् ॥ ८ ॥ संस्तारकं मे विधत्ताशक्तस्येत्यथ साधवः । कर्तुमारेभिरे ते तं विनीता गुरुभक्तितः ॥ ९ ॥ सोऽथ ज्वरार्दितोऽत्यन्तं मुनीनूचे मुहुर्मुहुः । संस्तरः संस्तृतो नो वा तेऽप्यूचुः संस्तृतो ह्ययम् ॥ १० ॥ उत्थायातोंऽगमत्सोऽथ क्रुधः साधून् जगाद च । संस्तीर्यमाणेऽतो मिथ्या किमुक्तं संस्तृतः खलु ॥ ११ ॥ क्रियमाणं कृतमित्यदुष्टं तैः स इतीरितः । स्माहानेनैव भ्रान्ताः स्मो ज्ञातं तत्त्वमिदं चिरात् ॥ १२ ॥ क्रियमाणं कृतं नैव कृतमेव कृतं पुनः ।

१ शिष्यसाधून्. २ अस्मिन् संस्तारके संस्तीर्यमाणे सति.

क्रियमाणं कृतं यच्च ब्रूतेऽर्हंस्तन्न युज्यते ॥ १३ ॥ बाधोऽध्यक्षेण यत्कार्ये पूर्वापूर्वक्षणैः कृते । प्रारम्भेऽपि कृतमिति गदितुं युज्यते कथम् ॥ १४ ॥ तस्यैव वस्तुता यस्यार्थक्रियायां समर्थता । वस्तुन्याद्यक्षणोत्पन्ने कथं कथयतास्ति[1] नोः ॥ १५ ॥ आरंभेऽपि कृतमिति यदि शेषक्षणेषु तत् । अनवस्था प्रसज्येत कृतस्य करणे ध्रुवम् ॥ १६ ॥ कृतमेव कृतं यत्तदेव सङ्गतिमङ्गति । नामापि दीयते न ह्याजातपुत्रस्य केनचित् ॥ १७ ॥ निर्दोषः खलु मत्पक्षो मुनयः प्रतिपद्यताम् । न चोक्तमिति गृह्येत युक्तियुक्तं हि गृह्यते ॥ १८ ॥ यः सर्वविदिति ख्यातः स किं मिथ्या वदेदिति । भैवं सोऽपि ब्रवीत्येव महान्तोऽपि स्खलन्ति यत् ॥ १९ ॥ मुक्तमर्यादमेवं तं जल्पन्तं कुपिता जगुः । स्थविरा रे महापाप ! किं ब्रवीषि प्रमत्तवत् ॥ २० ॥ न वदन्त्यन्यथा रागविद्वेषरहिता जिनाः । नैवाध्यक्षविरुद्धत्वादिदोषोऽपि च तद्गिराम् ॥ २१ ॥ चेन्मुख्ये समये वस्तु निष्पन्नं गद्यते न तत् । समयाविशेषात्तस्योत्पत्तिर्न समयान्तरे ॥ २२ ॥ वस्तुनो लक्षणं यच्चार्थक्रियाकारितादिकम् । आख्यज्ज्ञानोपयोगेन तदप्यव्यभिचारि वै ॥ २३ ॥ तथाहि तादृशं लोकैर्वस्तूच्येतादितोऽपि हि । किं करोषीति पृष्टः स ब्रूयात्तु ज्ञाव्यभिख्यया ॥ २४ ॥ करणस्यानवस्थानं पूर्वकालकृते हि यत् । मिथ्या तदपि वा कार्यान्तरसाधनतोऽपि च ॥ २५ ॥ युक्तायुक्तविवेकः कस्त्वादृशां चर्मचक्षुषाम् । संबोभवीति यद्युक्तियुक्तं गृह्येत ते वचः ॥ २६ ॥ सर्ववित्केवलालोकालोकिताखिललोककः । वीरप्रभुः प्रमाणं नो युक्त्ययुक्ती वृथा तव ॥ २७ ॥ यद्भवीषि त्वमज्ञानान् महान्तोऽपि स्खलन्त्यदः । सर्वं विलापमात्रं हि तव मोहमहोदधेः ॥ २८ ॥ क्रियमाणं कृतमिति साधु सर्वविदोदितम् ।

१ कथमस्ति सा समर्थतेति शेषः तत् यूयं कथयतेत्यन्वयः.

नो चेद्राज्यं परित्यज्य तद्गिरा प्राव्रजः कथम् ॥ २९ ॥ तद्यागदूष्या दूष्या न प्रायश्चित्तं गृहाण च । प्रभोः पार्श्वे निजं जन्म दीक्षां च मा निरर्थय ॥ ३० ॥ श्रद्धत्ते योऽक्षरमपि नार्हतां स भवाम्बुधौ । मज्जत्येव कथं तत्त्वं भविता कर्मणाऽमुना ॥ ३१ ॥ इत्यादि स्थविरैरुक्तो नैवोत्तरयितुं क्षमः । जमालिः स्वमतान्नैव निवृत्तो मौनमाश्रयत् ॥ ३२ ॥ तं हित्वा स्वामिनं जग्मुः स्थविराः कुमताश्रितम् । केचित् केऽपि स्थितास्तत्र महामोहवशीकृताः ॥ ३३ ॥ पत्युः स्नेहेन व्रतिनीसहस्रसमलङ्कृता । जमालिशासनं साऽपि शिश्राय प्रियदर्शना ॥ ३४ ॥ सर्वज्ञोऽहमिदं जल्पन् विहर्तुं क्षितिमण्डले । प्रवृत्तः प्राप श्रावस्तीं नगरीं गुर्वहङ्कृतिः ॥ ३५ ॥ तत्र ढङ्ककुलालेन बोधिता प्रियदर्शना । साधवश्च प्रभुं भेजुः श्रीवीरं विगतभ्रमाः ॥ ३६ ॥ ततो जमालिरेकाकी प्रतार्य कुमतान् जनान् । मृत्वाऽन्तेऽनशनी षष्ठे कल्पे किल्बिषिकोऽभवत् ॥ ३७ ॥ इत्थं जमालिवत्सन्ति महामोहविमूढिताः । बहवः साधवोऽद्यापि कदाग्रहगृहाणि च ॥ ३८ ॥

॥ इति जमालिऋषिकथा ॥

॥ अथ वज्रस्वामिकथा ॥

श्रीतुम्बवनसन्निवेशे धनगिरिश्रेष्ठी । सुनन्दा तस्य भार्या । तत्कुक्षौ श्रीआषाढपदे श्रीगौतमस्वामिप्रतिबोधितस्तिर्यग्जृंभकदेवजीवः स्वर्गाच्च्युत्वाऽवातरत् । तदा श्रीसिंहगिरिगुरोर्धर्मं श्रुत्वा धनगिरिः प्रव्रजितः । क्रमेण सुनन्दायाः पुत्रो जातः । स सूतिकागृहे मिलितस्त्रीजनमुखात् पितृप्रव्रज्याग्रहणं श्रुत्वा संजातप्राग्भवजातिस्मृतिरचिन्तयत्—"अहमपि कदा प्रव्रजिष्यामि ?" इति मत्वा मातुरुद्वेजनमेव ह्रुटेरुपायं ज्ञात्वा चाहर्निशं रुरोद । मात्रा स्तन्यपानादिना रक्षितोऽपि न

तिष्ठति । एवं षण्मासा जाताः । इतश्च तत्र श्रीसिंहगिरिगुरुराययौ । तेन गोचरचर्यायां प्रविशन् धनगिरिरुक्तः—"अद्य सचित्तमचित्तं वा लभ्यमानमविमर्शं सर्वं ग्राह्यं" । तथेति प्रतिपद्य धनगिरिर्गोचरं ग्राम्यन् सुनन्दागृहं गतः । तयाऽति-दुःखदग्धयाऽभाणि—"अनेन तव पुत्रेणाहर्निशं रुदता गाढं खेदिताऽस्मि, तत एनं स्वं पुत्रं गृहाण" । ततस्तेनोक्तं—"सुतं साम्प्रतं दत्से परं पश्चात् झगटकं मा कृथाः" । तयेति दुःखितयोक्तं—"न मे भवताऽनेन च प्रयोजनमिति" । तत-स्तेन बहून् जनान् साक्षिणः कृत्वा धनगिरिणा गृहीतो बालः, आनीय गुरुभ्यो दत्तः । गुरुभिरतिभारेण वज्र इति नाम दत्तं । साध्वीभ्यस्तं दत्त्वा गुरवोऽन्यत्र विहृताः । साध्व्युपाश्रये स्थितः स बालः । तत्सौभाग्यरञ्जिताभिः श्राविकाभिः पुत्रादधिकप्रीत्या वर्धितः । साध्वीमुखात्कर्णाहेडकेन तेनैकादशाङ्ग्यधीता । अन्यदा गुरवस्तत्रायाताः, तदा सुनन्दया पुत्रार्थं झगटको मंक्षितः । ततो राजकुले व्यवहारे जाते राज्ञोक्तं—"पुत्र एव प्रमाणं, यत्र पुत्रो याति तस्यैवास्तु" । ततः पूर्वं सुनन्दया सुखादिकाभिः प्रलोभितोऽपि नायातः । ततो धनगिरिणा रजोहरणे दर्शिते सहसोत्थाय तेन तद्गृहीतं । सङ्घे जयजयारवो जातः । ततोऽष्टवार्षिको वज्रः सुरसङ्घकृतमहामहैर्गुरुभिर्दीक्षितः । तदा सुनन्दयाऽपि वैराग्याद्दीक्षा गृहीता । अथान्यदा गुह्यकैर्वर्षति घने परीक्षार्थं सार्थं विरचय्य भोज्यविधिं विधाय वज्रो निमन्त्रितो विहरणार्थं । वज्रेण च द्रव्यादिभिस्तान् देवान् ज्ञात्वा तत्पिण्डो न गृहीतः । तैस्तुष्टैर्गगनगामिनी विद्या दत्ता । अन्यदा गुरुषु बहि-र्भूम्यां गतेषु चापट्यात्साधूनामुपधीन्मेलयित्वा तत्तन्नामग्राहं वाचनां दत्तवान् । गुरुभिः समागतैः सर्वं श्रुतं । क्षणं

१ कलहम्.

द्वारे स्थित्वा हृष्टैः स्वं ज्ञापितं । तेनापि यथास्थानमुपधीन्मुक्त्वा द्वारमुद्घाटितं । ततो वज्रस्वरूपमन्यसाधूनां ज्ञापनाय गुरवोऽन्यत्र विहृताः । साधुभिरुक्तं—"भगवन्नस्माकं को वाचनां दास्यति ?" । गुरुभिरूचे—"वज्रः" । ततस्तौर्विनीतैस्तथेति प्रपेदे । मध्याह्ने साधुभिर्निषद्याया निवेशितो वज्रः तेभ्य एकादशाङ्गीवाचनामदात् । हृष्टास्ते स्तोककालेन बहुवाचनात् । क्रमेणागता गुरवः । साधुभिर्यथास्थिते विज्ञप्ते योगोद्वहनं विधाय वाचनाचार्यः कृतो वज्रः । शेषश्रुतपाठार्थं श्रीभद्रगुप्तसूरिपार्श्वे प्रेषितः । तैरपि निशाशेषे "मत्पात्रं पयसा पूर्णं कोऽपि पीतवान्" इति स्वप्नं लब्ध्वा प्रातः स्वशिष्याणामुक्तं—"कोऽपि दशपूर्वश्रुताधीताऽद्य समेष्यतीति" । तावता वज्रः समागात् । तैस्तुष्टैः सर्वं श्रुतं पाठयित्वा तद्गुरुसमीपे प्रहितो वज्रः । तैरप्याचार्यपदं दत्तं । ते श्रीवज्रस्वामिनो जिनशासनं प्रभाव्य दिवं ययुः ॥

॥ इति वज्रस्वामिकथा ॥

व्याख्यातमिदं नवमं गुरुद्वारं । अथ क्रमायातं धर्मं निरूपयन्नाह—

विज्ञाय धन्या जिनधर्ममर्म, रज्यन्ति शय्यंभववन्न जाड्ये ।
पीत्वा सिताभावितधेनुदुग्धं, को वाम्लतक्रार्कपयांसि पश्येत् ॥ २१ ॥

व्याख्या—धन्याः कृतपुण्याः पुरुषा जिनधर्मस्य मर्म रहस्यं ज्ञात्वा जाड्ये मिथ्यात्वे न रज्यन्ति न रागं कुर्वन्ति । किंवत् ? शय्यंभववत् यथा श्रीशय्यंभवः अहो कष्टमहो कष्टमित्यादिना मुनेर्वचसा जिनधर्ममर्म ज्ञात्वा जाड्ये यागादि-

कार्ये न रज्यति स्म । एतदेवाह—सिताज्ञावितं शर्करामिश्रितं धेनुदुग्धं पीत्वा अम्लतक्रार्कपयांसि कः पश्येत् ? अपि तु न कोऽपीत्यर्हरार्थ्यः । कथा चेयम्—

शय्यंभवकथा—

पुरे राजगृहे जज्ञे ज्ञद्दः शय्यंभवाभिधः । धर्मार्थं यजते यज्ञान् गृहध्र्यज्ञानहर्षितः ॥ १ ॥ श्रुतश्च प्रभवस्वामी मुनिं निजपदोचितम् । स्वगच्छेऽवीक्षमाणोऽथ श्रुतदृष्टिं बहिर्ददौ ॥ २ ॥ ज्ञात्वा शय्यंभवं सौवपदयोग्यं गुरुस्ततः । यज्ञे साधुद्वयं दक्षं प्रैषीत्तद्बोधहेतवे ॥ ३ ॥ अहो कष्टमहो कष्टं तत्त्वं न ज्ञायते परम् । ततस्तत्र गत्वा चेत्युक्त्वा पश्चाद्वलितं रंहसा ॥ ४ ॥ सोऽस्ति तत्त्वं किमप्यन्यदिति चेतसि चिन्तयन् । न मृषावादिनो जैनाश्चेत्यपृच्छन्निजं गुरुम् ॥ ५ ॥ किं तत्त्वमिति सोऽप्याख्यत्तत्त्वं यज्ञक्रिया ननु । मिथ्या तद्वचनं जानन् क्रुद्धः शय्यंभवो गुरौ ॥ ६ ॥ ततः कृपाणमाकृष्य गुरुं शय्यंभवोऽन्यधात् । वद तत्त्वं न चेच्छेत्स्ये शिरोऽहं तेऽसिनाऽमुना ॥ ७ ॥ तत्त्वं वाच्यं शिरश्छेदे इति ज्ञातश्च तद्गुरुः । श्रीशान्तिप्रतिमां यज्ञस्तम्भाधःस्थापितां ददौ ॥ ८ ॥ तया शय्यंभवो बुद्धो मिथ्यात्वं स्वक्रमागतम् । हित्वा प्रव्रज्य चाध्यैष्ट द्वादशाङ्गीं क्रमेण सः ॥ ९ ॥ स्थापितः सोऽथ चात्मीये पदे प्रभवसूरिभिः । श्रीमान् शय्यंभवः सूरिर्विजहार धरातले ॥ १० ॥ श्रुतश्च प्रव्रजन् पत्नीमन्तर्वत्नीं[1] जहौ स याम् । तया मनक इत्याख्यः सुषुवे सत्तमः सुतः ॥ ११ ॥ सोऽथाष्टवार्षिकः क्रीडन् सवयोभिः स्तनन्धयैः । अपितृक इति चोचे तज्जकैर्नर्मकर्मणि ॥ १२ ॥ इति ह्रीणेन तेनाथ स्वाम्बा-

१ गर्भवतीम् .

ऽप्रच्छ्युपरोधतः । सातिदुःखजराक्रान्ताऽप्यगदङ्गदस्वरम् ॥ १३ ॥ यजमानो निजं यज्ञं वत्स त्वज्जनको वशी । एत्य श्वेताम्बराऱ्यां स किञ्चिदुक्त्वा च धूर्तितः ॥ १४ ॥ सोऽथ मां गुर्विणीं त्यक्त्वा गत्वा च गुरुसन्निधौ । प्रव्रज्यामाददे वत्स मन्दभाग्या करोमि किम् ॥ १५ ॥ स त्वत्पिताऽधुना वत्स जातः श्वेताम्बराग्रणीः । श्रूयते पाटलीपुत्रपत्तने मुनिसत्तमः ॥ १६ ॥ जननीं सोऽप्यनुज्ञाप्य जनकं द्रष्टुमुत्सुकः । आजगाम धियां धाम पाटलीपुरगोपुरे ॥ १७ ॥ सूरींस्तत्रागतानूचे क्वास्ति शय्यंभवो मुनिः । तेऽपि श्रुतोपयोगेन विजज्ञुस्तं निजाङ्गजम् ॥ १८ ॥ ततो वसतिमानीय स तैः प्रव्राजितः सुतः । तस्य षाण्मासिकं चायुरवशिष्टमबुध्यत ॥ १९ ॥ स तच्चिन्तचिकीः सूरिर्दशाङ्ग्याः समुधृतम् । दशवैकालिकं नाम कृत्वा शास्त्रमपाठयत् ॥ २० ॥ सोऽधीतशास्त्रः पूर्णायुर्मृत्वाऽभूद्भासुरः सुरः । चक्रुस्ते सूरयोऽप्यश्रुपातं निःपातकास्ततः ॥ २१ ॥ ताँश्च तन्मुनयः प्रोचुर्यदि स्वामिन् भवादृशाः । सम्मोहरहसा ग्रस्तास्तत्त्व स्थास्यति धीरता ॥ २२ ॥ सोऽप्याख्यदश्रुपातोऽयं मोहदुःखोद्भवो न मे । किं तु विस्मयसंपन्नः शीतलत्वाच्चिन्त्यताम् ॥ २३ ॥ विस्मयोऽत्र मृतौ को व इत्युक्तस्तैर्गुरुर्जगौ । मत्सूनुनाऽमुनाऽसाध्यचिरात् स्वर्गः सविस्मयः ॥ २४ ॥ ते जगुश्चेत्स वः सूनुः किं नो न ज्ञापितः प्रभो । तेऽप्याहुर्ज्ञापने तस्यात्मनः कार्यं न सिध्यति ॥ २५ ॥ ततः समाधिनाऽऽपाद्य व्रतं शय्यंभवो भुवि । चिरं प्रबोध्य भव्यालीं मृत्वा प्रान्ते दिवं ययौ ॥ २६ ॥ एवं बुध्वा बुधाः सम्यग्जिनधर्मं सुशर्मदम् । मा मिथ्यात्वे मतिं स्वीयां क्वचिन्मलिनयन्तु भोः ॥ २७ ॥

॥ इति शय्यंभवकथा ॥

विवेकिनां धर्मेऽनुरागित्वमुक्त्वाऽविवेकिनां धर्मे प्रमादित्वमाविर्भावयति—

लब्धे जरुः कोऽपि हितेऽपि धर्मे, स्तौत्यक्षसौख्यानि शशीव राजा ।
न पङ्कजं भेक उपैति पङ्कं, क्रमेलको नाम्रमियर्त्ति निम्बम् ॥ २२ ॥

व्याख्या—कोऽपि जरो मूर्खो हितेऽपि धर्मे लब्धे सति अक्षसौख्यानि पञ्चेन्द्रियसुखानि स्तौति वर्णयति । क इव शशिराज इव । अत एवाह—भेको दर्दुरः पङ्कजं कमलं नोपैति न गच्छति, किं तु पङ्कं कर्दममुपैति । तथा क्रमेलक उष्ट्र आम्रं सहकारं नेयर्ति न गच्छति, किं तु निम्बमियर्त्ति । भावना सुलभेत्यक्षरार्थः । कथा चेयम्—

शशिराजकथा—

रमामुक्ताभताशुक्तिर्नाम्ना शुक्तिमती पुरी । स्वप्नेऽप्यगोचरा यत्र जनानां दुःखसंकथा ॥ १ ॥ तादृशान्यायकृद्भोका-भावेन क्षात्रजोऽभवन् । महाव्रतधरा दाण्डपाशिका अप्यहर्निशम् ॥ २ ॥ तत्राभवद्वशी भूपः प्रतापाक्रान्तविष्टपः । सूरस्तस्यानुजो जज्ञे युवराजो गुणाधिकः ॥ ३ ॥ उद्याने रममाणान्यां ताभ्यामैक्षन्त चान्यदा । व्रतिसन्ततिमध्यस्थाः शीलसागरसूरयः ॥ ४ ॥ ततस्तौ मुदितौ सूरिवरान्नत्वा निषेदतुः । सूरयोऽप्यदिशन् धर्मं धर्मलाभपुरस्सरम् ॥ ५ ॥ मानुष्यं दुर्लभं लब्ध्वा धर्मं कुर्यान्न यो जरुः । कृच्छ्राच्चिन्तामणिं प्राप्तं प्रमत्तोऽब्धौ स पातयेत् ॥ ६ ॥ स्वर्गापवर्गसंसर्ग-मर्जयन्ति नृजन्मना । धन्यास्तुल्येन चाधन्या महानरकवेदनाम् ॥ ७ ॥ तद्युवामपि मानुष्यं दुष्प्रापं प्राप्य पुण्यतः । सुकृतं कुरुतं तद्यद्विमुक्तिः स्वयं भजेत् ॥ ८ ॥ ततः सूरनृपो बुद्धो जिनधर्मं प्रपन्नवान् । शशी तु बोध्यमानोऽपि

नाबोधि विषयी नृशम् ॥९॥ अथ सूरस्तपस्तीव्रं तप्यमानो दिवानिशम् । अन्यदा भ्रातरं प्राह तच्चितैषी शुभाशयः॥१०॥ भोगा भुक्ता न के भ्रातः स्वर्गे वार्धिजलोपमाः । तैश्च तृप्तोऽसि नो भोगैस्तृप्तिस्तुच्छैर्नृणां तु का ॥ ११ ॥ ततो वैषयिकं सौख्यं गोष्पदाम्भ्योऽपि तुच्छकम् । हित्वा चर महाशर्मप्रदं धर्मं सहोदर ॥ १२ ॥ शशी स्मित्वाऽथान्यधत्त भ्रातः प्राप्तं सुखं त्यजेत् । को जनोऽप्राप्तसौख्यस्य हेतवे परजन्मनः ॥ १३ ॥ वरं राज्यं वरं भोज्यं वरं वस्त्रं वराङ्गना । भुज्यमानमिदं शर्मप्रदं धर्मो न कर्हिचित् ॥ १४ ॥ क्षीरखण्डादिकं मिष्टं दृष्टं जन्मापरं हि कैः । तद्भुञ्जानस्य मे भोगान्मान्तरायं विधेहि भोः ॥ १५ ॥ भ्रातस्त्वं यदि दक्षोऽसि तत्त्वं कष्टय मा मुधा । मा हारय च संप्राप्तमीदृशं यौवनं धनम् ॥१६॥ खिन्नः सूरस्ततो दध्यौ बहुकर्माऽस्त्ययं ननु । तत्किमस्योपदेशेन स्वहितं चाचराम्यहम् ॥ १७ ॥ इत्यसावात्तचारित्रो मुक्तसर्वपरिग्रहः । समाधिना विपद्यान्ते सूरः स्वर्गं जगाम च ॥ १८ ॥ शशी तु विषयसौख्यतृष्णगेव विपन्नवान् । जगाम नरकं नानावेदनासादनं कुधीः ॥ १९ ॥ बुध्ध्वेत्यवधिना सूरदेवो देवर्द्धिमद्भुताम् । तस्मै स्वभ्रगताय स्वां तत्र गत्वाप्यदर्शयत् ॥ २० ॥ तद्दर्द्धिं वीक्ष्य शश्याह पश्चात्तापपरोऽथ तम् । भ्रातरद्यापि मद्देहं भृशं छेदय भेदय ॥ २१ ॥ यथैतद्वेदनावृन्दवार्द्धिमुत्तीर्य सम्प्रति । सुखी स्यामथ सूरोऽवक् तं सगद्गदया गिरा ॥ २२ ॥ युग्मम् ॥ निरात्मकेन किं तेन वपुषा कष्टितेन भोः । अकष्टयिष्यश्चेत्तत्प्राग्नापतिष्योऽत्र दुर्गतौ ॥ २३ ॥ तद्दुःखं शश्यथो सेहे देहे भूत्वा समाहितः । तद्दुःखदुःखितो बाढं सूरः स्वास्पदमासदत् ॥ २४ ॥ इति केचिन्नराः कर्मपारवश्यादिहार्हते । धर्मे प्रमाद्य लब्धेऽपि विषीदन्ति त्वधोगताः ॥ २५ ॥

॥ इति शशिराजकथा ॥

दशमं धर्मद्वारं व्याख्यातमिदं । सत्यामेव शक्तौ धर्मः कर्तुं शक्यत इति शक्तिमाह—

अष्टाब्दोऽपि तथाविधव्रततपःस्वाध्यायकृत्यासहो-
प्युच्चैर्ध्यानबलेन कर्मरिपुभिर्मुक्तोऽतिमुक्तो मुनिः ।
शक्त्या गच्छत तन्न किं हितपथं मुक्त्वा प्रमादोत्तरं,
श्रूयन्ते च मदालसातनुजुवो बाल्येऽपि योगोज्ज्वलाः ॥ २३ ॥

व्याख्या—अतिमुक्तनामा मुनिः साधुरष्टाब्दोऽपि अष्टवार्षिकोऽपि कर्मरिपुभिः कर्मवैरिभिर्मुक्तस्त्यक्तः । केन कृत्वा ? उच्चैर्ध्यानबलेन शुक्लध्यानशक्त्या केवलज्ञानमापेत्यर्थः । किंरूपोऽपि ? तथाविधव्रततपःस्वाध्यायकृत्यासहः तथाविधान्युग्राणि व्रतान्यहिंसादीनि तपांसि च मासक्षपणादीनि स्वाध्याय आचाराङ्गादिपाठः तेषां कृत्ये कार्येऽसहोऽसमर्थः लघुवयस्त्वात् । तत्तस्मात् कारणात् हे भविकलोकाः प्रमादोत्तरं मुक्त्वा विद्यमानया शक्त्या शरीरादिसामर्थ्येन हितपथं धर्ममार्गं किं न गच्छत । ननु बाल्ये वयसि अज्ञानवशाद्धर्मो विधातुं न शक्यते इत्याशङ्कां निरस्यति—च पुनर्मदालसातनुजुवो मदालसापुत्रा लघुकर्मत्वाद्बाल्ये शैशवेऽपि योगोज्ज्वलाः श्रूयन्ते योगीन्द्रा निशम्यन्त इति वृत्ताक्षरार्थः । कथा चेयम्—

(अतिमुक्तकमुनिकथा)

श्रावस्त्यां पुरि सश्रीकः श्रेष्ठी श्रेष्ठिशिरोमणिः। रत्नादित्याख्यया तस्य शस्यः पुत्रोऽतिमुक्तकः॥ १॥ स्वल्पकर्मत्वतस्तस्य शैशवेऽपि विरागता। दृढाऽभूत् प्राव्रजच्चाष्टाब्दोऽपि शीलन्धराङ्घ्रिोः॥ २॥ बहिर्भूमौ जगामाथ सोऽन्यदा सूरिभिः सह। सूरयोऽगुः पुरीषाद्युत्सर्जनाय वनान्तरे॥ ३॥ क्रीरुन् कच्चलिकां क्षुल्लः सरस्यां प्राक्षिपत् क्वचित्। दृष्ट्वा तरन्तीं तां चावग् मम नौस्तरतीत्यहो॥ ४॥ क्रीरुन्तमिति तं वीक्ष्य सूरयः परुषाक्षरम्। जगू रे वत्स किमियं चक्रेऽम्नोमृद्विराधना॥ ५॥ इति संबोध्य वसतिं प्राप्तास्तं तेऽवदन् पुनः। वत्सेर्यापथिकी सम्यक् प्रतिक्रम्या विराधना॥ ६॥ क्षुल्लकोऽथ प्रतिक्रामन्नप्रमत्तः शुभाशयः। दगमट्टीति वदन् प्राप शुक्लध्यानेन केवलम्॥ ७॥ एवं चेत्तेन बालेनापि यत्नो विहितो धृषे। तत्प्राप्य शक्तिसामर्थ्यौ माऽर्हन्धर्मे प्रमाद्यत॥ ८॥

॥ इति अतिमुक्तकमुनिकथा॥

अथ मदालसाकथोच्यते—

काञ्चनश्रीसमाकीर्णे पुरे काञ्चननामनि। राजा क्रतुध्वजो जज्ञे रूपेण मकरध्वजः॥ १॥ राज्ञी मदालसा तस्य प्रिया प्रणयशालिनी। यद्रूपनिर्जिता नाकिनार्यो जग्मुः सुरालयम्॥ २॥ शरीरयोरिवान्योऽन्यं तयोर्नेदो बभूव न। अतिप्रणययोगेन नृशं मानसयोः क्वचित्॥ ३॥ समं क्षमाभुजा भोगान् भुञ्जानाथ मदालसा। रविं प्राचीव भास्वन्तं सूनुमेकमजीजनत्॥ ४॥ मुदितेन ततः पित्रा चक्रे जन्ममहो महान्। संपद्यते न कस्याङ्गजन्मा हर्षप्रकर्षकृत्॥ ५॥

---

१ धर्मे.

पालनस्थः स बालोऽथ यदा रोदिति सुन्दरः । तदा मदालसा प्राहान्दोलयन्तीति तं सुतम् ॥ ६ ॥ मृत्योर्बिभेषि किं बाल स च प्रीतं न मुञ्चति । अजातं नैव गृह्णाति कुरु यत्नमजन्मनि ॥ ७ ॥ तस्यार्थं स तसो ध्यायन् जातवैराग्यरङ्गकः । शिशुर्न रोदिति सुखं तिष्ठति प्रतिवासरम् ॥ ८ ॥ अष्टवार्षिक एवासौ गार्हस्थ्यं तु विरागवान् । त्यक्त्वा तपस्यां जग्राह चकार च महातपः ॥ ९ ॥ बाल्येऽपि मदालसया बोधिताः सप्त सूनवः । एवमेव बभूवुश्च ते सर्वेऽपि तपस्विनः ॥ १० ॥ एवं केचिन्नराः कर्मतौल्यतः शैशवेऽपि हि । प्रबुद्धाः कुर्वते धर्मं लभन्ते चोत्तमां गतिम् ॥ ११ ॥

॥ इति मदालसासुतकथा ॥

तथा केचित्तिर्यञ्चोऽपि शक्तिरहिता अपि धर्मं चक्रुश्चेत्तर्हि शक्तिमता धर्मे न प्रमाद्यमित्याह—

शीलं तपश्च बलदेवमुनिश्चरित्वा, दानं प्रदाय रथकृन्त्रितयेऽप्यशक्तः ।
एणो मुदा तदनुमोदनया सुरोऽभूद्योगाद्धि सिद्धिमगमच्चतुरङ्गपादः ॥ २४ ॥

व्याख्या—बलदेवमुनिः शीलं मैथुनविरतिं तपश्च चरित्वा सेवित्वा सुरोऽभूत् । रथकारो दानं प्रदाय सत्पात्राय दानं वितीर्य सुरोऽभूत् । एणो हरिणो दानावसरसमीपस्थः त्रितयेऽपि शीले तपसि दाने चाशक्तोऽसमर्थः सन् तदनुमोदनया बलदेवतपोरथकारदानप्रशंसया सुरोऽभूत् । हि यस्मात्कारणात् चतुरङ्गपादः पुमान् योगादष्टविधात् ध्यानविशेषात् सिद्धिं मुक्तिमगमत् सिद्धोऽभूदित्यर्थः । तस्मात्सत्यां शक्तौ धर्मः कार्य इत्यर्थः । कथा चेयम् (बलदेवकथा)—

द्वैपायनेन दग्धायां द्वारकायां तथा मृते । अच्युते प्राव्रजत् पूर्वमित्रसंबोधितो बलः ॥ १ ॥ तपोऽग्निना दहन् कर्म-

द्रुमश्रेणिं क्षमातले । विरहन् श्रीबलदेवः क्रमाज्जीतार्थतां गतः ॥ २ ॥ कदाचिन्नगरे क्वापि पारणाय व्रजन्मुनिः । कयाचित् कूपकण्ठस्थकामिन्या ददृशेऽथ सः ॥ ३ ॥ तद्रूपमसरूपं सा नृशं वीक्ष्याथ मोहिता । घटस्थाने शिशुं सूनुं बद्ध्वा कण्ठेऽङ्घ्रिपञ्जले ॥ ४ ॥ तद्वीक्ष्य ऋषिराख्यत् स किमेतत् क्रियते शुभे । श्रुत्वा बुद्ध्वा शिशुं साम्बुमध्यात्तु निरसारयत् ॥ ५ ॥ मुनिर्दध्यावहो धिङ्मे रूपमीदृगनर्थकृत् । जज्ञे तपोदग्धमपि किमहं करवाण्यथ ॥ ६ ॥ विचिन्त्येति पारणार्थं न गन्तव्यं मया पुरे । इत्यभिगृह्य राजर्षिरगमत्तुङ्गिकागिरौ ॥ ७ ॥ तत्र तीव्रतपःशक्त्या कृष्टास्तं हरिणा अपि । उपासते न के तीव्रतपस्विनमुपासते ॥ ८ ॥ तत्राऽऽवन्यदा कोऽपि रथकृद्दारुहेतवे । समाजगाम विविधैर्लोकैः सह महामनाः ॥ ९ ॥ बलर्षिस्तेन मध्याह्ने पारणाय निमन्त्रितः । सोऽपि केनापि संविग्नमृगेण सह तत्र चैत् ॥ १० ॥ मुनिं तं समयाऽऽयातं समीक्ष्य रथकृन्मुदा । शुद्धान्नं दातुमारेभे भावनावनमध्यगः ॥ ११ ॥ तत्समीक्ष्य मृगो दध्यावहो रथकृताऽमुना । दानं दत्तं पुरा तेन प्राप्ता श्रीरीदृशी शुभा ॥ १२ ॥ दत्तेऽधुनाऽपीदृशाय दानं पात्राय भक्तितः । तदस्य सफलं जन्म त्रयं मे न तु किञ्चन ॥ १३ ॥ तपःपात्रं मुनिः श्लाघ्यो मुधा दाता तथा त्वयम् । तपोदानादिभिर्हीनोऽहमश्लाघ्योऽस्मि केवलम् ॥ १४ ॥ एवं चिन्तयतस्तस्य रथकारस्य यत्नतः । मुनेश्चाहारमेतेन दत्तं विहरतस्तदा ॥ १५ ॥ चण्डवाताभिघातेनार्धच्छिन्नपादपोऽपतत् । घातेन ते त्रयो मृत्वा ब्रह्मस्वर्गेऽभवन् सुराः ॥ १६ ॥ युग्मम् ॥ एवमन्यैरपि जनैः शक्त्यादि प्राप्य दुर्लभम् । धर्मे प्रमादः कार्यो न लोकद्वयहितावहे ॥ १७ ॥ ॥ इति बलदेवकथा ॥

---

१ च पुनरेतेन रथकारेण दत्तमाहारं विहरतः प्रतिगृह्णतो मुनेः इत्यन्वयः. २ तद्घातेन त्रयो मृत्वा इति साधु.

अथापरा कथा (पुण्याढ्यकथा)—

सुवृत्तं भ्रमरहितं पुरं पद्मपुराभिधम् । श्रियः पद्ममिव न यद्विमुञ्चन्ति कदाचन ॥ १ ॥ बभूव भूपतिस्तत्र नगरे तपनाभिधः । तपनस्येव यस्यारिसन्ततेर्दुःसहं महः ॥ २ ॥ श्रेष्ठी श्रेष्ठतमस्तत्र पुरे नाम्ना धनावहः । यद्धनस्य न सीमाऽस्ति दोषाणामिव दुर्धियाम् ॥ ३ ॥ क्रीतक्रयाणकोऽन्येद्युर्द्वीपं सिंहलनामकम् । प्रतिष्ठासुः क्षितीशेन शुल्कमुक्त्या स सत्कृतः ॥ ४ ॥ ततः स मुदितस्तत्र गत्वा कृत्वाथ चाखिलम् । क्रयविक्रयादिकार्यमपश्यत् सुन्दरं क्षिपम् ॥ ५ ॥ इभमिन्यः स विज्ञाय चतुर्दन्तमिवाद्भुतम् । श्रीमत्तपनभूभर्तुः प्राभृतार्थं तमग्रहीत् ॥ ६ ॥ स ततः स्वपुरायातः क्रमात्तपनभूभृतः । तं क्षिपं प्राभृतीचक्रे भूषणं भूपतिश्रियः ॥ ७ ॥ तेन राज्ञा ततः सर्वे प्रत्यर्थिपृथिवीभुजः । जितास्तन्मत्तमातङ्गबलेन प्रबला अपि ॥ ८ ॥ राजानं गजराजस्य पश्यतोऽस्य मुहुर्मुहुः । जातजातिस्मृतेः पूर्वभवोऽध्यक्षोऽभवत्त्वयम् ॥ ९ ॥ मित्रं तस्य क्षितीशस्यायं दन्ती पूर्वजन्मनि । अभूदुष्कर्मणा केनचित्स सम्प्रत्यनेकपः ॥ १० ॥ गजोऽथ प्राच्यमित्रस्य प्रबोधार्थं क्षितीशितुः । खटिकां शुण्डयाऽऽदाय राजद्वारीति सोऽलिखत् ॥ ११ ॥ अविज्ञातत्रयीतत्त्वो मिथ्यासत्त्वोद्भवसद्भुजः । हा मूढ शत्रुपोषेण मित्रक्षोषेण हृष्यसि ॥ १२ ॥ अस्य श्लोकस्य राज्ञाऽथ सर्वेषां विदुषां पुरः । अर्थोऽप्रज्ञि न केनापि यथार्थं कथितः परम् ॥ १३ ॥ इतश्चात्र समाजग्मुः श्रीमदानन्दसूरयः । नत्वा ते भूभुजा पृष्टास्तदर्थं सम्यगब्रुवुः ॥ १४ ॥ ततः संजातवैराग्यरङ्गस्तपनभूपतिः । कक्षीकुर्वन् व्रतं चोक्तो मन्त्रिभी राज्यचिन्तकैः ॥ १५ ॥ राजन् राज्यं त्वदीयं हि देयं कस्येति शंस नः । सोऽवग्यस्य गजो राज्यं दत्ते राजा स एव च ॥ १६ ॥ ततः प्रव्रजिते राज्ञि

गजोऽलङ्कृत्य मन्त्रिभिः । पुरस्कृत्योदितश्चेति मधुराक्षरया गिरा ॥ १७ ॥ राज्यमेतद्गजराज ! यस्य कस्यापि दीयताम् । ततो द्विपोऽपि सर्वत्र पुरं भ्रान्त्वाऽगमद्घने ॥ १८ ॥ तत्र वैरूप्यपात्रं स पङ्गुं दृष्ट्वाऽथ कञ्चन । आनीय च पुरे भूपं तमेव विदधे जवात् ॥ १९ ॥ ततो नागरिकाः सर्वे कुरूपं वीक्ष्य तं नृपम् । वक्रेक्षणं हसन्तोऽवमेनिरे बहुमानिनः ॥ २० ॥ ततश्चिन्तातुरो रात्रौ भूपो देवतयोदितः । मा विषीद नृप प्रातः सर्वं भव्यं भविष्यति ॥ २१ ॥ देव्यादेशान्नृपः प्रातर्गजमारुह्य तं जवात् । करे कृत्वा तृणं सर्वान् पौरानाज्ञापयज्जनान् ॥ २२ ॥ *इदं रूप इदं खड्गः क्ष्माप एष इदं बलः । आज्ञापयति यत्त्वस्मान् किमाश्चर्यमतः परम् ॥ २३ ॥ हसतोऽदो ब्रुवाणाँस्तान् प्रत्युत्पाद्य तृणं क्रुधा । मोक्तुं प्रचक्रमे तावत्तज्जज्ञे वज्रमद्भुतम् ॥ २४ ॥ द्युतिद्योतितदिग्देशं युगान्तार्कमिवोत्कटम् । तद्वीक्ष्य विस्मयन्नयज्ञाग्जज्ञे युगपज्जनः ॥ २५ ॥ तदाम्बरस्थिता देवी जगादेत्यस्य भूपतेः । यः कोऽप्याज्ञां न कर्ता तन्मूर्ध्नि वज्रं पतिष्यति ॥ २६ ॥ ततो भीतैर्विस्मितैश्च पौरैस्तस्य महीपतेः । आज्ञां स्वीकृत्य चक्रे स बहुमानपदं नृपः ॥ २७ ॥ पुण्याढ्य इति नाम्नाऽसौ प्रोच्यमानोऽखिलैर्जनैः । त्रिखण्डाधिपतिर्जज्ञे प्राक्पुण्यवशतः क्रमात् ॥ २८ ॥ कालेन कियता कालगोचरं स गतः करी । ततः स क्ष्मापतिर्मुक्तकण्ठं व्यलपदित्यहो ॥ २९ ॥ चत्वारिंशत्समधिका लक्षाणानां चतुःशती । त्वदङ्गसङ्गिनी नागराजागात्सा क्व सम्प्रति ॥ ३० ॥ मन्नेत्रानन्दकृन्नेत्रयुगलं मधुपिङ्गलम् । किं त्वया मीलितं दन्तिन् कारणं वद साम्प्रतम् ॥ ३१ ॥ उत्तुङ्गक्ष्माधरशृङ्गचङ्गा कुम्भस्थली क्व सा । यया सुरपुरन्ध्रीणामुरोजावुपमानितौ ॥ ३२ ॥ क्व स दीर्घतरः

* "इदं रूपमिदं खड्गः क्ष्माप एतदिदम् बलः" तृणमुद्दिश्येति शब्दरचनया पूर्वार्द्धः शुध्यति परन्तु ग्रन्थकारस्य कः आशयः इति न जानीमहे.

शुण्मादण्फ उद्दण्मविक्रमः । प्रत्यर्थिपृथ्विवीनाथ कमलाकर्षणद्रमः ॥ ३३ ॥ सौरज्यलाज्रमुद्भाम्यद्भृङ्गीझंकारबन्धुरः । क्व ते मदप्रवाहः स सुगन्धितहरिन्मुखः ॥ ३४ ॥ गतिर्निरुपमा सा ते क्वोपमातुं सुधीमताम् । अलब्धानामपि यया सुकराप्सरसां गतिः ॥ ३५ ॥ इत्यादि विलपन् ज्रूपो मन्त्रिज्रिर्ज्ञापितस्ततः । मा विषीद विज्रो येन पुर्लङ्घ्या ज्रवितव्यता ॥ ३६ ॥ अथेज्रप्रेमतस्तेन ज्रूज्रर्त्रा तत्र बन्धुरम् । कारयित्वा विहारं तद्दन्तिमूर्तिं च सुन्दराम् ॥ ३७ ॥ प्रतिमाऽप्रतिमा जैनी तत्कुम्ज्रोत्सङ्गसङ्गिनी । कारिता तां च पश्यन् स शुक्ललेश्यामशिश्रियत् ॥ ३८ ॥ युग्मम् ॥ सद्ध्यानज्वलनज्वालाजालैरेष श्लेश्वरः । अवाप निष्ठिताशेषकर्मकष्टोऽथ केवलम् ॥ ३९ ॥ आसन्नदैवतव्रातकृतहेमकजासनः । स ज्रूपकेवली चक्रे पौराग्रे धर्मदेशनाम् ॥ ४० ॥ देशनान्ते जनैः पृष्टः स किं नाथान्यजन्मनि । त्वयाऽकारि यतस्तेऽज्रूत् पङ्गुताराज्यकेवलम् ॥ ४१ ॥ ततः सोऽवग्मया पूर्वं मलाकीर्णाङ्गसन्मुनेः । तृणं निष्कासितं नेत्रात् कृतं चाङ्गविकुत्सनम् ॥ ४२ ॥ कण्टकाकर्षणाद्राज्यं प्राप्तं निष्कण्टकं मया । ततोऽपि केवलज्ञानं पङ्गुता तज्जुगुप्सया ॥ ४३ ॥ इति श्रुत्वा जनः सर्वो मुनिशुश्रूषकोऽज्रवत् । तन्निन्दाविमुखश्चोद्यद्धर्मबुद्धिविशुद्धधीः ॥ ४४ ॥ श्रीपुण्याढ्यमहीस्वामिकेवली ज्रूमिमण्मले । चिरं विहृत्य मुक्तिश्रीपतित्वमज्रजज्रुवि ॥ ४५ ॥ इति श्रुत्वा जनाः सर्वे यूयं सद्ध्यानकर्मसु । चेतो धत्त यथा सिद्धिपुरन्ध्री वोऽप्यसौ ज्रजेत् ॥ ४६ ॥

॥ इति पुण्याढ्यकथा ॥

उक्तमेकादशं शक्तिद्वारं । अथ शमफलमाह—

शमेन सिध्यन्ति मतानि कृष्णानुजर्षिवत्तीव्रतपोऽस्तु मा वा ।
दिनाधिनाथेन कृतेऽन्नपाके, सन्धुक्षणं कः कुरुतेऽनलस्य ॥ २५ ॥

व्याख्या—मतानि मनोऽभीष्टानि शमेन क्षान्त्या सिध्यन्ति सिद्धिं यान्ति । तीव्रतपोऽस्तु भवतु । वाऽथवा माऽस्तु मा भवतु । तपसा किं प्रयोजनं ? । यदुक्तं—

"रागद्वेषौ यदि स्यातां तपसा किं प्रयोजनम् । तावेव यदि न स्यातां तपसा किं प्रयोजनम् ॥ १ ॥"

अथ दृष्टान्तेनाह—किंवत् ? कृष्णानुजर्षिवत् कृष्णानुजो विष्णुलघुभ्राता गजसुकुमारः स चासौ ऋषिश्च तस्येव तद्वदिति, यथा गजसुकुमारस्य तीव्रतपो विनापि शमेनैव मतानि सिध्यन्ति स्म । तथाऽत्रैव लौकिकदृष्टान्तमाह—दिनाधिनाथेनादित्येनान्नपाके कृते सत्यनलस्य वह्नेः सन्धुक्षणं लोकप्रतीतं कः कुरुते ? अपि तु न कोऽपि । तथा शमेन सिद्धेषु मतेषु कस्तपस्यतीति भावः । इत्यक्षरार्थः । कथा चेयम्—

गजसुकुमारकथा—

पुरी द्वारवती नाम्ना श्रियामेकं निकेतनम् । नागेशनगरीखर्वगर्वसर्वङ्कशा क्षितौ ॥ १ ॥ तत्र शत्रुकलत्राक्षिकजालालोपलोलुपः । नवमो वासुदेवोऽलं राज्यमन्वशिषन्निजम् ॥ २ ॥ तन्माता देवकी वीक्ष्य गवाक्षस्थाऽथ काञ्चन । स्त्रियं स्वसूनुमुद्वापयन्तीमिति व्यचिन्तयत् ॥ ३ ॥ अहो इयं महापुण्या यदुद्वाप्य निजाङ्गजम् । प्रमोदमेदुरीभूता सुखमास्ते निर-

न्तरम् ॥ ४ ॥ अहं पुनरपुण्यात्र महापुण्यबलोर्जितान् । प्रसूय सूनून् सप्तापि यन्मनाग् नोदलापयम् ॥ ५ ॥ ममात्रापन्नसत्त्वायाः सर्वेऽजूवन्मनोरथाः । निष्फलाः शारदाम्भोदगाढगर्जनवत् क्षितौ ॥ ६ ॥ ध्यात्वेति रोदितुं गाढस्वरमेषा प्रचक्रमे । तद्भुत्वा सहसा मातः किमेतदित्यवग्घरिः ॥ ७ ॥ तयोदिते निजाकूते सोऽवग्मातर्विषीद मा । श्वः करिष्येऽहमखिलं भव्यं भवदभीप्सितम् ॥ ८ ॥ उपवासत्रयं कृत्वा पूर्वसंकेतितः सुरः । अच्युतेन स्मृतमात्र आयातस्तत्क्षणादपि ॥ ९ ॥ कृष्णेन कथिते देवपुरो मातृमनोरथे । देवोऽवदत्त्वदम्बायाः सुतः संपादयिष्यते ॥ १० ॥ परं स यौवनस्थोऽपि विरक्तः प्रव्रजिष्यति । सोऽप्याहाजिमतं मातुः केवलं बालालालनम् ॥ ११ ॥ ततो देवप्रभावेण गुर्विण्यजनि देवकी । ददर्श च द्विपं स्वप्ने सुखस्वापपराऽन्यदा ॥ १२ ॥ क्रमात्सुतमसूतैषा पित्राऽत्युत्सवपूर्वकम् । चक्रे गजसुकुमारनाम स्वप्नानुमानतः ॥ १३ ॥ धात्र्युत्सङ्गगतो नित्यं पयःपानैर्नवैर्नवैः । सहकाराङ्कुर इव ववृधे स दिने दिने ॥ १४ ॥ यदूनां नयनानन्दं तन्वानोऽतनुसद्गुणैः । कलाकलापं संगृह्णन् प्राप बाल्योत्तरं वयः ॥ १५ ॥ तदा मुकुन्दो मुदितः सोमभट्टतनूभवाम् । रूपलावण्यसंपूर्णां महात्तेनोदवाहयत् ॥ १६ ॥ इतश्च भगवान्नेमिर्विहरन्नवनीतले । तत्राजगाम तं नन्तुं कृष्णोऽगात् सपरिच्छदः ॥ १७ ॥ प्रभोर्देशनया बुद्धो गजो मातरमूचिवान् । मातस्तवाज्ञया दीक्षां कक्षीकुर्वेऽहमादिश ॥ १८ ॥ ततः साङ्के निधायैनं चुम्बन्ती मस्तके तदा । सिञ्चन्ती चाश्रुनीरेणागदत्सगद्गदाक्षरम् ॥ १९ ॥ क्वेदं तव वयो वत्स नारीनेत्रामृताञ्जनम् । क्व वार्धकवयःसाध्यं तदुष्करतरं व्रतम् ॥ २० ॥ भोगान् भुङ्क्ष्वाधुना तेन सौववद्भवया

१ उत्सवात्.

सह । तारुण्यातिक्रमे दीक्षां कक्षीकुर्याः सुतोत्तम ! ॥ २१ ॥ ततः सोऽन्निदधे मातर्विद्युद्योतचञ्चले । नृजवे चित्रं तदपि यत् सुप्त्वाऽपि प्रतिबुध्यते ॥ २२ ॥ इत्यादियुक्तिन्निस्तेनानुज्ञाप्य निजमातरम् । श्रीमन्नेमिजिनोपान्ते व्रतं शिश्ये (श्रिये) शिवप्रदम् ॥ २३ ॥ पृष्टश्च जगवान्नेमिर्मुक्तौ मोक्षे प्रगम्यते । केनेति तीर्थकृत्प्रोचे कायोत्सर्गेण सुन्दर ॥ २४ ॥ कुमारर्षिस्ततो नेमिमनुज्ञाप्य गतो निशि । कायोत्सर्गं विधायास्थात् श्मशानजुवि शुद्धधीः ॥ २५ ॥ तदा ग्रामात् कुतोऽप्यायान् सोमजट्टोऽथ वीक्ष्य तम् । उपलक्ष्य च रोषेण वजाषे जीषणाननः ॥ २६ ॥ रे पाप मम पुत्रीं त्वं परिणीय गुणोज्वलाम् । मुक्त्वा चाशरणामीदृक् पाखण्डं किं करोष्यदः ॥ २७ ॥ क्रुध्नेनाथामुना बद्ध्वा पालिं तन्मस्तके मृदा । ज्वलन्तः खादिराङ्गाराः क्षिप्ताः पापात्मना ततः ॥ २८ ॥ तदानीं स मुनिर्मेने मनसीति सुमानसः । मुक्त्यर्थमुपकर्ता मे मा स्म जूदेष दुःखितः ॥ २९ ॥ अहो मे श्वशुरोऽयं प्रागुद्याद्य स्वतनूजवाम् । स्थानेऽधुना ध्रुवं सिद्धिश्रीप्रदाने उपस्थितः ॥ ३० ॥ रे चेतः क्वापि मा द्वेषं कार्षीर्यत्साम्प्रतं तव । क्षीयन्तेऽखिलकर्माण्यशुजानि क्षणमात्रतः ॥ ३१ ॥ इत्यादि ध्यानसंलीनं कुर्वन्नात्मानमात्मना । कुमारर्षिरसौ वेगाजुक्लेश्यामशिश्रियत् ॥ ३२ ॥ यथा यथाऽदहद्देहं दहनोऽस्य तथा तथा । शुक्लध्यानानलोऽप्यन्तःकर्माणि स्पर्धयेव तु ॥ ३३ ॥ क्षीणकर्मा क्रमादेष लब्ध्वा केवलमुज्वलम् । मुक्तिश्रीमानसावासनिवासं जेजिवान् जवात् ॥ ३४ ॥ प्रातर्नेमिजिनं नन्तुमायातोऽच्युतजूपतिः । पप्रच्छ क्वास्ति तीर्थेश मद्भ्राता नवदीक्षितः ॥ ३५ ॥ स्वामी स्माह बही रात्रौ श्मशाने प्रतिमास्थितः । अग्निना ज्वालितः केनाप्याश्रयत् स शिवश्रियम् ॥ ३६ ॥ कृष्णोऽवदज्जिनो मेऽत्र पुरे कोऽस्तीदृशोऽशुजः । मुनेर्निरपराधस्य यश्चक्रेऽमुमुपद्रवम् ॥ ३७ ॥ जिनोऽवद-

द्रुजन्तं त्वां स्वगृहे यस्य पश्यतः । ज्ञविता हृदयस्फोटो ज्ञेयः स मुनिहिंसकः ॥ ३८ ॥ यातो मार्गे जिनं नत्वा विष्णो-
र्नश्यन् ज्ञिया ज्ञृशम् । मिलितः सोमज्ञट्टोऽथ हृदयस्फोटमाप्तवान् ॥ ३९ ॥ विपद्य दुर्गतिं प्राप्ते तस्मिन् पौरजनो-
ऽखिलः । तन्निन्दातन्मुनिश्लाघामुखरः समजायत ॥ ४० ॥ इत्थं गजसुकुमालः सिध्यस्तीव्रतपो विना । क्षान्त्यैव तेन
कुर्वीरन् ज्ञवन्तोऽप्युद्यमं शमे ॥ ४१ ॥

॥ इति गजसुकुमालकथा ॥

अथात्रैव द्वारे विशेषमहिमानमाह—

प्रीत्यै शमी स्वपरयोरपि चण्डरुद्रशिष्यो यथात्मनि गुरावपि केवलर्द्ध्या ।
सप्तर्षिसङ्गतिमवाप्य विशाखनामा, चौरोऽप्यज्ज्वलदिव्यशक्तिः ॥ २६ ॥

व्याख्या—शमी क्षमावान् पुमान् स्वपरयोरपि आत्मनोऽन्यस्यापि च प्रीत्यै हर्षाय स्यात् । यथा चण्डरुद्रशिष्य
आत्मनि स्वविषये गुरावपि गुरुविषये च केवलर्द्ध्या केवलज्ञानलक्ष्म्या कृत्वा शमधरः सन् प्रीतये जातः । ननु शमी
परस्य कथमीर्ष्यालोर्मुदे स्यादित्याशङ्कां दृष्टान्तेन निरस्यति—विशाखनामा पुरुषश्चौरोऽपि क्षमावतां सप्तर्षीणामङ्गिरसा-
दीनां सङ्गतिं सङ्गमवाप्य लब्ध्वा विलसन्ती देदीप्यमाना ज्वज्वला निर्मला दिव्या देवमयी शक्तिः सामर्थ्यं यस्य स तथा
विलसद्ज्वलदिव्यशक्तिरासीत् । सप्तर्षिसङ्गतिसमः शमी चौरसदृशः कोऽपि । इत्यक्षरार्थः । कथे चेमे—(चण्ड-
रुद्रशिष्यकथा)

अजूत् पुर्यां तामलिप्त्यां रमाविश्रामसद्मनि । गङ्गदत्ताभिधः श्रेष्ठी श्रेष्ठसौजन्यपुण्यधीः ॥ १ ॥ तत्पुत्रः सागरः सर्व-गुणमाणिक्यसागरः । बाल्योत्तरं वयः प्राप कलावृन्दमिवाद्भुतम् ॥ २ ॥ तदा महेन महता पित्रोत्तमकुलोद्भवा । कन्या-ऽथोद्वाहिताऽनेन रूपलावण्यसुन्दरा ॥ ३ ॥ सागरः शालकैः साकं रममाणो वनेऽन्यदा । चण्डरुद्रगुरोः पार्श्वे जगाम क्रोधशेवधेः ॥ ४ ॥ शालकैर्नर्मणा प्रोचे भगवन्नेष दीक्ष्यताम् । कुमारो जातवैराग्यरङ्गो निःसङ्गमानसः ॥ ५ ॥ सूरिणा कोपनेनाथ तच्छिरो लुञ्चितं क्षणात् । तद्दीक्ष्य शालकाः काकनाशं नेशुर्भयाकुलाः ॥ ६ ॥ स दध्यौ यदि मे सूरिर्हितैषी संयमं ददौ । हास्येनापि शालकानां मया पाठ्यस्तथाऽप्यसौ ॥ ७ ॥ अथेति सूरिमूचे स गुरोऽदस्त्यज्यतां पुरम् । नो चेन्मत्स्वजना मूढास्त्याजयिष्यन्ति संयमम् ॥ ८ ॥ सोऽवगन्तुं न शक्नोमि क्षीणजङ्घाबलो ह्यहम् । ततः स्कन्धे तमा-रोप्य स शैक्षः प्राचलन्निशि ॥ ९ ॥ मार्गेऽथ गच्छतस्तस्य तमोरुद्धदृशो नृशम् । पादौ समासमौ यत्र पेततुस्तत्र स क्रुधा ॥ १० ॥ दण्डेन ताडयन्मूर्ध्नि बभाषे क्षीणवाक्षरम् । रे पाप दुष्टमार्गे किं यासि त्वं शूकलाश्ववत् ॥ ११ ॥ युग्मम् ॥ दध्यौ स कुमरः शान्तचेताश्चेति स्वचेतसि । हा मयाऽऽदाय चारित्रं कथं संतापिता अमी ॥ १२ ॥ चारित्रं नाग्रहीष्यं चेदहं शालकनर्मणा । कष्टेऽपतिष्यन्नीदृक्षे तर्ह्येते सूरयः कथम् ॥ १३ ॥ एवं ध्यायन्नसौ शुक्लध्यानालीनमनाः क्षणात् । क्षीणकर्मोत्करः प्राप केवलज्ञानमुज्ज्वलम् ॥ १४ ॥ विश्वं विश्वं ततः पश्यन् सूरिचेतोऽपि केवली । जगाम तन्मनोवृत्त्यु-चितेन स समाध्वना ॥ १५ ॥ तत्समाध्वाध्वनीनत्वतुष्टः सूरिर्विहस्य सः । जगौ मारप्रज्ञावेणाहो समाऽस्य गतिस्त्वजूत्

१ अशिक्षिताश्ववत् .

॥ १६ ॥ सोऽवग्गुरोऽदो मा ब्रूयाः प्रागध्वादर्शनान्मम । विषमा गतिः साम्प्रतं तु जाताध्वालोकनात्समा ॥ १७ ॥ सूरिः स्माह कथं सम्यग्निशि ते मार्गदर्शनम् । सोऽप्यूचे केवलज्ञानप्राप्त्या मे मार्गवीक्षणम् ॥ १८ ॥ ततः स्वं गर्हमाणः स तन्मूर्ध्नः पतितः क्षितौ । लगित्वा तत्पदाम्भोजे चकारेति गुणस्तुतिम् ॥ १९ ॥ अहो तवोत्तमं ध्यानमहो तेऽत्युत्तमा क्षमा । क्षीणकर्मा क्षणाद्यान्त्यां केवलज्ञानमासदः ॥ २० ॥ मयाऽधर्मार्थिना स्वात्मा विना क्षान्त्या विडम्बितः । त्वया तु क्षमयैवाशु साधितं परमं पदम् ॥ २१ ॥ या मया वत्स मूढेन केवल्याशातना कृता । कथं तत्पातकान्मुक्तिरीर्ष्यालोर्मे भविष्यति ॥ २२ ॥ एवं स्वं गर्हमाणस्योत्पेदे तस्यापि केवलम् । ईश्वरोपासनादेवैश्वर्यं प्रायः प्रजायते ॥ २३ ॥ उत्पन्न-केवलज्ञानौ सूरिशिष्यौ क्षमातले । चिरं विहृत्य संजातौ सिद्धिश्रीजीवितेश्वरौ ॥ २४ ॥ एवं क्षमाधनोऽन्योऽपि स्वान्य-केवललाभकृत् । भवेत्तेनोद्यमः कार्यः शम एव शिवार्थिभिः ॥ २५ ॥

॥ इति चण्डरुद्रशिष्यकथा ॥

अथ विशाखचौरकथा—

काञ्चनश्रीमनोहार्यासीत् काञ्चनपुरं पुरम् । तृणायते श्रिया यस्य पुरः पौरन्दरं पुरम् ॥ १ ॥ तत्राभूद्धवलभवेतिश्रेष्ठी श्रेष्ठिशिरोमणिः । स्पर्धयेव प्रवर्धन्ते भवाणां यशुणा अपि ॥ २ ॥ अभूवन् सूनवस्तस्य सप्त सप्तसुखावहाः । बाल्येऽपि जात-वैराग्यरङ्गैरङ्गीकृतव्रताः ॥ ३ ॥ शशीव तनयस्तस्य विशाख इति नामतः । कलाकलापसंपूर्णोऽप्यष्टमोऽजन्यनिष्टकृत् ॥ ४ ॥ यथा यथा प्रवर्धेत वपुषा स दिने दिने । तथा तथाऽधिकं तस्य वर्धते व्यसनोदयः ॥ ५ ॥ द्यूतमांससुरावेश्या-

पापर्द्धिस्तैन्यवृत्तयः । परदारगमश्चेत्यासन्मित्राणीव तस्य वै ॥ ६ ॥ दयादाक्षिण्यदानादिश्रीह्रीधीधृतिकीर्तयः । स्वप्नेऽपि न स्पृशन्ति स्म तं चण्डाल्लमिव द्विजाः ॥ ७ ॥ न जातु जायते तस्य दुर्गतिव्यसनादरः । निवर्तते न तत्तस्य कदाचिद्व्यसनादरः ॥ ८ ॥ पौराँस्तदपवादैकवावदूकान् पदे पदे । वीक्ष्य तज्जनकः स्माह तमेकान्ते मिताक्षरम् ॥ ९ ॥ वत्स स्वल्पमते तेऽयं न युक्तो व्यसनोदयः । अत्रामुत्र च सन्तापपापव्यापनिबन्धनम् ॥ १० ॥ यतो न पितुरानन्दो नन्दनेनापि तेन किम् । सौवर्णी क्षुरिका चेत्स्यात् क्षिप्यते किं निजोदरे ॥ ११ ॥ एवमुक्तोऽप्यसौ यावद्व्यसनान्न निवर्तते । तावत् पित्रा प्ररुष्टेन स गेहान्निरवास्यत ॥ १२ ॥ स ग्राम्यन् जग्मिवान् क्वापि पल्ल्यां चौरैः सहाज्ञवत् । अस्य प्रीतिर्हि लीयन्ते सदृशाः सदृशैः सह ॥ १३ ॥ चौरैः समं स कुर्वाणश्चौर्यं पापपरोऽन्वहम् । दिनानि कानिचिद्दुष्टवृत्त्याऽतिक्रान्तवान् कुधीः ॥ १४ ॥ सोऽन्यदा दस्युभिः सार्धं चौर्यायागात् पितुर्गृहे । पितरं वीक्ष्य पापात्मा क्रुद्धो व्यापादयत् क्षणात् ॥ १५ ॥ आः पाप किमदोऽकार्षीर्जल्पन्तीमिति मातरम् । स जघान यतो लज्जा दया का स्याद्दुरात्मनाम् ॥ १६ ॥ मिलितैः स जनैः कुव्यमानो नंष्ट्वाऽगमद्वने । शमान्मूर्त्तानिवाऽऽह्वीत्सप्तर्षींस्तत्र सोदरान् ॥ १७ ॥ मर्मविद्भिः स गाङ्गीन्निराक्रोशँस्तान् दुराशयः । तैः शमामृतसेकेन शमं नीतः क्षणादपि ॥ १८ ॥ तत्पार्श्वे धर्ममाकर्ण्य कर्णामृतमनुत्तरम् । जातवैराग्यरङ्गोऽथ स प्रव्रज्यामुपात्तवान् ॥ १९ ॥ स गर्हामात्मनः कुर्वन् तपोग्निः शोधयन् स्वकम् । समाधिनाऽन्त-

---

१ ज्ञयम्.

मासाद्य कृतसंलेखनः सुधीः ॥ २० ॥ कल्पे बभूव सौधर्मे देवः सर्वसुरोत्तमः । किं तपोभिरसाध्यं स्यात्सेवितैर्दुर्धियामपि ॥ २१ ॥ युग्मम् ॥ एवं क्षमावतां सङ्गः सिद्धिदोऽपि दुरात्मनाम् । तत्क्षमाकरणे विज्ञाः ? करणीयः सदोद्यमः ॥ २२ ॥

॥ इति विशाखचौरदृष्टान्तः ॥

समर्थितं द्वादशं शमद्वारमिदं । अथ सामान्येन व्रतस्वरूपं निरूपयति—

व्रतमपि बहु चीर्णं सातिचारं कुगत्यै, दिनमपि शुचि मुक्त्यै कण्मरीकादिवत्तत् ।
अहह दहति चित्रावारिपूरोऽपि शस्यं, भृशकृशमपि पाथः स्वातिजं पाति जन्तून् ॥ २३ ॥

व्याख्या—व्रतमप्यहिंसासूनृतास्तेयब्रह्माकिञ्चन्यरूपमपि सातिचारमतिचारसहितं सत् बहु चीर्णमपि बहुकालं पालितमपि कुगत्यै दुर्गतिप्राप्तये स्यात् । तद्व्रतं दिनमपि शुचि निरतिचारं पालितं सन्मुक्त्यै मोक्षाय भवति । किंवत् ? कण्मरीकादिवत् कण्मरीकपुण्मरीकभ्रातृद्वयवत् । यदुक्तम्—

"वाससहस्सं पि जई काऊण वि संजमं सुविउलं पि । अंते किलिट्ठभावो न विसुज्झइ कंडरीय व ॥ १ ॥
अप्पेण वि कालेणं केई जहा गहियसीलसामन्ना । साहंति नियययकज्जं पुंडरि (य) महारिसिव्व जहा ॥ २ ॥"

एतदर्थानुरूपं दृष्टान्तमाह—अहहेत्यव्ययं खेदार्थे चित्रानक्षत्रे वृष्टे वारिपूरोऽपि जलप्रवाहोऽपि शस्यं धान्यं दहति। स्वातिजं स्वातिनक्षत्रवृष्टं भृशमतिशयेन कृशमपि स्वल्पमपि वारि पानीयं जन्तून् जीवान् अतुलशस्यनिष्पादकत्वेन पाति पालयति । चित्रावारिपूरसदृशं सातिचारं व्रतं बहु चीर्णं । स्वातिवारितुल्यं निरतिचारं दिनाचीर्णं व्रतं । यत उक्तम्—

"एगदिवसं पि जीवो पवज्जमुवागउ अनन्नमणो" । इत्यादि वृत्तार्थ एवं । कथा त्वियम् (कंरुरीकपुण्डरीककथा)

जम्बूद्वीपेऽत्र सद्द्वीपे महाविदेहमण्डने । विजये पुष्कलावत्यां पुण्डरीकिण्यभूत् पुरी ॥ १ ॥ महापद्मो नृपस्तत्र यथार्थाख्योऽभवत् प्रिया । तस्य पद्मावती मूर्त्तिमती पद्मेव सुन्दरी ॥ २ ॥ पुण्डरीककण्डरीकौ तत्सुतौ च बभूवतुः । महापद्मोऽशृणोद्धर्ममन्येद्युः साधुसन्निधौ ॥ ३ ॥ पुण्डरीकं सुतं राज्ये न्यस्य भूपोऽग्रहीद्व्रतम् । क्रमात् कर्मक्षयोत्पन्नकेवलो मुक्तिमाप च ॥ ४ ॥ अन्यदा मुनयः केचिदागुः पूःपुण्डरीकिणीम् । तान्नन्तुं श्रीपुण्डरीककण्डरीकौ प्रजग्मतुः ॥ ५ ॥ धर्मलाभाशिषं दत्त्वा मुनिः प्रोवाच तौ प्रति । अहो संसारकान्तारे सारं धर्ममृते न हि ॥ ६ ॥ भ्राम्यन् भवार्णवे प्राणी प्राप्य कृच्छ्रान्नृणां भवम् । पोतवद्यो हारयति मुधा कोऽन्यस्ततो जडः ॥ ७ ॥ श्रुत्वेति भ्रातरौ तौ तु संविग्नौ गृहमीयतुः । पुण्डरीकः पुरोऽमात्यवर्गस्येत्यनुजं जगौ ॥ ८ ॥ वत्सादत्स्व वरं राज्यमिदं पैत्रिकमुच्चकैः । संसारदुःखखिन्नोऽहं दीक्षां कक्षीकरोमि यत् ॥ ९ ॥ अनुजोऽप्यथ तं प्रोचे भ्रातः संसारसागरे । किं पातयसि तदहं भवन्निद्व्रतमाददे ॥१०॥ अथ द्विस्त्रिश्च राज्यार्थं भूपोक्तं नाकरोद्यदा । व्रतेऽनुजज्ञे स तदा शिष्टश्चेति हितैषिणा ॥ ११ ॥ दुर्जयोऽत्रेन्द्रियग्रामः सदा चित्तं चलाचलम् । प्रमादः सोदरो नृणां यौवनं विक्रियावनम् ॥ १२ ॥ परीषहोपसर्गाश्च दुस्सहास्तत्त्वयाऽनुज ! । ज्ञाव्यं दृढप्रतिज्ञेन दीक्षा वत्सातिदुष्करा ॥ १३ ॥ श्राद्धधर्मं यद्यधुना कियन्तं प्रतिपाद्य च । तारुण्यातिक्रमे दीक्षामाददीथास्तदोचितम् ॥ १४ ॥ कण्डरीकोऽप्युवाचेति युक्तमेतत्तथाऽप्यहो । अङ्गीकृतं विधातव्यं प्रव्रजिष्याम्यहं ततः

---

१ आगच्छन् .

॥ १५ ॥ प्राव्राजीत् कण्ठरीकोऽथ पुण्ठरीकस्तु ज्यधवः । मन्त्रिणामुपरोधेन गृहे ज्यावयतिः स्थितः ॥ १६ ॥ तपोज्यिः कण्ठरीकोऽपि क्लिष्टदेहो निरन्तरम् । सामाचारीसेवनेन मुनीनामजनि प्रियः ॥ १७ ॥ वसन्तसमयेऽन्येद्युर्जनान् वल्ल-ज्यया सह । निज्याल्य क्रीऋतः पौरान् कदट्यालयकेलिज्यिः ॥ १८ ॥ महर्षेः कण्ठरीकस्य मनःश्रामण्यतोऽचलत् । चारि-त्रावरणतो हि विषमा कर्मणां गतिः ॥ १९ ॥ दध्यौ च मम पर्याप्तमनया दीहया खलु । गत्वा राज्यमुपादास्ये ज्यात्रा दत्तं पुराऽपि यत् ॥ २० ॥ इत्यगात् पुण्ठरीकिण्यां वने स्थित्वा क्वचित्तरौ । पात्राद्यालम्ब्य हरितस्तस्तरे कोमलेऽलुठत् ॥ २१ ॥ राज्ञेऽथात्मानमुद्यानपालकेनाश्वजिज्ञपत् । तत्रागत्य नृपोऽमात्यसंयुक्तस्तमवन्दत ॥ २२ ॥ शाखालम्बितपात्रा-दिर्हरित्कायोपरि स्थितः । मन्येऽसौ व्रतनिर्विण्ण इति बुद्ध्वाऽब्रवीन्नृपः ॥ २३ ॥ सर्वे स्मरथ ज्यो ज्यो यन्मम वारयतो-ऽमुना । व्रतमात्तमविमृश्य मूर्खेण रज्ञसावशात् ॥ २४ ॥ इत्युक्त्वा पुण्ठरीकोऽथानुजं राज्ये तदर्थिते । निवेश्य यति-लिङ्गान्युपादाय व्यहरत्ततः ॥ २५ ॥ मुक्तव्रतः कृशो रङ्क श्वान्नार्थीति सेवकैः । हस्यमानः कण्ठरीकः क्रोधं दध्रेऽधिकं हृदि ॥ २६ ॥ पूर्वं बुज्ञुक्षितो ज्ञुञ्जे पश्चादेषां प्रहासिनाम् । अहं शिक्षां करिष्यामीति ध्यायन् सोऽगमद्गृहे ॥ २७ ॥ ततः कपोतयूनेव तेनाहारै रसाधिकैः । ज्ञुक्तमाकण्ठमरसाहारविद्वेषिणा चिरम् ॥ २८ ॥ तस्याथ ज्वरजराहाराज्ञोगजाग-रणान्निशि । अज्ञूघिसूचिका बाढं तृण्महत्यरतिस्तथा ॥ २९ ॥ अथोत्फुल्लोदरो रूक्षपवनः स तृषार्दितः । नोदबिन्दुमपि प्रायः पातुं शक्तः कथञ्चन ॥ ३० ॥ ज्ञग्नव्रतोऽतिपापोऽसाविति मत्त्वा नियोगिज्निः । अकारितचिकित्सोऽर्त्तिमानयं

१ तृष्णया महती.

चेत्यचिन्तयत् ॥ ३१ ॥ यद्यत्येष्याम्यहं रात्रिमिमां कथमपि प्रगे । तदा सर्वान् हनिष्यामि सकुटुम्बान्नियोगिनः ॥ ३२ ॥ रौद्रध्यानीत्ययं कृष्णलेश्यावाँश्च व्यपादि सः । सप्तमोर्व्यामुपापादि चाप्रतिष्ठाननारकः ॥ ३३ ॥ प्राप्तश्चिरेष्टो यो दिष्ट्या धर्मस्तं गुरुसाक्षिकम् । कुर्वे इत्यचलत् पुण्डरीकोऽपि प्रति सद्गुरुम् ॥ ३४ ॥ साचारः स क्षमाचारसमुद्भूतपरिश्रमः । याचित्वोपाश्रयं ग्रामेऽस्थात्सुखं तृणसंस्तरे ॥ ३५ ॥ कदाऽहं प्रव्रजिष्यामि गुर्वन्तेऽदो विचिन्तयन् । स कृताराधनो मृत्वा जज्ञे सर्वार्थसिद्धिजाक् ॥ ३६ ॥ एवं च सम्यक् श्रामण्यमापाल्य परमां गतिम् । केचिद्यान्त्यचिरान्नान्ये सातिचारा-श्चिरादपि ॥ ३७ ॥

॥ इति कण्डरीकपुण्डरीककथा ॥

अथात्रैव विशेषमाह—

व्रतेन शुचिनापि किं किमथवा सद्गुरूपासनैरुदायिनृपमारकश्रमणवत्सपापात्मनः ।
शिरःस्थविषहृन्मणिः फणिगणः किमानन्दनः, स चन्दनवनस्थितः किमथवा जगत्तापहृत् ॥ २८ ॥

व्याख्या—सपापात्मनः पापव्याप्तान्तःकरणस्य शुचिनाऽपि निरतिचारेणापि व्रतेन किं ? अपि तु न किमपीत्यर्थः । अथवा ? पुनः सद्गुरूपासनैः किं ? न किमपि । किंवत् ? उदायिनृपमारकश्रमणवत् । यदुक्तं—

"यदि वहसि त्रिदण्डं नग्नमुण्डं जटां वा, यदि पठसि पुराणं वेदसिद्धान्तरूपम् ।
यदि वससि गुहायां पर्वताग्रे शिलायां, यदि हृदयमशुद्धं सर्वमेतन्न किञ्चित् ॥ १ ॥"

फणिगणः सर्पसमूहः शिरःस्थविषहन्मणिः मस्तकस्थितविषापहारिमणिः किं आनन्दनो हर्षकारी स्यात् ? अपि तु न स्यात् । अथवा स फणिगणः चन्दनवनस्थितः सन् जगत्तापहृत् विश्वतापापहारी (किं) स्यात् ? अपि तु न स्यादेवेत्यर्थः । कथा चेयम्—उदायिनृपमारकमुनिकथा—

परैरकृतकम्पास्ति चम्पा नाम्ना महापुरी । यत्रोत्तुङ्गैश्चैत्यशृङ्गैः रवेर्वर्त्माऽपि वक्रितः ॥ १ ॥ तत्रोदायी नृपो न्यायी स्वां प्रजां पर्यपालयत् । नृङ्गीव यन्मनोवृत्तिस्त्यजेन्नार्हत्पदाम्बुजम् ॥ २ ॥ तस्य सौधस्थितस्यापि प्रतापमसहिष्णवः । घूका इव दिनेशस्य द्विषोऽस्युर्गिरिगह्वरे ॥ ३ ॥ नीतिः स्वपरचक्रादेर्नोत्पेदे तस्य कुत्रचित् । स तु नित्यं बिभेति स्म श्राद्धधर्मविखण्डनात् ॥ ४ ॥ चतुःपर्व्यां चतुर्थादि तपः कुर्वन्निरन्तरम् । सामायिकस्थः स्वस्थः सँस्तस्थौ पौषधवेश्मनि ॥ ५ ॥ अन्यदा स गुरूनूचे बहवो मेऽरयः प्रभो । तेनैत्य मद्गृहे सायं दीयतां पौषधव्रतम् ॥ ६ ॥ गुरवोऽदः प्रपद्याथ चतुःपर्व्यां नृपौकसि । सायं गत्वा पौषधं च दत्त्वाऽस्थुर्नृपसन्निधौ ॥ ७ ॥ इतश्चोदयिविद्वेषिराज्ञा केनापि कश्चन । उदायिनो विनाशाय प्रेषितः क्षत्रियाधमः ॥ ८ ॥ अथाप्राप्नुवता तेनान्योपायं वीक्ष्य तं गुरुम् । गतागतं प्रकुर्वाणं राजवेश्मनि पर्वसु ॥ ९ ॥ मत्वोपायं तमेवाशु कङ्कलोहव्रुरीं वराम् । रजोहरणगां कृत्वा गुर्वन्ते व्रतमाददे ॥ १० ॥ यदा ते सूरयो राजगृहे गन्तुन्त्यसौ तदा । आयियासुरपि तैस्तु स्वसार्थे नैव नीयते ॥ ११ ॥ पाठं पाठं स शास्त्राणि श्रावं श्रावं तदर्थकान् । वर्षैर्द्वादशभिः प्राप गीतार्थत्वं तु मायिकः ॥ १२ ॥ परं तथापि तच्चेतः पापवृत्तिं न मुञ्चति । दुग्धमध्यस्थितोऽपि स्यादङ्गारः कथमुज्ज्वलः ॥ १३ ॥ अथान्यदा स गुरुर्निर्गच्छन्नी राजमन्दिरे । सार्धं निन्ये तत्र गत्वा राज्ञेऽदायि च पौषधम्

॥ १४ ॥ निशायाः सूरिन्नूपान्यां याममादिममञ्जसा । धर्मध्यानेनातिवाह्य सुप्तमेकत्र संस्तरे ॥ १५ ॥ तदा पापात्मना तेनोत्थाय ह्रुरिकया तया । विपाद्य काश्यपीशक्रं मुनिनाऽथ पलायितम् ॥ १६ ॥ प्रबुद्धैः सूरिन्निर्वीक्ष्य तद्दुष्टात्मविचेष्टितम् । अहो पापमहो पापमिति ज्ञातं कृपापरैः ॥ १७ ॥ मा न्नूत्प्रवचनोड्डाहोऽसाविदं विमृशन् गुरुः । विहितारा-धनस्त्रुर्या तयैव स्वशिरोऽच्छिनत् ॥ १८ ॥ स पापात्माऽपि स्वस्वामिपार्श्वे गत्वा स्वचेष्टितम् । न्यवेदयदन्नव्योऽयमिति तेनापि नादृतः ॥ १९ ॥ तस्मिन्नेव न्नवेऽनेकदुःखान्यनुन्नवन्नसौ । निन्द्यमानो जनैर्मृत्वा दुर्गदुर्गतिन्नागन्नूत् ॥ २० ॥ एवं दुष्टात्मनां केषांचिद्ध्रुतेऽधिगतेऽपि ही । शुचिता स्यान्न किं पूता विष्टा स्यात्संस्क्रियाशतैः ॥ २१ ॥

॥ इत्युदायिनृपमारकमुनिकथानकम् ॥

साधूनां महान्नतफलमुक्त्वाऽथाणुव्रतानां फलमाविर्न्नावयन्नाह—

साधोरह्नाय सिद्धिः सुचरणकरणैः श्रावकस्यापि हि स्या-
न्मध्येऽष्टानां न्नवानां शशिविशदगुणानन्दनानन्दवत्तैः ।
चेन्नौन्निः शीघ्रगान्निर्जलधिजलपथैस्तीरदेशेषु पान्थाः,
केचिद्यान्त्याशु नान्ये हयकरन्नरथैर्न्नूपथैः किं क्रमेण ॥ २९ ॥

---

१ हत्वा. २ पृथ्वीन्द्रम्.

व्याख्या—साधोर्मुनेरहाय वेगेन सुचरणकरणैः प्रधानचरणसप्ततिकाकरणसप्ततिकासेवनेन सिद्धिर्भवति । ते चेमे—

"वय समणधम्म संजम वेयावच्चं च बंभगुत्तीउं । नाणाइतियं तव कोहनिग्गहाई चरणमेयं ॥ १ ॥

पिंडविसोही समीई भावण पडिमा य इंदियनिरोहो । पडिलेहणगुत्तीउं अभिग्गहा चेव करणं तु ॥ २ ॥"

तथा हिनिश्चितं अष्टानां भवानां मध्ये श्रावकस्यापि सिद्धिस्तैः सुचरणकरणैर्भवेत् । किंवत् ? शशिविशदगुणानन्द-नानन्दवत् चन्द्रोज्ज्वलगुणानन्दकानन्दश्रावकस्तद्वदिति । एतदर्थानुकूलं दृष्टान्तमाह—चेद्यदि केचित् पान्थाः शीघ्र-गामिस्त्वरितगमनाभिर्नौभिस्तरीभिर्जलधिजलपथैः वार्द्धिवारिमार्गैः आशु शीघ्रं तीरदेशेषु यान्ति, तर्हि अन्ये पान्था हयकरभरथैरश्वोष्ट्रशकटैः कृत्वा भूपथैर्भूमिमार्गैस्तीरदेशेषु क्रमेण किं न यान्ति ? अपि तु यान्त्येवेत्यक्षरार्थः । कथा चेयम्—(आनन्दश्रावककथा)—

परानन्दिरमारम्यो[1] ग्रामो वाणिजकाभिधः । जितशत्रुमहीनाथसनाथोऽभूत् क्षमातले ॥ १ ॥ तत्रानन्दाभिधो गेह-पतिः पौरविशामभूत् । नेत्राण्यानन्दयन्निन्दुश्चकोराणामिव क्षितौ ॥ २ ॥ सौन्दर्यहारिणी तस्य बभूव सहचारिणी । शिवनन्देति सल्लीला रोहिणीवामृतत्विषः ॥ ३ ॥ व्यवहारे निधौ वृद्धौ चतस्रोऽस्य पृथक् पृथक् । सुवर्णकोटयो जज्ञुश्च-त्वारश्च गवां व्रजाः ॥ ४ ॥ अन्यदा विहरन् वीरजिनेशः काश्यपीतले । तत्पुरोपवने दूतिपलाशे समवासरत् ॥ ५ ॥ जित-शत्रुद्रुमानाथस्त्रिजगन्नाथमागतम् । निशम्य संभ्रमान्नन्तुं जगाम सपरिच्छदः ॥ ६ ॥ आनन्दोऽप्यगमत्पादमूले पद्भ्यां जग-

१ परमेन्दिरया रम्यो इति वा पाठः. २ चन्द्रस्य.

द्विजोः । श्रुतिपीयूषगण्डूषकल्पां शुश्राव देशनाम् ॥ ७ ॥ नत्वा श्रीवर्धमानस्यानन्दः पादौ पुरः स्थितः । श्राद्धधर्मं स जग्राह सद्वादशविधं गुणी ॥ ८ ॥ शिवनन्दां विना नारीं सोऽत्यजत् स्वर्णमप्यथ । चतस्रश्चतस्रो हेमकोटीर्निध्यादिगा विना ॥ ९ ॥ प्रत्याख्याज्ञोव्रजानेष गोव्रजाँश्चतुरोऽन्तरा । हलपञ्चशतीं मुक्त्वा क्षेत्रत्यागं चकार च ॥ १० ॥ अनांसि वर्जयामास पञ्च पञ्च शतात् विना । दिग्यात्राव्यापृतानामनसां वहतां च सः ॥ ११ ॥ आर्द्रां विना मधुयष्टिं स जहौ दन्तधावनम् । व्यवर्जयच्च सत्क्षीरामलकादपरं फलम् ॥ १२ ॥ अभ्यङ्गं च विना तैलं तत्याज शतपाकिमम् । अष्टभ्य औष्ट्रिकपयस्कुम्भेन्योऽन्यच्च मज्जनम् ॥ १३ ॥ वासः क्षौमयुगादन्यद्वर्जयामास सोऽखिलम् । श्रीखण्डागरुघुसृणान्यपास्यान्यविलेपनम् ॥ १४ ॥ सर्वमेवमभिगृह्यानन्दोऽगान्निजवेश्मनि । मुदितः शिवनन्दायाः पुरोऽशेषं न्यवेदयत् ॥ १५ ॥ तत्क्षणाच्छिवनन्दाऽपि गत्वा श्रीवीरसन्निधौ । श्राद्धधर्मं प्रतिश्रुत्य प्रभुं नत्वाऽगमद्गृहे ॥ १६ ॥ अथ नत्वा जिनाधीशमिति प्रोवाच गौतमः । आनन्दोऽयं महात्मा किं यतिधर्मं प्रपत्स्यते ॥ १७ ॥ सर्वज्ञः स्माह वत्सायमानन्दः श्रावकव्रतम् । चिरं प्रपाल्य प्रान्ते च विहिताराधनः सुधीः ॥ १८ ॥ विपद्य प्रथमे कल्पे विमाने चारुणप्रभे । चतुष्पल्योपमायुष्को भविष्यत्यमरोत्तमः ॥ १९ ॥ च्युत्वोत्पद्य मनुष्येषु प्राप्य श्रियमथाद्भुताम् । आराध्य चार्हतं धर्मं निष्कर्मा मोक्षमेष्यति ॥ २० ॥ एवमन्येऽपि ये श्राद्धाः श्राद्धधर्ममुपासते । आसाद्य तेऽपि देवर्द्धिं सिद्धिं यास्यन्त्यनुक्रमात् ॥ २१ ॥

॥ इति श्रीआनन्दश्रावककथा ॥

---

१ अङ्गीकृत्य.

पुनर्गृहिधर्ममाहात्म्यमाह—

सम्यक्त्वोदारतेजा नवनवफलदावर्त्तरूपव्रतालिः
सिद्धान्तोक्तैकविंशत्यमलगुणगतिः श्राद्धधर्मस्तुरङ्गः ।
प्रापय्यान्तं भवाब्धेर्नयति शिवपुरं कामदेवादिवत्तत्,
मिथ्यात्वाधीशशङ्कादिकहयहरतो यत्नतो रक्षणीयः ॥ ३० ॥

व्याख्या—श्राद्धधर्मः श्रावकधर्म एव तुरङ्गमः पालकान् शिवपुरं नयति मोक्षनगरं प्रापयति । किं कृत्वा ? भवाब्धेः संसारगिरेरन्तं पारं प्रापय्य नीत्वा । किंवत् ? कामदेवादिवत् यथा कामदेवप्रमुखान् दश श्रावकान् श्राद्धधर्मस्तुरङ्गः शिवपुरं निनाय । किंरूपः ? सम्यक्त्वमेवोदारमद्भुतं तेजो यस्य स तथा । नवनवं फलं ददातीति नवनवफलदा एवंविधाऽऽवर्तरूपा व्रतालिर्व्रतपरम्परा यस्य स तथा । पुनः किंभूतः ? सिद्धान्ते उक्ता ये एकविंशतिसङ्ख्या अमला गुणास्त एव गतिर्यस्य स तथा । श्रावकगुणाश्चैते—

"धम्मरयणस्स जुग्गो अक्खुद्दो रूववं पगइसोमो । लोगप्पिउ अकूरो भीरू असढो सुदक्खिन्नो ॥ १ ॥
लज्जालुउ दयालू मज्झत्थो सोमदिट्ठि गुणरागी । सक्कह सुपक्खजुत्तो सुदीहदंसी विसेसन्नू ॥ २ ॥
वुड्ढाणुगो विणीउ कयन्नुउ परहिअत्थकारी य । तह चेव लद्धलक्खो इगवीसगुणो हवइ सड्ढो ॥ ३ ॥"

स मिथ्यात्वाधीशस्य ये शङ्कादयः पञ्च हयहरा अश्वचौरास्तेभ्यो यत्नत आदरतो रक्षणीयः पालनीयः । ते चेमे—

"शङ्का काङ्क्षा विचिकित्सा मिथ्यादृष्टिप्रशंसनम् । तत्संस्तवश्च पञ्चापि सम्यक्त्वं दूषयन्त्यमी ॥ १ ॥"

अन्योऽपि तुरङ्गम उदारतेजा नानाफलदायकत्रमरावर्तरोमालिश्चामलगतिः सन् गिरेरन्तं प्रापय्य शिवपुरं निरुपद्रवनगरं नयति स चौरेभ्यो रक्ष्यते । इति काव्यार्थः । कथानकमिदम्—

अस्ति न्यायनृपालौकश्चम्पा नाम्ना महापुरी । यया निजश्रिया भूमिजामिन्यास्तिलकायितम् ॥ १ ॥ जितशत्रुरिति-ख्यातस्तस्यामासीत् क्षमापतिः । यत्प्रतापप्रदीपेऽत्र वैरिभिः शलभायितम् ॥ २ ॥ कामदेवाख्यया तस्यां जज्ञे गृहपतिः सुधीः । आश्रयोऽखिलपौराणां महाशाखीव वर्त्मनि ॥ ३ ॥ जज्ञा नाम्नाऽजवत्तस्य रूपसौन्दर्यशालिनी । सधर्मिणी स्थिरीभूता लक्ष्मीरिव मनोहरा ॥ ४ ॥ हेमकोट्यो निधौ वृद्धौ षट् षट् व्यवहृतौ तथा । तस्याभूवन् व्रजाः षट् च दश-साहस्रिका गवाम् ॥ ५ ॥ तदा च विहरन् पृथ्वीं तत्र पृथ्वीविभूषणे । पुण्यजाख्ययोद्यानेऽन्तिमोऽर्हन् समवासरत् ॥ ६ ॥ कामदेवोऽथ तीर्थेशमंहिघ्रियां वन्दितुं ययौ । अशृणीच्च सुधास्वादमिवेष्टां धर्मदेशनाम् ॥ ७ ॥ कामदेवोऽथ देवेन्द्रमानवेन्द्रगुरोः पुरः । जग्राह गृहिणां धर्मं तं द्वादशविधं सुधीः ॥ ८ ॥ स स्त्रीं जज्ञां विनाऽत्याक्षीत् षड्भ्योऽन्यान् गोव्रजान् पुनः । षट् षट् कोटीर्विना हेम वृद्धौ व्यवहृतौ निधौ ॥ ९ ॥ आनन्द इव शेषं स वस्त्वजिग्रहमग्रहीत् । ततः प्रभुं प्रणम्यागात् कामदेवो निजं गृहम् ॥ १० ॥ स्वं गृहीते श्रावकत्वे तेनोक्ते तस्य वल्लभा । जज्ञाप्यागत्य जग्राह गृहि-

धर्मं जिनान्तिके ॥ ११ ॥ चालितोऽप्यचलद्देवैर्देवाचल इवैष न । कामदेवः सौवधर्मं पालयन् निःस्ववन्निधिम् ॥ १२ ॥
जिनो गौतमपृष्टोऽवगानन्दस्येव तस्य च । गतिमेवं विधेयोऽन्यैः श्राद्धैः श्राद्धव्रतादरः ॥ १३ ॥

॥ इति कामदेवकथा ॥

उक्तं चतुर्दशं श्रावकत्वद्वारं । अथ द्वादशसु व्रतेषु पूर्वमहिंसां प्रतिपादयति—

धर्माणां गुरुरेव जन्तुषु दया धर्मस्ततः संस्थितः, श्रीवज्रायुधचक्रवर्तिसदृशां नो सङ्गमादेर्हृदि ।
चूलायां कनकाचलस्य रमते कल्पद्रुमो नो मरौ, किं चैरावणवारणः कुनृपतेर्द्वारेऽस्ति यः स्वःपतेः ॥ ३१ ॥

व्याख्या—जन्तुषु प्राणिषु विषये यो दयाधर्मः कृपाधर्मः स धर्माणां दानादीनां गुरुरेवोत्कृष्ट एव ततस्तस्मात् कारणात् वज्रायुधचक्रवर्तिसदृशामुत्तमपुंसां हृदि चेतसि दयाधर्मः संस्थितः सङ्गमादेरन्यजीवस्य हृदि स न संस्थितः । अमुमेवार्थं दृष्टान्तेन स्पष्टयति—कनकाचलस्य मेरुपर्वतस्य चूलायां चूलिकाया उपरि कल्पद्रुमो रमते तथा मरौ मरुस्थलीदेशे न रमते । च पुनरैरावणवारणः कुनृपतेर्द्वारे गृहद्वारे किमस्ति ? अपि तु नास्त्येव । य ऐरावणः स्वःपतेरिन्द्रस्य द्वारेऽस्ति । इति काव्याक्षरार्थः । कथे चैते (वज्रायुधचक्रिकथा सङ्गमकथा च)—

रत्नसञ्चयजातश्रीर्नगरी रत्नसञ्चया । समस्ति शस्तविस्तारिविदेहावनिमण्डनम् ॥ १ ॥ जयदत्तस्फुरत्प्रीतिविबुधव्रातसेवितः । चक्री वज्रायुधस्तत्र वज्रायुध इवाजवत् ॥ २ ॥ शुद्धबुद्धमनःप्रीतिदायिनी विमलाशया । जहाति राजहंसीव दया

यस्य न मानसम् ॥ ३ ॥ कृपालुः स महीपालः पालयन् शरणागतान् । विरुदं शरणायातवज्रपञ्जर इत्यधात् ॥ ४ ॥ अन्येद्युर्द्युसदामग्रे जगाद द्युसदां पतिः । न वज्रायुधतुल्योऽस्ति दयालुः कोऽपि सात्त्विकः ॥ ५ ॥ देवावश्रद्दधानौ द्वाविति पौरन्दरीं गिरम् । कृतपारापतश्येनरूपौ प्राप्तौ नृपान्तिके ॥ ६ ॥ स्माह पारापतः स्वामिन् पाहि मां शरणागतम् । श्येनोऽन्यधात् क्षुधार्त्तस्य मम जन्तव्यं समर्पय ॥ ७ ॥ वदन्ताविति तौ वीक्ष्य पक्षिणौ नरजाषया । किमेतदिति संभ्रान्तो दध्यौ वज्रायुधो हृदि ॥ ८ ॥ मनुष्यजाषया नैवं क्वचिज्जल्पन्ति पक्षिणः । नूनमेतौ पक्षिरूपौ देवौ विद्याधरावथ ॥ ९ ॥ यः कोऽप्यस्तु परं प्राज्ञैस्त्रातव्यः शरणागतः । इत्युत्पन्नकृपो जीतं चक्री पारापतं जगौ ॥ १० ॥ जोः पक्षिन् मा जयं कार्षीस्त्वं मे शरणमाश्रितः । शक्रश्चक्रयपि चेत्कुप्येत्त्वां रक्षामि तथाऽप्यहम् ॥ ११ ॥ इत्युत्सङ्गं प्रसार्याथ वज्रपञ्जरसोदरम् । न्यवीविशत् कृपालुस्तं नृपालः पक्षिणं यदा ॥ १२ ॥ तदा श्येनो जगौ राजन् क्षुधितेन मया नृशम् । प्राप्तः पारापतोऽयं किं बलाच्छुद्दाल्यते त्वया ॥ १३ ॥ दयालो यन्न मे जन्तव्यं यदेतेन विना मम । प्राणा यान्ति क्षणादेव दीपः स्नेहोज्झितो यथा ॥ १४ ॥ इति श्रुत्वाऽन्यधाद्वज्रायुधः कारुणिकाग्रणीः । न युज्यते सतां पक्षिन् शरणे सङ्गतार्पणम् ॥ १५ ॥ यच्च हत्वा परप्राणान् स्वकीयप्राणपोषणम् । ते चापि नोचितं जन्तु महान्तो यदयालवः ॥ १६ ॥ यथा तव प्रियाः प्राणा अन्येषां च तथा प्रियाः । अतः स्वप्राणवज्जन्तवः परप्राणा विचक्षणैः ॥ १७ ॥ एनं क्षुद्दुःखनाशाय पक्षिणं त्वं जिघांससि । परमेतद्वधो दुःखमनन्तं ते प्रदास्यति ॥ १८ ॥ तृप्तिस्ते क्षणिकानेन जाव्यस्य तु जवक्षयः । अतः परवधो युक्त्यै पक्षिणामपि नोचितः ॥ १९ ॥ गिरा मधुरया प्रोक्तः श्येनस्तेनेति चक्रिणा । जगाद चक्रिँस्त्वं वहि सत्यं परमदः शृणु ॥ २० ॥

जानाम्यहमपि स्वामिन्नश्रेयः परपीडनम् । किं तु धर्मः क्षुधार्त्तानां चित्ते न विदुषामपि ॥ २१ ॥ चक्री प्रोचे ददाम्यन्य-त्तव त्रोज्यं मनोहरम् । सोऽप्युवाच किमन्येन स्वामिन्मांसाशिनो मम ॥ २२ ॥ ददामि मांसमप्यन्यदित्युक्ते भूभृताऽन्य-धात् । श्येनः स्वव्यापादितान्मे मांसादन्यन्न रोचते ॥ २३ ॥ किं बहुना कृपालुस्त्वं भूपैतद्धितासि चेत् । तन्मां निहंसि चात्मानमुत्साहयितुमर्हसि ॥ २४ ॥ यद्येवं तोलयित्वा स्वमांसमेतत्समं ददे । तद्भुक्त्वा जीव भूपेनेत्युक्तः श्येनोऽवदन्मुदा ॥ २५ ॥ एवं कुर्विति भूपेन तुलामानार्थं (य्य) चैकतः । क्षिप्तः पारापतोऽन्यत्र क्षित्वा क्षिप्तं निजं पलम् ॥ २६ ॥ तुलायां क्षिपति क्षापः स्वकं मांसं यथा यथा । पारापतो देवशक्त्या ववृधे स तथा तथा ॥ २७ ॥ अस्थिरेण स्थिरो धर्मः समलेनामलो यदि । देहेनोपार्ज्यते तत्किं किं न प्राप्तं मया मतम् ॥ २८ ॥ इति ध्यायन्नृपस्तुष्टो वारयत्स्वपि मन्त्रिषु । चिच्छेद स्ववपुः सर्वं रुदत्यन्तःपुरीजने ॥ २९ ॥ इत्यखिन्नमनस्कं तं तौ बुध्वाऽवधिसंविदा । देवौ चमत्कृतौ भूपं प्रकटीभूय चास्तुताम् ॥ ३० ॥ अहो सत्त्वमहो सत्त्वमहो कारुण्यमद्भुतम् । अहो ते शरणायातवत्सलत्वं क्षितीश्वर ॥ ३१ ॥ यादृशस्त्वं धराधीशान्तःसभं वज्रिणा स्तुतः । ततः शतगुणो दृष्टोऽत्रावान्यां करुणानिधिः ॥ ३२ ॥ परं वरं वृणु क्षापेत्युक्तश्च स जगावदः । दयाधर्मोऽस्तु मे नित्यः कृतमन्येन वस्तुना ॥ ३३ ॥ ततस्तत्स्तुतिमुखरमुखौ देवौ दिवं गतौ । क्रमात् संप्राप्तस्वर्गादिश्चक्री शान्तिजिनोऽजनि ॥ ३४ ॥ एवं यत्नो दयाधर्मे जिनैरपि कृतो यदि । तर्हि तत्र कथं कार्यः प्रमादं शिवमिच्छता ॥ ३५ ॥

॥ इति श्रीशान्तिजिनपूर्वभवश्रीवज्रायुधचक्रवर्तिकथालेशोऽयं, विस्तरस्तु श्रीशान्तिचरित्रे ज्ञेयः ॥

॥ अथ सङ्गमकथा ॥

ज्ञस्थं वीरतीर्थेशं वने प्रतिमया स्थितम् । प्रेक्ष्य नत्वा च देवेन्द्र इदं मध्येसभं जगौ ॥ १ ॥ द्रव्ये क्षेत्रे तथा काले भावे वा बह्वबुद्धिकः । ध्यानाच्चालयितुं शक्यो नायं देवासुरैरपि ॥ २ ॥ इदं श्रुत्वा वचः शक्रं शक्रसामानिकः क्रुधा । लोहिताक्षस्त्वज्ञव्यत्वसङ्गः सङ्गमको जगौ ॥ ३ ॥ मर्त्यस्तपस्विमात्रोऽयं यदेवं देव वर्ण्यते । स्वैरमन्तःसभं तत्र हेतुः स्वामित्वमेव हि ॥ ४ ॥ मेरुरुद्भ्रियते मूलाद्यैर्दोष्णा क्षेष्टुखण्डवत् । मर्त्यमात्रं कियानेष तत्पुरो न चलिष्यति ॥ ५ ॥ तं ध्यानाच्चालयामीति प्रोच्योदस्थात्स दुष्टधीः । तपस्येन्नान्यसान्निध्यात्स्वामीतीन्द्र उदास्त च ॥ ६ ॥ दुरालोको दुरात्माऽथ भूत्वा सोऽगात् प्रभोः पुरः । तं च दृष्ट्वा जगद्बन्धुं बाढं क्रुद्धः सुराधमः ॥ ७ ॥ दुर्दिनेन दिनाधीशमिवेन्दुं राहुणेव च । पांसुवर्षेण तीर्थेशं पिदधे सुरपांसनः ॥ ८ ॥ तथाप्यचलितध्यानं जिनं मत्वाऽपहृत्य तम् । कीटिका वज्रतुण्डाः स समन्तान्मुमुचेऽर्हतः ॥ ९ ॥ प्रविशन्त्यो निःसरन्त्यः स्वैरमङ्गेषु ता विभोः । ध्यानं चालयितुं नैव समर्था जज्ञिरे ततः ॥ १० ॥ दंशास्तदुचिता वज्रतुण्डास्तीव्रप्रहारकाः । मोघीभूताः प्रभुं प्रत्यभाग्यस्येव मनोरथाः ॥ ११ ॥ घृतेलिकाश्चण्डतुण्डा वृश्चिका दुष्टकण्टकाः । तन्निर्मिता विभोर्ध्यानभङ्गे नालंभविष्णवः ॥ १२ ॥ खण्डखण्डीकृतश्चण्डैर्नकुलैस्तेन निर्मितैः । महाद्रुम इव स्वामी वेष्टितश्च महोरगैः ॥ १३ ॥ मूषकैर्मुखरैर्दन्तैस्त्रोटितस्त्रिजगत्प्रभुः । गाढमुल्बालितः शुण्डादण्डैर्मत्तमतङ्गजैः ॥ १४ ॥ करिण्या भेदितः शुण्डादन्ताभ्यां तेन सृष्टया । पिशाचैरट्टहासैश्च फेत्कारैर्भापितो विभुः ॥ १५ ॥

१ सुराधमः.

व्याघ्रेण नखरैश्चन्द्रदंष्ट्राग्निः पाटितो दृढम् । मातृपित्रादिरूपैश्च विलापैः प्रार्थितः प्रभुः ॥ १६ ॥ चुल्ल्याधानात् पदोस्तेन प्रभुः संतापितोऽग्निना । पक्कणादिखगैश्चञ्चुनखाघातैः कदर्थितः ॥ १७ ॥ उत्क्षिप्योत्क्षिप्य निक्षिप्तः खरवातैश्च तत्कृतैः । चक्रस्थ इव मृत्पिण्डो भ्रामितः कलिकानिलैः ॥ १८ ॥ आहत्य कालचक्रेणाजानु क्षिप्तः क्षितौ जिनः । तेनाश्व स्वर्गराज्यादिदानालापैश्च लोभितः ॥ १९ ॥ तत्सृष्टनाकिस्त्रैणेन नाटकैः स्मरशाटकैः । प्रार्थितो जगतीनाथो हावभावैर्नवैर्नवैः ॥ २० ॥ इत्येकतम्यां विंशत्युपसर्गान् स सुरोऽकरोत् । प्रभोः परं प्रभुर्ध्यानात्तिलमात्रं चचाल न ॥ २१ ॥ स्वैः[1] सुरोऽथ ह्रिया यातुमक्षमोऽपूर्णसङ्करः । षण्मासानुपसर्गान् स प्रभोश्चक्रेऽघवान्[3] घनान् ॥ २२ ॥ तैस्तथाऽप्यचलं प्रेक्ष्य वातैरिव सुराचलम् । विषण्णोऽलं जगन्नाथं प्रणम्येति जगौ सुरः ॥ २३ ॥ स्वामिन् भग्नप्रतिज्ञोऽहं दुर्धीर्याम्यथ ताँविषम्[5] । महौद्धत्यचेष्टितं क्षन्त्वा पूर्णागूर्विहरेज्जवान्[4] ॥ २४ ॥ तत ऐन्द्रीं सभां प्राप्तं तं च क्रुद्धो हरिर्नृशम् । स्वर्गाद्धामांहिणाऽऽहत्य पापिष्ठं निरवासयत् ॥ २५ ॥ एवं पापात्मनां चित्ते निर्निमित्तापि पापधीः । भवेद्दुर्गतिदा तेन हेया सा शिवमिच्छता ॥ २६ ॥

॥ इति सङ्गमकथा ॥

अथात्रैव विशेषमाह—

एका जीवदयैव नित्यसुखदा तन्नेमिना स्वामिना,
कन्याराज्यधनादि फल्गुतृणवत्संत्यज्य सैवादृता ।

---

१ एकरात्रौ. २ स्वर्गम्. ३ पापवान्. ४ स्वर्गम्. ५ पूर्णप्रतिज्ञ.

सोऽर्हन्वाऽस्य किमुच्यते निजहिते नान्योऽपि मन्दायते,
किं कस्याप्यजरामरत्वमथवा नेष्टं सुखं शाश्वतम् ॥ ३१ ॥

व्याख्या—एकैव जीवदया नित्यं सर्वदा सुखदा सुखदायिनी वर्तते । तत्तस्मात् कारणात् श्रीनेमिना स्वामिना कन्या-राजधनादि निष्फलतृणवत् संत्यज्य मुक्त्वा सैव जीवदयैव आदृताऽङ्गीकृता । वाऽथवा स श्रीनेमिनाथोऽर्हंस्तीर्थंकरस्ते-नास्य श्रीनेमेः किमुच्यते किं कथ्यते ? यतोऽन्योऽपि सामान्योऽपि लोको निजस्यात्मनो हिते सुखकारिणि वस्तुनि न मन्दायते नालसो भवति । अस्मिन्नेवार्थे युक्तिमाह—अजरामरत्वं किं कस्यापि पुरुषस्य नेष्टं नाभीष्टं ? अपि तु सर्व-स्यापीष्टमेव । अथवा शाश्वतं सुखं किं कस्यापि नाभीष्टं ? अपि तु सर्वस्यापीष्टमेव । इत्यक्षरार्थः । कथा त्वियम् (नेमिनाथकथा)—

कुशार्तविषये रम्यं पुरं शौर्यपुराभिधम् । यस्मिन् कुशलिभिर्लोकैर्न स्वर्गोऽपीष्यते क्वचित् ॥ १ ॥ तत्र मुख्यो दशार्हेषु बभूव क्षितिवल्लभः । समुद्र इव गम्भीरः समुद्रविजयाभिधः ॥ २ ॥ राज्ञी तस्य शिवाऽन्वर्था तत्कुक्षावपराजितात् । विमानान्नेमिनाथस्य जीवश्च्युत्वाऽप्यवातरत् ॥ ३ ॥ चतुर्दशमहास्वप्नसूचितार्हत्त्ववैभवम् । सुतं प्राचीव चण्डांशुं भास्वन्तं सुषुवे शिवा ॥ ४ ॥ शक्रादिभिः कृते जन्माभिषेके स्वामिनोऽभिधाम् । पितारिष्टापहत्वेनारिष्टनेमिरितिव्यधात् ॥ ५ ॥ वितन्वन् कुमुदावेशं वर्धमानो दिने दिने । शुक्लपक्षेन्दुवत्स्वामी पित्राह्लादमदाद्भृशम् ॥ ६ ॥ इतश्च कंसे कृष्णेन हते सर्वेऽपि यादवाः । जरासन्धभयान्नष्ट्वा पश्चिमाब्धितटं ययुः ॥ ७ ॥ तत्र देवैः कृतां प्राप्य यादवा द्वारकां पुरीम् । संस्थाप्य

च नृपं कृष्णं ते परां वृद्धिमैयरुः ॥ ८ ॥ क्रमात्तत्रागतं युद्धे जरासन्धार्धचक्रिणम् । हत्वाऽर्धभरताधीशः कृष्णोऽभूत्प्रथमो हरिः ॥ ९ ॥ रममाणोऽथ नेमीशः कृष्णरामादिभिः समम् । शैशवातिक्रमे प्राप यौवनं स्त्रैणमोहनम् ॥ १० ॥ प्रियाभिः क्रीडतो वीक्ष्याथ यादवकुमारकान् । श्रीसमुद्रशिवादेव्याविति श्रीनेमिमूचतुः ॥ ११ ॥ लोकम्पृणैर्गुणैर्वत्स तव प्रीतिः पराऽऽवयोः । तारुण्ये यन्निःप्रियत्वं तेन दूयावहे परम् ॥ १२ ॥ तावेव पितरौ धन्यौ यदृशां पुरतः स्नुषाः । स्फुरन्ति वरनेपथ्या विनयानम्रलोचनाः ॥ १३ ॥ श्रुत्वेति नेमिराख्यत्तत्करिष्ये वां यथासुखम् । सोऽन्यदाऽऽयुधशालायां प्राविशत्क्रीडया प्रभुः ॥ १४ ॥ पाञ्चजन्यं हरेः शङ्खं तथा नेमिरपूरयत् । यथा सभास्थिता हर्यादिका अपि चमत्कृताः ॥ १५ ॥ किमेतदिति संभ्रान्तो हरी राममवग्यदा । तदैत्य यामिकैरुक्तः शङ्खोऽपूरीश नेमिना ॥ १६ ॥ नूनमस्मत्कुले जातो नव्यश्चक्रीति वीक्षितुम् । प्राप्तो रामयुतो विष्णुः श्रीनेमिसविधेऽवदत् ॥ १७ ॥ बन्धो शङ्खस्त्वयाऽपूरि क्षमित्युक्तेऽथ नेमिना । हरिः स्माह तदाऽऽगत्रेर्बलं यत्परीक्ष्यते ॥ १८ ॥ नेम्यनन्तबलः स्मित्वा हरिणा सुप्रसारितम् । नलिनीनालवद्बाहुलोऽवालयल्लीलया भुजम् ॥ १९ ॥ नेमिनाऽथ भुजादण्डे धारितेऽन्दोलयन्नपि । हरिः सर्वाङ्गिसारेणालंभूष्णुर्वालनाय न ॥ २० ॥ प्रीत्याऽथ नेमिमाश्लिष्य श्लाघमानो विसृज्य च । विष्णू रामं जगौ किं न सार्वज्ञौमो भवत्ययम् ॥ २१ ॥ राज्यमास्तां विवाहायाप्येष न स्पृहयत्यहो । कुमार एव द्वाविंशो जिनो भावी जगत्पतिः ॥ २२ ॥ एवं नैमित्तिकादिष्टमित्युक्तो हलिना हरिः । सान्तःपुरो बलान्नेमिं विवाहार्थममानयत् ॥ २३ ॥ कन्यां राजिमतीं शार्ङ्गी

१ पुत्रभार्याः. २ गजः.

याचित्वा च शुभेऽहनि । उग्रसेनगृहद्वारं नेमिं निन्ये महामहम् ॥ २४ ॥ पशून् वीक्ष्य धृताँस्तत्र क्रन्दतो नेमिना बहून् । पृष्टोऽवक् सारथिः स्वामिन् ज्ञाप्येऽनिर्गौरवं तव ॥ २५ ॥ धिग्धिगस्तु विवाहाय यत्रेदृक्प्राणिनां क्षयः । विमोच्येति पशून् सर्वान् रथं नेमिरवालयत् ॥ २६ ॥ श्रीसमुद्रशिवादेव्यौ यादवाः केशवादयः । प्रोचुर्नेमिमकस्मान्निःस्वामिनोऽस्मान् जहासि किम् ॥ २७ ॥ नेम्यवक् त्वं पशुव्याजाद्विमोच्य भवबन्धनात् । कृतार्थयामि युष्माँश्च व्रतादत्या शिवार्पणात् ॥ २८ ॥ इत्युदीर्य प्रभुर्गत्वा गृहे दत्त्वा च वार्षिकम् । दानं जग्राह चारित्रं शक्रैः कृतमहोत्सवः ॥ २९ ॥ क्रमात्स केवलज्ञानं क्षीणकर्मचतुष्टयः । प्राप पापविनिर्मुक्तो देवाधीशकृतस्तुतिः ॥ ३० ॥ चेन्नो नवभवस्नेहशालिनोढाऽस्मि नेमिना । ममाप्येवं तथाप्यस्तु स एव शरणं प्रभुः ॥ ३१ ॥ राजीमतीत्यनादृत्य वरमन्यं प्रभोः करे । दीक्षां कक्षीकृत्य मोक्षमगात्संप्राप्तकेवला ॥ ३२ ॥ नेमिस्तदनु सिद्धिश्रीसाम्राज्यं भेजिवान् जिनः । एवं जीवदया पाल्या विदुषः शिवसुखार्थिनः ॥ ३३ ॥

॥ इति नेमिनाथकथा ॥

व्याख्यातं पञ्चदशं प्राणातिपातव्रतरूपद्वारमिदं । अथ मृषावादव्रतस्वरूपमाह—

सङ्कटेऽपि न महान् मृषा वदेदत्तमातुलककालिकार्यवत् ।
चन्दनः सुरभिरश्मघर्षणेऽपीक्षुरङ्गुतरसोऽपि पीडने ॥ ३३ ॥

---

१ भवपर्यन्तम्.

व्याख्या—महानुत्तमः पुमान् सङ्कटेऽपि न मृषा मिथ्या वदेत् । किंवत्? दत्तमातुलककालिकाचार्यवत् यथा दत्तनाम्नो राज्ञो मातुलः श्रीकालिकाचार्यः सङ्कटेऽपि न मृषाऽवादीत् । यदुक्तम्—

"जीयं काऊण पणं तुरमणिदत्तस्य कालियज्जेण । अवि य सरीरं चत्तं न य ऋणियमहम्मसंजुत्तं ॥ १ ॥"

एतदर्थानुकूलं दृष्टान्तमाह—चन्दनोऽश्मघर्षणेऽपि पाषाणघर्षणेऽपि सुरभिः सुगन्धिः स्यात् । इक्षुः पीडनेऽपि अद्भुतरसः स्यात् । इति काव्यार्थः । कथानकमिदं (कालिकाचार्यकथा)—

पुरी तुरमणीत्यस्ति रमणीया बुधैर्जनैः । यया भूरमणीमौलौ मणीयितमुरुश्रिया ॥ १ ॥ यत्र दुःखलवोऽशेषलोकस्य क्वापि नो भवेत् । मरुस्थलावनौ नीरबिन्दुः कस्य न दुर्लभः ॥ २ ॥ जितशत्रुरिति ख्यातस्तत्राभूद्भूमिवल्लभः । यत्कीर्तिव्रततेर्भान्ति तारकाः स्तबका इव ॥ ३ ॥ यत्प्रतापातपाक्रान्तस्तपनोऽपि निरन्तरम् । बंभ्रमीति मरुन्मार्गे वैरिवर्ग इवावनौ ॥ ४ ॥ यस्य भागवती शिष्टिर्विशिष्टसुखदायिनी । अकृत्रिमं तनौ जज्ञे सर्वाङ्गीणविभूषणम् ॥ ५ ॥ मुख्याधीनं जगत्सर्वमिति मत्वा महामतिः । वर्गत्रयेऽपि मुख्येऽर्थे धर्मे योऽलं मनोऽतनोत् ॥ ६ ॥ रुद्रेतिनामतस्तत्र ब्राह्मण्यासीच्च काचन । विश्रुता धरणीभर्तुः कुले या सकलेऽपि हि ॥ ७ ॥ दत्तोऽभूद्दुष्टधीस्तस्यास्तनयो विनयोज्झितः । धुर्यः पापात्मनां क्रूराचरणानां तथा गुरुः ॥ ८ ॥ शिरोमणिः कृतघ्नानां दुर्जनानां तथाऽऽदिमः । तस्कराणां कलाचार्यो व्यसनानां च जन्मभूः ॥ ९ ॥ युग्मम् ॥ दया दानं दमो देवो दाक्षिण्यमिति पञ्च दाः । गता यन्मनसोऽस्थुश्च दीनतादयितादराः ॥ १० ॥

१ आकाशे.

अन्येद्युः सोऽथ पापात्मा वर्तनाकाङ्क्ष्याऽन्वहम् । प्रावर्ततरां दुष्टः सेवितुं तं धराधिपम् ॥ ११ ॥ ऋजुचेता महीनाथो ब्राह्मणं तं क्रमेण सः । विदधे राज्यसर्वस्वाध्यक्षं दाक्षिण्यवर्जितम् ॥ १२ ॥ लुब्धो राज्यं समैक्षत्स आत्मसात्कर्तुमञ्जसा । दुष्टा हि नुञ्जते यत्र तत्र ञ्जञ्जन्ति ञ्जाजनम् ॥ १३ ॥ विज्ञेद प्रकृतीः सर्वाः क्रमादुचितदानतः । दुरात्मा स कृतघ्ना हि किं न कुर्वन्ति दुर्धियः ॥ १४ ॥ तं च निर्वासयामास धराधीशं स पापधीः । विनाशयन्ति स्वस्थानं घुणवत् किं न दुर्जनाः ॥ १५ ॥ ग्रस्ता तेनाथ तद्राज्यलक्ष्मीश्चन्द्रकलाऽमला । क्रुधेव संयमारामरमा शममनोरमा ॥ १६ ॥ पदे स स्वयमेवोपाविशत्तस्य महीशितुः । पोषितो दुर्जनो यन्न शुन्नोदर्काय सर्पवत् ॥ १७ ॥ नुनक्ति स्म स पापात्मा तस्य नूमिनुजः श्रियम् । मल्लिनो निर्मलां कामं विधोरिव विधुन्तुदः ॥ १८ ॥ विमलं मल्लिनीकुर्वन् विश्वं विश्वमनारतम् । मूर्तिमन्निरिवांहोऽग्निर्धूम्रैरभ्रंलिहैर्नृशम् ॥ १९ ॥ दुर्बुद्धिर्धर्मबुध्याऽथ विदधे स महाक्रतून् । दुर्गदुर्गतिहेतूँस्तान् पशुसंहारकारणम् ॥ २० ॥ युग्मम् ॥ कमला पातकोपात्ता ञ्जवेत् पातककारिणी । इतीवावेदयत् स्वां तां स हिंस्रेऽस्थापयत्क्रतौ ॥ २१ ॥ इतश्च विहरन् नूमिवलये श्रुतसागरः । सेव्यमानांहिपाथोजो नानाव्रतिमधुव्रतैः ॥ २२ ॥ दत्तस्य मातुलो नाम्ना कालिकाचार्य इत्यथो । तत्राजगाम संसारपाथोधौ यानसन्निभः ॥ २३ ॥ युग्मम् ॥ कुवासनामहावासवासितो दत्तनूपतिः । जगाम न हि सूरीन्द्रसविधेऽपि कदाचन ॥ २४ ॥ अतिमात्रं ततो मात्रा सोऽन्यर्थ्यांहोमहानिधिः । प्रजिघ्ये मातुलाचार्यसमीपे दौष्ट्यसंकुलः ॥ २५ ॥ नत्वा तं व्यवहारेण व्याजहार तपोनिधिम् । पापात्मा परुषैर्वाक्यैरतिमत्त इवाञ्जसा ॥ २६ ॥

---

१ आजीविकेच्छया. २ स्वमधीशं इति वा पाठः. ३ राहुः.

आचार्य यदि जानासि किञ्चित्तर्हि निरूपय । कृतानामुक्तविधिना क्रतूनां किं फलं किल ॥ २७ ॥ बभाषे कालिकाचार्यो यदि धर्मं धराधव । शुश्रूषसि तदा कृत्वा मानसं सुस्थिरं शृणु ॥ २८ ॥ यन्नात्मनोऽनुकूलं स्यात् क्रियते तन्न कस्यचित् । धर्मस्य तात्त्विकं मूलमेतदेवास्ति नापरम् ॥ २९ ॥ दत्तः साङ्गेपमित्याख्यत् पृष्टं यज्ञफलं ननु । निरूपयसि किं धर्मं धर्मोदन्तशिरोमणे ॥ ३० ॥ वालुकापीडने तैलं निःसरेदपि किञ्चन । न पुनः सुकृतं हिंसादेरेवं न्यगदद्गुरुः ॥ ३१ ॥ पुनरप्यन्यधादत्तः सकोपं कोऽत्र पृच्छति । हिंसास्वरूपं चेद्वेत्सि फलं यज्ञस्य तद्वद ॥ ३२ ॥ जजल्प कालिकाचार्यः पशुसंहारहेतवः । क्रतवस्तत्फलं श्वभ्रगामितैव ततो ध्रुवम् ॥ ३३ ॥ दत्तः पप्रच्छ सूरीन्द्रं रोषारुणितलोचनः । कः प्रत्ययोऽत्र तं ब्रूहि जिजीविषसि चेद्भव ॥ ३४ ॥ दिने शुनककुंन्यां त्वं सप्तमे पद्यसे यदि । तत्त्वं नरकदुःखानि प्राप्स्यसीत्यवदद्गुरुः ॥ ३५ ॥ ततः क्रुद्धो भृशं दत्तो भृकुटीभीषणाननः । नन्वत्रापि विधौ कोऽस्ति प्रत्ययोऽदो जगाद सः ॥ ३६ ॥ भूयोऽपि सूरिरित्याख्यद्भुनकुंन्नीविपाकतः । पूर्वमेव दिने तस्मिन् विष्टाऽऽस्ये ते प्रवेक्ष्यति ॥ ३७ ॥ हसित्वा दत्त इत्यूचे विलक्षः पुरतो गुरोः । मृत्युः कुतः कदाऽऽचार्य भवतो भविता वद ॥ ३८ ॥ निजगादेति सूरीन्द्रो न कुतोऽपि मृतिर्मम । किं तु काले निजं सर्वं पापमालोच्य सर्वथा ॥ ३९ ॥ सम्यगाराधनां कृत्वा चतुःशरणमाश्रितः । गृहीतानशनो मृत्वाऽहं यास्यामि त्रिविष्टपम् ॥ ४० ॥ युग्मम् ॥ तदाऽतिकुपितो दत्तोऽन्तिकस्थान् स्वजनान् जगौ । अहो मायाविनं दुष्टं रुन्ध्व रुन्ध्वेत्यमुं रयात् ॥ ४१ ॥ अथ तैः कालिकाचार्यस्तदादेशवशंवदैः । समरुध्यत पुंभिः स कुक्कुरैरिव कुञ्जरः ॥ ४२ ॥ इतश्च तस्य सामन्ता दत्तात्ते दुष्टकर्मणः । जग्मुर्विना निखिलाः को हि नैवोद्विज्येत तादृशात् ॥ ४३ ॥ संभूय तैर्मिथो मन्त्रं कृत्वा

प्राक्तनभूपतिः । आहूतः स तदादातुं दत्तं तस्मै नियन्त्रितम् ॥ ४४ ॥ स्वसौध एव संलीनो दत्तः शङ्कितमानसः । कुञ्जे कुञ्जरवत् सिंहनादाभ्रस्तः स तस्थिवान् ॥ ४५ ॥ सर्वत्रापि पुरेऽशुद्धवस्तुजातं च वर्त्मनः । संशोध्य निखिलाध्वानं पवित्री-चक्रिरे जनैः ॥ ४६ ॥ तदाज्ञया न केनाप्यशुचिः कचवरादिकः । निक्षिप्यते पुरे क्वापि राज्ञामाज्ञा हि दुस्तरा ॥ ४७ ॥ युग्मम् ॥ सर्वतो राजवर्त्मानमथारक्षैररक्ष्यत् । दत्तः पापनिधिर्दुष्टो गृहस्थोऽत्यैच्च वासरान् ॥ ४८ ॥ दैवाद्विस्मृत्य संप्राप्ते दिवसे सप्तमेऽपि सः । निःससार बहिर्गेहात् कस्यान्ते धीर्न मुह्यति ॥ ४९ ॥ तदैको मालिकः पुष्पकरण्डककरः प्रगे । आगच्छन् राजवर्त्मान्तः शकृद्वेगातुरोऽजनि ॥ ५० ॥ विष्टां कृत्वा तदा तत्र त्रिया पुष्पैः प्यधत्त सः । मालिकः कः शकृ-द्वेगं क्षमो धारयितुं नरः ॥ ५१ ॥ अद्यैव तं हनिष्यामि पशुवन्मुनिपांशुनम् । ध्यायन्निति गुरोः पार्श्वे गन्तुं दत्तः प्रच-क्रमे ॥ ५२ ॥ बलादश्वखुरोत्क्षिप्ता विष्टा मार्गस्थिताऽथ सा । दत्तस्य प्रविवेशास्येऽसत्या स्यान्मुनिगीः कथम् ॥ ५३ ॥ ततो दत्तो विलक्षोऽभूद्वाखाभ्रष्टो यथा कपिः । सामन्ताद्याननापृच्छ्य प्रत्यचालीन्निजालयम् ॥ ५४ ॥ मन्त्रो नोऽज्ञाय्यने-नेति दत्तः प्रकृतिपूरुषैः । स्वालये प्रविशन्नेव स बब्धो गौरिव क्षणात् ॥ ५५ ॥ स्वतेजसा तिरस्कुर्वन् दत्तेदत्तं तमोऽखि-लम् । प्रादुर्बभूव भूनेता प्राक्तनस्तीव्ररश्मिवत् ॥ ५६ ॥ कोपकम्प्रतनुर्दत्तः करेणुन्यस्तसर्पवत् । श्वभ्रकुम्भ्यामिव क्षिप्तः शुनकुम्भ्यां स धीसखैः ॥ ५७ ॥ तस्या अथोऽन्तराले च ताप्यमानोऽग्निना भृशम् । दुःखायतेतरां दत्तो नरके नारको यथा ॥ ५८ ॥ विव्यधुः सर्वतस्तं च शुनकाश्चण्डतुण्डकाः । नारकं परिक्षिश्यन्तः परमाधार्मिका इव ॥ ५९ ॥ इति दुःख-

१ अस्माकम्. २ दत्तनृपेण दत्तं.

मृतिं प्राप्य दत्तो दुर्गतिन्नागन्नूत् । चिरमुर्व्यां विहृत्यागुः सूरयोऽपि दिवं सुखम् ॥ ६० ॥ इति व्यसनसंन्नारन्नारैः परवशीकृतः । ज्ञः सत्यं वक्ति यत्सत्यव्रतनिष्ठागुणश्रियः ॥ ६१ ॥

॥ इति कालिकाचार्यकथानकम् ॥

पुनरत्रैव विशेषमाह—

घोरां दुर्गतिमेत्यलीकलवमप्यन्यार्थितोऽपि ब्रुवन्, वादे नारदपर्वताख्यसुहृदोर्यद्वद्वसुर्नृपतिः ।
चक्रेऽर्चाविधुरो विरञ्चिरनृतात्केतक्यनिष्टा मृषा, साक्षात्किं न हरिर्नवेन महितः सत्यात्परीक्षाक्षणे॥३४॥

व्याख्या—अन्येन केनापि मित्रादिनाऽन्यार्थितोऽपि प्रार्थितोऽपि सन् अलीकलवमपि कूटवचोलेशमपि ब्रुवन् वदन् घोरां रौद्रां दुर्गतिं नरकतिर्यग्गतिं एति याति । यद्वत् यथा वसुनामा नृपतिर्नारदपर्वताख्यसुहृदोर्वादे पर्वतमात्राऽन्यार्थितः सन् अलीकलवं ब्रुवन् दुर्गतिं याति स्म । इहार्थे लौकिकदृष्टान्तमाह—नवेनेश्वरेण परीक्षाक्षणे परीक्षणप्रस्तावेऽनृतादसत्यवचनात् विरञ्चिर्ब्रह्माऽर्चाविधुरः पूजारहितश्चक्रे कृतः, ततोऽद्यापि ब्रह्मा क्वापि लोकैर्न पूज्यते । तथा केतकी मृषेति मृषावादात् नवेनानिष्टा पूजायां त्याज्या चक्रे अद्यापीश्वरस्य पूजायां केतकी न चटति । तथा सत्यात्सत्यवचनान्नवेन हरिर्नारायणः साक्षात्स्वयमेव किं न महितो न पूजितः ? अपि तु महित एवेति सत्यवचनफलमिति वृत्ताक्षरार्थः । कथा चेयं (वसुराजकथा)—

शुक्तिमत्यां महापुर्यामन्निचन्द्राख्यया नृपः । तस्य सूनुर्वसुनामाऽजनि सत्यव्रते रतः ॥ १ ॥ तत्र क्षीरकदम्बाख्यः

पाठकः सर्वशास्त्रवित् । सुतः पर्वतकस्तस्य बभूव कुटिलाशयः ॥ २ ॥ वसुः पर्वतकश्चापि तथाऽन्यो नारदस्त्रयः । नित्यं क्षीरकदम्बस्य सन्निधाने पठन्त्यमी ॥ ३ ॥ अध्यापयत्युपाध्यायो हितैषी तान् दिवानिशम् । हितकारी न चास्त्यत्र त्रैलोक्येऽप्यपरो गुरोः ॥ ४ ॥ अन्येद्युः पठतां तेषां रजन्यां सौधमूर्धनि । जाग्रत्येव गुरौ निद्रा मनाक् पाठश्रमादभूत् ॥ ५ ॥ तदानीं व्योम्नि गच्छन्तौ द्वौ चारणमहामुनी । पठतस्तान्निशाद्येति प्रोचतुश्चेतरेतरम् ॥ ६ ॥ एषामेकः स्वर्गगामी द्वौ पुनः श्वभ्रगामिनौ । श्रुत्वेति पाठको दध्यौ विषादविधुराशयः ॥ ७ ॥ मयाऽपि पाठितौ शिष्यौ नरकं यास्यतो हहा । न मिथ्यावाग्मुनिरेन्यः को यास्यति दिवं परम् ॥ ८ ॥ श्वभ्रं कौ चेति जिज्ञासुः शिष्यानाकार्य तान् गुरुः । निजगादेदमेकैकं दत्त्वैषां पिष्टकुर्कुटम् ॥ ९ ॥ तत्र वध्या अमी वत्सा यत्र कोऽपि न वीक्षते । वसुपर्वतकौ शून्यदेशे गत्वाऽहतां च तौ ॥ १० ॥ नारदस्तु वने गत्वा दध्यावित्यादिशद्गुरुः । वध्योऽयं कुर्कुटस्तत्र यत्र कोऽपि न पश्यति ॥ ११ ॥ पश्यत्ययमहं पश्याम्यमी पश्यन्ति योगिनः । तत्स्थानं नास्ति विश्वेऽपि यत्र कोऽपि न पश्यति ॥ १२ ॥ गुरुन्निस्तद्यावन्निर्मम प्रज्ञां परीक्षितुम् । इत्यादिष्टं ततोऽहत्वा तं प्राप्तो नारदस्ततः ॥ १३ ॥ गुरोर्व्यज्ञपयच्चैष हेतुं तं कुर्कुटावधे । स तुष्टः स्वर्गगामीति नारदं बह्वमानयत् ॥ १४ ॥ वसुपर्वतकौ पश्चादागताविदमूचतुः । मारितौ कुर्कुटौ तत्र यत्र कोऽपि न वीक्षते ॥ १५ ॥ युवामपश्यतं तं चाऽवादीद्गुरुः सर्वेऽपि खेचराः । हतौ कथं कुर्कुटौ रे दुष्टावित्यशपद्गुरुः ॥ १६ ॥ इत्यतो निश्चयं कृत्वा खिन्नः क्षीरकदम्बकः । दध्यौ मे पाठनायासोऽनयोर्जज्ञे निरर्थकः ॥ १७ ॥ किं तेन पठितेनापि येनात्मा नरकं व्रजेत् । वैराग्यादित्युपाध्यायः प्राव्राजीद्गुरुसन्निधौ ॥ १८ ॥ पर्वतस्तत्पदेऽस्थापि लोकैः शास्त्रार्थपारगः । नारदो-

ऽपि विशुद्धात्मा जगाम स्वगुरुं क्रमात् ॥ १९ ॥ व्रतं नृपेऽग्निचन्द्रेऽपि श्रिते राजाऽभवद्वसुः । सत्यवादेन च प्राप प्रसिद्धिं महतीं क्षितौ ॥ २० ॥ व्याधेन केनचिद्विन्ध्यनितम्बे स्फाटिकी शिला । बाणस्खलनतो ज्ञाता हस्तस्पर्शेन निर्मला ॥ २१ ॥ योग्येयं वसुराजस्य ह्यनं व्याधेन दर्शिता । तेनानाय्य जनैश्चास्तैः स्वासनाधो निवेशिता ॥ २२ ॥ तस्यां तदासनं लोको गगनस्थं विदन् जगौ । सत्यात्तुष्टाः सुरा वश्याश्चास्यासँस्तन्महानृपः ॥ २३ ॥ तत्सामन्तनृपाः सर्वे जाता-स्तस्य वशंवदाः । इतश्च नारदस्तत्रायातश्चैक्षिष्ट पर्वतम् ॥ २४ ॥ अजैर्यष्टव्यमित्यत्र मेषैरिति विवेचकम् । शिष्याणां नारदोऽवक् तं भ्रातः किमिदमुच्यते ॥ २५ ॥ त्रिवार्षिकाणि शस्यानि न हि जायन्त इत्यजाः । व्याख्याता गुरुणाऽ-स्माकं किं न स्मरसि बान्धव ॥ २६ ॥ जगौ पर्वतकश्चाथ नेदं तातेन भाषितम् । किं त्वादिष्टा अजा मेषा मोक्षङ्क्ष्य गुरोर्गिरम् ॥ २७ ॥ नारदोऽवग्गुरुः पुण्यात्मा श्रुतिर्धर्मसाधिनी । तद्वयं चान्यथा कुर्वन्मित्र स्वं मा कदर्थय ॥ २८ ॥ जिह्वाच्छेदः पणो जज्ञे तयोर्विवदमानयोः । प्रमाणं तद्वयोरत्र सहाध्यायी नृपो वसुः ॥ २९ ॥ रहोऽवक् पर्वतं माता सद्म-कर्मरताऽप्यहम् । अजास्त्रिहायनं धान्यमित्यश्रौषं पितुस्तव ॥ ३० ॥ जिह्वाच्छेदपणो युक्तस्त्वया न विहितः सुत । सोऽ-वग्यथा तथाऽस्त्वेतत् कथमम्ब करोम्यथ ॥ ३१ ॥ ततः सा वसुनृपस्य पार्श्वे गत्वा जगाविति । वत्स त्वामार्थितुं प्राप्ता पुत्रभिक्षां प्रयच्छ मे ॥ ३२ ॥ स स्माह मातः पूज्याऽसि गुरुवत्त्वं ममान्वहम् । तत्ते पुत्रस्य मद्भ्रातुर्जिघांसुः कोऽस्ति मे वद ॥ ३३ ॥ साथोक्त्वा वादवृत्तान्तं पणं चाख्यद्वयोरिति । अजा मेषाः प्रगे वाच्या भ्रातरं यदि रक्षसि ॥ ३४ ॥ साशङ्कः स्माह नृपोऽम्ब कूटसाक्ष्यं कथं व(द)दे । सन्तः सत्यव्रता हि स्युस्तदन्यन्मातरादिश ॥ ३५ ॥ सा रुष्टाऽऽख्य-

त्तत्स्वबन्धुं हत्वा सत्यव्रतो ऽव । नृपोऽथ तद्वचोऽमंस्त सा प्रीता स्वगृहे गता ॥ ३६ ॥ वसुराजसभां प्राप्तौ प्रातर्नारद-पर्वतौ । स्वं स्वं पक्षं समुज्ञाप्य सत्यं ब्रूहीति वादिनौ ॥ ३७ ॥ वसुराजं जगुः सभ्या वादोऽयं त्वयि तिष्ठते । ततः सुरा-सुरश्लाघ्यं सत्यमादिश सम्प्रति ॥ ३८ ॥ इति श्रुत्वाऽपि स क्षापस्तदाग्रहवशंवदः । अजान्मेषान् गुरुर्व्याख्यादित्थं साद्यं वसुर्ददौ ॥ ३९ ॥ तत्कुद्धा देवता क्षित्वा क्षितौ सिंहासनाद्वसुम् । निपात्य पर्वतं चाशु चकार नरकातिथिम् ॥ ४० ॥ नारदः संस्तुतो देवैः सत्यात्स्वर्गं गतः क्रमात् । इति श्रुत्वा बुधैर्नित्यं कार्यः सत्यव्रतादरः ॥ ४१ ॥

॥ इति वसुराजकथा ॥

अन्यकथा त्वियम् (ब्रह्मादीनां कथा)—

अन्येद्युरीश्वरो ब्रह्मा विष्णुश्च मिलिताश्रयः । सर्वे देवास्तदा तत्र कौतुकेन समाययुः ॥ १ ॥ शिवं जगुः सुराः सत्य-वादी कोऽच्युतवेधसोः । तदा शंभुस्तयोः सत्यपरीक्षामकरोदिति ॥ २ ॥ तावाहूय शिवोऽवादीन्मम लिङ्गस्य कोऽप्यहो । पारं यास्यत्यहोऽवक्तां हसित्वेति केकेशवौ ॥ ३ ॥ क्षणाज्जगत्त्रयीपारमावां यावो महेश्वर । तत्ते लिङ्गस्य का वार्ता चित्रं चेन्नौ तदादिश ॥ ४ ॥ तौ शिवेन त्वनुज्ञातौ ततो ब्रह्माम्बरं प्रति । चचाल शीघ्रगत्या च पातालं प्रति केशवः ॥ ५ ॥ गत्वन्नूर्ध्वं विधिर्वेगाल्लिङ्गपारमवाप्नुवन् । पतन्तीं केतकीं खिन्नोऽन्निदधे शंभुमूर्ध्वतः ॥ ६ ॥ किं केतकि त्वया दृष्टो लिङ्गान्तः क्वाप्युमापतेः । साऽवग् रे मूढ तल्लिङ्गपारं नेन्द्रोऽपि गन्तुं ॥ ७ ॥ किं तत्कुर्वे लिङ्गपारं यियासुस्तज्जिगीषया । साऽव-

१ को ब्रह्मा.

गागस्त्र सादयं ते दास्ये मिथ्यापि तत्पुरः ॥ ८ ॥ ततो ब्रह्मा शिवस्याग्रे जगावागत्य हे प्रभो। सम्प्रत्येव भवद्विङ्गपारं गत्वाऽऽगतोऽस्म्यहम् ॥ ९ ॥ शम्भुः स्माहात्र कः साक्षी ब्रह्मोचेऽसौ च केतकी । तदा शिवस्तयोर्मिथ्यावादाद्रुष्टो भृशं हृदि ॥ १० ॥ आख्यच्चायं विधिर्मिथ्यावादी पूज्यो न केनचित् । ततो ब्रह्मा जनैः प्रायः सम्प्रत्यपि न पूज्यते ॥ ११ ॥ केतक्यपि कूटसाक्ष्यदात्री स्वार्चाविधौ जनैः । तेनात्याजि ततोऽद्यापि केतक्या नार्च्यते शिवः ॥ १२ ॥ हरिः सर्वत्र पातालं लिङ्गपारं महेशितुः । भ्रान्त्वाऽप्यप्राप्नुवन् शम्भुपार्श्वं प्राप्तोऽब्रवीदिति ॥ १३ ॥ पारं प्राप्तुमपारस्य पारावारस्य पार्यते । न पुनस्तव लिङ्गस्य त्रिजगद्व्यापिनो विभो ॥ १४ ॥ ततस्तत्सत्यवादेन तुष्टः शम्भुः स्वयं हरिम् । अपूपुजत्ततोऽद्यापि हरिं लोकोऽखिलोऽर्चति ॥ १५ ॥ कल्पितोदाहरणं तु क्वापि सत्यार्थसाधने । गीतार्थैरादृतं तेनाख्यातमत्र मयापि तत् ॥ १६ ॥

॥ इति ब्रह्मादीनां सम्बन्धः ॥

उक्तं षोढशं मृषाव्रतद्वारं । अथ तृतीयमस्तेयव्रतमाह—

वैराग्यशस्त्रहतमोहतमोऽमलान्तर्दृष्ट्या पटिष्ठपरिदृष्टहिताहितार्थः ।
चौरोऽपि शुध्यति शमेन दृढप्रहारीवापैति वा दवजवो जलदेन किं न ॥ ३५ ॥

व्याख्या—चौरोऽपि तस्करोऽपि शमेन क्षान्त्या कृत्वा शुध्यति पापरहितो भवति । किंरूपः ? वैराग्यमेव शस्त्रं तेन हतं यन्मोहतमो मोहान्धकारं तेनामला निर्मला याऽन्तर्दृष्टिरन्तरङ्गज्ञानं तया कृत्वा पटिष्ठाः पटुतां प्राप्ताः परिदृष्टाश्च

हिता धर्मादयोऽहिताः पापादयोऽर्था येन स तथा । क इव दृढप्रहारीव । वा अथवा दवजवो दावानलवेगो जलदेन मेघेन कृत्वा किं नापैति किं न गच्छति ? अपि तु यात्येव । इत्यक्षरार्थः । कथा चासौ—

॥ दृढप्रहारिकथा ॥

चैत्यध्वजालिन्नी राजहंसश्रेणीन्निरन्वहम् । राजमानाऽस्ति गङ्गेव माकन्दीति महापुरी ॥ १ ॥ न्नङ्काकृतिः सुन्नङ्काख्य-स्तत्रान्नूब्रेष्ठिपुङ्गवः । यज्ञनस्य न सीमाऽस्ति सतामिव गुणावलेः ॥ २ ॥ दत्ताख्यस्तस्य पुत्रोऽन्नूत्पाथोधेरिव चन्न्नमाः । शैशवातिक्रमे प्राप्तकलोल्लायः प्रमोदकृत् ॥ ३ ॥ तस्यासीद्व्यसनं द्यूते कलङ्क इव न्नेशितुः । गृहात् पित्रा वारितोऽपि सोऽ-तिष्ठन्निरवास्यत ॥ ४ ॥ पल्लीपतिमुपेत्याथ सिषेवे चौरमध्यगः । कुसंसर्गात्स कुर्वाणश्चौर्यं चौरोऽन्नवन्महान् ॥ ५ ॥ सोऽ-तिदृढप्रहारेण निघ्नँल्लोकाननेकशः । चौरैर्दृढप्रहारीति ततो नाम्नाऽन्यधीयत ॥ ६ ॥ सोऽन्येद्युर्दस्युन्निः सार्धं चौर्यं कुर्वन् पुरादिषु । गृहे कस्यापि विप्रस्य प्राविशत् स्तेयहेतवे ॥ ७ ॥ तद्बालकेषु क्रन्दत्सु कुतोऽप्यागाद्बृहन्नुः । क्रुद्धो घारार्गलां हस्ते कृत्वा दस्यूनताडयत् ॥ ८ ॥ तदा दृढप्रहारीति वीक्ष्य क्रुद्धोऽसिना द्विजम् । जघान ददतीं शापमन्वायान्तीं च तत्प्रियाम् ॥ ९ ॥ ब्राह्मण्यास्तु सगर्भाया न्नीत्या गर्भोऽपतत् क्षितौ । श्वश्रूरथाघ्नती चौरान् काचिच्चौरप्यगात्तदा ॥ १० ॥ विनाशिताऽमुना साऽपि ततो गर्भः क्षितौ लुठन् । दृष्टस्तदाऽस्य सहसा वैराग्यमन्नवद्दृढम् ॥ ११ ॥ हा मया किमिदं पापं जन्मयुग्माहितावहम् । मूढेन विहितं मुक्तिः कथमस्मान्नविष्यति ॥ १२ ॥ अहो प्रशस्ये मद्वंशे हिंसानामापि दुर्व-

१ चन्द्रस्य. २ पित्रा वारितोऽप्यतिष्ठन् स गृहान्निरवास्यतेत्यन्वयः.

चम् । कुसङ्गतो मया चक्रे ब्रह्मस्त्रीभ्रूणगोवधः ॥ १३ ॥ एवं ध्यायँस्तदा दीक्षां कक्षीकृत्य शुभाशयः । कायोत्सर्गं विधायाथ तस्थौ तत्पुरगोपुरे ॥ १४ ॥ यावत् पापं स्मरत्येतन्मम तावन्न पूर्यते । कायोत्सर्गोऽयमित्येवमभिग्रहमसौ दधौ ॥ १५ ॥ जनास्तत्रागताः केऽप्याघ्नन्ति तं लेष्टुयष्टिभिः । केचिद्दन्त्यदृष्टव्यमुखोऽयं पापकृन्महान् ॥ १६ ॥ जनैराकुश्यमानः स ताड्यमानश्च लेष्टुभिः । दध्यावेते महापापमुपकुर्वन्ति मां जनाः ॥ १७ ॥ परीषहोपसर्गांश्च सहमानः सुदुःसहान् । शुक्लध्यानेन प्रक्षीणकर्मा केवलमासदत् ॥ १८ ॥ मुक्तिं दृढप्रहारी स चौरोऽपि गतवान् जवात् । शमेनैव धनी हि स्याद्दुःस्थो देवद्रुसेवया ॥ १९ ॥ एवं नान्येन केनापि चौर्यं कार्यमनर्थकृत् । यद्यज्ञानात् कृतं तर्हि त्याज्यं दृढप्रहारिवत् ॥ २० ॥

॥ इति दृढप्रहारिकथा ॥

भूयोऽप्यत्रैव द्वारे विशेषोपदेशमाह—

नानाकलाविदपि लाघवमेति चौर्याद्विद्यानताम्रफलचौर इव प्रियार्थे ।
दोषो महानधिगुणेऽपि हि लाञ्छनाय, रत्नाकरे कुजलवन्नशवत्सुधांशौ ॥ ३६ ॥

व्याख्या—नानाकलाविदपि बहुकलाज्ञाताऽपि चौर्याल्लाघवं लघुत्वमेति गच्छति । क इव ? प्रियार्थे वल्लभार्थे विद्यानताम्रफलचौर इव यथा विद्यया कृत्वाऽऽनतो नम्रीभूतो य आम्रः सहकारः तस्य फलचौरो मातङ्गो लाघवमेति स्म ।

हिर्यस्मात् कारणात् अधिगुणेऽपि अधिकगुणेऽपि पुरुषे महान् दोषो लाञ्छनाय कलङ्काय भवति । कस्मिन् किमिव ? रत्नाकरे कुजलवत् समुद्रे हारवारीव । तथा सुधांशौ चन्द्रे शशवत् । इत्यक्षरार्थः । कथा चेयम्—

आम्रफलचौरकथा—

श्रीमद्राजगृहेशस्य श्रेणिकस्य महीभुजः । प्रियायाश्चेल्लणादेव्याः सन्तुष्टः कोऽपि दैवतः ॥ १ ॥ अथैकस्तन्नमावासं वनं सर्वर्तुमण्डितम् । चकार चेल्लणादेव्याः क्रीडार्थममरोत्तमः ॥ २ ॥ सदाफले सदापुष्पे तत्रोद्यानेऽथ चेल्लणा । श्रेणिकं रमयामास वनदेवीव देहिनी ॥ ३ ॥ मातङ्गस्वामिनोऽन्येद्युर्विद्यासिद्धस्य तत्पुरे । वासिनः समभूत् पत्न्या माकन्दफल-दोहदः ॥ ४ ॥ सा जगौ पतिमाम्राणि देहि पूरय दोहदम् । सोऽप्याख्यदयि मूढाऽसि क्वाम्राण्यसमये शुने ॥ ५ ॥ मातङ्गपतिमित्याख्यत् प्रिया साऽत्र प्रियंवद । फलितं चेल्लणोद्याने माकन्दवनमन्वहम् ॥ ६ ॥ तदानीं सोऽथ मातङ्गश्चे-ल्लणोद्यानमागमत् । चूतान् ददर्श चोत्तुङ्गान् फलितान् विविधैः फलैः ॥ ७ ॥ पुनर्निश्यागतोऽपश्यत् सहकारफलान्यसौ । पचेलिमानि भूमिस्थो ज्ञानीव गणकोत्तमः ॥ ८ ॥ विद्यया सोऽवनामिन्या विद्यासिद्धोऽथ तत्क्षणात् । नमयित्वा चूतशाखाः स्वैरमाम्राण्युपात्तवान् ॥ ९ ॥ राज्ञ्यदाद्दीत् प्रगे लूनफलां माकन्दवाटिकाम् । काव्यावलीमिव च्छन्दोभङ्गस-ङ्गमुपेयुषीम् ॥ १० ॥ तदाख्यत्सा क्षमेशस्य सोऽप्येत्याभयमादिशत् । अवीक्षितांहिसंचारमाम्रचौरं विलोकय ॥ ११ ॥ शक्तिर्यस्येदृशी दस्योरमानुष्यतिशायिनी । शुद्धान्तविप्लवस्तस्मादपि संभाव्यते सुत ॥ १२ ॥ अभयः स्माह स्वामिन् स्वाक् स दस्युर्दर्शयिष्यते । ततोऽभयोऽन्वहं भङ्गे भ्राम्यँश्चौरदिदृक्षया ॥ १३ ॥ अन्यदा नगरे भ्राम्यन्नभयो विज्ञस-

त्तमः । क्वापि सङ्गीतके पौरैः कार्यमाणे जगाम च ॥ १४ ॥ पौरैप्रत्तासनासीनोऽन्नयो नागरिकान् जगौ । नटा यावन्ना-
गच्छन्ति कथा तावन्निशम्यताम् ॥ १५ ॥ वसन्तपुरवास्यासीज्जीर्णश्रेष्ठी धनोज्झितः । वरोचिता तस्य वृद्धकुमार्येका बभूव
च ॥ १६ ॥ कामदेवं पूजयितुं सा सुन्दरवरार्थिनी । उद्याने क्वापि चौर्येण पुष्पाण्युदचिनोत्सदा ॥ १७ ॥ धरिष्येऽहं
पुष्पचौरमद्येत्यारामिकोऽन्यदा । तस्थावन्तर्हितो भूत्वा वने व्याध इवाचलः ॥ १८ ॥ विश्वासात् प्राग्वदायातां तां
सुमान्यवचिन्वतीम् । वीक्ष्य रूपवतीं क्षोभं जगामोद्यानपालकः ॥ १९ ॥ तां गृहीत्वा करेणाथारामिको जातवेपथुः ।
सद्यो विमुक्तपुष्पापहारक्रोधोऽन्यधादिति ॥ २० ॥ वरवर्णिनि मां प्राप्तं रिरंसुं रमयस्व भोः । न मोदयाम्यन्यथाऽहं त्वां
सुमक्रीतासि यन्मया ॥ २१ ॥ जगौ तं पुष्पलावी सा मां स्वहस्तेन मा स्पृश । नाद्याप्यर्हामि पुंस्पर्शमारामिक कुमार्य-
हम् ॥ २२ ॥ मालिकोऽपि जगादैतां देहोऽयं प्रथमं मम । संभोगभाजनं कार्यस्त्वया तर्ह्यूढमात्रया ॥ २३ ॥ तथेति
प्रतिजानानां बालामारामिकोऽमुचत् । जगामाक्षतकौमारव्रता साऽपि स्ववेश्मनि ॥ २४ ॥ वरीयसा वरेणासौ परिणी-
ताऽन्यदा ततः । पतिमूचे तमस्विन्यां वासावासमुपागता ॥ २५ ॥ स्वामिन्मया प्रतिज्ञातं मालाकारस्य वर्तते । तस्या-
ऽगमनं पूर्वमेव चोढूढमात्रया ॥ २६ ॥ तेन मामनुमन्यस्व यामि तं गीर्नियन्त्रिता । सत्यसन्धेयमित्येषा पत्याऽत्यनुमता
ततः ॥ २७ ॥ निर्गत्यागारतो नानारत्नाभरणभूषिता । यान्त्यध्वनि धनायज्ञिः सा दस्युभिररुध्यत ॥ २८ ॥ सा तामा-
रामिककथां कथयित्वा जगाद तान् । भ्रातरो व्याघुटन्त्या मे आदद्ध्वं भूषणावलीम् ॥ २९ ॥ स्वभावाख्यानतस्तस्या

१ प्रत्तं दत्तम्. २ कुसुमैः क्रीता. ३ रात्रौ. ४ शयनगृहम्. ५ धनमिच्छद्भिः.

जानङ्गिः सत्यसन्धताम् । आयान्त्यादास्यतेऽस्मान्निरित्येषाऽमोचि तस्करैः ॥ ३० ॥ व्रजन्त्यग्रेऽथ क्षुत्क्षामकुक्षिणैकेन रक्षसा । मृगीव मृगराजेन साऽरुध्यत मृगेक्षणा ॥ ३१ ॥ स्वज्ञावोज्ञावनेनास्या विस्मितः सोऽपि राक्षसः । आगन्तुन्तीं ज्ञक्षयिष्ये इत्यालोच्य मुमोच ताम् ॥ ३२ ॥ गत्वोद्यानं तमुद्यानपालकं सा जगाद च । नवोढा त्वामुपायाता सास्म्यहं पुष्पलाविनी ॥ ३३ ॥ अहो सत्यप्रतिज्ञेयं साधुशीला महासती । इत्यम्बामिव तां नत्वा विससर्ज स मालिकः ॥ ३४ ॥ वलमानाऽथ सा तत्र तस्थुषस्तस्य रक्षसः । यथा मुक्ताऽऽरामिकेण तथा प्रोचेऽखिलां कथाम् ॥ ३५ ॥ किमारामिकतोऽप्यस्मि हीनसत्त्व इति स्मरन् । पुत्रीमिव मुमोचैतां राक्षसोऽपि प्रियं वदन् ॥ ३६ ॥ जगाम साऽथ तत्रस्थदस्युदर्शनगोचरम् । यथार्थां कथयामास कथां मालिकरक्षसोः ॥ ३७ ॥ हीनसत्त्वा वयं न स्मो मालिकाऽऽक्षसादपि । इति तां मुमुचुस्तेऽपि प्रणम्य ज्ञगिनीमिव ॥ ३८ ॥ साऽथ स्ववेश्म गत्वाऽऽख्यत्स्वप्रियाय प्रियंवदा । कथामवितथां दस्युरक्षोमालाकृतां तथा ॥ ३९ ॥ तया दयितया सार्धं प्रक्ष्यि क्षणदां क्षणात् । ज्ञुक्तज्ञोगः प्रगेऽकार्षीत्तां सर्वस्वामिनीं पतिः ॥ ४० ॥ ऊचेऽन्नयो विचार्येत कोऽत्र दुष्करकारकः । किं ज्ञर्ता दस्यवः किं वा रक्षः किं किमु मालिकः ॥ ४१ ॥ तत्रोपपतयः स्माहुः[1] पतिर्दुष्करकारकः । येन प्रैष्यन्यपुंपार्श्वे प्रागज्ञुक्ताऽपि सा प्रिया ॥ ४२ ॥ क्षुत्क्षामकुक्षिज्ञिः प्रोचे रक्षो दुष्करकारकः । ज्ञक्षिता क्षुधितेनापि येन लब्धाऽपि सा न हि ॥ ४३ ॥ जारा जगदुरुद्यानपालो दुष्करकारकः । स्वयमेवागता तस्यां येन सा बुज्ञुजे न हि ॥ ४४ ॥ आख्यदस्युः पुनः स्माह चौरा दुष्करकारकाः । नवोढा सा परित्यक्ता

१ तत्रोचुः सेर्ष्यपतयः इति वा पाठः.

यैरलुण्टितभूषणा ॥ ४५ ॥ तस्करं तं परिज्ञायाभयो मन्त्र्यप्यधारयत् । अपृच्छच्च कथं चूतापहारोऽक्रियत त्वया ॥ ४६ ॥ चौरोऽपि प्रोचिवान् विद्याबलेनेत्यथ मन्त्रिराट् । तत्सर्वं श्रेणिकायाख्यत्तं च दस्युमदर्शयत् ॥ ४७ ॥ भूपोऽथ स्माह नो चौरः प्राप्तस्त्वन्योऽप्युपेक्ष्यते । किं पुनः शक्तिमानेष तदह्याय निगृह्यताम् ॥ ४८ ॥ अभयोऽथ महीनाथमवोचत् करुणापरः । विद्यामादत्स्व देवास्मात् पश्चाद्युक्तं विधास्यते ॥ ४९ ॥ उपवेश्य पुरः स्वस्य मातङ्गपतिमीशिता । विद्यामादातुमारेभे तन्मुखाच्छ्रेणिकस्ततः ॥ ५० ॥ विद्या सिंहासनस्थेन न राज्ञा पठिताऽपि सा । अवतस्थे हृदि सम्यक्ग्रामण्यमिव कामिनः ॥ ५१ ॥ मगधाधीश्वरश्चौरं ततश्च तमतर्जयत् । दम्भः कोऽपि न ते विद्या मयि सङ्क्रामतीह यत् ॥ ५२ ॥ अभयोऽप्यवदद्देवायं वो विद्यागुरुर्ननु । विद्या विनयिनां विद्यागुरौ स्फुरति नान्यथा ॥ ५३ ॥ सिंहासने निजे स्वामिन्नयं मातङ्ग आस्यताम् । स्वयं कृत्वाञ्जलिं भूमौ तत्पुरस्तूपविश्यताम् ॥ ५४ ॥ विद्यार्थी भूपतिस्तस्य प्रतिपत्तिं व्यधत्ताम् । नीचादप्युत्तमां विद्यामाददीतेति विश्रुतम् ॥ ५५ ॥ उन्नामिन्यवनामिन्यौ विद्ये भूपस्य तन्मुखात् । श्रुतमात्रे अवस्थानं व्यधत्तां हृदये ततः ॥ ५६ ॥ अभयोऽथ नराधीशं विज्ञप्य विहिताञ्जलिः । विद्यागुरुममुं चौरं मोचयामास सकृपः ॥ ५७ ॥ एवमन्योऽपि चौर्येण कलाज्ञोऽप्येति लाघवम् । तेन तत्त्याज्यमेवाशु लोकयुग्माहितावहम् ॥ ५८ ॥

॥ इत्याम्रफलचौरकथा ॥

उक्तं सप्तदशमस्तेयद्वारमिदं । अथ चतुर्थं ब्रह्मव्रतमाह—

स्युर्ब्रह्मणा नृसुरमोक्षसुखानि किंतु, जम्बूमुनेः सुभगताऽजिनवैव काचित् ।

नेजुर्व्रतं सममनेन मुदा प्रियास्ता, अन्यारता सह जगाम च केवलश्रीः ॥ ३७ ॥

व्याख्या—ब्रह्मणा ब्रह्मव्रतेन नृसुरमोक्षसुखानि मनुष्यदेवसिद्धिसुखानि स्युर्न्नवन्ति । किंतु परंतु जम्बूमुनेः काचिद ज्ञिनवैव अपूर्व्वैव सुज्ञगता सौज्ञाग्यं, यतस्ताः प्रसिद्धा अष्टौ प्रियाः सुज्ञगतामोहिताः सत्योऽनेन जम्बूमुनिना समं सह व्रतं नेजुः दीक्षां जगृहुः । च पुनः अन्यारता अन्यस्मिन् पुरुषेऽरताऽनासक्ता केवलश्रीः केवलज्ञानलक्ष्मीर्जम्बूस्वामिना सह जगाम गतवती जम्बूमुनेः पश्चादन्यस्य केवललक्ष्म्यनुत्पत्तेः, अतोऽन्यारता सती सह जगामेति गूढोत्प्रेक्षा । इति काव्याक्षरार्थः । कथा तु तपोद्वारे शिवकुमारकथायां सप्रपञ्चा कथयिष्यते ॥

अथात्रैव द्वारे विशेषमाह—

न ब्रह्मतः सकलशर्मकृतश्चलन्ति, धीराः सुदर्शन इव व्यसने घनेऽपि ।
शेषोऽब्धिवृद्धलहरीचलशैलवल्गज्जुम्नमौलिरपि विश्वजरं बिभर्ति ॥ ३८ ॥

व्याख्या—धीरा धैर्यवन्तः पुरुषा सकलशर्मकृतः समस्तसुखकारकात् ब्रह्मतो ब्रह्मचर्यात् घनेऽपि व्यसने कष्टे सति न चलन्ति । क इव सुदर्शन इव । अत्र दृष्टान्तमाह—शेषः शेषनागो विश्वजरं पृथ्वीभारं बिभर्त्ति धत्ते । किंरूपः सन् ? अब्धेः समुद्रस्य वृद्धा या लहर्यः कल्लोलास्ताभिश्चलाः कम्पमानाः शैलाः पर्वतास्तैर्वल्गन्ती ज्वलन्ती जूः पृथ्वी तया जुम्नो वक्रीभूतो मौलिर्मस्तकं यस्य स तथाविधोऽपि सन्निति काव्याक्षरार्थः । कथा चेयं (सुदर्शनकथा)—

समस्त्यङ्गाभिधो देशः पेशलो धार्मिकैर्जनैः । अनङ्ग इव यो वर्यसौन्दर्यश्रीसमाश्रितः ॥ १ ॥ चूडामणीनिभा तस्य चम्पेत्यस्ति महापुरी । तेजस्व्यभूभृपस्तत्र दधिवाहनहीरकः ॥ २ ॥ तस्यासीदभया नाम्ना प्रेयसी स्नेहभूयसी । यदुक्त्रेणापि पीयूषमयूखोऽपि कलङ्कितः ॥ ३ ॥ तस्यामश्यामलाचारो बभूव श्रेष्ठिसत्तमः । श्रीमद्वृषभदासाख्यः श्रावकः परमार्हतः ॥ ४ ॥ यथार्थनामिका तस्यार्हद्दासीति प्रियाऽभवत् । यस्याः प्रियसखी जज्ञे जैनाज्ञा श्रेयसीतरा ॥ ५ ॥ महिषीरङ्कस्तस्य कर्मकृत्सुभगाभिधः । सोऽन्यदा महिषीवृन्दं वने चारयितुं ययौ ॥ ६ ॥ प्रत्यावृत्तस्ततः सोऽथ मासे तपसि वर्त्मनि । कायोत्सर्गस्थितं कञ्चिन्मुनिमैक्षत निःस्पृहम् ॥ ७ ॥ त्यक्तप्रियाम्बरस्यास्य कथं यास्यति यामिनी । मौघी विरहितस्येवेति ध्यायन् स गृहं ययौ ॥ ८ ॥ आदाय सैरभीः प्रातर्ध्यायन्नेव मुनीश्वरम् । तत्रागत्य तथास्थं स उपासामास भक्तितः ॥ ९ ॥ अथोदियाय सविता मुनिं द्रष्टुमिवोत्सुकः । स नमो अरिहंताणमित्युक्त्वोत्पेदिवान् दिवि ॥ १० ॥ नभोगमनविद्येयमिति निश्चित्य चेतसि । सुभगस्तत्स्वपन् जाग्रन्नमस्कारपदं जगौ ॥ ११ ॥ अन्यदा तत्पदं ध्यायन् स पृष्टः श्रेष्ठिना मुदा । महाप्रभावं भद्रेदं क्व प्राप्तं सुरद्रुवत् ॥ १२ ॥ जगाद महिषीपालस्तद्वृत्तान्तमथादितः । यत्प्राप्तं भवता भद्र साधु साधु इदं पदम् ॥ १३ ॥ विद्या हेतुरियं ह्या केवलं न नभोगमे । किं तु स्वर्गापवर्गादिगमेऽप्येषैव कारणम् ॥१४॥ तस्य नो दुर्लभं किञ्चित् प्राज्यं राज्यं प्रियाः प्रियाः । भृङ्गीव यन्मनोऽम्भोजे आस्ते पञ्चनमस्कृतिः ॥ १५ ॥ मन्त्राणां प्रथमं मन्त्रमैहिकामुष्मिकार्थदम् । इमं जागर्यैरवाप्तं त्वं नोज्झिष्टैः कर्हिचिज्जपेः ॥ १६ ॥ सोऽख्यादेतस्य नास्मीदं त्यक्तुं क्षणमपि

१ माघमासे. २ माघमाससम्बन्धिनी ३ अपवित्रः.

क्षमः । पदं शर्मास्पदं रम्यं व्यसनं व्यसनी यथा ॥ १७ ॥ ततो हृष्टमनाः श्रेष्ठी परमेष्ठिनमस्कृतिम् । संपूर्णां परिसंपूर्ण-
कामनं तमपीपठत् ॥ १८ ॥ सोऽथाप्य तन्नमस्कारं तरुनो धनवत्सदा । ध्यायन्नन्येद्युरादाय महिषीः कानने ययौ
॥ १९ ॥ तदा धाराधरे वारिधाराघोरणिन्निर्धराम् । प्लावयत्यगमत् क्वापि सोऽथो गिरिणदीतटे ॥ २० ॥ नदीं तीर्त्वा
महिष्योऽगुस्तासां हि सुतरा सरित् । पश्यन् घोरं पयःपूरं सुन्नगस्तु तटे स्थितः ॥ २१ ॥ मा प्राविक्षन्निमा अन्यक्षेत्रेऽ-
श्वेति नमस्कृतिम् । स्मरन्नाकाशगमनविद्याबुद्ध्या महामतिः ॥ २२ ॥ दत्तफालः स सद्योऽप्युत्पत्य नद्यां पपात वै । हृदि
कर्दमगस्तस्य प्रविष्टो दुष्टकीलकः ॥ २३ ॥ युग्मम् ॥ मृतस्तद्व्यथया ध्यायन्नमस्कारं तथापि सः । अर्हद्दास्यास्ततः कुक्षौ
श्रेष्ठिपत्न्या अवातरत् ॥ २४ ॥ अर्जे गर्भस्थिते तस्मिँस्तृतीये मास्यतीयुंषि । दोहदो दानपुण्यादौ तन्मातुरुदपद्यत ॥२५॥
श्रेष्ठिना पूरितः सर्वो धनिनां किं हि दुष्करम् । पूर्णे काले सुकालज्ञार्हद्दासी सुषुवे सुतम् ॥ २६ ॥ हर्षप्रकर्षसंसृष्टमहा-
महपुरस्सरम् । श्रेष्ठी तस्य सुतस्याख्यां सुदर्शन इति व्यधात् ॥ २७ ॥ पित्रोः मनोरथैः सार्धं वर्धमानो दिने दिने ।
कल्पद्रुम इवामोदं स तेने कस्य कस्य न ॥ २८ ॥ कलाचार्यगतास्तत्र संक्रान्ताः सकलाः कलाः । क्षणेनैव विलम्बः को
दर्पणे रूपसङ्क्रमे ॥ २९ ॥ तदानीं तस्य तारुण्यश्रियः सर्वाङ्गमद्भुताः । जेजुः स्त्रैणाद्विकौमुद्यः सुचिरोत्कण्ठिता इव ॥३०॥
वयसौन्दर्यविभ्राजी कलाकेलिरिवाद्भुतः । सुधादीधितिवत्सर्वजननेत्रामृताञ्जनम् ॥ ३१ ॥ मुदं सुदर्शनस्तेने मातापित्रोर्न
केवलम् । उच्चैस्तरां धराभर्तुरपि सर्वपुरोऽपि च ॥ ३२ ॥ युग्मम् ॥ तदा मनोरमानाम्नीं मनोरमकुलोद्भवाम् । रमां रमा-

१ अतिक्रान्ते.

प्रियेणेव श्रेष्ठी तेनोदवाहयत् ॥ ३३ ॥ तया दयितया साकं सुखं वैषयिकं सदा । भुञ्जानोऽत्यैद् घनं कालं रत्येव विषमायुधः ॥ ३४ ॥ तत्र पुर्यामितश्चासीत् कपिलाख्यः पुरोहितः । [1]कलन्दिकापुटकिनीराजहंसो गुणोज्ज्वलः ॥ ३५ ॥ तस्य क्षितिपतेर्देवपतेरिव बृहस्पतिः । निःकृत्रिमस्फुरद्भक्ति प्रीतिपात्रं पवित्रधीः ॥ ३६ ॥ युग्मम् ॥ सुदर्शनेन तस्याथ मिथः सद्दर्शनोत्थिता । प्रीतिः प्रवर्तते गुर्वी [2]कमनेन मधोरिव ॥ ३७ ॥ प्रियेदमन्यदा प्राह्णीत् कपिलं कपिलाऽन्निधा । श्यन्तं समयं स्वामिन् क्व तिष्ठसि वदान्वहम् ॥ ३८ ॥ सोऽवक् तिष्ठाम्यहं भद्रेऽत्र सुदर्शनसन्निधौ । स्वामिन् सुदर्शनः कोऽस्ति कपिला प्रत्युवाच तम् ॥ ३९ ॥ भूयोऽपि कपिलः प्रोचे किं मन्मित्रं सुदर्शनम् । लोकम्पृणगुणग्रामं वेत्सि नो तर्हि वेत्सि किम् ॥ ४० ॥ तं ज्ञापयाधुनापीत्युक्तस्तया कपिलो जगौ । सुतो वृषभदासस्य श्रेष्ठिश्रेष्ठस्य सत्तमः ॥ ४१ ॥ सुराद्रिरिव धैर्येण गाम्भीर्येण महाब्धिवत् । सवितेव प्रतापेन कान्त्या पीयूषकान्तिवत् ॥ ४२ ॥ वाचंयमो यथा वाचा [3]क्ष्मयैव क्षमया क्षमः । चक्रीव जनचक्रस्य मुख्यो दक्षशिरोमणिः ॥ ४३ ॥ कीर्त्या विश्वातिशायिन्या शीलेन विमलेन च । योऽसमः सर्वथा किं स मया मन्देन वर्ण्यते ॥ ४४ ॥ ततो भूरिगुणे तस्मिन् सुदर्शनसुदर्शने । कपिला कामुकी जज्ञे चपला हि द्विजस्त्रियः ॥ ४५ ॥ तस्यान्निसरणोपायान् [4]प्रतिद्यु हृदि सा ततः । योगिनीव परब्रह्मस्वरूपं दध्युषी भृशम् ॥ ४६ ॥ श्रुतश्च कपिलोऽन्येद्युर्भूपादेशात् पुरान्तरम् । प्राप्तः साऽप्यागमत्सद्योऽपि सुदर्शनसद्मनि ॥ ४७ ॥ साऽथ मायाविनी प्रोचे सुदर्शनमिति द्रुतम् । मान्द्यं त्वत्सुहृदो देहे गाढं तेनाहमागमम् ॥ ४८ ॥ मान्द्यं त्वद्विरहार्त्तस्य तस्याथ द्विगुणीभवत् ।

१ कलंदिका सर्वविद्याज्ञानं सैव पुटकिनी कमलिनी तस्यां राजहंस इव राजहंसः. २ कामदेवेन. ३ पृथ्वीव. ४ प्रतिदिनम्.

ज्ञात्वा तदाज्ञया ज्ञाह्वातुं त्वामहमागता ॥ ४९ ॥ नैतज्ज्ञातं मयेत्युक्त्वा तदैवागात्स तद्गृहे । माया मायाविनां कस्य मतिभ्रमकरी न हि ॥ ५० ॥ तद्वेश्मनि विशन् सोऽवक् क्वास्ते मित्रमपाटवम् । साख्यत् पुरः शयानं तत्पश्यागत्य गृहान्तरे ॥ ५१ ॥ इति तं ब्रह्मना मुग्धं मूलापवरकेऽनयत् । सा पापा किं न कुर्वन्ति कुलटाश्चब्रह्मनैव हि ॥ ५२ ॥ तत्रापि तमवीक्ष्याख्यात्सुहृदं तां सुदर्शनः । कपिलो दृश्यते नात्र तत्किं ब्रूहे निवेदय ॥ ५३ ॥ साऽथो पिधाय तद्वारं हावभावैर्नवैर्नवैः । पापा तमसि तेने सा स्मरराज्यविजृम्भितम् ॥ ५४ ॥ दृढामपि श्लथीकृत्य नीवीं सा बध्नती मुहुः । दर्शयन्ती निजां नाभिं गम्भीरां स्मरदीर्घिकाम् ॥ ५५ ॥ दीर्घैः कटाक्षविक्षेपैः प्रसन्नैस्तामरुयन्त्यथ । सुदर्शनमुवाचोच्चैश्चञ्चलोमाञ्चकञ्चुका ॥ ५६ ॥ नास्तीह कपिलो ब्रूहि कपिलां प्रतिजागृहि । सोऽवक् किं प्रतिजागर्मि कपिलायाः शुभे वद ॥ ५७ ॥ साऽवादीत्त्वत्सुहृद्वक्त्राच्छ्रुत्वा त्वच्छुणवर्णनम् । ऽभवत्युच्चै रिरंसुं मां स्वाङ्गसङ्गेन चङ्गय ॥ ५८ ॥ ततः सुदर्शनो दध्यौ प्रपञ्चोऽस्या विधेरिव । क्रुस्तरोऽयमतोऽमूं धिग् याम्यतोऽहं कथञ्चन ॥ ५९ ॥ प्रत्युत्पन्नमतिः सोऽथाख्यद्यूनामुचितं ह्यदः । मुग्धे षण्ढोऽस्म्यहं त्वेतत्पुंवेषेणासि वञ्चिता ॥ ६० ॥ विरक्ता सा ततः सद्यो गेहात्तं निरवासयत् । सोऽपि ध्यायन् विमुक्तोऽहं स्तोकादद्येत्यगाद्गृहम् ॥ ६१ ॥ ततः सुदर्शनो निश्चिकायेदं नान्यसद्मनि । एकाक्यतः परं गन्ता यन्नार्यश्चब्रह्मकोविदाः ॥ ६२ ॥ प्रवृत्तस्तत्र चान्येद्युर्महान् शक्रमहः क्रमात् । सुदर्शनपुरोधोन्यामाराममगमन्नृपः ॥ ६३ ॥ तं चान्वगात्सकपिलाऽन्नया राज्ञी सुयानगा । मनोरमाऽप्यगात्तत्र षड्भिः पुत्रैरलङ्कृता ॥ ६४ ॥ अथ तां कपिला प्रेक्ष्य

१ त्वयि.

त्रैदशस्त्रैणजित्वरीम् । अग्राहीदन्नयां काऽसाविति विस्मितमानसा ॥ ६५ ॥ साऽप्यवादीदहो मुग्धे किं त्वया ज्ञायते न हि । सुदर्शनस्य ज्ञार्येयं गेहश्रीरिव देहिनी ॥ ६६ ॥ कपिला विस्मिताऽथाख्यद्वल्लभा तस्य चेदियम् । तदेतांस्तनयानेषाऽजीजनत्तद्धि कौशलम् ॥ ६७ ॥ स्वाधीनभर्तृका योषिज्जनयेच्चेत् सुतान् सुताः । तत्किं कौशलमित्युक्ता देव्योचे कपिला पुनः ॥ ६८ ॥ स्यादेवं यदि देवि स्याद्योषितो वल्लभः पुमान् । सुदर्शनस्तु पुंवेषधर एष नपुंसकः ॥ ६९ ॥ कथं बुद्धं त्वयेत्युक्ता देव्या विस्मितयाऽथ सा । सर्वं सुदर्शनोदन्तं स्वानुभूतमचीकथत् ॥ ७० ॥ साऽप्याख्यत्सखि यद्येवं तेन त्वं वञ्चिताऽसि तत् । स षण्ढः परनारीषु स्वप्रियायां पुनर्न हि ॥ ७१ ॥ विलक्षा कपिलाथाख्यदन्नयामिति सुन्दरि। यद्यहं वञ्चिता मूढा तत्ते धीर्ज्ञास्यतेऽधुना ॥ ७२ ॥ अन्नयोचे जमे काष्ठपुत्रकोऽपि मया करे । धृतोऽसंज्ञो ज्ञवेत् पुंसः ससंज्ञस्य तु का कथा ॥ ७३ ॥ सामर्षा कपिलाऽऽख्यत्तां देवि मा गर्वमुद्वह । गर्वं वहस्यखर्वं चेत्तद्ऽमस्व सुदर्शने ॥७४॥ साहङ्कारं व्याहरत्सा हले रमितमेव तम् । विद्धि यत्तापसास्तीव्रा भुक्ताः स्त्रीज्ञिरयं तु कः ॥ ७५ ॥ रमयामि न यद्येनं प्रविशाम्यनलं ततः । वार्तयित्वेति ते रन्त्वा स्वैरं स्वं स्वं गृहं गते ॥ ७६ ॥ ज्ञापिताऽथ प्रतिज्ञा सा तया धात्र्याः निजा कृता । पण्डिताख्या जगौ साऽपि पुत्रि युक्तं न सूत्रिका ॥ ७७ ॥ मन्ये नाद्यापि माहात्म्यं मुग्धे वेत्सि महात्मनाम् । श्राद्धोऽन्योऽपि सुशीलः स्यात् किं पुनः स सुदर्शनः ॥ ७८ ॥ यः सदा गुरुसेवायां ध्याने मौने तपस्सु च । आसक्तः कस्तमानेतुं सुदर्शनमलंतराम् ॥ ७९ ॥ केसराकर्षणे सन्धाऽऽधेया केसरिणः क्वचित् । सुदर्शनस्य सद्गीलोद्वहने न पुनः

१ देवसंबन्धिस्त्रीसमूहस्य जित्वरीम्. २ कृतवती.

क्वचित् ॥ ८० ॥ अथोवाचाऽनया मातरेकवारं कथञ्चन । तमानयाहं तत्सर्वं कर्त्रीं किंचिन्न ते बलम् ॥ ८१ ॥ पण्मिताथ विमृश्योचे यद्येवं तत्सुदर्शनम् । कायोत्सर्गस्थितं शून्यौकस्यानेष्यामि पर्वसु ॥ ८२ ॥ अत्रोपायोऽयमेवोच्चैश्चतुरेऽतः समुद्यमः । कार्योऽत्रैवेति देव्योक्ता पण्मिता प्रत्यपद्यत ॥ ८३ ॥ अथान्यदाऽत्र कौमुद्या महः प्रववृते महान् । राजाज्ञयाऽखिलाः पौरास्तदोद्यानमगुर्मुदा ॥ ८४ ॥ सुदर्शनोऽद्य पर्वास्ति चतुर्मासिकमित्यथ । धराधीशमनुज्ञाप्य तस्थिवान्निजवेश्मनि ॥ ८५ ॥ ततश्चैत्येषु सर्वेषु कृत्वा स्नात्रार्चनादि सः । सायं पौषधमादाय सिद्धिसंसाधनौषधम् ॥ ८६ ॥ कृतावश्यककर्मादिः कायोत्सर्गं चकार च । क्वापि शून्यालये धर्मध्यानसंलीनमानसः ॥ ८७ ॥ युग्मम् ॥ ज्ञात्वेति पण्मिताऽथोचेऽनयां पुत्रि तवेप्सितम् । कदाचित् पूर्यते तेन न गन्तव्यं त्वया वने ॥ ८८ ॥ शिरोऽर्त्तिर्बाधते [1]मेति प्रोच्य नृपपुरोऽथ सा । स्वसौधे तस्थुषी येन सिद्धसारस्वताः स्त्रियः ॥ ८९ ॥ काममूर्त्तिं तदाहाद्य वाससा साऽथ मृण्मयीम् । निवेश्य पण्मिता याने प्रवेष्टुं सौधमागमत् ॥ ९० ॥ किमेतद्यानगं वस्तु वदङ्गिरिति वेत्रिभिः । स्खलिता सा जगौ कूटं कूटोत्कटकुटीरिका ॥ ९१ ॥ पिण्[2]मापाटवतो नाद्योद्याने देव्यनयाऽगमत् । तद्दर्पकादिदेवार्चां वेश्मन्येव विधास्यति ॥ ९२ ॥ स्मरस्य प्रतिमेयं तत्तदादेशात् प्रवेश्यते । प्रवेश्या अन्यदेवानां मूर्तयोऽत्र घनाः पुनः ॥ ९३ ॥ साऽत्र प्रदर्शयित्वैतां याहीत्युक्ताऽथ वेत्रिभिः । काममूर्तिमपावृत्य तान् प्रदर्श्य ततोऽगमत् ॥ ९४ ॥ एवं गृहीतमूर्त्तिः सा द्विस्त्रिर्घाःस्थविमोहनम् । कृत्वा गतागतैस्तत्र सुदर्शनमथानयत् ॥ ९५ ॥ वाससा पिहितं यानारूढं वीक्ष्य सुदर्शनम् । साह्लात्कामभिवानीतमनया मुमु-

---

१ मा माम्. २ पिण्मो देहः.

देतमाम् ॥ ९६ ॥ ततोऽन्नया भृशं कामातुरा रोमाञ्चिताङ्गका । सुदर्शनमदः स्माह वचनं स्मरदीपकम् ॥ ९७ ॥ विशि-
खैर्विषमैरेष हन्ति मां विषमायुधः । तत्सरूपो मया शिश्ये त्वमेव शरणं विभो ॥ ९८ ॥ तऽऽ रक्ष मां नाथ शरण्य
शरणागताम् । सर्वं हि महतामार्तत्राणार्थे सफलं भवेत् ॥ ९९ ॥ सद्यः प्रसद्य मां दासीं देवाज्ञापय किञ्चन । महान्तो
हि न कुर्वन्ति प्रार्थनामन्यथा हितौ ॥ १०० ॥ छलानीतोऽसि यन्नाथ कोपः कार्यस्त्वया न तत् । आर्त्तलोकश्छलेनैव
यत्कार्यं कर्तुमीप्सति ॥ १०१ ॥ त्वदेकशरणां देव कामः कामं धुनोति माम् । यत्तत्तेऽमन्द मन्दाक्षं निर्दाक्षिण्यं प्रविस्त-
रेत् ॥ १०२ ॥ देव्यामित्यादि सानन्दं वदन्त्यां स सुदर्शनः । अक्षुब्धदर्शनः कायोत्सर्गेणास्थात् सुराऽिवत् ॥ १०३ ॥
अथोवाचान्नया कामविवशीकृतचेतना । स्वामिन्मामर्थयन्तीं त्वं मौनेनोपेक्षसे कथम् ॥ १०४ ॥ व्रतकष्टमिदं मुञ्च कार्यं
नातः परं त्वया । ममानुकूल्यतः सिद्धं विद्धीदं व्रतजं फलम् ॥ १०५ ॥ अथो मत्सविधायातः क्व यास्यसि महागुण ।
वदन्त्येति तया पाणौ गृहीतः पाणिनाऽथ सः ॥ १०६ ॥ बाहुन्यां नलिनीनालकोमलाभ्यामलं तया । आलिङ्ग्य सुस्त-
नोत्पीडमत्रीडं सोऽथ चुम्बितः ॥ १०७ ॥ अमीभिरुपसर्गैश्च तया कामं विनिर्मितैः । धर्मधीर्ववृधे तस्य स्वर्णश्रीरिव
वह्निना ॥ १०८ ॥ स चित्तेऽचिन्तयच्चेति यदि मुच्येऽहमेतया । उत्सर्गं पारयिष्यामि तन्मेऽनशनमन्यथा ॥ १०९ ॥
अथाज्ञयाऽन्यधात्क्रोधाद्ललाटघटितेक्षणम् । हालाहलाकुलं वाक्यं रे त्वं मूर्ख मुमूर्षसि ॥ ११० ॥ नामृतं न विषं किञ्चि-
द्विना नो मानिनीजनान् । सुधा वयं हि रागिण्यो विरागिण्यो विषं पुनः ॥ १११ ॥ ममेदं वचनं मूर्ख साम्प्रतं न करोषि
चेत् । सद्योऽद्यैवान्तकावासमवश्यं पश्य यास्यसि ॥ ११२ ॥ तयेति रजनीं सर्वां प्रार्थितो ज्ञापितोऽपि सः । नाचलध्या-

नतो वातैः किं चलत्यमराचलः ॥ ११३ ॥ तमीं विज्ञातिकीं वीक्ष्य साऽथ स्वमलिखन्नखैः । सर्वं वपुर्जगौ चोच्चैर्बला-त्कारं करोत्यसौ ॥ ११४ ॥ श्रुत्वेत्यारक्षकास्तत्राजग्मुर्विस्मितचेतसः । दृष्ट्वा सुदर्शनं दध्युर्नामुष्मिन् संज्ञवत्यदः ॥ ११५ ॥ ततस्तैस्तत्क्षितीशाय गत्वा तूर्णं निवेदितम् । तेनाप्यागत्य पृष्टा सा किमेतदिति विस्मयात् ॥ ११६ ॥ साऽख्यत्त्वां वञ्च-ञ्जापृच्छ्य स्थितां मत्वाऽऽगतस्त्वसौ । चाटुकोटिभिरन्यर्थ्यं बलात्कारपरोऽभवत् ॥ ११७ ॥ प्रतिषिद्धो मया रुष्टो मां चैवमलिखन्नखैः । ततो मया धराधीश पृच्छके त्वद्वियुक्तया ॥ ११८ ॥ संज्ञाव्यतेऽदो नात्रेति ध्यायन् पृच्छँश्च भूधवः । सुदर्शनेन नैवाज्ञाप्यज्ञयाकृपयाऽथ तत् ॥ ११९ ॥ ततो मौनेन विज्ञाय सदोषं तं धराधवः । निग्रहीतुमथादिक्षदारक्ष-ककदम्बकम् ॥ १२० ॥ सौधात्तैः स बहिर्नीतः कण्ठे कौशिकमालया[1] । भूषितो वध्यनेपथ्यमश्लथं परिधापितः ॥ १२१ ॥ आरोपितः खरे शूर्पन्नत्रकोऽथ पुरेऽखिले । भ्रामितश्च नृपादेशाद्ढिण्डिमध्वनिपूर्वकम् ॥ १२२ ॥ युग्मम् ॥ कर्मेदं संज्ञव-त्यत्र नेति हाहारवोत्कटम् । लोकोऽतिस्तोकशोकार्त्तस्तदा वक्तुं प्रचक्रमे ॥ १२३ ॥ अथ श्रुत्वेति लोकोक्त्या दध्यौ दुःखा-न्मनोरमा । राज्ञो भर्तुश्च नो दोषो दोषस्तत्कर्मणस्त्वयम् ॥ १२४ ॥ पापकर्महृये हेतुर्विना धर्मं न कश्चन । निश्चित्येति गृहान्तः सा गत्वार्हन्तमपूपुजत् ॥ १२५ ॥ तत्पुरः प्रतिमास्थाऽऽख्यच्चेति शासनदेवताः । युष्माभी रक्षितव्योऽत्र निर्दो-षोऽयं पतिर्मम ॥ १२६ ॥ उत्सर्गं पारयिष्यामि दयितेऽहं गृहागते । अन्यथा प्रतिमास्थाया ममास्त्वनशनं ध्रुवम् ॥ १२७ ॥ इतश्चारक्षकैर्नीत्वा वध्यभूमौ सुदर्शनः । शूलायां निदधे भीमं भूमिभृच्छासनं यतः ॥ १२८ ॥ शूला हैमाब्जतां

१ उपानहां मालया.

नेजे क्षणात्तस्य महात्मनः । शीलप्रज्ञावतः पुंसां ह्यन्तकः किंकरीयति ॥ १२९ ॥ वधार्थं तस्य तैस्तीक्ष्णैः खड्गो व्यापारितो गले । स्रक् सोऽजनिष्ट किं धर्मादापत् संपन्न जायते ॥ १३० ॥ तत्प्रेक्ष्य विस्मितैस्तैश्च गत्वा व्यज्ञपि भूपतेः । वेगान्नृपो गजारूढोऽगात् सुदर्शनसन्निधौ ॥ १३१ ॥ सानुतापमथादिज्ञ्येत्याख्यद्भूपः सुदर्शनम् । दिष्ट्या दृष्टोऽविनष्टस्त्वं श्रेष्ठिन् पुण्यप्रज्ञावतः ॥ १३२ ॥ स्त्रीमायामोहितोऽहं यत्त्वां हिनस्मि गुणास्पदम् । तन्मत्तः कोऽपरः पापी विचारविकलस्तथा ॥ १३३ ॥ त्वयाऽपि कारितः किञ्चित्पापमेतदहं यतः । पृच्छतोऽपि न मेऽज्ञापि रात्रिवृत्तं यथातथम् ॥ १३४ ॥ भूपोऽथ तं निजावासे नीत्वाऽऽरोप्येभमूर्धनि । सत्कृत्य वस्त्रभूषाभिरप्राक्षीच्च तमीकथाम् ॥ १३५ ॥ अभयायै दापयित्वाऽथाभयं तां यथास्थिताम् । राज्ञे निवेदयामास शुद्धबुद्धिः सुदर्शनः ॥ १३६ ॥ अथ प्रीतेन भूभर्त्रा महर्द्ध्या प्रैष्यसौ गृहे । अभयाऽपि मृता पाशीग्रहणेन भयातुरा ॥ १३७ ॥ प्रणश्य पण्डिता नीताऽथागमत् पाटलीपुरे । तस्थौ च देवदत्तायाः वेश्यायाः सदने सुखम् ॥ १३८ ॥ तत्रापि सा स्तवीति स्म तथा नित्यं सुदर्शनम् । यथा सा देवदत्ताऽपि तस्मिन्नजनि कामुकी ॥ १३९ ॥ इतश्च व्रतमादत्त संविग्नात्मा सुदर्शनः । ज्ञाताचारविचारश्चैकाकितामाश्रयद्गुरोः ॥ १४० ॥ विहरन् पाटलीपुत्रं प्राप्तः स्वाङ्गेऽपि निर्ममः । भिक्षार्थं स पण्डितया भ्राम्यन् प्रेक्ष्योपलक्षितः ॥ १४१ ॥ प्रोक्तश्च देवदत्तायै भिक्षाव्याजात्तयाऽपि सः । आहूय नीत्वा गेहान्तः रतार्थं प्रार्थितो बहु ॥ १४२ ॥ अमन्यमानो मुक्तश्च सायं सोऽपि वने गतः । कायोत्सर्गं विधायास्थात् सुराचल इवाचलः ॥ १४३ ॥ तत्राथ व्यन्तरीभूताऽभया प्राग्जन्मसंस्मृतेः ।

१ सपश्चात्तापम्.

ज्ञात्वा व्यरुम्बयत्तं हि वैरं जन्मान्तरानुगम् ॥ १४४ ॥ पीड्यमानस्तयोच्चैः स क्षपकश्रेणिमञ्जसा । आरूढः केवलज्ञान-मपूर्वकरणक्रमात् ॥ १४५ ॥ प्राप्तश्चासन्नगीर्वाणनिर्णीतमहिमार्हतम् । धर्ममादिश्य वेश्यां चाबोधयत् पण्स्त्रितां सुरीम् ॥ १४६ ॥ युग्मम् ॥ सुदर्शनमुनिः काले क्षीणकर्मा शिवं ययौ । एवमन्यैर्बुधैः पाट्यं शीलं कष्टेऽपि सिद्धिदम् ॥ १४७ ॥

॥ इति सुदर्शनश्रेष्ठिकथा ॥

व्याख्यातमिदमष्टादशं चतुर्थव्रतोपदेशद्वारं । अथ पञ्चमव्रतोपदेशद्वारमाविर्भावयताऽऽद्यं काव्यमाह (मूचे)—

विश्वोपकारि धनमल्पमपि प्रशस्यं, किं नन्दवत्फलममानपरिग्रहेण ।
प्रीत्यै यथा हिमरुचिर्न तथा हिमौघः, स्याद्वा यथात्र जलदो जलधिस्तथा न ॥ ३९ ॥

व्याख्या—अल्पमपि स्तोकमपि धनं विश्वोपकारि सर्वजनोपकारकारकं सत् प्रशस्यं अमानपरिग्रहेणात्यधिकधनक-नकादिपरिग्रहेण परोपकारादिफलरहितेन किं फलं किं प्रयोजनं ? अपि तु न किञ्चिदित्यर्थः । किंवत् कस्येव ? नन्दवत् नन्दनवकस्येव यथा नवनन्दानाममानपरिग्रहेण हेममयनवपर्वतकरणेन किं फलमभूत् ? अपि तु न किञ्चिदित्यर्थः । ननु स्तोकं धनं यदि प्रशस्यं स्यात्तर्हि अमानं धनं कथं न प्रशस्यं स्यादिति ? मैवं, परोपकारशून्यत्वात्तस्य । अत्रार्थे युक्तं दृष्टान्तद्वयमाह–प्रीत्यै यथेति हिमरुचिश्चन्द्रो यथा जनानां प्रीत्यै हर्षाय भवति तथा हिमौघो हिमसमूहः प्रीत्यै न भवति । तथा वा यथा जलदो मेघः प्रीत्यै भवति तथा जलधिः समुद्रः प्रीत्यै न भवति । इति वृत्ताक्षरार्थः । कथानकं चेदम्—

(नन्दराजकथा)

श्रीमत्पाटलीपुरवरे राजा श्रीउदायनो राज्यं कुर्वाणः केनचिद्वैरिणा ब्रह्मना साधुवेषेण कङ्कलोहदुर्या रात्रौ गृहीतपौषधव्रतो मारितः । तस्यानपत्यत्वाद्राज्यं शून्यमभूत् । एतस्मिन्नवसरे तस्मिन्नेव पुरे कोऽपि पुण्याढ्यो जीवः पूर्वभवविहितजातिमदप्रयोगेण नापितगणिकयोः पुत्रत्वेनोत्पन्नः । तस्य नन्द इति नामदत्तं । स च क्रमेण कलाकलापपारावारपारीणः संप्राप्ततारतारुण्यो रूपादिगुणसंपन्नो बभूव । स चान्यदा निशि सुखं प्रसुप्तः । प्रातः समये मया स्वाम्त्रैः पाटलीपुरं वेष्टितमिति स्वप्नं ददर्श । प्रातः समुत्थाय फलादिपूर्णपाणिना कस्यापि स्वप्नादिशास्त्रपाठकस्याग्रे स्वप्नफलं पृष्टं । तेनोक्तं— "तवैतत्पुरराज्यं भविष्यति" इति प्रोच्य तस्य महामहेन स्वपुत्री तेनोपाध्यायेन परिणायिता । स नन्दो हर्षोत्कर्षेण तस्याः पाणिपीडनं विधायात्युत्सवपुरस्सरं स्वगृहं प्रति राजमार्गे गच्छन्नस्ति । इतश्च मन्त्राधिवासितगजेन तन्मूर्ध्नि कलशो ढालितः । ततो मन्त्रिभिर्नन्दो राज्ये निवेशितः । ततश्च सामन्ताः केऽपि केऽपि अवज्ञया तस्याज्ञां न मन्यन्ते, तदा नन्देन सभास्थेन भित्तिचित्रस्थाश्वगजपत्त्यादय आदिष्टाः । तैर्भित्तेरुत्तीर्य ते तथा शिक्षिता यथाऽन्यैरपि भीतैस्त्रिखण्डवर्तिराजभिस्तदाज्ञाङ्गीकृता । ततस्तेन बहुस्वमायातं वीक्ष्य दानाद्यङ्गेनाब्धितीरे सौवर्णो गिरिः कारितः, मुक्तमर्यादेनाब्धिना स गृहीतः । नन्दस्त्वकीर्तिपापभाजनं भूत्वा नरकं गतः ॥

॥ इति नन्दराजकथा ॥

अथात्रैव द्वारे विशेषमाह—

धन्यः परिग्रहमितेः सुखभाग् न पापी, प्राग्मम्मणो वणिगिवैधहृदीश्वरोऽपि ।
वन्द्यः कृतादरमहो जगतो मितश्रीः, पश्याधिकाधिकवसुः शशभृत्कलङ्की ॥ ४० ॥

व्याख्या—धन्यः कृतपुण्यः पुमान् परिग्रहस्य धनधान्यरूप्यसुवर्णरत्नक्षेत्रवास्तुद्विपदचतुष्पदादिरूपस्य मितेर्मानात् सुखभाक् सुखभाजनं भवति । पापी पुमान् परिग्रहमितिमुक्तः सुखभाग्न स्यात् । यदुक्तम्—

"असंतोषवतः सौख्यं न शक्रस्य न चक्रिणः । जन्तोः संतोषभाजो यदभयस्येव जायते ॥ १ ॥"

क इव मम्मणो वणिगिव यथा मम्मणो वणिक् प्राक् पूर्वं ईश्वरोऽपि एधहृत् काष्ठहारी बभूव । ननु प्रकृष्टलक्ष्मीवान् पुमान् कथं सुखी न स्यात् ? मैवं, तस्य तृष्णातरलितचित्तवृत्तित्वात् । एवं चेन्न मन्यसे तर्हि पश्य विलोकय शशभृच्चन्द्रो मितश्रीः स्तोककलावान् शुक्लपक्षे द्वितीयासंबन्धी अहो इत्याश्चर्ये जगतो विश्वस्य कृतादरं यथा भवति तथा वन्द्यो भवति अधिकाधिकवसुः अत्यधिककान्तिश्चन्द्रः कलङ्की स्यात् तथाऽल्पद्रव्यः स्वल्पवित्तः सन् सुखी स्यात्, नाधिकाधिकवसुर्बहुवित्तः सन् सुखी स्यात् । इति वृत्ताक्षरार्थः । कथा चेयम्—

(मम्मणश्रेष्ठिकथा)

अस्ति शस्तेन्दिरोदारं स्वःपुरीव मनोहरम् । न्यायराजगृहं नाम्ना पुरा राजगृहं पुरम् ॥ १ ॥ तृणीकृतरिपुश्रेणिः श्रेणि-

कस्तत्र भूपतिः । आखण्डल इवाखण्डशासनः परमार्हतः ॥ २ ॥ शची शचीप्रियस्येव तस्य प्रियतमाऽजनि । चेल्लणा नामतो धाम रूपसौन्दर्यसंपदाम् ॥ ३ ॥ विप्रयोगिपुरन्ध्रीणां मनोगाङ्गारसोदरैः[1] । धरां धाराधरे धाराचयैः सिञ्चति चान्यदा ॥ ४ ॥ वातायनसमासीना वाति वातेऽतिदारुणे । निशीथे चेल्लणा देव्युद्दामसौदामिनीत्विषा ॥ ५ ॥ सर्पत्सरित्पयःपूराहृतं दारुभरं गुरुम् । कञ्चित्कृच्छ्रादाकर्षन्तं ददर्श स्थविरं नरम् ॥ ६ ॥ त्रिभिर्विशेषकम् ॥ अन्यधाच्चाधिपं स्वामिन् बिभर्ति सुभृतं भवान् । दीनहीनार्थिनां किञ्चिन्न दत्ते च पयोदवत् ॥ ७ ॥ भूपोऽन्यधत्त को देवि दीनोऽर्थ्यस्ति सम्प्रति । ददामि वाञ्छितं यस्मै ततः सा तमदर्शयत् ॥ ८ ॥ भूपोऽथाकार्य तं हृष्टोऽवादीत् कस्त्वं कथं न्विति । कष्टायसेऽत्र सोऽप्यूचे मम्मणोऽहं वणिग् विभो ॥ ९ ॥ मयैको वृषभश्चक्रे तस्य शृङ्गं विलोक्यते । तदर्थमयमायासः क्रियमाणोऽस्ति सम्प्रति ॥ १० ॥ ततः सकौतुकः क्ष्माभृत्तद्गृहेऽगात्सचेल्लणः । स्वर्णरत्नमयं तेन दर्शितं वृषभद्वयम् ॥११॥ विस्मितोऽथ नृपः प्रोचे चेल्लणां देवि मद्गृहे । नास्त्येकमपि रत्नं चेदृशं किं दीयतेऽस्य तत् ॥ १२ ॥ विहस्य चेल्लणा स्माह मम्मणं भद्र किं त्वया । अमीभिर्दारुजी रत्नमयं शृङ्गं विधास्यते ॥ १३ ॥ सोऽन्यधादेतदर्थं मे वार्धौ पोतोऽस्ति पूरितः । वाणिज्यं कार्यते पुत्रैः पुरे देशान्तरे तथा ॥ १४ ॥ पर्वण्यपि न मे सर्पिर्धान्नि केनापि भुज्यते । सज्जवासो न चान्नादिव्यापारो न कदाचन ॥ १५ ॥ पयोदसमये तस्यां व्यापारो नापरोऽस्ति मे । काष्ठान्याकृष्य विक्रीय किञ्चित्स्वमर्जयामि तत् ॥ १६ ॥ उदारं द्युम्नकार्पण्यं नृपो वीक्ष्यास्य सप्रियः । जगाम धाम चात्मीयं शिरो धुन्वँश्चमत्कृतः ॥ १७ ॥ अजीर्ण-

१ मनोगः कामः स एव अंगारः तस्य सहायकत्वेन सोदरास्तैः.

तृष्णोऽथो जीर्णः सोऽसंपूर्णमनोरथः । असंजुक्तधनः प्राप निधनं दुर्गतिं तथा ॥ १८ ॥ इति केचिन्महापापाः प्राप्यामानं परिग्रहम् । गच्छन्ति नरके नोगाँस्तन्मिमीत परिग्रहम् ॥ १९ ॥

॥ इति मम्मणश्रेष्ठिकथा ॥

उक्तमेकोनविंशतितमं परिग्रहद्वारं । अथ षष्ठं दिग्विरतिव्रतमाह—

सीमस्थिते जलनिधौ निजकालमाने, शीतातपाम्भसि च जीवति जीवलोकः ।
दिग्यानमानमपि जन्तुहिताय तद्वत्, स्याच्चारुदत्तवदिहाप्रयतोऽतिदुःखी ॥ ४१ ॥

व्याख्या—जलनिधौ समुद्रे सीमस्थिते स्वमर्यादायां वर्तमाने सति जीवलोकः सुखं जीवति । च पुनर्निजकालमाने स्वकीयकालप्रमाणे शीते आतपे अम्भसि जले च सति जीवति । तद्वत्तथा दिग्यानमानमपि दिग्गमनप्रमाणमपि जन्तुहिताय प्राणिनां सुखाय स्यात् । अत्र व्यतिरेकदृष्टान्तमाह—इह जगति अप्रयतो दिग्गमनप्रमाणरहितोऽतिदुःखी स्यात् । किंवत् ? चारुदत्तवदिति वृत्ताक्षरार्थः । कथा चेयम्—

चारुदत्तकथा—

अत्रैव नरतक्षेत्रे चम्पा नाम्ना महापुरी । यदीयनिधिभिर्नाम्ना रत्नगर्भेति भूरभूत् ॥ १ ॥ तस्यां परिस्फुरत्सौधवसुद्योतितविष्टपः । शिष्टश्रेष्ठतमः श्रेष्ठी भानुर्भानुरिवाजनि ॥ २ ॥ गेहिनी देहिनीव श्रीः सुभद्रा तस्य चाभवत् । चारुदत्तः

सुतस्तस्य प्रशस्यगुणशेवधिः ॥ ३ ॥ सुहृद्भिरन्यदा क्रीडन्नपश्यत्सिन्धुरोधसि । चारुदत्तः पदन्यासं कस्याप्याकाशगामिनः ॥ ४ ॥ सप्रियोऽयमित्यबोधि स्त्रीपादैः पुरतस्तथा । रम्भाधाम सुमञ्ज्यां फलकासी ददर्श च ॥ ५ ॥ तत्रादूरे द्रुणा खेटं कीलितं लोहकीलकैः । अपश्यत्तदसेः कोशे चौषधीवलयत्रयम् ॥ ६ ॥ बुध्ध्या तत्रैकयौषध्या कृपालुस्तममोचयत् । संरोही चान्यया चक्रे चेतनश्च तृतीयया ॥ ७ ॥ खेटस्तं स्माह वैताढ्ये नगरे शिवमन्दिरे । महेन्द्रविक्रमाधीशसुतोऽमितगतिर्ह्यहम् ॥ ८ ॥ मित्रेण गौरमुण्डेनान्वितो धूमशिखेन च । एकदाऽहं गतः क्रीडन् ह्रीमन्तं गिरिमद्भुतम् ॥ ९ ॥ हरिण्याख्यस्य तत्राहं स्वमातुलतपस्विनः । कुमारीमैक्षि रुचिरामाख्यया सुकुमालिकाम् ॥ १० ॥ कामार्त्तः स्वगृहं प्राप्तो मित्रात् पित्रा च मां तथा । बुध्ध्वा सद्यः समानाय्य तयाऽहं परिणायितः ॥ ११ ॥ अन्यदाऽस्थामहं सार्धं रममाणस्तया सुखम् । अग्निलाषी धूमशिखस्तस्यां ज्ञातो मयेङ्गितैः ॥ १२ ॥ तथापि तेन सार्धं च क्रीडन्नहमिहागतः । प्रमत्तः कीलितस्तेन जह्रे च सुकुमालिका ॥ १३ ॥ त्वयाऽहं मोचितो मित्र वद किं करवाण्यतः । तवाहेतुकसुहृदोऽनृणः स्यां येन सम्प्रति ॥ १४ ॥ अहं त्वद्दर्शनेनापि कृतकृत्योऽस्मि बान्धव । इत्युक्त्वारुदत्तेनोत्पत्यागच्छत् स खेचरः ॥ १५ ॥ स जगाम निजं धाम श्रेष्ठिसूर्योवनावनीम् । प्राप्तश्च क्रमतः पित्रोर्नेत्रोत्सवविधौ विधुः ॥१६॥ पित्राज्ञयाऽथ सर्वार्थमातुलाङ्गरुहां कनीम् । नाम्ना मित्रवतीं चारुदत्तः परिणिनाय च ॥ १७ ॥ तस्यां चाभूत्कलासक्तो भोगसङ्गपराङ्मुखः । पितृव्यां च तथा वीक्ष्य मुग्धोऽयमिति तर्कितम् ॥ १८ ॥ वैदग्ध्याय ततो गोष्ठ्यां ललितायां स चान्यदा । पितृव्यां स्थापितः स्वैरं विचचार वनादिषु ॥ १९ ॥ कलिङ्गसेनादुहितुर्मन्दिरे विलसँश्च सः । वसन्तसेनावेश्यायास्तस्थौ द्वादशहायनीम् ॥ २० ॥ षोडश

व्ययिता मोहात्तत्र हाटककोटयः । कलिङ्गसेनया निःस्व इति निर्वासितश्च सः ॥ २१ ॥ पित्रोर्मृत्युमथ ज्ञात्वा दरिद्रो धैर्यतः खलु । स्वप्रियाया वणिज्यार्थं भूषणान्यात्तवाँस्ततः ॥ २२ ॥ मातुलेनान्यदा सार्धं प्रस्थितो भूषणैश्च तैः । पुरे उसीरवर्ताख्ये कर्पासं क्रीतवाँश्च सः ॥ २३ ॥ तस्य यातस्तामलिप्त्यां कर्पासो दववह्निना । दग्धोऽन्नाग्योऽयमिति च त्यक्तोऽथो मातुलेन सः ॥ २४ ॥ प्रचलन् क्षुत्पिपासार्त्त एकाकी पश्चिमां प्रति । ग्रामीयोऽध्वानमुल्लङ्घ्य प्रियङ्गुनगरेऽगमत् ॥ २५ ॥ दृष्टः सुरेन्द्रदत्तेन पितृमित्रेण तत्र च । सत्कृतः सुतवद्यांसोन्नोज्याद्यैः स स्थितः सुखम् ॥ २६ ॥ वृध्या स्वं लक्ष्मादाय प्रतिषिद्धोऽपि तेन सः । स्वार्जनायोपात्तन्नाणमः पोतेनाब्धिमथाविशत् ॥ २७ ॥ यमुनाद्वीपमेत्याथ तत्र ग्रामपुरादिषु । कुर्वन् गतागते हेमकोटीरष्ट स चार्जयत् ॥ २८ ॥ स्वदेशान्निमुखं पाथोवर्त्मना प्रस्थितस्ततः । दुर्दैवात् स्फुटितः पोतः फलकं चैकमासदत् ॥ २९ ॥ सप्तन्निर्दिवसैस्तीर्त्वा पाथोधिं तेन चागमत् । उदम्बरावतीवेलतटे राजपुरे वरे ॥ ३० ॥ त्रिदण्डी तत्र तं चारुदत्तं दिनकरप्रभः । उपसृत्य जगौ वत्स धनार्थीव विन्नाव्यसे ॥ ३१ ॥ तदागच्छ प्रयन्नामि वत्स गत्वा च पर्वते । रसं ते येन हेम्नः स्युः कोटयः प्रचुरा ध्रुवम् ॥ ३२ ॥ इत्युक्तस्तेन साकं स चलितः श्रेष्ठिसूस्ततः । हृष्टो महाटवीं प्राप चान्यदाऽनेकसाधकाम् ॥ ३३ ॥ प्रयान्तौ तत्र तस्याऽधेर्नितम्बेऽथ महाबिलम् । प्राप्तौ मृत्युमुखप्रायं बहुयन्त्रशिलाकुलम् ॥ ३४ ॥ त्रिदण्डी खलु तद्द्वारं स मन्त्रेणोदघाटयत् । प्रविष्टौ तद्बिलं तौ च दुर्गपातालसंज्ञकम् ॥ ३५ ॥ भ्रान्त्वा तत्र भृशं कूपं प्रापतू रसमन्दिरम् । चतुष्करानुमानेन क्षीमं श्वभ्रमुखोपमम् ॥ ३६ ॥ रसं

१ वासो वस्त्रम्.

प्रविश्य कूपान्तरादत्स्वालाबुनेति सः । तेनोक्तस्तद्धृतरज्ज्वा कूपे मञ्चिकयाऽविशत् ॥ ३७ ॥ चतुःपुरुषपर्यन्ते मेखला-
समलङ्कृतः । तेनेक्षितो रसस्तत्र वारितः केनचिच्च सः ॥ ३८ ॥ श्रेष्ठिसूः स्माह निक्षिप्तो रसार्थेऽहं त्रिदण्डिना । चारु-
दत्तोऽस्मि किं त्वं मां निषेधसि रसार्थिनम् ॥ ३९ ॥ सोऽप्याख्यद्भणिगेवास्मि वित्तार्थ्यत्र त्रिदण्डिना । क्षिप्तोऽहं सोऽग-
मत् पापो भक्षितोऽहं रसेन च ॥ ४० ॥ त्वं मा विशालाबुनीह रसं क्षेप्स्याम्यहं तव । चारुदत्तस्ततोऽलाबु द्रुतं तस्य
समार्पयत् ॥ ४१ ॥ बबन्ध मञ्चिकाधस्तात् पूरयित्वा रसेन सः । अथ प्रमुदितो रज्जुं श्रेष्ठिपुत्रोऽप्यकम्पयत् ॥ ४२ ॥
त्रिदण्डी रज्जुमाकृष्य कूपकण्ठागतं च तम् । ययाचे रसपात्रं च तं न समुदतारयत् ॥ ४३ ॥ लुब्धं तं द्रोहिणं बुध्वा
चारुः कूपेऽक्षिपद्रसम् । क्षिप्तः समञ्चिकस्तेन तत्र वेद्यां पपात सः ॥ ४४ ॥ स चाहेतुकमित्रं तं प्रोचे चारुं विषीद मा ।
रसान्तर्न गतोऽसि त्वं चारुवेदौ स्थितोऽसि च ॥ ४५ ॥ गोधा यदा तदाऽत्रैति तत्पुच्छमवलम्ब्य द्रोः । गन्तव्यं भवता
घारे प्रतीक्षस्व तदागमम् ॥ ४६ ॥ कियन्तं कालमप्यस्थाच्चारुदत्तो वणिक् स च । विपन्नः साऽपि गोधाऽऽगात्तत्पुच्छेन
निरैत्स तु ॥ ४७ ॥ चारुदत्तो बहिः प्राप्तो मूर्छितः पतितः क्षितौ । क्रमात्सचेतनोऽरण्यमहिषे चटितोऽचलत् ॥ ४८ ॥
तदारूढोऽटवीं भीमामत्ये (ती)त्य प्रान्तवर्तिनम् । ग्रामं प्राप्य प्रमुदितो भाग्योदयमिवात्मनः ॥ ४९ ॥ तत्र मातुलमित्रेण
रुद्रदत्तेन चेक्षितः । पुनर्नवोऽभवत्तेन पालितः शालवत् पुनः ॥ ५० ॥ भाण्डं चालक्तकप्रायं तुच्छमादाय सोऽचलत् ।
चारुदत्तस्ततः सार्द्धं तेन स्वर्णक्षितिं प्रति ॥ ५१ ॥ इक्षुवेगवतीं मार्गे नदीमुत्तीर्य तौ गतौ । गिरिकूटे ततश्चैत्रवनोद्देशे च

१ मेखलायाम्.

टंकणे ॥ ५२ ॥ ततश्चादाय द्वौ मेषौ तदारूढावजाध्वना । प्रान्तं प्राप्तौ तदा रुद्रदत्तः श्रेष्ठिसुतं जगौ ॥ ५३ ॥ नातोऽहि-
चारिणां वर्त्म तद्धत्वाऽजौ विदध्वहे । अन्तर्लोमे बहिर्मांसे नख्रे तत्र प्रविश्यते ॥ ५४ ॥ नारण्यपक्षिनिश्चात्रायातै-
र्मांसभ्रमेण तु । आवां गृहीतौ यास्यावो हेमभूमिं मनोमताम् ॥ ५५ ॥ चारुदत्तोऽवदद्यान्यामुत्तीर्णौ दुर्गभूमिकाम् ।
मेषाविमौ कथं हन्वः स्वबन्धू इव वत्सलौ ॥ ५६ ॥ एतौ न तावकौ तावत्कथं त्वं मां निषेधसि । क्रुद्धो रुद्रो निगद्येत्यादौ
स्वमेषं जघान च ॥ ५७ ॥ चारुदत्तमथाजोऽन्योऽपश्यत् कातरया दृशा । स तं जगावहं त्रातुं त्वां नेशो विदधामि किम्
॥ ५८ ॥ तथापि शरणं तेऽस्तु धर्मः शर्मकरोऽर्हताम् । ततोऽजस्तस्थिरा धर्मं शिरसा प्रत्यपद्यत ॥ ५९ ॥ तेन दत्तं नम-
स्कारं श्रुत्वाऽजोऽभूत् समाहितः । हतश्च रुद्रदत्तेन देवभूयं जगाम च ॥ ६० ॥ अथ क्षुरीधरावेतौ प्रविष्टावजजन्तुयोः ।
नारण्यान्यामुद्धृतौ च पलपिण्डधिया ततः ॥ ६१ ॥ आयुध्यमानयोर्मार्गे द्वयोरेकपलार्थिनोः । चारुदत्तोऽपतन्नख्रागतः
क्वापि सरोवरे ॥ ६२ ॥ दीर्त्वा क्षुरिकया नख्रां तीर्त्वा च श्रेष्ठिसूनिरैत् । गच्छन् पुरोऽटवीमध्येऽपश्यच्चैकं महानगम्
॥ ६३ ॥ तत्रारूढो मुनिं वीक्ष्य कञ्चन प्रतिमास्थितम् । ववन्दे च मुनिः स्माह दत्त्वा धर्माशिषं ततः ॥ ६४ ॥ चारुदत्त
कथं चात्र त्वमागा दुर्गभूमिकम् । सुरविद्याधराऽन्यां न विनाऽन्यस्यात्र यद्गतिः ॥ ६५ ॥ एषोऽमितगतिः सोऽहं पुरा त्वं
यममोचयः । तं तदोत्पतितं शत्रुं प्रापमष्टापदाचले ॥ ६६ ॥ विहाय मत्प्रियां नंष्ट्वा स ययौ दुर्मतिः क्वचित् । तामादाय
पतन्तीं स्वगृहमागतवानहम् ॥ ६७ ॥ दत्त्वा मे राज्यमात्मीयं मत्पिता व्रतमाददे । चारणव्रतिनोः पार्श्वे हिरण्यस्वर्णकु-
म्भयोः ॥ ६८ ॥ पत्न्यां मनोरमायां मे जज्ञे सिंहयशाः सुतः । वराहग्रीव इत्यन्यो मत्तुल्यो निखिलैर्गुणैः ॥ ६९ ॥ राज्यं

तथा यौवराज्यं दत्त्वा विद्याश्च पुत्रयोः। पितृगुर्वोस्तयोः पार्श्वे जगृहेऽहमपि व्रतम् ॥ ७० ॥ क्षाराब्धिमध्यवर्त्येष द्वीपः श्रीकुम्भकण्टकः। गिरिः कर्कोटकाख्योऽयं तपस्तप्येऽत्र संस्थितः ॥ ७१ ॥ त्वमत्र कथमायात इति पृष्टः स साधुना। चारुदत्तोऽवदत्सर्वव्यसनं चात्मनः क्रमात् ॥ ७२ ॥ श्रुतश्च तस्य राजर्षेः सुतौ विद्याभृदुत्तमौ। तत्रागत्य मुनिं चारुदत्तं नत्वा निषेदतुः ॥ ७३ ॥ तदा वरः सुरः कोऽपि तत्रागत्य नमोऽकरोत्। चारुदत्तं महर्षिं तु नत्वा पश्चादवन्दत ॥ ७४ ॥ खेचराभ्यां सुरः पृष्टस्तद्वन्दनविपर्ययम्। जगाद चारुदत्तोऽयं धर्माचार्यो मम ध्रुवम् ॥ ७५ ॥ तथाहि पुरि काश्यां द्वे परिव्राजौ बभूवतुः। वेदाङ्गपारगे जांमी सुभद्रासुलसाभिधे ॥ ७६ ॥ तथा पराजितास्ताभ्यां बहवो वादिनस्ततः। परिव्राड् याज्ञवल्क्योऽप्यन्यदा वादाय चागमत् ॥ ७७ ॥ विनेयो विजितो जेतुर्नवितेति प्रतिश्रवम्[2]। कृत्वाऽथ सुलसा तेन जिता दासी च सा कृता ॥ ७८ ॥ शुश्रूष्यते तया याज्ञवल्क्यः सुलसया भृशम्। तस्यां स्मरातुरः सोऽभूद्यौवने नवयौवनः ॥ ७९ ॥ वसतोऽस्याथ पूःपार्श्वे सुतोऽस्यां क्रीमतोऽजनि। तं पिप्पलतले मुक्त्वाऽकीर्तिर्नीतौ गतौ च तौ ॥ ८० ॥ ज्ञात्वेत्यागत्य तं बालं सुभद्रा कृपयाऽग्रहीत्। अदन्तं पतितं वक्त्रे पिप्पलस्य फलं स्वयम् ॥ ८१ ॥ सा पिप्पलाद इत्याख्यां तस्य चक्रे यथास्थिताम्। यत्नेनावर्धयच्चाध्यजीगपद्वेदसद्विधिम् ॥ ८२ ॥ बभूव सोऽतिमेधावी वादिदर्पापहः क्रमात्। सुलसायाज्ञवल्क्यौ तु तेन वादार्थमीयतुः ॥ ८३ ॥ विजिग्ये तौ स वादे द्वौ पितरौ स्वौ विबुध्य च। मुक्तोऽभून्यामहमिति परं कोपमुपाययौ ॥ ८४ ॥ सम्यज्ञातापितृमेधमुख्यान् संस्थाप्य वै मखान्। पितृमेधे मातृमेधे सोऽवधीत् पितरौ

१ जगिन्यौ. २ प्रतिज्ञाम्.

स्वकौ ॥ ८५ ॥ क्षिप्त्वादविनेयोऽहं वाङ्मलिर्नामतोऽकृपः । विधाय पशुमेधादीन् यज्ञान् जज्ञे च नारकः ॥ ८६ ॥ नरकाऽऽगतो जातः पञ्चकृत्वस्त्वहं पशुः । विनाशितश्च पापीयोमुख्यैर्विप्रैर्मुहुर्मुहुः ॥ ८७ ॥ मेषोऽथ ढंकणेऽजूवं चारुदत्तेन चामुना । प्रैत्तधर्मो[1] हतो रुद्रदत्तेन च सुरोऽजवम् ॥ ८८ ॥ तच्चारुदत्तौ मे धर्मगुरुः कारुण्यसागरः । तन्मया वन्दितः पूर्वं क्रमोऽप्युल्लङ्घितो न हि ॥ ८९ ॥ उदितौ त्रिदशेनेति तावप्येवमवोचताम् । उपकर्ता तवेवास्मत्पितुः प्राणितदो ह्ययम् ॥ ९० ॥ चारुदत्तस्ततो बाढं खचराऽन्यां तु सत्कृतः । तत्क्षणात्तेन देवेन नीतश्चम्पापुरीं पुनः ॥ ९१ ॥ हेममाणिक्यमुक्तादि कोटिकोटीः प्रदाय सः । सुरोऽथ चारुदत्तस्य तिरोऽभूत् प्रीतमानसः ॥ ९२ ॥ चारुदत्तस्तदाऽपश्यन्नार्यां मित्रवतीं सतीम् । वेश्यां वसन्तसेनाख्यां तथा सर्वार्थमातुलम् ॥ ९३ ॥ चारुदत्तो यथाऽरुरुदिग्गतिर्दुःखमासदत् । तथैवाप्स्यन्त्यविरतास्तत्कुर्याद्दिग्गतेर्मितिम् ॥ ९४ ॥

॥ इति चारुदत्तकथा ॥

अत्रैव विशेषोपदेशमाह—

न गम्यं नागम्यं क्वचिदकृतदिग्यानविरतेः, कथं वा स्याद्भिक्षे सततगतिरेकत्र वसतिः ।
द्वितीयद्वीपान्तर्भरतगतमाक्रान्तजलधि–र्न किं द्रौपद्यर्थे हरिरमरकङ्कापुरमगात् ॥ ४२ ॥

---

१ दत्तधर्मः.

व्याख्या—न कृता दिग्यानस्य दिग्गमनस्य विरतिः परिमाणं येन स तथा तस्य स्वैरसंचारिणः क्वचित् क्वापि गम्यं अगम्यं च न स्यात् । वा यथा सततगतिर्वायुरेकत्रवसतिरेकत्रावस्थानसंचरणशीलः कथं स्यात् ? अपि तु न स्यात् । तथा सोऽपीति हरिर्नारायणो द्रौपद्यर्थे आक्रान्तजलधिः सन् द्वितीयद्वीपान्तर्भरतगतं धातकीखण्डद्वीपमध्यस्थभरतक्षेत्रमध्यवर्तिं अमरकङ्कापुरं किं नागात् न जगाम ? अपि तु जगामैव । इत्यहरार्थः । कथा चेयम् । (कृष्णवासुदेवकथा)—

समस्ति स्वस्तिकृद्वस्तं हस्तिनागपुरं जनैः । ध्वजाव्याजाद्यत्र चैत्यशृङ्गे शृङ्गारिताः श्रियः ॥ १ ॥ युधिष्ठिरादयः पञ्च पाण्डवास्तत्र भूभृतः । द्रौपद्या प्रियया सार्धं वारकेणैव रेमिरे ॥ २ ॥ अन्येद्युर्नारदो ग्राम्यन् द्रौपदीधाम चागमत् । तयाऽविरतिभागित्यवज्ञयाऽसौ न वन्दितः ॥ ३ ॥ भाविन्येषा कथं दुःखपात्रमित्याशयो मुनिः । क्रुधा ज्वलन् घृताहुत्या हुताशन इवागमत् ॥ ४ ॥ अत्राच्युतभिया तस्या असमीक्ष्यासुखावहम् । ग्राम्यँश्च नारदः प्राप धातकीखण्डभारतम् ॥ ५॥ तत्र चम्पेशितुर्विष्णोः कपिलाख्यस्य सेवकम् । पद्मं सोऽमरकङ्कापूःप्रभुं स्त्रीलोलमन्यगात् ॥ ६ ॥ सोऽप्युत्थाय स्वशुद्धान्ते नीत्वा स्वा दर्शयन् वशाः । जगाद नारदं दृष्टाः क्वापीदृश्यः किमङ्गनाः ॥ ७ ॥ सेत्स्यत्यनेन मे कार्यं विचार्येत्यार्य ऊचिवान् । प्रमोदसे किमेताभिः कूपमण्डूकवन्नृप ॥ ८ ॥ आभिश्चित्रीयसे स्थानेऽविज्ञातान्यवशासुखः । माकन्दमञ्जरीस्वादं विद्याकुष्ठो न मन्दलुक् ॥ ९ ॥ जम्बूद्वीपस्य भरते हस्तिनागपुरे पुरम् । श्रियामेकं द्रौपदीति वर्तते पाण्डवप्रिया ॥ १० ॥ एताः सर्वाः पुरस्तस्या दास्य एवेति नारदः । प्रोच्योत्पत्यान्यतोऽगच्छत् स्थायी नैकत्र यन्मुनिः ॥ ११ ॥

१ निम्बभुक्. २ गृहम्.

पद्मोऽथ द्रौपदीमिच्छन् देवं पातालवासिनम् । पूर्वसंगतिकं तीव्रतपसाऽऽराधयन्नृपः ॥ १२ ॥ किं करोमीति जल्पन्तं सुरमध्यऽहतामितम्[1] । जगाद पद्मोऽत्रानीय द्रौपदीं देहि मे सुहृत् ॥ १३ ॥ सोऽप्यूचे द्रौपदीं नान्यमीहते पाण्डवानृते[2] । त्वदाग्रहात्तथाप्यानयामीत्युक्त्वैत् स तत्पुरे ॥ १४ ॥ अथावस्वापिनीं दत्त्वा निद्राणां द्रौपदीं निशि[3] । अपहृत्यानयत् पद्मनाम्नान्यर्णे स निर्जरः ॥ १५ ॥ प्रबुद्धा द्रौपदी तस्मिन्नपश्यन्ती स्वकां स्थितिम्[4] । स्वप्नोऽयमिन्द्रजालं किं वेति दध्यौ प्रदुःखिता ॥ १६ ॥ पद्मनाम्नोऽन्यधत्ताथ मा त्रैषीः सुमुखे मया । आनायितासि त्वं भुङ्क्ष्व भोगान् सार्धं मयाऽधुना ॥ १७ ॥ धातकीखण्डोऽयं द्वीपोऽमरकङ्का त्वसौ पुरी । नृपोऽत्र पद्मनाम्नोऽहं बुभूषुस्ते धवोऽधुना ॥ १८ ॥ प्रत्युत्पन्नमतिर्द्रौपद्याख्यान्मासान्तरे यदि । कोऽप्येष्यति मदीयो न तत्करिष्ये त्वदीरितम् ॥ १९ ॥ जम्बूद्वीपजुषां नृणामसंज्ञाव्यागमोऽत्र च । ध्यात्वेति तस्थिरं मेने पद्मस्तद्भपरायणः ॥ २० ॥ मासान्तेऽपि न भोदयेऽहं वल्लभैस्तैर्विना कृता । सतीमतल्लिका द्रौपदीत्यभिग्रहमग्रहीत् ॥ २१ ॥ तां निशान्ते निशान्ते तेऽपश्यन्तः पाण्डवा अपि । जलस्थलवनावन्यां निरीक्षाञ्चक्रिरे भृशम् ॥ २२ ॥ तद्वार्तामपि नापुस्ते तन्माता विष्णवेऽन्यधात् । यावत्सोऽप्यर्थमूढोऽस्थात्तावदागाच्च नारदः ॥ २३ ॥ किं क्वापि द्रौपदी दृष्टेत्यापृष्टः श्रीधरेण सः । स्माहागां धातकीखण्डेऽमरकङ्कापुरीमहम् ॥ २४ ॥ अपश्यं द्रौपदीं तत्र राज्ञः पद्मस्य सद्मनि । प्रोच्येति सोऽन्यतोऽगच्छत् कलिकेलिकुतूहली ॥२५॥ पाण्डवानन्यधात् कृष्णः पद्मेन द्रौपदी हृता । खिद्यध्वं माऽधुनाऽप्येष आहरिष्यामि तामहम् ॥ २६ ॥ ततो विष्णुर्महासैन्यः समं पाण्डुतनूजवैः । मागधान्नि-

१ प्रत्यक्षतां प्राप्तम्. २ तव पतिः भवितुमिच्छुः. ३ गृहमध्ये. ४ प्रभाते.

धप्राचीनवार्धिरोधसि जग्मिवान् ॥ २७ ॥ पाण्डवा जगदुः श्रीपं प्रज्ञोऽयमतिदारुणः । उपास्थित सरिन्नाथः संसार इव दुस्तरः ॥ २८ ॥ पार्श्वस्थद्वँश्वलद्वीचिकरैः कवलयन्नलम् । कृतान्त इव दुष्प्रेक्ष्यो वारिराशिरसौ प्रज्ञो ॥ २९ ॥ अत्र कुत्रापि तिष्ठन्त्यमाना मीना महाऽझिवत् । कैवर्ता इव कुत्रापि वेलन्धरसुरास्तथा ॥३०॥ कमण्डलुनिज्ञा मेघा उद्वर्त्यन्तेऽत्र वीचिज्ञिः । तद्वार्धिर्मनसाऽप्येषोऽलङ्घ्यो लङ्घ्यो विज्ञो कथम् ॥ ३१ ॥ का वश्चिन्तेति तान् प्रोच्याच्युतोऽप्रच्युतविक्रमः । तीरे संस्थाप्य चोपासाञ्चक्रे श्रीसुस्थितं सुरम् ॥ ३२ ॥ सोऽप्याशु प्रकटीज्ञूय किं करोमीत्यज्ञाषत । श्रीपः स्माह नृपः पद्मो द्रौपदीं ज्ञह्मनाऽहरत् ॥ ३३ ॥ सा यथाऽऽनीयते द्वीपाज्ज्ञातकीखण्डसंज्ञकात् । तथा विधेहि त्वं शीघ्रं क्षारवारिधिदैवत ॥ ३४ ॥ सुरोऽप्यूचेऽथ पद्मस्य पूर्वसंगतनिर्जरः । हृत्वाऽदाद्रौपदीं सुप्तां तद्वोऽपि[1] ददामि ताम् ॥ ३५ ॥ यद्येदं रोचते वो न तत्पद्मं सपरिच्छदम् । प्रक्षिप्याम्भोनिधौ तूर्णं द्रौपदीमर्पयामि वः ॥ ३६ ॥ विष्णुर्जगौ मेति कार्षीः पाण्डवानां ममापि च । षण्णां रथानामध्वानं नीरान्तर्देह्यनाहतम् ॥ ३७ ॥ यथा गत्वा स्वयं तत्र तं निर्जित्य च पापिनम् । आनयामो वयं कृष्णामहाय त्वत्प्रसादतः ॥ ३८ ॥ सुस्थितोऽथ तथाऽकार्षीत् सपाण्डुतनयो हरिः । वार्धिं स्थलमिवोल्लङ्घ्यामरकङ्कामगात् पुरम् ॥ ३९ ॥ तद्बाह्योद्यानमध्यस्थोऽनुशिष्याब्धिं[3]शयः स्वयम् । प्राहिणोद्दारुकं दौत्ये सोऽपि पद्मान्तिकेऽगमत् ॥ ४० ॥ तदंहिविष्टरं स्पृष्ट्वांहिणा भृकुटिज्रीषणः । कुन्ताग्रेण ददक्षेखं पद्ममाख्यच्च दारुकः ॥ ४१ ॥ इन्द्रानुजसहायानां पाण्डवानां प्रिया त्वया । जम्बूद्वीपस्य ज्ञरतादाजह्रे द्रुपदाङ्गजा ॥ ४२ ॥ वार्धिनाऽपि प्रत्तवर्त्मा श्रीपः

१ वः युष्मभ्यम्. २ द्रौपदीम्. ३ हरिः. ४ तन्नामानं सारथिम्.

पाण्डुसुतैः समम् । आयातोऽस्ति यदि प्राणिणिषस्येषा तदर्ष्यताम् ॥ ४३ ॥ पद्मोऽप्यूचे स तत्रैव विष्णुरत्र कियान्मम । आत्मषष्ठोऽपि तद्याहि तं सज्जय युधेऽधुना ॥ ४४ ॥ तज्जीरन्येत्य तेनापि केशवाय निवेदिता । पद्मोऽप्येयाय[2] सन्नह्य युयुत्सुः सपरिच्छदः ॥ ४५ ॥ तत्सैन्येऽथागते कृष्णः पाण्डवानित्यभाषत । योत्स्यध्वेऽनेन किं यूयं किं वा युध्येऽहमेककः ॥ ४६ ॥ जगुस्ते सह पद्मेन वयं योत्स्यामहे विभो । नृपोऽद्य पद्मनाभो वा वयं वेत्याहि[3]ताश्रवाः ॥ ४७ ॥ युध्यमानाश्च ते तेन जिताः प्रोचुर्हरेरिदम् । प्रभो बलीयान् पद्मो न जय्यस्त्वदृते केनचित् ॥ ४८ ॥ स्माह श्रीपो जिता यूयं तदानीमेव पाण्डवाः । क्षमापः पद्मो वयं वेति सन्धां विदधिरे यदा ॥ ४९ ॥ राजाऽहमेव पद्मो नो प्रोच्येति च जनार्दनः । युधे प्रास्थित दध्मौ च पाञ्चजन्यं गुरुस्वरम् ॥ ५० ॥ तद्ध्वनिना क्षिप्तो बलभागस्तृतीयकः । पद्मस्य सिंहनादेन हरिणानां गतिर्यथा ॥ ५१ ॥ शार्ङ्गिणाऽऽस्फालितं शार्ङ्गं तद्धनब्देनात्रुटत् पुनः । बलत्र्यंशोऽस्य तन्नष्ट्वा दुर्बलोऽगाऽरणात् पुरीम् ॥ ५२ ॥ सोऽस्थाद्बोहार्गलान्नाज्ञि गोपुराणि पिधाय च । कृष्णोऽपि क्रोधतो बभ्रे नारसिंहं वपुः क्षणात् ॥ ५३ ॥ क्रुद्धः कृतान्तवक्त्रात्तवक्त्रदंष्ट्रातिदारुणः । सार्धं द्विषां हृदा पाददर्दरैः क्षामकम्पयत् ॥ ५४ ॥ पेतुर्दैवतसद्मानि भ्रष्टं कूटाग्रमण्डलम् । भाग्यशीर्यन्त कुड्यानि नृहरेः क्रमदर्दरैः ॥ ५५ ॥ जलाशयेऽविशन् केचित् केचिद्भर्त्तेषु लिल्यिरे । तत्पुर्या नृहरेर्नीत्या केऽपि पेतुश्च मूर्छिताः ॥ ५६ ॥ क्षमस्व देवि नो रक्षातो हरेरन्तकादिव । इत्युक्त्वा द्रौपदीं पद्मः शिश्राय शरणं रयात् ॥ ५७ ॥ साऽप्याख्यन्मां पुरस्कृत्य वेषं कृत्वा च योषितः । कुरुष्व शरणं कृष्णं तथा प्राणिषि नान्यथा ॥ ५८ ॥ इत्युक्तः

१ प्राणितुं जीवितुमिच्छसि. २ आजगाम. ३ कृतप्रतिज्ञाः.

स तथा कृत्वा नमोऽकार्षीज्जनार्दनम्। शरण्यः सोऽपि मा भैषीरिति पद्ममनन्दयत् ॥ ५९ ॥ पाण्डवानां समभ्यर्ण श्रीपतिर्द्रुपदात्मजाम्। तैः समं चलितस्तेन रथारूढोऽध्वना जयी ॥ ६० ॥ तदानीं पूर्णभद्राख्ये चम्पोद्याने मनोरमे। स्थितं सुव्रततीर्थेशं पप्रच्छ कपिलो हरिः ॥ ६१ ॥ ममैष शङ्खनादोऽयं स्वामिन् कस्य श्रवोऽतिथिः। कृष्णविष्णोरयं शङ्ख-स्वर इत्यवदज्जिनः ॥ ६२ ॥ विष्णू स्यातां किमेकत्रेति पृष्टो हरिणा प्रभुः। जगाद द्रौपदीकृष्णपद्मसंबन्धमादितः ॥ ६३ ॥ जम्बूद्वीपार्धभरताधीशितुः स्वागतं हरेः। आगतस्यातिथेः कुर्वेऽहं नु स्वामिन् कथं वद ॥ ६४ ॥ जिनोऽवग्न यन्नैकत्र चक्री नार्हन् द्वितीयकः। तथा न कारणायातो मिलत्यन्येन केशवः ॥ ६५ ॥ इत्यर्हद्वाचमाकर्ण्यापि द्रष्टुं कपिलो हरिः। जगामाब्धितटे यान्तं मध्येब्ध्यैक्षत तद्रथम् ॥ ६६ ॥ कपिलः केशवोऽहं त्वामुत्को द्रष्टुमिहागतः। तद्वत्स्वेत्यद्रराङ्कं शङ्खं स श्रीधरोऽधमत् ॥ ६७ ॥ वयं दूरं प्रयाताः स्मो वाच्यं किञ्चन न त्वया। इति व्यक्ताक्षरोल्लापं (पः) शङ्खोऽपूरि मुर-द्विषा ॥ ६८ ॥ श्रुत्वा तल्लंखशब्दं स कपिलो वलितो जवात्। गत्वा कङ्कां पुरीं प्रोचे पद्ममेतत् किमित्यहो ॥ ६९ ॥ सोऽप्यूचे देव कृष्णेन पराभूतोऽस्मि तेऽनुगः। विष्णुराख्यदरे कोऽयं कृतोऽसदृशविग्रहः ॥ ७० ॥ पद्मं निर्वास्येति रोषान्ध्यधाज्ज्ये स तत्सुतम्। कृष्णोऽपि वार्धिमुल्लङ्घ्य पाण्डवानित्यभाषत ॥ ७१ ॥ यावत्सुस्थितमापृच्छेऽतीत तावत्सुरापगाम्। नावारूढास्तेऽथ गङ्गामुत्तीर्येति मिथो जगुः ॥ ७२ ॥ अत्रैव रक्ष्यतां नौर्यद्रक्ष्यामोऽद्य हरेर्बलम्। गङ्गाश्रोतो विना नावमुत्तीर्यायात्यसौ कथम् ॥ ७३ ॥ त इत्याहितसङ्केता निलीयास्थुः सरित्तटे। कृष्णः सुरापगामागादितश्च कृतकृ-त्यकः ॥ ७४ ॥ तत्रावीक्ष्य तरीं श्रीपो रथं न्यस्य सवाजिनम्। दोष्ण्येकत्रान्यदोष्णाऽम्बु तरीतुमुपचक्रमे ॥ ७५ ॥

मध्येगङ्गमितः श्रान्तो दध्यौ चेति जनार्दनः । समर्थाः पाण्डवा गङ्गां तेरुरेते तरीमृते ॥ ७६ ॥ तध्ध्यातं स्वर्धुनीदेवी बुध्ध्वा स्ताघमदाऽत्र्यात् । सुखेनोल्लङ्घ्य तां विष्णुः पाण्डवानित्यभाषत ॥ ७७ ॥ कथमुल्लङ्घिता गङ्गा युष्माभिस्तेऽप्यदोऽवदन् । नावोत्तीर्णा कथं सा नौः प्रेषिता नेत्यजोदिते ॥ ७८ ॥ जगुस्ते प्रेषिता नौर्न भवदोजः परीक्षितुम् । श्रीपः कोपादवोचत् किं मे स्थाम ज्ञास्यथाधुना ॥ ७९ ॥ न बुद्धमब्धितरणेऽमरकङ्काजये तथा । इति प्रोच्य रथाँस्तेषां सोऽमर्दद्भोहृदण्डकैः ॥ ८० ॥ रथमर्दननाम्नाऽभूत्तत्र पत्तनमुत्तमम् । ततः पाण्डुसुताँश्चक्रे कृष्णो निर्विषयान् क्रुधा ॥ ८१ ॥ स्वसैन्येनाथ संभूय कृष्णोऽगाद्द्वारकां पुरीम् । पाण्डवाः स्वपुरं प्राप्य कुन्त्यै तदखिलं जगुः ॥ ८२ ॥ कुन्त्यपि स्माह दाशार्हं द्वारकां नगरीं गता । कुत्र स्थास्यन्ति मत्पुत्रास्त्वया निर्विषयीकृताः ॥ ८३ ॥ हरिरूचे पुरीं कृत्वा दक्षिणाम्भोधिरोधसि । नवां पाण्डुमथुराख्यां तिष्ठन्तु तनयास्तव ॥ ८४ ॥ गत्वा कुन्ती जगौ सर्वं सुतेभ्यः कृष्णशासनम् । तेऽपि चक्रुस्तथा तत्र गत्वाऽस्थुश्च यथासुखम् ॥८५॥ इत्यनिर्मितदिग्यानमानानाममितां गतिम् । प्राणिहामवगत्यातो मिमीध्वं दिग्गतिं बुधाः ॥८६॥

॥ इति केशवसम्बन्धः ॥

व्याख्यातमिदं विंशतितमं दिग्विरतिद्वारं । अथ सप्तमं भोगोपभोगव्रतमाह—

भोगोपभोगनियमोऽपि शिवाय चेन्न, स्याद्भङ्गचूल इव देवपदप्रदस्तु ।
प्रीणाति चातकमनन्यरतं पयोदश्चूताशनैकरसमन्यभृतं वसन्तः ॥ ४३ ॥

---

१ अजेन कृष्णेनोदिते.

व्याख्या—भोगः पुष्पादिः, उपभोगो वस्त्राङ्गनादिः, यदुक्तम्—

"सकृदेव भुज्यते यः स भोगोऽन्नस्रगादिकः । पुनः पुनः पुनर्भोग्य उपभोगोऽङ्गनादिकः ॥ १ ॥"

तयोर्नियमोऽभिग्रहः चेद्यदि शिवाय मोक्षाय न स्यात्तर्हि देवपदप्रदस्तु किं न स्यात् ? अपि तु स्यादेवेति । अत्रानुक्ताऽपि काक्वाख्याऽर्थाद्गम्यते । कस्मिन्निव वङ्कचूले इव यथा वङ्कचूले भोगोपभोगनियमो देवपदप्रदोऽभूदिति । एतदेवाह—पयोदो मेघश्चातकं प्रीणाति । किंविशिष्टं ? अनन्यरतं न अन्यस्मिन्मेघव्यतिरिक्तजले रतं आसक्तं अनन्यरतं मेघे एवासक्तं । यदुक्तम्—

"बप्पीहउ तं जलु पीयइ जं घणु तुरुउ देइ । माणविवज्जिय घरि पमिउ मरइ न वंधु भरेइ ॥ १ ॥"

तथा वसन्तोऽन्यभृतं कोकिलं प्रीणाति संतोषयति । किंभूतं ? चूताशने सहकारफलभक्षणे एकोऽद्वितीयो रसो यस्य स तथा तं । इति वृत्ताक्षरार्थः । कथा चेयम्—

(वङ्कचूलकथा)

क्षितिप्रतिष्ठितं नाम पुरं सुरपुरोपमम् । विलसद्विबुधव्रातराजितं परमर्द्धिकम् ॥ १ ॥ तत्रारातिवधूवर्गवैधव्यविधिबोधकः । जितशत्रुरिति ख्यातः क्षितिनाथोऽजनि प्रधीः ॥ २ ॥ दोषाकरः क्षयी वक्रो मित्रद्रोही कलङ्कयुक् । शशीवाम्भोनिधेस्तस्य वङ्कचूलोऽभवत्सुतः ॥ ३ ॥ सोऽन्यदा व्यसनासक्तः पित्रा निर्घाटितः पुरात् । कर्णः शीर्णीभवेद्येन तेन हेम्नाऽपि पूर्यताम् ॥ ४ ॥ भ्राम्यन्नितस्ततः सोऽथ विन्ध्यपद्दयां ययौ क्रमात् । पुत्रीचक्रे पल्लिनाथस्तं च स्वाकृतिमानिति ॥ ५ ॥

पल्लीपतौ मृतेऽन्येद्युर्वङ्कचूलो महाभुजः । तत्पदे स्थापितः पल्लीलोकैर्लोकंपृणैर्गुणैः ॥ ६ ॥ विहरन्तोऽन्यदा तस्याः पद्मयाः पार्श्वे समाययुः । सूरयो धर्मघोषाख्या धर्मघोणपतत्पराः ॥ ७ ॥ धर्मं दिशन् जगर्जाथ गुरुर्गुरुगिरा यथा । तथाऽम्बरे जगर्जोच्चैः स्पर्धयेव घनाघनः ॥ ८ ॥ जलजावोऽमुना सर्वस्तिरश्चक्रेऽत्र सूरिणा । इति क्रुधेव जलदश्चक्रे जलमयं जगत् ॥ ९ ॥ जगदुः सूरयः साधून् वर्षाकालो ह्युरुत्तरः । समायातो कथं नावी विहारोऽग्रेऽसुमत्क्षितौ ॥ १० ॥ तत्पद्मयां यात याचध्वं जनं कञ्चिदुपाश्रयम् । वर्षा अतीत्य यत्तत्रानवद्यं विहरिष्यते ॥ ११ ॥ मुनयोऽथ गतास्तत्र वङ्कचूलं सदोगतम्[1] । उपाश्रयमयाचन्त वर्षासु स्थितिहेतवे ॥ १२ ॥ सोऽप्यूचे प्रायशः पापवृत्त्यैव नगवन् वयम् । जीवामो धर्मिजिस्तेन संवासो नो न युज्यते ॥ १३ ॥ तथापि चेन्न युष्माभिः कस्याप्यादिश्यते वृषम् । तदत्रोपाश्रये वर्षास्तिष्ठन्तु मुनयः सुखम् ॥ १४ ॥ ॐमिति प्रतिपद्याथ ते तत्सूरेर्न्यवेदयन् । सोऽप्यागत्य स्थितस्तत्रोपाश्रये श्रमणैः समम् ॥ १५ ॥ स्वाध्यायध्यानलीनान्तःकरणाः श्रमणाः स्वयम् । धर्मकर्मपरास्ते न धर्ममाख्यान्ति कस्यचित् ॥ १६ ॥ तत्राथ तस्थिवांसं तं प्राप्तप्रशमनं गुरुम् । समुपास्थितश्रामण्यश्रीरन्येव शरऽयात् ॥ १७ ॥ धनकर्मोज्झितौ साधुकरप्रसरसुन्दरौ । सूरिसूरौ मिथः पङ्कं स्पर्धयेवापचक्रतुः ॥ १८ ॥ प्रोल्लसत्साधुपद्माऽपि पङ्कनिर्नाशिकाऽपि सा । स्फुरद्दोषाकरा सूरिश्रियं शिश्ये (प्राप) शरत् कथम् ॥ १९ ॥ मानसानि सतां नेजुर्नैर्मल्यं नात्र केवलम् । परितस्तोपकर्तॄणि जलान्यपि जलाशये ॥ २० ॥ विजन्हुः सर्वतो राजहंसाः पङ्कोज्झितक्षितौ । दर्शयन्त इवाध्वानं मुनीनां विहृतिक्षणे ॥ २१ ॥ समीक्ष्य सूरयोऽतीतवृतीनीक्षुव-

---

१ सन्नास्थितम्.

नान्यथ । विहारावसरं मत्वा पल्लीशं चान्वजीज्ञपन् ॥ २२ ॥ सोऽपि दध्यौ महात्मानो धर्मकर्मपराः स्थिताः । इयत्कालं परं किञ्चिदाचख्युर्न च कस्यचित् ॥ २३ ॥ इत्यार्द्रमानसो वङ्कचूलो विहरतो गुरून् । अनुगत्य कियद्भूमिं जगाद नतमस्तकः ॥ २४ ॥ स्वामिन्नहं महापापाजीवी जीवदयादिकम् । अङ्गीकर्तुं कथं शक्तो (न शक्नोमि) मिलितेऽपि गुरौ त्वयि ॥ २५ ॥ तथापि देहि मे काँश्चिन्नियमान् सुकरान् प्रभो । किञ्चित्पुण्यपरोऽहं स्यां दुराचारोऽपि यैरिह ॥ २६ ॥ गुरुर्जगौ फलं नाद्या अज्ञातं च स्वयं परैः । मुञ्चन् प्रहारमध्युष्टक्रमानपसरेस्तथा ॥ २७ ॥ त्वं भूपमहिषीसङ्गं मा कुर्वीथाः कदाचन । पल्लीश काकमांसं चाद्या भेषजकृतेऽपि न ॥ २८ ॥ हितैषिगुरुणा दत्ताँश्चतुरश्चतुरः स तान् । अभिग्रहानभिगृह्य जगाम निजसद्मनि ॥ २९ ॥ विजह्रुः सूरयस्तेऽथ ग्रामाकरपुरादिषु । अवस्कन्दकृतेऽन्येद्युर्वङ्कचूलोऽप्यगात् क्वचित् ॥ ३० ॥ बुभुक्षितो वने क्वापि तस्थौ च सपरिच्छदः । सेवकाः पक्वकिंपाकफलान्यानीय तं जगुः ॥ ३१ ॥ स्वामिन्नमूनि पक्वानि रसालानि फलानि भोः । अद्धि सोऽप्याह किं नामेदंफलानां समुच्यताम् ॥ ३२ ॥ ते जगुर्देव नास्माभिः फलनामावबुध्यते । परं पक्वानि दृश्यन्ते पेशलानि त्वमद्धि तत् ॥ ३३ ॥ सोऽप्यूचे नाहमज्ञातनामाद्मि फलमत्त तत् । यूयमित्युदिता जक्षुः फलानि सकलानि ते ॥ ३४ ॥ भुक्त्वोत्थितास्ते निद्राणा दीर्घनिद्रां च लेभिरे । वङ्कचूलः क्षणादेतान्मृतान् वीक्ष्येत्यचिन्तयत् ॥ ३५ ॥ अहो न सूरिभिश्चेन्मेऽदास्यतायमभिग्रहः । तदा मयाऽप्यवसानमाप्स्यतैतैरिव ध्रुवम् ॥ ३६ ॥ एकोऽप्यभिग्रहो मेऽभूत् पालितः प्राणितप्रदः । बहुभिग्रहिणां किं स्यात् फलं जानाति तज्ज्ञिनः ॥ ३७ ॥

१ सार्धत्रयपदानि. २ मृत्युम्.

वङ्कचूलो निशि प्राप्तः स्वगृहे स्वप्रियान्तिके । सुप्तं कञ्चिन्नरं दृष्ट्वा क्रुध्यंश्चाकृष्टवानसिम् ॥ ३८ ॥ खड्गेन खाट्कृतं पट्टे-ऽध्युष्टपादापवर्तने । तस्य प्रहरतस्तेनाजागः पुंवेषिणी स्वसा ॥ ३९ ॥ वङ्कचूल चिरं जीवेत्याशिषं ददतीं मुहुः । ज्ञात्वितां ज्ञगिनीं वीक्ष्य सोऽपि चेति व्यचिन्तयत् ॥ ४० ॥ अहो गुरुरदास्यच्चेन्न ममेममज्ञिग्रहम् । अज्ञविष्यमहं पश्चात्तापपात्रं तदाऽऽज्ञवंम् ॥ ४१ ॥ स्वसः किमेतदित्युक्ता तेनाख्यन्मधुराक्षरम् । ऐयरुः कस्यचिद्बन्धो चरा अद्य नटज्ञलात् ॥ ४२ ॥ मया ज्ञातं न दास्ये चेदेतेषां नाटकक्षणम् । पल्लिरद्यास्ति निर्नाथेति वदयन्ति निजं प्रभुम् ॥ ४३ ॥ अकस्मात्स इहागत्य पल्लीज्ञङ्गं विधास्यति । मयेति तव वेषेण तेषां नृत्तक्षणोऽर्पितः ॥ ४४ ॥ तेभ्यो यथोचितं दत्त्वा विसृज्य च महानिशि । सुप्ता निज्ञामुज्ञिताक्षी तथैव त्वत्प्रियान्तिके ॥ ४५ ॥ विषण्णोऽवक् स ज्ञङ्गे चेत् खड्गखाट्कारतोऽधुना । नाजागरिष्यस्त्वं तूर्णमहनिष्यमहं क्रुधा ॥ ४६ ॥ ततो दृष्टप्रज्ञावोऽथो श्रद्दधत्सुगुरोर्वचः । क्रीकृतेषु नियमेष्वत्यादरपरोऽज्ञवत् ॥ ४७ ॥ अन्यदा ज्ञूपतेः कस्यचिद्गृहे चौर्यहेतवे । वङ्कचूलोऽविशत्प्रायः सैव वृत्तिर्हि तादृशाम् ॥ ४८ ॥ महानिशायां जाग्रत्या पट्टराज्ञ्या स ज्ञूपतेः । दृष्टः पटिष्ठरूपेण साक्षादिव मनोज्ञवः ॥ ४९ ॥ तद्रूपमोहिता राज्ञी प्रा(ज्ञा)गुत्थाय नृपान्तिकात् । तं जगाद दिव्यरूपः कोऽसि त्वं वद सुन्दर ॥ ५० ॥ चौरोऽहमिति तेनोक्ते साख्यदीदृक्षरूपज्ञृत् । किं चौर्यं कुरुषे मेऽदो वाक्यं कृत्वा सुखी ज्ञव ॥ ५१ ॥ मां प्रियां प्रतिपद्यस्व यथा सुप्तमिमं नृपम् । विपाद्य राज्यदेवीव राज्यं यज्ञामि तेऽद्भुतम् ॥ ५२ ॥ विपन्नेऽस्मिन् प्रपत्स्येऽहं पतित्वेन न केवलम् । त्वां समग्राऽपि साम्राज्यरमेयमनुरागिणी ॥ ५३ ॥

१ जन्मपर्यन्तम्.

मिथो नौ दग्वंशघर्षोत्थितं मन्मनोवने । मनोजवाग्निं स्वाश्लेषजलैर्निर्वापय प्रभो ॥ ५४ ॥ तोषय स्वाङ्गसङ्गेन मां चिराय स्मरातुराम् । प्राणेश प्रार्थनाभङ्गः कृतिभिः क्रियते न हि ॥ ५५ ॥ वङ्कचूलो निशम्येति तां जगाद दृढव्रतः । शुभ्रे मेऽङ्गं त्वया राज्यश्रिया चानर्थभूतया ॥ ५६ ॥ भवेऽकीर्तिर्भवेदत्र परस्मिन् दुर्गदुर्गतिः । यया सा मनसाऽप्यर्थ्या नैव दुःशीलता बुधैः ॥ ५७ ॥ इत्याकर्ण्य जगौ साऽपि मयेति बहु बुध्यते । विदधीथाः परं मा त्वं प्रार्थनामन्यथा मम ॥ ५८ ॥ प्रार्थनामन्यथा चेत्त्वं करिष्यसि तदाऽऽशु भोः । विधास्ये विषवल्लीव तवाहं प्राणसंशयम् ॥ ५९ ॥ इत्याद्युक्तोऽपि पल्लीशो यावन्मेने न तद्वचः । तावत्क्रुद्धा घातकोऽयमित्युच्चैः पूच्चकार सा ॥ ६० ॥ इति सर्वं नृपः श्रुत्वा प्रसुप्तश्चञ्चनिद्रया । पूरितो रोषतोषाभ्यामिति चेतस्यचिन्तयत् ॥ ६१ ॥ नदीव नीचगमना चपलेव चलाचला । नागीव कुटिला नारी सृष्टा स्रष्ट्रा किमित्यहो ॥ ६२ ॥ अहमसह्य महापापप्रपा दुर्बुद्धिशेवधिः । अष्टमं नरकं नारी बत केन विनिर्ममे ॥ ६३ ॥ स्निग्धमाजन्मविश्वस्तं प्रसुप्तं मादृशं पतिम् । जिघांसत्याशु या तस्या विश्वासः क्रियते कथम् ॥ ६४ ॥ धन्योऽयमतिमान्योऽयं यश्चौरोऽपि दृढव्रतः । राज्यादिना ह्योज्झितोऽपि नाक्षुभत् पुरुषाग्रणीः ॥ ६५ ॥ किं किं करोत्यसौ पापाऽद्यापि पश्यामि तत्पुनः । इतिबुध्या धराधीशः प्रसुप्तोऽस्थात्तथैव सः ॥ ६६ ॥ तस्याः पूत्कारमाकर्ण्यागत्य चारङ्काः क्षणात् । बध्वा पल्लीपतिं प्रातर्मुमुचुः क्षापतेः पुरः ॥ ६७ ॥ स वङ्कचूलमालोक्य भूप ईषद्विहस्य च । स्वयं बन्धानपाकृत्यापृच्छत्सर्वां तमीकथाम् ॥ ६८ ॥ तथापि वङ्कचूलो न बभाषेऽधोमुखो यदा । तदाऽवदन्नृपो ज्ञाता सा वार्ता

१ विद्युदिव. २ चञ्चला.

त्वं परं वद ॥ ६९ ॥ वङ्कचूलो जगौ राज्ञ्याश्चेदास्यस्यभयं प्रभो । त्वत्पुरः कथयिष्यामि तदशेषं यथातथम् ॥ ७० ॥ त्वच्चिरैवाभयं तस्या दत्तं चेति नृपोदिते । प्रोचे पत्नीपती राज्ञ्या वृत्तान्तं स्वस्य चाखिलम् ॥ ७१ ॥ ततस्तुष्टेन भूभर्त्रा पुत्रवद्बहुमानतः । वङ्कचूलो मुदा राज्ञः कन्याश्च परिणायितः ॥ ७२ ॥ दत्त्वा तस्मै स्वराज्यार्धं राजा चक्रेऽतिहर्षतः । युवराजपदस्थं तमनिच्छन्तमपि प्रधीः ॥ ७३ ॥ ततः स लब्धसाम्राज्यो दध्यौ राज्ञः प्रियो भृशम् । अहो मेऽनिग्रहा एतेऽत्रापि जाता महाफलाः ॥ ७४ ॥ फलं भावि परत्रैनिस्तदेत्ति गुरुरेव सः । इति श्रद्दधतो धर्मं गतास्तस्य कियत्समाः ॥ ७५ ॥ अथ वातादिनिस्तस्य देहे व्याधिरवर्धत । बह्वौषधैः कृतैर्नैव शाम्यति स्म मनागपि ॥ ७६ ॥ राज्ञा पृष्टा जगुर्वैद्याः काकमांसमसौ यदि । अद्यात्तदस्य रोगोऽयं क्षयं गच्छति नान्यथा ॥ ७७ ॥ ततो राजा समागत्य वङ्कचूलं जगाद च । अस्ति काकामिषं वत्स तेन नीरुग् भविष्यसि ॥ ७८ ॥ स स्माह देव मेऽस्तीह काकमांसाशनव्रतम् । कथं कथय तन्नाथ खण्डयामि महाफलम् ॥ ७९ ॥ सोऽप्यूचे काकमांसेन वत्स नीरुग्भवाधुना । यत्त्वं जीवँस्तदालोच्य प्राज्यं पुण्यं विधास्यसि ॥ ८० ॥ सोऽथाख्यद्देव गन्तारः प्राणाः पश्चादपि ध्रुवम् । कोऽनिग्रहं स्वगृहीतं निकृन्तेत्तत्कृते कृती ॥ ८१ ॥ जिजीविषन्ति सर्वेऽपि मुमूर्षन्ति न देहिनः । तद्रक्षामि परप्राणैः स्वप्राणानहमीश किम् ॥ ८२ ॥ पापाद्भुत्पद्यते व्याधिः पुण्यं तस्यौषधं मतम् । काकमांसाशनं पापं कथं स्याच्च तदौषधम् ॥ ८३ ॥ प्राज्याः प्राज्या मृतीः प्राप्ताः श्रूयन्ते खण्डितव्रताः । नरोऽजरामरा जाता अखण्डितव्रताः पुनः ॥ ८४ ॥ मया नाथ मुधा तन्मा कारय व्रतखण्डनम् । तेनेत्युक्ते

नृपस्यादो जगद्गुस्तस्य सेवकाः ॥ ८५ ॥ मित्रमामन्त्रयास्येश पार्श्वग्रामनिवासिनम् । दृढधर्मं यथा काकमांसमत्त्येष तक्षिरा ॥ ८६ ॥ ऋजुनृताऽऽकारितः सोऽथागच्छन् स्वग्रामतः पथि । विलपन्त्यौ स्त्रियौ केचिन्निर्वीरे ऐक्षताद्भुते ॥ ८७ ॥ ते दुःखकारणं पृष्टे तेनाथ प्रोचतुः स्फुटम् । सुधर्मकट्टपवासिन्यौ देव्यावावां च्युतप्रिये[2] ॥ ८८ ॥ स्वपतिं त्राविनं वङ्कचूलं द्रष्टुमिहागते । स त्वद्य त्वक्षिरा त्रग्नव्रतः प्राप्स्यति दुर्गतिम् ॥ ८९ ॥ तद्व्रुद्यतेऽधुनाऽऽवान्यामित्युक्तः सोऽप्यवक् शुने । मा खिद्येथां कारयिष्येऽहं न तद्व्रतखण्डनम् ॥ ९० ॥ सोऽथ तत्रागतो राजाज्ञया तं सुहृदं जगौ । राजाऽऽदिशति त्रोः काकमांसमध्यामयापहम् ॥ ९१ ॥ मा ममेत्यादिशेर्मित्र परं गत्वा[3] नरेश्वरम् । प्रबोधय यथा मे स कारयेद्धर्मत्रेषजम् ॥ ९२ ॥ ततः प्रबोधितस्तेन धर्मवाक्यैर्धराधिपः । पर्यन्ताराधना तस्य कारिता च महात्मना ॥ ९३ ॥ मित्रादनशनं प्राप्य वङ्कचूलो दृढव्रतः । मृत्वा समाधिना स्वर्गे सुरोऽजनि महर्धिकः[4] ॥ ९४ ॥ असमाधिपरं त्रूपं संबोध्य स्वगृहे व्रजन् । दृढधर्मस्तथा वीक्ष्य ते स्त्रियावित्यत्राषत ॥ ९५ ॥ व्यश्वेश्वे त्रोः किमद्यापि प्रोचतुस्ते त्वया तथा । सोऽकार्याराधनां यन्नौ मुक्त्वाऽगादष्टमे गवि[5] ॥ ९६ ॥ श्रुत्वेति मुदितस्ते च संबोध्य प्रेष्य तांविषे । दृढधर्मो गृहं प्राप्तो धर्मे दृढतरोऽत्रवत् ॥ ९७ ॥ त्रव्याः सम्यग्निशम्येति वङ्कचूलनिदर्शनम् । त्रोगोपत्रोगनियमः कार्यः स्वर्गापवर्गदः ॥ ९८ ॥

॥ इति वङ्कचूलकथा ॥

१ पतिपुत्ररहिते. २ च्युतः प्रियः पतिर्ययोस्ते. ३ वाण्या. ४ स्वर्गे. ५ स्वर्गे.

अथात्रैव विशेषोपदेशमाह—

ज्ञोगादिलोलुपतया लघुता न शर्म, श्रीब्रह्मदत्तसखिविप्रकुटुम्बवत्स्यात् ।
पीताधिकेन्दुरुचिरुज्झति सीम सिन्धुः, शक्रोऽपि गौतमकलत्ररतश्च शप्तः ॥ ४४ ॥

व्याख्या—ज्ञोगादिलोलुपतया ज्ञोगादेर्लौल्येन कृत्वा लघुता हीनता स्यात् । शर्म सुखं किञ्चिन्न स्यात् । किंवत् ? श्रीब्रह्मदत्तसखिविप्रकुटुम्बवत् यथा श्रीब्रह्मदत्तमित्रब्राह्मणकुटुम्बस्य चक्रवर्त्याहारज्ञोगलोलुपत्वेन संजातविकलीज्ञावस्य पशुचेष्टास्वैरप्रलापादिज्ञिर्बाढं लोके लघुतोपहासादिकं जातं । ननु ब्राह्मणकुटुम्बं कथमीदृशविकलीज्ञावज्ञाग् ज्ञवेदिति चेन्न, अतिज्ञोगादिलौल्येन किं किं न स्यात् ? इत्थमेवाहोदाहरणान्यामिति यथा पीताऽधिका इन्दुरुचिश्चन्द्रकान्तिर्येन स तथा एवंविधः सिन्धुः समुद्रः सीम मर्यादामुज्झति त्यजति । शक्रोऽपि इंद्रोऽपि ज्ञोगलौल्येन गौतमकलत्ररतोऽहिल्यासक्तः सन् गौतममुनिना शप्तः सहस्रज्ञगो ज्ञवेति शापं प्रापितः । इति काव्याक्षरार्थः ।

ब्रह्मदत्तमित्रविप्रकुटुम्बसम्बन्धः श्रीब्रह्मदत्तचरित्रे कथयिष्यते । इन्द्रसम्बन्धश्चायम्—

शक्रोऽत्र विचरन् स्वैरं वीक्ष्य गौतमवल्लज्ञाम् । अहिल्यां चिन्तयामास चेतसीति स्मरातुरः ॥ १ ॥
कन्दर्पदीपाञ्जनराजिरस्या, वेणीमिषाद्राजति काऽप्यपूर्वा । यद्दर्शनेनापि तपोधनानां, तपो ज्ञजेद्वामलिमानमुच्चैः ॥ २ ॥ दध्रेऽनया मूर्धनि वेणिदण्डव्याजेन किं दारुणदृग्विषाहिः । नो चेदचैतन्यचितिं तनोति, दृष्टोऽप्ययं कामिनृणां कथं वै ॥ ३ ॥ सौन्दर्यवार्यास्यसरस्यवेत्य, प्राज्यं निजे स्फोटज्ञियाऽनयाऽत्र । सुसीमसीमन्तमिषेण मन्ये, विनिर्ममे निर्गममार्ग

एषः ॥ ४ ॥ मन्मानसोर्व्युत्थितरागवह्न्या, सिन्दूरपूरारुणिमच्छलेन । सीमन्तसीम्न्यङ्कुरितं यदस्याश्चित्रीयते तन्न हि कस्य कस्य ॥ ५ ॥ नन्वास्यमस्या उपमातुमिच्छुर्विधिर्विधोर्मण्डलमुज्ज्वलश्रि । विघट्य नित्यं घटयन् बभूव, नाद्यापि भूमीवलये कृतार्थः ॥ ६ ॥ पुष्णाति पीयूषमयूख इन्दुर्हर्षं नृणां तत्कुतुकं किमेतत् । लावण्यपूर्णोऽपि मुदं मुखेन्दुरस्या ददात्यद्भुत-मेतदेव ॥ ७ ॥ कर्णान्तविश्रान्तविलोचनाभ्यां, सौवश्रियाऽस्या विजिता नितान्तम् । राजीवराजी निममज्ज लज्जाभरा-दिवागाधसरोवरेषु ॥ ८ ॥ काठिन्यमुत्सृष्टमशेषमस्या, गिरा सुधासोदरया स्वकीयम् । अधःपतद्धंसि पश्य पिण्डीभूय स्थितं तत्स्तनयुग्मदम्भात् ॥ ९ ॥ उन्नालनालीकमुजच्छलेन, व्यस्तारि पाशो न्वनया नवीनः । कामं जनो बद्ध श्वान-[1]दृष्टेऽपि येन गन्तुं पदमप्यशक्तः ॥ १० ॥ रसालवाचालदयालुमौलिमाणिक्यमेषा त्रिवलीच्छलेन । किं भ्रूर्जुवःस्वस्त्रितयं सुधाभिः, प्रपात्रयं पोषयितुं दधाति ॥ ११ ॥ स्तनौ पुरोऽस्याः परिवर्धमानौ, पश्चान्नितम्बावपि तद्वदेव । दृष्ट्वा ह्यदो नङ्क्ष्यति येव मध्ये, रोमावलीदण्डमधाद्विधाता ॥ १२ ॥ लावण्यपुण्याम्बुसुपूरपूर्णा, गम्भीरताचारुतरा सुवृत्ता । अस्याः कलाकेलिसुकेलिकूपीवाभाति नाभी सुभगंभविष्णुः ॥ १३ ॥ गाम्भीर्यवत्या भुवि तुच्छभावोऽनया स्वकीयाद्धृदयादपास्तः । स एव बाभात्यवलग्नदम्भादस्या विलग्नो ननु मध्यदेशे ॥ १४ ॥ रम्भाशुभस्तम्भनिभोरुदम्भात्, स्तम्भाविमौ किं स्मर-मन्दिरस्य । द्वारे स्फुरत्तोरणधारणार्थमस्याः प्रशस्यौ विहितौ विधात्रा ॥ १५ ॥ स्वभावसौन्दर्यगुणाभिरामा, त्रैलोक्य-

१ नालीकं कमलम्. २ अदृष्टो न भवतीति अनदृष्टस्तस्मिन् दृष्टमात्रेऽपीत्यर्थः एतादृशे पाशे इति गम्यं. ३ कलाकेलिः कामस्तस्य केलेः सुक्रीमार्थं कूपी वापीत्यर्थः. ४ अतिशयेन भाति. ५ कटीमिषात्.

लोकोत्करहर्षकेतुः । इयं तपःश्रीरिव निर्विघ्नाऽप्याश्चर्यकर्त्री न च कस्य कस्य ॥ १६ ॥ इति ध्यायन् सुराधीशोऽनिच्छन्तीमपि तापसीम् । जोक्तुमेतामुपाक्रंस्त को विवेको हि कामिनाम् ॥ १७ ॥ अथ तत्राययौ तूर्णं गौतमार्षिर्ददर्श च । तच्चेष्टितं भृशं रुष्टः प्रियादोषो हि दुःसहः ॥ १८ ॥ सहस्रयोनिर्जज्ञवतादिति शक्रं शशाप च । तत्कालमेव शक्रोऽपि हा सहस्रभगोऽजनवत् ॥ १९ ॥ त्रिदशैः प्रार्थितः सोऽथ मुनिर्विनयशालिभिः । सहस्रलोचनं चक्रे शक्रं वक्रेतराशयः ॥ २० ॥ श्रुत्वेति विबुधा जोगलम्पटानां महापदम् । जवन्तु विरता जोगोपजोगेभ्यो निरन्तरम् ॥ २१ ॥ इत्येवं लौकिकं ज्ञातं लिखितं बोधहेतवे । लौकिकान्यपि ज्ञातान्याख्यन्तेऽत्र महर्षिभिः ॥

॥ इति शक्रसम्बन्धः ॥

समाप्तमिदं जोगोपजोगोपदेशद्वारमेकविंशतितमं । अथाष्टममनर्थदण्डव्रतमाह—

नानर्थदण्डमघदं दधते महान्त, एकेषुमात्रविजयीव स चेटभूपः ।
लोकस्य जाड्यहृतये तरणेः प्रभाऽह्नि, तापच्छिदे च शशिनो निशि नो तदर्थै ॥ ४५ ॥

व्याख्या—महान्तः पुरुषा अघदं पापदं अनर्थदण्डं न दधते न धरन्ति । क इव चेटभूप इव यथा स प्रसिद्धश्चेटनामा भूपोऽनर्थदण्डं न दधौ । किंरूपः सः ? एकेषुमात्रविजयी एकेनैवेषुमात्रेण विजयत इत्येवंशीलः । एतदेवाह—तरणेः सूर्यस्य प्रभा कान्तिः अह्नि दिने लोकस्य जाड्यहृतये शीतहरणाय स्यात्, परं तदर्थै लोकपीडायै न स्यात् । तथा शशिनश्चन्द्रस्य प्रभा निशि रात्रौ तापच्छिदे स्यात्, न तदर्थै स्यादिति वृत्ताक्षरार्थः । कथा तु श्रीकूलवालकसाधुसम्बन्धे कथयिष्यते ॥

अथात्रैव द्वारे व्यतिरेकमुखेनोपदेशमाह—

मूढो मुधैति कुगतिं धिगनर्थदएमाच्चक्रित्वमिच्छुरिव नृभृदशोकचन्द्रः ।
किं नाङ्गनङ्गमयते शरज्जोऽब्दशब्दमभ्युत्पतन् परिणमँश्च गजोऽनुशैलम् ॥ ४६ ॥

व्याख्या—मूढो मूर्खो धिगिति खेदेऽनर्थदएमात् कुगतिं मुधा निष्फलं एति याति । क इव ? अशोकचन्द्र इव यथाऽशोकचन्द्रः श्रेणिकपुत्रः कूणिको नृपृत् राजा चक्रित्वमिच्छुः सन्मुधैव कुगतिमियाय । एतदेवाह—शरज्जः कुञ्जरारातिः अब्दशब्दं मेघगर्जनं अज्ञि लक्ष्यीकृत्य उत्पतन् सन् अङ्गनङ्गं किं न अयते किं न गच्छति ? अपि तु अयत एव । च पुनर्गजो हस्ती शैलं पर्वतं अनु परिणमन् सन् तिर्यक् प्रहारं ददानः सन् अङ्गनङ्गं किं न अयते ? अपि तु अयत एवेति काव्याक्षरार्थः । कथा चेयम् (अशोकचन्द्र (कूणिक) कथा)—

परैरकृतकम्पायां चम्पायां पुरि नृपतिः । बभूव कूणिकः शत्रुस्त्रीवैधव्यविधौ विधिः ॥ १ ॥ श्रीवीरः समवासार्षीत्तत्र त्रैलोक्यबान्धवः । कूणिकोऽपि प्रभुं नत्वा पप्रच्छ रचिताञ्जलिः ॥ २ ॥ आजन्मापि विमुक्ता यैः कामभोगा न चक्रिभिः । का गतिर्जायते तेषां वद विश्वेशवन्दितः ॥ ३ ॥ स्वामी स्माहाथ गच्छन्ति सप्तमं नरकं तु ते । बभाषे कूणिको नूयो भाविनी का गतिर्मम ॥ ४ ॥ भगवानभ्यधात् षष्ठीं नरकोर्वीं प्रयास्यसि । कूणिकोऽवक् कथमहं न गमिष्यामि सप्तमीम् ॥ ५ ॥ अभाषत विभुर्नासि त्वं चक्री तद्भोज्झितः । धर्मा धर्मिणि सत्येव भवन्ति न तु नूप ते ॥ ६ ॥ कूणिकोऽभि-

१ विश्वेशैरिन्द्रैर्ब्रह्मादिभिर्वा वन्दित एतादृशस्त्वं वदेत्यन्वयः.

दधे देव कथं नो चक्रवर्त्यहम् । चतुरङ्गा ममाप्यस्ति चक्रितुल्या वरूथिनी ॥ ७ ॥ स्वाम्याख्यन्न हि रत्नानि चक्रादीनि तु सन्ति ते । विनैकेनापि रत्नेन चक्रित्वं नोपपद्यते ॥ ८ ॥ श्रुत्वेति कूणिकोऽखर्वगर्वपर्वतसंस्थितः । रत्नानि कारयामास लौहान्येकेन्द्रियाणि सः ॥ ९ ॥ पद्मावतीं च स्त्रीरत्नं रत्नानीभमुखान्यथ । तुङ्गधीः कट्पयामास सोऽहङ्कृतिकदर्थितः ॥ १० ॥ कूणिको भारतं क्षेत्रं साधयन् साधनोद्यतः । तमिस्रामाप वैताढ्यगुहां जित्वाऽपरान् क्रमात् ॥ ११ ॥ गुहाद्वारकपाटानि दण्डेन त्रिः स ताडयन् । कृतमालामरेणोचे मुमूर्षुः कस्त्वमागतः ॥ १२ ॥ कूणिकोऽपि जगौ वेत्सि जिगीषुं मामिहागतम् । उत्पन्नोऽहं नवश्चक्रयशोकचन्द्राभिधो भुवि ॥ १३ ॥ स देवोऽभाषताभूवँश्चक्रिणो द्वादश ह्यितौ । अभिमानधनोऽद्यापि बुध्यस्व स्वस्ति तेऽस्तु भोः ॥ १४ ॥ कूणिकः स्माह जज्ञेऽहं चक्रवर्ती त्रयोदशः । महाभाग्योऽत्र किं भाग्यभृतां स्याद्दुर्लभं भुवि ॥ १५ ॥ त्वं न जानासि मे वीर्यं कृतमालगुहामिमाम् । कुरुष्वापावृतद्वारं नान्यथा त्वं भविष्यसि ॥ १६ ॥ इति दुर्दैवदोषेण तमसंबद्धभाषिणम् । भस्मसाच्चिदधे क्रोधात्कूणिकं कृतमालकः ॥ १७ ॥ अशोकचन्द्रभूभर्त्ता विपद्य नरकावनिम् । गतः षष्ठीं वचो मिथ्या नार्हतं जातु जायते ॥ १८ ॥ इति पापमहानर्थदण्डाद्दुर्गतिभाजिनः । स्युस्तत्कार्यो न चानर्थदण्डः पण्डितमानवैः ॥ १९ ॥

॥ इति कूणिककथा ॥

---

१ सेना. २ वरदामादिदेवान्.

उक्तं द्वाविंशतितममनर्थदण्डद्वारं । अथ सामायिकव्रतं नवममाविर्भावयति—

सामायिकं समतयाऽरिसुहृत्सु सिध्यै, प्रद्योतमुक्तिकृदुदायनराजवत्स्यात् ।
सच्चन्दनांशुकमिवास्फुटकुष्ठजाजस्तत्कुर्वतः कपटतो बहिरङ्गशुध्यै ॥ ४७ ॥

व्याख्या—अरिषु वैरिषु सुहृत्सु च समतया समभावेन कृत्वा सामायिकं कृतं सत् सिध्यै मोक्षाय स्यात् । किंवत् ? प्रद्योतमुक्तिकृदुदायनराजवत् यथा प्रद्योतस्य चण्डप्रद्योतनाम्नो मुक्तिकृत् योऽसौ उदायनराजस्तस्य अरिसुहृत्सु समतया सामायिकं कृतं सत् सिध्यै बभूव । कस्येव सिध्यै किं स्यात् ? अस्फुटकुष्ठजाजः अप्रकटकुष्ठवतः पुंसः सच्चन्दनांशुकमिव यथा सच्चन्दनांशुकं प्रधानचन्दनरूपं वस्त्रं अस्फुटकुष्ठजाजो बहिः कपटतो मायया तच्चन्दनांशुकं कुर्वतः सतः अङ्गशुध्यै शरीरनैर्मल्याय स्यात् तत्तथेति काव्याक्षरार्थः । कथा तु श्रीउदायनचरित्रे उक्तत्वादिह नोच्यते ॥

सामायिकस्य भूयोऽपि विशेषोपदेशमाह—

सामायिकं द्विघटिकं चिरकर्मभेदि, चन्द्रावतंसकवदुच्चधियोऽत्र किं तु ।
स्पर्शेऽपि सत्यमुदकं मलिनत्वनाशि, घोरं तमो हरति वा कृत एव दीपः ॥ ४८ ॥

व्याख्या—द्विघटिकं सामायिकं घटिकाद्वयप्रमाणं समतावस्थानरूपं चिरकर्मभेदि चिरकालार्जितकर्मभेदकं स्यात् । यदुक्तं—
"प्रणिहन्ति क्षणार्धेन साम्यमालम्ब्य कर्म तत् । यन्न हन्यान्नरस्तीव्रतपसा जन्मकोटिभिः ॥ १ ॥ कर्म जीवं च

संश्लिष्टं परिज्ञातात्मनिश्चयः । विभिन्नीकुरुते साधुः सामायिकशलाकया ॥ २ ॥ रागादिध्वान्तविध्वंसे कृते सामायिकांशुना । स्वस्मिन् स्वरूपं पश्यन्ति योगिनः परमात्मनः ॥ ३ ॥"

तु पुनः उच्चधियः उच्चबुद्धेः (अत्र) धर्मकर्मणि किं कथ्यते ? किंवत् ? चन्द्रावतंसकवत् चन्द्रावतंसकस्येव चन्द्रावतंसकवदिति । यथा स्पर्शेऽपि स्पर्शमात्रेऽपि सत्यं समीचीनमुदकं जलं मलिनत्वनाशि स्यात् । वा पुनः कृत एव दीपो घोरं निविडं तमोऽन्धकारं हरति नाशयतीति काव्याद्हरार्थः । कथानकमदः—

विशालापुरीप्रभुः श्रीचन्द्रावतंसकनृपः परमार्हतोऽन्यदा गृहीतसामायिकव्रतः स्वसौधे निशि कायोत्सर्गेण यदा तस्थौ तदा दास्या प्रदीपो विधाय तत्र मुक्तः । "यावदयं प्रदीपो ज्वलिष्यति तावत्कायोत्सर्गं न पारयिष्यामि" इति राजाऽभिग्रहं जग्राह स्वचेतसि । स्वामिभक्त्या दास्या पुनः पुनः सिक्तो दीपो न विध्यातः । राजा चतुरोऽपि यामान् कायोत्सर्गं विधाय सूर्योदये पारितोत्सर्गो रुधिरप्लुतचरणो गन्तुमशक्तो भूमौ पपात । सुगतिं गतश्च ॥

उक्तं त्रयोविंशं सामायिकव्रतद्वारं । अथ दशमं देशावकाशिकव्रतमुपदिशति—

देशावकाशिकमपास्य सकाकजङ्घकोकाशवद्विपदमेति जनः प्रमादी ।
धत्ते प्रजां दिनचरो न निशाकरोऽपि, न स्तूयतेऽपि च पयोभृदकालवृष्टः ॥ ४९ ॥

व्याख्या—देशावकाशिकं व्रतं अपास्य त्यक्त्वा जनो लोकः प्रमादी प्रमत्तः सन् विपदमापदमेति याति । किंवत् ? सकाकजङ्घकोकाशवत् यथा कोकाशवर्धकिः सकाकजङ्घः काकजङ्घराजसहितोऽत्यन्तं भूमौ विचरन् प्रमत्तः सन् विप-

दमेति स्म तथा । दिनचरः सन् निशाकरोऽपि प्रज्ञां न धत्ते । च पुनः अकालवृष्टः सन् पयोऽनूदपि मेघोऽपि न स्तूयते न वर्ण्यते । इति वृत्ताक्षरार्थः । कथा चेयं (कोकाशकाकजङ्घकथा)—

सोपारकपुरे दास्या रथकारस्य कस्यचित् । ब्राह्मणाद्दारको जातः कोकाश इति नामतः ॥ १ ॥ शिक्ष्यत्यग्रशिल्पानि रथकृत् स्वसुतान् यदा । तदाऽऽस्त मूकज्ञावेन स पार्श्वेऽप्यश्रवा इति ॥ २ ॥ ग्राह्यमाणा न तेऽगृह्णन् किञ्चित्सन्निऽकुम्भवत् । कलाः प्रसस्रुर्दासेरे जले तैलमिव स्वयम् ॥ ३ ॥ रथकारेऽथ पञ्चत्वं प्राप्ते राजा तु तन्निर्यम् । दासेराय ददौ तेन कोकाशो विदितोऽभवत् ॥ ४ ॥ इतश्चोज्जयिनीपुर्यां नृपोऽभूत् परमार्हतः । श्रावकास्तस्य चत्वारः सन्ति कर्मसु कर्मठाः ॥ ५ ॥ तादृक् पाकं करोत्येकोऽशेषां रसवतीं यथा । जीर्यत्यन्नं जग्धमात्रमथवा यामयोगतः ॥ ६ ॥ अथवा यामयुग्मेन त्रिचतुःपञ्चभिस्तथा । यामैर्जीर्यति वा यद्वा सर्वथापि न जीर्यति ॥ ७ ॥ कुर्वन्नन्यङ्गमपरः स तैलकुरुवं कृती । प्रवेशयति देहान्तस्तावन्निःसारयत्यपि ॥ ८ ॥ तृतीयः कुरुते शय्यां तादृशीं शायको यथा । यामे यामेऽपि जागर्त्ति यद्वा द्वित्रिचतुर्थके ॥ ९ ॥ तुरीयः श्रीगृहाध्यक्षस्त्येदृग्बुद्धिपाटवम् । तत्रायातोऽपरः कोऽपि किञ्चित्क्वापि न पश्यति ॥ १० ॥ स च नूनृदपुत्रत्वाद्राजकृत्ये निरुद्यमः । विषयेषु विरक्तोऽस्ति यावद्दीक्षाजिघृक्षया ॥ ११ ॥ तावच्च पाटलीपुत्राज्जितशत्रुर्महीपतिः । रुरोध वार्ष्णिवद्वीपं सैन्येनागत्य तत्पुरीम् ॥ १२ ॥ तदा तस्य नरेशस्य शूलं दुर्दैवदोषतः । समुत्पेदे नवेत् किं न प्रतिकूले विधौ यतः ॥ १३ ॥ विधायाराधनां शुद्धां चतुःशरणसंश्रितः । समाधिनाऽन्तमासाद्यासाद त्रिदिवं क्रमात् ॥ १४ ॥ पौरैस्तस्यैव नूनर्तुरर्पितायां ततः पुरि । सेवकाः शब्दितास्तेन चत्वारश्चतुराश्च ते ॥ १५ ॥ आगतास्ते

ततः पृष्टाः पदेऽन्नूक्षोऽत्र कुत्र कः । ततः कोशाधिकृत् कोशं दर्शयामास नूनृतः ॥ १६ ॥ रिक्तं तं प्रेक्ष्य नूमीशो विषसाद स्वचेतसि । शय्यां च सज्जयामास शय्यापालोऽपि तादृशीम् ॥ १७ ॥ उत्थायोत्थाय चोद्विग्नो यस्यां नूपः क्षणे क्षणे । अन्नपाकं तथा सूदश्चकार चतुराग्रणीः ॥ १८ ॥ भुञ्जानोऽपि यतस्तृप्तिं रङ्कवन्नैति नूपतिः । अभ्यङ्गमकरोत्तुर्यो नूनुजस्तैलयोगतः ॥ १९ ॥ परं तैलं न चैकस्मादाकृष्टं तेन पादतः । उक्तं च यस्ते मत्तुल्योऽस्ति सोऽस्मात्तैलमाकृषेत् (आकर्षेत्) ॥ २० ॥ निजस्वामिवियोगार्तास्ते चत्वारोऽप्युपासकाः । वैराग्यरङ्गयोगेन प्रव्रज्यां जगृहुस्ततः ॥ २१ ॥ दह्यमानोऽन्नवत्तेन तैलेनांह्रिर्महीनृतः । काकश्यामस्ततो लोकैः काकजङ्घ इतीरितः ॥ २२ ॥ इतश्च घोरं दुर्भिक्षं सोपारकपुरेऽन्नवत् । कोकाशवर्धकिस्तेनोज्जयिन्यामागमत् पुरि ॥ २३ ॥ स्वज्ञापनाय नूनर्तुः कोष्ठागाराग्निरन्तरम् । कोकाशोऽपाहरत्काष्ठकपोतैः शालितण्डुलान् ॥ २४ ॥ नियुक्तैर्ज्ञापिते राज्ञाऽऽहूय कोकाशवर्धकिः । रथकारपदेऽस्थापि गुणाः श्लाघ्या न किं क्वचित् ॥ २५ ॥ तेन काष्ठमयोऽकारि गरुत्मो नूपतेः कृते । कीलिकानां प्रयोगेण व्योम्नि यातीव सात्मकः[1] ॥ २६ ॥ ततो नूपः सपत्नीकः कोकाशेन सहान्वहम् । नग्नसा गरुत्मारूढः समां[2] संचरते क्षमाम् ॥ २७ ॥ युष्मानहं हनिष्यामि व्योम्नाऽऽगत्य वदन्निति । ज्ञापयित्वाऽखिलान्[3] नूपानन्यान् स वशमानयत् ॥ २८ ॥ तां राज्ञीं जगदुश्चान्या अयं कीलिकया कया । वलते गरुत्मो ब्रूहि एतया[4] सार्जवादवक् ॥ २९ ॥ राज्ञ्यैकयेर्ष्ययाऽऽग्राहि सा निवर्तनकीलिका । तथैवागान्नृपस्तेन वालितो ववले न सः ॥ ३० ॥ तार्क्ष्यो ग्राम्यन्नथात्यन्तमाहतश्चण्डवायुभिः । जग्नपक्षः कलिङ्गेषु तमा-

१ सजीवः. २ अखिलाम्. ३ कीलिकया.

गान्तेऽपतत् क्रमात् ॥ ३१ ॥ तत्समारचनायाशु वास्याद्यानेतुमुद्यतः । कोकाशोऽथागमत्तत्र नगरे पार्श्ववर्तिनि ॥ ३२ ॥ तदान्यो रथकृत्तत्र काष्ठकर्मालये रथम् । कुर्वन् राज्ञो वरीयांसं समस्ति चतुराशयः ॥ ३३ ॥ तेनैकं निर्मितं चक्रमपरं त्वर्धनिर्मितम् । तदा तत्रैत्य कोकाशस्तं वार्धकिमदोऽवदत् ॥ ३४ ॥ अर्थिने देहि मे ऋ तद्धोपकरणान्यथ । स जगाद प्रदास्यामि तान्यानीय गृहादहम् ॥ ३५ ॥ नेतुमेतानि लभ्यन्ते नेत इत्यगमद्गृहे । तच्चक्रं निर्मितं वेगात् कोकाशेनार्ध-निर्मितम् ॥ ३६ ॥ वेगेन याति प्रक्षिप्तं स्खलितेऽपि न तत्पतेत् । किं तु प्रत्यङ्मुखं याति स्खलिते हीतरत्पतेत् ॥ ३७ ॥ आयातः सोऽथ तद्दृष्ट्वा चक्रं गत्वा च सत्वरम् । राज्ञे निवेदयामास स्वामिन् कोकाश आगमत् ॥ ३८ ॥ यद्बलात् काकजङ्घेन ऋजुजो निखिला अपि । वशीकृता गारुमेन सन्मन्त्रेणेव पन्नगाः ॥ ३९ ॥ इति तद्वचसा राज्ञा कोकाशः सत्वरं धृतः । तामनादन्यधाच्चात्र नृपं सप्रियमागतम् ॥ ४० ॥ काकजङ्घो नृपस्तेन राज्ञा गत्वा च सप्रियः । धृतः स्युरवि-रतानामापदो हि पदे पदे ॥ ४१ ॥ दण्डिता वयमेतेन प्रतिवर्षं दुरात्मना । इति स्मृत्वा महद्वैरं तस्य ऋक्तं न्यषेधयत् ॥ ४२ ॥ कोकाशं ऋपतिः स्माह प्रासादं सप्तऋमिकम् । मम पुत्रशतस्यार्थे कुरु मध्ये च मत्कृते ॥ ४३ ॥ ततस्तेऽहं करिष्यामि सर्वं चेतःसमीहितम् । काकजङ्घसुतस्याथ कोकाशोऽदो न्यवेदयत् ॥ ४४ ॥ दिनेऽमुके इमं क्षापं मारयिष्यामि साङ्गजम् । तद्दिनोपरि आगम्यं सहावश्यं स्वसेनया ॥ ४५ ॥ कृत्वा प्रासादं कोकाशो ऋपमारोप्य साङ्गजम् । संजह्रे संपुटीकृत्य कीलिकाघाततोऽथ तम् ॥ ४६ ॥ काकजङ्घात्मजेनाथ तत्र प्राप्तेन तत्क्षणम् । पुरं लात्वा मोचितौ च पितरौ

१ ऋोजनम्.

वर्धकिस्तथा ॥ ४७ ॥ प्राप्ता निजं निजं धामाविरतास्तेऽखिलाः क्रमात् । कालं कृत्वा बभूवुश्च दुर्गदुर्गतिभाजनम् ॥४८॥
एवं बुध्वा बुधैर्नित्यं कार्यं देशावकाशिकम् । व्रतं येन भवेद्योऽपि सिद्धिदेशावकाशनम् ॥ ४९ ॥

॥ इति कोकाशकाकजङ्घकथा ॥

अत्रैव विशेषः—

गुरुवचनवियोगाज्ञातदेशावकाशो, विपदि तरति पुण्याच्चेद्यथा लोहजङ्घः ।
हयमयवृषभा वा स्वामिना वाह्यमानाः, सततमपितगत्या किं हितं स्वस्य कुर्युः ॥ ५० ॥

व्याख्या—गुरुवचनवियोगाज्ञातदेशावकाशः गुरुवचनं गुरूपदेशस्तस्य वियोगेनाज्ञातोऽनवगतो देशावकाशः पदैकदेशे पदसमुदायोपचारात् देशावकाशिकव्रतं येन स तथा ईदृशः पुमान् विपदि कष्टे चेत् यदि तरति आपदः सकाशात् मुच्यते तर्हि पुण्यादेव तरति, नान्यथा, यथा लोहजङ्घः पुण्यादेव तरति स्म । तथा हया अश्वा मया दृष्ट्वा वृषभाश्च स्वामिना वाह्यमानाः सन्तः सततं निरन्तरं अमितगत्याऽपरिमाणया गत्या गमनेन कृत्वा स्वस्यात्मनः किं हितं धर्मलक्षणं कुर्युः कुर्वन्ति ? अपि तु न किमपि इति काव्याक्षरार्थः । कथा तु चण्डप्रद्योतानलगिरिकुमारमन्त्रिकथायां कथिता इति ॥

उक्तं चतुर्विंशं देशावकाशिकव्रतद्वारं अथ पौषधव्रतमुपदिशति—

शुचिपौषधेन मुनितुल्यतेति किं, जिनताऽपि मेघरथवज्जवेत् क्रमात् ।
किमु निर्धनस्य मणिनेष्टदायिना, धनितुल्यतैव नृपतुल्यता न किम् ॥ ५१ ॥

व्याख्या—शुचिपौषधेन निर्मलपौषधव्रतेन मुनिसाम्यता साधुसाम्यं स्यादिति किं घनं ? अपि तु स्तोकं, किं तु क्रमादनुक्रमेण जिनताऽपि तीर्थंकरत्वमपि भवेत् । किंवत् ? मेघरथवत् यथा श्रीशान्तिनाथजीवस्य मेघरथराज्ञः शुचिपौषधेन पूर्वं मुनितुल्यताऽऽसीत् पश्चादनुक्रमेण जिनताऽपि श्रीशान्तिनाथतीर्थङ्करत्वमपि बभूव । तथा इष्टदायिना वाञ्छितप्रदेन मणिना चिन्तामणिना निर्धनस्य नरस्य धनितुल्यतैव धनेश्वरसामान्यमेव किं स्यात् ? नृपतुल्यता किं न स्यात् ? अपि तु नृपतुल्यताऽपि स्यादिति काव्यार्द्धरार्थः । कथा चेयम्—

श्रावस्तिपुर्यां मेघरथराजा राज्यं करोति । अन्यदा तत्संसदि कश्चिन्निमित्तविदाययौ । राज्ञा पुष्पफलादिना सत्कृतः सुबुद्धिमन्त्रिणा पृष्टो "राज्ञो देशस्य पुरस्य च क्षेमादिभाविस्वरूपं निरूपय" । तदा तेनोक्तं—"इतो दिनात्सप्तमे दिने एतन्नगराधिपतेः शिरसि विद्युत् पतिष्यतीति" । सर्वेऽपि तद्वचसा भयोद्भ्रान्ता जाताः । राज्ञा मन्त्रिणः पृष्टाः—"कथं करिष्यते?" । कैश्चिदुक्तं—"तरीमारुह्य समुद्रमध्ये स्थीयते" । कैश्चिदूचे—"गिरिकन्दरासु निलीयते" । सुबुद्धिमन्त्रिणोचे—"देव ! धर्मः क्रियतां । यतः सर्वविघ्ना विलीयन्ते" । राज्ञोचे—"कोऽयं धर्मः क्रियते ?" । मन्त्रिणोचे—"दृषद्यहं नराधिपं विधाय स्वयं पौषधं गृहीत्वा जिनगृहे स्थीयते" । ततो राज्ञा एवं विहितं । ततः सप्तमे दिने नगराधिपयद्दस्योपरि विद्युत्पपात । यद्दप्रतिमा चूर्णीभूता । सर्वे जनाः प्रमुदिताः । राजा कृतपौषधो मुनिरिति विघ्नाश्चुटिताः । ततश्च पुनर्जातराज्याभिषेको राजा चिरपालितराज्योऽन्ते समाश्रितश्रामण्यः समाधिनाऽऽराधनां कृत्वा विपद्य त्रिदशोऽभूत् । ततः क्रमेण श्रीशान्तिजिनो जातः । कथाशेषं तु श्रीशान्तिजिनचरित्रे कथितम् ॥

पुनरत्रैव द्वारे विशेषोपदेशमाह—

सत्पौषधं विविधसिद्धिदमौषधं यत्तद्भावनाशमरसार्द्रहृदग्निलीढः ।
स्वः सागरेन्दुरजनि स्फुटहेममूर्तिरौर्वाग्नितप्तविमलोऽद्रिरिवाब्धिमन्थाः ॥ ५२ ॥

व्याख्या—सत् प्रधानं पौषधं विविधसिद्धिदायकमेव वर्तते । कथं ? यद्यस्मात्कारणात् तद्भावना तस्य पौषधस्य भावना भावः कदकस्तेन शमरसेनोपशमरसेन चार्द्र स्निग्धं हृत् हृदयं तदेवाग्निस्तेन लीढो व्याप्तः सागरेन्दुः सागरचन्द्रः स्वः स्वर्गे स्फुटहेममूर्तिः प्रकटस्वर्णमूर्तिरजनि अभूत् । क इव ? अद्रिरिव । किंभूतः ? और्वाग्नितप्तेन विमल और्वाग्नितप्तविमलः । पुनः किंभूतः ? अब्धिमन्थाः समुद्रमन्थानकः । इति वृत्ताक्षरार्थः । कथा चेयं (सागरचन्द्रकथा)—

अस्ति स्वस्तिकरी नृणां द्वारकासंज्ञिका पुरी । यस्यामश्यामलाचारः कृष्णोऽपि समजायत ॥ १ ॥ नामशेषीकृतारातिस्तत्रेशो नवमो हरिः । जज्ञे नेमिजिनाधीशपादपद्ममधुव्रतः ॥ २ ॥ बभूव यादवस्तत्र धनसेनो महाधनः । तत्सुता कमलामेलाऽभवद्भावण्यशेवधिः ॥ ३ ॥ नभःसेनाय तत्पित्रा सा दत्ताथोग्रसेनये । श्रुतश्च नारदो भ्राम्यन्नभःसेनगृहेऽगमत् ॥ ४ ॥ विवाहव्यग्रचित्तः स न नारदमपूपुजत् । चुकोप तेन तज्नेहान्निःससार च नारदः ॥ ५ ॥ तस्यानर्थं चिकीर्षुः स रामसूनिषधाङ्गजम् । नाम्ना सागरचन्द्रं द्राक् प्राप शाम्बाद्यतिप्रियम् ॥ ६ ॥ तं सत्कृत्याज्ञियानादिविधिना सागरो जगौ । त्वयाऽत्र भ्राम्यता किञ्चिदैदयाश्चर्यमृषे वद ॥ ७ ॥ सोऽन्यधात् कमलामेलाश्चर्यभूता जगत्यपि । धनसेनाङ्गजा रूपपराभूतसुराङ्गना ॥ ८ ॥ नभःसेनाय दत्ता सा दृष्टाऽत्रैवेति नारदः । प्रोच्योत्पत्य चान्यतोऽगात्तद्भाग्यजनि सागरः

॥ ९ ॥ तामेव सागरो ध्यायँस्तन्नामैव वदन्नथ । पश्यन् सर्वत्र तामेवाद्वैतबुद्धिरजायत ॥ १० ॥ नारदः कमलामेलासद-
नेऽथ गतस्तया । पृष्टश्चाश्चर्यमित्याख्यन्नद्मसद्म कलिप्रियः ॥ ११ ॥ मयाऽद्भुतद्वयं दृष्टं तत्रैकं रूपतो ननु । सागरेन्दुः
कुमारोऽन्यन्नन्नःसेनः कुरूपतः ॥ १२ ॥ नन्नःसेनं रयान्मुक्त्वा सागरे सा च रागिणी । जझे गत्वाऽथ तन्नागं सागरस्य
जगौ मुनिः ॥ १३ ॥ सागरं पतितं वीक्ष्य तस्या विरहवारिधौ । कुमारा विधुरा बाढं बभ्रूवुरखिला अपि ॥ १४ ॥ शाम्ब-
स्तत्र तदागत्तत्तथावस्थस्य पृष्ठतः । स्थित्वा सागरचन्द्रस्य पाणिभ्यां लोचने प्यधात् ॥ १५ ॥ सागरः स्माह कमलामेले
मुञ्च ममेक्षणे । विहस्य सागरो (शाम्बको)ऽदोऽवक् कमलामेलकोऽस्म्यहम् ॥ १६ ॥ जगाद सागरस्तर्हि कमलां तां
त्वमेव मे । मेलयितासि सत्याह्वः किमन्योपायचिन्तया ॥ १७ ॥ शाम्बो दध्यौ मया प्रत्यपादीदं नर्मकर्मणा । सुदुष्करं
तथाप्येतन्निर्वाह्यं हि कथञ्चन ॥ १८ ॥ विद्यां स्मृत्वाऽथ प्रज्ञप्तिं कुमारैरखिलैः सह । शाम्बो वनमगादौग्रसेन्युद्वहन-
वासरे ॥ १९ ॥ सद्मनः कमलामेलां तत्रानाय्य सुरङ्गया । विधिना सागरेणासौ रागिणीं पर्यणाययत् ॥ २० ॥ अपश्यन्तो
गृहे तां च मार्गयन्तः पुरेऽखिले । पितृश्वशुरवर्गीयास्तदेवोद्यानमाययुः ॥ २१ ॥ मध्ये स्थितां कुमाराणां चारुखचररूपि-
णाम् । समीक्ष्य कमलामेलां हरये ते न्यवेदयन् ॥ २२ ॥ हरिः क्रुद्धोऽथ कमलामेलाहर्तॄन् कुमारकान् । आशिशासि-
षुराह्वास्त नान्यायं सहते हि सः ॥ २३ ॥ कृतात्मरूपः शाम्बोऽपि कमलामेलयाऽऽश्रितम् । सागरेन्दुं समादाय कृष्णां-
ह्र्योर्निपपात च ॥ २४ ॥ विलक्षोऽथाच्युतः प्रोचे किमदोऽकारि रे त्वया । यदेवं वञ्चितो हन्त नन्नःसेनोऽयमाश्रितः
॥ २५ ॥ किमस्य क्रियतेऽथेति नन्नःसेनं विबोध्य च । प्रददौ कमलामेलां सागरायैव केशवः ॥ २६ ॥ तदादि तु नन्नः-

सेनोऽप्यपकर्तुमनीशिता । छिद्रं विलोकयामास सागरेन्दोर्निरन्तरम् ॥ २७ ॥ अन्येद्युर्नेमितीर्थेशदेशनाशुद्धमानसः । शून्यौकसि कृतोत्सर्गः सोऽथास्थादात्तपौषधः ॥ २८ ॥ नक्तःसेनोऽपचिकीर्षुर्लब्धच्छिद्रस्तदैव हि । कृष्टासिर्हन्तुमारेभे सागरं प्रतिमास्थितम् ॥ २९ ॥ तथापि सागरः क्रोधं मनसापि दधौ न हि । दध्यौ चान्यायिनं स्थाने एष न्यायी हिनस्ति माम् ॥ ३० ॥ नक्तःसेनमथास्तम्नीद्दुराशं शासनामरी । आख्यच्च रे दुराचार किमिमं हंसि धर्मिणम् ॥ ३१ ॥ क्रमेण पारितोत्सर्गं सागरं क्षमयन्नसौ । मुक्तो देवतया कुर्युः के न पक्षं हि धर्मिणाम् ॥ ३२ ॥ जैनं धर्ममथाराध्य सम्यक् सागरचन्द्रमाः । समाधिना विपन्नोऽभूत्त्रिदिवे त्रिदशोत्तमः ॥ ३३ ॥ एवमाराध्यतां सम्यक् पौषधव्रतमुत्तमम् । तद्धत्स्वयंवरा वोऽपि स्युः शिवत्रिदिवश्रियः ॥ ३४ ॥

॥ इति सागरचन्द्रकथानकम् ॥

व्याख्यातमिदं पञ्चविंशं पौषधव्रतोपदेशद्वारं । अथातिथिसंविभागव्रतमुपदिशति—

किमपि फलमपूर्वं संविभागस्य साधौ, यदभिलषितसिध्यै मूलदेवेऽपि माषाः ।
कृशमपि हि सुपात्रे न्यस्तमुच्चैः फलध्यै, ननु तृणमपि धेनौ दुग्धपीयूषवृष्ट्यै ॥ ५३ ॥

व्याख्या—(साधौ) सुपात्रे संविभागस्य अतिथिसंविभागस्य किमप्यपूर्वं फलं विद्यते । यद्यस्मात् कारणात् माषाः कुद्दमाषा अपि मूलदेवेऽभिलषितसिध्यै राज्यादिप्राप्तयेऽभूवन् । हि यस्मात् कारणात् कृशमपि स्तोकमपि (तुच्छमपि)

१ युक्तम्.

सुपात्रे न्यस्तं सत् उच्चैः फलध्यैं सातिशयफलप्राप्तये भवति । ननु निश्चितं परप्रश्ने वा । धेनौ गवि तृणमपि न्यस्तं सत् दुग्धपीयूषवृष्ट्यै क्षीरामृतदानाय स्यात् । इति काव्यार्थः । कथा तु मणिकचौरकथायां कथयिष्यते ॥

भूयोऽप्यत्रैव विशेषमाह—

यदसदपि ददौ प्राक् शालिभद्रोऽतिथेः स्वं, तदसदपि स लेभे कामरर्द्धिः क्व मर्त्यः ।
क्व भुवि जलधिरिन्दुः काम्बरे तं स पुष्णात्यमृतभृतपयोदं शोषणेऽप्यौर्ववह्नेः ॥ ५४ ॥

व्याख्या—श्रीशालिभद्रः प्राक् पाश्चात्ये गोपालभवेऽसदप्यविद्यमानमपि यदतिथेः साधोः स्वं द्रव्यं क्षीरेयीघृतखण्ड-रूपं ददौ स शालिभद्रस्तत् स्वं असदपि अविद्यमानमपि लेभे । यतः अमरर्द्धिः देवलक्ष्मीः क्व ? मर्त्यो मनुष्यः क्व ? इति, शालिभद्रो मनुष्योऽसतीममरर्द्धिं लब्धवान् । ननु मनुष्योऽतिदूरस्थां देवश्रियं कथं लभते, प्राप्तुमशक्यत्वादतिदूरत्वेने-त्याशङ्कां दृष्टान्तेन निरस्यन्नाह–तथा भुवि पृथिव्यां जलधिः समुद्रः क्व ? अम्बरे आकाशे इन्दुः क्व ? तथापि स इन्दुस्तं जलधिं पुष्णाति । किंलक्षणं जलधिं ? और्ववह्नेर्वडवानलस्य शोषणेऽपि अमृतभृतपयोदं अमृतेनामृतरूपजलेन भृतो व्याप्तः पयोदो यस्मात्स तथा तम् । इति काव्यार्थः । कथा चेयं (शालिभद्रकथा)—

विशालशाल्यावलिशालिशालिग्रामोऽभिरामो रमया पुराऽपि । जज्ञेऽत्र दुर्दैववशाद्विशीर्णवंशा वशा नामत एव धन्या ॥ १ ॥ तद्बालकः सङ्गमनामधेयोऽथाचारयद्वत्सतरान् जनानाम् । प्रायः प्रिया प्राणितदा प्रशस्ता, रोरार्त्रकाणामियमेव वृत्तिः ॥ २ ॥ अथापरेद्युः क्वचिदुत्सवे स, गृहे गृहे पायसमद्यमानम् । निरीक्ष्य गत्वा सदने स्वकीये, तत्पायसं स्वां जननीं

ययाचे ॥ ३ ॥ सा याच्यमाना शिशुनाऽमुना तत्, सगद्गदं तं रुदती जगाद । प्राप्तिः क्व मत्तः सुत पायसस्य, लब्धेत यत्का (त्कः) सिकतासु तैलम् ॥ ४ ॥ तस्यै तदासन्नगृहाङ्गनाऽग्निरागत्य तद्दुःखमश्रावगत्य । क्षीरादि सर्वं ददते तदानीं, धन्याऽप्यपाक्षीत् परमान्नमाशु ॥ ५ ॥ खण्डाज्ययुक्तेन च पायसेन, स्थालं प्रपूर्य प्रददे शिशोः सा । केनापि कार्येण जगाम चान्तर्गृहं गृहं मार्दवसम्पदालेः ॥ ६ ॥ अत्रान्तरे मासमुपोषितस्तद्धामागमत्कोऽपि तपोधनो द्राक् । प्रपारणार्थं ज्ञवतारणार्थं, तस्यैव साक्षादिव पुण्यपुञ्जः ॥ ७ ॥ सोऽचिन्तयच्चिन्तितरत्नमेव, सचेतनं मे समपद्यतासौ । तपोधनो धाम समागतो मज्जाग्योदयाकृष्ट इवाद्य हृद्यः ॥ ८ ॥ मेनेऽमुना साधुसमागमेन, धन्यं स चाधन्यमपि स्वमुच्चैः । तयास्य दृष्ट्याऽतिविशालदिष्ट्या, फलेग्रहिर्जन्मनगोऽजनिष्ट ॥ ९ ॥ इत्येष रोमाञ्चितगात्रयष्टिरुत्पाट्य तत्स्थालमदात् परान्नम् । वाचंयमायाद्भुतवाक्प्रशस्तो, जग्राह साधुस्तदनुग्रहार्थम् ॥ १० ॥ ययौ स साधुर्गृहतोऽथ मध्यान्निर्गत्य धन्याऽपि पुनः परान्नम् । अनेन तद्भुक्तमिति स्म दत्ते, आकण्ठमादन्निशुरप्यतृप्तः ॥ ११ ॥ स्मरन् स साधुं तदजीर्णयोगात्तम्यां मृतोऽर्हंत्यनुज्ञावतोऽतः । गोज्ञऽनामेन्यवरस्य ज्ञार्यांज्ञऽोदरे राजगृहे पुरेऽज्ञूत् ॥ १२ ॥ सा शालिकेदारमुदारधान्यं, स्वप्ने समीक्ष्याऽग्निदधे स्वज्ञर्तुः । सुतोऽत्र ज्ञावीत्युदितेऽमुनाऽपि, ज्ञज्ञाथ गर्भे बिज्ञरांबज्ञूव ॥ १३ ॥ पूर्णे च(ऽथ) काले सुषुवे च पुत्रं, प्राचीव सूर्यं प्रज्ञया प्रशस्तम् । स्वप्नानुमानेन पिता चकार, नाम्ना सुतं तं खलु शालिज्ञद्रम् ॥ १४ ॥ स पाठ्यमानः क्रमतोऽप्यधीतकलो वयोऽन्यत्कलयाञ्चकार । महेभ्यकन्याः परिणायितश्च, द्वात्रिंशतं रम्यतमाः पितृभ्याम् ॥ १५ ॥ ताभिः समं

१ नगो वृक्षः. २ अर्हंतिर्दानम्.

शक्र श्वालये स, क्रीमन्न जज्ञौ रजनीं न चाहः । प्रपूरयाञ्चक्रतुरस्य नोगयोग्यश्रियं तौ पितरौ यथेच्छम् ॥ १६ ॥ आदाय दीक्षां चरमार्हतोऽन्ते, जज्ञापतिः पण्मितमृत्युमाप्तः । श्रीशालिजङ खलु देवजूयं, गतश्च पुत्रं बुबुधेऽवधेः स्वम् ॥ १७ ॥ स पुत्रवात्सल्यपरोऽथ दिव्यनेपथ्यमुख्यं ददेऽस्य नित्यम् । प्रियान्वितस्यापि स पूर्वदानान्मर्त्योऽप्यमर्त्यर्द्धिमनुङ्क्त रम्याम् ॥ १८ ॥ अन्येद्युरादाय वणिग्भिरिन्यैर्जृम्भितो रत्नसुकम्बलालीम् । न श्रेणिकस्तां च ललौ महार्घां, ते शालिजङालय-मैयरुस्तत् ॥ १९ ॥ तदुक्तमूल्येन च कम्बलाँस्तान्, जङाऽऽदद चेल्लणयेति मत्वा । प्रोचे नृपः कम्बलमेकमीश, मद्यो-ग्यमादत्स्व महार्घमेव ॥ २० ॥ राज्ञाऽप्यथैकं वणिजोऽर्थितास्ते, मूल्येन तं कम्बलमूचिरेऽदः । जङाऽग्रहीत्तान्निखिलान्नृ-पोऽथ, प्रैषीत्तदर्थे स्वनरं तदोकः ॥ २१ ॥ तेनार्थिता तं निजगाद जङा, क्षित्वा मया सम्प्रति कम्बलाँस्तान् । श्रीशा-लिजङस्य कृतानि कान्तांह्रिप्रोज्झनानि प्रवराणि जङ ॥ २२ ॥ कार्यं यदि स्यादथ तैर्विजीर्णैः, पृष्ट्वा नरेन्द्रं तदमून् गृहाण । गत्वोदिते तेन नृपाय राज्ञ्याख्यदन्तरं नो वणिजां च कीदृक् ॥ २३ ॥ तं पूरुषं प्रेष्य कुतूहलेनाहूतेऽथ गोजङ-सुते नृपेण । उपेत्य जङा न्यगदन्नरेन्द्र, बहिः सुतो मे न हि जातु याति ॥ २४ ॥ प्रसीद धामागमनेन मे तत्तथेति राज्ञाऽप्युदितेऽथ जङा । गत्वा पुरोऽदृश्रियमाततानानरेशसौधं स्वगृहादिचित्राम् ॥ २५ ॥ आकारितोऽथ क्षितिपस्तया यन्, चमत्कृतो वीक्ष्य च हट्टशोभाम् । श्रीशालिजङालयमागतश्च, विमानमेवाथ गृहं ददर्श ॥ २६ ॥ प्रविश्य भूपोऽथ चतुर्थभूमावुपाविशत् केशरिविष्टरे सः । जङापि गत्वा खलु सप्तमोर्वीं, पुत्रं न्यगादीदिति शालिजङम् ॥ २७ ॥ अत्रागतः

१ सिंहासने.

श्रेणिकनृपतिर्दस्ति, तं द्रष्टुमेहि क्षणमाह सोऽपि । त्वमेव यं वेत्सि तमर्थमम्ब, विधेहि किं तत्र मया हि कार्यम् ॥ २८ ॥ नत्वा ततः स्माह न वत्स वस्तु, क्रेतव्यमेतत्परमेष नाथः । लोकस्य सर्वस्य तवापि सोऽथ, श्रुत्वेति दध्यौ सविषादमुच्चैः ॥ २९ ॥ सांसारिकीं धिक् प्रभुतां ममाप्यन्यो यत्प्रभुः किं तदिहोरुभोगैः । दीक्षां ग्रहीष्येऽन्तिमसार्वपार्श्वे, मङ्क्षु त्रिलोकीप्रभुताप्रदात्रीम् ॥ ३० ॥ एवं विरक्तोऽप्युपरोधतः स, मातुस्ततोऽन्येत्य नृपं ननाम । नृपः परिष्वज्य तनूजवर्त्तं, निवेशयामास मुदा निजाङ्के ॥ ३१ ॥ अश्रूणि मुञ्चन्तममुं समीक्ष्य, नत्वा जगौ नृपतिमुं विमुञ्च । यद्दिव्यभोगैः परिलालितोऽयं, तद्वाध्यते मानवमाल्यगन्धैः ॥ ३२ ॥ ततो विसृष्टः क्षितिपेन शिश्ये स सप्तमोर्वीं न्यगदच्च नत्वा । विज्ञोऽद्य ज्ञोक्तव्यमिहेति तत्तद्दाक्षिण्यतः सोऽपि तथा प्रपेदे ॥ ३३ ॥ साऽसाधयज्ज्ञोज्यविधिं च सद्यः किं श्रीमतां सिध्यति नो गिराऽपि । स्नातोऽङ्गलीयं क्षितिपस्य शालिनिर्माल्यवाप्यां निपपात हस्तात् ॥ ३४ ॥ समीक्षते यावदिदं क्षमेश, इतस्ततस्तावदसौ स्वदासीम् । नत्वाऽऽदिशत्सुन्दरि दीर्घिकाम्भो, निष्कासयैषापि तथा चकार ॥ ३५ ॥ विचित्रदिव्याभरणान्तरस्थमङ्गाररोचिर्निजमङ्गलीयम् । विसिष्मिये क्षोणिपतिः समीक्ष्य, किमेतदित्याह नृपः स्म दासीम् ॥ ३६ ॥ श्रीशालिनऽस्य निधीयतेऽत्राभरणनिर्माल्यमिदं क्षमेश । दास्यैवमुक्तः स जगाद धन्या, एतेऽत्र धन्योऽहमपीदृशैन्यैः ॥ ३७ ॥ भूभुक् सभृत्यो बुभुजे भुजालो, नत्वापि भूभानिरपूपुजत्तम् । गृहं ययौ सोऽथ च शालिनऽङ्गं, व्यजिज्ञपद्धर्मसुहृत्समेत्य ॥ ३८ ॥ आगाच्चतुर्ज्ञानधरोऽद्य धर्मघोषो गुरुर्धर्म इवेह मूर्त्तः । तत्पादपद्मप्रणिपातवृत्त्या, स्वं मित्र कुर्वः सफलं नृजन्म

१ स्नानं कुर्वतः.

॥ ३९ ॥ तद्वाक्यपीयूषमयूखयूषपोषाच्चकोरीव मनःप्रवृत्तिः । विधीयते प्रीतिमती स्वकीया, विद्वज्जनावर्ण्यसुदर्शना च
॥ ४० ॥ तज्ञीः सुधादीधितिदीप्तिदीप्सा, नाकर्णि कर्णैः किमु ते सकर्णाः । करोत्करैर्यः कुरुते नलिन्या, नोन्नासनं को
नलिनीपतिः सः ॥ ४१ ॥ श्रुत्वेति गोत्रऊसुतोऽथ हृष्टो, रथं समारुह्य तदन्तिकेऽगात् । प्रणत्य(म्य) सूरीन्ऊमुपाविशच्च,
दिदेश धर्मं गुरुरप्यथैवम् ॥ ४२ ॥ धर्मेऽतिरम्ये क्रियतां नृजन्म, रमाः समासाद्य किमु प्रमादः । लब्ध्वा सुधाः साधु बुधा
मुधा मा, त्याक्षुः क्रमक्षालनहेतवे यत् ॥ ४३ ॥ संसारकान्तारविहारपारप्रकारको नास्त्यपरोऽत्र धर्मात् । अपारदुर्वा-
रतरान्धकारप्रचारहारी तरणेर्हि कोऽन्यः ॥ ४४ ॥ यस्मात्समासाद्य रमाः सुरम्या, धर्मात्ततो ये विमुखीभवन्ति । स्वामि-
द्रुहां धर्ममहामहीन्ऊः, पुनः प्रसन्नः कथमेष तेषाम् ॥ ४५ ॥ श्रुत्वेति संविग्नमना मनीषी, नत्वा गुरून् स्माह च शालि-
भद्रऊः । प्रभो प्रभुः केन वृषेण नान्यो, बोभोति सूरिर्निजगाद भूयः ॥ ४६ ॥ यो दीक्षया स्वां सफलीकरोति, जैन्या जनिं
तस्य विभुर्न चान्यः । स जायते सेव्यतया तथाऽत्रामुत्रापि स स्याद्भगतोऽपि नाथः ॥ ४७ ॥ यश्चाविपश्चिन्न च पश्चि-
मेऽपि, वयस्यनालस्यमधत्त धर्मे । दासत्वमासेदुष एव तस्य, जन्मोभयी यास्यति पाप्मभाजः ॥ ४८ ॥ सम्यङ्निशम्येति
गुरोर्गरीयोगिरो विरागोऽगददिभ्यसूनुः । गत्वा त्वनुज्ञाप्य विभो निजाम्बां, दीक्षां ग्रहीष्यामि विभुत्वदात्रीम् ॥ ४९ ॥
धर्मे विलम्बो न विधेय एवेत्युक्तोऽमुना सूरिवरेण सोऽथ । गत्वा गृहं स्वां जननीं जगाद, गिरा सुधासोदरया प्रहृष्टः
॥५०॥मोक्षप्रदोऽश्रावि मयाऽद्य धर्मः, श्रीधर्मघोषाख्यगुरोर्मुखाब्जात् । साध्वित्यकार्षीत् पितुरस्य पुत्रः, तज्ञेति हर्षात्प्रशशंस

१ अस्य गोत्रऊस्य पितुः पुत्रस्त्वं साध्वित्यकार्षीत् इति हर्षात् भऊा तं प्रशशंस.

ज्ञा ॥ ५१ ॥ स स्माह यद्येवमिदं तदम्ब, प्रसीद मे दामि यथा तपस्याम् । साऽप्यन्वधाद्वत्स परार्हतस्य, तवोचितेयं नियमस्थितिर्नु ॥ ५२ ॥ परं कुमारः सुकुमारवृत्तिः, सुदिव्यभोगैः परिलालितश्च । त्वं स्यन्दनं तूर्णवत्तपस्याभारं कथं वक्ष्यसि दक्षमुख्यः ॥ ५३ ॥ गोभऽसूनुर्निजगाद भोगैः, सुलालिताः संयमभारकृच्छ्रम् । वोढुं सहन्ते न त एव मातर्ये कातरा धैर्यगुणोज्झिताः स्युः ॥ ५४ ॥ त्यज क्रमाद्भोगचयं सहस्व, नृमाद्यगन्धाँस्तदनुक्रमेण । परिव्रजेरित्युदिते स्वमात्राऽ-थैकां प्रियां प्रत्यहमत्यजत्सः ॥ ५५ ॥ इतश्च तस्यां पुरि शालिभऽस्वसुः पतिर्धन्य इति प्रतीतः । तां स्नापयन्तीं रुदतीं-मथाख्यत्किं रोदिषीत्यौच्यत चैतयाऽपि ॥ ५६ ॥ व्रतं ग्रहीतुं मम सोदरोऽनुदिनं प्रियां मुञ्चति रुद्यते तत् । स स्माह यश्चेति करोति भीरुदीक्षाविधौ वै तव बान्धवः सः ॥ ५७ ॥ व्रतग्रहश्चेत्सुकरोऽस्ति नाथ, कथं त्वयाऽसौ क्रियते स्वयं न । सनर्मकं चेत्युदितस्तया सोऽवग्याहि दूरे हि परिव्रजामि ॥ ५८ ॥ साऽवक् प्रसीदेति च नर्मणोक्ते, मया विनो मा त्यज मां रमाश्च । प्रोचे स चानित्यमिहाङ्गनादि, त्याज्यं विदा नित्यपदेच्छया यत् ॥ ५९ ॥ तत्प्रव्रजामीति स उत्थितोऽथो, प्रिया व्रतार्थं तमनूत्थिताश्च । धन्यः प्रवव्राज समं प्रियाभिः, श्रीवीरपार्श्वे प्रविरक्तचेताः ॥ ६० ॥ श्रुत्वेति गोभऽसुतो व्रतार्थं, प्रतत्वरे वीरजिनांघ्रिमूले । गत्वा प्रवव्राज च तीर्थपोऽप्यन्यतो व्यहार्षीज्जगतोऽपि वन्द्यः ॥ ६१ ॥ श्रीधन्यगोभ-ऽसुतावभूतां, बहुश्रुतौ च क्रमतः पठन्तौ । तपस्यतः स्मातितरां शरीरेऽपि निःस्पृहौ चातिकृशावभूताम् ॥ ६२ ॥ अथान्यदा वीरजिनेन सार्धमाजग्मतू राजगृहं पुरं तौ । विहर्तुकामौ समयेऽथ मासप्रपारणे प्राणमतां च नाथम् ॥ ६३ ॥

१ माम्.

मातुः करे पारणकं तवाद्य, ज्ञावीत्थमुक्तः प्रजुणा सधन्यः । ज्ञज्ञासुतोऽथैत्य तपःकृशाङ्गो, ज्ञज्ञागृहद्वारि तदैव तस्थौ ॥ ६४ ॥ श्रीशालिज्ञद्रं जिनपं च धन्यं, ज्ञज्ञाजनो वन्दितुमुत्सुकोऽथ । तपःकृशाङ्गौ बुबुधे मुनी न, सम्यक् ततस्तौ च निरीयतुः प्राक् ॥ ६५ ॥ विक्रेतुमायात्यथ शालिज्ञद्रप्राग्जन्ममाता दधि तत्र धन्या । संजातसुप्रस्रवणस्तनी तं, प्रेक्ष्यार्पय-दृध्युज्ञयोः प्रणत्य[1] ॥ ६६ ॥ गत्वा प्रज्ञोः पार्श्वमुवाच शालिज्ञद्रस्तदालोच्य विज्ञो कथं मे । मातुः करे पारणकं जिनोऽवक्, प्राग्जन्ममाता तव धन्यकाऽसौ ॥ ६७ ॥ दध्ना कृते पारणकेऽमुनाऽथ, जिनाज्ञया धन्यसमन्वितेन । संवेगरङ्गो हृदि जागरूकोऽनयोर्गुरुः पोष्य[2] इवाजनिष्ट ॥ ६८ ॥ श्रीवीरमापृच्छ्य च शालिज्ञद्रोऽधिगत्य वैज्ञारगिरिं सधन्यः । शिलातले सुप्रतिलेखितेऽनशनं प्रपद्यागं[3] इव स्थिरोऽस्थात् ॥ ६९ ॥ ज्ञज्ञाऽऽगता तत्र तदा जिनेन्द्रं, नत्वाऽगमत्तत्र सुतं निनंसुः । तथा तपस्यन्तममुं समीक्ष्य, सधन्यमाख्यद्रुदती सबाष्पम् ॥ ७० ॥ वत्स त्वया यद्यपि सत्तुषाऽहं, त्यक्ताऽस्म्यथानन्दय मे तथापि । मनोरथं व्यर्थय माऽङ्ग मुक्त्यारम्ज्ञेण वा तेन सुतावतंस ॥ ७१ ॥ एवं रुदन्त्यत्र समागतेन, श्रीश्रेणिकेना-ज्ञिदधेऽथ ज्ञज्ञा । कोऽयं शुज्ञे हर्षपदे विषादः, संपद्यते ते वद हृद्यवृत्ते ॥ ७२ ॥ स्त्रैणे ज्ञवत्येव ज्ञवत्यपापे, पुंत्रिण्यशो-षेऽपि हि जीवलोके । यस्याः सुतस्तीव्रतरैस्तपोज्ञिस्त्रैलोक्यमूर्धानमधिप्रयाता ॥ ७३ ॥ ज्ञज्ञेति राज्ञा प्रतिबोधिता तौ, नत्वा मुनी धाम जगाम सौवम् । तौ संस्तुवन् श्रेणिकज्ञूधरोऽपि, तथाऽकरोज्जैनमतैकतज्ज्ञः ॥ ७४ ॥ समाधिना सान-

१ प्रणम्य. २ भृत्यः. ३ अगः पर्वतः. ४ पुत्रवती ज्ञवत्येव त्वमेव ज्ञवति अस्ति.

शनेन मृत्वा, महामुनी तौ समचित्तवृत्ती । सर्वार्थसिद्धाभिधया विमाने एकावतारौ त्रिदशावभूताम् ॥ ७५ ॥ श्रुत्वेति दानं सुरमानिदानं, बुधा बुधानन्दनसावधानम् । प्रदीयतां वः सुलभा भवेयुः, स्वर्गापवर्गादिकसंपदो यत् ॥ ७६ ॥

॥ इति श्रीशालिभद्रचरित्रकथा ॥

व्याख्यातमिदं षड्विंशमतिथिसंविभागोपदेशद्वारं । अथ क्रमायातं सप्तक्षेत्रीद्वारं, तद्विवरीषुः पूर्वं सामान्येन सप्तक्षेत्रीमुपदिशति—

क्षेत्रेषु सप्तस्वपि पुण्यपुष्टये, वपेद्धनं सम्प्रतिराजवद्धनी ।
कृषीवलः केवलशालितन्दुलान्, वपेत्स किं योऽखिलसस्यलालसः ॥ ५५ ॥

व्याख्या—धनी लक्ष्मीवान् पुमान् सप्तस्वपि जिनभवनविधापनादिषु क्षेत्रेषु पुण्यपुष्टये धर्मवृध्यै धनं वपेत् न्यसेत् । किंवत् ? सम्प्रतिराजवत् यथा सम्प्रतिराजः सर्वेष्वपि क्षेत्रेषु पुष्टये धनमुवाप । ननु एकस्मिन् क्षेत्रे धने उप्ते सति किं पुण्यपुष्टिर्न स्याद्येन सप्तस्वपीति प्रोक्तं ? इत्याशङ्क्यं दृष्टान्तेन निरस्यन्नाह—(स)कृषीवलः (स) कर्षुकः केवलशालितण्डुलान् किं वपेत ? अपि तु न वपेत, किं तु सर्वाण्यपि धान्यानि वपेत । स कः ? यः कृषीवलोऽखिलसस्यलालसः समस्तधान्याभिलाषुकः स्यादिति वृत्ताक्षरार्थः । कथानकमिदम्—

---

१ मा लक्ष्मीः.

(सम्प्रतिराजकथा)

अवन्ती नृततीर्नीतेरवन्ती स्वर्गिभूतुलाम् । अवन्ती सर्वतो लक्ष्म्या नाम्नाऽवन्तीति पूस्तता ॥ १ ॥ तस्यामश्यामलाचारः श्रीसुहस्त्यादिसूरिराट् । विहरन् धरणीमागात् साक्षादिव तपोनिधिः ॥ २ ॥ प्रसस्रुः श्रमणास्तस्य समुद्रस्येव वीचयः । स्फुरत्कृतान्तमर्यादा विहर्तुमन्त्रितः पुरीम् ॥ ३ ॥ विज्ञानाज्यासिनः केचित्केचिन्मासाद्युपोषिताः । प्राविक्षन् निक्षवः श्राद्धधान्नि धर्मोच्चया इव ॥ ४ ॥ कस्मैचित्साधवे काचिन्नूत्या श्राद्धवधूजना । क्षुत्तमीरविबिम्बानि ददाना मोदकान् वरान् ॥ ५ ॥ केनचिद्दृदृशे तत्र रङ्केण द्वारि तस्थुषा । चिरं चाटूक्तिलक्षेण याचमानेन किञ्चन ॥ ६ ॥ युग्मम् ॥ चिन्तितं च वृषादेन्योऽनिच्छन्नयोऽपि ददात्यहो । पापात् पुनर्न मे कोऽपि याचतोऽपि किमप्यलम् ॥ ७ ॥ कृपालुमौलिमौलींस्तदेतान् संप्राप्तमोदकान् । अन्वेमि येन मेऽप्येते कञ्चिद्यच्छति मोदकम् ॥ ८ ॥ ततस्ताननुयन् सोऽथ याचमानश्च मोदकम् । वसतिं क्रमतः प्राप नाग्यनङ्गीमिवात्मनः ॥ ९ ॥ सोऽपि नत्वा गुरूनूचे नवन्नयो नूरिमोदकान् । यच्छन्ति श्रावका मेऽपि तदेकं दत्त मोदकम् ॥ १० ॥ विहस्य सूरयः प्रोचुर्यदि त्वं मोदकार्थ्यसि । तत्समाश्रय श्रामण्यमत्रामुत्र सुखप्रदम् ॥ ११ ॥ सोऽप्याख्यन्नगवन् यद्यो रोचते तन्ममापि हि । प्रमाणं किं तु मे देहि मोदकं चित्तमोदकम् ॥ १२ ॥ स ततो दीक्षितः सूरिवरेणातिबुभुक्षितः । नोजितश्च तथाऽऽकण्ठं मोदकैः क्षोदकैः क्षुधः ॥ १३ ॥ सोऽथ प्रीतमना दध्यौ नोजं नोजं सुमोदकान् । तारितोऽहमहो एभिः क्षुधः संसारवारिधेः ॥ १४ ॥ कृपालुता कृपालूनां काप्येषा वागगोचरा । यत्प्रापि-

१ रुदन्ती. २ प्राप्नुवती. ३ शोभमाना. ४ क्षुधा एव रात्रिस्तस्या नाशने सूर्यबिंबानि. ५ धर्मात्. ६ क्षुधः क्षुधायाः अथ च संसारवारिधेः.

तोऽक्षयं सौख्यं मोदकार्थ्यप्यह सकृत् ॥ १५ ॥ वाचेव विमला चेतोवृत्तिरेषां महात्मनाम् । संस्तूयते कथंकारं प्रज्ञेव प्रोज्ज्वला क्रिया ॥ १६ ॥ इत्यादि ध्यायतस्तस्य सिद्धान्तार्थान्निशाम्यतः । भावनां भावमानस्य द्युरत्यैत् क्षणवत् सुखम् ॥ १७ ॥ सुस्निग्धाहारतस्तस्यां दुर्बलाङ्गो विसूचिकाम् । प्राप्तोऽपि स गुरोर्धर्माख्यानसध्यानमानसः ॥ १८ ॥ मृत्वा पाटलिपुत्रेशचन्द्रगुप्तनृपान्वये । श्रीमत्कुणालभूपालमहिषीकुक्षिसंभवः ॥ १९ ॥ अजनिष्ट विशिष्टात्मा तनयः सनयः सदा । द्युतिद्योतितदिग्भागः कमलोल्लासकोऽर्कवत् ॥ २० ॥ त्रिभिर्विशेषकम् ॥ तपस्यार्हत्यहो कल्पलताया अतिशायिनी । मनागप्याश्रिता यत् स्याज्जन्मानन्त्ये हितप्रदा ॥ २१ ॥ नामतो भावतश्चैष यत्प्राप्स्यत्यव्ययं पदम् । सम्प्रतीत्यव्ययं स्थाने तन्नाम व्यतनोत् पिता ॥ २२ ॥ भविष्यत्येष विख्यातः कीर्त्या दिक्षु दशस्वपि । इतीयन्तं नृपं चक्रुस्तं जना दशमे दिने ॥ २३ ॥ श्रामण्यश्रीरमण्यां को न रमेत विचक्षणः । क्षणं परिचिता याऽन्यजन्मन्यपि प्रियङ्करी ॥ २४ ॥ न तथा वपुषा वृद्धिं कलाद्याऽकलयद्यथा । कलाद्याऽपि तथा नैव यथा गुणगणेन सः ॥ २५ ॥ व्यानशे तेजसा सर्वा दिशः स शिशुरप्यधीट्[3] । यतो वयोऽनुगं वीर्यं महतां न रवेरिव ॥ २६ ॥ साधं साधं स वसुधां क्रमात्संप्राप्तयौवनः । त्रिखण्माधिपतिर्जज्ञे किं पुण्यैर्दुर्लभं भवेत् ॥ २७ ॥ अन्यदोज्जयिनीपुर्यामायातः सम्प्रतिर्नृपः । सूरीनार्यसुहस्त्याख्यान् वातायनग ऐक्षत ॥ २८ ॥ सूरींस्तस्येक्षमाणस्याहो दृष्टाः क्वाप्यमी मया । इति चिन्तयतो जातिस्मरणं समजायत ॥ २९ ॥ जातिस्मृत्या ततो राजा सर्वं प्राग्जन्मचेष्टितम् । ज्ञात्वोत्पन्नमहाभक्तिर्गवाक्षाद्रागवातरत् ॥ ३० ॥ तांस्त्रिः प्रदक्षिणीकृत्य चक्ष-

१ दिनम्. २ युक्तम्. ३ अधीशः.

ञोमाञ्चकञ्चुकः। अलकैस्तत्क्रमाम्भोजरजःपुञ्जं प्रमार्जयन् ॥ ३१ ॥ प्राणमत् प्रणयात्सूरीन् प्रोवाच च मुनीश्वराः। उपलक्षत मां किं नो अन्तेवासिनमात्मनः ॥ ३२ ॥ दत्तश्रुतोपयोगोऽथ सूरिः प्रोवाच ञूपतेः। वृत्तान्तमखिलं ज्ञात्वा यथार्थं प्राच्यजन्मनः ॥ ३३ ॥ ततो नृपो जगौ स्वामिन्नविज्ञातोऽप्यहं पुरा। सञ्चक्रे ञवता दीक्षादानादीनो दयालुना ॥ ३४ ॥ तथैव मां तदद्यापि विनेयं विनयान्वितम्। कथं सत्कुरुषे न त्वं धर्माख्यानप्रदानतः ॥ ३५ ॥ ततो गुरुर्जगादैवं धर्मार्थान् सिञ्चिसाधकान्। गरीयसः श्रुताम्भोधेस्तरङ्गानिव रञ्जतः ॥ ३६ ॥ नृपैताः सम्पदः संपादयन्ति पदमव्ययम्। बीजानीव सुक्षेत्रोप्ताः कुक्षेत्रोप्तास्तु दुर्गतिम् ॥ ३७ ॥ अर्हच्चैत्यं तथा बिम्बं सिद्धान्तादेस्तु पुस्तकम्। सङ्घश्चतुर्विधश्चेति सप्तक्षेत्री जिनोदिता ॥ ३८ ॥ वपेत शुद्धधीरस्यां सप्तक्षेत्र्यां धनं धनी। यथा ञवे ञवे सम्पत्सम्पनीपद्यतेऽक्षया ॥ ३९ ॥ योऽत्र सम्पदमासाद्य करिकर्णचलाचलाम्। नोत्सृजेत्सप्तक्षेत्रेषु सोऽतिञारादधो व्रजेत् ॥ ४० ॥ इति सूरिवचः श्रुत्वा श्रीमत्सम्प्रतिञूपतिः। दानादिधर्मकृत्येष्वनुरागी समजायत ॥ ४१ ॥ अचीकरच्च चैत्यान्यभ्रंलिहानि पदे पदे। सिञ्चिसौधाजिरारोहे निःश्रेणीरिव ञूस्पृशाम् ॥ ४२ ॥ व्यधापयच्च बिम्बानि रत्नस्वर्णमयानि सः। अलेखयच्च जैनेन्द्रागमपुस्तकसञ्चयम् ॥ ४३ ॥ चतुर्विधस्य सङ्घस्य ञक्तिं दीनादिदेहिनाम्। दुःखोऽरणमाधाय व्यधाच्च सफलां श्रियम् ॥ ४४ ॥ विहारैर्हारिणीं चक्रे धरणीं न स केवलम्। प्राक्पुण्योपचयप्राप्तां दुग्धाब्धितनयामपि ॥ ४५ ॥ जीर्णानि जिनगेहानि केवलं नोद्धार सः। स्वात्मानमपि संसारदुर्गदुःखादपि क्षणात् ॥ ४६ ॥ जिनाज्ञामिव लक्ष्मीं स्वां प्रजान्य

१ चैत्यैः.

वसुधाधिपः । समाधिना विपन्नोऽन्ते सम्प्रतिः सुगतिं ययौ ॥ ४७ ॥ एवं लब्ध्वा बुधा लक्ष्मीं सप्तक्षेत्र्यां वपन्त्वहो । यथा वोऽपि करक्रोडे क्रीडति त्रैदशी दशा ॥ ४८ ॥

॥ इति सम्प्रतिराजकथानकम् ॥

सप्तक्षेत्र्या माहात्म्यमाविर्भाव्यैकैकस्यापि माहात्म्यमाविर्भावयति—

क्षेत्राणि सप्तापि फलन्ति सर्वमप्येककं कट्किजवत्सुजुष्टम् ।
यत्पुण्यमात्रिकसप्तदीपैरेकेन तन्मङ्गलदीपकेन ॥ ५६ ॥

व्याख्या—सप्तापि जिनभवनादीनि क्षेत्राणि सर्वं स्वर्गापवर्गसौख्यप्राप्त्यादिकं फलन्ति । फलतेः सकर्मकत्वमविरुध्यते, अनिषिद्धत्वादिति । तथा एककमपि सुजुष्टमत्यन्तासेवितं सत्सर्वं फलति । किंवत् ? कट्किजवत् कट्किजः कट्किपुत्रो दत्तस्तवत् । सप्त क्षेत्राणि सर्वं फलन्ति तद्युक्तं, परमेककक्षेत्रं कथं सर्वं फलतीत्याशङ्क्य दृष्टान्तद्वारा शिक्षयति—यत्पुण्यमात्रिकसप्तदीपैः कृत्वा स्यात् तत्पुण्यमेकेन मङ्गलदीपकेन स्यादिति काव्याक्षरार्थः । कथा चेयम्—

(कट्किज (श्रीदत्तराज) कथा)

पत्तने पाटलीपुत्रे पाटलीपटलीपटौ[2] । क्षीराब्धाविव पद्माया जन्मसद्मनि बन्धुरे ॥ १ ॥ वीरनिर्वाणतो वर्षशतेष्वे-

---

१ देवसंबन्धिनी. २ पाटलीवृक्षाणां पटव्या समूहेन पटु तस्मिन्.

कोनविंशतौ । चतुर्दशाब्दयुक्तेषु व्यतीतेषु पुराशयः ॥ २ ॥ चैत्राष्टमीदिने विष्टौ जावी म्लेच्छकुले नृपः । कल्की रुद्रश्चतुर्वक्त्रो नामत्रितयविश्रुतः ॥ ३ ॥ त्रिजन्मविंशेषकम् ॥ तदानीं मथुरापुर्यामकस्माच्छलिकृष्णयोः । पतिष्यति देवगृहं निर्मूलद्रुमवद्भुतम् ॥ ४ ॥ नित्यं क्रूराशये तस्मिन् कषाया निखिला अपि । स्वाजाविका जविष्यन्ति ग्रावाण इव पर्वते ॥ ५ ॥ दस्युजूपजयं जूपविरोधोऽथ रसक्षयः । तदा खलु जविष्यन्ति दुर्जिह्मं चेत्यवर्षणे ॥ ६ ॥ कुमारोऽष्टादशाब्दीं सोऽष्टादशाब्दीं च मामरी । चण्मवीर्यस्ततो राजा कल्की नाम्ना जविष्यति ॥ ७ ॥ पुरेऽथ पर्यटंस्तत्र स्तूपान् पञ्च निजाह्वयः । पार्श्वस्थान् प्रश्नयति स्तूपाः केनैते निर्मिता इति ॥ ८ ॥ तेऽप्येवं व्याहरिष्यन्ति पुराऽजूद्भूविजुर्महान् । नन्दो नाम्ना धनैः सङ्ख्योज्झितैर्धनदसन्निजः ॥ ९ ॥ जोगोत्सर्गोज्झितं वित्तं तेनेह निहितं बहु । प्रजविष्णुस्तदादातुं कोऽप्यजून्न हि जूविजुः ॥ १० ॥ तन्निशम्य नृपः कल्की जूरिलोजः स्वजावतः । खानयित्वा ततः स्तूपान् वित्तं लास्यति तज्जतम् ॥ ११ ॥ अजितोऽपि पुरं सोऽथ धनार्थी खानयिष्यति । समस्तान् क्षापतीन् गर्वात्तृणवन्मंस्यते तथा ॥ १२ ॥ तदानीं खान्यमानायाः स्वपुरोर्व्यास्तु कल्किना । शिलामयी समुत्थास्यत्याशु गौः सुजगाकृतिः ॥ १३ ॥ जिक्षून् जिक्षार्थमायातान् साथ वीक्ष्य शिलागवी । तत्प्रातिहार्यतः शृङ्गाग्रेण संघट्टयिष्यति ॥ १४ ॥ स्थविरा व्याहरिष्यन्ति संजावयति जाविनम् । घनं घनाऽशिवं त्वेषा तत्कचिज्झम्यतेऽन्यतः ॥ १५ ॥ श्रुत्वेति केऽपि श्रमणा विहरिष्यन्ति चान्यतः । जक्तवस्त्रादिलोजेनान्येऽदो वक्ष्यन्ति दुर्धियः ॥ १६ ॥ समयात्कर्मतो जावि शुजं यद्यशुजं तथा । कस्तन्निवारणायेश ईशिताऽपि स्वयं जुवि ॥ १७ ॥ ततो याचिष्यते कल्की सर्वान् पाखण्डिनः करम् । सारम्जास्ते प्रदास्यन्ति तस्मै तं सप-

रिग्रहाः ॥ १८ ॥ पाखण्मिन्निः करो दत्तोऽन्यैर्मे यूयं न दत्थ किम् । इति जल्पन् स लुब्धात्मा महर्षीनपि रोत्स्यते ॥ १९ ॥ निगदिष्यन्ति तं तेऽथ नूमीशाकिञ्चना वयम् । धर्मलाभं विना निक्षालुजः किं तव दद्महे ॥ २० ॥ पुराणेऽप्युक्तमस्त्येवं ब्रह्मनिष्ठान्महामुनीन् । रदाँस्तत्पुष्यषष्ठांशान्नाग्नवेद्भूमिवह्नयः ॥ २१ ॥ अतो दुष्कर्मणस्तेन विरम क्ष्माधिनायक । व्यवसायोऽशुभायायं पुरे देशे च सर्वथा ॥ २२ ॥ इति साधुगिरं श्रुत्वा कोपिष्यत्याशु कल्किराट् । विकरालाननो दण्डधरवद्दारुणेक्षणः ॥ २३ ॥ मुमूर्षुरस्यरे मर्त्याधम किं यन्मुनीनपि । अर्थमर्थयसेऽथेति वक्ष्यते तं पुरः सुरी ॥ २४ ॥ तया सुरीगिरा सिंहदष्ट्या हरिणपोतवत् । नीतः कल्की नमस्कारपूर्वं तान् क्षमयिष्यति ॥ २५ ॥ नयङ्करा नविष्यन्ति तदोत्पाता दिने दिने । कल्किनूमीशनगरक्षयसूचनचारवः ॥ २६ ॥ अहोरात्रानथो सप्तदश वृष्टिं विधास्यति । मेघो गङ्गाप्रवाहस्तन्नगरं प्लावयिष्यति ॥ २७ ॥ कोऽपि सूरिवरस्तत्र कोऽपि सङ्घजनस्तथा । कश्चिच्च पूर्जनः कल्की स्थास्यन्ति स्थलमस्तके ॥ २८ ॥ गङ्गाप्रवाहः प्रसरन् सर्वतोऽपि कृतान्तवत् । सद्यः कवलयामास (कवलयिष्यति) नूयसस्तत्पुरीविशः ॥ २९ ॥ नन्दद्युम्नेन तेनाथ विरते वारुपप्लवे[1] । नूयोऽपि नूपतिः कल्की विधास्यति नवं पुरम् ॥ ३० ॥ जिनालया नविष्यन्ति प्रनविष्यन्त्युपासकाः । साधवो विहरिष्यन्ति वर्षिष्यन्त्यम्बुदाः सुखम् ॥ ३१ ॥ कुम्भलाग्नेऽपि डम्भेण धान्यं नादास्यते जनः । एवं चाब्दानि पञ्चाशत् सुनिष्कं नावि कल्किनि ॥ ३२ ॥ कल्की नूयोऽपि चासन्नावसानस्त्याजयिष्यति । बहून् पाखण्मिनो लिङ्गान्युपजोष्यति चोच्चकैः ॥ ३३ ॥ स सङ्घान् सूरिसाधूँश्च

१ वारां जलानामुपप्लवे.

न्यस्य गोवाटके ततः । याचिष्यते स षष्ठांशं ज्ञिह्वाया अपि दुष्टधीः ॥ ३४ ॥ सङ्घोऽथेन्द्राराधनाय कायोत्सर्गं विधास्यति । वक्ष्यन्ति शासनामर्यो[1] राजन्नश्रेयसे ह्यदः ॥ ३५ ॥ सङ्घस्योत्सर्गसंसर्गप्रभावाच्चलितासनः । वृद्धविप्रवपुर्भूत्वा हरिस्तत्रागमिष्यति ॥ ३६ ॥ उच्चैः सिंहासनासीनं सभासंस्थं च कल्किनम् । इन्द्रो वक्ष्यति किं त्वेते त्वया रुद्धा महर्षयः ॥ ३७ ॥ कल्की तं वक्ष्यते दह्म वसन्त्येतेऽत्र मत्पुरे । करं मह्यं न यच्छन्ति ज्ञिह्वाषष्ठांशमप्यहो ॥ ३८ ॥ सर्वे पाखण्डिनोऽभूवन् करदा मे इमे तु न । बलाद्दोग्धुं दुर्गवीव निरुद्धा वाटके ततः ॥ ३९ ॥ तं वदिष्यति शक्रोऽपि नैतेषामस्ति किञ्चन । ज्ञिह्वांशमपि कस्यापि ददतेऽमी न कर्हिचित् ॥ ४० ॥ ज्ञिह्वुन्योऽर्थ्यमानस्त्वं ज्ञिह्वांशं किं न लज्जसे । तन्मुञ्चामूनन्यथा तेऽनर्थः संज्ञाव्यते महान् ॥ ४१ ॥ क्रुद्धोऽनया गिरा कल्की जल्पिष्यत्यथ रे जटाः । गलग्रहादमुं विप्रं निःसारयत सत्वरम् ॥ ४२ ॥ इत्थमुक्ते स कल्किनन्तं कल्किनं त्रिदशेश्वरः । तूर्णं चपेटयाऽऽहत्य भस्मपुञ्जीकरिष्यति ॥ ४३ ॥ समाप्य निजायुः स षण्णवत्यब्दमानवृत् । भविष्यति महाघोरनरके नारको ध्रुवम् ॥ ४४ ॥ तत्पुत्रं दत्तनामानं हरिर्वक्ष्यत्यरे यदि । प्रपत्स्यसे जिनश्रेयस्तत्त्वां मोक्ष्यामि नान्यथा ॥ ४५ ॥ त्वत्पितुर्यादृशं पापफलं वृत्तं तवापि हि । पापमाचरतस्तद्वत्तं वत्स्यति तादृशम् ॥ ४६ ॥ एतदैन्द्रं वचः श्रुत्वा दृष्ट्वा पापफलं पितुः । जीतः संसारदुःखेभ्य इव धर्मं स आत्तवान् ॥ ४७ ॥ अनुशिष्य वृषं जैनं दत्तं कल्किततूरुहम् । राज्ये न्यस्याथ वन्दित्वा सङ्घं शक्रः स्वरेष्यति[2] ॥ ४८ ॥ पितुः पापफलं जीमं ध्यायँश्च हरिशासनम् । दत्तो विधास्यते भूमीमर्हच्चैत्यालिभूषिताम्

१ शासनदेव्यः. २ स्वर्गम्.

॥ ४९ ॥ अस्थिरां स्वभुजोपात्तां रमामुत्सृज्याऽखिलामपि । समाधिना विपन्नोऽन्ते स्वर्गराजी भविष्यति ॥ ५० ॥ एवं चलाचलां लक्ष्मीं समासाद्य बुधाः सदा । वपन्त्वार्हतचैत्येषु यथा वः साऽक्षया भवेत् ॥ ५१ ॥

॥ इति श्रीदत्तराजकथा ॥

सप्तविंशतितमं साधारणसप्तक्षेत्रीद्वारं विवृतमिदं । अथैककं सप्तक्षेत्रीक्षेत्रं विवृणोति—

बिम्बं महल्लघु च कारितमत्र विद्युन्माल्यादिवत् परभवेऽपि शुभाय जैनम् ।
ध्यातुर्गुरुर्लघुरपीप्सितदायिमन्त्रः, प्राग्दौःस्थ्यभाविधनविघ्नजिदे न किं स्यात् ॥ ५२ ॥

व्याख्या—जैनमार्हतं बिम्बं महत् पञ्चशतधनुःपरिमाणादिरूपं । च पुनर्लघु अङ्गुष्ठादिपरिमाणं कारितं सत् अत्रेहभवे परभवेऽपि परजन्मन्यपि कर्तुः शुभाय श्रेयसे स्यात् । किंवत् ? विद्युन्माल्यादिवत् विद्युन्मालिप्रमुखजनवत् । ननु महद्बिम्बं शुभाय स्यात्तथा लघु बिम्बं कथं शुभाय स्यात् ? इत्याशङ्कां दृष्टान्तेन निरस्यति—ईप्सितदायी वाञ्छितदायको मन्त्रो लघुरपि ध्यातुर्ध्यायकस्य प्राग्दौःस्थ्यभाविधनविघ्नजिदे पुरातनदारिद्र्यभविष्यन्निविडकष्टजिदे किं न स्यात् ? अपि तु स्यादेवेति वृत्ताक्षरार्थः । कथा तूदायननृपकथायां कथिता ॥

भूयोऽप्यत्रैव द्वारे विशेषोपदेशमाह—

निर्मायार्हतबिम्बमार्हतपदस्थानाग्रिमं धार्मिकः, स्वात्मानं च परं च निर्मलयति स्तुत्यर्चनावन्दनैः ।

मन्त्री श्रेणिकसूरिवार्द्रकसुतं मोहान्धकारस्थितं, दीपः पुष्यति कस्य कस्य न मुदं श्रेयःश्रियामाश्रयः ५८

व्याख्या—धार्मिको धर्मिष्ठः पुमान् आर्हतं बिम्बं जिनप्रतिमां निर्माय कृत्वा स्तुत्यर्चनावन्दनैः स्तवनपूजननमस्कारकरणैः कृत्वा स्वात्मानं स्वं जीवं च पुनः परं च परमपि अन्यं जनमपि निर्मलयति निर्मलं निष्पापं करोति । किंलक्षणं बिम्बं ? आर्हतपदस्थानाग्रिमं तीर्थकृत्पदवीस्थानाग्रेसरं । क इव कं ? मन्त्री श्रेणिकसूः अभयकुमारः आर्द्रकसुतमिव आर्द्रकुमारमिव । किंरूपं मोहान्धकारस्थितं मोहोऽज्ञानं स एवान्धकारं तत्र स्थितं वर्तमानं अनार्यदेशे स्थितमित्यर्थः । ननु बिम्बं कर्तुः स्वात्मानं निर्मलयति तत्सत्यं परं कथमन्यं जनं निर्मलयतीत्याशङ्कामुदाहरणेन निरस्यति—श्रेयःश्रियां कल्याणश्रीणामाश्रयः स्थानं दीपः कस्य कस्य पुंसः कर्तुर्दृष्टुश्च मुदं हर्षं न पुष्यति न वर्धयति ? अपि तु सर्वस्यापि पुष्यतीति वृत्ताक्षरार्थः । भावस्त्वार्द्रकुमारकथायां निरूपितः ॥

व्याख्यातमिदमष्टाविंशं प्रथमक्षेत्ररूपबिम्बस्वरूपनिरूपणद्वारं । अथ द्वितीयक्षेत्रचैत्यविधानोपदेशमाह—

तीर्थं मुदे स्वपरयोरपि कीर्तिपालभूपालकारिततुरङ्गमबोधवत् स्यात् ।
उद्यानसारसहकारवनं फलध्यै, किं वस्तुरेव न पुनस्तदुपासकानाम् ॥ ५९ ॥

व्याख्या—तीर्थं चैत्यं स्वपरयोरपि स्वस्यान्यस्यापि मुदे हर्षाय स्यात् । किंवत् ? कीर्तिपालभूपालकारिततुरङ्गमबोधवत् कीर्तिपालभूपालेन कीर्तिपालराजेन कारितो योऽसौ तुरङ्गमबोधोऽश्वावबोधनामप्रासादस्तद्वत् । स्वस्य तीर्थं मुदे स्यात् परं कथमन्यस्येत्याशङ्कां दृष्टान्तेन विफलयति—उद्यानसारसहकारवनं उद्यानेषु वनेषु सारं प्रधानं यत्सहकार-

वनं तत्किं वसुरेव वा एकस्यैव फलध्यै फलसंपदे किं स्यात्, पुनस्तदुपासकानां तत्सेवकानां कोकिलादीनां फलध्यै किं न स्यात्? अपि तु स्यादेवेति वृत्ताहरार्थः। भावश्चायं कथयोच्यते—

(तुरङ्गमबोधचैत्यकथा)

श्रेयःश्रियामधिष्ठाने प्रतिष्ठाने महापुरे। सुमित्र इति नाम्नाऽभूच्छ्रेष्ठी श्रेष्ठतमो नृणाम् ॥ १ ॥ तस्यासीत् परमप्रीतिपात्रं मित्रं महार्हतः। जिनदासाभिधस्तत्र पवित्रविधिशेवधिः ॥ २ ॥ ददद्दानं कुपात्रेभ्यः सुमित्रः ख्यातिकाम्यया। पात्रापात्रविचारान्धबधिरः स्म न तिष्ठति ॥ ३ ॥ जिनदासस्तमाचख्यौ पात्रापात्रविचारवित्। मा वयस्य कुपात्रेभ्यो रमां यच्छानघामिमाम् ॥ ४ ॥ सुक्षेत्रे बीजवत् पात्रे श्रीरुप्ता स्यान्महाफला। उप्ता सा वैपरीत्येन विपरीतफला भवेत् ॥ ५ ॥ तृणं वीतीर्णं महिष्या दुग्धवृध्यै भवेद्यथा। तथा सुपात्रेऽल्पमपि दत्तं भूरिफलं भवेत् ॥ ६ ॥ क्षीरं तदेव निर्माय शर्कराचूर्णमिश्रितम्। प्रदत्तं विषवृध्यै स्यात् कुपात्रेभ्योऽहेस्तिस्तथा ॥ ७ ॥ तीर्थकृत्प्रथमं पात्रं द्वितीयं च महर्षयः। अणुव्रती तृतीयं च चतुर्थं दर्शनान्वितः ॥८॥ चतुर्ष्वेतेषु पात्रेषु जिनादिष्टेषु सौवैसा (मा)। प्रयोक्तव्या बुधैर्नित्यं मुक्तिमिच्छुभिरात्मनः ॥ ९ ॥ प्राणत्राणकृते दानं हीनदीनादिदेहिनाम्। औचित्यकीर्तिदानं च किञ्चिन्नोगफलं भवेत् ॥ १० ॥ कुपात्रदानतस्त्वर्थनाशः स्यादिह जन्मनि। जिनाज्ञाभङ्गसङ्गोऽपि भ्रमोऽतोऽनन्तसंसृतौ ॥ ११ ॥ अतः क्षिप्तं वरं वह्नौ

---

१ सर्पेभ्य इति शेषः. २ दानम्. ३ स्वस्येयं सौवी सा चासौ सा च लक्ष्मीः सौवसा, अयं समासश्चिन्त्यः सौवमा इति साधु, लक्ष्मीः इति चार्थः.

वात्ययोत्क्षेपितं वरम् । वित्तं दत्तं कुपात्राय न पुनर्धर्मसाधनम् ॥ १२ ॥ इत्युक्तो जिनदासेन जिनधर्मानुगामिना ।
सुमित्रो निजगादेति निर्विवेकशिरोमणिः ॥ १३ ॥ सुहृन्न दानशौण्डेन पात्रापात्रविवेचनम् । विधीयते पयोवाहेनेव सर्वत्र
वर्षता ॥ १४ ॥ घनाघनो घनं वर्षन् कुपात्रे एव सर्वदा । न जीवयति किं जीवलोकं दान्युपमा हि सा ॥ १५ ॥ श्रुत्वेति
जिनदासोऽपि निर्विचारस्य चास्य किम् । उपदेशदानेनेति तूष्णीम्भावमभावयत् ॥ १६ ॥ सुमित्रो निर्विवेकेन प्रदाया-
विधिना धनम् । किञ्चिद्भोगफलं कर्मोपार्जयामास च क्रमात् ॥ १७ ॥ सुमित्रोऽथ मृतिं प्राप्तो भृगुकच्छपुरेशितुः । तेनैव
कर्मणा रम्यो जज्ञे पट्टतुरङ्गमः ॥ १८ ॥ क्रमेण जिनदासोऽपि दीक्षामादाय चार्हतीम् । विंशत्या स्थानकैस्तीर्थकृत्त्वं कृत्वा
समार्जयत् ॥ १९ ॥ समाधिना विपन्नोऽन्ते जिनदासः क्रमाद्भूत् । मुनिसुव्रततीर्थेशो भावेन भवभीतिहृत् ॥ २० ॥
इतश्च भृगुकच्छीयो भूपतिस्तं हयोत्तमम् । अश्वमेधे महायज्ञे प्रातर्व्यापादयिष्यति ॥ २१ ॥ ज्ञात्वेति सुव्रतस्तीर्थकरः
प्राक्सुहृदं निजम् । प्रबोधयितुकामस्तमेकस्यामेव निश्यहो ॥ २२ ॥ षष्टियोजनमानेनोर्वरामुल्लङ्घ्य सत्वरम् । प्रातर्भृगु-
पुरेशानदिग्देशे समवासरत् ॥ २३ ॥ भूपस्तमश्वमारुह्य निनंसुर्जिनमुच्चकैः । पौरवारपरीवारस्तत्रोद्याने समाययौ ॥२४॥
जिनं प्रणम्य भूपाद्या यथास्थानमुपाविशन् । तीर्थकृद्दर्शनेऽश्वस्य जाता जातिस्मृतिः पुनः ॥ २५ ॥ खुरैः क्ष्मां मथा-
हन्ति सोऽश्रुपातं करोति च । दृशा मन्यरया चायं वारं वारं प्रपश्यति ॥ २६ ॥ तं वीक्ष्याश्वान्यधात् स्वामी मा विध-
त्स्वाधृतिं सुहृद् । मदुक्तं भवता तत्तत् पुरा न विहितं यदि ॥ २७ ॥ अकरिष्यत् पुरा मित्र भवान् मदुदितं यदि ।
स्वर्गापवर्गसंसर्गोऽभविष्यत्तन्ममेव ते ॥ २८ ॥ सुहृत्समाधिमाधायाद्यापि धर्मे मतिं कुरु । भवेयुः सुखभास्ते यत्संपदस्त्रि-

दिवौकसाम् ॥ २९ ॥ वीक्ष्येति भूपतिः प्रोचे तीर्थेश कथय प्रभो । कोऽयमश्वः कथं चास्य वैराग्यं तव वीक्षणात् ॥३०॥ प्रभुः प्राग्भववृत्तान्तं सर्वं स्वस्याश्वकस्य च । कीर्तिपालान्निधायास्मै भूपालाय न्यवेदयत् ॥ ३१ ॥ ततो विसिष्मिये क्ष्मापस्तीर्थनाथो हयस्य च । ददे आर्हतं धर्मं स्वर्गसंसर्गकारकम् ॥ ३२ ॥ हयोऽपि सम्यगाराध्य जैनं धर्मं सुखं मृतः । त्रिविष्टपे विशिष्टात्मा शर्मभाक् समजायत ॥ ३३ ॥ जिनोपान्ते ततः कीर्तिपालः प्राप्यार्हतं वृषम् । अश्वावबोधान्निधया तत्र चैत्यमचीकरत् ॥ ३४ ॥ श्रीमत्सुव्रततीर्थेशप्रतिमामतिसुन्दराम् । विनिर्माप्य प्रतिष्ठाप्यातिष्ठिपत्तत्र भूविभुः ॥ ३५ ॥ तच्चैत्यदर्शनादेव सुलभं शुभदर्शनम् । जनानामजनिष्टात्र सुधाशुद्धाञ्जनादिव ॥ ३६ ॥ तस्मिन्नेव भवे भूपो धर्ममाराध्य चार्हतम् । शुक्लध्यानाग्निना दग्धकर्मा शर्माप शाश्वतम् ॥ ३७ ॥ भृगुकच्छे तदद्यापि तीर्थं जनमनोहरम् । श्रीकीर्तिपालभूपालकीर्तिं कीर्तयति क्षितौ ॥ ३८ ॥ एवं बुधा निजां लक्ष्मीं तीर्थनिर्माणहेतुभिः । कुर्वन्तु सफलां यद्वत् सा स्यादक्षयसौख्यदा ॥ ३९ ॥

॥ इति तुरङ्गमबोधचैत्यकथा ॥

अथ भूयोऽपि चैत्यविधानविशेषमाहात्म्यमाह—

वित्तं स्थिरं सुकृतकीर्तिकरं च बाहुबल्यादिवद्विविधतीर्थनिवेशकानाम् ।
केतूद्भसद्भरतपुण्ययशोऽर्थवादमष्टापदं क इव नानमदद्य यावत् ॥ ६० ॥

व्याख्या—विविधतीर्थनिवेशकानां नानातीर्थस्थापकानां पुंसां वित्तं द्रव्यं स्थिरं नित्यं जन्मान्तरानुगामि सुकृतकी-

र्तिकरं पुण्ययशःकारकं च स्यात्। किंवत्? बाहुबल्यादिवत् बाहुबलिप्रमुखजनवत्। तद्यथा—अद्य यावत् अद्यापि क श्व कः पुमान् अष्टापदं तीर्थं न अनमत्? अपि तु सर्वोऽपि जनोऽनमदेव ननाम एव। किंरूपमष्टापदं? केतूच्छ्रसञ्ज्ञरतपुण्ययशोऽर्थवादं केतुञ्जिरुच्छ्रसन् प्रकटीञ्जवन् ञ्जरतस्य चक्रिणः पुण्ययशसोरर्थवादः प्रशंसनं यत्र स तथा तं। इति वृत्ताक्षरार्थः। ञ्जावार्थस्तु कथाद्वयेनोच्यते। तत्र बाहुबलिकथा पूर्वमभिधीयते—

(बाहुबलिकथा)

पुर्यां तक्षशिलाख्यायां लक्षलक्षणलक्ष्मणि। ञ्जूपो बाहुबलिर्बाहुबलोन्मूलितशात्रवः ॥ १ ॥ अन्यदा बहिरुद्याने ञ्जग्मस्थः प्रथमो जिनः। विहरन् ञ्जूतले सायं तत्र प्रतिमया स्थितः ॥ २ ॥ आरामिकस्तदा बाहुबलिं गत्वा व्यजिज्ञपत्। विहरन्निह प्राप्तोऽस्ति मुख्योऽर्हन् ञ्जूप पूर्वहिः ॥ ३ ॥ ततस्तुष्टेन ञ्जूनर्त्रा प्रेत्ता[2] सर्वाऽप्यलङ्कृतिः। विहाय चामरञ्छत्रे तस्मै सुस्मेरचक्षुषा ॥ ४ ॥ दध्यौ बाहुबलिस्तत्र देशे विहरताऽनिशम्। तातेन ञ्जरतस्यर्द्धिर्बह्वी दृष्टा ञ्जविष्यति ॥ ५ ॥ तातस्तदद्यैवायातस्तस्यां मम नमस्यतः। कथमीक्षिष्यते राज्यरमामतिमनोरमाम् ॥ ६ ॥ ततः प्रातः प्रणंस्यामि सर्वर्ध्या त्रिजगत्प्रभुम्। तातोऽपि मामकीनां तद्ऋमामीक्षिष्यतेऽखिलाम् ॥ ७ ॥ आकार्य सचिवान् बाहुबली स्वीयामसज्ञयत्। चतुरङ्गचमूं चार्वीं चमूमिव विभौजसः[3] ॥ ८ ॥ निशायां चिन्तयामास नृपः प्रातरहं प्रभुम्। वन्दिष्ये सकलर्ध्योच्चैर्धर्मं श्रोष्यामि चार्हतम् ॥ ९ ॥ विज्ञावर्या विज्ञातिक्यां ञ्जावयन्निति ञ्जावनाम्। परमर्ध्या ययौ बाह्यवने नन्तुं जिनं

१ लक्षाणां लक्षणानां ञ्जाग्यवतां लक्ष्म चिह्नं यस्यां तस्याम्. २ दत्ता. ३ इन्द्रस्य. ४ विज्ञातायाम्.

नृपः ॥ १० ॥ तावत्प्रति प्रतीचीं स प्रतस्थे काननाज्जिनः । प्रतिबन्धो ऽभवेत् क्वाप्यर्हतां विहरतां न हि ॥ ११ ॥ अपश्यन् काश्यपीस्वामी स्वामिनं सर्वतो वनम् । विश्वं विश्वमपि प्रोच्चैः शून्यं मेने महामनाः ॥ १२ ॥ जिनादर्शनदुःखार्तोऽरोदीत्तद्दिङ्मुखो नृपः । चमूस्तमनुचक्रन्द प्रोच्चैस्तद्दुःखदुःखिता ॥ १३ ॥ तद्रोदनारवैः शब्दाद्वैतं जज्ञे च काननम् । प्रतिशब्दमिषात् क्रन्ददिवार्हद्विप्रयोगतः ॥ १४ ॥ बाष्पप्रवाहधाराभिः स सिषेच वनावनिम् । स्नपयन्निव वर्त्मस्थां जैनेन्द्रीं पदपद्धतिम् ॥ १५ ॥ दुःखार्दितोऽकिरद्भात्यां लुठन् धात्रीपुरन्दरः । शिरःस्रजो जिनेन्द्रस्य पादाब्जौ पूजयन्निव ॥ १६ ॥ मन्त्रिणोऽथ जगुः स्वामिन् स्वामी स सममानसः । प्रतिबन्धं न हि क्वापि कुरुते करुणाकरः ॥ १७ ॥ अर्हति विहृतेऽप्यत्र रत्नपीठं विधापय । प्रासादालङ्कृतं स्वामिपादपद्मद्वयान्वितम् ॥ १८ ॥ दर्शं दर्शं च तद्रत्नपीठं साक्षादिव प्रभुम् । स्मारं स्मारं धराधीश समाराधय सर्वदा ॥ १९ ॥ ततो बाहुबली रत्नपीठं तत्र व्यधापयत् । तथा कुर्वंश्च जन्म स्वं पवित्रीचकृवाँश्चिरम् ॥ २० ॥ ततस्तदन्वयेऽभूवन् परोक्षद्दाः क्ष्माभुजः । आरराधुश्च पीठस्थं प्रभोस्तत्पादयामलम् ॥ २१ ॥ श्रीमद्बाहुबलेः कीर्तिप्रशस्तिरिव तद्बभौ । रत्नपीठं स्फुरद्रत्नद्युतिद्योतितदिङ्मुखम् ॥ २२ ॥ दुःषमारकसम्भार्चिर्ज्वलज्ज्वालाकरालिते । लोकेऽत्र क्रमतो म्लेच्छबाहुल्यमभवत्ततः ॥ २३ ॥ तत्तीर्थमाश्रितं म्लेच्छै राहुणेवेन्दुमण्डलम् । ततो हुजेति नाम्ना तन्म्लेच्छतीर्थमजायत ॥ २४ ॥ इति कीर्तिकरं मत्वा तीर्थकारयितुर्धनम् । भव्या वपन्तु तत्तीर्थे शिवत्रिदिवकाङ्क्षिणः ॥ २५ ॥

॥ इति बाहुबलिकथा ॥

---

१ पृथ्वीपतिः.

अथ श्रीभरतकारिताष्टापदकथा—

श्रीयुगादिजिनाधीशः पूर्वलक्षश्रितव्रतः । सहिव्यकेवलज्ञानोऽष्टापदाद्रौ ययौ शिवम् ॥ १ ॥ सुराः संभूय भूयांसो व्यधुः स्वाम्यौर्ध्वदेहिकम् । यथाविधि ततोऽगच्छन् स्वं स्वं धाम समाहिताः ॥ २ ॥ तत्राथ भरतः स्वामिभक्तिगृह्यो महीपतिः । स्वामिनिर्वाणसंस्थाने गव्यूतत्रितयोच्छ्रितम् ॥ ३ ॥ वर्धक्यभिधरत्नेन कृतं रत्नमयं वरम् । चतुर्द्वारं शुभाकारं योजनाययमद्भुतम् ॥ ४ ॥ श्रीमन्नन्दीश्वरद्वीपसत्प्रासादानुकारिणम् । प्रासादं श्रीपदं सिंहनिषद्याख्यमचीकरत् ॥ ५ ॥ त्रिभिर्विशेषकम् ॥ स्वस्ववर्णप्रमाणाभ्यां गुर्वीस्तत्र मनोहराः । प्रतिमाः स्थापयामास चतुर्विंशतिमर्हताम् ॥ ६ ॥ सौवर्ण-दण्डकलशालङ्कृतोऽसौ ध्वजाञ्चलैः । चलद्भिर्भारतीं कीर्तिं कीर्तयन्निव सर्वतः ॥ ७ ॥ प्रासादे तत्र श्रीरुषा स्वकीया भरतेन या । ध्वजाव्याजेन सा मन्ये संप्रत्यङ्कुरिता बभौ ॥ ८ ॥ इति प्रासादभूम्युद्धां स्थिरां कीर्तिकरीं श्रियम् । मत्वा भव्यैर्निजा पद्मा संस्थाप्या तीर्थभूमिषु ॥ ९ ॥

॥ इति श्रीभरतकारिताष्टापदकथा ॥

व्याख्यातमिदमेकोनत्रिंशं चैत्यद्वारं ॥ अथ तृतीयक्षेत्रोपदेशमाह—

ज्ञानं जगत्त्रयहितं पुनरप्यधीते, क्षोऽप्यार्यरक्षित इवेतरशास्त्रपाठैः ।
ये स्वर्णधीकनककाचकृतादरास्ते, हेमैव सत्यमधिगत्य किमु त्यजन्ति ॥ ६१ ॥

व्याख्या—इतरशास्त्रपाठैः अन्यशास्त्रपठनैः कृत्वा क्षोऽपि विद्वानपि पुनरपि भूयोऽपि ज्ञानं श्रुतज्ञानं अधीते

पठति । नन्वपरशास्त्रपाठैश्चेत् ज्ञानवान् जज्ञे पुमान् तर्हि ज्ञानं पुनः किमित्यधीते प्रयोजनाभावात् इत्याशङ्कां विशेषणद्वाराऽधरीकरोति—किंरूपं ज्ञानं ? जगत्त्रयहितं त्रिभुवनहितकारकं, लोकद्वयेऽपि हितकारकत्वात् । क इव ? आर्यरक्षित इव । भूयोऽपि पूर्वाशङ्कां लौकिकसम्बन्धेन निरस्यति—ये पुरुषाः स्वर्णधीकनककाचकृतादराः स्वर्णधिया हेमबुध्या कनककाचे स्वर्णवत्पीते काचे कृतादरा विहितादरा भवन्ति ते नराः सत्यं समीचीनं हेमैव स्वर्णमेवाधिगत्य प्राप्य किमु कथं त्यजन्ति ? अपि तु न त्यजन्ति । तथा यस्त्वन्यशास्त्रपाठैर्ज्ञः स्यात् स ज्ञानं श्रुताख्यमासाद्य कथं त्यजतीति वृत्ताक्षरार्थः । कथा चेयम्—

श्रीमदार्यरक्षितसूरिकथा—

आसीद्दासीकृतस्वर्गपुरी माहेश्वरी पुरी । सोमदेवाभिधस्तत्र ब्राह्मणो ब्राह्मणाग्रणीः ॥ १ ॥ फल्गुमित्राभिधा तस्य प्रेयसी श्रेयसीतरा । जज्ञे यन्मानसं जैनी नाज्ञा हंसीव मुञ्चति ॥ २ ॥ आर्यरक्षित इत्यासीत्तनयः सनयस्तयोः । यो विद्याव्यसनी सौवांस्तत्याज विषयान् द्विधा[1] ॥ ३ ॥ ततो देशान्तरे गत्वा विद्या आदाय लौकिकीः । चतुर्दशापि स्वपुरेऽथाजगामार्यरक्षितः ॥ ४ ॥ आसातां पितरौ तस्य लोकोऽपि मुदितोऽखिलः । तदागमनपीयूषमयूखोदयतोषितः ॥ ५ ॥ पितृव्यां विस्तरेणोच्चैस्तत्प्रवेशमहो महान् । चक्रे लोकोऽपि निःस्तोकस्तं वर्धयितुमागतः ॥ ६ ॥ मुदितां जैनतां[2] सोऽथालिङ्ग्य विसृज्य च क्रमात् । भूतलाश्लिष्टभालः स्वां मातरं प्राणमन्मुदा ॥ ७ ॥ तां म्लानवदनां वीक्ष्य बभाषे चाम्ब किं मयि । विश्व

१ स्वस्येमे सौवास्तान्. २ देशान् इन्द्रियार्थांश्चेति द्विधा विषयान्. ३ जनसमूहम्.

प्रीतिप्रदेऽधीत्यायाते त्वं मलिनानना ॥ ८ ॥ साऽवादीद्दृष्टिवादश्चेत्त्वयाऽधीतो ऽवेत्सुत । तत्त्वां वीक्ष्य समायातं प्रीतिः स्फीतिमियर्ति मे ॥ ९ ॥ स दध्यौ यदि मे तेन प्रीता पाठेन न प्रसूः । निस्तोकलोकसंतोषकारिणापि कृतं ततः ॥ १० ॥ पठाम्यद्यापि तत्किञ्चिद्येनाम्बा हर्षमिष्यति । तोषितायां यदम्बायां तोषिता स्याज्जगत्त्रयी ॥ ११ ॥ इत्याख्यन्मातरं मातः कः पाठयति तं वद । साऽऽख्यत्तत्पाठकोऽत्रास्ति सूरिस्त्वन्मातुलो वने ॥ १२ ॥ सोऽथ तम्यां विज्ञातिक्यां मातुः सन्तोषहेतवे । आलयान्निर्ययौ दृष्टिवादस्याधिजिगांसया ॥ १३ ॥ वनाय गच्छतस्तस्य मिलनोत्कण्ठितः सुहृद् । इक्षुदण्डान्नवादाय सार्धानन्निमुखोऽजनि ॥ १४ ॥ स्नेहादालिङ्ग्य तेनासौ स्वगृहे प्रेषितस्ततः । गत्वा तदालये तास्तन्मात्रेऽदादिक्षुयष्टिकाः ॥ १५ ॥ दध्यौ तदम्बा चानेन निमित्तेन ममात्मजः । अधीती ऽविता सार्धनवपूर्व्यामपूर्वधीः ॥ १६ ॥ सोऽप्युद्याने गतः श्राद्धढङ्करानुपदं गुरून् । वन्दित्वा स्माह मां दृष्टिवादं पाठयत द्रुतम् ॥ १७ ॥ सूरयोऽथ जगुर्वत्स दीक्षिता एव साधवः । श्रीदृष्टिवादमध्येतुमर्हन्ति गृहिणो न हि ॥ १८ ॥ सोऽवग्मेऽपि ततो दीक्षां दत्त्वा किं पाठ्यते न सः । दीक्षितः शिक्षितश्चार्षमाचारं सूरिभिः स तु ॥ १९ ॥ साक्षिमात्रं गुरुं कृत्वा स्तोकैरेव स वासरैः । पूर्वाधीतमिवापैकादशाङ्गीं महामनाः ॥ २० ॥ किञ्चित्पूर्वगतं तं चाध्याप्य ते गुरवो जगुः । अतः परं न चास्मासु पूर्वपाठोऽस्ति कश्चन ॥ २१ ॥ तद्वत्स त्वरितं गच्छ श्रीवैरस्वामिनोऽन्तिके । यथेच्छं तत्र कुर्याश्च पूर्वपाठमशाठ्यधीः ॥ २२ ॥ इति गुर्वाज्ञया सोऽथ गत्वा श्रीवैरसन्निधौ । अधीत्य नव पूर्वाणि किञ्चिदशममध्यगात् ॥ २३ ॥ सोऽथोद्विग्नो जगौ सूरिमद्यापि

१ इष गतौ दिवादिः.

कियदस्त्यदः । सोऽन्यधाधारिधेर्बिन्दुरेको लेख्ने त्वया मुने ॥ २४ ॥ इति ज्ञप्तोद्यमो बाढं जज्ञेऽनुज्ञाप्य तं गुरुम् । स्वज्ञातृफल्गुरक्षिताग्रहाद्गुर्वन्तिके त्वगात् ॥ २५ ॥ ततः प्रमुदितैः सूरिवरैस्तैः स्वपदे मुनिः । श्रीआर्यरक्षितश्चक्रेऽध्यक्षपक्षद्वयामलः ॥ २६ ॥ विहरन्तो धरापीठे आर्यरक्षितसूरयः । कस्य नैव तमोनाशं चक्रुः सूर्यकरा इव ॥ २७ ॥ माता तथा पिता फल्गुरक्षिताद्योऽखिलो जनः । स्वकः प्रव्राज्य तेनाथ प्रापितो गतिमुत्तमाम् ॥ २८ ॥ आर्यरक्षितसूरीन्द्राः प्रज्ञाव्याहन्मतं चिरम् । समाधिनाऽन्तमासाद्य तृतीयां दिवमासदन् ॥ २९ ॥ एवं यत्नो विधातव्यः श्रुतज्ञक्तौ बुधैरपि । यतः संजायते प्रोच्चैर्ज्ञानलक्ष्मीः सनातना ॥ ३० ॥

॥ इति श्रीमदार्यरक्षितसूरिकथा ॥

ज्ञयोऽपि विशेषतः श्रुतज्ञक्तिमाह—

पठ पठति यतस्वान्नादिना लेखय स्वैः, स्मर वितर च साधो ज्ञानमेतद्धि तत्त्वम् ।
श्रुतलवमपि पुत्रे पश्य शय्यंभवोऽदात्, जगति हि न सुधायाः पानतः पेयमन्यत् ॥ ६२ ॥

व्याख्या—हे साधो मुने सत्पुरुष वा ज्ञानं श्रुताख्यं पठ अधीष्व । ज्ञानं पठति ज्ञणति सति मुन्यादिके पुरुषेऽन्नादिनाऽऽहारवस्त्रादिदानेन कृत्वा यतस्व यत्नं कुरुष्व । तथा स्वैर्द्रव्यैः कृत्वा ज्ञानं लेखय लेखनं कारय । यदुक्तम्—

"लेखयन्ति नरा धन्या ये जैनागमपुस्तकम् । ते सर्वं वाङ्मयं ज्ञात्वा सिद्धिं यान्ति न संशयः ॥ १ ॥"

तथा स्मर ज्ञानं चिन्तय । च पुनर्वितर अन्यस्मै देहि ज्ञानं पाठयेत्यर्थः । हि यस्मात्कारणात् । एतज्ज्ञानं तत्त्वं सारं

ज्ञवघयोपकारित्वात् । अर्थान्तरन्यासद्वारा दृष्टान्तमाह—हे साधो पश्य विलोकय शय्यंज्ञवः पुत्रे मनकनाम्नि श्रुतज्ञ-
वमपि सिद्धान्तलेशमात्रं दशवैकालिकरूपं अदात् ददौ । ननु दानपात्रे चतुर्थी षष्ठी वा क्वापि दृश्यते, अत्र सप्तमी
कथं ? विवक्षातः कारकाणीति नियमात् पुत्रे इत्यत्र सप्तम्यप्यदुष्टैवेति । यत्पुत्राय श्रुतज्ञवं ददौ तदुचितं । हि यस्मा-
त्कारणात् । जगति विश्वे सुधायाः पानतः पेयं पानयोग्यं अन्यन्नास्तीति तथा श्रुतज्ञवतुल्यं अन्यन्नास्तीति वृत्ताक्षरार्थः ।
कथा तु पूर्वं श्रीशय्यंज्ञवचरित्रे कथितत्वादिह नोच्यते ॥

व्याख्यातमिदं त्रिंशत्तमं श्रुतज्ञानोपदेशद्वारं । अथोद्देशानुसारेण क्षेत्रचतुष्टयरूपं श्रीसङ्घवर्णनं निरूपयति—

लोकेऽन्यो नृपतिस्ततोऽपि हि वरश्चक्री ततो वासवः,सर्वेभ्योऽपि जिनेश्वरः समधिको विश्वत्रयीनायकः ।
सोऽपि ज्ञानमहोदधिः प्रतिदिनं सङ्घं नमस्यत्यहो, वैरस्वामिवदुन्नतिं नयति तं यः स प्रशस्यः क्षितौ॥६३॥

व्याख्या—लोकेऽन्यो नृपती राजा वरः प्रधानः । ततोऽपि नृपतेरपि हि निश्चितं चक्री चक्रवर्ती वरः । ततश्चक्रिणो
वासवः शक्रो वरः । तथा सर्वेभ्योऽपि नृपतिचक्रिवासवेभ्योऽपि जिनेश्वरोऽर्हन् वरः समधिक उत्कृष्टः । समधिकत्वे
विशेषणद्वारा हेतुमाह—विश्वत्रयीनायकः त्रैलोक्यस्वामी सुरासुरनरेश्वरनिकरसेव्यत्वात् । अहो इत्याश्चर्ये । सोऽपि
जिनेश्वरोऽपि ज्ञानमहोदधिः ज्ञानसमुद्रः सन् श्रीसङ्घं नमस्यति नमस्करोति । तथा यः पुमान् तं सङ्घं उन्नतिं उत्कृष्टत्वं
नयति प्रापयति स नरः क्षितौ पृथिव्यां प्रशस्यः श्लाघ्यः । किंवत् ? वैरस्वामिवत् श्रीवज्रस्वामिसूरिवदिति, यथा वैर-

स्वामी दुष्कालाकुलदेशात्स्वपटीमध्यारोप्य सुकालसंकुलविषयं श्रीसङ्घं नीत्वा तत्र बौद्धादिकुमतवासितजनपुरतो जिनालयमहिमानं देवताभिः कारयित्वा परामुन्नतिमनैषीदिति वृत्ताक्षरार्थः। कथा प्राक्ग्रथितत्वादिह न कथ्यते ॥

अथ सङ्घस्य विशेषमहिमानमाविर्भावयति—

कोऽप्यन्यो महिमाऽस्त्यहो भगवतः सङ्घस्य यस्य स्फुरत्कायोत्सर्गबलेन शासनसुरी सीमन्धरस्वामिनम्।
नीत्वा तत्कृतदोषशुद्धिमुदितां यक्षार्यिकां चानयत्, किं चैतन्ननु तत्प्रभावविभवैस्तीर्थङ्करत्वं भवेत्॥६४॥

व्याख्या—भगवत ऐश्वर्यादिसामग्र्या युक्तस्य श्रीसङ्घस्य कोऽप्यपूर्वोऽन्योऽन्येष्वविद्यमानो महिमा प्रभावः। अहो इत्याश्चर्ये। अस्ति विद्यते। तमेव महिमानमाह—यस्य श्रीसङ्घस्य स्फुरत्कायोत्सर्गबलेन विलसत्कायोत्सर्गस्य महिम्ना कृत्वा शासनसुरी शासनदेवता यक्षार्यिकां श्रीस्थूलभद्रभगिनीं श्रीसीमन्धरस्वामिनं नीत्वा तत्कृतदोषशुद्धिमुदितां तया यक्षार्यिकया कृतो निर्मितो योऽसौ दोषो लघुभ्रातृसिरीयकस्य पर्युषणापर्वणि कारितोपवासवशेन सञ्जातविपत्तिलक्षणस्तस्य शुद्धिर्निर्मलीभावस्तया मुदितां प्रीतां सतीं। च पुनर्यक्षार्यिकामानयत् इह क्षेत्रे आनिनाय। तथा नन्विति वितर्के च पुनरेतत्सङ्घमहिमदर्शनं किं? स्तोकमित्यर्थः, यतस्तत्प्रभावविभवैः श्रीसङ्घमाहात्म्यरूपविभवैः कृत्वा तीर्थङ्करत्वं अर्हत्त्वं भवेत्, तस्या इति सम्बन्धाद्भम्यत इति वृत्ताक्षरार्थः। कथा तु श्रीस्थूलभद्रचरित्रसम्बद्धत्वादग्रे श्रीस्थूलभद्रचरित्रे कथयिष्यते ॥

उक्तमेकत्रिंशत्तमं श्रीसङ्घवर्णनद्वारं । सङ्घोऽपि हि साधुसाध्वीश्रावकश्राविकाभेदाच्चतुर्विधः । तत्राद्यं साधुद्वारं विशेषतो विवृणोति—

भवति हि भवपारः शुद्धया साधुभक्त्या, धनगृहपतिजीवानन्दवैद्येशवत्प्राक् ।
पृथुरपि हि पयोधिस्तीर्यते चारुतर्या, तिमिरभरभृतोऽध्वा दीप्रया दीपयष्ट्या ॥ ६५ ॥

व्याख्या—हि निश्चितं शुद्धया निर्मलया साधोर्मुनेर्भक्त्या कृत्वा भवपारः संसारपारो भवति । किंवत् ? प्राक् पुरा धनगृहपतिजीवानन्दवैद्येशवत् यथा धननामा गृहपतिः श्रेष्ठी जीवानन्दनामा च वैद्येशो वैद्याधिराजस्तयोरिव तद्वदिति । ननु लघ्व्या साधुभक्त्या महान् भवसमुद्रः कथं तीर्यत इत्याशङ्क्यां दृष्टान्तान्त्यां निराचष्टे—हि यस्मात्कारणात् पृथुरपि विस्तीर्णोऽपि पयोधिः समुद्रश्चारुतर्या सज्जनावा तीर्यते । तथा तिमिरभरभृतोऽध्वा तिमिरसमूहव्याप्तो मार्गो दीपयष्ट्या प्रदीपलतया तीर्यते । इति वृत्ताक्षरार्थः । भावार्थः कथयोच्यते—

धनगृहपतिजीवानन्दवैद्यकथा—

द्वीपेऽत्र प्रथमे प्रत्यग्विदेहावनिमण्डनम् । क्षितिप्रतिष्ठितं नाम पुरं सुरपुरोपमम् ॥ १ ॥ तत्र भूपः प्रसन्नेन्दुः प्रसन्नो न्यायचारिणाम् । सार्थवाहो धनश्चासीत्संपदामेकमास्पदम् ॥ २ ॥ सोऽन्येद्युः प्रस्थितः सार्थयुग्वसन्तपुरं प्रति । धर्मघोषगुरुस्तस्य सार्थे प्रास्थित सन्मुनिः ॥ ३ ॥ अन्तरा दुस्तरस्तस्य सार्थस्याभूद्घनागमः । तमत्येतुं वने तत्र जनास्तस्थुः

कृतोटजाः ॥ ४ ॥ उटजोपाश्रये माणिभद्रदत्ते गुरुः स्थितः । वर्षाभूयस्त्वतः सार्थजनोऽजनि विशम्बलः ॥ ५ ॥ सार्थलोकास्ततश्चाहुः कन्दमूलफलादिकम् । तेपिरे तदगृह्णन्तो गुर्वन्तेवासिनस्तपः ॥ ६ ॥ तदा जातानुकम्पेन सार्थवाहेन साधवः । निमन्त्र्य स्वगृहे स्थानसर्पिषा प्रतिलाभिताः ॥ ७ ॥ धर्मघोषगुरोर्धर्मं श्रुत्वा च गृहमेधिनाम् । धनोऽङ्गीकृत्य वर्षान्ते वसन्तपुरमासदत् ॥ ८ ॥ तत्र विक्रीतभाण्डोऽथ क्रमेण स्वगृहागतः । विपद्योत्तरकुरुष्वुत्पेदे युग्मितया धनः ॥ ९ ॥ कालं कृत्वा ततो जज्ञे सौधर्मे निर्जरो वरः । च्युत्वा ततो विदेहेषु पुरे गन्धसमृद्धके ॥ १० ॥ भार्यायां चन्द्रकान्तायां राज्ञः शतबलस्य च । महाबल इति ख्यातो बभूव तनयो नयी ॥ ११ ॥ युग्मम् ॥ गुणैश्च वयसा वर्धमानोऽयं प्राप्तयौवनः । स कन्यां विनयवतीं पितृभ्यां परिणायितः ॥ १२ ॥ राज्यं महाबले न्यस्यान्वर्थं शतबलोऽव्रजे । प्राग्वत्स नियमस्थित्या परलोकमसाधयत् ॥ १३ ॥ क्षमां महाबलक्ष्मापो नयेन परिपालयन् । पुमर्थान् परमां वृद्धिं चतुरश्चतुरोऽनयत् ॥ १४ ॥ तारुण्यातिक्रमे मन्त्रिस्वयंबुद्धेन बोधितः । महाबलक्षमापालः परं वैराग्यमागमत् ॥ १५ ॥ राज्यं न्यस्य सुते मन्त्रियुतः श्रामण्यमाश्रितः । स कृतानशनः प्राप कालधर्मं समाहितः ॥ १६ ॥ ईशानकल्पगो देवो ललिताङ्गाभिधोऽभवत् । देवी स्वयंप्रभा प्राणप्रिया प्रियतमाकृतिः ॥ १७ ॥ भोगान् भुङ्क्त्वा समं तेन बहुकालं स्वयंप्रभा । च्युता ततो ललिताङ्गस्तद्वियोगेन दुःखितः ॥ १८ ॥ अश्रान्तं विलपन् पश्यन् विश्वं विश्वं च तन्मयम् । भूतार्त्तवत् परिभ्राम्यन् प्राप क्वापि रतिं न हि ॥ १९ ॥ अथ मन्त्री स्वयंबुद्धः सुचिरं पालितव्रतः । ईशाने दृढधर्माख्योऽभूद्विपद्य सुरो-

१ पाथेयरहितः.

त्तमः ॥ २० ॥ तेनागत्य तथावस्थो ललिताङ्गोऽथ बोधितः । जगाद मित्र मन्नार्या क्वोत्पन्नास्तीति वेत्सि किम् ॥ २१ ॥ ततः सोऽवधिना बुध्ध्वा तत्प्रियोदन्तमित्यवक् । द्वीपेऽस्ति धातकीखण्डे नन्दिग्रामो विदेहगः ॥ २२ ॥ तत्र नागिलनाम्नोऽभूत्सुता नागश्रियोऽङ्गजा । षण्णामुपरि कन्यानां त्वत्प्रिया साऽतिदुःखिता ॥ २३ ॥ तनयाजन्मनोद्विग्नपितृभ्यां नाम नो ददे । निर्नामिकेत्यतो लोकैः स्वयं नाम्नाऽन्यधीयत ॥ २४ ॥ क्रमेण वर्धमाना सा मूर्त्तेवाग्राग्यभूमिका । प्राप्य यौवनमन्येद्यू रुष्टा मात्रापमानिता ॥ २५ ॥ वने गताऽथ सा वीक्ष्य युगन्धरमहामुनिम् । प्रणम्य च ततः श्रुत्वा धर्मं लेभे जिनोदितम् ॥ २६ ॥ अथास्ते भवनिर्विण्णा सा कृतानशनाऽधुना । तद्गच्छ दर्शयास्याः स्वं यत्स्यात्सा ते मृता प्रिया ॥ २७ ॥ ललितोऽपि तथा चक्रे साऽपि तद्रागिणी मृता । प्राग्वत्स्वयंप्रभा देवी तस्यैवाजनि वल्लभा ॥ २८ ॥ तया समं रममाणो बहुकालं कलामिव । नीत्वाऽन्यदा व्रजन्नन्दीश्वरेऽच्योष्ट पथि क्रमात् ॥ २९ ॥ द्वीपेऽत्र प्राग्विदेहेषु लोहार्गलपुरेशितुः । सुतः सुवर्णजङ्घस्य वज्रजङ्घेत्यजायत ॥ ३० ॥ च्युता स्वयंप्रभा पुण्करीकिण्यां पुर्यभूत्सुता । चक्रिणो वज्रसेनस्य श्रीमती सान्वयाह्वया ॥ ३१ ॥ प्राच्यप्रेमानुबन्धेन तारुण्यं प्राप्तयोस्तयोः । महेन महताऽकारि पितृभ्यां पाणिपीडनम् ॥ ३२ ॥ न्यस्य राज्ये वज्रजङ्घं प्राव्राजीत्स्वर्णजङ्घराट् । स राज्यं पालयन्नीत्या कालं निन्ये सुखं घनम् ॥ ३३ ॥ सुतेन राज्यलोभेन मृतौ दत्तविषाविमौ । दम्पती उत्तरकुरुष्वभूतां युग्मरूपिणौ ॥ ३४ ॥ सुखमायुःक्षये जातौ सौधर्मे स्नेहलौ सुरौ । ततश्च्युतो वज्रजङ्घजीवः पीवरपुण्यभाक् ॥ ३५ ॥ द्वीपेऽत्रैव विदेहेषु पुरे क्षितिप्रतिष्ठिते । सुतः सुविधिवैद्यस्याभूज्जीवानन्दनामतः ॥ ३६ ॥ पुरे तत्रैव भूभर्तुः पुत्रो नाम्ना महीधरः । सुबुद्धिरिति सान्वर्थः सचिवस्याङ्गजोऽभ-

वत् ॥ ३७ ॥ सार्थेशसागरस्यासीत् पूर्णभद्राख्यया सुतः । धनस्य श्रेष्ठिनः पुत्रस्तुर्यो नाम्ना गुणाकरः ॥ ३८ ॥ इतश्च नगरेऽत्रैव श्रीमत्यात्मा दिवश्च्युतः । श्रेष्ठिनश्चेश्वरस्याभूत् केशवाभिधयात्मजः ॥३९॥ जीवानन्दप्रमुखाणां तेषां षण्णां परस्परम् । वाचामगोचरं चारु सौहृदं समपद्यत ॥ ४० ॥ तिष्ठन्तस्तेऽन्यदाऽऽक्रुर्जीवानन्दस्य सद्मनि । साधुं भिक्षार्थमायातं कृमिकुष्ठाकुलाङ्गकम् ॥ ४१ ॥ मिथो जगुर्वयं पापा यदस्मिन्निःस्पृहे मुनौ । न वैयावृत्त्यधीर्नोऽस्ति तत्किं जन्मधनादिभिः ॥ ४२ ॥ गोशीर्षचन्दनं रत्नकम्बलं लक्षपाककम् । तैलं चादाय ते जग्मुर्वने तन्मुनिसन्निधौ ॥ ४३ ॥ अनुज्ञाप्य मुनिं तेऽथानीय गोमृतकं नवम् । तेन तैलेन प्रत्यङ्गमन्यङ्गं चक्रिरे मुनेः ॥ ४४ ॥ मुनिमाच्छादयन् रत्नकम्बलेनाथ ते ततः । तत्तैलेनोष्णवीर्येणाकुलास्तत्कृमयोऽभवन् ॥ ४५ ॥ देहान्निर्गत्य शीतत्वात्संलीना रत्नकम्बले । मन्दमन्दोल्लयन्तस्तं तान् कृमीन् गोशवोपरि ॥ ४६ ॥ तेऽपातयन् क्रमादेवं तं मुनिं नीरुजं व्यधुः । गोशीर्षचन्दनेनाङ्गव्रणसंरोहणं तथा ॥ ४७ ॥ युग्मम् ॥ तैः पटुर्विहितः साधुर्विजहार क्षमातले । स्वं धन्यं मन्यमानास्ते जग्मुर्निजनिजास्पदम् ॥ ४८ ॥ क्रमाविर्भूतवैराग्याः षण्णपि प्राप्तसंयमाः । समाधिना विपन्नास्तेऽभूवन् कल्पेऽच्युते सुराः ॥ ४९ ॥ विजये पुष्कलावत्यां विदेहेषु ततश्च्युताः । नगर्यां पुण्डरीकिण्यां वज्रसेनस्य भूपतेः ॥ ५० ॥ धारिण्यां तनया राज्ञ्यां तेषु पञ्चाभवन् क्रमात् । केशवात्मा त्वभूत्तत्र सुयशा राजपुत्रकः ॥ ५१ ॥ युग्मम् ॥ तेष्वाद्यो वैद्यजीवोऽभूद्वज्रनाभेति चक्रभृत् । जीवोऽथ राजपुत्रस्य द्वितीयो बाहुनामतः ॥ ५२ ॥ सुबाहुरित्यभून्मन्त्रिपुत्रजीवस्तृतीयकः । जीवौ पीठमहापीठौ श्रेष्ठिसार्थेशपुत्रयोः ॥ ५३ ॥ सुयशा वज्रनाभस्याबाह्याजज्ञे च सारथिः । प्राग्जन्मस्नेहसम्बन्धात्तेषां प्रीतिरभूद्दृढा ॥ ५४ ॥ इतश्च वज्रसेनो

राड् वज्रनाज्ञे सुते निजम् । राज्यं न्यस्य व्रतादत्या तीर्थकृत्समजायत ॥ ५५ ॥ संसाध्य विजयं सर्वं वज्रनाज्ञोऽपि चक्रय-
ज्ञूत् । चतुर्ज्ञातृयुतोऽज्ञुङ्क्त सुखं तत्सारथिश्रितः ॥ ५६ ॥ पितुस्तीर्थकृतः पार्श्वे धर्मं श्रुत्वा सबान्धवः । ससारथिश्च प्रव्रज्य
सोऽगाज्ञीतार्थतां क्रमात् ॥ ५७ ॥ प्राप्ताचार्यपदो वज्रनाज्ञोऽर्हज्ञक्तिकादिज्ञिः । विंशत्या सेवितैः स्थानैस्तीर्थकृत्त्वमथार्ज-
यत् ॥ ५८ ॥ वैयावृत्त्यं सुसाधूनां कुर्वता बाहुनाऽपि च । चक्रित्वज्ञोगदं कर्मोपार्जितं स्वस्य सुन्दरम् ॥ ५९ ॥ विश्रा-
मणां मुनीन्ज्ञाणां कुर्वाणेन सुबाहुना । समर्जितं बाहुबलं चक्रज्ञृद्बलजित्वरम् ॥ ६० ॥ धन्यावहौ इमौ वैयावृत्त्यविश्रा-
मणारतौ । वज्रनाज्ञगुरुर्बाहुं सुबाहुं चेत्यवर्णयत् ॥ ६१ ॥ ततः पीठमहापीठाविति चेतसि दध्यतुः । कार्यकार्येव यो
लोके स प्रशस्य इहापि च ॥ ६२ ॥ अकार्यकारिणौ नौ कः स्वाध्यायध्यानतत्परौ । स्तौतीति मायाशल्येन स्त्रीत्वदं कर्म
तौ श्रितौ ॥ ६३ ॥ इत्याचीर्णव्रताः षट् तेऽन्ते कृतानशना मृताः । सर्वार्थसिद्धमासाद्य बज्रूवुरमरोत्तमाः ॥ ६४॥ ततश्च्युतो
वज्रनाज्ञोऽत्रैव मुख्यो जिनोऽजनि । चक्र्यज्ञूज्ञरतो बाहुः सुबाहुर्बाहुबल्यथ ॥ ६५ ॥ शल्यात्पीठमहापीठौ जातौ ब्राह्मी
च सुन्दरी । श्रेयांसः सुयशा जज्ञे मोहमापुश्च तज्ञ्वे ॥६६॥चरित्रशेषमग्रे कथयिष्यते । विस्तरस्तु श्रीनाज्ञेयचरित्राज्ज्ञेयः ।

॥ इति धनगृहपतिजीवानन्दकथानकम् ॥

पुनरप्यत्रैव द्वारे विशेषोपदेशमाह—

दानैः प्रासुकज्ञक्तपानवसनावासौषधानां मुनेर्वैयावृत्यकृतेश्च विस्मयकरा ज्ञोगा बलं चाप्यते ।
श्रीमद्बाहुसुबाहुवत्परज्ञवे सा कामगव्यप्यहो, सच्चारीजलदानकोमलकरस्पर्शैरलं तुष्यति ॥ ६६ ॥

व्याख्या—मुनेः साधोः प्रासुकञ्चक्तपानवसनावासौषधानां एषणीयाहारपानकवस्त्रवसत्यौषधानां दानैर्वितरणैः कृत्वा। च पुनर्मुनेर्वैयावृत्त्यकृतेर्वैयावृत्त्यकरणात् यथानुक्रमं विस्मयकरा आश्चर्यकृतो ञोगा बलं चाप्यते परञवेऽन्यजन्मनि। किंवत्? श्रीमद्बाहुसुबाहुवत् यथा श्रीमद्बाहुसुबाहुभ्यां ञक्तादिदानैर्वैयावृत्त्यकरणाच्च ञरतबाहुबलिञवे विस्मयकरा ञोगा बलं च प्रापिरे। अत्र अपीती संञावने, अहो इत्याश्चर्ये। सा प्रसिद्धा पूर्वोदिता वा साधुञक्तिः कामगवी कामधेनुः अञीप्सितार्थदातृत्वात् ञक्तादिदानवैयावृत्त्यक्रियामात्रसंतुष्टत्वाद्वा। कामगवीत्वं प्रकटयति—सच्चारीजलदानकोमलकरस्पर्शैः प्रधानचारिजलदानकोमलहस्तस्पर्शनैः कृत्वाऽलमतिशयेन यतस्तुष्यति संतुष्टा ञवतीति वृत्ताक्षरार्थः। कथा पूर्वमुक्तत्वादिह नोच्यते॥

उक्तं द्वात्रिंशत्तमं साधुद्वारं। इति चतुर्थं क्षेत्रं निरूपितं। अथ साध्वीञक्त्युपदेशरूपं पञ्चमं क्षेत्रं निरूपयति—

धर्मः पुंप्रञवो यदेतदिदमेवार्याऽपि पूज्या पुनर्यस्या धर्मसमुद्ञवो गुरुजनेष्वप्युन्नतिर्यत्पुरा।
सौनन्देयनृपेऽन्निकासुतगुरौ श्रीचन्दनायां न किं, ब्राह्मी पुष्पवतीसुता किल मृगावत्यप्यहून्मुक्तये॥६७॥

व्याख्या—धर्मः पुंप्रञवः पुरुषाद्युत्पन्नः "धम्मो पुरिसप्पञवो" इतिवचनात्। यत् एतत् एवं तत् इदमेव इत्थमेव सत्यमेवेत्यर्थः। पुनः परं आर्याऽपि महासत्यपि पूज्या पूजनीया ञवति। पूज्यत्वे कारणमाह—यद्यस्मात्कारणात् यस्या

---

१ दृष्टान्तमाह सा कामगव्यपि अलमतिशयेन तुष्यति हृष्टा ञवति कैः कृत्वा हृष्टा ञवतीत्याह। सच्चारीजलदानकोमलकरस्पर्शैः प्रधानतृणपानीयदानसुकोमलहस्तकणभूयनैः। एतैः प्रकारैः तुष्यति, इत्यन्य एवं टीकते.

आर्यायाः सकाशात् गुरुजनेष्वपि पुरा पूर्वं धर्मसमुन्नवो धर्मोत्पत्तिः पुण्योन्नवः उन्नतिरुदयः केवलप्राप्त्यादिरूपश्चाभू-दिति । ननु गुरूणां साध्वी धर्मोन्नवमुन्नतिं च कर्तुं कथं प्रन्नविष्णुरित्याशङ्कामपाकरोति निदर्शनैः—सौनन्देयनृपे श्रीबा-हुबलिनृपे तथाऽन्निकासुतनाम्नि गुरौ श्रीचन्दनायां प्रवर्तिन्यां च ब्राह्मी श्रीआदिजिनपुत्री पुष्पवतीसुता पुष्पचूला । किलेत्याप्तानुवादे । मृगावती चेटकन्नूपपुत्री यथानुक्रमं मुक्तये मुक्तिप्राप्त्यर्थं किं नाभूत् ? अपि तु स्यादेवेति वृत्ताद्ह-रार्थः । ब्राह्मीसाध्वीकथा बाहुबलिकथायामग्रे कथयिष्यत इति । अथेह पुष्पचूलासाध्वीसम्बन्धः कथ्यते—

पुष्पाणीव प्रफुल्लानि यत्र नन्नाणि नूस्पृशाम् । पुष्पन्नऊपुरं नाम्नाऽत एव नुवि विश्रुतम् ॥ १ ॥ पुष्पकेतुर्नृपस्तत्र पुंष्पास्त्र इव सुन्दरः । सदा वशी वशीन्नूतसुरासुरनरेश्वरः ॥ २ ॥ तस्य पुष्पवतीत्यासीद्दासीकृतसुराङ्गना । प्रेयसी श्रेयसी साद्दाऽऽती रतिपतेरिव ॥ ३ ॥ तयोर्नुञ्जानयोर्न्नोगानवियोगाननारतम् । न्नूयानपि व्यतीयाय कालो लव इव ध्रुवम् ॥४॥ बिन्नरामास सा देवी ततो गर्न्नं मनोरमम् । तत्प्रीतिव्रततेर्जाग्रदंकूरमिव शर्मदम् ॥ ५ ॥ राज्ञा संपूरितैः पुण्यदोहदैर्न्नऽ-सूचकैः । क्रमेण साधुशाखीव गर्न्नो वृद्धिं बन्नार सः ॥ ६ ॥ प्रासूत पुत्रपुत्रीति राज्ञी युग्मं मनोहरम् । नयश्रीरिव कीर्त्य-र्थयुग्मं तिग्मांशुन्नासुरम् ॥ ७ ॥ पुष्पचूलाख्यया पुत्रं पुष्पचूलेति पुत्रिकाम् । चकार न्नूपतिः प्रीतोऽतुन्नोत्सवपुरःसरम् ॥ ८ ॥ सार्धं हसद्भुदत्सार्धं सार्धं स्तन्यं पिबत्तथा । एकात्मवद्युगं तच्च सार्धं वृद्धिमुपागमत् ॥ ९ ॥ तयोः सोदरयोः स्नेहोऽद्वैतसंसक्तचेतसोः । अद्वैतवादवन्निन्नो तनुन्यवहृतिं विना ॥ १० ॥ शैशवातिक्रमे विद्यामध्येतुं मिथुनं च तत् ।

१ कामदेवः.

कलाचार्यान्तिके राज्ञा मुमुचे हितमिच्छता ॥ ११ ॥ सहैवाध्ययनात्ताभ्यां गृहीताः सकलाः कलाः । समानाध्यवसायानां स्यात् समो हि फलोदयः ॥ १२ ॥ तौ मिथः स्नेहिनौ बाढं तारुण्यश्रीरशिश्रियत् । चिरेणोत्कण्ठितेवाथ सुलभा श्रीः कलावताम् ॥ १३ ॥ मिथः प्रेमपरौ प्रेक्ष्य तदपत्यद्वयं नृपः । दध्यौ पाणिग्रहे नावि पार्थक्यमनयोर्ध्रुवम् ॥ १४ ॥ सार्धं च हितयोर्गाढप्रेमसाकल्यसंस्पृशोः । पार्थक्येऽथानयोः स्फोटो हृदोर्नाव्यामकुम्भवत् ॥ १५ ॥ अनयोरेव तत्पाणिग्रहणं कारये मिथः । प्रीतिव्रततिरप्येवं चिरं वर्धिष्यतेऽधिकम् ॥ १६ ॥ इति दुष्टधिया ध्यात्वा धीरधीर्धरणीधवः । पुष्पचूलां ततः पुष्पचूलकेनोदवाहयत् ॥ १७ ॥ अथ पुष्पवती राज्ञी ज्ञात्वा तदसमञ्जसम् । लोकापवादभीभीता दीक्षां कक्षीचकार सा ॥ १८ ॥ निन्द्यमानोऽखिलैः पौरैरविचारितकार्यकृत् । राजा राजेव संप्राप कलङ्कं सुमहानपि ॥ १९ ॥ जरसा जग्रसे तस्य तनुश्रीरेव केवलम् । नो कलङ्केनापि कीर्तिः क्रमाच्चन्द्रकलोज्वला ॥ २० ॥ क्षोणीधवोऽथ पूर्णायुः परलोकमुपेयिवान् । असहिष्णुरिव प्रोच्चैरात्मीयां वचनीयताम् ॥ २१ ॥ मन्त्रिभिस्तत्पदे पुष्पचूलो न्यस्तोऽनुकूलकैः । शशास काश्यपीं सोऽपि न्याय्यवृत्त्यैव पैत्रिकीम् ॥ २२ ॥ अत्यासक्त्या स्म भुङ्क्ते चानर्णीयःप्रणयाञ्चितः । सुखं वैषयिकं पुष्पचूलया चारुहेलया ॥ २३ ॥ तप्यमाना तपस्तीव्रं व्रतिनी पुष्पवत्यपि । व्रतोन्मुखी सखीचक्रे शिवत्रिदिवसम्पदम् ॥ २४ ॥ अथ तत्सङ्गमौत्सुक्यवशादिव महासती । समाधिना विपन्ना सा धाम त्रैदशमासदत् ॥ २५ ॥ सोऽथ पुष्पवतीदेवो विबुध्यावधिसंविदा । कामोन्मुख्यं भृशं पुष्पचूलिकापुष्पचूलयोः ॥ २६ ॥ दध्याविमे अपत्ये मे बाढं कामाग्निमुख्यतः ।

१ चन्द्र इव.

मा दुर्गदुर्गतौ दुःखभाजनं भवतां बत ॥ २७ ॥ इत्यसौ दर्शयामासानयोः स्वप्नेऽतिदारुणाः । क्षेत्रशीतातपोद्भूता विविधाः श्वभ्रवेदनाः ॥ २८ ॥ ताः श्वभ्रवेदना वीक्ष्य भीतश्चेतसि भूपतिः । पुष्पचूला च तत्प्रातर्जगौ पाखण्डिनोऽखिलान् ॥ २९ ॥ व्यावर्णयत भोः श्वभ्रयातना नो यथास्थिताः । स्वबुद्धिकल्पिताः प्रोचुरज्ञानात्ते यथा तथा ॥ ३० ॥ अजातप्रत्ययो भूपस्तद्वचोभिर्विकल्पितैः । अम्बिकासुतसूरीन्द्रान् गत्वाऽप्राक्षीत् प्रणम्य च ॥ ३१ ॥ सूरयः प्रोचिरे राजन्नेकाः श्वभ्रवेदनाः । वर्षकोट्याऽऽयुष्यकोट्या[1] च को वा वर्णयितुं क्षमः ॥ ३२ ॥ दाहस्तीव्रतरः शीतं दुःसहं हेतिकोटयः । तीव्रा असिवनं भीष्मं घोरा वैतरणी सरित् ॥ ३३ ॥ कुम्भीपाको महाभीमः परमाधार्मिकास्तथा । नारकाणाममी कष्टं वचनागोचरं दद्युः ॥ ३४ ॥ युग्मम् ॥ इत्यादिना विचारेण सिद्धान्तोक्तेन सूरिणा । राज्ञा स्वप्नेक्षिताऽज्ञापि वेदना नरकोद्भवा ॥ ३५ ॥ अथेत्यार्द्रमनाः क्ष्मापः सूरीन् स्माह कृताञ्जलिः । तत्प्रभे किं गतेनैहि भवता श्वभ्रवेदना ॥ ३६ ॥ सूरिः प्रोचे गतो नास्मि साम्प्रतं नरके नृप । भारत्या भागवत्याऽहं वेद तद्वेदनां परम् ॥ ३७ ॥ इत्यर्हद्भासने भूपो बभूव स्थिरमानसः । पुष्पचूलाऽपि संसारोद्विग्नाऽभून्नरकेक्षणात् ॥ ३८ ॥ ततो जगौ पतिं पुष्पचूलमस्थूलशेमुषी । तवाज्ञया श्वभ्रदुःखभीतेश प्रव्रजाम्यहम् ॥ ३९ ॥ सोऽप्याख्यद्दयिते दीक्षां कक्षीकृत्य पुरे पुरे । जिह्वामटन्ती मेऽकीर्तिपटहं तामयेन किम् ॥ ४० ॥ यदि प्रव्रजिताऽपि त्वं मदोकस्येव तिष्ठसि । तर्हि व्रतं गृहीतुं त्वामनुजानामि नान्यथा ॥ ४१ ॥ एतदप्युररीकृत्य पुष्पचूलाऽग्रहीद्व्रतम् । तत्रस्थक्षीणजङ्घौजोऽम्बिकापुत्रार्यसन्निधौ ॥ ४२ ॥ क्रमेण साधवः सर्वे विहर्तुमगुर-

१ मुखकोट्या.

न्यतः । क्षीणजङ्घाबलान् साध्वी प्रतिजागर्ति सा गुरून् ॥ ४३ ॥ वैयावृत्त्यं प्रकुर्वत्यास्तस्या ऋक्त्यार्द्रचेतसः । केवलज्ञा-
नमुत्पेदे लोकालोकप्रकाशकम् ॥ ४४ ॥ सूरिं चेतोऽनुवृत्त्यास्तकेवलाऽपि ऋजत्यलम् । उत्पन्नकेवलेनापि सेव्योऽन्तेवा-
सिना गुरुः ॥ ४५ ॥ विहृत्य साऽन्यदाऽऽयाता वर्षत्यपि पयोधरे । गुरुणोचे महाऋागे कृता व्रतविराधना ॥ ४६ ॥
सोचेऽचित्तप्रदेशेऽहमायाता तत्क्व सा प्रभो । गुरुणोक्तं कथं ऋज्ञेऽचित्तदेशस्त्वया मतः ॥ ४७ ॥ सा जगौ केवलेनाहं
वेद्मि विश्वं चराचरम् । केवल्याशातनेत्युच्चैर्विषण्णोऽस्थाद्गुरुस्ततः ॥ ४८ ॥ कदा मे केवलज्ञानं ऋावीति च वदन् गुरुः ।
शिश्राय तत्क्रमद्वन्द्वं चञ्चरीक इवाम्बुजम् ॥ ४९ ॥ केवली स्माह मा सूरे विषीद ऋवतोऽपि हि । गङ्गामुत्तरतो मध्ये-
गङ्गमुत्पत्स्यते च तत् ॥ ५० ॥ ततो गुरुर्विहारेण गङ्गातीरमुपेयिवान् । तामारेऋे तरीतुं च तरण्या करुणाकरः ॥ ५१ ॥
पूर्वजन्मापराधेन सूरिः केनापि नाकिना । वैराद्भिन्नस्त्रिशूलेनाथोत्तरन् स्वर्धुनीवनम् ॥ ५२ ॥ सूरिर्दध्यौ दयार्द्रान्तःक-
रणो मेऽङ्गपाततः । मा म्रियन्तां पयःपूरस्थिता विश्वस्तजन्तवः ॥ ५३ ॥ इति ध्यानात्समुत्पन्नकेवलः स मुनीश्वरः ।
तत्कालमृतिमासाद्य सिद्धिसौधमशिश्रियत् ॥ ५४ ॥ आसन्नव्यन्तरैश्चक्रे महिमा तस्य तत्र च । ततो लोके प्रयागेति
नाम्ना तीर्थमजायत ॥ ५५ ॥ चिरं सौवविहारेण पवित्रीकृत्य ऋूतलम् । पुष्पचूलाऽपि निर्वाणशर्माणि प्राप पापहा ॥५६॥
एवं काश्चित् स्त्रियोऽपि स्युर्बोधाय स्वगुरुष्वपि । गङ्गा शोऋाकरी किं न समुद्रस्याप्यजायत ॥ ५७ ॥

॥ इति पुष्पचूलाकथा ॥

---

१ विराधना. २ ऋमरः. ३ गङ्गाजलम्.

अथ मृगावतीसम्बन्धोऽभिधीयते—

कौशाम्बीति नगर्यस्ति कमलाकोशकाश्यपी । यत्र दारिद्र्यवार्ताऽपि यशःशेषत्वमासदत् ॥ १ ॥ शतानीक इति ख्यातोऽनन्तानीकोऽपि नामतः । तत्र धात्रीपतिः शत्रुस्त्रीवैधव्यविधौ विधिः ॥ २ ॥ प्रिया मृगावती तस्य मृगव्यानन्यजन्मनः । वासं व्यधुर्वने स्वस्था यन्नेत्रश्रीजिता मृगाः ॥ ३ ॥ इतश्च संपत्संकेते साकेतपुरपत्तने । यक्षः सुरप्रियोऽन्वब्दं चित्र्यते समहोत्सवम् ॥ ४ ॥ चित्रितः सन्निहन्त्येष यक्षश्चित्रकरं च तम् । अचित्रितस्तु सर्वत्र पुरे मारिं करोति वै ॥ ५ ॥ नीतोऽथ चित्रकृत्स्तोमः प्रावर्त्तत पलायितुम् । सर्वो रुरुश्च नूनर्त्रा स्वपौरमृतिन्नीरुणा ॥ ६ ॥ प्राप्तप्रतिज्ञवस्तस्य लिखित्वाऽऽख्यानसंचयम् । कुम्भे निचिक्षिपे कारागृहे प्रेतपतेरिव ॥ ७ ॥ यस्य प्रत्यब्दमाकृष्टाऽऽपातमात्रेण पत्रिका । निरैत् स चित्रकृद्यक्षमन्येत्य तमचित्रयत् ॥ ८ ॥ एवं गते कियत्काले कौशाम्ब्या एकदैककः । चित्रकृद्दारकश्चित्रशिक्षार्थं तत्र चागमत् ॥९॥ तस्थौ स कस्याश्चिच्चित्रकृद्वृध्धायाश्च मन्दिरे । तदात्मजन्मनाऽर्जयं समं तस्याजनि क्रमात् ॥ १० ॥ इतश्च स्थविरापुत्रनामाङ्कं पत्रकं निरैत् । यमवाचिकवत्तच्च ज्ञात्वा वृद्धा रुरोद सा ॥ ११ ॥ कौशाम्बीचित्रकृत्पुत्रोऽप्राक्षीत्तां दुःखकारणम् । यक्षोदन्तं पुत्रपत्रनिर्गमं च जगाद सा ॥ १२ ॥ सोऽप्याख्यदम्ब मा रोदीः सुखं तिष्ठतु ते सुतः । तं यक्षं चित्रयिष्यामि चित्रकृद्घातकारकम् ॥ १३ ॥ स्थविराऽपि बभाषेऽदो वत्स त्वमपि मेऽङ्गजः । सोऽवग्मातर्मम भ्राता

१ मृगव्यं मृगया. २ प्राप्ताः प्रतिज्ञवोऽपलायने साक्षिणो यस्य चित्रकरसमूहस्य. ३ नामसमूहम्. ४ यमस्येव. ५ तत्कालमाकृष्टमात्रेण. ६ मैत्री.

सुस्थितः स्तादयं मया ॥ १४ ॥ कृतषष्ठतपाः काले सुस्नातश्चन्दनार्चितः । शुचिवस्त्रोऽष्टपुटया पट्ट्यावृतमुखः शुचिः ॥१५॥ नवीनैः कूर्चकैर्वर्ण्यवर्णकैस्तमचित्रयत् । यक्षं चित्रकृतः सूनुः प्रणिपत्येत्युवाच च ॥ १६ ॥ सुरप्रिय सुरपृष्ठ सुरज्येष्ठोऽपि न प्रभुः । स्रष्टुं चित्रविधिं [1]ते वै कोऽहं मन्दतमोऽल्पधीः ॥ १७ ॥ तथापि सौवशिक्षानुसारेण विहितं मया । चित्रकर्म तवायुक्तं क्षमस्व क्षमसत्तम ॥ १८ ॥ एवं विनयरोचिष्णुवाचा तुष्टः स यक्षराट् । जगौ वरं वृणीष्वेति वत्रेऽदश्चित्रकृत्ततः ॥ १९ ॥ यदि त्वं मे वराकस्य तुष्टोऽसि सुरशेखर । तदा वरोऽयमेवास्तु मार्यो लोको न कश्चन ॥ २० ॥ यक्षोऽथाख्य-त्सिद्धमेतद्यत्त्वं नो मारितो मया । अन्यत् किञ्चित् स्वकीयार्थसिद्धिकृद्याच्यतां शुभ्र ॥ २१ ॥ अन्यथाचित्रकृत्स्वामिन् यदि तुष्टस्त्वमुच्चकैः । यस्य कस्यापि पश्याम्येकांशं नार्या नरस्य च ॥ २२ ॥ तदंशस्यानुसारेण तद्रूपस्याखिलस्य मे । यथार्थालेखने शक्तिरस्तु तत्त्वत्प्रसादतः ॥ २३ ॥ युग्मम् ॥ एवमस्त्विति यक्षेण प्रोक्तः पौरैस्तथाऽर्चितः । क्रमात् प्रीत-मनाः प्राप कौशाम्बीं नगरीं निजाम् ॥ २४ ॥ तत्रान्तःसन्नमन्येद्युः शतानीकोऽतिगर्वितः । जगौ जना ममान्येभ्यो राजभ्यो न्यूनमस्ति किम् ॥ २५ ॥ प्रभो चित्रसभा नास्ति रम्या ते तैरितीरिते । सोऽथ चित्रकृतश्चित्रसभां कर्तुं समा-दिशत् ॥ २६ ॥ विजित्य जगृहुस्तेऽपि सदोभूमिं सदाशयाः । तस्य चित्रकृतः शौद्धान्तासन्नोऽभूद्विभागकः ॥ २७ ॥ कुर्वाणस्तत्र चित्रं स जालकस्यान्तरेऽन्यदा । ददर्श चरणाङ्गुष्ठं मृगावत्या वरोर्मिकम् ॥ २८ ॥ चित्रकृद्यद्दराजस्य प्रसा-दादालिखच्च ताम् । असौ मृगावती राज्ञीत्यनुमानाद्यथास्थिताम् ॥ २९ ॥ लोचनोन्मीलनेऽथोरुप्रदेशे कूर्चिकामुखात् ।

१ तव. २ सभाभूमिम्.

मषीबिन्दुः पपाताशु सोऽप्यनैषीच्च तं ततः ॥ ३० ॥ मषीबिन्दुः पुनरप्यपतत् सोऽपनिनाय तम् । नृयोऽपि पतितं प्रेक्ष्य दध्यौ चित्रकृदप्यदः ॥ ३१ ॥ एतस्या लाञ्छनं नूनमत्र देशे समस्ति यत् । अत्रानेन ततो ज्ञाप्यं नापनेष्याम्यतः परम् ॥ ३२ ॥ इति पूर्णीकृते चित्रे तत्रागाद्दीक्षितुं नृपः । क्रमात् पश्यन्मृगावत्यास्तद्रूपं सम्यगैक्षत ॥ ३३ ॥ क्रुधौ तं बिन्दुमालोक्य क्रुद्धो दध्यौ धराधवः । धर्षिता दयिता नूनं पापेनैतेन मामकी ॥३४॥ मृगावत्या मष(षी)ग्रन्थिं वासोमध्यस्थमन्यथा। नृमिमध्यस्थकुम्भानिकुम्भवद्वेत्त्यसौ कथम् ॥३५॥ इत्थं क्रुद्धो धराधीशो दोषमाख्याय तं स्वयम्। आरक्षकाणां ददे निग्रहाय तमञ्जसा ॥ ३६ ॥ नृपं चित्रकराः प्रोचुः स्वामिन्नेकांशवीक्षणात्। लिखत्यालेखमखिलं यद्गात्रबन्धवरो ह्ययम् ॥ ३७ ॥ ततः क्षोणीपतिः क्रुद्धचेतास्तच्च परीक्षितुम्। कुञ्जिकावदनं तस्य दर्शयामास पापधीः ॥ ३८ ॥ तेन चित्रकृताऽऽलेखि कुञ्जिका सा यथास्थिता। तथापि कोपतो नृपस्तत्सन्दंशकमाक्षिदत्॥३९॥ गत्वोपोषित आशिश्ये तं यक्षं सोऽथ चित्रकृत्। सोऽप्याख्यन्नरु तच्चित्रं करिष्ये वामपाणिना ॥४०॥ प्राप्यैतं तत्वरं चित्रकारो दध्यावमर्षतः । नीरागोऽहं निरागाश्च किमेतेन कदर्थितः ॥४१॥ तदस्य प्रतिकुर्वेऽहं किञ्चित् कस्मादुपायतः । दुःसाधमपि साध्यं स्याद्धीधनानां धियैव हि ॥ ४२ ॥ चिन्तयित्वेति फलके नृषासंज्ञारज्ञारिणीम् । मृगावतीं लिलेखैष शचीमिव मनोहराम् ॥ ४३ ॥ चण्डप्रद्योतनृपतेः स्त्रीलोलस्य महौजसः । गत्वा मृगावतीरूपं दर्शयामास चाद्भुतम् ॥ ४४ ॥ तद् दृष्ट्वा चण्डप्रद्योतोऽवक् तं चित्रकृदुत्तम । विज्ञानचातुरी जाने तवेयं नाजजन्मनः ॥ ४५ ॥ मर्त्येऽत्रेक्षितपूर्वं न श्रुतपूर्वं न तौविषे । प्रतिबन्दमृतेऽलेखि रूपमीदृक् कथं त्वया ॥ ४६ ॥

१ अङ्गुष्ठम्. २ निरपराधः. ३ कस्मादपीत्यर्थः. ४ ब्रह्मणः. ५ स्वर्गे. ६ प्रतिकृतिं विना.

वद सत्यं क्वास्ति केयं गृह्णामीमामहं यथा । पूर्णो मनोरथो मेऽसाविति प्रीतः स चित्रकृत् ॥ ४७ ॥ जगौ च पुरि कौशाम्ब्यां कोशः कोशलसम्पदाम् । जितारातिमहानीकः शतानीकोऽस्ति भूमिभुक् ॥ ४८ ॥ मृगावतीति संपूर्णमृगाङ्कवदना शुभा । इयं तस्य महादेवी लक्ष्मीर्लक्ष्मीपतेरिव ॥ ४९ ॥ तद्रूपालेखने शक्तिः स्थविरस्य क्व विद्यते । नालं तज्ञोचरीकर्तुं वाचो वाचस्पतेरपि ॥ ५० ॥ मया परं तु तद्रूपलेशोऽयं लिखितो नृप । भवतश्चोपदीचक्रे दृग्विनोदकृते किल ॥ ५१ ॥ अथाख्यच्चण्डप्रद्योतो मृगीमिव मृगे हरिः । पश्यत्यपि शतानीके ग्रहीष्येऽहं मृगावतीम् ॥ ५२ ॥ सोऽथ दूतमुखेनैतामर्थितोऽपि मृगावतीम् । नादात्तत्प्रतिकौशाम्बि प्रतस्थे चण्डभूपतिः ॥ ५३ ॥ आक्रामन् मेदिनीपीठं स्वचमूवीचिमालया । वीचिमालीव साक्षात्स आगच्छँस्तेन शुश्रुवे ॥ ५४ ॥ द्रोणाज्जातातिसारोऽथ शतानीको मृतस्ततः । राज्ञी दध्यौ मृतो भर्त्ता पुत्रोऽप्युदयनः शिशुः ॥ ५५ ॥ बलीयाननुसर्त्तव्यो नीतिरेषा परं त्विह । शीघ्रध्वंसकरी सा मे कैतवं तदिहोचितम् ॥ ५६ ॥ अत्र स्थिताऽप्यनुकूलैर्वाचिकै रुचिरैरहम् । कालं प्रलोभ्य तं नेष्ये समयप्राप्तिवाञ्छया ॥ ५७ ॥ ध्यात्वेति साऽनुशिष्याथ दूतं प्रास्थापयन्निजम् । सोऽपि सैन्यस्थितं गत्वा चण्डप्रद्योतमित्यवक् ॥ ५८ ॥ मृगावतीति त्वां वक्ति शतानीके मृतेऽधुना । त्राणं त्वमेव मे किं तु पुत्रो बालो बलोज्झितः ॥ ५९ ॥ परान्नविष्यते भूपैः परैरेष मयोज्झितः । पितृमृत्यूत्थितैः शोकावेगैरिव निरन्तरम् ॥ ६० ॥ प्रीतस्तद्वचसा भूपो जगाद मयि रक्षके । परान्नवितुमीशस्तत्तनयं को जगत्यपि ॥ ६१ ॥ दूतोऽन्यधात् पुनः स्वामिन् राज्ञ्यैतदपि भाषितम् । प्रद्योते नायके जेतुं न सुतं कोऽ-

१ समुद्र इव.

प्यलंतमाम् ॥ ६१ ॥ परं दूरे ऽवान् स्वामी समीपे सीमऽभूमिपाः । तदौषध्यो हिमाद्युर्व्यां सर्पस्तूष्णीर्षके स्थितः ॥ ६२ ॥ निष्प्रत्यूहं मया योगं चेदिच्छसि विधत्स्व तत् । इष्टकाऽग्निरवन्त्याश्च कौशाम्ब्यां कूटमुत्कटम् ॥ ६४ ॥ तत्प्रपन्नोऽथ प्रद्योतोऽध्वनि श्रेणितया स्वकान् । चतुर्दशापि ऽनूनर्तून्मुमोच सपरिच्छदान् ॥ ६५ ॥ पुंस्परंपरयानीय चोज्जयिन्याः स इष्टकाः । वप्रं चकार कौशाम्ब्या अचिरेणैव दुर्गमम् ॥ ६६ ॥ पुनर्मृगावती दूतमुखेनाख्यादिमां पुरीम् । त्वं पूरय प्रज्ञो तूर्णं धनधान्यधनादिभिः ॥ ६७ ॥ तथा चक्रे नृपः शीघ्रं सर्वं तत्सङ्गमाशया । रोधद्दमं पुरो द्वारं पिधायास्थान्मृगावती ॥ ६८ ॥ प्रद्योतोऽथ पुरीं रुद्धाऽजितः सन्नऽपूरुषः । तस्थौ बहिर्विलक्षः सन् प्रमुष्टमणिनागवत् ॥ ६९ ॥ अन्येद्युश्चिन्तयामास ऽनवोद्विग्ना मृगावती । यद्यायाति जिनो वीरस्तदाहं व्रतमाददे ॥ ७० ॥ इमं मनोरथं तस्या ज्ञात्वा वीरजिनेश्वरः । तत्रैत्य समवासार्षीद्बहिरुद्यानके तदा ॥ ७१ ॥ ततो मृगावती द्वारमुद्घाट्य ऽयवर्जिता । प्रभुं नन्तुमगान्मुक्तवैरश्चण्डरुद्रस्तथागमत् ॥ ७२ ॥ धर्मं दिशन्तं सर्वज्ञं ज्ञात्वैको ना धनुर्धरः । आसन्नीभूय मनसा प्रभुं पप्रच्छ संशयम् ॥ ७३ ॥ तमन्यधत्त ऽगवान् पृच्छ त्वं संशयं गिरा । प्रतिबुध्यन्ते यथाऽन्येऽपि ऽन्यजीवाः सज्ञास्थिताः ॥ ७४ ॥ अर्हतेत्युदितोऽपीशो व्यक्तं वक्तुं स नो ह्रिया । जगौ च ऽगवन् या सा सा सेति मितवर्णकम् ॥ ७५ ॥ इत्थमेतदिति प्रोचे प्रभुः संकुचितार्थकम् । इन्ऽभूतिर्जगौ नाथ या सा सा सेति किं वद ॥ ७६ ॥ अथाख्यद्वीरतीर्थेशश्चम्पायां पुरि हेमकृत् । एकः स्त्रीलम्पटः पञ्चशतीं स्त्रीणाममेलयत् ॥ ७७ ॥ अतीर्ष्यालुरसौ तासां रक्षार्थं चोद्यतो नृशम् । मुमोच न गृहद्वारं सौविदल्ल इवा-

१ वप्रम्. २ प्रमुष्टो मणिर्यस्य स चासौ नागः सर्पश्च तद्वत्.

न्वहम् ॥ ७८ ॥ तदविश्वासतोऽदत्त स्वजनेन्योऽपि नोजनम् । न गेहे स्वस्य नान्यस्य स्वयं नोक्तुं स्म याति च ॥ ७९ ॥ परेद्युः प्रियसुहृदाऽनिच्छन्नपि कथञ्चन । नीतो निजालये नोक्तुमिदं सौहार्दलक्षणम् ॥ ८० ॥ तदा तदयिता दध्युर्धिक् तारुण्यं च धिक् श्रियः । यन्त्रिता इव तिष्ठामो वयं कारागृहे यतः ॥ ८१ ॥ पतिर्नायं गृहद्वारं पापोऽमुञ्चन्न जातुचित् । चिरादद्य गते तस्मिँस्तिष्ठामः स्वेच्छया सुखम् ॥ ८२ ॥ स्नात्वेति कृतजूषास्ताः स्वं पश्यन्त्यश्च दर्पणे । यावत्तस्थुस्तावदागात् स तद्दीक्ष्य चुकोप च ॥ ८३ ॥ तेनैकस्यां मारितायां रमण्यामपरा रुषा । तं ता व्यापादयामासुराहत्यादर्शकैर्नृशम् ॥ ८४ ॥ स्त्रियोऽथ सानुतापास्ता ज्वालयित्वा चितामिव । स्वमालयं व्यपद्यन्त निःशेषा अपि तत्क्षणात् ॥ ८५ ॥ सा स्त्रीपञ्चशती[1] त्र्येकाऽकामनिर्जरया मृताः । जज्ञुर्नृत्वेन ते स्तेयाजीविनो मिलिताः क्रमात् ॥ ८६ ॥ संभूय कुर्वते चौर्यं क्वचिद्दुर्गे स्थिताश्च ते । तत्पत्नी प्राग्मृता तिर्यक्कूत्पद्याजूद्विजाङ्गजः ॥ ८७ ॥ जाते पञ्चाब्दिके तस्मिन् तिर्यक्त्वं प्राप्य हेमकृत् । सोऽथ विप्रकुले तस्य स्वसृत्वेनोदपद्यत ॥ ८८ ॥ दारकः सोऽथ पितॄन्यां चक्रे तस्याश्च पालकः । तेन सा पाल्यमानाऽपि रोदिति स्मातिदौष्ठ्यतः ॥ ८९ ॥ अन्येद्युरुदरस्पर्शं तस्यास्तेन प्रकुर्वता । गुह्ये कथञ्चन स्पृष्टा रोदनात्सा न्यवर्त्य (र्त) त ॥ ९० ॥ तद्रोदनोपचारं तं ज्ञात्वा तस्याः स दारकः । रुदत्याश्च तथा कुर्वन् पितॄन्यां ददृशेऽन्यदा ॥ ९१ ॥ सोऽथ निर्वासितस्तान्यां तां पत्नीमैच्च यत्र ते । दस्यवो न्यवसँस्तैश्च क्रमात्संयुयुजेतमाम् ॥ ९२ ॥ कुलटैव बभूवाथ तत्स्वसा साप्तयौवना । ग्रामे क्वाप्यन्यदाऽगच्छत्स्वेच्छया सा भ्रमन्त्यसौ ॥ ९३ ॥ स ग्रामो दस्युभिस्तैश्च दैवादागत्य

---

१ एकया हीना.

लुण्टितः । जगृहे बालिका सा तु प्रिया चक्रेऽखिलैरपि ॥ ९४ ॥ तेऽन्यदा दस्यवो दध्युर्यदेकेयं वराकिका । सेवया नो नु सर्वेषामचिरेण विपत्स्यते ॥९५॥ ततस्तैर्युवती काचिदानिन्ये पूर्वभार्यया । तेष्वन्यत्र गतेष्वेषेर्ष्यया क्षिप्ता च कूपके ॥९६॥ आगतैस्तैश्च पृष्टा सा क्व सेति जगदे तया । तां स्वैरिणीं वेद्म्यहं किं स्वभार्यां किं न रक्षथ ॥ ९७ ॥ तैर्बुध्मनया यत्सा वराकी मारितेर्ष्यया । स द्विजोऽचिन्तयत् किं मे स्वसा या सा कुशीलिनी ॥ ९८ ॥ अत्रायातोऽस्ति सर्वज्ञः श्रुत्वेतीहागतो जनात् । हृियाऽयं मनसा पृच्छन्मयोक्तः पृच्छ नो गिरा ॥ ९९ ॥ या सा सा सेत्यथो पृष्टेऽमुना चेत्थमितीरिते । मयाऽयं ज्ञातवान् विप्रपुत्रदस्युः स्वसेति ताम् ॥ १०० ॥ एवं च रागद्वेषाद्यैर्मूढा जीवा भवे भवे । नानादुःखानि संप्राप्य भ्राम्यन्ति भविनो भृशम् ॥ १०१ ॥ श्रुत्वेति स पुमान् स्वामिपार्श्वे संवेगमाश्रितः । प्राव्राजीदेत्य तां पत्नीं चौरान् प्राव्राजयच्च तान् ॥ १०२ ॥ अथोत्थाय प्रभुं नत्वा भवोद्विग्ना मृगावती । प्रद्योतं समनुज्ञाप्य प्राव्राजीदर्हदन्तिके ॥ १०३ ॥ प्रभुप्रभावतस्त्यक्तवैरोऽवन्तीपतिस्ततः । कौशाम्ब्यां नृपतिं कृत्वोदयनं स्वपुरे ययौ ॥ १०४ ॥ शिक्षार्थमर्पयामास चन्दनायै मृगावतीम् । प्रभुः सा तदुपास्त्याथ सामाचारीमबोधि च ॥ १०५ ॥ अन्यदा वन्दितुं वीरं मृगावत्या समं ययौ । चन्दना घोरसंसारतापसन्तापचन्दनम् ॥ १०६ ॥ तदा च स्वामिनो भक्त्या पुष्पदन्तौ समागतौ । आरूढौ स्वविमानाभ्यां वन्दितुं त्रिजगद्गुरुम् ॥ १०७ ॥ भृशं विसारितत्तेजःपुञ्जपिञ्जरितक्षितौ । दिवसो रजनी वेत्ति जनोऽबोधि न कश्चन ॥१०८॥ धर्मं दिशति तीर्थेशेऽमृतसोदरया गिरा । भूयांसमपि कालं स्म लवीयन्ति सदोजनाः ॥१०९॥

१ चंद्रसूर्यौ. २ लवमिव जानन्ति.

सायं विज्ञाय वसतिमनुमानेन चन्दना । आगान्मृगावती त्वस्थाज्जिनगीःपानलालसा ॥ ११० ॥ ततो धर्मं समादिश्य विरते जिनसत्तमे । सूर्याचन्द्रमसौ सौवस्थानं हृष्टौ समीयतुः ॥ १११ ॥ लब्धात्मलाभं तद्ध्वान्तं प्रससार निरन्तरम् । ततो मत्वा तमीं स्वोपाश्रयमागान्मृगावती ॥ ११२ ॥ प्रोचे तां चन्दना दूना वाक्यैश्चन्दनसोदरैः । अज्ञे तव कुलीनाया निशाचारो न चोचितः ॥ ११३ ॥ जिनैरपि सुसाध्वीनां रात्रिसंचरणं क्षुवि । निषिद्धं सिद्धसत्त्वानां सावित्रीणामिव श्रियाम् ॥ ११४ ॥ अनुशास्तिमिति प्रोच्चैश्चन्दनाया हितावहाम् । यच्छन्त्या निपपातांह्र्योः सानुतापं मृगावती ॥११५॥ क्षमयन्त्यामथो तस्यां प्रेमीलामाप चन्दना । तस्याश्च केवलज्ञानमनन्तमुदपद्यत ॥ ११६ ॥ तदासन्नं तदा वीक्ष्य यान्तं सर्पं क्षयानकम् । क्षूमिस्थं चन्दनाबाहुमुच्चिक्षेप मृगावती ॥ ११७ ॥ चन्दनाऽथ जजागार जगाद च शुभे मम । बाहुस्त्वया क्षितिस्थोऽयमुत्क्षिप्तः केन हेतुना ॥ ११८ ॥ साख्यदायान्तमालोक्य सर्पमुच्चिक्षिपे क्षुजः । साऽप्युवाचेदृशे ध्वान्ते कथं सर्पस्त्वयेक्षितः ॥ ११९ ॥ अनन्तानुत्तरज्ञानालोकेनेति तयेरिते । पश्चात्तापपराऽरेज्ञे सा तां क्षमयितुं ततः ॥१२०॥ हा मयाऽसौ प्रमादेन केवल्याशातना कृता । इत्थं मृगावतीपादलग्ना साप्याप केवलम् ॥ १२१ ॥ मृगावती चन्दना च लोकं केवलसंविदा । सर्वं ददृशतुर्हस्तन्यस्तामलकवत् क्षणात् ॥ १२२ ॥ एवं या केवलोत्पत्त्यै जज्ञे गुरुजनेष्वपि । सतीमतल्लिका शीर्षे धार्या जातीव किं न सा ॥ १२३ ॥

॥ इति मृगावतीकथा ॥

---

१ सूर्यसंबन्धिनीनाम्. २ निद्राम्. ३ पुष्पविशेषः.

अथात्रैव द्वारे विशेषोपदेशमाह—

किं पूज्या श्रमणी न सा श्रुतरसा दुर्बोधहृन्मोहकृन्मात्रासक्तकुबेरदत्तदयितासाध्वीव जातावधिः।
धन्या एव चिरंतना व्रतधना अप्याधुनिक्यः शुभ्राः,याकिन्या हरिभद्रवादिमुकुटः सोऽबोधि वाङ्मात्रतः

व्याख्या—श्रुते सिद्धान्ते रसोऽभिलाषो यस्याः सा तथा या श्रुतरसा सती दुर्बोधहृत् मिथ्यात्वहन्त्री स्यात् सा श्रमणी साध्वी किं पूज्या पूजनीया न स्यात् ? अपि तु स्यादेव। केव ? मोहकृन्मात्रासक्तकुबेरदत्तदयितासाध्वीव मोहकृन्मोहोत्पादिकाऽज्ञानकारिणी या माता जननी तस्यामासक्तोऽनुरक्तो योऽसौ कुबेरदत्तस्तस्य या दयिता भार्या कुबेरदत्तानाम्नी तद्रूपा या साध्वी महासती तद्वत्। किंरूपा ? जातावधिर्जात उत्पन्नोऽवधिरिति पदैकदेशे पदसमुदायोपचारादवधिज्ञानं यस्याः सा तथा, यथा जातावधिः सती मोहकृन्मात्रासक्तकुबेरदत्तदयितासाध्वी दुर्बोधहृत् कुबेरदत्तस्य दुर्बोधहन्त्री बभूवेति सुगमान्वयः। तथा दुर्बोधहृन्मोहहृदिति केचित्पठन्ति, तत्र चैवं व्याख्या—या श्रमणी दुर्बोधहृत् मिथ्यात्वहन्त्री, मोहहृदज्ञानहन्त्री स्यात्। अयं तु पाठो न चतुरचेतश्चमत्कारकरः, सूत्रे चकाराभावात्, चकाराध्याहारेऽपि दुर्बोधमोहयोरर्थाविशेषान्नोचितोऽयं पाठः। ननु यदि पुराणाः साध्व्य ईदृश्य आसँस्तर्हि ऐदंयुगीनतपोधनानां पूज्यत्वं किमायातमित्याशङ्कां निरस्यन्नाह—इति पूर्वकथनाच्चिरंतनाः पुरातना व्रतधनाः साध्व्यो धन्या एव श्लाघ्या एव तथाऽऽधुनिक्योऽपि ऐदंयुगीना अपि शुभ्राः प्रधानाः, यतो याकिन्या महत्तरया स प्रसिद्धो हरिभद्रवा-

दिमुकुटो हरिऋनामा वादीन्द्रो वाङ्मात्रतो वचनमात्रात् "चक्किंगं हरिपणगं पणगं चक्कीय केसवो चक्की" इत्यादि-रूपात् अबोधि प्रतिबोधितः । इतिवृत्ताक्षरार्थः । कथे चेते—(श्रीकुबेरदत्तासाध्वीकथा)

कल्याणकमलामाल्लामन्थरा मथुरा पुरी । यन्त्रीजितेव नागेन्द्रपुरी पातालमाविशत् ॥ १ ॥ वसन्ततिलकानाम्नी तस्यामासीत् पणाङ्गना । यया सुरपुरन्ध्रीणां तिलकायितमुच्चकैः ॥ २ ॥ यत्सौन्दर्यश्रियं प्रेक्ष्य स्मरो रत्यामनादरः । बद्धानुरागो यत्पार्श्वं न जहाति कदाचन ॥३॥ अन्यदा पौरपुंश्चिः सा रममाणा यदृच्छया । बभूव गुर्विणी दैवयोगेनाथ पणाङ्गना ॥४॥ क्रमेण सुषुवेऽपत्य-युग्मं सुतसुतात्मकम् । तया तद्यौवनारामच्छेदने पर्शुसन्निभम् ॥५॥ तज्जातमात्रमेवाथ स्वनामाङ्कितमुद्रया । युक्तं प्रक्षिप्य पेटायां प्रावाहि यमुनाम्भसि॥६॥रङ्गत्तरङ्गभङ्गीभिः सा पेटा चालिता भृशम् । जगाम वेगक्रमतः श्रीशौर्यपुरगोपुरे ॥७॥ तत्रस्थान्यां तदा धान्यामिन्याभ्यामाददेऽथ सा । उद्घाट्य दिव्यसौन्दर्यं मिथुनं ददृशे च तत् ॥ ८ ॥ पुत्री पुत्रीयता तस्याः पुत्रो वा पुत्रकाम्यता । ताभ्यां तद्युगलमपि स्वे स्वे प्रजगृहे गृहे ॥ ९ ॥ कुबेरदत्त इत्याख्या तेन पुत्रस्य निर्ममे । पुत्री कुबे-रदत्तेति धनिनाऽन्येन निर्मिता ॥ १० ॥ तौ तत्रेहे सुखं वर्धमानौ यौवनमापतुः । कारितौ च कलाभ्यासमिभ्याभ्यां स्वस्ववेश्मनि ॥ ११ ॥ ततो दैवात्तयोरेव विवाह इतरेतरम् । अज्ञानात्कारितस्ताभ्यां श्रेष्ठिभ्यां प्रेमसंस्पृशोः ॥ १२ ॥ कुरोदरविधौ तौ तु क्रीडन्तावन्यदा मिथः । पणार्थं मुमुचाते तन्मात्राख्याङ्कितमुद्रिके ॥ १३ ॥ तुल्यमात्राख्यया ताभ्यां सौदर्यं बुबुधे मिथः । ततः कुबेरदत्तान्तर्जवोद्विग्नेत्यचिन्तयत् ॥ १४ ॥ अहो संसारकान्तारे महामोहकदर्थिता । के के किं किं न कुर्वन्ति जीवाः स्मरकरालिताः ॥ १५ ॥ मया लब्धात्मलाभोऽयमहो मोहमहीपतिः । लोकद्वयाहितं भ्रातृस-

ङ्गमुच्चैरचीकरत् ॥ १६ ॥ एतस्य पाप्मनश्चित्तिर्विना व्रतपरिग्रहम् । न स्याद्वै मम जाड्यस्येव ज्वलज्ज्वलनं विना ॥ १७ ॥ इत्यसौ सुव्रतासाध्वीसन्निधौ व्रतमाददे । कुबेरदत्ता संसारसरित्पतितरीनिभम् ॥ १८ ॥ तप्यमाना तपो नित्यं दुस्तपं निःस्पृहाशया । वैयावृत्त्यपरा प्राप क्रमात्साऽवधिसंविदम् ॥ १९ ॥ कुबेरदत्तो गार्हस्थ्यमध्यस्थो मथुरापुरि । जगाम शौर्यपुरतस्ततो वाणिज्यहेतवे ॥ २० ॥ तत्र तामेव जननीं वेश्यां सौन्दर्यबन्धुराम् । वसन्ततिलकानाम्नीं स भेजे मौढ्य-पीडितः ॥ २१ ॥ सुखायमानयोर्नित्यं तयोर्मोहनलीलया । आनन्दाङ्कुरवज्जज्ञे तनयोऽतिमनोहरः ॥ २२ ॥ साध्वी कुबेरदत्तेति बुबुधेऽवधिसंविदा । ततस्तत्प्रतिबोधाय साऽप्यागान्मथुरापुरीम् ॥ २३ ॥ तस्या एवाथ वेश्याया याचित्वोपाश्रयं गृहम् । साध्वी कुबेरदत्ताऽस्थात् स्वाध्यायध्याननिर्मला ॥ २४ ॥ अन्यदा तं सुतं वेश्या साध्वीपार्श्वे न्यवीविशत् । ततः कुबेरदत्तेनारेभे क्रीडितुमुच्चकैः ॥ २५ ॥ कलस्वरेण सा साध्वी गायन्त्यतिमनोहरम् । तं बालं क्रीडयामास तयोर्बोधिविधित्सया ॥ २६ ॥ देवरोऽसि शिशो भ्राता पुत्रः पौत्रस्तथा मम । भ्रातृव्योऽसि पितृव्यश्च त्वामाजाषे[1] कुतो वद ॥ २७ ॥ भर्तुरेकमातृत्वात्त्वं यतोऽसि सहोदरः । तेन त्वं वर्तसे मेऽपि देवरः शिशुसत्तम ॥ २८ ॥ एका येनावयोर्माता तेन त्वं मम सोदरः । सपत्न्यास्त्वं यतो जातो ममापि त्वं सुतस्ततः ॥ २९ ॥ त्वत्पिता मे सपत्नीभूर्यत्तत्पौत्रोऽसि मे शिशो । मत्सोदरस्य यत्सूनुस्त्वं भ्रातृव्योऽसि तन्मम ॥ ३० ॥ येन मज्जननीभर्तुः पोतोऽसि त्वं सहोदरः । तन्ममापि पितृव्यस्त्वं वर्तसे भाग्यभाजुष ॥ ३१ ॥ तथाऽसौ ते प्रसूर्मेऽपि वत्स माता पितामही । वधूः श्वश्रूः सपत्नी च भ्रातृजाया भवत्यहो ॥ ३२ ॥

१ हे बालक.

आवामेकोदरोत्पन्नौ यत्तत्तेऽम्बापि मे प्रसूः। यस्मान्मातृजुजङ्गस्य साम्बा तन्मे पितामही॥३३॥सपत्नीसूनुपत्नी यत्सा तन्मेऽपि वधूर्ज्ञवेत्। यन्मज्ञर्तुश्च सा माता तेन श्वश्रूर्ममापि सा॥३४॥ पत्नी पत्युर्यतो मे सा सपत्नी सा ततो मम। यतो मज्ज्ञातृपत्नी सा ज्ञातृजाया ततो मम ॥ ३५ ॥ तस्माऽयं ते पिता मेऽपि पिता ज्ञाता पितामहः। श्वशुरश्च विवोढा च तनयो विनयो ज्ञवेत् ॥ ३६ ॥ त्वत्पिता मत्प्रसूज्ञर्ता यत्पिता स ममापि तत्। यन्मे तस्य च मातैका तेन मे स्यात्सहोदरः॥ ३७ ॥ मत्पितृव्यस्य ते यत्स पिता तन्मे पितामहः। मज्ञर्तुर्जननीज्ञर्ता यत्सोऽतः श्वशुरो मम ॥ ३८ ॥ अहं विवाहिता तेन यद्विवोढा स तन्मम। मत्सपत्न्याः सुतो येन तन्मेऽपि तनयो ज्ञवेत् ॥ ३९ ॥ इति तारस्वरं वारं वारं गीतं तदा तया। श्रुत्वा कुबेरदत्तस्तां किमित्याख्यत् पणाङ्गनाम् ॥ ४० ॥ न वेदेति तया प्रोक्ते ताभ्यां पृष्टा महासती। किमसंबद्धमेवेदं त्वया साध्वि निगद्यते ॥ ४१ ॥ ततो निरूपिते पूर्वस्वरूपे निखिले तया। कुबेरदत्तः संसारोद्विग्नः संयममाददे ॥ ४२ ॥ चिरं श्रामण्यमाराध्य निरतीचारमुज्ज्वलम्। कुबेरदत्ता साध्वी च सुखं मृत्वा स्वरापतुः ॥ ४३ ॥ एवं या प्रतिबोधाय स्वज्ञर्तुरपि संज्ञवेत्। आराध्या सा कथं नैव श्रीरिव स्यान्नृणां सदा ॥ ४४ ॥

॥ इति श्रीकुबेरदत्तासाध्वीकथा ॥

अथ याकिनीमहत्तरासम्बन्धः प्रोच्यते—

श्रीनड्वलपुरं चारुविहारालिमनोहरम्। यत्रांहो न स्थितिं लेभे पूर्णे कुम्भेऽम्बुबिन्दुवत् ॥ १ ॥ हरिज्ञाख्यया तत्र

१ मातृजारस्य. २ जानामि.

विप्रो विप्रकुलाग्रणीः । आन्वीक्षिक्यादिका विद्याः पाठं पाठं निरन्तरम् ॥ २ ॥ काँश्चिद्दुर्वादिनो जित्वा चाहंकृतिकदर्थितः । अजीगणज्जगत्सर्वं तृणादप्यधिकं लघु ॥ ३ ॥ युग्मम् ॥ आर्हत्या सोऽन्यदा मात्रोक्तोहङ्कृतिरसाम्प्रतम् । किञ्चिज्ज्ञस्याज्ञातगणिपिटकस्य तवात्मज ॥ ४ ॥ साहङ्कारं व्याहरत्स मातस्तत्किञ्चिदप्यहो । शास्त्रं नास्ति न जानामि यदहं विष्टपत्रये ॥ ५ ॥ तथाऽपीति प्रतिज्ञाऽस्तु मम निर्ममताजुषः । यदुक्तं वेद्मि नो सम्यङ्निष्यः स्यां तस्य तत्क्षणात् ॥ ६ ॥ इति सन्धां दधानस्य तस्य कीर्तिस्त्रिविष्टपे । स्फूर्त्तिमियर्त्ति शीतांशुकेतकोदरसोदरा ॥ ७ ॥ इतश्च याकिनी नाम्ना साध्वी साध्वी महत्तरा । पावयन्ती विहारेण धरां तत्रायया क्रमात् ॥ ८ ॥ सा तत्रोपाश्रयेऽन्येद्युर्बहुसाध्वीपरिच्छदा । स्वाध्यायक्षण आरेजेऽध्येतुमावश्यकं क्रमात् ॥ ९ ॥ चक्रिद्वयं हृषीकेशपञ्चकं चक्रिपञ्चकम् । हरिश्चक्री हरिश्चक्री द्विचक्रि हरिचक्रिणः ॥ १० ॥ गाथामित्यर्थसंबद्धां प्राकृतोक्त्या तयोदिताम् । हरिभद्रो व्रजन्मार्गे श्रुत्वा चित्ते व्यचारयत् ॥ ११ ॥ अनन्यासात् प्राकृतोक्तिमजानन् हरिभद्रकः । स्मित्वोचेऽदश्चाकचिक्यं किं साध्वि क्रियते बहु ॥ १२ ॥ साऽप्याख्यन्नूतनालिप्ते चाकचिक्यं क्षमातले । बहु स्यात्ते नवज्ञस्य चाकचिक्यं तथा भवेत् ॥ १३ ॥ इति हीतो भृशं भट्टः श्रितः साध्वीपदाम्बुजम् । जगौ चातः परं त्वं मे गुरुः साध्वीमतल्विके ॥ १४ ॥ याकिन्याऽपि ततो भट्टो हरिभद्रः स्वसूरिभिः । प्रव्राजितः समुत्पन्नभव्यनिर्मलदर्शनः ॥ १५ ॥ ततो गुर्वन्तिके तिष्ठन् हरिभद्रो महामुनिः । रञ्जयामास सूरीणां चेतश्चे-

१ यथा नूतनालिप्ते भगणादिनासंस्कृते क्षमातले चाकचिक्यं बहु भवति तथा तव भवेत् ते तव नवज्ञस्य चाकचिक्यं भवेत् कुतो मयि इति हास्योक्तिः.

तोऽनुवर्तनैः ॥ १६ ॥ तेनातिमुदितैः सूरिराजै राजीवलोचनैः । तस्मिन् सर्वोऽपि सौवार्थकोशः शिष्ये निचिक्षिपे ॥ १७ ॥ तस्मिँस्तद्व्रततसर्वस्वं शुशुभ्रेऽतितरां तदा । ज्योतिर्घस्रान्तविन्यस्तं सावित्रमिव पावके ॥ १८ ॥ नाजनिष्ट तयोः कोऽपि विशेषः श्रुतसंविदा । दीपाद्दिनिर्मिते दीपे को विशेषो हि तेजसा ॥ १९ ॥ तस्य राद्धान्तपाठेन चिरारूढा कुवासना । निखिलाऽपि विलीनार्यम्णेव नैशी तमस्ततिः ॥ २० ॥ ज्ञानदर्शनचारित्रश्रियस्तिस्रोऽपि तस्य ताः । विग्रहेऽपि स्थिता नैव विग्रहं कुर्वते मिथः ॥ २१ ॥ ज्ञानादिप्रेयसीषूच्चैरत्यासक्तं समीक्ष्य तम् । जगाम तस्य रुष्टेव कीर्तिकान्ता दिगन्तरे ॥ २२ ॥ याकिन्याऽसौ बोधितो यद्याकिनीसूनुरित्यतः । तस्य प्रौढिः प्रौढिमानं दधार धरणीतले ॥ २३ ॥ क्रमेण गुरवः सौवपदवीधरणक्षमम् । तं मत्वा स्वपदारूढं विदधुर्हरिभद्रकम् ॥ २४ ॥ ततस्ते हरिभद्रार्या विहरन्तः क्षमातले । नाना प्रज्ञावनाश्चक्रुरार्हते शासनेऽद्भुताः ॥ २५ ॥ श्रीश्रुतोज्ञाररूपाणि नाना प्रकरणानि ते । नानार्थकेलिगेहानि चक्रिरे चतुरोत्तमाः ॥ २६ ॥ एवं प्रज्ञाढ्य जैनेन्द्रं शासनं शासनोज्ज्वलाः । मृताः समाधिना जज्ञुस्तेऽथो सुगतिभाजनम् ॥ २७ ॥ इत्थं या प्रतिबोधाय विदुषामपि जायते । सा कथं वर्ण्यते नेन्दुकलावल्लीलनिर्मला ॥ २८ ॥

॥ इति याकिनीसूनुकथानकम् ॥

निरूपितमिदं त्रयस्त्रिंशत्तमं साध्वीद्वारं । अथ श्राद्धभक्तिरूपं षष्ठं क्षेत्रमुपदिशति—

अकृत भरतचक्री विश्वसाधर्मिकार्चां, कुरुत तदनुमानाद्ध्रेयसेऽत्रोद्यमं तत् ।

---

१ दिनान्ते विन्यस्तम्. २ सूर्यसंबन्धि. ३ निशासंबन्धिनी. ४ देहे. ५ कलिम्.

यदि सकलधरित्रीं प्रीणयत्यम्बुवाहः, किमु न तदरघट्टः क्षेत्रमात्रं पृणातु ॥ ६ए ॥

व्याख्या—भरतचक्री विश्वसाधर्मिकार्चां समस्तसाधर्मिकार्चां समस्तसाधर्मिकपूजां अकृत अकार्षीत् । तदनुमानात् भरतानुमानात् श्रेयसे पुण्यार्थं अत्र साधर्मिकवात्सल्ये उद्यमं प्रयत्नं तत् तथा कुरुत हे भविकलोका इति शेषः । ननु भरतचक्री नवनिधिचतुर्दशरत्नस्वामी षट्खण्डभोक्ता देवतासान्निध्येन सर्वं कर्तुं समर्थः, स साधर्मिकार्चां चेच्चकार तर्हि तदनुसारेण श्राद्धा अप्याधुनिकाः साधर्मिकवात्सल्यं कुर्वन्त्विति कथं वक्तुं युक्तं आधुनिकश्राद्धानां तथाविधसामर्थ्याभावादिति आशङ्कां निरस्यति दृष्टान्तेन—यदि सकलधरित्रीं समस्तपृथिवीं अम्बुवाहो मेघः प्रीणयति तोषयति तत्तर्हि अरघट्टो यन्त्रविशेषः क्षेत्रमात्रमपि केदारमात्रमपि किमु कथं न पृणातु न तोषयत्विति वृत्ताक्षरार्थः । कथा चेयम्—

(भरतचक्रिकथा)

आसीत् परैरयोध्यायामयोध्यायामधीश्वरः । आदिमो भरतः सार्वभौमश्चैलोक्यविश्रुतः॥ १ ॥ इतश्च ऋषभस्वामी उत्पन्नामलकेवलः । युक्तो गणभृच्चतुरशीत्या नाकिगणाश्रितः ॥ २ ॥ मुमुक्षुचतुरशीतिसहस्रैः सेवितांह्रिकः । विहरन् भूतले तत्रोद्यानेऽथ समवासरत् ॥ ३ ॥ तदैवोद्यानपालेन भरतोऽन्येत्य भूपतिः । आर्हतागमनाख्यानाद्धर्षितो मुदितो भृशम् ॥ ४ ॥ सुवर्णकोटयः सार्धद्वादशाथ क्षितीशिना । पारितोषिकदानेऽस्मै दत्ता हर्षमुपेयुषा ॥ ५ ॥ दध्यौ च भरतः स्वामी भूरिसाधुसमाश्रितः । दैवान्मेऽद्यातिथीभूत आतिथेयं करोमि तत् ॥ ६ ॥ भृत्वाऽथानैःसहस्राणि मोद-

१ शकटानां सहस्राणि.

कैश्चित्तमोदकैः । लात्वा समवसरणेऽगान्नन्तुं ऋरतो जिनम् ॥ ७ ॥ प्रभुं नत्वा नृपः प्रोचे स्वामिँस्त्वं सपरिच्छदः । निमन्त्रितो मयाऽसीति गृह्णीथा मोदकानमून् ॥ ८ ॥ स्मित्वोचे ऋगवान् राजन् दोषऋूयस्त्वदूषितम् । ग्रहीतुमुचितं नेदमस्माकं व्रतिनां खलु ॥ ९ ॥ ऋरतोऽप्यन्यधाद्भूपोऽचित्तेऽस्मिन्मोदकोत्करे । कोऽत्र दोषो यतित्वस्य क्षितिकारी विभो वद ॥ १० ॥ प्रभुः प्रोचे धराधीश साधूनाधाय यत्कृतम् । तदकल्प्यं मुनीनां यदाधाकर्माख्यदोषकृत् ॥ ११ ॥ साधूनां सम्मुखं यच्चानीतमन्नादिकं खलु । कल्पते नैव तदपि यदन्याहृतदोषकृत् ॥ १२ ॥ अशनादिचतुष्कं च वस्त्रपात्रे च कम्बलः । प्रोञ्छनं राजपिण्डोऽयमष्टधा नो न कल्पते ॥ १३ ॥ तदिदं चाधाकर्मादिदोषदुष्टं धराधिप । विषवन्नोचितं लातुं संयमाङ्गविनाशकम् ॥ १४ ॥ श्रुत्वेति ऋरतो बाढं पश्चात्तापपरोऽभवत् । ततो जिनो जगौ राजन्माऽधृतिं कुरुतां यतः ॥ १५ ॥ अर्हन्तः प्रथमं पात्रं द्वैतीयीकं सुसाधवः । तृतीयमणुव्रतऋृत्तुरीयं दर्शनान्वितः ॥ १६ ॥ अणुव्रतऋृतां तत्त्वं श्राद्धानां कुरु पूजनम् । यतः संसारपाथोधिस्तवायं चुलुकायते ॥ १७ ॥ इति स्वामिगिरा हृष्टो ऋरतः स्वगृहे गतः । ऋोक्तव्यं मद्गृहे श्राद्धैः पटहेनेत्यघोषयत् ॥ १८ ॥ तदा ऋजुजनः सर्वो लोकस्तस्यैव वेश्मनि । क्रमादायातुमारेभे ऋोक्तुमप्यनिमन्त्रितः ॥ १९ ॥ सूपकारैस्तदूचे स नृपात्र बहवो जनाः । मिलिता ऋोजनं कस्य कस्य तद्दीयते वद ॥ २० ॥ ततः परीक्ष्य श्राद्धानां गले रेखात्रयं व्यधात् । काकिण्योपलक्षणार्थं ऋूपः श्राद्धास्तु तेऽभवन् ॥ २१ ॥ तद्भक्तिं ऋूपतिस्तन्वन् सिद्धिसौधमसाधयत् । तत्साधार्मिकवात्सल्यविधिः प्रववृते जने ॥ २२ ॥ ॥ इति ऋरतकथा ॥

॥ इति श्रीमत्खरतरगणनभोऽङ्गणदिनमणिश्रीजिनसागरसूरिविरचितायां कर्पूरप्रकरटीकायां प्रथमखण्डमिदम् ॥

अथात्रैव विशेषमाह—

श्राद्धानां सदुपासका बहुमता एवैकधर्मत्वतः, साधूनामपि जातु गौरवपदं वीतस्पृहाणाममी ।
रुग्नाशादुपसर्गहृत्स्तवनतः श्रीनम्रबाहोर्यथा, चन्द्रार्काब्दवदुत्तमेषु सहजं विश्वोपकारिव्रतम् ॥ ७० ॥

व्याख्या—श्राद्धानां श्रावकाणां सदुपासकाः प्रधानश्रावका बहु अधिकं मता अभीष्टा एव । कस्मात् ? एकधर्मत्वतः एकधर्मस्य भाव एकधर्मत्वं तस्मात् । जातु कदाचित् अमी सदुपासका वीतस्पृहाणामपि निःस्पृहाणामपि साधूनां मुमुक्षूणां गौरवपदं बहुमान्या भवन्ति । कस्येव ? श्रीनम्रबाहोरिव यथा श्रीनम्रबाहुस्वामिनो वीतस्पृहस्यापि सतः सदुपासका बहुमान्या अभूवन् । कस्मात् ? उपसर्गहृत्स्तवनतः श्रीउपसर्गहरं नाम श्रीवामेयजिनस्तवनं महाप्रभावं तस्मात् । किंरूपात् ? रुग्नाशात् रुजो नाशो यस्मात्तत्तथा तस्मात् । ननु वीतस्पृही श्रावकान् कथं बहु मन्यते "निःस्पृहो नाधिकारी स्यात्" इत्युक्तेः, मैवं, उत्तमानामुपकारिस्वरूपत्वात् । यत उक्तम्—

"छायामन्यस्य कुर्वन्ति स्वयं तिष्ठन्ति चातपे । फलन्ति च परार्थेषु नात्महेतोर्महाद्रुमाः ॥ १ ॥"

एतदेवोत्तमेषु सत्पुरुषेषु सहजं प्रकृतिर्विश्वोपकारि व्रतं विश्वमुपकरोतीत्येवंशीलं विश्वोपकारि तथा व्रतं निश्चयो यस्य तत्तथा । अथवा सहजं सांसिद्धिकं विश्वोपकारि जगदुपकर्तृ व्रतमुत्तमेषु । किंवत् ? चन्द्रश्चार्कश्चाब्दश्चेति द्वन्द्वः, चन्द्रार्काब्देष्विव चन्द्रार्काब्दवत्, यथा शशिरविमेघेषु सहजं विश्वोपकारिव्रतं वर्तते तथोत्तमेष्विति काव्यार्थः । व्यासार्थः कथानकगम्यः । तच्चेदं (श्रीनम्रबाहुकथानकं)—

अस्त्यत्र भरतक्षेत्रे सोमिलासंज्ञिका पुरी । धनैरनिधनै रम्यैर्हर्म्यैर्याऽत्रालकायते ॥ १ ॥ विप्रोऽभूत् सोमदत्तोऽत्र सौम्यः सोम इव श्रिया । भद्रबाहुः सुतोऽस्याद्यो वराहमिहिरोऽपरः ॥ २ ॥ सुधामाधुर्यसध्रीचीमन्यदा सुगुरोर्गिरम् । सम्यग्निशम्य प्रव्रज्यामाददाते स्मौ मुदा ॥ ३ ॥ भद्रबाहुः श्रुताम्भोधिपारदृश्वा क्रमादभूत् । सूर्यप्रज्ञाख्यादि किञ्चिद्वराहमिहरोऽग्रहीत् ॥ ४ ॥ इतश्च सूरिः संभूतविजयः स्वपदोचितम् । साधुं विलोकयामास सिद्धान्तोक्तिर्यदीदृशी ॥ ५ ॥ व्यूढो गणभृतां शब्दः सत्पुंभिर्गौतमादिभिः । योऽजानानः कुपात्रे तं न्यस्येत् पापी स कथ्यते ॥ ६ ॥ विचार्येत्थं च विज्ञाय भद्रबाहुं गुणोद्वणम् । गणभृत्पदवीं तस्मै तदा सोऽदादुदारधीः ॥ ७ ॥ प्रपन्नानशनः सूरिर्विपन्नः स्वर्गभागभूत् । गणभृत्पदवीं धत्ते भद्रबाहुर्यथाविधि ॥ ८ ॥ तं तथा वीक्ष्य सूरीन्द्रं वराहमिहिरोऽस्मरत् । मां गणभृत्पदादानादपामंस्त गुरुस्तदा ॥ ९ ॥ लोके नराधमास्ते स्युर्ये तिष्ठन्त्यपमानिताः । विमृश्येति व्रतं मुक्त्वा वराहश्चाश्रयद्बृहम् ॥ १० ॥ ततः सूर्यशशिप्रज्ञाख्यनुसारेण रोषणः । शास्त्रं स ज्योतिषं किञ्चिन्निर्ममे निर्ममेतरः ॥ ११ ॥ तदागमानुयायित्वात् किञ्चित्संवादमादधत् । संमोहोपहतैर्वीक्ष्याचचक्षे ज्ञानवानसौ ॥ १२ ॥ प्रसिद्धिसौधमध्यास्त ततो राजकुलेष्वपि । तदीयानि तु शास्त्राणि वाराहाणीति विश्रुतम् ॥ १३ ॥ वराहोऽथान्यदा राज्ञः पुरस्तात् प्रोचिवानिदम् । कुल्मं खटिकयाऽऽलिख्य संसदन्तः स्फुरन्मदः ॥ १४ ॥ द्विपञ्चाशत्पलमानस्तिमिरत्र पतिष्यति । तदानीं प्राहुराचार्या बहिः कुल्माद् पतिष्यति ॥ १५ ॥ तस्मिंस्तथैव संजाते राज्ञाऽवज्ञात एषकः । यत्र तत्र गतोऽज्ञाग्यवान् यत्स्यादापदास्पदम् ॥ १६ ॥ वराह (भूपाल)

---

१ मत्स्यः.

स्यान्यदा पुत्रः ज्वदपादि समं मुदा । वर्तितं शतवर्षायुस्तेन तस्याङ्गजन्मनः ॥ १७ ॥ न्यवेदि नऊबाहुन्यस्तत्तेऽपि जगदुस्तदा । अयं सप्तदिनायुष्मान् नविष्यति विनिश्चितम् ॥ १८ ॥ ज्वलद्दंग्नोलिसंपातादधिकं तऊचः स्मरन् । सोऽप्यपृच्छत् कुतो मृत्युर्गुरुराह बिभालतः ॥ १९ ॥ श्रुत्वेत्यचिन्तयद्यत्र तऊन्धोऽपि न विद्यते । एतं मुञ्चामि तत्रेत्यकारयत्सद्म सुन्दरम् ॥ २० ॥ तत्र न्यस्तस्ततश्चाह्वि सप्तमे घारि तिष्ठतः । तस्योपर्यर्गलापातः समबोन्नोन्मृतस्ततः ॥ २१ ॥ असमाधिं विधायाथ प्राप्य पूज्यपदाम्बुजम् । सोऽवादीत्स विषेदे तु परं नासीद्यथाऽकथि ॥ २२ ॥ तच्छ्रुत्वा सूरयः प्रोचुः किमेतन्नऊ कथ्यते । प्रत्यायितोऽथ तैस्तत्र चित्रितौतुप्रदर्शनात् ॥ २३ ॥ एवं पदे पदे नऊबाहुन्निर्बहुधा जितः । ततो वराहः प्रेक्ष्यनघे सङ्घे स दुष्टधीः ॥ २४ ॥ कालं कृत्वा स कालेन व्यन्तरीन्नावमासदत् । विन्नङ्गावधिनाऽबुद्ध स्वरूपं पूर्वजन्मनः ॥ २५ ॥ ततो रोषारुणीन्नूयोपदुद्रुषुः स शासनम् । ज्वलं पश्यन्मुमुक्षूणां नाप ते ह्यप्रमादिनः ॥ २६ ॥ ततः प्रायः प्रमत्तत्वात् लब्ध्वा श्राऊजने ज्वलम् । मारिं कर्तुमढौकिष्ट धाटी प्रेतपतेरिव ॥ २७ ॥ दध्युः श्राऊा विना कोऽलं हन्तुं तां नऊबाहुना । हैमनं हन्यते जाड्यं किं ज्वलज्ज्वलनं विना ॥ २८ ॥ एवं विज्ञाय सङ्घोऽथ नऊबाहुं व्यजिज्ञपत् । प्रज्ञो सङ्घमनुगृह्य मारिरेषा निगृह्यताम् ॥ २९ ॥ ततस्तीर्थकृतां मान्यः सङ्घ इत्थं गुरुः स्मरन् । आश्वसेनेः स्तवं कृत्वा सोऽथ सङ्घमपीपठत् ॥ ३० ॥ तस्य स्मरणमात्रेण मारिः क्षयमयाऊयात् । गदोलीव सुधास्वादाज्वोराली[3] च सुरद्रुणा ॥ ३१ ॥ उपसर्गहरं चेति ख्यातिमाप्तवत् । तदादि स्तवनं लोकैः पठ्यमानं मुहुर्मुहुः ॥ ३२ ॥ शासनोन्नासनं

१ न प्राप. २ रोगश्रेणिरिव. ३ दरिद्रश्रेणिः.

कृत्वाऽनशनीभूय स क्रमात् । समाधिनाऽन्तमासाद्य भरतबाहुर्दिवं ययौ ॥ ३३ ॥ चिरंतनैर्ज्ञानधनैर्मुनीशैर्यदीति मान्यास्तदनुक्रमेण । श्रद्धालवोऽप्याधुनिकैः सुमान्याश्चिरन्तनोऽध्वा न हि लोपनीयः ॥ ३४ ॥

॥ इति श्रीभरतबाहुकथा ॥

उक्तं चतुस्त्रिंशत्तमं श्रावकद्वाररूपं षष्ठं क्षेत्रं । अथ पञ्चत्रिंशत्तमं श्राविकाद्वारस्वरूपं निरूपयन्नाह—

स्त्री पुंसोऽप्यधिका त्रिपक्षविंशदा पुंरत्नखानिर्यतः, स्वामिन्या मरुदेवया तु सदृशी भूता न भाविन्यपि ।
विश्वार्च्यौ जिनचक्रिणौ प्रथमतो यत्पुत्रपौत्रावहो, या प्रागेव शुभेऽह्नि शिवपुरप्रस्थानकस्था प्रभोः ॥१॥

व्याख्या—स्त्री नारी पुंसोऽपि पुरुषादपि अधिका । अधिकत्वे कारणमाह—त्रिपक्षविंशदा मातृपक्षपितृपक्षश्वशुरपक्षरूपास्त्रयः पक्षास्तैर्विंशदा निर्मला यथा पुरुषः खलु जन्मपक्षविशुद्धो विलोक्यते, स्त्री त्रिपक्षविशुद्धेत्याधिक्यं । पुनरप्याह—यतो यस्मात् कारणात् पुंरत्नखानिः स्त्री पुमांस एव रत्नानि तेषां खानिरुत्पत्तिस्थानं । तु पुनः स्वामिन्या मरुदेवया सदृशी काऽपि स्त्री न भूता न जाता नापि भाविनी । तदभावे कारणमाह—प्रथमतः पूर्वं तावत् अहो इत्याश्चर्ये यत्पुत्रपौत्रौ यस्या मरुदेवायाः सुतसुतपुत्रौ श्रीऋषभभरतसंज्ञौ जिनचक्रिणौ सार्वसार्वभौमावभूतां । किंभूतौ ? विश्वार्च्यौ जगत्पूजनीयौ । या पुनः स्वामिनी मरुदेवा प्रभोः श्रीआदिदेवात्प्रागेव पूर्वमेव शुभे सुमुहूर्त्तेऽह्नि दिवसे शिवपुरप्रस्थानकस्थाऽभूत् मोक्षनगरे प्रस्थिताऽभवत् । यद्वा या प्रागेव प्रभोः श्रीऋषभदेवस्य शुभेऽह्नि शिवपुरप्रस्थानकस्थाऽभूत् प्रभोः शिवपुरे यियासोर्या प्रस्थानकस्थाऽभवत् । अन्योऽपि यो महति कार्ये चलति स प्रस्थानं मुञ्चति तथा

मरुदेवा पुत्रे ऋगवति शिवपुरं प्रति चलति सति स्वयमेव प्रस्थानकस्थाऽऋवदित्यर्थोऽपि संज्ञाव्यते कुत्रचित् दृश्यते च । इति काव्यसमासार्थः । व्यासार्थः श्रीऋषभचरित्राज्ञम्यः । तच्च ऋवादिस्वरूपरूपं किञ्चित् "ऋवति हि ऋवपारः शुद्धया साधुऋक्त्या" इत्यादिसाधुद्वारे विवृतं, शेषं चात्र विव्रियते (श्रीयुगादिदेवचरितम्)—

समस्त्यदोद्वीपमहीपमण्डनं, प्रत्यग्विदेहेष्वपराजिता पुरी । अद्यापि नुर्लोचनगोचरं पुरी, पौरन्दरी नैति यथा पराजिता ॥ १ ॥ ईशानचन्द्राख्यनरेन्द्रचन्द्रमाः, करैरकाठिन्यधरैर्वसुन्धराम् । प्रमोदते तत्र तदैतदद्भुतं, सन्तापकृद्भिरिचकोरिकादृशाम् ॥ २ ॥ बभूव तस्यां जनतापचन्दनं, श्रेष्ठीश्वरश्चन्दनदाससंज्ञकः । तन्नन्दनः सागरचन्द्र इत्यभूज्ज्ञाम्नीर्यधैर्यार्जवजन्मभूमिका ॥ ३ ॥ अशोकदत्तोऽस्य सखा नखाग्रकथाग्रजाग्रत्कपटोत्कटोऽभवत् । अन्येद्युरुद्यानमगात्स सागरः, सत्पौरवारैः परिवारितो मधौ ॥ ४ ॥ यदृच्छया क्रीडति तत्र सागरे, समीपवर्तिन्यथ शाखिनां गणे । काचिच्चकोरीनयना चकार वै, पूत्कारमुच्चैःस्वरमातुरा ह्रिया ॥ ५ ॥ श्रुत्वा गतस्तत्र च चन्दनाङ्गजः, कृपालुमौलिः खलु बन्दिपूरुषैः । धृतां यथार्थां प्रियदर्शनाभिधां, श्रीपूर्णभद्राङ्गरुहां ददर्श सः ॥ ६ ॥ एकस्य पाणेः स कृपाणमुच्चकैर्जग्राह तद्वीक्ष्य च तैः पलायितम् । बन्दिन्य इत्याङ्गरुहेति मोचिता, श्रीसागरेणाथ वृकादिव ह्रगी ॥ ७ ॥ कोऽयं कुतः शूरशिरोऽवतंसकोऽत्रैयाय निष्कारणिकोपकारकृत् । पतिं विनैनं सुभगं मनोजवद्भोगान्न भोक्ष्ये व्रतिनीव वाऽस्म्यपि ॥ ८ ॥ स्मरन्त्यदो धाम जगाम सा निजं, क्षेत्रे रतिं तत्र न तद्वियोगतः । स्मरँश्चकोरीनयनां मुहुर्मुहुः, स्वागारमागादथ सागरोऽपि ताम् ॥ ९ ॥ निशम्य तं नन्दनविक्रमं क्रमाद्भूनो निजे चेतसि चैष चन्दनः । शिक्षां ददौ वत्स न सुन्दरं कृतं, यत्पौरुषं

ह्योऽघटि वन्दिपूरुषैः ॥ १० ॥ वणिग्जनानां धनदानपौरुषं, येनातिगुप्तं ननु राजमन्त्रवत् । किं चैष ते मित्रमशोकको बहिः, शुचिः स चान्तःकुटिलोऽस्ति कम्बुवत् ॥ ११ ॥ तथा यतेथाः सुत वञ्च्यते क्वचिन्मायाविना तेन ऋवानृजुर्न च । स चन्दनेनेत्यथ शिक्षितोऽवदत्तातोक्तिरेषा खलु वेदे एव मे ॥ १२ ॥ मित्रेऽत्र मायाणुरपि ध्रुवं मया, न चेक्षितोऽद्यापि तथाप्यतः परम् । पितर्ऋविष्यामि सचेतनोऽस्म्यपि, जाग्रन्न लुण्टाकगणैर्हि लुण्ट्यते ॥ १३ ॥ श्रेष्ठी सुतस्वान्तमथापि कन्यया, तया गृहीतं प्रविचार्य चन्दनः । तां कन्यकां तज्जनकं त्वयाचत, श्रीपूर्णऋद्धान्निधमात्मसूनवे ॥ १४ ॥ मत्वाऽनुरागं खलु सोऽपि सागरे, पुत्र्या ऊवाचेति किमत्र याचनम् । इयं तदीयैव हि वन्दिमोचनाद्दन्निदं तेन स तां व्यवाहयत् ॥ १५ ॥ कालो व्यतीयाय कियान् परस्परं, तयोर्वियोगेन विनैव चान्यदा । बहिर्गते कार्यवशेन सागरे, पापः सुहृत्स प्रियदर्शनां जगौ ॥ १६ ॥ ऋऽ यदामन्त्रयते पतिस्तव, रहो धनस्य स्नुषया स वेत्सि किम् । प्रयोजनं तच्च जगाद साऽप्यदो, जानामि नाहं तव मित्रमन्त्रणम् ॥ १७ ॥ सोऽथाह जानन्नपि कार्यगौरवादहं कथं ते कथयामि तन्नुन्ने । तत्किं तया चेत्युदितोऽथ सोऽवदत्कार्यं त्वया यन्मम तस्य तत्तया ॥ १८ ॥ तथापि तद्भावमजानती जगौ, सा ब्रूहि किं तेऽद्य मया प्रयोजनम् । सोऽथाह शृङ्गाररसप्रवेदिनः, कार्यं त्वया कस्य न ते पतिं विना ॥ १९ ॥ निशम्य तस्येति गिरं विषोपमां, सरोषमाख्यादिति तस्य तर्जनाम् । आः पाप पत्न्यां सुहृदो विचिन्तितं, धिक् तेऽघ (अ) जल्पन्निति लज्जसे न किम् ॥ २० ॥ संज्ञावयन् किंच समेऽपि ऋतरि, मन्येऽस्यमित्रो ननु मित्रवेषऋत् । ततः स गेहान्मलिनाननो

१ गतदिने. २ शास्त्रविशेषः श्रुतिरित्यर्थः. ३ अस्मीत्यहमर्थेऽव्ययम्. ४ विरुद्धचिन्तितम्. ५ अमित्रः शत्रुः.

निरैदन्यायताऽसौ सुहृदेति जल्पितः ॥ २१ ॥ म्लाननानस्त्वं दिवसे शशीव किं, विज्ञज्य तद्दुःखजरं लघूकुरु । सोऽवक् सखे मे किमकथ्यमस्ति ते, साधो परस्येव हृदस्ततः शृणु ॥ २२ ॥ नो वञ्चयित्वा तव चक्षुषी प्रिया, मयाऽतनोन्नर्म मनःप्रह्लेदकम् । रुद्धोऽहमद्यौकसि ते गतस्तया, ततोऽतिकष्टेन विनिर्गतोऽस्म्यहम् ॥ २३ ॥ मोक्षो ममास्या न हि देह-मोचनं, विना मया सोऽपि विमुच्यते ततः । यद्वा मृते सा मयि दुष्टचेष्टितं, स्वं सागराग्रे खलु वक्ष्यतेऽन्यथा ॥ २४ ॥ ध्यायन्निदं तेऽत्र च सन्मुखोऽभवं, निवेदितं ते निजदुःखकारणम् । एवं वचस्तस्य निशम्य सागरः, सदुःखमाख्यादिति तत्पुरो गिरम् ॥ २५ ॥ सखे न खेदोऽत्र विधेय एव यत्, कुलस्थितेर्लङ्घनमासु यौक्तिकम् । पापः स तेनेत्युदितः प्रमोदितः, सीमाऽस्ति वार्धेर्न हि दुष्टदुर्धियाम् ॥ २६ ॥ तदादि तस्यामभवद्विरागवान्, श्रीसागराख्यो नितरां मुमुक्षुवत् । अथोपरोधेन समं तया सुधीः, प्रावर्तत प्रागिव शोभनाशयः ॥ २७ ॥ आख्यत्तथोर्ज्जेदभयेन नाथ तद्दुश्चेष्टितं वेत्रलतेव सा ऋजुः । पूर्णायुषः प्रीतिजुषः परस्परं, त्रयोऽप्यमी कालवशाद्विपेदिरे ॥ २८ ॥ द्वीपेऽत्र, चास्मिन् भरते सुरापगासिन्ध्वन्तरोर्व्यामरके तृतीयके । पल्याष्टमांशेन तु शेष एतकौ, तौ दम्पती युग्मितया बभूवतुः ॥ २९ ॥ मायानिधिः सोऽपि करीश्वरोऽभवत्तस्यां चतुर्दन्तवरः सितद्युतिः । परिभ्रमन् शक्रकरीव सोऽन्यदा, जगाम पार्श्वे खलु युग्मिनोस्तयोः ॥ ३० ॥ प्राग्जन्मसौहार्दवशाद्वशापतिरानन्दितो वीक्ष्य च युग्मिनाविमौ । स्कन्धेऽधिरोप्य स्वकरेण सोऽभ्रमदितस्ततः स्नेह इहान्यथा हि न ॥ ३१ ॥ संजातजातिस्मरणावुभाविमौ, परस्परं प्रीतिभृतौ बभूवतुः । यस्तेषु मुख्यः कुलकृत्स चादिमो,

१ करी.

हाकारनीत्या प्रशशास युग्मिनः ॥ ३३ ॥ स युग्मिन्निस्तद्विमलेऽनवाहनात्प्रोचेऽथ नाम्ना विमलादिवाहनः । षण्मासशेषायुषि संस्थिता प्रिया, साऽसूत रम्यं मिथुनं वराकृति ॥ ३३ ॥ चक्षुष्मदाख्यः खलु तत्र बालकोऽजूचन्द्रकान्ताभिधयाऽथ बालिका । नीलाब्जनावष्टधनुःशतोन्नतौ, तौ पालयित्वा विमलोऽन्तमाप्तवान् ॥ ३४ ॥ सोऽथो सुपर्णे ऽनवनाधिपोऽजनवत्तत्पल्यगान्नागकुमारतां मृता । द्विपोऽपि नागेषु मृतो गतो ततो, हाकारनीतिं विमलात्मजोऽतनोत् ॥ ३५ ॥ चक्षुष्मतोऽन्ते मिथुनं त्वजायत, सुतो यशस्वीति सुता स्वरूपिका । वर्णादिभिर्वर्ष्मसमौ[1] पुनर्घनौन्नत्येऽर्धयुक्सप्तधनुःशतीमितौ[2] ॥ ३६ ॥ मृतौ पुनस्तत्पितरौ बभूवतुः, सुपर्णनागेषु सुरौ यथाक्रमम् । हाकारमाकारनयद्वयेन चाशिषद्यशस्वी कलहेऽपि युग्मिनः ॥ ३७ ॥ तयोरपीदं मिथुनं त्वजायत, सुतोऽभिचन्द्रः प्रतिरूपिका सुता । तौ शुल्कनीलौ किल सार्धषड्धनुःशतोन्नतौ वृद्धिमवापतुः क्रमात् ॥ ३८ ॥ मृत्वा यशस्व्यब्धिकुमारतां गतो, विपद्य नागेषु बभूव तत्प्रिया । ततोऽभिचन्द्रस्य नयद्वयेन तान्, प्रशासतोऽजून्मिथुनं सितद्युति ॥ ३९ ॥ प्रसेनजिन्नाम सुतोऽथ चक्षुषःकान्तेति पुत्री खलु वृद्धिमीयतुः । एतौ षभिष्वासशतोन्नतौ ततो, मृत्वाऽभिचन्द्रोऽम्बुधिषूदपद्यत ॥ ४० ॥ नागेषु मृत्वा प्रतिरूपिकाऽगमत्ततो मिथोऽजूत्कलहश्च युग्मिनाम् । धिक्कारयुक्पूर्वनयद्वयेन तत्प्रसेनजित्तान् प्रशशास युग्मिनः ॥ ४१ ॥ प्रासूत रम्यं मिथुनं प्रसेनजित्प्रिया सुतोऽस्मिन्मरुदेवसंज्ञकः । श्रीकान्तिकाख्या तु सुता प्रवर्धितौ, स्वर्णप्रियङ्गुद्युतिकौ क्रमेण तौ ॥ ४२ ॥ तावर्धयुक्पञ्चधनुःशतप्रमौ, शरीरमानेन मनोरमाकृती । प्रसेनजिद्द्वीपकुमारतां गतो, विपद्य नागेषु जगाम

१ पितृसमौ. २ शरीरोच्चत्वे.

तत्प्रिया ॥ ४३ ॥ श्रीकान्ता सुषुवेऽथ रम्यमिथुनं स्वर्णप्रियङ्गुद्युति, वृद्धिं प्राप सुखेन नाभिमरुदेवेति स्फुटं नामतः । साग्रैः पञ्चधनुःशतैः परिमितावेतौ शरीरोच्छ्रये, सङ्ख्यातीकृतपूर्वलक्षपरिमाणायुःस्थितिं बिभ्रतौ ॥ ४४ ॥ क्षेत्रे द्वीपकुमार-तामथ मृतिं प्राप्तः स नाभेः पिता, श्रीनागेषु विपद्य तत्प्रियतमा सा देवभूयं गता । श्रीमन्नाभिनृपः शशास निखिलाँ-स्तान् युग्मिनः संततं, भूपीठेऽत्र महात्मनः सुविधिनाऽत्राचार्यवर्यो यथा ॥ ४५ ॥ इति जिनसागरसूरीश्वरैः कृते प्रथ-मजिनपतिचरित्रे । कुलकृत्स्वरूपवर्णनसंज्ञः सर्गोऽयमाद्योऽत्र ॥ ४६ ॥

तृतीयारे चतुश्चत्वारिंशन्मासान्वितैः पुनः (सह) । पद्मैश्चतुरशीत्या च पूर्वलक्षैरपूरिते ॥ १॥ चतुर्थ्यां खलु कृष्णायां मासे आषाढनामनि । संप्राप्ते उत्तराषाढां यामिनीकामिनीश्वरे ॥ २ ॥ पूर्णायुर्वज्रनाभात्मा नाकिनामोकसश्च्युतः । मरु-देवाकुक्षिपद्ममलंचक्रे मरालवत् ॥ ३ ॥ त्रिभिर्विशेषकम् ॥ नैरयिका अपि प्रापुः क्षणमेकं सुखं तदा । किमेतत्प्राणिना-मेष दाता सातं सनातनम् ॥ ४ ॥ स्वप्नाँश्चतुर्दशैक्षिष्ट देवी गर्भगते प्रभौ । शय्यागारे सुखं प्राप्ता निरातङ्का निरामया ॥ ५ ॥ वृषेभहरिश्रीदामचन्द्रादित्या ध्वजो घटः । सरोऽम्भोधिविमानानि रत्नपुञ्जः शिखीति ते ॥ ६ ॥ शय्योत्थेयमथो राज्ञी मरुदेवेति नामतः । राज्ञे यथाक्रमं प्राप्तान् स्वप्नानेतान् व्यजिज्ञपत् ॥ ७ ॥ स्वयं न्यवेदयत् स्वप्नपाठकाज्ञावतो नृपः । देव्याः स्वप्नानिमाँस्तीर्थकृज्जन्मफलदायकान् ॥ ८ ॥ पूर्णकाला सुखं राज्ञी पूर्वस्मिन्नेव भे[1] सुतम् । प्रासूत चैत्रमा-सस्याद्याष्टम्यां युग्मधर्मिणम् ॥ ९ ॥ मुमुदे मेदिनी सर्वा प्रसेदुरखिला दिशः । नैरयिकाः सुखं प्रापुर्वायवोऽपि शुभा

१ नक्षत्रे.

ववुः ॥ १० ॥ यियासतां जिनस्नात्रे तमो मा भूदिवौकसाम् । तेनोद्योतं तताना र्धरात्रिकालोदितो विधुः ॥ ११ ॥ स्वे स्वेऽथ दिक्कुमारीभिः सूतिकर्मणि निर्मिते । पुरन्दरैः प्रभुर्नीत्वा स्नापितः कनकाचले ॥ १२ ॥ पूजयित्वा च नत्वा च स्तुत्वा प्रथमतीर्थपम् । सन्निधौ मरुदेवाया मुमुचे नमुचे[1] रिपुः ॥ १३ ॥ आदित्ये उदयं प्राप्ते श्रीमन्नाभिनरेश्वरः । वदनेन्दीवरं वीक्ष्य मुमुदे त्रिजगत्प्रभोः ॥ १४ ॥ मात्राऽमुत्रेक्षितः स्वप्ने वृषभो गर्भसंगते । पित्रा श्रीवृषभ इति नाम चक्रे ततः प्रभोः ॥ १५ ॥ स्वमङ्गुष्ठं पिबन् स्वामी शक्रसङ्क्रमितामृतम् । ज्ञानत्रयभृदा गर्भादासदद्वितीयं वयः ॥ १६ ॥ सुमङ्गला सुनन्देति परिणीय कनीद्वयम् । शक्रस्य नाभिराजस्य हर्षोत्कर्षमपोषयत् ॥ १७ ॥ सुखं वैषयिकं ताभ्यां सहानुभवतः प्रभोः । व्यतीयुः पूर्वलक्षाणि जन्मतः षडिव क्षणम् ॥ १८ ॥ सर्वार्थसिद्धितश्च्युत्वा जीवौ तौ बाहुपीठयोः । सुमङ्गलोदरोद्भूतौ पुत्रपुत्र्यौ बभूवतुः ॥ १९ ॥ पुत्रश्चतुर्दशस्वप्नप्रोक्तचक्रित्ववैभवः । बभूव भरताभिख्यो ब्राह्मीत्याख्याऽस्य चानुजा ॥ २० ॥ तौ सुबाहुमहापीठजीवौ देवौकसश्च्युतौ । सुनन्दाकुक्षिसम्भूतौ जज्ञाते युग्मधर्मिणौ ॥ २१ ॥ पुत्रो बाहुबली पुत्री सुन्दरीति प्रभोः पुनः । सुतयुग्मान्यसूतैकोनपञ्चाशत्सुमङ्गला ॥ २२ ॥ कुमारक्रीडया स्वामी क्रीडयामास जन्मतः । विंशतिं पूर्वलक्षाणि यावदेष यदृच्छया ॥ २३ ॥ स्थापितायां सुरेशेन विनीतायां पुरि प्रभुः । चकार राज्यनीतिं च संगृह्याश्वगजादिकम् ॥ २४ ॥ श्रीनाभिराजाङ्गज एष राज्यं, यावत्त्रिषष्टिं खलु पूर्वलक्षान् । प्रपाल्य लोकेषु

---

१ नमुचिर्दैत्यस्तस्य रिपुः शत्रुः इन्द्र इत्यर्थः.

समस्तनीतीः, प्रकाशयामास यथा दिनेशः ॥ २५ ॥ इति जिनसागरसूरीश्वरैः कृते प्रथमजिनपतिचरित्रे । जन्मस्वरूपवर्णनसंज्ञः सर्गो द्वितीयोऽयम् ॥ २६ ॥

श्रीमन्नाभिनरेशनन्दनजिनः पौरोपरोधादलं–चक्रे मन्मथमित्रकालकमलालीलालयं काननं । प्रोन्मीलन्मलयानिलेरिततरुव्यूहस्य पुष्पव्रजैः (जं), प्रीत्या स्मार्थ(र्तं)मिव प्रयच्छति तदैवागामिने स्वामिने ॥ १ ॥ स्वामी जङ्गमकल्पपादप इवालंकृत्य तत्संस्थितः, पश्यँस्तत्कमनीयतां नयनयोस्तृप्तिं बबन्धे न हि । सत्यं शाश्वतसातलीनमनसामीदृक्सुखे का रतिः, स्युर्वास्वादितसर्पिषः खलतिलैस्तैलैश्च तृप्ताः कथम् ॥ २ ॥ हर्षोत्कर्षजुषः प्रधानवपुषः स्वं मन्यमानान् बहु, प्रोन्मीलन्नलिनीदलाहृतजलैर्लीलावतीनां कुलैः । दीर्घश्रीरथ दीर्घिकातटगतो दृष्ट्वा जनान् क्रीडतश्चेतस्येतदचिन्तयज्जिनपतिः श्रीनाभिराजाङ्गजः ॥ ३ ॥ क्वापीदं सुखमद्भुतं प्रज्ञवति प्राग्जन्मनीति स्मरन्, तीर्थेशोऽवधिसंविदैक्षत दिवि प्राप्तं सुखं प्राग्भवे । पश्यन् मानवनाकवासिसुखयोः स्वाकूतुल्यताऽतुल्यते, दध्यावेवमथो जगत्त्रयगुरुर्निर्भङ्गवैराग्यभृत् ॥ ४ ॥ सौख्यं वारिधिवारितोऽपि विपुलं मुञ्चन्ति ये स्वर्गिणां, मूढा गोष्पदवारितोऽपि लघुनः सौख्यस्य हेतोर्नृणाम्, त्यक्त्वा सारशितोपलादिकलितं स्वधर्मधेनोः पयः, तृष्णाव्याकुलितेक्षणाः प्रकुथितं गृह्णन्ति ते काञ्जिकम् ॥ ५ ॥ मूढाः संसृतिगुप्तिवेश्मनि महामोहाख्यभूमीपतेर्जीवाः कर्मसमूहलोहनिगडैर्बद्धांह्रयः संततम् । प्रोत्सर्पद्विषयाख्ययामिकगणैः संरक्षितेऽत्र क्षितौ, दुःखौघैरतितापिता निरयितुं ते स्युः समर्थाः कथम् ॥ ६ ॥ यद्येतेऽत्र जना न संसृतिभवं सौख्यं त्यजेयुर्जगा–

१ स्मृतिविहितदानादिकम्.

स्तज्ञाव्यं किममूदृशेन मयका जाड्यानुषिक्तात्मना। जङ्घालैरपि दावपावकततौ किं स्थीयते पङ्गुवत्, किं पत्येत सुदीर्घलोचनवता यद्वाऽन्धकूपेऽन्धवत् ॥ ७ ॥ श्रीनाभेयजिनस्य चेतसि निजे चैवं नृशं ध्यायतः, एत्य त्राक् समयस्वरूपविदुरा लौकान्तिकाख्याः सुराः। एवं व्यज्ञपयन् प्रवर्तय विभो तीर्थं स्वकं सम्प्रति, मिथ्यात्वाय जलाञ्जलिं ननु जना येन प्रयच्छन्त्यमी ॥ ८ ॥ दानं दानवमानवाऽऽनतपदो दीनार्त्तहीनादिषु, लोकेषु प्रवितीर्य धैर्यरमया रम्यां च वर्षावधि। श्रीमन्नाभिकुलाम्बुजन्मदिनकृत् संनिर्ममे मेदिनीमाद्यस्तीर्थपतिर्निजेन निखिलां संवत्सरेणाङ्किताम् ॥ ९ ॥ निःशेषेषु विभज्य सौवतनयेष्वारोप्य राज्यं निजं, शक्रैर्निष्क्रमणोत्सवेऽत्र विहिते निर्माय षष्ठं तपः। तीर्थस्वाम्यथ साम्यदण्डकमुदीर्याद्याष्टमीवासरे, चैत्रे मासि समस्तसङ्गविरतोऽभूद्वैश्वभस्थे विधौ ॥ १० ॥ निःशेषे खलु नैर्घृण्यदानमविदत्यस्मिन् जने श्रीजिनो, यावद्वर्षमिलातले निरशनो नित्यं व्यहार्षीत्तराम्। कम्पं नाप परीषहैरपि खरैर्वातैरिवाऽद्रीश्वरो, मित्रामित्रसमाशयो गजपुरे स्वामी जगामैकदा ॥ ११ ॥ श्रीसोमाभिधभूमिशक्रतनयः संजातजातिस्मृतिः, श्रेयांसोऽभिधयाऽथ बाहुबलिनः पौत्रः पवित्राशयः। भक्त्यासक्तमना जगत्त्रयपतेरिक्षो रसेनोपदामायातेन विभोरचीकरदुरुश्रीकारणं पारणम् ॥ १२ ॥ एकं वर्षसहस्रमेकदिनवत्प्रक्षिप्य तीर्थेश्वरो, वैश्वं भं शशिनि श्रिते पुरिमतालाख्ये पुरे प्राप्तवान्। ज्ञानं केवलमष्टमेन तपसा सूर्योदये फाल्गुनकृष्णैकादशिकादिने वटमहीरुहमूलदेशे स्थितः ॥ १३ ॥ व्याख्यावेश्म चतुर्विधत्रिदशराण्निष्पादितं भक्तिकस्त्रिप्राकारमवाप्य मूर्त्तिमदिव ज्ञानादिरत्नत्रयम्। तीर्थेशः प्रथमश्चतुर्गतिभिदे धर्मं चतुर्धा सुधासध्रीच्या गिरयाऽऽदिदेश भगवान् श्रद्धालुसाधूचितम् ॥ १४ ॥ युक्ता श्रीभरतेन सिन्धुरवरस्कन्धाधिरूढा तम-

ज्यायान्ती जननी जिनस्य तु पथे श्रुत्वा वचांसि प्रज्ञोः। हर्षं प्राप्य परं ययौ शिवपुरीं पूर्वं विज्ञोस्तां पुरीं, सूनोर्ज्ञान-
वधूजुषः प्रविशतः कर्तुं नु किं मङ्गलम् ॥ १५ ॥ चक्रादिरत्ननिचयं समवाप्य जित्वा, प्रत्यर्थिनः खचरभूचरभूमिना-
थान्। लब्ध्वा रयान्निखिलभूमितलाधिपत्यं, मुख्यो बभूव भरतो भुवि सार्वभौमः ॥ १६ ॥ श्रीमन्तः पुण्डरीकप्रभृतिगण-
भृतः श्रावका भावुकाद्या, मिथ्यात्वाम्भोदवाता भरतनृपमुखाः साधुवादे प्रसिद्धाः। ब्राह्मीमुख्या व्रतिन्यः प्रथितगुणगणाः
श्राविकाः शीलवत्यः, सुन्दर्याद्या धरित्र्यां प्रथमजिनपते राजते सङ्घ एषः ॥ १७ ॥ अष्टानां कर्मणां स्वाग्विजयजल-
धिजां तीर्थपे ख्यापयद्भिरष्टाभिः प्रातिहार्यैः कुमतिषु वितरन् शीर्षबाधामगाधाम्। सौवर्णाम्भोजराज्यां सुरवितिकृ-
तायां परिन्यस्य पादौ, लोकालोकस्वरूपप्रकटननिपुणोऽर्हन् विजह्रेऽत्र मुख्यः ॥ १८ ॥ इति जिनसागरसूरीश्वरैः कृते
प्रथमजिनपतिचरित्रे। दीक्षास्वरूपवर्णनसंज्ञोऽयं द्व्युत्तरः सर्गः ॥ १९ ॥

प्रकुर्वन् कमलोल्लासं भावाभावं प्रकाशयन्। देशोनं पूर्वलक्षं स विजहार दिनेशवत् ॥ १ ॥ मोहक्षणे प्रणष्टाष्टाद-
शदोषो जिनेश्वरः। अष्टापदगिरिं प्रापाकष्टं दुष्टाष्टकर्मभित् ॥ २ ॥ मोहक्षणं प्रज्ञोर्ज्ञात्वा तत्रायुस्त्रिदशेश्वराः। चक्रभृ-
द्भरतेशोऽप्यलंचकारार्हदन्तिकम् ॥ ३ ॥ चन्द्रे प्राप्तेऽभिजिद्भिषण्यं चतुर्दशमभक्तकृत्। माघासितत्रयोदश्यां मोहमापा-
दिमोऽर्हताम् ॥ ४ ॥ शोकमस्तोकमाधाय लोकनाकीश्वरौ चिरम्। अन्यगुर्वाद्यभावेन संबोधं प्रापतुः स्वयम् ॥ ५ ॥
विहिते देहसंस्कारे देवैर्मुख्यार्हतस्ततः। चैत्यं वार्धकिरत्नेन चितोर्व्यां चक्रवान्नृपः ॥ ६ ॥ तत्र धात्रीधवः सिंहनिषद्या-
संज्ञकेऽर्हताम्। प्रतिमाः स्थापयामास चतुर्विंशतिमद्भुताः ॥ ७ ॥ स्थानं स्वं स्वं सुरेशेषु गतेषु भरतेश्वरः। नगरीं स्वाम-

लंकृत्य राज्यचिन्तां चकार च ॥ ८ ॥ एकदा स्फारशृङ्गारं विधायान्तःपुरावनौ । प्रविवेश विशामीशः स्फटिकादर्शवेश्मनि ॥ ९ ॥ रूपं निरूपयन् भूपः स्फाटिके भित्तिभूतले । एकां विलोकयामास स्वाङ्गुलिं गतमुद्रिकाम् ॥ १० ॥ वक्त्रश्रियमिवानेत्रां विरूपां वीक्ष्य तां नृपः । अन्याभ्योऽप्यङ्गुलीभ्यश्चोत्तारयामास मुद्रिकाः ॥ ११ ॥ अपरानप्यलङ्कारानुत्तार्य क्षितिनायकः । स्वं वपुर्वीक्ष्य निःश्रीकं चन्द्रबिम्बं यथा दिने ॥ १२ ॥ रङ्गद्वैराग्यगङ्गोर्मिधौतमानसकश्मलः । एवं चाचिन्तयामास पौनःपुन्येन चक्रभृत् ॥ १३ ॥ युग्मम् ॥ अहो दुर्जनमैत्रीव कृत्रिमा श्रीस्तनोरियम् । समस्त्यन्तः परं वेत्ति मूढबुद्धिर्न कश्चन ॥ १४ ॥ वरं पुष्पं वरं वस्त्रं वरं शयनमासनम् । शरीरसङ्गमासाद्य द्रुतं मालिन्यमश्नुते ॥ १५ ॥ सदा संस्कृत्य संस्कृत्य यदा संस्क्रियते न हि । दुःशिष्य इव देहोऽयं तदाऽन्यो वा भवेदिह ॥ १६ ॥ मलमूत्रादिगेहस्य कुधीर्देहस्य हेतवे । पापं कुर्यात्सुधीश्चास्य स्पृहां हित्वा श्रयेद्व्रतम् ॥ १७ ॥ बाहुबल्यादयो धन्या बान्धवा मेऽखिला अपि । यैः शरीराद्व्रतामुष्मादसारात्सारमुद्धृतम् ॥ १८ ॥ तत्त्वातत्त्वानभिज्ञोऽहं निऊया मुद्रिताहवत् । मग्नो विषयपङ्केऽत्र कथं निरयितुं क्षमः ॥ १९ ॥ इत्थं चिन्तयतस्तस्य शुद्धान्ते भरतेशितुः । तदैवोत्कण्ठिता कण्ठं केवलश्रीरशिश्रियत् ॥ २० ॥ सुरेश्वरार्पितं वेषमेष प्राप्य मुनीश्वरः । चिरं विहृत्य भूपीठे सिद्धिसौधं जगाम च ॥ २१ ॥ इत्थं यत्पुत्रपौत्रौ त्रिजगज्जनतावन्द्यपादारविन्दावाद्यार्हत्सार्वभौमौ किल समभवतां केवलज्ञानसिद्धौ । केषामेषा विशेष्या न भवति मरुदेवाभिधा सिद्धिसौधद्वाराध्वानं प्रकाश्याभवदवनितले प्रीतिदा दीपिकेव ॥ २२ ॥ इति जिनसागरसूरीश्वरैः कृते प्रथमजिनपतिचरित्रे । मोक्षस्वरूपवर्णनसंज्ञः सर्गश्चतुर्थोऽयम् ॥ २३ ॥

॥ इति श्रीयुगादिदेवचरित्रं लेशतोऽभिहितं । विस्तरार्थिना तु श्रीयुगादिदेवबृहच्चरित्रादिग्रन्थेभ्योऽवसेयमिति ॥

पुनर्वृत्तेन श्राविकाश्लाघनीयतामाह—

या श्राविकाऽप्यमलशीलपवित्रिताङ्गी, सा श्लाघ्यते त्रिजुवनेऽपि यथा सुजद्रा ।
यस्यास्त्रिवारिचुलुकाहितलोकतुष्टेः, स्रोतःसहस्रकृतमुत्सदृशी क्व गङ्गा ॥ ७२ ॥

व्याख्या—या श्राविकाऽमलशीलपवित्रिताङ्गी जवति सा त्रिजुवनेऽपि श्लाघ्यते प्रशस्यते जनैरिति शेषः । केव ? यथा सुजद्रा यथेत्युदाहरणे सा सुजद्रा विशदशीलपवित्रितदेहा सती त्रिजुवनेऽपि लोकैर्यथाऽश्लाघि । सा का ? यस्याः सुजद्रायाः सदृशी गङ्गा क्व ? अपि तु सुजद्रासदृशी गङ्गा न जवति । असादृश्ये कारणं विशेषणद्वाराऽऽह—किंजूताया यस्याः ? त्रिवारिचुलुकाहितलोकतुष्टेः वारिणः पयसः चुलुका वारिचुलुकाः, त्रयश्च ते वारिचुलुकाश्च त्रिवारिचुलुकास्तैराहिता आरोपिता लोकतुष्टिर्लोकानां प्रीतिर्यया सा तथा तस्याः । गङ्गाया हीनत्वे विशेषणमुखेनैव हेतुमाह—किंजूता गङ्गा ? स्रोतःसहस्रकृतमुत् स्रोतसां प्रवाहाणां सहस्रेण कृता मुत् प्रीतिर्यया सा तथा इत्यसादृश्यं । इति काव्याक्षरार्थः । जावार्थस्तु कथानकगम्यः । तच्चेदं (सुजद्राकथा)—

चम्पापुर्यां सनाथायां जितशत्रुमहीजृता । जिनदत्ताजिधः श्रेष्ठी बजूव परमार्हतः ॥ १ ॥ तस्य शस्यमतेः पुत्री सुजद्रासंज्ञयाऽजनि । उदाहरणमाद्यं या शीलसौन्दर्यशालिनाम् ॥ २ ॥ बुद्धभक्तेन्यसंजूतो बुद्धदासाजिधोऽन्यदा । एतां वातायनासीनां निन्ये नयनयोः पथम् ॥ ३ ॥ ययाचे जिनदत्तं स सुजद्रामनुरागवान् । परं वैधर्मिकायैष तस्मै तां न

सुतां ददौ ॥ ४ ॥ ब्रह्मना स सुन्नङ्गार्थी श्रावकत्वमशिश्रियत् । साधूपासनतो लब्धो बोधिलेशोऽप्यश्रद्धया ॥ ५ ॥ ततः साधर्मिकायास्मै जिनदत्तो ददौ सुताम् । अथो विवाहयामास तेनैतां प्रीतमानसः ॥ ६ ॥ कतिचिद्दासरान्नीत्वा निनीषुर्निजवेश्मनि । सुन्नङ्गां बुद्धदासोऽथ जिनदत्तं व्यजिज्ञपत् ॥ ७ ॥ सोऽवादीद्वत्स साधूक्तं त्वयाऽदः शुद्धधीकृता । दोषं धत्तो मृषाऽमुष्यां दुष्टौ ते पितरौ परम् ॥ ८ ॥ बुद्धदासः पुनः प्रोचे स्थापयिष्ये पृथग्गृहे । सुन्नङ्गां तत्कथं तात दोषं दातुमिमौ क्षमौ ॥ ९ ॥ ततस्तदाज्ञया तेन सुन्नङ्गा पृथगालये । पार्श्वे स्वकौकसोऽमोचि राजहंसीव पङ्कजे ॥ १० ॥ आगच्छतो गच्छतश्च विहर्तुमनगारिणः । तदगारे समीक्ष्येति दुष्टः श्वश्रूजनो जगौ ॥ ११ ॥ त्वत्प्रिया व्रतिभिः साकमेकान्ते रमते सुत । स्वायत्तं योषितां सद्म वत्स स्वेच्छां तनोति यत् ॥ १२ ॥ बुद्धदासोऽब्रवीन्मातर्मा वचोऽनुचितं वच । सा सती स्वं सतीत्वं न कल्पान्तेऽपि त्यजेद्यतः ॥ १३ ॥ दाहकः पावकः स्यान्न न च स्यादन्तकृद्विषम् । स्थिरः स्यात् पवनः क्वापि सा न स्यादसती परम् ॥ १४ ॥ दुष्टाशा इव शाकिन्यस्तस्याः श्वश्रूननान्दरः । बलं विलोकयामासुर्यथा-खूनां बिलालिकाः ॥ १५ ॥ प्राविक्षत् क्षपकः कोऽपि सुन्नङ्गामन्दिरेऽन्यदा । मुमुक्षुरक्षताचारः स्वशरीरेऽपि निर्ममः ॥ १६ ॥ तदा पपात तन्नेत्रे वातेन प्रेरितं तृणम् । प्रतिकर्मत्वतस्तच्च स मुनिर्नोदसारयत् ॥ १७ ॥ सुन्नङ्गाऽचिन्तयद्धीद्य साधोर्बाधाविधायकम् । तृणं जिह्वां ददत्येतद्बोलया[1] दूरयाम्यहम् ॥ १८ ॥ तत्कुर्वत्यास्ततस्तस्याः सीमन्तस्थितकुङ्कुमम् । भालेऽलगन्मुमुक्षोस्तज्ज्ञातं तान्यां परं नहि ॥ १९ ॥ तादग्भालं तन्मुमुक्षोर्दर्शयन् जननीजनः । बुद्धदासमवग्वत्सावधत्स्व[2]

१ जिह्वया. २ अवधारय.

प्रेयसीं सतीम् ॥ २० ॥ सोऽज्ञिज्ञानादितो ज्ञार्यां विचार्य व्यज्ञिचारिणीम् । विरागज्ञागज्ञदस्यां पापवृत्ताविव व्रती ॥२१॥ सुज्ञऽऽथ श्लथप्रीतितर्तिं वीक्ष्य निजं पतिम् । निष्कलङ्का कलङ्केन विखिन्नेदमचिन्तयत् ॥ २२ ॥ हालाहलविषप्रायै-र्विषयैः क्षुब्धचेतसाम् । मादृशानां कलङ्कोऽयं मनोबाधां दधाति न ॥ २३ ॥ परं सुरसरिन्नीरनिर्मले जिनशासने । यः कलङ्कलवो लग्नः स चुनोति मनो मम ॥ २४ ॥ विचिन्त्येति गृहे स्वीये श्रीतीर्थाधीशितुर्मुदा । सा सान्ध्यां विरचय्या-र्चामित्यज्ञिग्रहमग्रहीत् ॥ २५ ॥ जिनेशशासनम्लानिर्यावदेषा न यास्यति । तावदाधुनिकः कायोत्सर्गो नो पार्यते मया ॥ २६ ॥ जिनदत्ताङ्गसंजाता जिनशासनदेवताम् । निमित्तीकृत्य कृतवत्युत्सर्गं निर्मलाशया ॥ २७ ॥ कायोत्सर्गेण तस्थुष्या अमुष्याः शासनेश्वरी । प्राचुर्बज्ञूव तत्कालं तज्ञाग्यश्रीरिवाङ्गिनी ॥ २८ ॥ देवी जगाद मा पुत्रि खेदमुद्वह सम्प्रति । त्वत्सत्त्वान्यागता किं ते विदधे वद वाञ्छितम्॥२९॥तां प्रणत्य सुज्ञऽऽचे प्रमोदज्ञरमेदुरा । कलङ्कं शासनस्यास्ति मातरुत्तार-य द्रुतम् ॥ ३० ॥ ऊचे देवतया वत्से धृतिं धत्सेऽधुना न किम् । प्रगेऽहं सफलीकुर्वे त्वन्मनोरथपादपम् ॥ ३१ ॥ इत्युक्त्वा सा तिरोज्ञूता जिनदत्तात्मजा पुनः । त्यक्तोत्सर्गाऽक्षिपत् पुण्याद्दोषां[1] दोषावलीमिव ॥ ३२ ॥ ततः प्रातः पुरी-द्वारकपाटानि कथञ्चन । नोद्घटन्ते बलात्कृष्यमाणानि पुरुषैर्ज्ञृशम् ॥ ३३ ॥ समस्ते व्याकुलीज्ञूते सर्वतो नगरीनरे । दैवतं किञ्चिदित्येवं निरवैषीन्नरेश्वरः[2] ॥ ३४ ॥ पवित्रीज्ञूय धात्रीशः कर्पूरोत्क्षेपपूर्वकम् । प्रोचे कृताञ्जलिः कश्चिद्यो देवो दानवोऽथवा ॥ ३५ ॥ क्रुद्धोऽवज्ञावशेनास्ति स प्रसन्नोऽस्तु मेऽधुना । इत्थं कथयतीशेऽज्ञूदन्तरिक्षे वचः स्फुटम् ॥३६॥

१ रात्रीम्. २ ज्ञातवान्.

युग्मम् ॥ अत्रास्ति या सती काप्युद्घृत्य सा कूपतः पयः । तन्तुप्रोततिंतञ्जना कपाटे चुलुन्निस्त्रिन्निः ॥ ३७ ॥ अन्निषिञ्चतु पूर्वारैः कृत्यमुद्घाटितैर्यदि । श्रुत्वेति नार्यो नागर्यस्तदर्थं प्रगुणीकृताः ॥ ३८ ॥ युग्मम् ॥ ञ्चरन् कूपतो वारि चालिन्या तन्तुबञ्चया । विलक्षो नगरीनारीजनः सर्वोऽप्यजायत ॥ ३९ ॥ श्वश्रूं विज्ञपयामास जिनदत्तात्मजा निजाम् । विलोकयामि मातः स्वमहमप्यधुनाऽऽदिश ॥४०॥ श्वश्रूः स्माहेति साध्वेपं सतीत्वं ज्ञातमस्ति ते । पुरास्मान्निः साम्प्रतं तु पुरीलोकोऽपि बुध्यताम् ॥ ४१ ॥ पूर्वारुद्घाटने काचिन्महासत्यपि न क्षमा । त्वं वेदं वेशिंषे साधुसेविकाऽसि यतोऽन्वहम् ॥ ४२ ॥ सुज्ञञ्ञा स्माह सुष्ठूक्तं त्वया मातः परं शृणु । ञ्चिता पञ्चाचारेण स्वा परीक्षा ममापि हि ॥ ४३ ॥ इत्युक्त्वा तन्तुबञ्चां तां कूपे चिक्षेप चालिनी । तयाऽस्याः कृष्यमाणायाश्चिन्नैर्नाम्बुकणोऽपतत् ॥ ४४ ॥ तस्या अप्यम्बुपूर्णाया न्नारतस्तन्तुराज्यपि । म्लानिं मनागपि प्राप तल्लीलश्रीरिवात्र न ॥ ४५ ॥ प्रज्ञावावर्जितस्तस्यास्तत्रागत्य क्षितीश्वरः । इत्युवाच कपाटानि सत्युद्घाटय सम्प्रति ॥ ४६ ॥ पौरैः पुरस्कृता मन्त्रिराज्या न्नूमिन्नृता तथा । सा पूर्वगोपुरं प्राप चालिन्या दधती जलम् ॥ ४७ ॥ साऽथ पञ्चनमस्कारं कुर्वाणा तस्य वारिणः । चुलुन्निस्त्रिन्निराहृत्य कपाटे ञ्दघाटयत् ॥ ४८ ॥ दिव्यन्नूदुन्दुन्नीनादः प्रसेदुश्च दिशो दश । त्रिदशैः पौनःपुन्येन चक्रे जयजयारवः ॥ ४९ ॥ एवमेवापरापाच्योः प्रतोल्योश्च मुखे सती । ञन्मुद्यामुञ्चयद्दुर्गदुर्गत्योः सा पुनर्मुखे ॥ ५० ॥ प्रतोलीं प्राप्य कौबेर्याः प्राह काचिन्महासती । कुतोऽप्यागामिनी सैतद्वारमुन्मुञ्चयिष्यति ॥ ५१ ॥ तद्वृत्तं वर्ततेऽद्यापि पूश्चम्पोत्तरगोपुरम् । सुज्ञञ्ञाशीलमाहा-

१ तितञ्ः चालिनी. २ अहं जानामि. ३ त्वं वा ईशिषे.

त्म्यप्रतिज्रूप्रतिबिम्बवत् ॥ ५२ ॥ पौरवारपरीवारा विशुद्धा सिद्धसिन्धुवत् । समं ज्रूमिज्रुता चैत्यपरिपाटीं व्यधात् पुरि ॥ ५३ ॥ संस्थाप्य तां सतीं सद्म नत्वा स्तुत्वा धराधवः । स्थानं चमत्कृता जग्मुर्नागराश्च निजं निजम् ॥ ५४ ॥ पश्चात्तापपरैः श्रश्रूश्वशुरादिजनैरियम् । क्षमिता दयितेनापि तथैवामान्यतः स्फुटम् ॥ ५५ ॥ क्रमेण प्राप्तनिर्वेदाऽधिगम्य संयमक्रमम् । जिनदत्ततनूजाता चक्रे सुगतिसङ्गतिम् ॥ ५६ ॥ इत्थं यत्कीर्तिकर्पूरपूरः सौरज्रयत्यलम् । स्वर्ज्रुर्ज्रुवख्रयीं सा स्यात् प्रशस्या कस्य न क्षितौ ॥ ५७ ॥

॥ इति सुज्रताकथानकम् ॥

व्याख्यातं पञ्चत्रिंशत्तमं श्राविकाधारं । तस्मिंश्च व्याख्याते व्याख्याता सप्तक्षेत्री । अथ क्रमप्राप्तं षट्त्रिंशत्तमं जिनार्चाधारं व्याचिकीर्षुरादिकाव्यमाह—

पुष्पाक्षताम्बुफलचन्दनधूपदीपनैवेद्यतः प्रतिदिनं जिनपादपूजा ।
श्रीश्रेणिकादिजिनवज्जिनतादि दत्ते चक्रादयः कलशतामिव मृद्वलस्य ॥ ५३ ॥

व्याख्या—पुष्पाणि चम्पकादेः कुसुमानि, अक्षतास्तण्डुलादिकणाः, अम्बु पानीयं, फलं सहकारादेः, चन्दनधूपदीपनैवेद्यानि प्रसिद्धानि, पुष्पाणि चाक्षताश्चेत्यादिद्वन्द्वः, तेज्यस्ततः । प्रतिदिनं दिनं दिनं प्रति जिनपादपूजा कृता सती जिनतादि तीर्थकृत्त्वादि दत्ते कर्तुरिति शेषः । आदिशब्दाद्राज्यादेः परिग्रहः "देवज्रुणेण रज्जं" इत्युक्तेः । किंवत् ? श्रीश्रेणिकादिजिनवत् यथा श्रीश्रेणिकप्रमुखजनाय जिनपादपूजा जिनत्वादि ददौ । कस्य के श्व कां दिशन्ति ? मृद्वलस्य

चक्रादयः कलशतामिव यथा चक्रचीवरकुलालादयो मृद्वलस्य मृत्तिकापिण्डस्य कलशतां कुम्भत्वं ददन्ते । अत्रादि-शब्दोऽनुक्तोऽपि ज्ञातव्यः, ततश्च पिठरादिपरिग्रहः, पूर्वाचार्यप्रणीतचूर्ण्यादावप्येवं दृश्यते इत्यदोषः । चक्रादिसमाना जिनपादपूजा, कलशतादिकल्पं जिनतादिपदं, मृद्वलतुल्यः पूजाकर्ता । इति काव्याक्षरार्थः । भावार्थं तु दृष्टान्तेनाह, स चायम्—

॥ श्रीश्रेणिककथा ॥

मगधाभिधया देशः क्लेशलेशोज्झितोऽभवत् । मनुष्या यत्र दुर्भिक्षकथामपि विदन्ति न ॥ १ ॥ श्रिया राजगृहं राज-गृहं तत्राभवत् पुरम् । याचकाभावतो यत्र दातृभावो न पूर्यते ॥ २ ॥ श्रेणिकोऽपालयत्तत्र प्रजा इव निजाः प्रजाः । सौन्दर्यतः शौर्यतो योऽभवद्दर्पकदर्पहृत् ॥ ३ ॥ अन्यदा समवासार्षीद्वीरस्तत्रार्हतां वरः । विवन्दिषुरगाद्वेगात् प्रभुं भूपः सनागरः ॥ ४ ॥ देशना जाह्नवीवीचीशुचीभूताशयः प्रभोः । नृपो विज्ञपयामास जिनराजमपश्चिमम् ॥ ५ ॥ तीर्थनाथ कलाकेलिलीलालालसमानसः । विरतिप्रभृतिश्रेयो नाङ्गीकर्तुमहं क्षमः ॥ ६ ॥ तेनादिश विभो पुण्यं किञ्चिदद्य प्रसद्य मे । दुस्तरोऽपि भवाम्भोधिर्भवेद्येन सुखोत्तरः ॥ ७ ॥ ततो जिनेश्वरोऽवोचन्नृप सम्यग्निशम्यताम् । नृणां जिनार्चना-कल्पलतावत् कामितप्रदा ॥ ८ ॥ इत्थं श्रुत्वा धरित्रीश इत्यभिग्रहमग्रहीत् । जिनराजक्रमाम्भोजं पूजनीयं मयाऽन्वहम् ॥ ९ ॥ स्वस्तिकं पूरयिष्यामि प्रत्यहं पुरतः प्रभोः । यवानां रत्नहैमानामष्टोत्तरशतेन तु ॥ १० ॥ स तथैव नराधीशो

१दर्पकः कामः सिंहश्च.

विदधानो दिने दिने । प्रोल्लसत्परमप्रीत्या तीर्थकृत्कर्म निर्ममे ॥ ११ ॥ इति निशम्य जना जिनताप्रदं, जिनपदाम्बुजया-
मलपूजनम् । कुरुत सम्प्रति तत्र तथादृतिं, शिवरमा समुपैति यथा स्वयम् ॥ १२ ॥

॥ इति श्रीश्रेणिकमहाराजकथा ॥

अथापरवृत्तेन पूजाफलविशेषमाह—

स्याज्जिनार्चनकृतस्त्रिकशुध्द्या, शं विपद्यपि यथा दवदन्त्याः ।
स्वस्तरुः फलति किं न हि रोरे, नेन्दुरस्यति तृषं च चकोरे॥ ७४ ॥

व्याख्या—त्रिकशुध्द्या मनोवाक्कायनैर्मल्येन जिनार्चनं करोतीति जिनार्चनकृत्तस्य पुरुषस्य शं सुखं विपद्यपि कष्टेऽपि
जवति जायते, यथा दवदन्त्या भीमराजपुत्र्या नलराजपत्न्या विपद्यपि नलविरहमध्येऽपि त्रिकशुध्द्या जिनार्चनं कुर्वत्याः
सत्याः शं नलराज्यादिसुखं बज्रूव । ननु संपदि जिनपूजा सुखं दत्ते परं विपदि सा सुखं दत्ते न वेति केचित्संशेरते,
तत्संशयं लौकिकोदाहरणद्वयेन निराचिकीर्षुरेवमाह—स्वस्तरुः फलति किं न हि रोरे इति स्वस्तरुः कल्पवृक्षः सम्यगा-
राधितः सन् किं रोरे दारिद्र्ये सति न हि फलति ? अपि तु फलति । अथ नेन्दुरस्यति तृषं चकोरे इति च पुनरिन्दु-
श्चन्द्रो रोरे सति चकोरे चकोरनामपक्षिणि तृषं न अस्यति न क्षिपति ? अपि तु क्षिपत्येवेति समासार्थः । व्यासार्थो
दृष्टान्तगम्यः । स चायं (दवदन्तीकथा)—

अष्टापदाद्रेः सविधे समस्ति, ग्रामः समृद्धः सगराभिधानः । तत्राजवन्मुम्मुणनाम धेयः, क्षितीश्वरो वीरमती प्रियाऽस्य

॥ १ ॥ ग्रामात्कदाचिन्निरगात्सजार्यः, पापः स पापर्द्धिविधिं विधित्सुः । मुनिं मलक्लिन्नकलेवरं च, ससार्थमायातमपश्य-देकम् ॥ २ ॥ दध्यौ स पापर्धिमहामहस्य, विघ्नावहैषा मम साधुदृष्टिः । इति प्ररुष्टो व्रतिनं तु सार्थाद्धृत्वा गले राजकुले जगाम ॥ ३ ॥ अरक्ष्यत द्वादश नामिकाः स, तान्यां मुमुक्षुः खलु विप्रलाप्य । अपृच्छ्यतेत्थं कुत आगतोऽसि, क्व यासि वा ब्रूहि मुनीश्वर त्वम् ॥ ४ ॥ मुनिर्बभाषे चलितोऽस्मि रोहीतकात् पुरात्सार्थसमन्वितोऽहम् । अष्टापदाद्रौ प्रतिमा जिनानां, विवन्दिषुर्दध्र इतो भवद्भ्याम् ॥ ५ ॥ सार्थाद्भवद्भ्यां प्रवियोजितः स्यां, कथं समर्थोऽस्म्यथ तत्र गन्तुम् । तन्मे धराधीश्वर धर्मकृत्येऽन्तराऽन्तरायः समजायताद्य ॥ ६ ॥ व्यस्मारि रोषो लघुकर्मकत्वात्तं वार्तयद्भ्यामिति दम्पती-(ति)भ्याम् । विज्ञाय तावार्द्रहृदौ मुमुक्षुराख्यद्दृषं मंक्षु जिनोपदिष्टम् ॥ ७ ॥ स प्रत्यलाक्षि स्वयमेव ताभ्यां, भक्तादि-नाऽथ प्रतिपद्य तस्मात् । धर्मं ततोऽपालयतां प्रयत्नात्तावत्र यद्वद्रविणं दुराढ्यः ॥ ८ ॥ धर्मस्थिरीकारकृतेऽन्यदैतामष्टापदं शासनदेव्यनैषीत् । तत्रार्हतीस्ताः प्रतिमा निनाट्य, प्रमोदिता वीरमती प्रकामम् ॥ ९ ॥ जिनान्नमस्कृत्य च तत्र वीरमती समागात्पुरि खेचरीव । जिनं जिनं प्रत्यकरोदथाचाम्लविंशतिं जैनमतानुरक्ता ॥ १० ॥ अष्टापदार्हत्प्रतिमाललाटे, ललाट-टिका हेममयी विधाप्य । जिनानुमानेन मुदं दधाना, ततस्तपोऽसावुदयापयत्तत् ॥ ११ ॥ कालं कियन्तं प्रतिपाल्य सम्यग्जिनेन्द्रधर्मं प्रविधाय काले । अथोदभूतां त्रिदशालये तौ, सुरः सुरी चेति मिथोऽनुरक्तौ ॥ १२ ॥ च्युत्वा ततो मुम्मुणराजजीवः, पुरे वरे पोतननामधेये । धम्मिल्लकाभीरतनूजभूयं, प्रापद्यत प्रीतमना धनाख्यः ॥ १३ ॥ च्युत्वाऽथ सा वीरमती बभूव, सधर्मिणी तस्य च धूसरीति । तयोर्न दाम्पत्यजुषोर्बभूव, पार्थक्यवार्ता मनसा तनूवत् ॥ १४ ॥ स

सैरिन्नीश्चारयितुं वनान्तर्ययौ कदाचिन्मुदिरस्तदैव । प्रचक्रमे वर्षितुमम्बुपूरैर्घोरैरिव प्लावयितुं जगन्ति ॥ १५ ॥ अटन्नटव्यां निजमूर्ध्नि विघ्नच्छत्रं महावारिनिवारणाय । क्रमेण कञ्चित्प्रतिमां प्रपन्नं, वृष्ट्यार्दितं साधुमपश्यदेकम् ॥ १६ ॥ परीषहैरप्यतिदुस्सहैश्चाकम्प्रं सुपर्वाचलचूलिकावत् । समीक्ष्य तं प्राप्तकृपस्त्वधार्षीत्स्वमातपत्रं मुनिमूर्ध्नि नक्त्या ॥ १७ ॥ यतिस्ततो निष्ठितवृष्टिकष्टः, स्माज्निग्रहं मुञ्चति वृष्टिमानम् । तत्कालमेष प्रणिपत्य नक्त्या, साधुं सुधासोदरया गिराऽवक् ॥ १८ ॥ अध्वेव कालो विषमो महर्षे, तेनाधुना त्वं कुत आगतोऽसि । बभाषे एषोऽप्यथ पाणकुदेशादिहागमं यामि पुरीं च लङ्काम् ॥ १९ ॥ यातोऽथ वर्षासमयोऽन्तरायोऽन्तराऽभवन्मेऽत्र ततः स्थितोऽस्मि । विधाय वृष्ट्यन्तमज्निग्रहं तु, पूर्णेऽत्र यास्यामि पुरि क्वचिन्नोः ॥ २० ॥ आरुह्यतां मे महिषे महर्षे, मार्गो यतः कर्दमदुर्गमोऽस्ति । इत्युक्त आह स्म मुनिर्न यामो, यानेन कुर्मो हि न जन्तुपीडाम् ॥ २१ ॥ धनो निशम्येति ततोऽतिधन्यं, स्वं मन्यमानो मुनिराजमेनम् । अचीकरत् पारणकं प्रमोदात्स क्षीरकुम्भप्रतिलम्भनेन ॥ २२ ॥ ततो मुनीशाद्गृहमेधिधर्मं, धनः सभार्योऽप्युररीचकार । तपोधनः पोतनपुर्यतीत्य, वर्षा अगात् स्थानमभीष्टमेषः ॥ २३ ॥ धनो गृहीत्वा समये सभार्यः, श्रामण्यमाषाढ्य समाप्य मृत्युम् । लेश्याविशेषेण तु युग्मिनौ तौ, बभूवतुर्हैमवताख्यवर्षे ॥ २४ ॥ मृत्वा ततस्तौ त्रिदशावभूतां, सत्क्षीरकिण्किरकनामतस्तौ । तथैव दाम्पत्यजुषौ सुखानि, नव्यानि दिव्यानि किलान्वभूताम् ॥ २५ ॥ देवश्च्युतोऽथो पुरि कोशलायां, श्रीसुन्दरीकुक्षिभवो बभूव । सूनुर्नलाह्वो निषधाधिपस्य, तस्यानुजः कूबरकोऽजनिष्ट ॥ २६ ॥ नलं

१ महिषीः. २ मेघः.

कलानिधिः परिवर्धमानं, ललाटपट्टामृतरुग्वपुश्चैः । अशिश्रियत् पावनयौवनश्रीः, सर्वाङ्गमानन्दितकामिनीव ॥ २७ ॥ इतश्च जज्ञे पुरि कुण्डिनायां, भीमो नृपो भीमपराक्रमाढ्यः । तद्वल्लभाऽजायत पुष्पदन्ती, यद्रूपसाम्यं न जगत्त्रयेऽपि ॥ २८ ॥ धनप्रियात्मा दिवतश्च्युतोऽवततार कुक्षावथ पुष्पदन्त्याः । दृष्ट्वा तदा स्वप्नमिमं नृपाय, व्यजिज्ञपत्सा मुदमुद्वहन्ती ॥ २९ ॥ देवाद्य वेदास्मि सुखं प्रसुप्ता, दावाग्निभीतो भवदीयसौधे । मतङ्गजः कोऽपि समाजगाम, साक्षादिवौघो नृप संपदां भोः ॥ ३० ॥ भूपोऽवदद्देवि तवोदरेऽद्य, गर्भः शुभः कश्चिदवाततार । तौ वार्तयन्तावथ यावदेवं, शुभ्रो गजः कश्चन तावदागात् ॥ ३१ ॥ स्कन्धेऽधिरोप्याधिपतिं सभार्यं, पुरे भ्रमन्नागरिकैरपूजि । सौधं स चागाद्भुदतारयत्ता-वालीनतालीन इभः स्वयं तु ॥ ३२ ॥ सा पूर्णकालेऽथ सुतामसूत, सुराचलोर्वीव सुपर्ववल्लीम् । स ब्रह्मचारीव सहस्र-भानोः, स्वाभाविकोऽस्यास्तिलकोऽलिकेऽभूत् ॥ ३३ ॥ स्वप्नानुमानेन विनिर्ममेऽस्याः, पित्रा पवित्रा दवदन्त्यभिख्या । दिने दिने सा ववृधे प्रकामं, किं स्पर्धया तातमनोरथानाम् ॥ ३४ ॥ रणज्झणन्नूपुररम्यनादैर्मनांसि यूनां ननु भेदयन्ती । कलाकलापेन समं समाप, सा यौवनं केलिवनं स्मरस्य ॥ ३५ ॥ पुण्यातिशीतेः प्रतिमां समक्षीभूयार्हतीं निर्वृतिदेव-ताऽस्याः । समर्पयामास शशाङ्ककान्तिमिव प्रमोदं ददतीं च हैमीम् ॥ ३६ ॥ वत्सेऽवधत्से ननु षोऽशार्हत्श्रीवैश्वसेनेः प्रतिमेयमर्च्या । उक्त्वेत्यगात्साऽथ मुदं दधाना, भैमी स्वसौधं प्रतिमामनैषीत् ॥ ३७ ॥ अथान्यदा पावनयौवनावनी-मुपेयुषीं वीक्ष्य सुतां क्षितीश्वरः । कोऽस्या वरो योग्यतरो भविष्यतीति चिन्तया व्याकुलतां स भेजिवान् ॥ ३८ ॥

---

१ ललाटे. २ पुण्यातिशयात्.

प्रौढानामप्यनूढानां युवतीनां स्वयंवरः । योग्य इत्यादिशद्दूतान् नृनृदाहूतये नृपः ॥ ३९ ॥ कुर्वाणा दुर्दिनं घोटक कटक-
खुरोत्खातधूलीत्रिरेके, खाङ्कारैः कम्पयन्तो धरणिधरशिरः केचिदुच्चै रथानाम् । केचिद्वाचालयन्तो मुखमिह हरितामू-
र्जितैर्गर्जितैश्चेत्रानामायुः क्षितीशा निजनिजरमया स्पर्धमाना मिथोऽलम् ॥ ४० ॥ तत्रागमल्लीनिषधान्निधानः, समं
सुताभ्यां नलकूबराभ्याम् । भीमोऽभियानादिपुरस्सरं च, विनिर्ममे स्वागतमाश्वमीषाम् ॥ ४१ ॥ अचीकरन्नीमधराधि-
नाथः, स्वयंवरामण्डपमद्भुतर्ध्या । निवेशयामास विशामधीशाँस्तानत्र हेम्नो हरिविष्टरेषु ॥ ४२ ॥ कश्चित्कोमलपाणिना
प्रविलसल्लीलोत्पलं लालयन्, कश्चिच्चम्पकपुष्पसौरभभरं जिघ्रन्नसा[1] नृङ्गवत् । सत्पुष्पोत्करकन्दुकं करतले कश्चिन्नरी-
नर्तयन्, अन्योऽन्याहितदृष्टयो नरवरास्तस्थुस्तदा ते ततः ॥ ४३ ॥ भीमाङ्गजाता परिभ्रूषयन्ती, तां मण्डपोर्वीमविश-
त्तदानीम् । समीक्ष्य तां भूमिभृतां च चक्षुरभ्रूत्सुराणामिव निर्निमेषम् ॥ ४४ ॥ सख्या समाख्यातनरेन्द्रवृत्तया, भैम्या
नृपालान्निखिलान्विलोक्य च । स्वयंवरस्रग्गलकन्दले नलाधिपस्य सप्रीति निचिक्षिपेऽनया ॥ ४५ ॥ अहो चारु वृतं
चारु वृतमित्यूचिरेऽम्बरे । खेचरा दवदन्त्या श्रीनले सति वृतेऽद्भुतम् ॥ ४६ ॥ कृपाणमाकृष्य स कृष्णराजसूनुः समु-
त्थाय जगावदोऽथ । वृतोऽपि भैम्या मयि वर्तमाने, उघोदुमीशोऽस्त्यपरो न कश्चित् ॥ ४७ ॥ स्मित्वा नलः स्माह न रे
वृतोऽस्ति, भवाँस्तयाऽतोऽधम दूयते किम् । भैम्या वृतोऽस्मीति परस्त्रियं त्वं, समीहयन् नो नहि लज्जसे किम् ॥ ४८ ॥
उक्त्वैवमाकृष्य कृपाणमुग्रमनीनृतन्नैषधिरात्मपाणौ । सैन्यं तदानीमनयोर्जवेन सुवर्मयामास धृतायुधौघम् ॥ ४९ ॥ उप-

१ नासिकया.

स्थितोऽयं प्रलयोऽधुना मन्निबन्धनः किं करवाणि नाम । हा मन्ददैवा विधिना हताऽस्मीत्यचिन्तयन्नीमनृपाङ्गजाता ॥ ५० ॥ यद्यार्हती शासनदेवतेऽहं, तदा नलः स्ताद्विजयी तयोस्तु । अनीकयोः क्षेममिति ब्रुवाणा, ज्वटात्रयं तत्र च वारिणाऽदात् ॥ ५१ ॥ तद्वारियोगेन गतप्रतापः, कृष्णोऽभवन्निर्विषनागवत् स्राक् । कृताञ्जलिश्चाह कृतं विमौढ्यात्सर्वं सहाधीश्वर मे सहांगः ॥ ५२ ॥ नलोऽपि कृष्णं व्यसृजद्विरोषो, भीमेन जामातृगुणानुमानात् । मेने सुता पुण्यवती ततश्च, सत्कृत्य सत्कृत्य नृपा विसृष्टाः ॥ ५३ ॥ विवाहयामास महामहेन, भीमाभिधस्तौ निषधाधिपं च । सत्कारपूर्वं विससर्ज किञ्चित्तमन्वगाच्चात्र हि नीतिरेषा ॥ ५४ ॥ क्षैमीमनुज्ञाप्य निजानुपेयुषीमारोपयामास रथेऽथ नैषधिः । चचाल वेगेन स कोशलेश्वरोऽभिकोशलं हस्तिरिपुर्गुहामिव ॥ ५५ ॥ सैन्योद्धूतै रजोभिः सुबहुभिरपरा भूरभूदम्बरेऽपि, सैन्यै-र्नीराश्रयाद्वी जगति समभवद्बोशिता पङ्क्तशेषा । पन्था वाचालितो वारणमदनिपतद्भृङ्गझङ्कारवैश्चौरा नेशुर्दिगन्तं पथि चलति बले कोशलाधीश्वरस्य ॥ ५६ ॥ तपनो गच्छतस्तस्यान्तराले ऽस्तमियाय किम् । तस्योदग्रप्रतापस्य तापार्त्तिमसह-न्निव ॥ ५७ ॥ ध्वान्त एकातपत्रत्वमुपेयुष्यपि भूपतिः । स्वपुरीदर्शनौत्सुक्याद्विरराम न कुत्रचित् ॥ ५८ ॥ ध्वान्तेन रुद्धाक्षजनो न कश्चिज्जलं स्थलं वेत्ति न गर्तमुच्चम् । दृष्ट्वाऽतिकष्टाङ्कितमात्मसैन्यं, नलोऽङ्गसूसां निजगाद क्षैमीम् ॥ ५९ ॥ उपद्रुतं देवि बलं तमोभिः, प्रकाशय स्वं तिलकं सुखेन । यथैत्यदः सा परिमृज्य भालं, प्राकाशयत्तत्तिलकेन सर्वम् ॥ ६० ॥ प्रचक्रमे गन्तुमशेषसैन्यं, सुखं सुखेनाथ नलो विलोक्य । मुमुक्षुमेकं प्रतिमाप्रपन्नं, लेलिह्यमानं मधुपैरिवेन्नम्

१ अपराधं सह क्षमस्व.

॥ ६१ ॥ जगाद तातं मुनिमेनमीशं, वन्दस्व चादत्स्व फलं पथोऽस्य । गणं प्रकण्डूययिषुः करेणुरघर्षदेनं द्रुमवत्पथस्थम् ॥ ६२ ॥ तद्गण्डकण्डूयनलग्नदानसौरभ्यलुब्ध्यद्भ्रमरावलीभिः । दंदश्यमानः सहते प्रकामं, परीषहं निश्चलचित्तवृत्तिः ॥ ६३ ॥ श्रुत्वेति नक्त्या निषधः प्रभूतश्रद्धो ववन्दे तमृषीशितारम् । नलोऽपि सैन्येन युतोऽधिगत्योपायोध्यमाख्यद्वदन्त्यभीष्टम् ॥ ६४ ॥ इयं पुरी देवि विलोक्यतां नोऽर्हच्चैत्यराज्या प्रविराजमाना । तत्कालमालोक्य सहर्षमेतां, भीमाङ्गजा धन्यममन्यत स्वम् ॥ ६५ ॥ प्रावीविशत्सौवपुरे नरेशो, वधूवरं मंक्षु महामहेन । तौ दम्पती स्नेहभृतावनल्पं, लीलायितैः कालमतीयतुर्भाक् ॥ ६६ ॥ अथान्यदा श्रीनिषधान्निधान, आरोप्य राज्यं निजकं नलाख्ये । पुत्रे पुनः कूबरनामधेये, स्वं यौवराज्यं व्रतमाददे सः ॥ ६७ ॥ नलोऽनुशासत् स्वपुरीमपृच्छत्सामन्तमुख्यानपरेद्यवीदम् । भुनज्मि भूमिं किमु पैत्रिकीं वाऽधिकामिति ब्रूत ततोऽवदँस्ते ॥ ६८ ॥ पिताऽभुनक्ते भरतार्धमूनं, किञ्चित्समस्तं तु भुनक्त्यधीश । स्थाने पितुः स्यादधिकः सुपुत्रो, विज्ञास्तिरेकाऽस्ति परं नरेन्द्र ॥ ६९ ॥ उपेक्षितस्तद्भशिलापुरीशः, पूर्वं त्वया सम्प्रति लब्धवृद्धिः । दुःसाध्यतां स्मैति कदम्बनामा, समूलमुन्मूलय देव तं त्वम् ॥ ७० ॥ उन्मत्त एष प्रतिबोध्य एवमादिश्य दूतं प्रजिघाय भूपः । दूतोऽपि गत्वा त्वरितं तदन्तेऽवादीदिदं दुर्धरवाक्प्रवृत्तिः ॥ ७१ ॥ नलं भजस्वेन्दिरया रमस्व, हितं वचामीति तवैवमुक्तः । कदम्बराजो न्यगदत्सरोषं, रक्तेक्षणः क्रोधधुताधराङ्गः ॥ ७२ ॥ नलोऽस्ति सज्ञः किमयास्ति मन्दो, यन्मां न जानाति महाप्रतापम् । तद्गच्छ दूत त्वरितं रणाय, तं सज्जयैषोऽस्मि रणातिथिः स्याम् ॥ ७३ ॥ व्यजिज्ञपत्सोऽप्यखिलं तदुक्तमेत्य स्वभूपाय ततः स रुष्टः । सन्नह्य सेनासहितोऽभिगत्य, संवेष्टयामास पुरीं तदीयाम् ॥ ७४ ॥

तदा कदम्बोऽपि निरैत्ससैन्यः, सन्नह्य पुर्या अतिरुष्टचित्तः । उपक्रमंते स्म मिथोऽथ योद्धुं, क्रोधेन योधा अनयोश्च यावत् ॥ ७५ ॥ तावन्नलेशोऽजिदधे कदम्बं, किं मारितैरश्वगजादिजिनौं । युध्यावहे द्वन्द्वरणेन चावामुपक्रमेते स्म मिथोऽथ योद्धुम् ॥ ७६ ॥ नलेन युद्धे स पराबभूवे, बिन्यत्प्रविष्टः प्रपलाय्य पुर्याम् । व्रतं विरक्तः परिगृह्य तस्थौ, कदम्बराजः प्रतिमां प्रपद्य ॥ ७७ ॥ नलः कृतोत्सर्गमिमं समीक्ष्य, जगौ त्वयाऽहं विजितो व्रताढ्या । व्यावर्ण्य तत्सत्त्वधनं विधुन्वन्, शिरो ववन्दे नलराट् कदम्बम् ॥ ७८ ॥ अवीविशत्तस्य सुतं तदीये, राज्ये नलेशो जयशक्तिसंज्ञम् । अथाप्ययोध्याम-धिजग्मुषोऽस्याद्भौकनानि क्षितिपाः प्रमोदात् ॥ ७९ ॥ निजां पुरीं प्राप्य नलो नरेन्द्रश्चचतुर्बुद्धिनदीश्वरोऽपि । द्यूते प्रसक्तः समभूत् परेद्युः, कथं नु रत्नं निरुपद्रवं स्यात् ॥ ८० ॥ इमां क्षमां लामि नलाधिजित्येत्याशां दधत्कूबरनामधेयः । नलेन सार्धं रमते नितान्तं, चाण्डालवद्दुष्टमनोवचोऽङ्गः ॥ ८१ ॥ क्रीभन्नलो नालमभूद्विजेतुं, निजानुजन्मानमदैवदो-षात् । मुहुर्मुहुर्हारयितुं प्रवृत्तः, श्रियं यथेन्दुः शितिपक्षवर्तीं[1] ॥ ८२ ॥ नलानुरागेण जनोऽपि हाहा, कर्तुं प्रवृत्तोऽथ निशम्य नैमी । प्रोचे नलं नाथ विमुञ्च सद्यो, द्यूतं बतान्धंकरणं जनानाम् ॥ ८३ ॥ शुश्राव वाचं न स नीमपुत्र्या, क्षमां ददर्शापि मदाकुलो न । अथो नलं सा रुदती सबाष्पं, न्यषेधयत्स्वैः सचिवैस्ततस्तम् ॥ ८४ ॥ निषिध्यमानोऽपि न नैषधिस्तैरस्थात्ततो राज्यमहारयत्स्वम् । अन्तःपुरं चाप्यखिलं जवेन, श्रीनीमराजाङ्गजयापि साकम् ॥ ८५ ॥ नलो हारि-तसर्वस्वोऽत्याक्षीदाभरणादिकम् । जिघृक्षुरिव दीक्षां स निःशेषमपि देहतः ॥ ८६ ॥ कूबरो नैषधिं प्रोचे मामकीनां ध्रुवं

१ कृष्णपक्षवर्तीं.

त्यज । प्रदत्तां जागरूकैर्मे पुण्यैरेव पुरातनैः ॥ ८७ ॥ नलश्चचालाथ च भीमपुत्रीमनुव्रजन्तीमथ कूबरोऽवक् । द्यूते मया त्वं विजितेति मा गा, मदीयशुश्रान्तमलंकुरुष्व ॥ ८८ ॥ अथैनमूचुः सचिवाः सतीयं, छायामपि श्लिष्यति नान्यपुंसः । प्रसह्य चेऽक्षसि भूप तर्हि, विधास्यते सम्प्रति भस्मसात्त्वाम् ॥ ८९ ॥ अनुव्रजन्ती निजजीवितेशमुत्साह्यतां प्रत्युत सम्प्रतीयम् । किञ्चित्सपाथेयरथादिदानादित्युक्तमात्रो व्यसृजत्स भैमीम् ॥ ९० ॥ रथं सपाथेयमथार्पयत्स, नलस्त्वनिच्छन्नपि भीमजायुक् । आरोपितो मन्त्रिवरैः रथेऽत्र, लोके रुदत्येष निरैक्षगर्याः ॥ ९१ ॥ भीमात्मजां नैषधिरन्यधत्त, देवि क्व यामो वद सम्प्रतीतः । साऽऽहातिथीभूय पितुर्गृहे मेऽनुगृह्यतां मामकतातवर्गः ॥ ९२ ॥ गच्छन् दिशं कुण्डिनमण्डितां स, व्याघ्रौघबूत्काररवातिघोराम् । पञ्चाननोद्भेदितदन्तिदन्तालिदन्तुरां तामटवीमवाप ॥ ९३ ॥ दूता इव प्रेतपतेः किराताः, संभूय शृङ्गीध्वनिना समाययुः । आकृष्टचापा रुरुधुर्नलं च, द्विपाधिराजं भषणा इव स्राक् ॥ ९४ ॥ रथादथोत्तीर्य सभीमजोऽपि, कृपाणमाकृष्य महाभुजालः । तान् भीषयामास च कांदिशीका, दिशो दिशं तेऽपि ययुः पलाय्य ॥ ९५ ॥ भैम्या समं तानभिधावतोऽस्य, भूपस्य कैश्चिच्च रथोऽपजह्रे । वक्रत्वमासेदुषि हि स्वदैवे, किं पौरुषं बह्वपि पंफलीति ॥ ९६ ॥ तस्यामटव्यां समटाट्यमानो, भैमीं गृहीत्वा निजपाणिनाऽसौ । नलोऽथ पालाशपलाशसञ्जपुटाहृतं नीरमपाययत्ताम् ॥ ९७ ॥ परस्परं वार्तयतोररण्ये, यातोस्तयोरस्तमगादिनेशः । विधाय शय्यां तरुपल्लवाढ्यां, भीमाङ्गजां नैषधिराड् बभाषे ॥ ९८ ॥ शय्यामलंकृत्य कृशोदरीमां, प्रदेहि दुःखाय जलाञ्जलिं त्वम् । सुष्वाप भीमाङ्गरुहाऽथ तत्र, नलो जगा-

१ भीमाज्जाताभीमजा दवदन्ती तया सह वर्तते इति सभीमजः नलः.

देति च तत्पुरस्तात् ॥ ९९ ॥ देव्याश्रमोऽत्रास्त्यथ तापसानां, कुवासनावासितमानसानाम् । तत्सङ्गतिर्नैव कृता हिताय, कुनीतिवत्तेन न सा विधेया ॥ १०० ॥ यावत्प्रमीलां मिलति स्म पञ्चनमस्कृतिं नीमसुता स्मरन्ती । श्रीनैषधिश्चिन्तयति स्म तावदुपास्थितायं व्यसनाम्बुराशिः ॥ १०१ ॥ नराधमास्ते श्वशुरं श्रयन्ते, विपत्सु येऽतः कथमेमि तत्र । दम्भोलि-सात्स्वं हृदयं विधाय, मुक्त्वा प्रियां कुत्र च रङ्क्वेऽहं[1] ॥ १०२ ॥ शीलप्रज्ञावाङ्नविता न कश्चिदुपद्रवो नीमतनूरुहायाः । इत्यक्षराण्येष लिलेख तस्या, वस्त्राञ्चले सौवविलोहितेन ॥ १०३ ॥ मार्गो वटालंकृतया दिशैति, श्रीकुण्डिनेऽन्योऽपि च कोशलायाम् । गन्तेर्यथेहं सुभगे त्वमार्य्यां, न कुत्रचित्स्थातुमहं त्वधीशः ॥ १०४ ॥ इत्थं लिखित्वाऽथ रुदन्नशब्दं, प्रचक्रमे गन्तुमयं नृशक्रः । प्रत्यूषकाले दवदन्त्यपश्यत्, स्वप्नं प्रसुप्तेति सुखं सुखेन ॥ १०५ ॥ यदस्मि फुल्ले फलिते रसाले, आरुह्य चादं किल तत्फलानि । नागोऽप्यकस्मादुदमूलयत्तं, पपात तस्मादिव पक्वपत्रम् ॥ १०६ ॥ नैमी प्रबुद्धा तमवी-क्षमाणा, दध्यौ मुखक्षालनहेतवे सः । कालेऽधुना जीवनमानिनीषुर्जलाशये क्वापि गतः पतिर्मे ॥ १०७ ॥ क्षणं प्रतीक्ष्या-प्यसमीक्ष्य कान्तं, सगद्गदं नूमिरुहान् जगाद । प्रदर्श्यतां मे दयितस्ततोऽप्यदृष्ट्वा निजस्वप्नविचारमाधात् ॥ १०८ ॥ चूतद्रुमो नैषधिराट् फलानि, राज्यं तदीयं फलनक्षणं च । नोगा यदुन्मूलनमस्य राज्यादुत्थाप्य दैवेन निरास्यतासौ ॥ १०९ ॥ यच्चास्मि वृक्षात्प्रपपात तेन, भ्रष्टा नलाद्दुर्लभदर्शनो मे । स्वप्नानुमानात्स नविष्यतीति, स्वप्नार्थमेषा परिनिर्णिनाय ॥ ११० ॥ युग्मम् ॥ दध्यौ ततोऽहं नलतोऽपि राज्याद्भ्रष्टाऽधुना किं करवाणि दैव । सा मुक्तकण्ठं विललाप किं

---

१ गे इति गाङ्गतौ इत्यस्य लटि उत्तमपुरुषैकवचनम्. २ जलम्.

स्यात्राणं स्त्रियः कान्तमृते विपत्सु ॥ १११ ॥ तत्याज मां नाथ कथं निराशां, ज्ञाराय किं स्यां ज्ञवतोऽधुनाऽहम् । किं केसरा केसरिणो ज्ञवित्री, ज्ञाराय ज्ञीरो किमिज्ञस्य शुएगा ॥ ११२ ॥ ते पादपास्तेऽपि महीज्ञृतस्ते, मार्गा अरण्यं च तदेव सा ज्ञूः । एकं न पश्यामि नलं सहेलं, मत्प्राणवित्राणविधौ समर्थम् ॥ ११३ ॥ ज्ञटन्त्यटव्यां रुदती समीक्ष्याह्- राणि तान्यम्बरदेश एषा । सा वाचयित्वा मुदितेति दध्यावहं पितुर्वेश्मनि याम्यमुष्मात् ॥ ११४ ॥ तदा तदादेशवशं- वदा सा, ज्ञीमाङ्गजा तातगृहे यियासुः । न्यग्रोधमार्गेण विनिर्जगाम, दावाग्निज्ञीता करिणीव तस्मात् ॥ ११५ ॥ महर्द्धिकं मार्गगतं च सार्थं, समीक्ष्य ज्ञैमी बहुदस्युरुद्धम् । ज्ञयातुरान् सार्थनरानवादीन्मा ज्ञैष्ट मा ज्ञैष्ट करोमि रक्षाम् ॥ ११६ ॥ चौरानवोचन्ननु यात यात, रे रेऽन्यथा वोऽस्म्यथ संहरिष्ये । इत्येवमाकर्ण्य पलायितं तैः, काकैरिवाहो लकुटादिपा- तात् ॥ ११७ ॥ तत्सार्थलोका जगुरेवमेषाऽऽगात्कापि देवी निजज्ञाग्ययोगात् । या साम्प्रतं वो(नो)निखिलानरक्षद्दस्युन्य एणानिव कुञ्जरारेः ॥ ११८ ॥ तां सार्थनाथोऽपि जगौ प्रणम्यारण्ये कथं ज्ञाम्यसि तापसीव । कुतस्त्वमागा वद देवि साऽवक्, प्राच्यां प्रवृत्तिं सकलां तदानीम् ॥ ११९ ॥ नलस्य पत्नीति ममापि पूज्या, ज्ञीतस्त्वया तस्कररक्षयाऽहम् । पुनीहि तन्मां मम गेहमेत्य, सतीपदाम्भोजरजो यतोऽर्च्यम् ॥ १२० ॥ उक्त्वेति सार्थाधिपतिः स्वकीयपटालये ज्ञीम- सुतां च नीत्वा । देवीमिवाराधयतोऽस्य वर्षाकालः समागाद्गजवद्विगर्जन् ॥ १२१ ॥ त्रिरात्रमब्विन्नतयाऽथ वर्षे वर्षे स्थिते वारिधरेऽत्र सार्थम् । विहाय ज्ञैमी निरगात्स्वधैर्यादेकाकिनी पूर्वमिवोरुशीला ॥ १२२ ॥ नलप्रवासादपि ज्ञीमपुत्री, सती चतुर्थादितपो दधाना । शनैः शनैर्मार्गमतित्रजन्ती, यमाङ्गजन्मानमिवाप रक्षः ॥ १२३ ॥ क्षुत्क्षामकुक्षेर्मम सम्प्रतीदं,

ऋद्यं बभूव त्वरितं तदह्नि । एवं वदन्तं च तमाह नैमी, श्रुत्वा वचश्चेष्टय मे यथेष्टम् ॥ १२४ ॥ न मृत्युऋीरस्ति मम प्रकृष्टार्हत्या नृजन्मास्ति पुनः कृतार्थम् । परं स्पृशन्मां परयोषितं त्वं, शापैः कथं नन्दसि मामकीनैः ॥ १२५ ॥ तदीय-धैर्यादिति राक्षसोऽपि, तुष्टोऽवदत् पुत्रि वरं वृणु त्वम् । सोवाच तुष्टो यदि तर्हि वग्धि, कदा क ऋावी पतिसङ्गमो मे ॥ १२६ ॥ विज्ञाय चैषोऽवधिसंविदाऽवक्, पितुर्गृहे सुन्दरि ते स्थितायाः । स द्वादशाब्दीमतिनीय तत्रायातो मिलिष्य-त्यवधेहि वत्से ॥ १२७ ॥ ऋजे ऋण त्वं यदि तेऽथ पित्रालये नयेऽहं ह्रणमात्रतोऽपि । सा स्माह नाहं सह यामि चान्य-नरेण ते स्वस्ति ऋवे[1] व्रजाथ ॥ १२८ ॥ विज्ञाय सा द्वादशहायनीं तत्प्रवासमेषाऽऽऋरणादिसर्वम् । अन्यग्रहीद्यावदयं समेति, प्राणेश्वरः श्रीनलनामधेयः ॥ १२९ ॥ सा प्रावृषं ऋधरकन्दरायामत्येतुमस्थात्प्रतिमां विधाय । सुमृन्मयीं शान्ति-जिनेश्वरस्य, तां पूजयन्ती मुदिता त्रिवेलम् ॥ १३० ॥ एतामपश्यन्नथ सार्थनाथ, ऽयाय तत्रानुपदं गुहायाम् । समीक्ष्य नैमीं स ऋशं जहर्ष, सा वार्तयामास च यावदेनम् ॥ १३१ ॥ तत्तापसाः केऽपि समेत्य तत्र, मृगा ऽवास्थुर्मुदिरस्तदा-नीम् । प्रचक्रमे वर्षितुमम्बुना ते, ऋीता जगुः सुन्दरि रक्ष रक्ष ॥ १३२ ॥ तान् कांदिशीकान्निजगाद नैमी, मा नैष्ट मा नैष्ट मयीह सत्याम् । विधाय तेषां परिधौ तु कुण्डमऋाषतेदं नृपऋीमपुत्री ॥ १३३ ॥ यद्यार्हती स्यामहमत्र तर्हि, कुण्डा-दतोऽन्यत्र पयोधरोऽयम् । वर्षत्वथास्यास्तपसः प्रऋावान्न बिन्दुरेकोऽपि पपात कुण्डे ॥ १३४ ॥ अन्यत्र कुण्डाऋिरिग-ह्वराण्यम्बुना समन्ताद्विऋरांबभूवुः । वीक्ष्येति सार्थाधिपतापसास्ते चमत्कृताश्चेतसि सर्व एव ॥ १३५ ॥ जगाद सार्थाधि-

१ ऋवेदिति साधु.

पतिश्च कोऽयमुपास्यते सुन्दरि साऽप्यजानीत् । श्रीतीर्थनाथो ननु षोऽशोऽयं, संकल्पनाकल्पतरुर्जनानाम् ॥ १३६ ॥
निशम्य सम्यग्जिनधर्ममस्यास्ते तापसाः सार्थपतिश्च बुद्धाः । तत्प्रत्यपद्यन्त जिनेन्द्रधर्मं, कृतार्थयन्तो निजजीवितव्यम् ॥ १३७ ॥ निवेशयामास स सार्थनाथः, स्वयं पुरं तत्र च तापसानाम् । बुद्धा यतः पञ्चशती ततस्तत्पुरं प्रसिद्धं भुवि तापसाख्यम् ॥ १३८ ॥ अचीकरत्सार्थपतिर्विहारं, श्रीशान्तितीर्थाधिपतेः पुरेऽत्र । ते तापसाः सार्थजनोऽखिलोऽप्य-तिनिन्यिरे धर्मपरास्तु कालम् ॥ १३९ ॥ कञ्चित्कदाचिच्छिखरे गिरेः सा, विलोकयामास मुमुक्षुमेकम् । सुरासुरैः सेव्रि-तपादपद्मं, सिंहाभिधं केवलवित्प्रशस्तम् ॥ १४० ॥ जैमी समं तापसपौरलोकैस्तं वन्दितुं तत्र जगाम भक्त्या । ते द्वादशावर्तकवन्दनेनाभिवन्द्य तत्पादपदे निषेदुः ॥ १४१ ॥ आगाद्यशोभद्रगुरुस्तदैव, विज्ञाय तं केवलिनं स्वशिष्यम् । चकार केवल्यपि देशनां तत्पुरः सुधासोदरया गिराऽसौ ॥ १४२ ॥ ते तापसाः सार्थपतिस्त्ववोचन्नेवं पुनः केवलिनः पुरस्तात् । अस्माकमेषा जिनधर्मदात्री, ततश्च सोऽपि प्रशशंस जैमीम् ॥ १४३ ॥ महार्द्धिकः कोऽपि सुरस्तदानीं, समेत्य तं केवलिनं प्रणत्य । नलाङ्गनां स्माह तपोवनेऽत्राहं तापसः कर्पर इत्यभूवम् ॥ १४४ ॥ पञ्चाग्निसंसाधकमप्यमी नो, नमन्ति मां नाप्यभिवादयन्ति । ततोऽभिमानान्निरगां विहाय, तपोवनं दुर्जनमन्दिरं वा[1] ॥ १४५ ॥ व्रजन् रजन्यां गिरिकन्दरायां, रदैस्तदास्फालनतोऽस्मि मुक्तः । वीक्ष्यापि तद्वेदनयार्दितं मां, ते तापसा नापि बभाषिरे तत् ॥ १४६ ॥
जाज्वल्यमानोऽस्मि रुषा विपद्यारण्येऽभवं तेन महोरगोऽत्र । अधाविषं त्वां प्रति तन्व्यशाम्यं, नमस्क्रियां त्वच्च तयाऽस्मि

१ श्व. २ अश्रौषम्.

दध्रे ॥ १४७ ॥ धर्मं तदानीं परिकथ्यमानं, त्वया पुरस्तादथ तापसानाम् । शुश्राव यो जीववधं विधत्ते, श्वभ्रातिथिः सोऽनुभविष्यतीति ॥ १४८ ॥ श्रुत्वेति संजातकृपस्य मुक्तहिंसांहसः पश्यत एवमेतान् । जातिस्मृतिः स्रागुदपद्यताथ, मया तया पूर्वभवोऽप्यबोधि ॥ १४९ ॥ संप्राप्य वैराग्यमथाद्भयं ऽागहं विपेदेऽनशनं विपद्य । सौधर्मकल्पे कुसुमप्रभाख्यः, सुरोऽभवं किं तपसा ह्यसाध्यम् ॥ १५० ॥ नमस्क्रियां सुन्दरि ते न चेदश्रोष्यं कथं तर्हि सुरोऽभविष्यम् । स्मरन् गुणाँस्तेऽवधिसंविदाऽहं, स त्वां दिदृक्षुस्तु समागतोऽत्र ॥ १५१ ॥ देवोऽवदत्सोऽपि च तापसानामेवं मम क्रोधफलं निशम्य । स्वप्नेऽपि कोपो न विधेय एवार्हद्धर्ममार्गः परिषेवनीयः ॥ १५२ ॥ ततो न्यगादीत् कुलपोऽपि रङ्गत्संवेगभृत्केवलिनं प्रतीदम् । बाल्येऽपि दीक्षां कथमग्रहीस्त्वं, जगाद सोऽपीति निजं स्वरूपम् ॥ १५३ ॥ नलानुजन्मा पुरि कोशलायां, श्रीकूबरेशोऽस्ति तदङ्गजोऽहम् । आगच्छतो मे परिणीय मार्गेऽमिलद्यशोभद्रगुरुस्ततोऽयम् ॥ १५४ ॥ प्रणम्य तद्देशनया प्रबुद्धः, पप्रच्छ तं ब्रूहि कियन्मदायुः । दत्तोपयोगोऽवददेष पञ्चदिनीप्रमाणं च ततोऽस्म्यजैषम् ॥ १५५ ॥ मां स्माह सूरिर्ननु मा स्म जैषीरादत्स्व वत्स व्रतमार्हतं त्वम् । अदीर्घकालिक्यपि भद्र दीक्षा, स्वर्गापवर्गादिफलप्रदा यत् ॥ १५६ ॥ ततः परिव्रज्य तदन्तिकेऽहमिहागमं ध्यानबलादवापम् । श्रीकेवलं चेति वदन् स्वयोगान्निरुध्य शिश्रिये परमं पदं सः ॥ १५७ ॥ ततो यशोभद्रगुरोः समीपे, जग्राह दीक्षां कुलपो विरागः । तामेव जैमीमपि याचमानां, जगौ गुरुः सम्प्रति नासि योग्या ॥ १५८ ॥ आगत्य सूरिः खलु तापसाख्ये, पुरे प्रतिष्ठाय तदेव चैत्यम् । संबोध्य लोकान् विजहार सप्तवर्षीं व्यतीयाय नलाङ्गनात्र ॥ १५९ ॥ कोऽपीति पान्थोऽकथयत्तवाद्य, भर्ता मया हे दवदन्ति दृष्टः । तद्वब्दमाकर्ण्य

मुदं दधाना, साऽधावतैतं प्रति कन्दरायाः ॥ १६० ॥ ददर्श तं क्वापि न पान्थमेषाऽत्याह्वीद्गुहामप्यवनीशपुत्री । त्रष्टो-
त्रयात्र्यामत्रवद्रुरोदाश्रान्तं महारण्यगता मृगीव ॥ १६१ ॥ ततश्च तामेव गुहां व्रजन्त्या, त्रैम्या पथेऽत्रीति भृशं वदन्ती ।
रक्षोऽङ्गना वीक्ष्य निजेन शीलबलेन रुद्धा ननु दुर्गतिर्वा ॥ १६२ ॥ ततो व्रजन्त्यब्विकलेऽपि देशे, पदे पदे वारि तृषा-
तुरा सा । आसादयन्त्यध्वनि घोरखेदखिन्ना निविष्टा वटवृक्षमूले ॥ १६३ ॥ समीक्ष्य सा भूपसुताऽथ पान्थैरूचेऽसि
का त्वं कथमागताऽत्र । सोचेऽस्मि मर्त्याऽत्र च सौवसार्थभ्रष्टाऽपतं किं करवाण्यथाहम् ॥ १६४ ॥ निवेदितं सार्थपते-
रिदं तैरागत्य सोऽप्यत्र च तां बभाषे । चेदेषि सार्थे मम तर्हि पुत्रि, स्थाने नयेऽहं वसतिं क्वचित्त्वाम् ॥ १६५ ॥ सुता-
मिवारोप्य रथे पितेव, स प्रस्थितो भीमसुतां रयेण। प्राप्याचलाख्यं पुरमेष भैमीं, मुक्त्वाऽगमत्सार्थपतिस्ततोऽग्रे ॥१६६॥
जगाम वाप्यामिह भीमपुत्री, तृषातुरा राजमरालिकेव । तत्रैक्षयतैषा जलहारिणीभिश्चमत्कृताश्चेतसि तास्तदानीम् ॥१६७॥
तत्रास्ति राजा ऋतुपर्णनामा, तज्ञेहिनी चन्द्रयशोऽभिधाना । तच्चेटिकाभिश्च निरीक्ष्य तत्र, स्थिता स्वराज्ञ्यै विनिवेदिता
सा ॥ १६८ ॥ देव्यस्ति काचित्सुभगा सुरूपा, देवीव वाप्याः सविधेऽत्र बाला । सा स्माह तामानयतास्मि चन्द्रवत्याः
स्वपुत्र्या विदधे सखीं यत् ॥ १६९ ॥ गत्वा तदन्ते जगदुश्च दास्यो, राज्ञी तवाज्ञापयतीति भद्रे । त्वं मेऽतिथीभूय मदी-
यसद्म, पवित्रय स्वीयपदाम्बुजाभ्याम् ॥ १७० ॥ उक्त्वेति भूपौकसि भीमपुत्री, निन्येऽथ ताभिर्विनयोन्मुखीभिः । राज्ञी
स्वसा साऽपि च पुष्पदन्त्या मातृष्वसैषेति न वेत्ति सा तु ॥ १७१ ॥ बाल्येक्षितां साऽनुपलक्ष्य भैमीं, सुताधिकं प्रेम परं

१ इव. २ अहम्.

दधेऽस्याम् । प्रमाणमन्तःकरणं परीक्षाविधौ जगत्यां ननु मित्रशत्र्वोः ॥ १७२ ॥ सगद्गदं सा निजगाद राज्ञ्या, पृष्टेति
ज्ञे कथयासि का त्वम् । ज्ञीमाङ्गजाऽहं स्वधवेन सार्धं, याती वियुक्ता पथि संगता च ॥ १७३ ॥ पुराद्बहिश्चन्द्रयशा
नितान्तं, दीनादिकानां विततार दानम् । तां स्माह ज्ञैम्यत्र ददामि दानमायाति यन्मे दयितः कदापि ॥ १७४ ॥ एषा
तदादेशमवाप्य दानं, नलाशयात्क्लेशसहा ददाना । दानार्थिनं पृच्छति संततं क्वापीदृग्वयाः कोऽपि नरोऽत्र दृष्टः ॥ १७५ ॥
आरुक्कैर्बद्धमियं तु दानशालास्थिता तस्करमैक्षतैकम् । अपृच्छदेतान् किमनेन चक्रे, येनेदृशीं प्राप दशां वराकः ॥ १७६ ॥
एषोऽहरद्रत्नकरण्मिकां राट्पुत्र्याश्च तैरित्युदिते स दस्युः । ज्ञैमीं प्रणम्याह नु रक्ष रक्ष, यशस्विनीतो मरणाद्वरण्ये
॥ १७७ ॥ ज्ञीमात्मजा जल्पति मा स्म ज्ञैषीस्त्वज्जीवितव्ये कुशलं समस्ति । इत्येनमाश्वास्य सतीत्वयोगाच्चिच्छेद तद्बन्धन-
जातमाशु ॥ १७८ ॥ कोलाहलोऽभूदिति भूमिपोऽपि, तत्रागमद्विस्मितमानसोऽवक् । श्रेयस्करीयं ननु राजनीतिर्दुष्टेष्टयो-
र्निग्रहपालने यत् ॥ १७९ ॥ ज्ञे ततो मुञ्च यथा निगृह्णीमहे महापापममुं जगौ सा । राजन् कथं तं शरणं प्रपन्नं,
मुञ्चामि धर्मो मम नैष यस्मात् ॥ १८० ॥ तन्नो निगृह्णाम्यमुमस्मि चेत्स, चौर्यं न कुर्यादिति भूभृतोक्ते । चौर्याच्च मृत्यो-
रिव रक्षितोऽसौ, तया ततोऽपृच्छयत कोऽसि ज्ञोस्त्वम् ॥ १८१ ॥ प्रोवाच चौरो वत तापसाख्यपुरे वसन्ताग्निधसार्थ-
राजः । दासोऽस्म्यहं पिङ्गलनामधेयस्तत्कोशसारं निरगां प्रगृह्य ॥ १८२ ॥ लुण्टाककूटैः पथि लुण्टितोऽहं, नश्यँस्ततोऽ-
त्रागममेष मातः । मया प्रयाता पुरि राजहर्म्ये, स्म दृश्यते रत्नकरण्मिका सा ॥ १८३ ॥ एतां तदादाय विनिर्जगाम,

१ ज्ञीमनाम्नः कस्यचित्पुरुषस्याङ्गजेत्यर्थः कर्तव्यः, न तु ज्ञीमराजस्येति, एवं चात्र दवदन्त्या अनुपलक्षणमेव ज्ञातव्यं.

ततोऽस्मि बद्धो धरणीन्द्रपुंजिः । तैर्नीयमानः सुजगे वधार्थं, महासति त्वं पथि मामरक्षः ॥ १८४ ॥ अन्यच्च तस्मात्त्वयि निर्गतायां, पुरात्स सार्थाधिपतिर्वसन्तः । तत्याज भुक्त्याद्यपि सप्तरात्रं, संबोधितोऽन्यैर्बुभुजेऽष्टमेऽह्नि ॥ १८५ ॥ दृष्ट्वा च नैमी तमुवाच भद्रं, दुष्कर्म चक्रे त्वयकातितीव्रम् । प्रगृह्य दीक्षामथ निस्तर त्वं, सोऽवक् प्रमाणं तव वाङ्ममाम्ब ॥ १८६ ॥ तदानगारद्वयमाजगाम, प्रणम्य नैमी तददो बभाषे । प्रसद्य साधू व्रतमस्य दत्तं, प्राव्राज्यताज्यामयमाशु दस्युः ॥ १८७ ॥ इत्यन्यदा क्षीमधराधिराजोऽश्रौषीन्नलेशो हतकूबरेण । द्यूतेऽधुना हारितराज्यपद्मः, प्रवासितोऽसौ दवदन्त्युपेतः ॥ १८८ ॥ ततो महारण्यगतो न जाने, जीवन्मृतः क्वापि नलोऽधुनाऽस्ति । श्रुत्वेति क्षमीशमुखाच्च पुष्पदन्ती रुरोदाथ विमुक्तकण्ठम् ॥ १८९ ॥ राज्ञा तदन्वेषणहेतवेऽथादिष्टो बटुः स्वाग्घरिमित्रनामा । संशोध्य सर्वत्र पुरेऽचलाख्ये, ययौ ततः सोऽपि नृराट्सभायाम् ॥ १९० ॥ पप्रच्छ तं चन्द्रयशा निषण्ण(ण्णा), राज्ञः पुरो भूपतिपुष्पदन्त्योः । क्षेमं समस्तीति ततोऽवदत्स, सर्वत्र शर्मास्ति परं शृणु त्वम् ॥ १९१ ॥ क्षेमं नलस्याथ तदङ्गजाया, नास्तीति चोक्ते कथमित्यवोचत् । राज्ञी ततः स्माह बटुः समस्तां, द्यूतात्समारभ्य कथां तदीयाम् ॥ १९२ ॥ तां दुःश्रवां चन्द्रयशा निशम्य, रुरोद लोकोऽप्यखिलः सभायाः । दुःखातुरान् वीक्ष्य बटुर्बुभुक्षाक्षामोऽगमद्दानगृहाजिरेऽसौ ॥ १९३ ॥ नैमीमुपालक्ष्य स दानशालाधिकारिणीं प्रीतमना ववन्दे । ऊचे च केयं तव देव्यवस्था, कटप्राणिनीन्दोरिव वासरे खे ॥ १९४ ॥ दृष्टासि सम्प्रत्यपि देवि भद्रं, तदेव मे स्वस्ति समस्तु तेऽद्य । उत्थाय राज्ञीं समवर्धयत्तामत्रास्ति नैमीति वदन् बटुः सः ॥ १९५ ॥ निशम्य तच्चन्द्रयशा इमामालिलिङ्ग वल्लीव सुवंशयष्टिम् । जगौ च वत्से सह मेऽपराधं, मयात्र येनास्युपलक्षिता नो ॥ १९६ ॥

॥१४१॥

प्रगोप्य तु स्वं हतवञ्चिताऽहं, पुत्रि त्वया ब्रूहि किमद्य यावत् । वत्से त्वयाऽमोचि नलेश्वरः किं, मुक्ताथ किं त्वं दयितेन तेन ॥ १९७ ॥ वत्से स मुक्तो ननु नो ज्ञवत्या, तेनोज्झितासीति वितर्कयामि । बाले क्व वा ते तिलकोऽर्कमित्रं, सहोद्भवः साम्प्रतमादिशास्मान् ॥ १९८ ॥ ज्ञीमाङ्गजाता परिमृज्य ज्ञालं, प्राचीकटन्मञ्जुलललाटिकां ताम् । विज्ञूष्य राज्ञी च विज्ञूषणैस्तां, निनाय राज्ञः सविधे विधिज्ञा ॥ १९९ ॥ नृपोऽपि तां वीक्ष्य सविस्मयं स्वां, देवीमवादीत्सवितेव दीप्रम् । ज्ञाले किमस्या निजगाद सा तं, सांसिद्धिकोऽस्यास्तिलकोऽस्ति राजन् ॥ २०० ॥ पप्रच्छ राजाऽप्यतिविस्मितस्तां, कथां तदीयां रुदती जगौ सा । कथां स्वकीयामथ ज्ञूमिपोऽपि, संमृज्य तन्नेत्रयुगं जगाद ॥ २०१ ॥ सतीशिराः सुन्दरि मा स्म रोदीर्वत्से न कश्चिद्बलवान् विधातुः । अत्रान्तरे कोऽप्यमरः समागादेतां नमस्कृत्य जगाद चेति ॥ २०२ ॥ त्वदाज्ञया पिङ्गलकोऽस्मि चौरः, प्राप्तव्रतोऽगां करवीरज्ञूमौ । चित्यानलेन प्रतिमास्थितोऽहं, दग्धो विपद्य त्रिदशोऽज्ञवं च ॥ २०३ ॥ ज्ञात्वाऽवधेः पूर्वज्ञवं तवोपकारं तथाऽऽगां ज्ञवतीं दिदृक्षुः । उक्त्वेति हेम्नः परिवृष्य सप्तकोटीस्तिरोऽज्ञूत्त्रिदशः स दस्युः ॥ २०४ ॥ एतेन साक्षात्कृतशर्मजातं धर्मं समीक्ष्यैव नृपः प्रपेदे । ऊचे बटुस्तं क्षितिनाथमेतां, देवाऽऽदिशाऽऽयाति पितुर्गृहे यत् ॥ २०५ ॥ स्वसेनया सार्धमथादिदेश, गन्तुं स ज्ञैमीं पुरि कुण्डिनायाम् । राज्ञीमनुज्ञाप्य चचाल साऽपि, श्रुत्वेति ज्ञीमोऽज्ञिजगाम पुत्रीम् ॥ २०६ ॥ एषाऽपि तस्मिन् परिदृष्टमात्रे, ननाम तत्पादयुगं सहर्षम् । सहागता तत्र च पुष्पदन्त्यालिलिङ्ग पुत्रीं यमुनेव गङ्गाम् ॥ २०७ ॥ तत्कण्ठमालिङ्ग्य रुरोद मुक्तकण्ठं सदुःखं नलराजज्ञार्या । ते वार्तयामासुरथो मिथोऽपि, निजं निजं दुःखमिहोज्झिरन्तः ॥ २०८ ॥ अङ्के समारोप्य च पुष्पदन्ती, तामाह ज्ञाग्यं ननु

मे समस्ति । आयुष्मती येन विलोकिता त्वमत्र स्थिता ऽद्यसि पुत्रि ! कान्तम् ॥ २०९ ॥ हृष्टो नृपः पञ्चशतीं पुराणा-
मदत्त तस्मै बटवे तदानीम् । रोमाञ्चितोऽथो नलराजपत्न्यागमोत्सवं सप्तदिनीमकार्षीत् ॥ २१० ॥ विदर्भनाथोऽवददष्ट-
मेऽह्नि, नलाङ्गनां पुत्रि तथा करिष्ये । संगंस्यते यद्दयितस्त्वयाशु, जहीहि दुःशीलमिवाशु दुःखम् ॥ २११ ॥ तदा नलो
ऽग्नीमसुतां विहायारण्ये ऽगमन्नैक्षत धूममुग्रम् । निमेषमात्रेण तु तत्र वह्निं, ज्वालावलिद्योतितदिग्विभागम् ॥ २१२ ॥
तस्मिन् प्रदीप्ते दवहव्यवाहे, शुश्राव वाणीमिति मानुषीं सः । ऐक्ष्वाकुभूपालशिरोऽवतंस, मां रक्ष रक्षाशु नलक्षितीश
॥ २१३ ॥ ततश्च तं शब्दमभिव्रजन् स, प्रैक्षिष्ट वह्नीवनगं महाहिम् । पप्रच्छ तं वेत्सि कथं नृजाषां, नामान्वयौ मेऽत्र
वद स्फुटं त्वम् ॥ २१४ ॥ सर्पोऽन्यधात्पूर्वमहेऽस्मि मर्त्यो, वाणीं तदभ्यासवशेन नृणाम् । जानामि ते नामकुलक्रमौ
चावधेर्नलाधीश्वर रक्ष माऽतः ॥ २१५ ॥ जातानुकम्पोऽथ स कम्पमानाहेः कर्षणाय स्वपटीं प्रसार्य । निवेश्य तं तत्र
नलो विमोक्तुं, प्रचक्रमे चोषरदेशमाप्य ॥ २१६ ॥ स दन्दशूकोऽदशदस्य हस्ते, नलोऽवदत् सूपकृतं त्वयैतत् । ममोप-
कर्तुर्ननु पाययेद्यः, पयो ऽवह्निः स हि दृश्यते ऽधाक् ॥ २१७ ॥ प्रजल्पतश्चेति नलस्य कुब्जीबभूव गात्रं जगतोऽपि
निन्द्यम् । आशीविषस्योग्रविषप्रयोगादचिन्तयन्नैषधिराऽथैवम् ॥ २१८ ॥ रूपादतो मामकजीवितव्यं, मुधैव तेनास्मि
परिव्रजामि । एवं नले ध्यायति सोऽहिरूपं, त्यक्त्वा सुरोऽजायत दिव्यरूपः ॥ २१९ ॥ ऊचे च भूमीश्वर मा विषीद,
पिता तवाहं निषधाभिधानः । वितीर्य राज्यं तव लब्धदीक्षो, मृत्वा सुरः पञ्चमकल्पजोऽहम् ॥ २२० ॥ ज्ञात्वाऽवधे-

१ माम्. २ सुष्ठु उपकृतम्.

स्त्वेतिदशां प्रपन्नं, महोरगीभूय मयाऽसि दष्टः । विरूपताऽकारि मयैव तेऽङ्गे, तत्कारणं वत्स निशम्यतां त्वोः ॥ २२१ ॥ दासीकृताः सन्ति नृपास्त्वया ये, त्वपद्यवं ते दधतेऽधुना ते । वैरूप्यतस्तेऽनुपलक्षयन्तो, भूपा अपाकर्तुमलं कथं त्वाम् ॥ २२२ ॥ त्वं मा कृथाः सम्प्रति वत्स दीक्षामनोरथं भूमितलं तवास्ति । त्वोक्तव्यमद्यापि निवेदयिष्येऽहं तेऽथ तस्यावसरं तनूज ॥ २२३ ॥ इदं फलं रत्नकरण्डकं च, गृहाण वत्सेत्यवधारयस्व । रूपार्थिना स्फोट्यमिदं फलं तत्तदन्तरे द्रक्ष्यसि देवदूष्ये ॥ २२४ ॥ उद्घाटये रत्नकरण्डकं त्वं, हारादिकान् द्रक्ष्यसि त्वोस्तदानीम् । ते देवदूष्ये परिधाय तैश्च, हारादिभिः प्राप्स्यसि रूपमैन्द्रम् ॥ २२५ ॥ हृष्टो नलोऽपृच्छदिदं पितस्ते, स्नुषा मया तत्र तदा विमुक्ता । तत्रास्ति किं क्वापि गता मृता वा, स स्माह सर्वामपि तत्प्रवृत्तिम् ॥ २२६ ॥ देवोऽवदद्वत्स वने भ्रमन् किं, करोषि तद्ब्रूह्यसि यत्र गन्ता । यथा नयामीति नलस्त्ववोचत्पुरेऽधुना मां नय सुंसुमारे ॥ २२७ ॥ मुक्त्वा नलं तत्र सुरस्तिरोऽभून्नलः पुरोपान्तवने जगाम । ददर्श च श्रीनमिनाथचैत्यं, प्रणत्य पूर्वारि ततो विवेश ॥ २२८ ॥ आलानमुन्मूल्य तदैव मत्तनागो भ्रमँस्त्रासयति स्म लोकान् । आरुह्य वप्रं दधिपर्णभूपो, जगाद मर्त्यान्निखिलानपीति ॥ २२९ ॥ वशीकरोत्यद्य मतङ्गजं यस्तस्य प्रयच्छामि मनोमतानि । श्रुत्वेति कुब्जः प्रणिपत्य भूपं, तमभ्यधावत्त्वरितोऽपशङ्कम् ॥ २३० ॥ पुरः करेणोर्निपतन् पतँश्चोत्पतन्नलः कन्दुकवत्प्रकामम् । जातश्रमं वीक्ष्य जितश्रमोऽथोत्पत्यारुरोहामुमवाहयच्च ॥ २३१ ॥ चपेटया घ्नन्नथ कुम्भदेशे, व्यालं वशीकृत्य चकार कुब्जः । आलानलीनं क्षितिपोऽपि तुष्ट, उत्सङ्गसङ्गं तमचीकरच्च ॥ २३२ ॥ उवाच

---

१ त्वा त्वाम्.

कुब्जं दधिपर्णभूपः, कलाऽस्ति काचित्त्वयि सुन्दराऽन्या। सोऽवक् किमन्यन्नृप मत्कृता स्यादादित्यपाका रसवत्यपीह ॥ २३३ ॥ कुब्जाय राजा वितनार सूर्यपाकाय शाकान् वरतन्दुलाँश्च। सूर्यातपे सोऽपि चरुं विमुच्य, स्मृत्वा स्वविद्यां च चकार पाकम् ॥ २३४ ॥ आस्वाद्य भूपस्तमनग्निपाकं, श्रमापनोदं मुदमादधानः। स्माहेदृशं पाकमृते नलेशमन्यो विधातुं न हि कश्चिदीशः ॥ २३५ ॥ तत्किं नलोऽयं विकृताकृतिर्नो, एतादृशः स्यात्स कथं क्ष्माभृत्। तस्य द्विशत्यान्तरितस्य योजनानामथात्रागमनं कुतस्त्यम् ॥ २३६ ॥ ततश्च कुब्जाय ददौ स तुष्टो, वस्त्रादिकं टङ्ककलक्ष्मेकम्। अयं ददत्पञ्चशतीं पुराणां, प्रसह्य कुब्जेन नृपो निषिद्धः ॥ २३७ ॥ भूपो जगौ कुब्जक किं तवाद्य, ददामि सोऽवक् क्षितिभृन्ममेड्याम्। संपूरयस्व स्वकदेशमध्ये, सदैव सप्तव्यसनीं निवार्य ॥ २३८ ॥ ततो नरेन्द्रो निजशासनेऽसौ, तत्संकथां चापि निराचकार। नृपोऽन्यदा कुब्जमुवाच कस्त्वमागाः कुतो वेति निवेदयास्मान् ॥ २३९ ॥ स स्माह राजन् पुरि कोशलायां, नलेशितुः सूपकृदस्मि नाम्ना। हुण्मस्तदीये सविधे मयैताः, कला अशिक्षयन्त तदा समस्ताः ॥ २४० ॥ द्यूते विजिग्येऽथ नलः सराज्योऽनुजेन साकं नृपभीमपुत्र्या। अरण्यमाशिश्रियदेष तस्मादहं तु राजन् समुपागमं त्वाम् ॥ २४१ ॥ श्रुत्वेति भूपः सविषादमाह, नलेऽप्यभूत्किं हतदुर्दशेयम्। जानासि किं क्वापि नलोऽधुनाऽस्ति, स्माहामृतेत्येष रुरोद भूपः ॥ २४२ ॥ दध्रे स कुब्जेन रुदन्सशब्दं, मुहूत्तदीयो दधिपर्णराजः। केनापि कार्येण स चापरेद्युः, प्रैषीत्स्वदूतं नृपभीमराज्ये ॥ २४३ ॥ भीमाभिधानेन स सत्कृतोऽवमुवाच वार्तासमये कदाचित्। उपागतोऽस्मन्नृपमस्ति सूपकारो नलेशस्य विचक्षणोऽथ ॥ २४४ ॥ स्माक् सूर्यपाका रसवत्यनेन, निष्पाद्यते नित्यमपि क्ष्माभृत्। भैमी निशम्येत्यवदत्स तात, विलो-

क्यतां सूपकृदस्ति कीदृक् ॥ २४५ ॥ स गोपितात्मा नल एव ज्ञावी, नान्यत्र तत्कौशलमस्ति येन । तद्दीक्षणार्थं कुशलं स्वविप्रमाज्ञापयामास विशामधीशः ॥ २४६ ॥ गत्वा पुरे ब्राह्मण सुंसुमारे, वीक्षस्व कीदृक् स तु किंस्वरूपः । विप्रस्तत-स्तत्र जगाम तूर्णं, स प्रेर्यमाणः शकुनैर्मनोज्ञैः ॥ २४७ ॥ पृष्ट्वाऽगमत्कुब्जगृहे न्यषीदत्, पार्श्वे तदीये विकृताकृतिं तम् । दृष्ट्वा व्यषीदच्च ततः स दध्यौ, क्वायं कुरूपः क्व स दिव्यरूपः ॥ २४८ ॥ एतच्च सम्प्रत्यपि निश्चिनोमीत्येवं दधच्चेतसि विप्र एषः। वृत्तं जगादेति नलक्षितीशदुर्वृत्तसंसूचनसावधानम् ॥ २४९ ॥ शिरोमणिर्निर्घृणनिस्त्रपाणां, क्रुरात्मनां स्यान्नल एक एव । तत्याज योऽरण्यगतां प्रसुप्तामेकाकिनीं ज्ञीमसुतां स्वपत्नीम् ॥ २५० ॥ तत्पठ्यमानं स निशम्य पौनःपुन्येन कुब्जो दयितां स्मरँस्ताम् । रुरोद किं रोदिषि चेति पृष्टो, विप्रेण सोऽदो निजगाद हुण्रुः ॥ २५१ ॥ निशम्य गीतं तव रोदिमीह, कर्णा-मृतस्याथ वदार्थमस्य । ततोऽन्निधत्ते स्म कथां नलस्य, द्यूतात्स नैम्यागमनावसानाम् ॥ २५२ ॥ ज्रूयो बज्राषे दधिपर्ण-ज्रूपदूतेन ज्ञीमाय निवेदितस्त्वम् । एवंचरित्रेण नलः स ज्ञावी, किं नेति वीक्षार्थमहं प्रजिघ्ये ॥ २५३ ॥ तेनाजगामात्र पुरेऽस्मि कुब्ज, त्वां वीक्ष्य वैरूप्यपदं कुदेहम् । अचिन्तयं त्वं क्व स नैषधिः क्व, क्व सर्षपस्त्रैदशज्रूधरः क्व ॥ २५४ ॥ ध्यायन् स्वपत्नीं स रुदन् सबाष्पं, पुनः पुनः स्माह च किं ददे ते । कथां समाख्यातवतो नलस्येत्युक्त्वार्पयच्चीवरहेम-मालाः ॥ २५५ ॥ स कुण्डिनाज्निख्यपुरे समेत्य, सर्वं यथादृष्टमथान्यधत्त । ज्ञीमाय नैम्यै च यथा रुरोद, यथा बज्राषे स यथार्पयत्ताः ॥ २५६ ॥ उवाच नैमी स नलो नु तात, वैरूप्यमीदृग्मवाप दैवात् । दातेदृशो नास्ति नलं विहाय,

१ कथय. २ दानवान्.

गुणी च नेदृग्जगतीत्रयेऽपि ॥ २५७ ॥ केनाप्युपायेन तमत्र तातानय स्वयं येन पतिं परीक्षे । नीमो जगौ पुत्रि तवेत्य-
लीकस्वयंवरं सम्प्रति मण्डयिष्ये ॥ २५८ ॥ स्वयंवरं ते दधिपर्णभूपः, श्रुत्वा समेष्यत्यलमत्र पुत्रि । तवान्निलाष्यस्ति स
पूर्वमेव, परं त्वयाऽसौ न वृतस्तदा यतः ॥ २५९ ॥ त्वां दीयमानामपरस्य सोढा, कथं नलश्चेदिति तेन साकम् । अत्राग-
मिष्यत्ययमश्वहृज्ज्ञोऽश्वान् वाहयन् स त्वपतिः परीक्ष्यः ॥ २६० ॥ तत्प्रेरिताश्चानिलरंहसः स्युरश्वास्तदासन्नमहं[1]ः प्रहे-
यम् । तत्रैति यः सैव नलोऽद्य पञ्चम्यह्न्याह्वयत्तं दधिपर्णमेषः ॥ २६१ ॥ तदेति दध्यौ दधिपर्णसंज्ञः, सा पञ्चमी श्वः
कथमेमि[2] तत्र । चिन्तामिमां तं दधतं समीक्ष्य, व्यचिन्तयच्चेतसि चेति कुब्जः ॥ २६२ ॥ नैमी सती नान्यनरान्निलाषं
कुर्याच्च कुर्याद्यदि तर्हि कोऽन्यः । आदत्त एतां मयि वर्तमाने, परं नये स्वं नृपमेनमस्मि ॥ २६३ ॥ प्रासङ्गिकं यानमनेन
साकं, ममापि नावीति स भूपमूचे । चिन्ताऽस्ति का ते वद देव येन, निश्चिन्तयाम्येष भवन्तमाशु ॥ २६४ ॥ नृपोऽव-
दत्कुब्ज ! नलो मृतोऽद्य, स्वयंवरं भीमसुता विधत्ते । श्वस्तन्मुहूर्त्ते कथमस्मि नैमीलुब्धो व्रजाम्येष सखे पुरेऽत्र ॥ २६५ ॥
कुब्जो जगौ ह्याधव मा विषीदाचिरादपि त्वां पुरि तत्र नेष्ये । साश्वं रथं देहि ममाधुनैव, निशात्यये येन नयामि तत्र
॥ २६६ ॥ स आर्पयत्तस्य रथं स सज्जीकृत्येममारोह्य धराधिराजम् । छत्रस्थगीचामरधारिणश्च, लात्वा स्वयं तच्च फलं
करण्डम् ॥ २६७ ॥ रथ्याँस्तथा खेटयति स्म कुब्जस्ते स्वामिचित्तेन यथा व्रजन्ति । पटी नृपस्याथ पपात सोऽवग्रहे रथं
लामि यथा पटीं स्वाम् ॥ २६८ ॥ युग्मम् ॥ नृपोऽवदद्यावदिदं रथोऽगात्पञ्चाधिकां योजनविंशतिं तत् । कुब्जो हसन्

१ दिनम्. २ गच्छामि.

स्माह विज्ञो पटीतः, पञ्चाधिका योजनविंशतिः स्यात् ॥ २६९ ॥ चमत्कृतो राट् फलितं च दूरादद्राख्यवृक्षं तमवक् स वीक्ष्य । फलानि यावन्ति ज्ञवन्त्यंगेऽत्र, तावन्ति वेदागणयज्ञहं ज्ञोः ॥ २७० ॥ कुब्जोऽवदत्स प्रतिपातये तत्फलानि मां दर्शय कौतुकं तत् । राजा फलान्यत्र जगौ सहस्राण्यष्टादशापातयदाशु कुब्जः ॥ २७१ ॥ तावन्ति ताभ्यां गणितानि तान्यज्ञूवँश्च कुब्जेन सुविस्मितेन । ददे नृपायाश्वमनोज्ञविद्या, सज्ज्ञानविद्या तत आददे च ॥ २७२ ॥ प्रगेऽथ कुब्जेन सहागतं तं, श्रुत्वा स्वचित्ते प्रजहर्ष ज्ञीमः । स्वप्नं तदैवेति विलोक्य ज्ञैमी, न्यवेदयत्स्वीयपितुर्यथावत् ॥ २७३ ॥ रात्रौ मया निर्वृतिदेव्यदार्शि, तत्कोशलोद्यानमिहानयन्ती । तदाम्रमारूढवती त्वपश्यं, पुराधिरूढं विहगं पतन्तम् ॥ २७४ ॥ ज्ञीमो जगौ निर्वृतिदेवता ते, पुण्यावली तच्च वनं शिवं यः । चूताधिरोहः पतिसङ्गमस्तत्पातः स यः कूबरराज्यनाशः ॥ २७५ ॥ प्राज्ञातिकस्वप्नबलेन तेऽद्य, नलो मिलिष्यत्यथ पुत्रि तूर्णम् । तदैव पूर्द्दारमलंचकार, कुब्जेन युक्तो दधिपर्ण-ज्ञूनृत् ॥ २७६ ॥ रोमाञ्चितो ज्ञीमनराधिराजस्तं ज्ञूपतिं सोऽभिजगाम वेगात् । आश्लिष्य तं मित्रमिवाकरोच्च, तस्या तिथेयं न्यगदत्ततोऽदः ॥ २७७ ॥ कुब्जं सखे दर्शय साम्प्रतं मे, तं ज्ञक्तकारं तव वार्तयाऽलम् । अदर्शयत्तं स ततः क्षितीशः, सोऽप्याह तं दर्शय मां कलां स्वाम् ॥ २७८ ॥ द्राक् सूर्यपाका रसवत्यनेन, निष्पादिताऽज्ञोज्यत चैतया सः । ज्ञीमोऽथ तत्स्वादपरीक्षणार्थमज्ञोजयत् स्वीयशरीरजाताम् ॥ २७९ ॥ ज्ञैमी तदास्वादत इत्यबोधि, कुब्जो नलश्चाह पितुः पुरस्तात् । कुब्जोऽस्तु कुण्ठोऽस्तु परं नलोऽयं, न संशयोऽप्यस्त्यपरा परीक्षा ॥ २८० ॥ नलाङ्गुलीस्पर्शमवाप्य कामं,

१ वृक्षे.

रोमाञ्चिताङ्गोऽस्मि पितर्नवामि । कुजो नलोऽसीत्युदितोऽप्यवादीद्भ्रान्ता भवन्तः क्व नलः क्व चाहम् ॥ २०१ ॥ तस्याङ्गुलीस्पर्शवशेन नैम्या, वपुश्च कर्कोटकवद्बभूव । सकण्टकं प्राह ततश्च सा "मां, प्राग्वद्विहाय क्व नु यास्यसीश" ॥ २०२ ॥ गृहान्तरेऽन्यर्थ्य तया स निन्ये, सोऽप्याकृषद्विस्वकरेणकान्याम् । वस्त्रे त्वलङ्कारमभूत्स्वरूपो, नैमी पतिं वीक्ष्य तमाश्लिलिङ्ग ॥ २०३ ॥ नलं पुनर्द्वारि समागतं तूपलक्ष्य चालिङ्ग्य नरेन्द्रभीमः । सिंहासने स्वे विनिवेश्य चाख्यत्करोमि किं देव समादिशाहम् ॥ २०४ ॥ नत्वा नलं श्रीदधिपर्णभूभृजौ मयाऽनुष्ठितमीश यत्ते । अज्ञानतः सर्वमपि क्षमस्व, क्षमाधिनाथ प्रबलप्रताप ॥ २०५ ॥ पूर्वोपकर्तृनृतुपर्णमुख्यानाकार्य नैमी खलु सच्चकार । भीमर्तुपर्णौ दधिपर्णभूपोऽपरेऽपि राज्ये नलमन्यषिञ्चन् ॥ २०६ ॥ शुभेऽह्नि तैः सार्धमसौ चचाल, महाबली सौवरमां जिघृक्षुः । पुरीमयोध्यां प्रति मंक्षु तत्र, गत्वा त्वयोध्योपवने स तस्थौ ॥ २०७ ॥ नलं समायातमथो निशम्य, स कूबरः साध्वसविह्वलोऽभूत् । तं स्माह दूतेन नलो रमस्व, द्यूतेऽथ ते श्रीर्मम मेऽपि तेऽस्तु ॥२०८॥ एवं पणीकृत्य नलेन साकं, प्रचक्रमे रन्तुमयं प्रमोदी । राज्यं विजिग्येऽनुजतो नलेन, परं गुणाढ्येन स नापमेने ॥ २०९ ॥ नलोऽप्यलंकृत्य तदाधिपत्यं, प्राग्वद्ददौ तस्य च यौवराज्यम् । निःशेषभूपैः परिपालिताज्ञोऽकरोच्चिरं राज्यमसौ सुखेन ॥ २१० ॥ स्वर्गात्समागत्य पिता तदीयः, प्राबोधयत्तं विषयोन्मुखं तु । क्षितीश दीक्षावसरोऽधुना ते, प्रव्रज्य नुर्जन्म कृतार्थय स्वम् ॥ २११ ॥ उक्त्वेति देवोऽथ तिरोबभूव, तदागमन्मुनिजिनसेनसूरिः । नैमी नलश्च प्रणिपत्य सूरिं, पप्रच्छतुः प्राग्भवमात्मनस्तौ ॥ २१२ ॥ श्रुतोपयोगेन

१ स्वीयां लक्ष्मीम्.

जगाद सूरी, राज्यं त्वयाऽऽसं मुनिमुग्धदानात् । मुनेर्घटीर्घादश रक्षणाच्च, त्वं द्वादशाब्दीं विरहं त्ववाप्तः ॥ २९३ ॥ श्रुत्वेति वैराग्यगतो निधाय, राज्यं तनूजे खलु पुष्कलाख्ये । जैमी नलश्च व्रतमाददाते, चिरं ततोऽपालयतां प्रमोदात् ॥ २९४ ॥ नलोऽन्यदा राज्यभवत्प्रियायां, त्यक्तस्तदा सूरिभिरप्ययं स्वाक् । संबोधितस्तातसुरेण तेन, नलाभिधानोऽनशनं प्रपेदे ॥ २९५ ॥ नलानुरागाद्दवदन्त्यथापि, सहैव तेनानशनं प्रपन्ना । मृत्वा नलोऽभूत्त्रिदशः कुबेरो, विपद्य सा तत्प्रणयिन्यभूच्च ॥ २९६ ॥ इत्यर्हत्पदपद्मयुग्मनमनव्यायामबद्धस्पृहाः, खानौ दुःखततेर्विपद्यपि सुखं किं किं लभन्ते न हि । इत्थं चेतसि संप्रधार्य विबुधाः कुर्वन्तु तत्राद्दतिं, यत्कीर्भन्ति कराम्बुजेऽपि भवतां स्वर्गापवर्गश्रियः ॥ २९७ ॥ इति श्रीनलदवदन्तीचरित्रं लेशतोऽभिहितं । विस्तरार्थिना तु श्रीवसुदेवहिण्ड्यादिग्रन्थेभ्योऽवसेयमिति ॥ समाप्तमिदं षट्त्रिंशत्तमं पूजाद्वारम् ॥

अथ क्रमप्राप्तं नयद्वारं विवरीषुराह—

श्रीरामवद्भो नय एव सेव्यः, प्रजानुरागव्रतवित्तमूलम् ।
को दक्षिणावर्त्तमुपेत्य शङ्खं, त्यजेन्मुधा श्यामलचित्रकं वा ॥ ७५ ॥

व्याख्या—भो लोका नय एव सेव्यः । किंवत् ? श्रीरामवत् यथा श्रीरामेण दाशरथिना नय एव सेवितः । तत्सेव्यत्वे कारणमाह विशेषणद्वारा—किंविशिष्टः सः ? प्रजानुरागव्रतवित्तमूलं प्रजानुरागो जनमनोऽभिमुखीकरणं तदेव व्रतं नियमः यतः सतां प्रजानुरञ्जनमेव व्रतं भवति, वित्तं द्रव्यं दीनारादि, प्रजानुरागव्रतं च वित्तं च प्रजानुरागव्रतवित्ते

तयोर्मूलमुत्पत्तिकारणं । अत्र मूलशब्दोऽग्निर्माणवक इत्यादिशब्दवल्लक्षणया ज्ञेयः । नये सेविते सति प्रजानुरागव्रतं प्राप्तु-
र्बोन्नवीति, वित्तं च प्राप्तुःष्यात् । एवंविधं नयं को न सेवते ? । एतदेवाह दृष्टान्ताभ्यां—को दक्षिणावर्त्तमुपेत्य शंखं
त्यजेन्मुधा श्यामलचित्रकं वेति कः पुमान् दक्षिणावर्त्तं शङ्खमुपेत्य प्राप्य मुधा वृथा त्यजेत् ? अपि तु न कोऽपि ।
वाऽथवा श्यामलचित्रकं चित्रकवल्लीं प्राप्य को मुधा त्यजेत् ? अपि तु न कोऽपि । इति वृत्तसमासार्थः । व्यासार्थस्तु
कथानकगम्यः । तच्चेदं (रामकथानकं)—

अस्त्यत्र भरतक्षेत्रे पुर्ययोध्यान्निधानतः । सुखी यत्राखिलो लोको व्यस्मार्षीत्स्वर्गसंकथाम् ॥ १ ॥ तस्यां दशरथो
नाथो नाम्नाऽनेकरथः परम् । यत्प्रतापतपार्त्या नो तपनोऽपि स्थिरः क्वचित् ॥ २ ॥ कौशल्याख्याऽथ कैकेयी सुमित्रा-
सुप्रज्ञे इति । चतस्रोऽआभवन् कान्ता हृदि तस्येव बुद्धयः ॥ ३ ॥ एतासां क्रमशः पुत्राः श्रीरामो भरतस्तथा । लक्ष्मणः
खलु शत्रुघ्नश्चत्वारोऽमी महाबलाः ॥ ४ ॥ जामिं भामण्डलस्याथ सीतेति जनकात्मजाम् । रामः पर्यणयद्भन्वारोपणेन
पणेन ताम् ॥ ५ ॥ पदे पदे प्रस्खलन्तं सुरापमिव सर्वतः । भूदेशस्थास्नुकेशाद्या भिन्नलोचनगोचरम् ॥ ६ ॥ यष्ट्याधा-
रेण कष्टेन गच्छन्तं राजवर्त्मनि । प्रेक्ष्य वृद्धं नरं कञ्चिद्ध्यौ दशरथस्त्विदम् ॥ ७ ॥ युग्मम् । नाङ्गं मे ग्रसते यावद्राहुसीव
दशेदृशी । तावत् कुर्मो हितं किञ्चिदात्मनः पारलौकिकम् ॥ ८ ॥ एवमीप्सन् निजं राज्यं दातुं श्रीरामलक्ष्मणौ । आजू-
हवद्यदा तावत् कैकेयी इत्यजाषत ॥ ९ ॥ मत्पुत्रभरताख्याय राज्यं काननसेवनम् । रामलक्ष्मणयोर्यावद्वत्सराणि चतु-
र्दश ॥ १० ॥ प्रदेहि देव प्राग्लब्धैर्वरैर्मम महाशय । ततोऽस्याः सूनवे सत्यप्रतिज्ञो राज्यमार्पयत् ॥ ११ ॥ युग्मम् ॥

रामः सलक्ष्मणोऽचालीद्घनं प्रति तदैव हि । अन्वायान्ती सती सीता रक्षिताऽपि स्थिता न हि ॥ १२ ॥ ततस्तौ दण्ड-
कारण्यं प्रापतुः सीतया समम् । कस्मिँश्चिदाश्रये तत्र संस्थितौ सौख्यभाजिनौ ॥ १३ ॥ रामोऽनमत्तदायातं चारणश्रम-
णद्वयम् । सीतयाऽथ सत्प्रीत्या प्रत्यालम्भ्यशनादिना ॥ १४ ॥ गन्धाम्बुवृष्टिः संतुष्टैस्तदानीं निर्ममे सुरैः । तत्र तद्ग-
न्धमाघ्रायागाज्जटायुश्च गृध्रराट् ॥ १५ ॥ मुनेर्देशनया बुद्धः सोऽस्मार्षीज्जातिमात्मनः । प्राग्जन्मस्नेहतः सीतावशवर्त्यभव-
च्च सः ॥ १६ ॥ इतश्च त्रस्ताशङ्कायां लङ्कायां पुरि विश्रुतः । बभूव रावणो भूपो वैरिवारणदारणः ॥ १७ ॥ तस्यास्तां
भ्रातरौ नाम्ना कुम्भकर्णविभीषणौ । स्वसा चन्द्रयशास्तेन खरेण परिणायिता ॥ १८ ॥ रावणेनान्यदाऽदर्शि स्वसौधा-
ङ्गणसङ्गिनी । अङ्गिनीवाधिपत्यश्रीरद्भुता रत्नमालिका ॥ १९ ॥ एतां च नवभी रत्नैर्द्योतयन्तीं दिशो दश । न्यकृता-
दित्यभां वीक्ष्याप्राक्षीत्स्वान् वृद्धपूरुषान् ॥ २० ॥ दीप्रा दीपशिखेवैषा केयमित्यथ तेऽवदन् । त्वत्पूर्वजैर्वरप्राप्ता दिव्येयं
रत्नमालिका ॥ २१ ॥ कामिनीमिव यस्त्वेतां गलकन्दलसङ्गतिम् । कारयिष्यति राजेन्द्र सोऽर्धचक्री भविष्यति ॥ २२ ॥
त्वदीयपूर्वजैस्तेन स्वामिन्नद्यापि पूज्यते । कण्ठपीठेऽर्द्धपद्मङ्केशोऽथ तां रत्नमालिकाम् ॥ २३ ॥ स संक्रान्तशिरा रेजे
तन्मणीषु नवस्वपि । दशास्य इति लोकेऽपि प्रसिद्धिं प्राप चाखिले ॥ २४ ॥ अथ प्रमुदितोऽकार्षीज्जनो जयजयारवम् ।
प्रज्ञप्तिप्रमुखा विद्या जातास्तस्य वशंवदाः ॥ २५ ॥ प्राप्तपुण्योदयश्चैष भरतार्धमसाधयत् । खण्डत्रयेऽप्यखण्डाज्ञ आख-
ण्डल इवाभवत् ॥ २६ ॥ अन्येद्युर्भागिनेयोऽस्य स्वसृचन्द्रयशोऽङ्गजः । सूर्यहासखड्गविद्यामाससाद स्वदैवतः ॥ २७ ॥
ततः स दण्डकारण्ये ऊर्ध्वीकृत्यासिमात्मनः । वंशजालीमध्यवर्तीं यावत्तां साधयन्नभूत् ॥ २८ ॥ तावल्लीराममानम्य तत्र

सौमित्रिरागमत् । फलादिहेतवेऽथासिमस्य वीक्ष्याग्रहीत् पुनः ॥ २९ ॥ स तं तैदण्यपरीक्षार्थं वंशजाख्यामवाहयत् ।
तत्रस्थस्य शिरस्तस्य चिच्छेद च तया समम् ॥ ३० ॥ ततः पुरः पतद्वीक्ष्य तद्भिरः सोऽप्यचिन्तयत् । हा मयाऽयुध्यमा-
नोऽयं पापिना कोऽपि ना हतः ॥ ३१ ॥ तेनेति निन्दता गत्वा तज्ञामाय निवेदितम् । सोऽप्यवक् सूर्यहासोऽसिरेषो-
ऽदःसाधको हतः ॥ ३२ ॥ श्रुतश्च चन्द्रयशसा तत्रागत्य निजाङ्गजः । हतो दृष्टस्ततो मुक्तकण्ठं साऽपि स्म रोदिति ॥३३॥
रुदत्याऽथ तया तत्र पदपङ्क्तिर्निरैक्ष्यत । दध्यौ च यत्पदाख्येषा तेन मे तु हतः सुतः ॥ ३४ ॥ इत्येषा पदपङ्क्त्यागाज्ञा-
मलक्ष्मणयोः पुरः । रामं नेत्राग्निरामं सा वीक्ष्याभूच्चानुरागिणी ॥ ३५ ॥ तत्कालमेव विस्मार्य पुत्रदुःखं सुदुःसहम् ।
रन्तुं सा प्रार्थयामास हावभावैश्च राघवम् ॥ ३६ ॥ रामः किञ्चिदसन्नूचे सभार्योऽहं शुभेऽनुजम् । व्रज मे साऽपि तं
प्राप्य प्रार्थयामास पूर्ववत् ॥ ३७ ॥ तेनोचे मेऽग्रजः पूर्वं भद्रे यत्प्रार्थितस्त्वया । तेन मे भ्रातृजायास्यलं मे प्रार्थनया-
ऽनया ॥ ३८ ॥ प्रार्थनाभङ्गतः पुत्रवधादप्यधिकं रुषम् । दधानाख्यत् खरादीनां पुरः पुत्रवधादि सा ॥ ३९ ॥ क्रुद्धः
खरोऽथ विद्याभृच्चतुर्दशसहस्रयुक् । श्रीराममुपदुद्रूषुरायासीत्तत्र कानने ॥ ४० ॥ तदोचे लक्ष्मणो रामं वर्तमाने मयीशिनि ।
युद्धं ते नोचितं भ्रातस्तन्मामादिश सम्प्रति ॥ ४१ ॥ वत्स गच्छाधुना चेत्ते संकटं संभवेत्तदा । त्वं मदाहूतये कुर्याः सिंह-
नादं गुरुस्वरम् ॥ ४२ ॥ इत्युक्तो राघवेणैष लाघवेनैत्य तत्पुरः । प्रवृत्तश्च खरान् हन्तुं नागारिः पन्नगानिव ॥ ४३ ॥
युध्यमानेषु तेषूच्चैर्नर्तुश्चन्द्रयशा जयम् । ईप्सन्ती भ्रातरं गत्वा रावणं चेत्यभाषत ॥ ४४ ॥ हे भ्रातर्दण्डकारण्ये आयातौ
रामलक्ष्मणौ । त्वज्जामेयो हतस्ताभ्यां तद्युध्यन्ते खरादयः ॥ ४५ ॥ सीतेति रामकान्ताऽस्ति कामकान्तेव सुन्दरा ।

स्वर्भूर्भुवस्त्रयीमध्ये यद्रूपस्योपमा न हि ॥ ४६ ॥ यत्पुण्यागण्यलावण्यवर्यसौन्दर्यनिर्जिताः । कथाशेषाः क्षितौ जाता नाकनायकनायिकाः ॥ ४७ ॥ ज्ञासुरोऽपि सुवृत्तोऽपि जगदानन्दकोऽपि तु । चन्द्रः कलङ्कितो यस्या दिधीर्षुर्वदनोपमाम् ॥ ४८ ॥ ज्ञाता रत्नानि यान्यत्र तानि योग्यानि ते ननु । तेनैतद्युवतीरत्नं त्वं गृहाणाधुना धिया ॥ ४९ ॥ इत्येवमुदितश्चन्द्रयशसा राक्षसेशिता । सममेवानुरागेण रोषेण च स जग्रसे ॥ ५० ॥ विमानं पुष्पकं नाम्ना तदैवारुह्य रावणः । इत्यवादीद्विमानेन्द्र याहि सीताऽस्ति यत्र सा ॥ ५१ ॥ विमाने तत्र संप्राप्ते रामं वीक्ष्य सुदुर्धरम् । स बिभ्यत्तस्थिवान् दूरे तत्त्वज्ञानादिवाहृपधीः ॥ ५२ ॥ दध्यौ चेति कुधी रामे पश्यत्यद्भुतविक्रमे । ज्ञविष्यति कथं नाम मैथिलीहरणं मम ॥ ५३ ॥ अथ तेन स्मृता विद्यादेव्यज्ञाणि च संप्रति । साहाय्यं कुरु मे देवि हरतो जनकात्मजाम् ॥ ५४ ॥ साऽप्यवादीत् कथमपि गृह्यते फणिराण्मणिः । परं रामसमीपस्था सेन्द्रैरपि न गृह्यते ॥ ५५ ॥ तथापि सिंहनादेन पूर्वसंकेतितेन चेत् । निजानुजं वज्रेदेष तर्हि सा ह्रियते सुखम् ॥ ५६ ॥ एवमस्त्विति तेनोक्ता सा गत्वा लक्ष्मणाग्रतः । सिंहनादं व्यधादुच्चैः स्वरं सौमित्रिवत् क्षणात् ॥ ५७ ॥ तं श्रुत्वा मैथिलीं तत्र मुक्त्वाऽगाज्ञाघवोऽनुजम् । नूनं मायाविनां माया मोहाय महतामपि ॥५८॥ अथोत्तीर्य विमानात्स सीतामारोप्य तत्र च । विमानं चालयामास लङ्केशः स्वपुरीं प्रति ॥ ५९॥ हा नाथ नतजनाथ स्वज्ञ हा वत्स लक्ष्मण । हा मज्जनक जनक हा ज्ञामण्मल्ल बान्धव॥६०॥जानकी पापिनाऽनेन ह्रियेऽहं सौववेश्मनि । रक्ष्यतां रक्ष्यतामित्थं रोदितुं सा प्रचक्रमे ॥ ६१ ॥ मा ज्ञैषीः पुत्र्यसा पापो मदग्रे कुत्र यास्यति । एवं जल्पन् जटायु-

१ हे बन्धो.

श्वान्वधावद्दशकन्धरम् ॥ ६२ ॥ सोऽथ जर्जरयामास तदुरो नखरैः खरैः । ततो रुष्टो दशग्रीव आजघानासिनाऽथ तम् ॥ ६३ ॥ क्व रे यासि क्व रे यासि सीतां लात्वाऽधमेत्यर्णन्[1] । तमन्वधावद्विद्याच्छृत्कश्चिन्नामर्क्षलानुगः ॥ ६४ ॥ विद्या विद्याच्छृतस्तस्य कुपितेनामुना ततः । आच्छिद्यैष स्रस्तपक्षपक्षिवत्पातितो भुवि ॥ ६५ ॥ सीतां स्माहाथ पौलस्त्यो जरे रन्त्वा मया समम् । विधेहि सफलं जन्म निजां यौवनवल्लरीम् ॥ ६६ ॥ तदुक्तमिदमासाद्य कर्णहालाहलं वचः । ततो मूर्छां क्षणं प्राप्य मैथिल्यस्थादधोमुखी ॥ ६७ ॥ दध्यौ स सत्रया सम्प्रत्येषा मे न हि जल्पति । परं कालेन त्रैलोक्यनाथं सेविष्यते तु माम् ॥ ६८ ॥ लङ्कां गत्वाऽथ लङ्केशः संस्थाप्योपवने निजे । जानकीरक्षणार्थं च त्रिजटामादिदेश सः ॥ ६९ ॥ रामस्य गत्वतस्तत्र लक्ष्मणः संमुखोऽजनि । ऊचे च कथमार्यार्यां संत्यज्य त्वमिहागमः ॥ ७० ॥ तद्वियोगविधौ वेधाः सिंहनादो मया तव । श्रुतस्तेनागतो वत्स रामेणेत्युत्तरीकृतम् ॥ ७१ ॥ लक्ष्मणोऽथ जगौ चक्रे सिंहनादो मया न हि । चेदार्येण श्रुतस्तर्हि केनावां वञ्चितौ ननु ॥ ७२ ॥ इत्येवं वार्तयन्तौ तौ प्राप्तौ यावन्निजास्पदम् । तावत्सीतामपश्यन्तौ पतितौ काश्यपीतले ॥ ७३ ॥ गाढदुःखोत्थनिःश्वासप्रचण्डपवनेरितः । कान्तातत्तद्गुणग्रामस्मृतिज्वालाकरालितः ॥ ७४ ॥ मैथिलीविपुलस्नेहलब्धवृद्धिः प्रतिक्षणम् । प्रादुरासीद्वियोगानलो रामस्य हृदने ॥ ७५ ॥ युग्मम् ॥ ततो जानन्ननन्यान्यौ[2] पश्यन्नपि शुन्नाशुन्ने । बभ्रामेतस्ततो रामो यथा स्रस्तमणिः फणी ॥ ७६ ॥ स्मारं स्मारं निजभ्रातृजायागुणगणं गुणी । रोदं रोदं कथमपि सौमित्रिः प्राप चेतनाम् ॥ ७७ ॥ ततो राममुवाचार्य धैर्यमावर्जयाधुना । संकटे

१ अर्ण शब्दे इत्यस्य शत्रन्तं रूपम्. २ अनन्यान्यौ स्वकीयपरकीयौ.

विकटेऽप्यास्ते यत्सन्तः स्युर्न कातराः ॥ ७८ ॥ अत्रान्तरे नरः कश्चिदागत्य प्रणनाम तौ । पृष्टस्ताभ्यामज्ञाणीत्स स्वप्रवृत्तिं कृताञ्जलिः ॥ ७९ ॥ पिता पातालकेशो मम चन्द्रोदराभिधः । हतश्च स्थापितस्तत्र दशास्येन खरः पुरा ॥ ८० ॥ गुर्विणी मे प्रसूर्नष्टा वराह इति मां सुतम् । वनेऽसूत च केनापि मुनिना सेत्यजाप्यत ॥ ८१ ॥ हनिष्यति यदा दाशरथिर्लङ्के खरादिकान् । तदा पातालकेशं त्वत्सुतं स विधास्यति ॥ ८२ ॥ ततः स्वं समयं प्राप्य देवाद्याहं युवां श्रितः । अथ मे पैत्रिकं वैरं स्वामिन् प्रतिविधीयताम् ॥ ८३॥ सद्यः प्रसद्य श्रीवन्द्य पितृराज्यं वितीर्य मे । इहापि दर्श्यतां स्वामिन् सौवसङ्गमजं फलम् ॥ ८४ ॥ ततस्तौ चेलतुस्तूर्णं तस्य राज्यप्रदित्सया । यावत्कियन्तमेतौ तु पन्थानमतिनिन्यतुः ॥८५॥ तावद्विद्याधरो विद्यामुक्तो नामफलानुगः । दृष्टो भूमितलासीनश्छिन्नमूल इव द्रुमः ॥ ८६ ॥ पृष्टोऽथ प्राह वृत्तान्तं, दशग्रीवस्य चात्मनः । जटायुपक्षिणो दग्धो जनकाङ्गरुहोऽपि च ॥ ८७ ॥ ततस्तौ प्राप्य पातालकेशं संस्थाप्य तं पितुः । राज्येऽथ मुदितौ सन्तौ मोदेते हि परश्रिया ॥ ८८ ॥ इतश्च साहसगतिर्हृद्यविद्याभृदग्रणीः । क्रीडन् यदृच्छयाऽन्येद्युः किष्किन्धानगरीमगात् ॥ ८९ ॥ तदा किष्किन्धिकाधीशो जगाम क्रीडितुं बहिः । तत्कालं साहसगतिरैक्षदन्तःपुरोपरि ॥ ९० ॥ स तत्रान्तःपुरेऽद्राक्षीत्सुग्रीवनृपवल्लभाम् । पदं सौन्दर्यपद्माया रत्नानामिव रोहणः ॥ ९१ ॥ तद्दृष्टिवागुराबन्धगाढबद्धो न हि क्षमः । स गन्तुं पदमप्येण इव तत्रैव संस्थितः ॥ ९२ ॥ अथ स ध्यातुमारेभे मारव्याकुलिताशयः । स्वर्मणेरिव दुःस्थस्यास्या मे प्राप्तिः कथं भवेत् ॥ ९३ ॥ ततः सोऽधिगतोपायपटुर्नृप इव क्षणात् । रूपं सौग्रीवमाधाय प्राविशत्तस्य वेश्मनि ॥ ९४ ॥ अरदयारक्षकैर्नैष प्रविशँस्तस्य मन्दिरे । स एव सत्यसु-

ग्रीव एवमेव विचारकैः ॥ ९५ ॥ यावदन्तःपुरद्वारं सोऽगात्सुग्रीवरूपतिः । तदैवायान्निजावासे बही रन्त्वा यदृच्छया ॥ ९६ ॥ द्वाःस्थैः प्रादायि न द्वारं तस्य प्रविशतः सतः । कस्त्वं सुग्रीवरूपर्ता पुराऽऽगादिति भाषकैः ॥९७॥ तत्र प्रस्खल्द्यमानेऽथारब्धकैः सत्यरूपतौ । मथ्यमाने समुद्रे वाऽऽनवत्कलकलोऽतुलः ॥ ९८ ॥ सुग्रीवयुगलं वीक्ष्य गाढं संदिग्धमानसः । गत्वा शुद्धान्तरद्वार्थं तद्वारे वालिसूः स्थितः ॥ ९९ ॥ शुद्धान्ते प्रविशन्नन्यसुग्रीवो वालिसूनुना । रक्षितः कर्मवृन्देन सिद्धिसौधे यथा नरः ॥ १०० ॥ अथाकारयतामेतौ योद्धुं सेनां महाबलौ । सैन्यानामाययुस्तावदक्षौहिण्यश्चतुर्दश ॥१०१॥ ताः सेना अप्यजानन्त्योऽन्तरं सुग्रीवयोर्द्वयोः । अर्धा अपरसुग्रीवं ज्ञेजुरर्धास्तथाऽपरम् ॥ १०२ ॥ पत्तिश्च पत्तिना सार्धं निषादी तु निषादिना । धन्वी च धन्विना सादी सादिना रथिना रथी ॥१०३॥ एवं तत्सैन्ययोर्योद्धुं योधा वृद्धपराक्रमाः । प्रक्रमन्ते स्म सौपर्वनाथार्धासनमीप्सवः ॥ १०४ ॥ युग्मम् ॥ रे रेऽधमान्यस्य वेश्मप्रवेशपर कुर्कुर । मय्यधीशेऽत्र संप्राप्ते स्वस्थोऽवस्थास्यसे कथम् ॥ १०५ ॥ प्रकटं नाटयन्नेवं सत्यसुग्रीवरूपतिः । आजुहावाहवायैतं सुग्रीवं कृत्रिमाकृतिम् ॥ १०६ ॥ सोऽपीति तर्जितो गर्जन् मदेनेव करीश्वरः । विधेयविमुखस्तस्य संमुखोऽभूद्रणाङ्गणे ॥ १०७ ॥ ततो योद्धुं मिथो लग्नावेतौ रोषारुणेक्षणौ । अप्यप्रतिहता हेतिर्जाता ताभ्यां हता मिथः ॥ १०८ ॥ ततस्तौ स्रस्तशस्त्रौघावप्यमर्षात् पराङ्मुखौ । लग्नौ योद्धुं मिथो मल्लयुधाऽऽढ्यौ इव जङ्गमौ ॥ १०९ ॥ द्वावप्योजस्विनौ तेनैकेनाप्येकोऽपि नो जितः । ततोऽपसृत्य खेदेन खिन्नौ मेषाविव स्थितौ ॥ ११० ॥ खिन्नसैन्यतनुः सत्यसुग्रीवः समराजिरात् । निर्गत्य नगरीबाह्योद्याने सेनायुतः

१ श्व.

स्थितः ॥ १११ ॥ तत्रैवास्वस्थचित्तोऽस्थादिटसुग्रीवन्नूपतिः । वालिपुत्राच्च शुङ्कान्ते प्रवेशं प्राप्नुवन्न वा (हि) ॥ ११२ ॥ अथ दध्यावधोग्रीवः सुग्रीवः स बहिःस्थितः । एष स्त्रीलम्पटोऽन्नून्मे रिपुः कपटपण्डितः ॥ ११३ ॥ अनीत्याऽपि च नीत्या वा बलबुद्धिबलादिन्निः । मायानिवासन्नूः शत्रुर्हन्तव्योऽयं मयाऽधुना ॥ ११४ ॥ धन्यो वाली स यः श्रीमाँस्त्रिखण्डाखण्डशासनः । विहाय तृणवद्राज्यं लेभे प्राप्तव्रतः शिवम् ॥ ११५ ॥ समस्त्येवैष तच्चन्द्ररश्मिपुत्रो महाबलः । किं त्वावयोर्विशेषाज्ञः कं हन्यात् कं च मुञ्चति ॥ ११६ ॥ एवं स निर्ममे साधु साधुबुद्धिपयोनिधिः । यत्प्रवेशं ददौ तस्य पापिनोऽन्तःपुरे नहि ॥ ११७ ॥ अथास्योन्मूलनायाहं कं श्रयामि बलोत्कणम् । त्रिलोकेशं दशग्रीवं किं वा अनुसराम्यहम् ॥ ११८ ॥ परस्त्रीलम्पटः किं तु सोऽस्ति तस्मादिमं च माम् । त्रिजगत्कण्टको हत्वा तारां लास्यति मत्प्रियाम् ॥ ११९ ॥ सहायकशिरोरत्नमीदृशे व्यसने खरः । आसीद्दाशरथिस्तं तु याम्यसद्मातिथिं व्यधात् ॥ १२० ॥ श्रयाम्यरिवधायाशु ततस्तौ रामलक्ष्मणौ । वराहस्यार्पितं यान्यां राज्यं गतमपि क्षणात् ॥ १२१ ॥ अद्यापि स्तो वराहस्योपरोधेन महाबलौ । एतौ पाताललङ्कायां परोपकृतिकर्मठौ ॥ १२२ ॥ विमृश्येत्यथ सुग्रीवः शिक्षित्वा दूतमात्मनः । प्रैषीत् पाताललङ्कायां विश्वासैकनिकेतनम् ॥ १२३ ॥ तत्र गत्वा वराहेशं नत्वा दूतो व्यजिज्ञपत् । सर्वं स्वस्वामिवृत्तान्तं वावदूको यथातथम् ॥ १२४ ॥ स ऊचे पुनरप्येतत् स्वामी मे व्यसनाम्बुधौ । पतितो देव ते द्वारा रामं श्रयितुमिच्छति ॥ १२५ ॥ तेनोचेऽत्रैतु सुग्रीवस्ततो नव्यं नविष्यति । दूतोऽपि त्वरितं गत्वा स्वप्रभोस्तथ्यवेदयत् ॥ १२६ ॥ अथ सुग्रीवन्नूनर्ता वराहस्यागमत् पुरीम् । प्रतिपत्तिं वराहोऽपि सुग्रीवस्योचितां

व्यधात् ॥ १२७ ॥ वराहेण तदन्वग्रे ऋत्वा रामश्च नामितः । सुग्रीवेण ततस्तस्य दुःखं रामाय चाङ्गपि ॥ १२८ ॥ सुग्रीवोऽवक् साम्प्रतं तु शरणं राघ्नमेव मे । त्वादृशो यन्त्रिलोकेऽपि नान्यदुःखापहोऽपरः ॥ १२९ ॥ दुःखितेनापि रामेण तद्दुःखोल्लेदनं ततः । प्रतिपन्नं हि दुःखेऽपि सतां यल्लोऽन्यकर्मणि ॥ १३० ॥ वराहेण ततः सीतावृत्तान्तोऽस्मै निवेदितः । सुग्रीवोऽप्यथ विज्ञप्तिमिति दाशरथेर्व्यधात् ॥ १३१ ॥ स्वास्मिंस्तव प्रसादेन हतप्रत्यर्थिना मया । तवानुगेन सीतायाः प्रवृत्तिः प्रापयिष्यते ॥ १३२ ॥ रामः सलक्ष्मणोऽचालीत् किष्किन्धानगरीं प्रति । सुग्रीवोऽथानुगच्छन्तं वराहेशं व्यसर्जयत् ॥ १३३ ॥ किष्किन्धां नगरीं प्राप्य रामात्प्राप्तबलोद्भ्रयः । सुग्रीवो विटसुग्रीवमाहूवाय त्वजूहवत् ॥ १३४ ॥ सोऽपि प्राप्तस्ततस्तौ द्वौ योद्धुं लग्नौ परस्परम् । पादप्रहारतः शीर्षं कम्पयन्तौ फणीशितुः ॥ १३५ ॥ तुल्यरूपौ निर्ज्ञाह्यैतौ कोऽन्यः कः स्वस्तयोर्द्वयोः । इति संशयतो रामोऽस्थादौदासीन्यमृत्कणम् ॥ १३६ ॥ तज्ञेदमथ जिज्ञासुः श्रीमद्दाशरथिर्बली । धनुर्गुणटणत्कारमकार्षीद्दुर्धरस्वरम् ॥ १३७ ॥ तद्दङ्काररवेणाशु विटसुग्रीवमूनुजः । विद्याऽनेशत् कुरङ्गीव रूपान्तरविधायिनी ॥ १३८ ॥ जगौ सोऽथान्यसुग्रीवं रे मायाविशिरोमणे । रिरंसुः परनार्यां त्वं किं मत्तोऽपि न लज्जसे ॥ १३९ ॥ बाणेनैकेन तं चाथ रामोऽनैषीद्यमालयम् । वराहमिव सुग्रीवं निजे राज्ये न्यवेशयत् ॥ १४० ॥ इतश्चागाद्वराहोऽपि रामसेवाविधित्सया । नामण्यलोऽपि विद्याभृत्सेनायुक्तः समागमत् ॥ १४१ ॥ जाम्बुवद्भनुमन्नीलनलप्रभृतयो निजाः । सामन्तास्तूर्णमाहूताः सुग्रीवधरणीभृता ॥ १४२ ॥ अथ विद्याभृत्सेनायां मिलितायां महाबलः । रामं प्रणम्य सुग्रीव इति विज्ञप्तिमातनोत् ॥ १४३ ॥ हनूमानेष राजेन्द्र दोष्मान् गुरुपराक्रमः । अन्वेष्टुं मैथिलीं लङ्कां गन्तु-

कामस्त्वदाज्ञया ॥ १४४ ॥ निजनामाङ्कितां मुद्रां दत्त्वा तस्याथ राघवः । प्राहिणोत्सोऽप्यगन्तत्स्राग्लङ्कामाकाशवर्त्मनि ॥ १४५ ॥ सोऽथो दशाननोद्याने शमीद्रुमतलस्थिताम् । सीतामैक्षिष्ट श्रीरामनामस्मरणतत्पराम् ॥ १४६ ॥ सीताङ्के शाखिनः शाखान्तरितेन हनूमता । निचिक्षिपे मुद्रिका सा साऽपि तां वीक्ष्य हर्षिता ॥ १४७ ॥ एतां स्मिताननां वीक्ष्याम्भोजिनीमिव वासरे । त्रिजटाऽथ दशग्रीवमासाद्येति व्यजिज्ञपत् ॥ १४८ ॥ अद्य यावद्विखिन्नाऽऽसीत्सीतेश मुदिताऽधुना । नूनं त्वत्सम्पदाकृष्टचित्ता ते रन्तुमिच्छति ॥१४९॥ सोऽथ प्रमुदितो मन्दोदरीं प्रार्थयितुं तु ताम् । आदिदेश ततः साऽपि तत्र गत्वेत्यभाषत ॥ १५० ॥ प्रतापेन सहस्रांशू रूपेण मकरध्वजः । पौलस्त्योऽखिलभूपालमौलिः संशोभते शुभे ॥ १५१ ॥ सुभगेऽगण्यलावण्यवर्ण्ययौवनसम्पदा । त्वमेवाखिललीलानिलयाटोर्वीललाटिका ॥ १५२ ॥ मूर्खेण विधिना योगः प्राक् क्व ते मेलितोऽशुभः । प्रपद्याद्याप्यमुं नाथं भद्रे जन्म कृतार्थय ॥ १५३ ॥ ततश्चाहमिवान्याश्च राज्ञ्य आज्ञां तवाखिलाः । किंकर्य इव कर्तारो यथा पुण्यवतः श्रियः ॥ १५४ ॥ सीता साक्षेपमाख्यत्तामरे पापे न लज्जसे । कुर्वती पतिदूतीत्वं मत्पुरस्तान्मुहुर्मुहुः ॥ १५५ ॥ मां श्रीराघवपार्श्वस्थां जानीहि खलु लक्ष्मणम् । क्षणेनात्रागतं चात्र रक्षोऽन्वययमोपमम् ॥ १५६ ॥ पापे याहि द्रुतं मा मां कुवाक्यैरपवित्रय । सीतया तर्जिता सेति क्रुद्धाऽगाद्भावणान्तिके ॥ १५७ ॥ तरोरुत्तीर्य हनुमान्नत्वा सीतामदोऽवदत् । शुभे सलक्ष्मणो रामः कुशलेनास्ति सम्प्रति ॥ १५८ ॥ तत्प्रवृत्तिकृते तेन प्रेषितोऽहमिहागमम् । मयि तत्र गते रामः शत्रूँस्क्षेत्तुं यतिष्यते ॥ १५९ ॥ स्वभर्तृदूतो हनुमानज्ञिज्ञानसमर्पकः । इत्यानन्दितयाऽनन्दि जानक्याशीर्गिराऽऽदरात् ॥ १६० ॥ सा रामकुशलोदन्तं श्रुत्वा तस्योपरोधतः ।

एकोनविंशत्युपवासानां पारणकं व्यधात् ॥ १६१ ॥ हनूमानथ लङ्केशोद्यानं भंक्तुं प्रचक्रमे । भीतैस्तत्पालकैस्तूर्णं दशास्यस्येति चाकथि ॥ १६२ ॥ आरक्षकास्तदादिष्टाः क्षणात्तं हन्तुमागताः । हेलया ते हताः सर्वेऽप्येकेनापि हनूमता ॥ १६३ ॥ अथादेशि दशास्येन क्रुद्धक्तास्येन शक्रजित् । तं बन्धितुं सोऽपि नागपाशबन्धमसज्जयत् ॥१६४॥त्रुटित्ति त्रोटितस्तेन पाशबन्धोऽस्य पश्यतः । क्रुधोत्पत्य दशास्यस्य भग्नोऽथ मुकुटोंऽहिणा ॥ १६५ ॥ गृहाण निगृहाणामुं पौलस्त्य इति जल्पति । तत्पुरीकपिशीर्षाणि भेदयन्मारुती(ति) रयात् ॥ १६६॥ क्रीत्वेतीङ्गया रामपार्श्वमासाद्य मारुतिः । कृताञ्जलिपुटः सर्वं यथावृत्तं न्यवेदयत् ॥ १६७ ॥ हृष्टेन राघवेणायमालिलिङ्गे स सादरम् । सहाया ईदृशाः कस्य न स्युः प्रीतिपदं यतः ॥ १६८ ॥ लङ्काविजययात्रायै सुग्रीवप्रमुखा नृपाः । आदिष्टास्त्वरितं दाशरथिना सैन्यसंयुताः ॥ १६९ ॥ सेतुनाऽबन्धयद्धार्धिं पौलस्त्यकृतरक्षणम् । रामो महात्मनां पुण्यं कुरुते किं न हीहितम् ॥ १७० ॥ रामो विमानमारूढोऽथ सुग्रीवादिभिः समम् । अकस्माद्वेष्टयामास गत्वा लङ्कापुरीं रयात् ॥ १७१ ॥ अत्रान्तरे दशग्रीवं नत्वाऽवादीद्विभीषणः । कनिष्ठस्यापि मे भ्रातस्त्वमेकवचनं कुरु ॥ १७२ ॥ राघवोऽत्रागतो देव दुर्धरो दृश्यते भृशम् । ततोऽस्मै देहि सीतां त्वं यथा याति सुखेन सः ॥ १७३ ॥ ततो जगाद पौलस्त्यः क्रुद्धः किं त्वं विभेष्यरे । येनोपदेशमीदृक्षं दत्से कापुरुषोचितम् ॥ १७४ ॥ विभीषणेनाज्ञाणीति स्वामिन्नास्तां सलक्ष्मणः । रामस्तत्सेवकोऽप्येष न दृष्टो मारुतिस्त्वया ॥१७५॥ रे द्वेषी मेऽरिरागी त्वं साधु ज्ञातोऽसि साम्प्रतम् । तेनेति तर्जितो राममभिप्राप्तो विभीषणः ॥ १७६ ॥ रामेणापि प्रतिज्ञातं राज्यं लङ्कापुरोऽस्य च । विजातीयेऽपि सन्तः स्युः प्रणते ह्युपकारिणः ॥ १७७ ॥ अथ पौलस्त्यसेनापि बहिर्निर्गत्य

सत्वरम् । आस्फलद्रामसैन्येन पद्मेव श्रीहरेरुरः ॥ १७८ ॥ योधानां युध्यमानानां तयोः पादप्रहारतः । अधः स्थितिः कथमपि जाताऽधःस्थफणीशितुः ॥ १७९ ॥ ततः श्रीराघवादिष्टैर्मारुतिप्रमुखैर्भटैः । गाहितं वार्धिवारीव दशास्यस्याखिलं बलम् ॥ १८० ॥ बद्धाः केऽपि हताः केऽपि त्रासिताः केऽपि संयतः । शेषा मुखे तृणादानान्मुक्ता रामभटैः परे ॥१८१॥ निघ्नाख्येति कुम्भकर्णमेघनादौ महाबलौ । रोषेण शोणदृक्कोणौ प्रविष्टौ समराजिरे ॥ १८२ ॥ तौ निवारयितुं नासन् समर्था रामसैन्यकाः । तान्यां दाशरथेः सैन्यं किञ्चिदुत्रासितं ततः ॥ १८३ ॥ क्रुद्धोऽथोत्पाट्य सुग्रीवो महतीमद्रिपङ्क्तिलाम् । कुम्भस्योपर्यनेनापि चूर्णिता सा गदाहतेः ॥ १८४ ॥ नूयो गदाप्रहारेण सुग्रीवः पातितः क्षितौ । अमुं निक्षिप्य कक्षायां कुम्भकर्णोऽचलत्ततः ॥ १८५ ॥ तीक्ष्णबाणौघधारान्निर्वर्षन्तो रामसैन्यकाः । मेघवन्मेघनादेन प्लाविता बहवो भटाः ॥ १८६ ॥ रुष्टो रामस्ततः कुम्भकर्णाख्यं प्रत्यढौकत । भ्रूकुटीभीषणो मेघनादं श्रीलक्ष्मणस्तथा ॥ १८७ ॥ तदैवोत्पत्य सुग्रीवः कुम्भकर्णात् पलायितः । दुःसाधाः कपयोऽपि स्युः काः कथास्तत्प्रभोः पुनः ॥ १८८ ॥ गाढं युद्ध्वाऽथ रामेण कुम्भाख्यः पातितो भुवि । सौमित्रिणा तथैवाप्यपाति मन्दोदरीसुतः ॥ १८९ ॥ दशाननोऽथ कल्पान्तकालज्वलनवद्रुषा । प्रज्वलँस्तत्क्षणादेव रणाङ्गणमशिश्रियत् ॥ १९० ॥ तवाद्यालं युधा वत्स रामेणेत्युदितोऽपि हि । सौमित्रिश्चापमाकृष्य लङ्केशं प्रत्यढौकत ॥ १९१ ॥ चिरं युद्ध्वाऽखिलैः शस्त्रैः समं रामानुजन्मना । आजघानामोघशक्त्या पौलस्त्यो हृदि लक्ष्मणम् ॥ १९२ ॥ भिन्नः शक्तिप्रहारेण लक्ष्मणः क्ष्मातलेऽपतत् । भिन्नस्तथैव रामोऽप्यपतत्तल्लोकशङ्कुना

---

१ युद्धात्.

॥ १९३ ॥ काष्ठवप्रं विधायाथ सुग्रीवप्रमुखैर्भटैः । तन्मध्ये स्थापितो रामो भ्रात्रा सौमित्रिणा समम् ॥ १९४ ॥ मरिष्यत्यद्य सौमित्रिस्तदुःखादग्रजोऽस्य तु । ततो मेऽलं रणेनेति पौलस्त्योऽगान्निजां पुरीम् ॥ १९५ ॥ सुग्रीवप्रमुखा वप्रद्वारेष्वथ चतुर्ष्वपि । रात्रावारक्षकीभूय खड्गव्यग्रकराः स्थिताः ॥ १९६ ॥ अथ दक्षिणदिग्द्वारपालं भामण्डलाभिधम् । प्राप्य विद्याभृता केनचिदित्यूचे हितेक्षिणा ॥ १९७ ॥ योजनानि द्वादशास्त्ययोध्यायाः पत्तनं वरम् । कौतुकमङ्गलं नाम्ना तत्र द्रोणघनो नृपः ॥ १९८ ॥ कैकेयीभ्रातुरेतस्य विशल्येत्यस्ति कन्यका । क्षणान्निर्यान्ति शल्यानि तस्याः स्नानाम्बुसेकतः ॥ १९९ ॥ तत्स्नानाद्गिर्वदमणश्चेदाप्रज्ञाताच्च सिच्यते । तदा प्राणिति निःशल्यो नो चेत्प्राणैः स मुच्यते ॥ २०० ॥ ततो विज्ञप्यतां रामभद्रस्येत्यधुना ननु । तामानेतुं यथा कस्यचिदादेशं स यच्छति ॥ २०१ ॥ ततो भामण्डलः स्वामिकार्यार्थं चेति सत्वरम् । गत्वा निवेदयामास रामभद्राय भद्रकृत् ॥ २०२ ॥ अथ भामण्डलो रामेणादिष्टो हनुमद्युतः । तदर्थं सोऽप्ययोध्यायां विमानेनागमत् क्षणात्॥ २०३ ॥ तत्र सौधे सुखं सुप्तो व्यलोकि भरतोऽमुना । ततो गीतनिनादेनाबोधि चायं महात्मना ॥ २०४ ॥ भामण्डलः प्रणम्यामुं तं वृत्तान्तं न्यवेदयत् । ततोऽवक् सोऽपि निर्भ्रान्तं कार्यं तत्तत्र सेत्स्यति ॥ २०५ ॥ अथ भामण्डलः सार्धं भरतेन हनूमता । ययौ विमानमारुह्य खेऽङ्गं द्रोणघनेशितुः ॥ २०६॥ याचितो भरतेनाथ विशल्यां द्रोणभूपतिः । ददौ कन्यासहस्रेण युक्तामेतां स तत्क्षणात् ॥ २०७ ॥ भरतं मुक्त्वाऽयोध्यायां विशल्यां सपरिच्छदाम् । लात्वा भामण्डलस्तत्रागाद्वेगादर्यमोदये ॥ २०८ ॥ विशल्यायुक्तमायान्तं वीक्ष्य भामण्डलं ततः ।

१ स्नानजलैः. २ ग्रामम्.

मुदिताः सैन्यकाः सर्वे पुःस्था इव निधेर्घटम् ॥ २०९ ॥ रामः सौमित्रिगात्रेऽस्याः करस्पर्शमचीकरत् । तत्रैव शक्तिः साऽनेशत् पद्मा पापोदये यथा ॥ २१० ॥ सिक्तास्तदाऽपरेऽप्यस्याः सैन्यकाः स्नपनाम्बुना । निःशल्या जज्ञिरे प्राप्ता-लोचना मुनयो यथा ॥ २११ ॥ कुम्भकर्णादिकान् स्नापयितुं तत्स्नानवारिणा । आनयन्तिवति रामेणादिष्टाश्च निजसै-न्यकाः ॥ २१२ ॥ तेऽवोचन् देव तैस्तत्र तदैवादायि संयमः । श्रुत्वेति मुदितो रामः शिरो धुन्वन्मुहुर्मुहुः ॥ २१३ ॥ अहो धीरत्वमेतेषामहो तेषां बलोदयः । अहो विज्ञानिता तेषामहो तेषां विवेकिता ॥ २१४ ॥ अहो तेषां गुणाश्चन्द्र-किरणा इव निर्मलाः । अहो सौन्दर्यमेतेषां मनोयोनेर्विजित्वरम् ॥ २१५ ॥ निरवद्या अमी वन्द्या मया ते यैस्तु साधितः । शौर्येण प्राक् परलोकः श्रामण्यादानतोऽधुना ॥ २१६ ॥ इति ध्यात्वाऽथ रामेण गत्वा तेषां पुरोऽद्भुतम् । प्रणताः कुम्भ-कर्णाद्याः स्तुता मधुरया गिरा ॥ २१७ ॥ सार्धं कन्यान्निरन्यान्निर्विंशत्यां लक्ष्मणस्तदा । पर्यणैषीत्ततश्चागाद्योद्धुं लङ्के-श्वरो रुषा ॥ २१८ ॥ कृपाणपाणिः सौमित्रिः प्रणम्य भ्रातरं निजम् । समं प्रचक्रमे योद्धुं दशास्येनोल्बसद्बलः ॥ २१९ ॥ शस्त्रं यद्यद्दशास्येन निक्षिप्तं तत्र दुर्धरम् । तत्तत्सौमित्रिणा छिन्नं शस्त्राणि प्रतिमुञ्चता ॥ २२० ॥ दशग्रीवेण क्रुद्धेन तत-श्चक्रं निचिक्षिपे । लक्ष्मणं प्रति तत्तस्य पुरस्तात् पतितं क्षणात् ॥ २२१ ॥ गृहीत्वा लक्ष्मणस्तच्च ज्वलज्ज्वालाकरालितम् । साक्षान्मृत्युमुखमिव पौलस्त्यं प्रत्यमुञ्चत ॥ २२२ ॥ मूलोन्मूलितसर्वगर्वितततनुप्रत्यर्थिपृथ्वीप्रभुरप्युच्चैर्मृतिमापदं च लज्जते काध्वाध्वनीनो जनः । श्रीलङ्काधिपतेरितीव युगपच्छित्त्वेद रामानुजः, शीर्षाण्याशु दशापि नीतिनिपुणश्चक्रं प्रति प्रापयन्

१ लक्ष्मीः. २ कामदेवस्य.

॥ २२३ ॥ पूर्वं यानि शिरांसि शम्भुशिरसि प्रत्यग्रजातीसुमसाम्यं साधितवन्ति सम्प्रति बतान्यस्त्रीरिरंसावशात्। तान्येवास्य दशास्यभूम्यधिपतेश्छिन्नानि सौमित्रिणा गृध्रौघांह्रिरीरितानि विलुठन्तीतस्ततः क्ष्मातले ॥ २२४ ॥ अब्रह्मचर्यगुरुपाप्ममहीरुहस्य, प्राप्य प्रसूनमिव मृत्युमिहातिघोरम् । भूयस्तथा फलमिवान्यभवे जवेन, लेजे दुरन्तनरकं दशकन्धरेण ॥ २२५ ॥ लङ्कामवाप्याथ स रामभद्रोऽवातिष्ठिपत्तत्र विभीषणाख्यम् । स्वां वह्निजां प्राप च भर्गजालशशाङ्कलेखामिव निष्कलङ्काम् ॥ २२६ ॥ जितकाशी ततोरामोऽलंचक्रे कोशलापुरीम् । समं सौमित्रिणा भ्रात्रा सुग्रीवाद्यैः समन्वितः ॥ २२७ ॥ तथा स पालयामास सारनीत्या निजाः प्रजाः । यथा नीतिमतामेषोऽजनि मुख्यं निदर्शनम् ॥२२८॥ सीताऽऽदृताऽसत्यपि राघवेण, जनप्रवृत्त्येति निशम्य रामः । माऽन्यायलेशो मयि भूदितीमां, संशोध्य दिव्याकुररीचकार ॥ २२९ ॥ यन्नो वारिधिवारि दुस्तरतरे मज्जन्ति ते प्रस्तराः, कप्योघा यदलंबभूवुरखिलं जेतुं बलं रक्षसाम् । अप्येकं दधता शिरो दशशिरः सौमित्रिणाऽघाति यत्, श्रीमदाशरथीश्वरस्य तदिदं न्यायस्य विस्फूर्जितम् ॥ २३० ॥ एवं विचार्य विजयश्रियमत्र नीत्यधीनामहीनमतयः श्रयतामुमेव । न्यायं यथा भजति राममिवाशु युष्मान्, लक्ष्मीर्यशोविजयवारिधिजा च नित्यम् ॥ २३१ ॥

॥ इति श्रीरामचरित्रं लेशेनाभिहितं । विस्तरार्थिना तु श्रीजैनरामायणादिग्रन्थादवसेयमिति ॥

१ भर्गः शिवः.

अथान्यवृत्तेन नयस्यैव माहात्म्यमाह—

मनसि वसति शश्वन्न्याय एवोत्तमानां, यदमरवरलब्ध्या पारदारिक्यचौर्ये ।
अनुविषयमरौत्सीच्चक्रभृद्ब्रह्मदत्तः, क्व सुरसरिति पङ्कः केशचन्द्रे कलङ्कः ॥ ७५ ॥

व्याख्या—उत्तमानां मनसि शश्वन्निरन्तरं न्याय एव वसति । यद्यस्मात्कारणाद्ब्रह्मदत्तनामा द्वादशश्चक्री अमरवरलब्ध्या देववरप्राप्त्या अनुविषयं देशं अनु लक्ष्यीकृत्य देशमध्ये पारदारिक्यचौर्ये परस्त्रीलाम्पट्यस्तेये अरोत्सीत् रुणद्धि स्म । युक्तमेवेदं महति न्यायस्यैवावस्थानात् । एतदेवाह दृष्टान्ताभ्याम्—क्व सुरसरिति पङ्कः सुरसरिति गङ्गायां पङ्कः कर्दमः क्व ? अपि तु न क्वापि । तथा केशचन्द्रे कलङ्क ईशचन्द्र ईश्वरशिरःस्थे चन्द्रे कलङ्कः क्व ? अपि तु न क्वापि । तथा महतां मनस्यनयो न भवतीति वृत्तवर्णार्थः । भावार्थं तु कथयाऽऽह—

द्वादशश्चक्री ब्रह्मदत्तोऽन्यदा वसन्तर्तुश्रीविनिर्मिताधिकशोभमुद्यानमासाद्य रम्भामिव सुभगां रम्भागर्भसहोदराङ्गीं नागकुमारवल्लभां केनाप्यपरनरेण सार्धं रतक्रीडां कुर्वाणां समीक्ष्यान्यायोऽयमिति रोषारुणितदक्षोणः कशाप्रहारैस्तां तं च ताडयामास । ततः सा स्वपत्युरग्रे गत्वैवं पूत्क्रे—"देवाद्याहमुद्याने स्वैरं क्रीडन्ती ब्रह्मदत्तचक्रिणैवं ताडिता" । ततः सहसोत्पन्नरोषविशेषश्चक्रिणं सान्तःपुरं दहामीति बुद्ध्या यदा सार्वभौमभवनमाजगाम तदानीमेव रहःस्थितस्य चक्रिणोऽग्रे स्त्रीरत्नेनेति पृष्टं—"स्वामिन्नद्योद्याने क्रीडता भवता किं किं दृष्टं ?" । स प्राह—"तत्र नागाङ्गनाऽन्यनृरक्ता मयाऽद्य दृष्टा, अनीतिरियमिति कुट्टिता च" । ततो नागकुमार इत्थं श्रुत्वा गलितरोषः प्रकटीभूयोवाच—"तुष्टोऽहं वरं वृणु" ।

चक्रिणोचे—"श्रीनागकुमारेन्द्रं ज्ञवानवधिसंविदा सर्वमपि जानाति, तेन मामनुगृह्य मद्देशे पारदारिक्यचौर्यकर्तारं कथ-
यतु, यथाऽहं तं शिक्षयामि"। तेनापीति प्रतिपद्यावधिनाऽन्यायकारिणो वीक्ष्य च निवेदिताश्चक्रिणे। तेनापि ते शिक्षिता
इति सतां चेतसि न्याय एव वसतीति वृत्तार्थः॥

उक्तं सप्तत्रिंशत्तमं नयद्वारं। अथोद्देशानुसारेण विनयं विवरीषुराह—

विद्याविभूतिमहिमव्रतधर्ममोक्षसम्पत्तये विनय एव विभुः किमन्यैः।
किं किं नमिः सविनमिर्जिनतो न लेभे, पूज्यांघ्रिरेणुरपि पश्य नमस्य एव॥ ७७॥

व्याख्या—विद्या च विभूतिश्चेत्यादिद्वन्द्वः, एतेषां संपत्तये प्राप्तये विनय एव विभुः समर्थो ज्ञवति। यदुक्तं—

"विणउ सासणे मूलं विणउ संजउ ज्ञवे। विणयाउ विप्पमुक्कस्स कउ धम्मो कउ तवो॥ १॥
विणउ आवहइ सिरिं लहइ विणीउ जसं च कित्तिं च। न कया वि दुविणीउ सकज्जसिद्धिं समाणेइ॥ २॥"

किमन्यैः अन्यैरपरैः कष्टानुष्ठानैः किं? न किञ्चिदपीत्यर्थः, विनयेनैव चरितार्थत्वात्। यतः प्राह—किं किं नमिः
सविनमिः जिनतो न लेभे नमिर्नमी राजा सविनमिर्विनमिसहितो विनयेन जिनतः श्रीप्रथमार्हतः किं किं राज्यादिकं
न लेभे? अपि तु सर्वमपि लब्धवान्। पश्य विलोकय हे विनयिन्निति शेषः। पूज्यांघ्रिरेणुरपि नमस्य एव नमस्करणीय
एव। यदुक्तं—

"तीर्थयात्राप्रचलितसङ्घपादाब्जरेणुभिः । स्पृष्टैरपि पराप्येत न स्पर्शो ऽवरदूषसः ॥ १ ॥" इति वृत्ताक्षरार्थः । भावार्थं तु दृष्टान्तेनाह (नमिविनमिकथा)—

निजं राज्यं विभज्याश्च प्रदाय तनुजन्मनाम् । प्राव्राजीत्प्रथमस्तीर्थनाथोऽन्येद्युर्महाशयः ॥ १ ॥ ततः कच्छमहाकच्छा-ङ्गजन्मानौ समीयतुः । नमिश्च विनमिश्चेति राज्यभागस्य लिप्सया ॥ २ ॥ श्रुत्वा प्रथमतीर्थेशं प्रव्रज्यावर्जिताशयम् । दुःस्थाविव तदानीं तौ स्वचेतसि विषेदतुः ॥ ३ ॥ विधाय स्वामिनः सेवां प्राप्स्यावोऽद्याप्यभीप्सितम् । इत्याशया प्रभुं प्राप्यारेभाते सेवितुं तु तौ ॥ ४ ॥ प्रातः पानीयमानीय स्नपयित्वा प्रभोः पदौ । पूजयित्वा च पुष्पाद्यैस्तौ व्यजिज्ञपताम् इति ॥ ५ ॥ ददत्स्व देव राज्यांशमावाभ्यामपि तीर्थप । इतश्च धरणेन्द्रोऽभागात्प्रभोः प्रणिनंसया ॥ ६ ॥ तौ कुर्वन्तौ तथा वीक्ष्यावादीन्नागनरेश्वरः । साम्प्रतं त्यक्तसङ्गोऽसौ राज्यांशं दातुमक्षमः ॥ ७ ॥ तद्युवां भरतं यातं यथांशं स प्रय-च्छति । तावूचतुस्ततो भर्तुरात्मजो भरतः सुतः ॥ ८ ॥ जिह्वयावावां पुनः सूनू तेनान्यं नाश्रयावहे । धरणोऽवक् प्रभौ दानं ददाने नागतौ कथम् ॥ ९ ॥ तावूचतुस्तदा कार्यमभूभ्यां तेन नागतौ । धरणेन्द्रोऽवदत्तुष्टोऽथाहं वां स्वामिभक्तितः ॥१०॥ सेवकोऽस्मि प्रभोः सेवा मा गादिफलतामिति । पाठसिद्धाः प्रयच्छामि विद्यास्तु युवयोरहम् ॥ ११ ॥ विद्याः श्रीगौरी-गान्धारीप्रज्ञप्तीप्रमुखास्ततः । ददौ ताभ्यामवक् चेति यातं वत्सौ युवां द्रुतम् ॥ १२ ॥ निजान् जनान् समानीय कृत्वा चाकाशचारिणः । दक्षिणोत्तरयोः श्रेण्योर्वैताढ्यस्य गिरेः पुनः ॥ १३ ॥ रथनूपुरचक्राद्याः पञ्चाशत् (शतार्द्धं) प्रवराः पुरः । गगनादिवल्लभाख्यपुरां षष्टिं ततोऽन्यतः ॥ १४ ॥ संस्थाप्य कुरुतं राज्यमित्यादिष्टावहीशिना । एतौ प्रणत्य तीर्थे-

शफणीशौ चक्रतुस्तथा ॥ १५ ॥ त्रिभिर्विशेषकम् ॥ जिनानां जिनचैत्यानां प्रतिमास्थानगारिणाम् । खेचरा ये करिष्यन्ति पराभूतिं च लङ्घनम् ॥ १६ ॥ रमयिष्यन्त्यनिच्छन्तीं खेचरा ये पराङ्गनाम् । तेभ्यो विद्याः प्रयास्यन्ति प्रमादोपहता इव ॥ १७ ॥ युग्मम् ॥ रत्नचित्तौ नागनाथः प्रशस्तिं चैत्यभीलिखत् । नमिर्विनमिराट् चाथ जातौ विद्याधरेश्वरौ ॥ १८ ॥ इत्थं विचार्य प्रविशुद्धबुद्ध्या, किलैहिकामुष्मिकशर्मदायी । उपासनीयो विनयो विनेयैः, कल्पद्रुवत्कामितदो यथा स्यात्॥१९॥

॥ इति नमिविनमिकथा ॥

अथास्यैव विपक्षभूतस्य दुर्विनयस्यानादेयतामाह—

किं मर्त्यस्त्रिदशोऽप्यपास्तविनयो म्लानेः सहानेः पदं, यक्षो वृक्षकरः किमार्यखपटाचार्येण नाशिक्ष्यत ।
किं वा विष्णुकुमारतो न नमुचिर्मृत्वाऽगमद्दुर्गतिं, नद्योघस्तरुमुन्नतं रुजति वा नम्रं तु नो वेतसम् ॥ ७८ ॥

व्याख्या—तथाविधसामर्थ्यादिरहितत्वान्मर्त्यो मानवः किं ? न किञ्चिदित्यर्थः । समर्थस्त्रिदशोऽपि देवोऽपि अपास्तविनयस्त्यक्तविनयः सन् पूज्य इति गम्यते, म्लानेः पराभवस्यास्पदं स्थानं भवति।किंविशिष्टाया म्लानेः ? सहानेः हान्या क्षयेण सह वर्तते या सा तथा तस्याः । एतदेवोदाहरणाभ्यां स्थिरयति—वृक्षकरनामयक्षोऽपास्तविनयः सन् आर्यखपटाचार्येण किं नाशिक्ष्यत ? अपि तु अशिक्ष्यतैव । अत एव स यक्षोऽपि म्लानेः पदं बभूवेति भावः । वाऽथवा नमुचिनामब्राह्मणो विष्णुकुमारर्षेः सकाशात् दुर्विनीतः सन् मृत्वा मरणमासाद्य दुर्गतिं नरकगतिं किं नागमत् ? अपि त्वगमदेव । अतः स भूदेवोऽपि म्लानेः पदं जात एवेति हृदयं । अथ लोकेऽपि नद्योघो नदीप्रवाह उन्नतं स्तब्धाकृति-

मनम्रं तरुं वृक्षं रुजति पीडयति पातयतीत्यर्थः । तु पुनर्नम्रं नमनशीलं वेतसं वृक्षविशेषं नद्योघो न रुजति न पातयतीति वृत्तसमासार्थः । व्यासार्थं तु दृष्टान्तान्यां स्पष्टयति (वृक्षकरयक्षकथा)—

समस्ति देशे लाटाख्ये पुरं नृगुपुराख्यया । तत्रार्यखपटाचार्यः सर्वविद्याविशारदः ॥ १ ॥ तद्विनेयो ऽग्निनेयः प्रज्ञालो बालकोऽप्यलम् । तेनान्यदा गुरोः पार्श्वाद्विद्यैका जपतः श्रुता ॥ २ ॥ विद्यासिद्धगुरोर्योगाद्विद्या सिद्धा च तस्य सा । इतश्च गुरुशस्त्राख्ये पुरे सुरपुराधिके ॥ ३ ॥ विजिग्ये साधुभिर्वादे परिव्राट् तत्पराजवात् । अमृताद्भूच्च तत्रैव यक्षो वृक्षकराभिधः ॥ ४ ॥ युग्मम् ॥ प्राग्वैरस्मरणक्रोधात् साधून् ऽापयते स्म सः । अथार्यखपटाचार्यान् सङ्घ आकारयत्ततः ॥ ५ ॥ गच्छं विसृज्य सर्वं स्वं बालकं च स्वसुः सुतम् । तेऽथ स्वदृपपरीवारा गुरुशस्त्रमयुः पुरम् ॥ ६ ॥ साधून् प्रहित्य पूर्मध्ये सायं सूरीश्वराः स्वयम् । यक्षवृक्षकराख्यस्याश्रमे तस्थुः सुनिश्चलाः ॥ ७ ॥ विधायोपानहौ तस्य कर्णयोः शिरसि क्रमौ । प्रसुप्ताः सूरयः प्रातरागुश्च निखिला जनाः ॥ ८ ॥ ततस्तद्दीक्ष्य चोत्पाद्य सूरयो दूरिता अपि । भूयो भूयोऽपि तत्रैव सुप्तास्ते तैर्निरीक्षिताः ॥ ९ ॥ राज्ञे निवेदयामासुस्तेऽथ सोऽप्यागमद्रुषा । सूरींश्च तामयामास लेष्टुखण्डैस्तु निर्घृणः ॥ १० ॥ संक्रामिताः प्रहारास्ते तद्बुध्यन्तेऽथ सूरिभिः । तद्दीक्ष्य क्षमयामास तान् भूपोऽपि चमत्कृतः ॥ ११ ॥ अदर्शयन्नथोत्थाय स्वमार्यखपटाभिधाः । विसिष्मियेऽखिलो लोको वीक्ष्य शक्तिं गुरोस्ततः ॥ १२ ॥ प्रवेशयितुमारेभे पुरे सूरीन्नृपस्तदा । अग्रे चक्रेऽथ सूरीशैर्महाडोणी दृषन्मयी ॥ १३ ॥ यक्षं वृक्षकराभिख्यं मूर्तीरप्यपराः पुनः । अग्रे कृत्वा महाडोण्या स्फालयामास सूरिराट् ॥ १४ ॥ खाट्कारैर्दुःखिता मूर्तीरिमा मुञ्चत सूरयः । इत्युक्ता भूभुजा यक्षं

प्रतिमाश्चामुचन्नमी ॥ १५ ॥ ता निजायतने गत्वा तदैव प्रागिव स्थिताः। ज्ञक्त्या च मेऽुरा जज्ञुः श्राविका इव साधुषु ॥ १६ ॥ सूरयोऽग्रे विधायागुर्महाऽोणीं दृषन्मयीम्। प्रतोलीद्वारि संस्थाप्य तां जगुश्च मुनीश्वराः ॥ १७ ॥ अद्यापि मादृशः कोऽपि स्वस्थाने प्रापयेदिमाम्। ततः प्रबोध्य राजादीन् विजह्रुः सूरयोऽन्यदा ॥ १८ ॥ इतश्च नृगुकल्लाख्ये पुरे श्रीवासवेश्मनि। रसल्लाम्पट्यतो जज्ञे तज्जामेयो हि सौगतः ॥ १९ ॥ रसगृध्नुतया सोऽथ तदुपासकवेश्मसु। प्रहित्य सौवपात्राणि पूरयित्वाऽऽनयत्यहो ॥ २० ॥ मरुत्पथपथाऽऽयान्ति प्रेक्ष्य पात्राणि तान्यथ। तल्लक्त्यावर्जितस्तस्योन्मुखोऽजनि घनो जनः ॥ २१ ॥ ततो मिथ्यात्वविच्छित्त्यै सङ्घ आकारयद्गुरून्। प्रज्ञन्नचर्यया तेऽपि तत्राजग्मुर्मुनीश्वराः ॥२२॥ [1]आयातां तस्य प्रात्राणां घृतानामन्तरा शिला। विचक्रे सूरिभिस्तत्रास्फाल्य सर्वाणि पुस्फुटुः ॥ २३ ॥ ज्ञीतोऽनेशत्स जामेयो मत्वाऽऽयातान् गुरूनथ। बुद्धायतनमासाद्य तेऽपीत्थं बुद्धमूचिरे ॥ २४ ॥ वन्दस्वास्मानिह प्राप्तानेहि शौद्धोदने ततः। उत्थाय तस्य प्रतिमा तेषां पादतलेऽलुठत् ॥ २५ ॥ विसृष्टा साऽगमत्स्थानं मुक्तस्तूपः[2] समागमत्। गल्लेत्युक्तो गतः किञ्चिन्नम्रीज्ञावेन च स्थितः ॥ २६ ॥ निर्ग्रन्थनामित इति ख्यातिं स्तूपस्तदाद्यगात्। प्रज्ञाव्य शासनं त्वित्थं सूरयोऽपि दिवं ययुः ॥ २७ ॥ मर्त्यः कियान् चेदज्ञवत्सुरोऽपि, निन्दापदं दुर्विनयादितीह। समूलमुन्मूलय दुर्विनीतितरुं ततो दुःखफलं विनेय ॥ २८ ॥

॥ इति वृद्धकरयद्धकथानकम् ॥

---

१ आगच्छताम्. २ मुक्तनामास्तूप इत्यर्थः.

अथानेनैव वृत्तेन सूचितां नमुचिकथां प्रथयति—

समस्ति स्वस्तिकृद्धस्तिनागनाम पुरं वरम् । रागधीरिव सर्वज्ञे यत्र नीतिकथाऽपि न ॥ १ ॥ पद्मोत्तरो नृपस्तत्र नाकिनायकवद्विया । कान्ता रंजेव तत्कान्ताऽजवज्जालाऽभिधानतः ॥ २ ॥ आद्यस्तदङ्गजो विष्णुकुमार इति यस्य न । [1]एनो नरं मनोवृत्तिर्व्रतिनीव स्पृशत्यपि ॥ ३ ॥ अन्यश्चतुर्दशस्वप्नप्रोक्तचक्रित्ववैभवः । महापद्मो महापद्मोऽजनि तस्यास्तनूरुहः ॥ ४ ॥ नोररीकृतवान् ज्यायान् राज्यं पित्रार्पितं ततः । [2]राज्यं यौवधरे पित्रा स्वं न्यवेशि कनीयसि ॥ ५ ॥ इतश्च सुव्रताचार्या अवन्तीं नगरीं ययुः । तान्निनंसुर्नृपो धर्मो जग्मिवान् सपरिच्छदः ॥ ६ ॥ तन्मंत्री नमुचिस्तेन सहायातोऽतिदुष्टधीः । द्वेषेण विदधे धर्मे वदमानो निरुत्तरः ॥ ७ ॥ एतान् हन्मीति तम्यां स मुमुक्षूनभिधावितः । खड्गग्रहव्यग्रहस्तोऽस्तम्भि देवतया सकः ॥ ८ ॥ प्रातर्धात्रीधवस्तत्र प्राप्तः पौरपरिच्छदः । विस्मितस्तं तथा वीक्ष्याऽवच्च मुनिभक्तिभाक् ॥ ९ ॥ कृपापरीतचेतस्का देवता मुमुचेऽथ तम् । लज्जयाऽप्यपसृत्यासौ हस्तिनागपुरेऽगमत् ॥ १० ॥ स कुमारं महापद्मं प्रक्रान्तस्तत्र सेवितुम् । यदाऽयं भूपतिर्भावी कामदो मे तदेत्यथ ॥ ११ ॥ इतश्च निखिलं तस्य देशं सिंहबलो नृपः । भंक्तुं लग्नस्ततो बुध्या नमुचिस्तमबन्धयत् ॥ १२ ॥ ततस्तुष्टः कुमारेन्द्रो ददमानो वरं तदा । निषिद्धस्तेन कालेऽहं ग्रहीष्यामीति जल्पता ॥ १३ ॥ जाला राज्यन्यदाऽकार्षीज्जिनायतने रथम् । तत्सपद्यकरोद्ब्रह्मरथं लक्ष्मीतिसंज्ञिका ॥ १४ ॥ लब्ध्याऽऽज्ञाणि नृपो देव प्राग्निस्सारय मे रथम् । श्रुत्वेति परमार्हत्या प्रत्यज्ञायीति जालया ॥ १५ ॥ निःसरेच्चे-

१ पापम्. २ यौवराज्यपदम्.

ऊथो जैनः प्राग् नानशनयामि तत् । श्रुत्वेत्यथ निषिद्धौ तौ रथौ द्वावपि नूनुजा ॥ १६ ॥ स्वजनन्यपमानेन महापद्मो निरैन्निशि । ततो महाटवीं प्राप दुरन्तां स्त्रीचरित्रवत् ॥ १७ ॥ कष्टेनोल्लङ्घ्य तां प्राप्य नगरं सिन्धुनन्दनम् । कन्याशतं पर्यणैषीन्महसेनमहीशितुः ॥ १८ ॥ क्रमाद्गरुप्रतापोऽयं पूषेव क्षितिमण्डले । चक्रित्ववैजयं प्राप्य हस्तिनागपुरे ययौ ॥ १९ ॥ महापद्मे ततो राज्यं न्यस्य पद्मोत्तरो नृपः । सन्निधौ सुव्रतार्यस्य श्रामण्यं समशिश्रियत् ॥ २० ॥ पित्रा सहैव निष्क्रान्तः संसारोद्विग्नमानसः । विष्णुः सूरिसमीपेऽथ पेठे शास्त्राणि कानिचित् ॥ २१ ॥ सार्वभौमो महापद्मो जनन्या कारितं रथम् । पुरेऽथ भ्रामयामास महर्द्ध्या धर्ममर्मवित् ॥ २२ ॥ धर्मं संपादयामास प्रबोध्य सचिवान्निजान् । नाना-धर्ममहैश्चक्री चक्रेऽर्हन्नासनोन्नतिम् ॥ २३ ॥ पद्मोत्तरमहर्षिस्तु तप्त्वा तीव्रं तपोविधिम् । संयमक्रममापाल्य परमं पदमा-सदत् ॥ २४ ॥ तपस्यन् संततं विष्णुर्लब्धीर्लेभेऽतिपुष्कलाः । तन्माहात्म्यात् प्रयात्येष सपारातिरिवाम्बरे ॥ २५ ॥ सौवर्णशैलवत्स्थूलान्यणूनि परमाणुवत् । रूपाणि बहुधा नाकिनाथवत्तनुतेऽथ सः ॥ २६ ॥ इतश्च सुव्रताचार्यास्तस्थुर्ग-जपुरे पुरे । वर्षाकाले कदाचिच्च नमुचिस्तान्निरैक्षत ॥ २७ ॥ पूर्वं वैरं ततः स्मृत्वा तस्य प्रतिचिकीर्षुणा । चक्रिणं स वरं प्राच्यं ययाचे सोऽप्यदात्ततः ॥ २८ ॥ उवाच नमुचिर्यज्ञं यियक्षुर्हे नरेश तत् । दिनानि कानिचिद्यावन्निजं राज्यं प्रदेहि मे ॥ २९ ॥ चक्री सत्यप्रतिज्ञोऽथ तस्य राज्यं वितीर्णवान् । तस्थिवाँश्च स्वयं सौधान्तरौदासीन्यवृत्ततः ॥ ३० ॥ उन्मना नमुचिर्यज्ञपाटेऽभूद्व्रतदीक्षितः । तस्य वर्धापनेऽन्यायुः सुव्रतार्यं विना जनाः ॥ ३१ ॥ प्रसह्याकार्य सूरीन् स उन्नाय्येदं

१ अनशनं करोमि. २ पूषा सूर्यः. ३ गरुत्मत् इव.

च दूषणम् । ऊचिवान्नमुचिः प्रेङ्खद्रोषारुणितलोचनः ॥ ३१ ॥ धृष्टा दुष्टास्तथा स्तब्धा लोकबाह्या मलीमसाः । भवन्तस्तेन मे राज्यं त्यक्त्वा गच्छन्तु सम्प्रति ॥ ३३ ॥ सूरयोऽथ जगू राजन् बहुधाऽस्ति जनस्थितिः । या सावद्याऽत्र साधूनां सा न कर्तुं प्रकल्प्यते ॥ ३४ ॥ तेनागता वयं नात्र द्वेषो नो नास्ति कश्चन । श्रुत्वेति नमुचिः क्रुद्धः सूरीन्भान् प्रत्यभाषत ॥ ३५ ॥ किं भोः प्रलपतेऽत्युच्चैर्यदि सप्तदिनोपरि । स्थास्यथात्र तदा वोऽहं मारयिष्याम्यशेषतः ॥ ३६ ॥ सूरिपो वसतिं प्राप्य ततः साधूनभाषत । किं कर्तव्यमिति प्रोचे कश्चित्साधुरिदं तदा ॥ ३७ ॥ भ्राता चक्रभृतो विष्णुकुमार इति नामतः । तपस्यन् विविधा लब्धीराससाद प्रमादजित् ॥ ३८ ॥ स पुनः साम्प्रतं स्वर्णाद्रौ चतुर्मासकं स्थितः । स एव नमुचिं शक्तः शासितुं तु यथा तथा ॥ ३९ ॥ सूरयो जगदुर्युक्तमुक्तं किं त्वानयेत तम् । कोऽत्रेत्यथ बभाषेऽन्यः कश्चिज्ज्ञानधनः स्फुटम् ॥ ४० ॥ मेरौ मे गमने शक्तिरस्ति नागमने पुनः । त्वामप्यानेष्यते विष्णुरित्यादिष्टः स सूरिभिः ॥ ४१ ॥ तदैवोत्पत्य नभसि तत्र गत्वा च विष्णवे । निवेदितं तेन सर्वं दध्यौ सोऽपीति चेतसि ॥ ४२ ॥ सङ्घकार्यं गरीयोऽदस्तद्वर्षास्वपि गम्यते । मयि तत्र गते भाविन्युन्नतिः शासनेऽर्हताम् ॥ ४३ ॥ गृहीत्वा तं मुनिं प्राप्तस्ततोऽसौ सूरिसन्निधौ । संभाष्यान्यान्मुनीन् विष्णुः समीपे नमुचेर्ययौ ॥ ४४ ॥ राजलोकेन सर्वेण तं विना प्रणतो मुनिः । ततो वाण्या सुधासाधीयस्याऽसौ धर्ममादिशत् ॥ ४५ ॥ सोऽथोचे नमुचिं वर्षास्वत्र तिष्ठन्तु साधवः । प्रावृट्कालात्ययेऽन्यत्र विहरिष्यन्त्यमी स्वयम् ॥ ४६ ॥ सोऽप्युवाच कृतं विप्रलापैरेतैः परं यदि । स्थास्यन्ति साधवोऽत्राहं मारयिष्याम्यसंशयम् ॥ ४७ ॥ विष्णुरूचेऽतिरोषेण पापिन् ज्ञानधनेष्विति । दुष्टत्वं दधतस्तेऽद्भूत्प्रतिकूलो विधिर्ननु ॥ ४८ ॥ कृतं नो

बहुना देहि स्थातुमत्र पदत्रयम् । सोऽपीति प्रतिपद्येदं बभाषे निष्ठुराक्षरम् ॥ ४९ ॥ अत्र साधूनहं लप्स्ये यदि त्यक्त्वा पदत्रिकम् । मत्तः पञ्चत्वमाप्स्यन्ति तर्हि ते निखिला अपि ॥ ५० ॥ ततः प्रकुपितो विष्णुकुमारोऽखिललब्धिभृत् । वैक्रियेण शरीरेण प्रक्रान्तो वर्धितुं दिवि ॥ ५१ ॥ स योजनलक्षमानशरीरस्तत्क्षणादभूत् । भयकृद्भुवनस्यापि दुष्प्रेक्ष्यः प्रलयाग्निवत् ॥ ५२ ॥ अङ्घिपङ्क्तिरशीर्षाण्युल्लालयन् जलधेर्जलम् । भवनेशव्यन्तराणां क्षोभं चक्रे क्षणादसौ ॥ ५३ ॥ दत्त्वा शीर्षे पदं क्षिप्तो नमुचिस्तु रसातले । यावत्पूर्वापराम्भोध्योः कृत्वांही मुनिना स्थितम् ॥ ५४ ॥ श्रुत्वा तावन्मुनिं क्रुद्धं शक्रस्तस्योपशान्तये । प्रजिघाय ततः स्वीयाप्सरसः सरसस्वराः ॥ ५५ ॥ दुष्कर्मराशिसमराजिरसांयुगीनानैदंयुगीनगुणमालिकया नवीन । धर्मन्निदं जगति कोपमपाकुरुष्वाक्षामक्षमाश्रय समाश्रय शोभां साक् ॥ ५६ ॥ यथा रुषं नैरयिकास्तिरश्चां, गणाश्च कुर्वन्ति विवेकमुक्ताः । तद्वत्त्वमप्याश्रयसे रुषं चेन्मुने विवेकस्य फलं तु तत्किम् ॥ ५७ ॥ इत्यादि वाक्यानि निवेद्य पौनःपुन्येन तस्मै मुनये सशक्ति । ततः सपौराप्सरसो रसेन चक्रुर्महर्ध्या खलु शान्तिकर्म ॥५८॥ महापद्मश्चक्री व्यतिकरमिमं लोकमुखतस्ततः श्रुत्वा गत्वा मुनिगुरुतयोऽप्येकचकितः । स्थितस्तस्याश्रित्य क्रमकजयुगं शृङ्गवदयोपशान्तिः संजाता कथमपि मुनेर्लब्धिजलधेः ॥ ५९ ॥ अथालोच्य प्रतिक्रम्य सौवं पापं पुरो गुरोः । साधुत्वं लब्धवान् विष्णुरागमोक्तिरियं यतः ॥ ६० ॥ आचार्यचैत्यसङ्घाविनीतानां विनाशकः । समालोच्य प्रतिक्रम्य महापापोऽपि शुध्यति ॥ ६१ ॥ इति लब्धिसमृद्धिबन्धुरो, विजहारावनिमण्डलेऽखिले । उपलभ्य ततश्च केवलं, शिवशर्माप च विष्णुसाधुराट् ॥ ६२ ॥ महापद्मोऽपि प्रव्रज्य सिद्धः केवलसंविदा । नमुचिस्तु मृतो दुर्गदुर्गतिं गतवान् क्षणात् ॥६३॥ एवं

भवबन्धविनाशहेतुं, भो भो जना दुर्विनयं निशम्य । चिकीर्षुभिः स्वस्य हितं विधेयः, शमैकभूमिर्विनयो भवद्भिः ॥६४॥

॥ इति नमुचिकथा ॥

समाप्तमित्यष्टात्रिंशत्तमं विनयद्वारं । अथ क्रमायातं वैराग्यं विवरीषुराह—

राज्यं शक्रकृताभिषेचनमहो रूपं त्रिलोकेऽप्यसत्सारूप्यं च सनत्कुमारनृपतेः सोऽप्यङ्गवैराग्यतः ।
चक्रे चारु तपः सलब्धिरजितः स्वं नाचिकित्सत्पुना,रज्येद्वा प्रतिकर्मनिर्मलरुचौ कः कुप्यपात्रे सुधीः ।७९।

व्याख्या—सनत्कुमारनृपतेः सनत्कुमारचक्रिणः अहो इत्याश्चर्ये राज्यं शक्रकृताभिषेचनमभूत् शक्रेणेन्द्रेण कृतमभिषेचनमभिषेको यत्र तत्तथा । च पुना रूपं असत्सारूप्यमभूत् सरूपं समानं सरूपस्य भावः सारूप्यं असदविद्यमानं सारूप्यं यस्य तत्तथा । क ? त्रिलोकेऽपि । सोऽपि सनत्कुमारोऽपि अङ्गवैराग्यतो देहविरागत्वेन चारु निर्मलं तपश्चक्रे । ततः सलब्धिरजितः अजितः सामस्त्येन संजातलब्धिः स्वमात्मानं नाचिकित्सन्न प्रत्यकार्षीत् रोगग्रस्तमिति शेषः । युक्तमस्य मुनीश्वरस्य बाह्यानित्यासारशरीराननुरञ्जनं । एतदेवाह—रज्येदेति सुधीः सद्बुद्धिः पुमान् कुप्यपात्रे को रज्येत् को रागं कुर्यात् ? अपि तु न कोऽपि । किंभूते कुप्यपात्रे ? प्रतिकर्मनिर्मलरुचौ प्रतिकर्मणा समुत्तेजनेन निर्मला निष्कलङ्का रुचिर्यत्र तत्तथा (तस्मिन्) इति वृत्ताक्षरार्थः । भावार्थस्तु कथयोच्यते (सनत्कुमारचक्रिकथा)—

नृपोऽभूद्विक्रमयशाः श्रीकाञ्चनपुरे पुरे । क्रीडति स्म वशापञ्चशतीभिः स करेणुवत् ॥ १ ॥ नागदत्ताख्यया श्रेष्ठी तत्र श्रेष्ठतमोऽजनि । बभूव तस्य विष्णुश्रीर्विष्णोः श्रीरिव वल्लभा ॥ २ ॥ उपमातुं क्षमा लोके सर्वामपि जगत्त्रयीम् ।

दक्षाः स्युर्न च दक्षाणां वाण्यो यद्रूपवर्णने ॥ ३ ॥ राजवर्त्मनि यान् राजा वीक्ष्य तामन्यदा शुभ्राम् । ततोऽनुरागजा
गेष प्रसह्यान्तःपुरेऽक्षिपत् ॥ ४ ॥ नागदत्तः परिभ्राम्यन् वह्वभ्राविरहातुरः । न वने भ्रवनेऽप्याप रतिं दाहज्वरार्तवत्
॥ ५ ॥ धात्रीजिष्णुरथो विष्णुश्रियामासक्तमानसः । पुरास्थितामहो पट्टराज्ञीमपि न पश्यति ॥ ६ ॥ भ्रर्तुराज्ञेदतः क्रुद्धाः
सर्वा अपि नृपाङ्गनाः । कार्मणादिप्रयोगेणामारयँस्ताः क्रमादिमाम् ॥ ७ ॥ मृतामेतामविज्ञाय महीभृन्मोहमोहितः । रुष्टां
मत्वाऽथ तत्पादलग्नश्चाटूक्तिमातनोत् ॥ ८ ॥ स तां तथाप्यजल्पन्तीमङ्कपङ्करुहे न्यधात् । निन्येऽन्यत्र ततो भूपो मन्त्रि-
भिर्मन्त्रकैतवात् ॥ ९ ॥ प्रेष्यैरचिक्षिपँस्तेऽस्या बहिर्देहं निरात्मकम् । मन्त्रयित्वा गतो भूपस्तामप्रेक्ष्यापतत्क्षितौ ॥ १० ॥
स चन्दनाम्बुना सिक्तो निर्मूर्छः सचिवान् जगौ । यत्र कुत्र प्रिया मेऽस्ति ततोऽप्यानीयतां द्रुतम् ॥ ११ ॥ अत्रामुत्रा-
स्त्यसावित्थं वदद्भिर्धीसखैस्ततः । दिनद्वयमतिक्रम्य नीतोऽसौ तद्भवान्तिके ॥ १२ ॥ तस्याः शरीरमालोक्य वैरूप्यैक-
निकेतनम् । विखिन्नः क्षोणिभृत्तेति चिन्तयामास चेतसि ॥ १३ ॥ कृत्वा कृपाणलतिकां विषमायुधो यां, विश्वत्रयीमपि
जिगाय महाप्रतापः । वेधोवशेन सरला खलु केशपाशी, वातेरिता रुलति भ्रूवलयेऽधुना सा ॥ १४ ॥ याच्यां विजित्य
नलिनी नलिनाकरेऽहो, क्षिप्ताऽतिदुःखविततीरनुबोभ्रवीति । उत्खातमध्यगतगोलकले द्विजाद्यैस्ते चक्षुषी पतितकूपतु-
लामलाताम् ॥ १५ ॥ यत्साम्यकाम्यति तमीरमणे सुवृत्तेऽप्यानन्दकेऽपि जगतामलगत्कलङ्कम् । तत्साम्प्रतं पितृवने
पतितं विरूपमास्यं समाश्रयति पक्वपलाशशासम् ॥ १६ ॥ स्पृष्टुं दिवाकरकरैरपि या न शक्या, वन्द्यैर्जगत्त्रितयवर्तिजनै-

१ चन्द्रे. २ स्मशाने.

रपीह । क्षिप्ता बहिर्विधिवशेन तनुर्ध्रुवं सैवाहन्यते विविधपक्षिपदैरिदानीम् ॥ १७ ॥ मत्तोऽपि कोऽपि जुवनेऽस्ति न मूढबुद्धिर्योऽस्याः कृते त्यजति कीर्तिविनीतिनीतीः[1] । इत्थं स्मरन्नरपतिः श्रितवान् जवेन, वैराग्यवार्धितनयां स नयावतंसः ॥ १८ ॥ अथासौ जगृहे जूपो व्रतं श्रीसुव्रतार्यतः । तप्त्वा तपांसि तीव्राणि तृतीयस्वर्गजागजूत् ॥ १९ ॥ च्युत्वा रत्नपुरे श्रेष्ठी जिनधर्माजिधोऽजनि । भ्रान्त्वा जवान् सिंहपुरे नागदत्तोऽप्यजूद्विजः ॥ २० ॥ अग्निशर्माख्ययाथासौ त्रिदण्डित्वमशिश्रियत् । कृतद्विमासक्षपणो भ्रमन् रत्नपुरेऽगमत् ॥ २१ ॥ जोक्तुं न्यमन्त्रयद्भूप इमं रत्नपुरेशिता । समीक्ष्य जिनधर्मं स नृपाग्रे प्रोचिवानिदम् ॥ २२ ॥ न्यस्यास्य वणिजः पृष्ठे जाजनं जूप मां यदि । जोजयेस्तर्हि जुञ्जेऽहं यन्मे जाड्याऽधुनेदृशी ॥ २३ ॥ नृपाज्ञयाऽददत्तस्मै पृष्ठं स श्रेष्ठिपुङ्गवः । कृत्वा सोऽत्रोष्णपायस्याऽमूमुचत्ताम्रजाजनम् ॥ २४ ॥ ताप्यमानोऽस्य तापेन स पृष्ठेऽदीनमानसः । विशुद्ध्यानलीनात्मा श्रेष्ठिराजित्यचिन्तयत् ॥ २५ ॥ पूर्वजन्मनि कोऽप्यस्य यः संतापो मया ददे । पृष्ठे स एव मे लग्नः तन्नायं सह्यते कथम् ॥ २६ ॥ तस्मिन् जुक्त्वोत्थिते स्थाले पार्थक्यं चर्मणा समम् । जेजेऽथ जिनधर्मोऽपि समागान्निजवेश्मनि ॥ २७ ॥ चैत्यसङ्घार्चनां कृत्वाऽऽत्तव्रतः शिखरे गिरेः । कृतोत्सर्गः स गृध्राद्यैर्बाध्यमानो मृतस्ततः ॥ २८ ॥ शक्रोऽजूदादिमे कल्पे स स्वल्पेतरदीधितिः । मृत्वा त्रिदण्डी जज्ञेऽस्य यानमैरावताख्यया ॥ २९ ॥ ततश्च्युतः स संसाराटवीं पर्यट्य दारुणाम् । सिताङ्ग इति कालेन समजायत गुह्यकः ॥ ३० ॥ च्युत्वाथ जिनधर्मात्मा पुरे श्रीहस्तिनापुरे । अश्वसेनमहीभर्तुः सुतत्वेनोदपद्यत ॥ ३१ ॥ चतुर्दशमहास्वप्नोदितचक्रभृ-

१ विनीतिर्विनयः.

दिन्दिरः । कलाभिर्ववृधे सार्धं शुक्लपक्षे यथा शशी ॥ ३३ ॥ सनत्कुमार इत्येष संप्राप्तो यौवनावनीम् । तदानीमस्य रूप-
श्रीरप्याधिक्यमधिश्रिता ॥ ३३ ॥ यथाऽस्य श्रीस्तथा रूपं यथा रूपं तथा गुणाः । अपि वाचस्पतेर्नायुर्वचोगोचरचारि-
ताम् ॥ ३४ ॥ कालिन्दीसूरयोः सूनुर्बभूव परमः सुहृद् । महेन्द्रसिंह इत्यस्य मनोजस्येव माधवः ॥ ३५ ॥ कुमारः सुहृदा
सार्धमगाद्युद्यानमन्यदा । वसन्तेऽथ नृपः प्रैषीदश्वं तस्योपदागतम् ॥ ३६ ॥ त्यक्तक्रीरुः कुमारस्तं वाहमारुह्य रंहसा ।
ततो वाहयितुं लग्नो वल्गामाकृष्य चौजसा ॥ ३७ ॥ कुमारोऽथ बलाद्वल्गामाचकर्ष यथा यथा । तथा तथा हयो जज्ञे
वातादधिकवेगवृत् ॥ ३८ ॥ जवेन वाजिना तेन व्रजता वर्त्मनि क्षणात् । कुमारः सुकुमारः स दूरितो मित्रदृक्पथात्
॥ ३९ ॥ श्रुत्वेत्यथान्वगादेनमश्वसेनः स्वसेनया । सहावीक्ष्य सुतं दुःखाद्रोदितुं स प्रचक्रमे ॥ ४० ॥ ततो महेन्द्रसिंहे-
नोपरोध्य धरणीधवः । व्यावर्त्य सौधमानीतः कुमारविरहातुरः ॥ ४१ ॥ अनुज्ञाप्य स्वयं तं तु सुहृदं वीक्षितुं क्षितिम् ।
निखिलामपि बभ्राम सोऽविच्यन्मार्गदुःखतः ॥ ४२ ॥ कौबेर्यां भ्रमता तेन निरैक्ष्यत सरोवरम् । स्फुरत्पङ्करुहोत्सङ्गसङ्गि-
हंसोपशोभितम् ॥ ४३ ॥ पालिशालफलैस्तस्यातिथ्यं तत्सलिलेन च । व्यधादब्दसरोवृक्षा यत्प्रायोऽन्योपकारिणः ॥ ४४ ॥
पालिमौलिस्थितोऽशौषीवेणुवीणारवं वरम् । ततोऽनुगच्छन् स्वं मित्रं कुमारं स समैक्षत ॥ ४५ ॥ जितनाकिवधूवृन्दवधू-
वृन्दान्तरस्थितम् । अङ्गरक्षाश्रितं वीक्ष्य स तं व्यस्मयत क्षणम् ॥ ४६ ॥ प्रणमन्तं च तं दूरात्सहसोत्थाय भूपभूः ।
प्रत्यभिज्ञाय सस्वजे प्रमोदभरमेदुरः ॥ ४७ ॥ पृष्टस्तेन कुमारोऽथ वृत्तमाख्यातुमात्मनः । भ्रूसंज्ञया प्रियां प्रेर्य स्वयं

१ वसन्तः.

सुष्वाप मायया ॥ ४८ ॥ सा जगौ बकुलमतीनाम्नी तव सुहृत्तदा । अपहृत्य वनं निन्ये दुस्तरं दुष्टवाजिना ॥ ४९ ॥ तृषाशुष्यज्जलस्तत्र श्लथां वल्गां चकार सः । तत्रैव चित्रलिखितवदूर्ध्वोऽश्वः स्थितस्ततः ॥ ५० ॥ हयस्ते सुहृदाऽमोचि स प्राणैरपि तावता । पपात नृपनूर्नूमिरुद्गायायां स मूर्छितः ॥ ५१ ॥ अधिष्ठाता तरोस्तस्य यक्षस्तर्ष्मनोदितः । अभिषिच्याम्भसाऽकार्षीत् कुमारं नव्यचेतनम् ॥ ५२ ॥ कुमारोऽवक् पयः पायं पायं कस्त्वमिदं पयः । सुधारससमं कस्मादानैषीश्च जलाशयात् ॥ ५३ ॥ स जगौ गुह्यकोऽहं त्वां पतितं वीक्ष्य मूर्छितम् । मानसात्सरसो नीरमानैषं प्रस्फुरत्कृपः ॥ ५४ ॥ त्वत्सखाख्यत्तनौ तापो बाधते मेऽधिकाधिकम् । नय मां मानसं येन तत्स्नानात्स्यां निरामयः ॥ ५५ ॥ तत्र नीतोऽथ तेनायं स स्नातः पीततत्पयाः । पिपासामार्गश्रमयोर्जलाञ्जलिमकल्पयत् ॥ ५६ ॥ निर्गतोऽयं ततो यावत्तावत्प्राग्जन्मशत्रुणा । दृष्टः सिताक्ष्यक्षेण चिरं क्रोधेन योधितः ॥ ५७ ॥ हतोऽथ मुष्टिना वज्रसारेण कुमरेण सः । प्रणष्टो दुष्टधीर्वातान्निघातेनेव दीपकः ॥ ५८ ॥ अथ तत्सत्त्वसंतुष्टैर्दैवतैः सुष्ठु तुष्टुवे । पुष्पवृष्टिश्च तन्मूर्ध्नि विचक्रेऽतिचमत्कृतैः ॥ ५९ ॥ अष्ट कन्या नानुवेगविद्यान्नृद्भूनृतस्तदा । पुरं कुमारमन्यर्थ्यं निन्यिरे निजकं जवात् ॥ ६० ॥ एताः कनीरुपायंस्त पित्रा दत्ताः सुहृत्तव । पुण्योन्नायवतां किं किं कल्याणं नोपतिष्ठते ॥ ६१ ॥ प्रसुप्तोऽयं समं तान्निर्गुह्यकेनाऽमुनाऽरिणा । क्षिप्तोऽन्यत्र जजागार प्रागचाक्षीच्च सोऽग्रतः ॥ ६२ ॥ स सप्तनौमिकं सौधं प्रेक्ष्यारोहत्सखा तव । तत्रैकां कन्यकां वीक्ष्य रुदतीमित्यनाषत ॥ ६३ ॥ किं रोदिषि शुभे साथाचख्यौ साकेतपत्तने । सुराष्ट्रनृनुजः पुत्री सुनन्दा

संज्ञयाऽस्म्यहम् ॥ ६४ ॥ पित्रा धात्रीधवस्याहमश्वसेनस्य सूनवे । प्रत्ता[1] सनत्कुमाराय जितमाराय रूपतः ॥ ६५ ॥ विद्याऽनृताऽपहृत्याहमन्यदैकेन केनचित् । मुमुचेऽत्र न जाने च स पापी किं विधास्यति ॥ ६६ ॥ अयमाख्यच्च मा ज्ञैषीरश्वसेनात्मजोऽस्मि सः । वज्रवेगं प्रियाचौरखेचरं प्रेक्ष्य चावधीत् ॥ ६७ ॥ अथायं तां सुनन्देति दैवज्ञेनोदितां पुरा । योषिद्रत्नं पर्यणैषीत्कुमारो ज्ञाग्यशेवधिः ॥ ६८ ॥ ज्ञावी ज्ञर्ता ज्ञातृजित्ते स्मृत्वेति वचनं मुनेः । वज्रवेगस्वसा सन्ध्यावल्यप्येनं मुदाऽवृणोत् ॥ ६९ ॥ पतिं मेऽशनिवेगोऽथ वज्रवेगपिता द्रुतम् । रुषाऽन्यषेणयद्यद्धन्नमुचिर्नमुचिद्विषम् ॥ ७० ॥ विद्यामस्मै ददौ पाठसिद्धां सन्ध्यावली तदा । श्रितश्चायं चन्द्रवेगज्ञानुवेगादिभिर्नृपैः ॥ ७१ ॥ चिरं सोऽशनिना युद्ध्वा चक्रेणारिशिरोऽच्छिनत् । ततस्तुष्टाः सुराश्चक्रुः सख्यौ ते पुष्पवर्षणम् ॥ ७२ ॥ तेऽमुं खेचरधात्रीशा नीत्वा वैताढ्यभूधरे । चक्रुः खेचरचक्रित्वाभिषेकं कमलापदम् ॥ ७३ ॥ तत्र ज्ञक्त्या शाश्वतानि जिनचैत्यान्यवन्दत । अत्र क्रीमितुमायातो मिलितो ज्ञऽ ते सुहृत् ॥ ७४ ॥ कारयित्वाऽथ तेनापि वैताढ्ये चैत्यवन्दनम् । सान्तःपुरः समित्रोऽयं हस्तिनापुरमागमत् ॥ ७५ ॥ सुतं तमागतं वीक्ष्याश्वसेनो मुमुदे नृपः । राज्यं निजं ददौ तस्मै तेन दीक्षां जिघृक्षुणा ॥ ७६ ॥ ततोऽयं धर्मनाथस्य शासनेऽखण्डशासने । सन्निधौ साधुवर्गाणां दक्षो दीक्षामुपाददे ॥ ७७ ॥ अथाश्वसेनज्रूरब्दसहस्रैर्दशज्रिर्नृपः । ज्ञरतं साधयित्वाऽगात्स्वकीयपुरसन्निधौ ॥ ७८ ॥ तदा पूर्वज्ञवेन्द्रस्य कृते तस्य शचीपतेः । श्रीदेन प्रैषयद्वस्त्रं चामरद्वन्द्वसंयुतम् ॥ ७९ ॥ पाण्डुके मुकुटं देवदूष्ये रम्ये च कुण्डले । स्वर्णनक्षत्रमालांह्रिपीठे च हरिविष्टरम् ॥ ८० ॥ युग्मम् ॥

१ दत्ता.

स्वगान्धर्वेषु गायत्सु नृत्यत्यप्सरसां गणे । श्रीदः प्रवेशयामास चक्रिणं तत्पुरीं मुदा ॥ ८१ ॥ नृपैरन्येत्य सश्रीदैर्जातरो-माञ्चकञ्चुकैः । चक्रे तस्याथ चक्रित्वाभिषेको द्वादशाब्दिकः ॥ ८२ ॥ औदार्यधैर्यसौन्दर्यवर्यगाम्भीर्यसम्पदाम् । पदमेकं बभूवायं तीर्थनाथो यथा विदाम् ॥ ८३ ॥ सुधर्मां संस्थितेऽन्येद्युर्हरौ पश्यति नाटकम् । महाकान्तिः सुरः कश्चिदागादी-शानकल्पतः ॥ ८४ ॥ स्थगयन्तममुं वीक्ष्य स्वकान्त्याऽन्यामरत्विषः । सुरैः पृष्टः सुरेशोऽयं कथं नाक्यधिकद्युतिः ॥ ८५ ॥ स चाख्यद्दुस्तपं तेपे तपः प्राच्यभवेऽमुना । आचाम्लवर्धमानाख्यं तत्प्रभावोऽयमीक्ष्यताम् ॥ ८६ ॥ नृयोऽपि पप्रच्छेऽमी-भिर्नाकिभिर्नाकिनायकः । सुरो नरो वा कोप्यन्योऽपीदृग्रूपोऽस्ति सोऽवदत् ॥८७॥ सनत्कुमारराजेन्द्रतेजःसौन्दर्यसम्पदाम् । देवेषु मानवेष्वस्ति साम्यं न निखिलेष्वपि ॥ ८८ ॥ तच्चोऽश्रद्दधानौ कौचित्सुरौ विप्ररूपिणौ । प्राप्य दौवारिकं चक्र-भृतस्तस्येत्यजल्पताम् ॥ ८९ ॥ रूपं चक्रभृतौ द्रष्टुमायातौ दूरदेशतः । ब्राह्मणौ द्राविदं तस्मै गत्वा द्वाःस्थ निवेदय ॥ ९० ॥ स्नानार्थं निर्मितान्यङ्गं तदा विज्ञप्य चक्रिणम् । समीपं प्रापयत्तस्य तौ द्विजौ द्वारपालकः ॥ ९१ ॥ रूपं निरु-पमं तस्य दर्शं दर्शं चमत्कृतौ । तौ प्राहतुर्नृपं जातं सफलं जन्म नौ दृशोः ॥ ९२ ॥ चक्रिणाऽज्ञाणि सौन्दर्यं क्वाङ्गे मेऽन्यङ्गसङ्गिनि । स्नातस्य मे भवद्भ्यां तद्वपुः प्रेक्ष्यमलङ्कृतम् ॥ ९३ ॥ ततो विसृज्य तौ स्नात्वा स्वं चालङ्कृत्य भूषणैः । अलंचक्रे सदः सौवं चक्री वक्रेतराशयः ॥ ९४ ॥ तौ विप्रौ क्षिप्रमाकार्य स स्वं रूपमदर्शयत् । प्रेक्ष्य तं स्फारशृङ्गार-मप्युच्चैस्तौ विषेदतुः ॥ ९५ ॥ तावच्चिन्तयतां कीदृग्वपूरूपे अनित्यता । यो माद्यतीदृशेनापि तस्मात्कोऽप्यपरो जरः ॥९६॥

१ सन्नाम् .

चक्रिणा पप्रच्छाते तौ किं वां खेदनिबन्धनम् । स्ववृत्तमूचतुस्तौ च तदङ्गे संक्रमं रुजः ॥ ९७ ॥ गतयोश्च तयोश्चक्री सूरेः श्रीविजयंधरात् । विरक्तो व्रतमादत्त व्यहार्षीच्च महातपाः ॥ ९८ ॥ षण्मासीमनुरागेणाऽन्येयुः प्रकृतयोऽप्यमुम् । नासौ निरैक्षत त्यक्तरागसङ्गो दृशाऽप्यमूः ॥ ९९ ॥ चीनकान्नङ्गगीतक्रजातषष्ठप्रपारणः । सप्तरोगव्यथा लेभेऽन्यदा देहे महामुनिः ॥ १०० ॥ सप्तवर्षशतीमेता एषोऽदीनमनाः सहन् । संप्राप विविधा लब्धीर्न चाप्रायुङ्क्त च क्वचित् ॥ १०१ ॥ तं तथाऽवधिना वीक्ष्य प्राहेतीन्द्रः सदःस्थितः । अहो निष्प्रतिकर्मत्वं राजर्षेरस्य कीदृशम् ॥ १०२ ॥ अदोगुणकणस्यापि सकर्णोऽहं न वर्णने । धिषणा धिषणस्याप्यमुं स्तोतुं यज्जायते ॥ १०३ ॥ इति निष्प्रतिकर्मत्वस्तुतिं श्रुत्वाऽथ तन्मुनेः । तावेवाजग्मतुर्देवौ भूयो वैद्यत्वभाजिनौ ॥ १०४ ॥ तावूचतुर्मुनिं स्वामिँश्चेदनुज्ञापयेस्ततः । चिकित्सावो भवन्तं तद्वैद्यावावां स्वकौषधैः ॥ १०५ ॥ मुनिराख्यद्द्रव्यभावभेदाभ्यां स्युर्द्विधा रुजः । द्रव्यामया ज्वराद्यास्तच्चिकित्सां वेद्मि चास्म्यपि ॥ १०६ ॥ इत्युदीर्याङ्गुलीं स्वीयां श्लेष्मणाऽऽघृष्य स व्यधात् । कुमारः स्वर्णवर्णां साक् तां च ताभ्यामदीदृशत् ॥१०७॥ ऊचे पुनर्मुनिः कर्माण्यष्टौ भावामयास्तथा । विदुस्तत्प्रकृतीरष्टपञ्चाशदधिकं शतम् ॥ १०८ ॥ स्वयं करोम्यहं साधुक्रियाभिस्तत्प्रतिक्रियाम् । दुष्करा सा जनैर्ज्ञानविकलैः सकलैरपि ॥ १०९ ॥ कुर्वे तप्तपयःपानं सर्वथा स्नेहवर्जनम् । सततं ब्रह्मचर्यं च तथा मज्जनवर्जनम् ॥ ११० ॥ एवं भावामयेभ्योऽहं भृशं बिभ्यन् दिवानिशम् । भो भो वैद्यौ क्रियादत्तचित्तस्तिष्ठामि सर्वथा ॥ १११ ॥ भावामयप्रतीकारसामर्थ्यं वां समस्ति चेत् । तच्चिकित्सतमित्युक्त्वा स मुनिर्मौनमाश्र-

१ बृहस्पतेः.

यत् ॥ ११२ ॥ इत्यस्य वचनं श्रुत्वा सत्त्वाधिकशिरोमणेः । आविष्कृतस्वरूपौ तौ तं मुनिं स्म नमस्यतः ॥ ११३ ॥ शक्रश्लाघां निवेद्यास्मै निजागमनिवन्धनम् । तौ देवौ प्रापतुः स्वर्गं तन्वानौ स्तवनं मुनेः ॥ ११४ ॥ चिरं चारित्रमापाल्यान्ते कृतानशनः सुखम् । विपद्य तृतीये कल्पे सुरोऽभूच्चक्रभृन्मुनिः ॥ ११५ ॥ एवं मनागपि निमित्तमवाप्य केचित्, धीरा असाविव भवन्ति भवाद्विरक्ताः । तेषां सुखानि शिवदैवतमानवानां, तूर्णं भवन्ति करपङ्कजमध्यमानि ॥ ११६ ॥

॥ इति श्रीसनत्कुमारनिदर्शनम् ॥

पुनर्वैराग्योपदेशमाह—

आजन्मान्तमनन्तदुर्मदि भवे वैराग्यमस्त्येव तत्, व्यक्तं हेतुषु सत्सु किं तु भवति प्रत्येकबुद्धेष्विव।
सूर्याश्मन्यनलं पयः शशिमणौ स्वर्णं सुवर्णाविनौ, कोऽद्राक्षीत्पुनरर्कचन्द्रहुतभुग्योगात्कुतोऽप्येति वा॥८०॥

व्याख्या—भवे संसारे वैराग्यमाजन्मान्तं यावत् अस्त्येव विद्यत एव केषाञ्चिदित्यध्याहारः । किंविशिष्टे भवे ? अनन्तदुर्मदि अनन्ता दुष्टा दुःखानुषक्ता मुत्प्रीतिर्यत्र स तथा तस्मिन् । दुर्मतिरित्यपि पाठो दृश्यते, तथा सतीदं विशेषणं वैराग्यस्य संज्ञाव्यते, किंविशिष्टं वैराग्यं ? अनन्तदुर्मति अनन्ता दुर्मतिर्विपर्ययरूपा यत्र तत्तथा, अथवाऽनन्तदुर्मतिश्चासौ भवश्चेति समासोऽपि घटते। किं तु परं तत्सदपि वैराग्यं हेतुषु सत्सु कारणेषु सत्सु व्यक्तं भवति प्रादुःष्यात् । केष्विव ? प्रत्येकबुद्धेष्विव यथा करकण्ड्वादिप्रत्येकबुद्धेषु वृषादिहेतुषु सत्सु एतद्व्यक्तमभूत् । ननु जीवानामाजन्मान्तं यद्यस्ति वैराग्यं तर्हि ते सरागाः कथं दृश्यन्ते ? अतोऽर्थापत्त्या ज्ञायते तन्नास्त्येवेति, नैवं, तेषां वैराग्यस्याव्यक्तत्वात्, न

चाव्यक्तं कार्याद्यमित्येतद्दृष्टान्तैः स्पष्टयति—सूर्याश्मनीत्यादि कः पुमान् सूर्याश्मनि सूर्यकान्तमणौ अनलमग्निमऽग्राहीत् अपश्यत् ? अपि तु न कोऽपि । तथा शशिमणौ चन्द्रकान्ते पयः पानीयं कोऽऽग्राहीत् ? सुवर्णावनौ स्वर्णं हेम कोऽऽग्राहीत् ? पुनर्यथाक्रममर्कचन्द्रहुतभुग्योगात् सूर्यशश्यग्निसंबन्धात् कुतोऽपि कस्मादपि स्थानादेत्यागच्छतीति तथा वैराग्यमपि प्रागव्यक्तं सत्तत्कारणेषु सत्सु प्राकुर्भवतीति वृत्ताक्षरार्थः । भावार्थं तु कथाभिराविर्भावयति, ताश्चेमाः—

(करकंकुकथा)

अस्ति चम्पापुरी शंम्पा कम्पामयमहीरुहाम् । श्रेयेकसौधकलिङ्गाख्यदेशे पेशलमण्डनम् ॥ १ ॥ दरीमिव पुरीमेतां धरणीधरकेसरी । सुतरां पालयामासान्वितया दधिवाहनः ॥ २ ॥ श्रीचेटकधराधीशतनया विनयावहा । प्रिया पद्मावतीत्यस्य न्याय्या वृत्तिरिवाजनि ॥ ३ ॥ जत्रौ धृतातपत्राऽहं गजारूढाऽस्य वेषभृत् । विचरामीत्यभूत्तस्या दोहदो गर्भसंभवात् ॥ ४ ॥ मत्वाऽमुं दोहदं देव्या दाहदं भूपतिः क्रमात् । आतपत्रं स्वयं धृत्वाऽऽरोहयत् करिणं त्विमाम् ॥ ५ ॥ यावद्धस्ती पुरान्तेऽगात्तावद्धाराधरोऽम्बरे । अकस्माद्भुवतो गर्जिरवैस्तोषितचातकः ॥ ६ ॥ सिञ्चत्युच्चैः स्वधाराभिस्तस्मिन् धाराधरे धराम् । गन्धलब्ध्याऽस्मरद्विन्ध्यभूधरोर्व्याः स सिन्धुरः ॥ ७ ॥ बिभ्रन्मदममन्दं स लग्नो गन्तुमनध्वनि । नैतच्चित्रं यतोऽमार्गगामिनः स्युर्मदाकुलाः ॥ ८ ॥ अथाचख्यौ क्ष्मानाथः प्रिये पश्य पुरो वटम् । अस्य प्ररोहमारुह्यात्रावान्यां स्थास्यतेऽधुना ॥ ९ ॥ जल्पत्येवमिलानाथे न्यग्रोधाधो गजो ययौ । प्ररोहमवलम्ब्यैतमवलम्बं स्थितो नृपः ॥१०॥

१ विद्युत्. २ जयरोगरूपवृक्षाणां.

यावदुद्यच्छते देवी तावदग्रेऽगमद्गजः । उत्तीर्याथ वटाल्लग्नो रोदितुं धरणीधवः ॥ ११ ॥ हा पद्मवदने पद्मनयने पद्मपाणिके । प्रत्यङ्पद्मे पद्मावत्यसि क्व त्वं प्रियेऽधुना ॥ १२ ॥ क्व ते प्रियानुवर्तित्वं क्व तव प्रियभाषिता । क्व प्रियानन्दकत्वं ते तत्पद्मावति सम्प्रति ॥ १३ ॥ एकपत्नी(ति)व्रतापि त्वं मां त्यक्त्वा क्व गताऽधुना । निस्त्राणा मे कथं प्राणाः स्थातारस्त्वामृते प्रिये ॥ १४ ॥ मुधा राज्यं मुधा धैर्यं बलं मम मुधाऽखिलम् । मया त्वं रहिता गुर्वी यन्न मत्तमतङ्गजात्[1] ॥ १५ ॥ रुदन्नित्थं धरानाथो मिलितैर्मन्त्रिभिस्ततः । स्वकीयं सौधमानिन्ये प्रतिबोध्योपरोध्य च ॥ १६ ॥ अथैकं सरो वनं निन्ये करिणा हरिणेक्षणा । प्रेक्ष्य तत्र सरस्तस्मिन्निममज्ज मतंगजः ॥ १७ ॥ साऽथ वेतसमालम्ब्य पाणिभ्यां निजपुण्यवत् । उत्तीर्य व्यालतः पालीमौलिमाश्रयत द्रुतम् ॥ १८ ॥ रुदतीं तत्र तामेकस्तापसः स्वाश्रमेऽनयत् । प्राणंसीत्सा कुलपतिं सोऽपि तामित्यजानत ॥ १९ ॥ पुत्री कस्य शुभे कस्य दयिताऽस्यागता कुतः । सुरी विद्याधरी नारी नागी वेति निवेदय ॥ २० ॥ साऽऽचख्यौ चेटकक्ष्मापपुत्री चम्पाधिपप्रिया । पातिता मत्तनागेनापहृत्यात्र वनेऽस्म्यहम् ॥ २१ ॥ स प्रोचे चेटकाख्यस्य क्ष्मेशितुरहं सखा । तत्प्राप्ता त्वं पितुर्वेश्म पुत्रि मा खेदमुद्वह ॥ २२ ॥ एवमुक्ता स्थिता तत्र सती पद्मावती ततः । तापसीभिः समं धर्मकथामातन्वती सदा ॥ २३ ॥ नीत्वा वर्षाचतुर्मासीमत्र दध्यौ हृदीति सा । मिथ्यात्विसंस्तवः क्वायं सम्यक्त्वं क्व च तन्मम ॥ २४ ॥ वरं मृत्युर्वरं जैड्यं वरं मे वनसेवनम् । नोचितः परमार्हत्याः संस्तवस्तु कुलिङ्गिनाम् ॥ २५ ॥ अथाख्यत्सा कुलपतिं प्रणत्य व्यवहारतः । वर्षारात्रमहं तस्थौ सुखेन श्रीमदाश्रमे ॥ २६ ॥

---

१ गजात् .

नागान्मेऽनुपदं कश्चिदगम्येऽत्र वने ननु । वसन्तीं यामि चेद्भूमिं वार्ताऽऽप्तिरपि तन्नवेत् ॥ २७ ॥ मार्गदर्शकमस्यै स मुनिमेकमथार्पयत् । कियन्तं मार्गमुल्लङ्घ्य सोऽपि तामूचिवानिति ॥ २८ ॥ अतः परं न मे गम्या क्षमा हल्लविलेखिता । वत्से दन्तपुरं गच्छेरध्वना ऋजुनाऽमुना ॥ २९ ॥ गते तत्र व्रजन्ती सा सायं दन्तपुरं प्रति । व्यश्राम्यदध्वखिन्नाऽथ प्राप्त-प्रेतवना क्वचित् ॥ ३० ॥ साकारानशनेनासौ सुप्ता प्रेतवने ततः । सुतं प्रासूत शीतांशुमिव श्यामाष्टमीतमी ॥ ३१ ॥ तं तनुद्युतिविध्वस्तध्वान्तं ध्वान्तेऽपि वीक्ष्य सा । क्रोमीकृत्याश्रुजिर्दुःखात् स्नपयन्त्याशिषच्च तम् ॥ ३२ ॥ वत्स गच्छेः स्वयं वृद्धिमाजन्मान्तं वनाम्रवत् । मन्दभाग्या न योग्याऽहं त्वां पालयितुमङ्गजम् ॥ ३३ ॥ दधिवाहनराजेन्द्रनामाङ्कामूर्मिकां गले । दधतं तं पिधायाथ वस्त्रखण्डेन साऽमुचत् ॥ ३४ ॥ सरस्या यावदायाति सा प्रक्षाल्याङ्गमात्मनः । श्मशानपाल-कस्तत्र चण्डालस्तावदागमत् ॥ ३५ ॥ तं बालं वीक्ष्य हृष्टोऽसौ पुराढ्य इव शेवधिम् । दध्यौ चेदमपुत्रस्य पुत्रं मे वनदेव्यदात् ॥ ३६ ॥ तं गृहीत्वाऽगमद्गाटधानकाख्यस्वपाटके । चण्डालोऽथ स्वगेहिन्याः पुत्रत्वेनार्पयच्च तम् ॥ ३७ ॥ सेति तत्र स्थिता वीक्ष्य नवोद्विग्ना पुरान्तरा । प्रविश्य प्राव्रजत् कस्याश्चित्साध्व्याः सन्निधौ ततः ॥ ३८ ॥ कुर्वाणा सा तप-स्तीव्रं गुरूपास्तिपरा क्रमात् । अध्यैष्ट पटुधीरेकादशाङ्गानि महासती ॥ ३९ ॥ अपत्यस्नेहमोहेन मोदकादि यदा तदा । ददाना सा सखीमेतां मातङ्गीं विदधे क्रमात् ॥ ४० ॥ स पञ्चवार्षिकः क्रीडन् क्रीडया भूभृतः करे । कण्डूकण्डूयनं बालान् चण्डालानामयाचत ॥ ४१ ॥ चम्पाधिपाङ्गजोऽयं तैः कण्डूयन्निश्च बालकैः । करकण्डूरिति स्वैरं व्याजह्रे तद्दिनादपि ॥ ४२ ॥ करकण्डूर्नवे पूर्वे बभूव क्षपकः स तु । नग्नं स्वाम्बरतो यूका प्रचिक्षेप पराम्बरे ॥ ४३ ॥ अहमुत्तम इत्येष मानं

॥१६४॥

धत्ते दिवानिशम् । मदेन म्लेच्छपुत्रोऽयं तत्पुण्याद्भूपभूरभूत् ॥ ४४ ॥ कण्डूलो जन्मतो जज्ञे यूकाक्षेपणतस्ततः । क्रमात्स यौवनं प्राप नारीदृग्भ्रमरीवनम् ॥ ४५ ॥ साधू द्वौ तद्वनेऽन्येद्युर्देहचिन्तार्थमागतौ । वीक्ष्यागतो लघीयांसं ज्यायानूचे तयोरिति ॥ ४६ ॥ पुरोऽयं नवपर्वास्ति वंशो यस्मिन्नृवर्जितः । भविष्यति क्रमेणायं राज्यदो ग्राहकस्य तु ॥ ४७ ॥ कर-कण्डुर्बदुश्चापि तद्वृक्षान्तरितोऽशृणोत् । बदुनाथाददे वंशो मूलादुत्खन्य सोऽमुना ॥ ४८ ॥ आक्षिप्य तत्करादंशं कर-कंकुस्तमाददे । जगौ च मम भूमेः क वंशं लात्वा गमिष्यति॥४९॥क्रुद्धो विप्रोऽथ तं धृत्वाञ्चले राजकुलेऽनयत् । न्यवेदय-त्तमन्यायकारिणं चाधिकारिणाम् ॥ ५० ॥ साक्षेपं ते जगुः पाप रे त्वया छेदितः कथम् । दण्डको विप्रतोऽप्यापि स शीघ्रं प्रतिदीयताम् ॥ ५१ ॥ स स्माह किं श्मशानस्य पट्टकं वितरामि न । वंशं तच्चौरविप्रस्य तज्ज्ञातं कथमर्पये ॥ ५२ ॥ तैरूचे तेऽथ वंशोऽयं तथाप्यर्पय नो गिरा । तेनोचे न ददाम्येनं दास्याम्यन्यान् धनानपि ॥ ५३ ॥ ते प्रोचुर्मूढ राज्यं ते किमेतेन भविष्यति । स जगावेवमेवैतन्नान्यथा ऋषिभाषितम् ॥ ५४ ॥ हसन्तस्ते जगुर्मूर्ख तव राज्यं यदा भवेत् । तदा वंशपदे देयस्त्वया ग्रामो द्विजाय भोः ॥ ५५ ॥ तत्प्रपद्य प्रसह्याथ करकण्डुर्ययौ गृहम् । तद्वधाय विलक्षेण विप्रा विप्रेण मीलिताः ॥ ५६ ॥ तन्नयान्निशि निर्गत्य करकण्डुः कुटुम्बयुक् । सम्प्राप्य काञ्चनपुरं सुप्तश्चोपवनेऽस्य तु ॥ ५७ ॥ मृतस्तदानीमेवाथापुत्रस्तत्र क्षितीश्वरः । अध्यवास्यन्त दिव्यानि पञ्चापि सचिवैस्तदा ॥ ५८ ॥ तान्यागुर्नगरं भ्रान्त्वा तत्समीपे तदा करी । अभिषिच्याम्बुना सौवस्कन्धेऽध्यारोपयत्विमम् ॥ ५९ ॥ तेऽथ विप्रा नृपस्यास्यान्तरायं नगरा-गमे । कुर्वन्तो वंशरत्नेनाहतास्तेन पलायिताः ॥ ६० ॥ वृत्तराज्याभिषेकोऽयं पितरावपरानपि । श्वपचाँश्च शुचीचक्रे

त्राधः स्नानतस्तदा ॥ ६१ ॥ उक्तं च—दधिवाहनपुत्रेण राज्ञा तु करकण्डुना । वाटधानकवास्तव्याश्चाण्डाला ब्राह्मणीकृताः ॥ ६२ ॥ अमुं सोऽथ बटुग्रामं चम्पासन्नमयाचत । ग्रामं ग्रामेण देहीति लेखं चम्पेशितुर्ददौ ॥ ६३ ॥ म्लेच्छोऽपि मे किमादिष्टेति रुष्टः स तमक्षिपत् । अथ श्रुत्वेत्यसौ क्रुद्धो गत्वा चम्पामवेष्टयत् ॥ ६४ ॥ तदा पद्मावती साध्वी त्रङ्कं विग्रहमेतयोः । प्रवर्तिन्यै पुरा वृत्तं निवेद्यागाच्च तत्पुरम् ॥ ६५ ॥ साऽऽख्यत्तेन नता वत्स कः पित्रा सह विग्रहः । किमेतदिति पृष्टा सा प्राक्स्वरूपं न्यरूपयत् ॥ ६६ ॥ पितृन्यां तेन पृष्टान्यामेवमेव निवेदितम् । दधिवाहननामाङ्कां प्यूर्मिका दर्शिता पुनः ॥ ६७ ॥ जगौ साध्वीं धराधीशो यद्यप्येवं तथाप्यहम् । अत्रिगन्तुममुं मानत्रणालं न सम्प्रति ॥ ६८ ॥ दधिवाहनसौधे सा गता तेनोपलक्षिता । नता च साऽश्रुनेत्रेण किं जातमिति त्राषिता ॥ ६९ ॥ स जातो यो बहिरस्ति तयेत्युक्ते नरेश्वरः । तमन्यायात्ततस्तेन प्रणतो मुदितेन सः ॥ ७० ॥ राज्यं तस्य ततो दत्त्वा स स्वयं व्रतमाददे । स त्रूमिं पालयन्नेकं गोकुलेऽपालयद्वृषम् ॥ ७१ ॥ स्वर्णशृङ्गखुरश्चैष क्वणत्किङ्किणिकावलिः । मुखानि मुखरीकुर्वन् हरितां त्राद्भूकृतारवैः ॥ ७२ ॥ कुम्भिकुम्भस्थलस्पर्द्धिप्रवर्धिष्णुककुत्स्थलीम् । दधान औद्धिकं[1] दिक्षु चिक्षेप प्रोल्लसद्बलः ॥ ७३ ॥ कालेन गोकुले प्राप्तो नरेन्द्रस्तं जरद्गवम् । घृष्यमाणं वृषैरन्यैर्वीक्ष्यासौ दध्यिवानिति ॥ ७४ ॥ देहेऽपि देहिनां सर्वपुरुषार्थनिबन्धने । अनित्यताऽस्ति तद्बन्धुधनस्त्र्यादिषु का कथा ॥ ७५ ॥ स्मरन्निति विरक्तोऽसौ राज्यं रज इवात्य-

१ वृषसमूहम् .

जत्। प्रव्रज्य देवतादत्तलिङ्गः श्रुतधरः स्वयम् ॥ ७६ ॥ निर्नाशयँस्तमःस्तोमं ज्ञानाज्ञानं प्रकाशयन् । विजहार ततो राजमुनी रविरिव क्षमाम् ॥ ७७ ॥

अथ द्विमुखकथामाह—

देशः पञ्चालसंज्ञोऽस्ति भूजामिन्या मुखोपमः । तस्मिँस्तिलकतुल्यं तु काम्पील्यपुरपत्तनम् ॥ १ ॥ बभूव तत्र पुण्यैंति-विमुखो द्विमुखो नृपः । यत्प्रतापानलश्चित्रं वर्षत्यरिवशाश्रुभिः ॥ २ ॥ राजीववनजीवातावन्यदा जलदात्यये । जगाम वसुधाधीशो वाहान् वाहयितुं बहिः ॥ ३ ॥ गच्छता ददृशे तेन शक्रस्तम्भोऽतिपूजितः । प्रत्यायाता[1] काष्ठमात्रो दृष्टः स पतितः क्षितौ ॥ ४ ॥ विरक्तो वीक्ष्य राजेन्द्रस्तं पूजितमपूजितम् । चेतसा चिन्तयामास तोषोन्मीलितलोचनः ॥ ५ ॥ श्रीर्या समीक्षिताऽमुष्य प्रातः प्रीतिप्रदा दृशोः । अद्यैव सा गता क्वापि यथा नामापि नेक्ष्यते ॥ ६ ॥ तथा रूपं च लावण्यं धनधान्यादियौवनम् । क्षणिकां प्रीतिमाधाय क्वापि यातीन्द्रचापवत् ॥ ७ ॥ इत्यनित्यतया ध्यातां स्मरतोऽस्य जगत्त्रयीम् । प्रससारान्तर्वैराग्यरसः पाथसि तैलवत् ॥ ८ ॥ स्मृत्वा पूर्वभवं दत्तलिङ्गो देवतया नृपः । प्रवृत्तोऽथ विहर्तुं स प्रव्रज्याङ्गेऽपि निर्ममः ॥ ९ ॥

अथ नमिकथा—

विदेहसंज्ञया देशः क्लेशलेशविवर्जितः । यस्मिन्नन्यायनामापि श्रूयते शब्दशासने ॥ १ ॥ तत्र सर्वनिवासेन पृथुला

---

१ प्रत्यागच्छता.

मिथिला पुरी । श्रिया यस्याः पुरो नाकिनगरी न गरीयसी ॥ २ ॥ नमिर्नमितप्रत्यर्थिपृथिवीपालमालिकः । पालयामास तं नीत्या प्रतापाक्रान्तविष्टपः ॥ ३ ॥ राज्यं पालयतोऽसातवेदनीयोदयात्तनौ । तस्य प्राडुरभूद्दाघ(ह)ज्वरः शीर्षार्त्तिसंयुतः ॥ ४ ॥ आगत्यागत्य सर्वे तमचिकित्सँश्चिकित्सकाः । अयं तनौ तनूभूतो न तथापि मनागपि ॥ ५ ॥ तस्य दाहज्वरार्त्तस्य मासोऽयुः षट् सुदुःखतः । वैद्यादेशादथान्येद्यू राज्ञो घर्षन्ति चन्दनम् ॥ ६ ॥ कृशानां ऋतूदुःखेन तासां चन्दनघर्षणे । दुःश्रवो वलयक्वाणोऽन्योऽन्यसंघर्षजोऽजनि ॥ ७ ॥ दाहज्वरार्दिते पत्यौ तं श्रोतुमनधीशिनि । मुक्त्वैकैकं कङ्कणं ता बाहुन्योऽन्यान्यपातयन् ॥ ८ ॥ नृपः प्राह कथं नाद्य श्रूयते वलयारवः । ताः प्रोचुर्बहुवलयोत्तारणं ध्वनिवारणम् ॥ ९ ॥ स दध्यौ बन्धुपुत्रादेर्यावान् बहुपरिग्रहः । तावदेव भवेद्दुःखं भवेऽत्र भवभाजिनाम् ॥ १० ॥ कटकानां यथामीषामेकताऽतिमनोहरा । चिन्तयन्नित्ययं वेद्यक्षयोपशमभाग्भूत् ॥ ११ ॥ प्रमीलामिलितः स्वप्ने सुवर्णाचलमस्तके । शुभ्रेभारूढमात्मानं वीक्ष्य प्राबुद्ध स प्रगे ॥ १२ ॥ ईदृगद्भिः पुरा क्वापीक्षितः स्वर्णमयो मया । जातजातिस्मृतिरथेतीहापोहादजायत ॥ १३ ॥ स तु पूर्वभवे साम्यधर्मः संयमपालनात् । पुष्पोत्तराभिधे देवो विमानेऽजनि सुन्दरः ॥ १४ ॥ मन्दराद्रिस्तदा तेनेक्षितोऽभूज्जिनजन्मनि । देवतार्पितलिङ्गोऽथ प्रव्रज्य निरगादसौ ॥ १५ ॥ तदानीं मिथिलापुर्यां गुरुः कोलाहलोऽजनि । विप्ररूपेण शक्रोऽथ तमभ्येत्य जगाविति ॥ १६ ॥ सर्वत्र मिथिलापुर्यां शब्दाः कलकलाकुलाः । श्रूयन्ते दारुणा गाढं केऽमी वद धराधव ॥ १७ ॥ स चाख्याच्चैत्यवृक्षेऽत्र शीतच्छाये मनोरमे । वायुना ह्रियमाणेऽद्य

१ मासाः

क्रन्दन्त्येतेऽतिदुःखिताः ॥ १८ ॥ अन्तःपुरं पुरं हर्म्यं वह्निना वायुनामुना । दह्यमानं कथं नाथाधुनाऽदस्त्वमुपेक्षसे ॥ १९ ॥ एवं विमौजसा राजमुनिर्न्नूयोऽपि जल्पितः । साम्याम्नोमग्नचेतस्क इत्युवाच वचः स्फुटम् ॥ २० ॥ सुखं प्राणिमि तिष्ठामि यन्ममास्ति न किञ्चन । दाहेऽपि मिथिलापुर्या दह्यते मे न किञ्चन ॥ २१ ॥ इति निश्चलचित्तं तु मत्त्वा मुक्त्वा द्विजाकृतिम् । प्रणम्य च महाभक्त्या ततः शक्रस्तमस्तवीत् ॥ २२ ॥ अहो रोषस्त्वया जिग्ये जिग्ये मानस्त्वया त्वहो । अहो माया त्वया जिग्ये लोभो जिग्ये अहो त्वया ॥ २३ ॥ बाढं स्तुत्वेति राजर्षिं नाकनाथश्चमत्कृतः । स्वर्गे गतश्च भूपीठे स विहारोद्यतोऽभवत् ॥ २४ ॥

अथ निर्गतकथा—

इन्दिराधारगान्धारधरणीतरुणीमुखम् । उत्तमैः पुरुषैर्युक्तं पुरुषोपपदं पुरम् ॥ १ ॥ तत्र निर्गत इत्यासीद्भूपतिर्नतभूपतिः । यद्यशस्तुलनाऽलाभाच्चन्द्रबिम्बो न्वभूद्भशी ॥ २ ॥ न्यायेनाथ निजं राज्यं तदानीं शासतः सतः । व्यतीयाय सुखं भूयानपि कालः कलामिव ॥ ३ ॥ वसन्तागमनेऽन्येद्युर्बर्हिः क्रीडाकृते व्रजन् । ददृशां प्रीतिपदं चूतमेकमैक्षत भूपतिः ॥ ४ ॥ कोकिलाकोमलक्वाणवाचालितकुकुम्मुखम् । उच्चैरसूचीसंचारिचारुच्छायामनोरमम् ॥ ५ ॥ संप्राप्तकामितातीतकामितैः पटुझंकृतैः । परितः स्तूयमानं तं मधुपैर्मार्गणैरिव ॥ ६ ॥ भूतलभ्रमणोद्भूतश्रमव्याघ्राध्वगामिनः । वातेरिताग्रपत्राढ्याऽऽकारयन्तमिवोच्चकैः ॥ ७ ॥ चतुर्भिः कलापकम् ॥ तं तथा वीक्ष्य राजेन्द्रो मञ्जरीभारभङ्गुरम् । आघ्रातुं

मञ्जरीमेकामग्रहीत्तस्य नूरुहः ॥ ८ ॥ एकैका मञ्जरी जह्रे इत्येवमनुगामिभिः । परःसहस्रैर्गृह्णद्भिः पत्राळिं च तथाऽपरैः ॥ ९ ॥ ततः शाखावशेषोऽयं शाखी चक्रे तदैव हि । सत्यं राज्ञां करग्रेपो न प्रायः स्याद्बुज्ञायतिः ॥ १० ॥ नृपः क्रीमां विधायाथ वने तस्मिन् यदृच्छया । तस्यैव शाखिनः पार्श्वे वलमानः समागमत् ॥ ११ ॥ स दृश्यते किमाम्रो नेति पृष्टः कोऽपि नूनुजा । जगौ देव स एवायं पुरस्ताद्योऽवतिष्ठते ॥१२॥ नूयो नूपोऽप्यनाषिष्ट सहकारः स यद्ययम् । अद्यैव तर्हि संजज्ञेऽनीदृशः कथयेः कथम् ॥ १३ ॥ मञ्जरीं त्वामनु स्वामिन् राजलोकेन गृह्णता । ईदृशोऽयं कृतश्चूतस्ततो दध्यौ नृपो हृदि ॥ १४ ॥ आम्रस्यास्येव लोकानां क्षणान्निःश्रीकता नवेत् । सत्वरं गत्वरं चायुः कः पापं कुरुते ततः ॥ १५ ॥ इति संजातवैराग्यो जातजातिस्मृतिस्ततः । देवतादत्तलिङ्गोऽसौ प्रव्रज्य व्यहरत्स्वयम् ॥ १६ ॥ प्रत्येकबुद्धाश्चत्वारो विहारेण वसुन्धराम् । पवित्रयन्तः प्रापुस्ते पुरं क्षितिप्रतिष्ठितम् ॥ १७ ॥ एकं देवकुलं तत्र महदस्ति चतुर्मुखम् । चत्वारोऽप्यागता दिग्भ्यश्चतसृभ्योऽत्र ते क्रमात् ॥ १८ ॥ द्वारेण प्राविशत् प्राच्येनाद्यो याम्येन चापरः । वारुणेनेतरस्तस्मिन्नौदीच्येन तथाऽपरः ॥ १९॥ मुनीनामवतिष्ठेऽहं कथमेषां पराङ्मुखः । विचिन्त्येति चतुर्वक्त्रो बभूव व्यन्तरस्ततः ॥ २० ॥ करकण्डुस्तदा कर्णं कण्डूयित्वा तृणेन च । आत्मनः सन्निधौ नूमौ मुमोचैतत्तृणं पुनः ॥२१॥ आचख्यौ द्विमुखो राज्यं शुद्धान्तं संपदस्तथा । मुक्तं यदाऽखिलं तर्हि नद्देदं संचिनोषि किम् ॥ २२ ॥ यावता करकण्डुस्तं नोत्तरीकृतवान्मुनिम् । तावन्नमिमुनिस्तस्य शिक्षावाचमवोचत ॥ २३ ॥ त्वया निजस्य राज्यस्य कार्यचिन्ता निराकृता । यदि तर्हि कथं चिन्तां

करोष्यस्य महामुने ॥ २४ ॥ द्विमुखो नोत्तरं दत्ते यावत्तावच्च निर्गतः । श्रुत्युवाच वचः सम्यक् साम्य-
वारिधिमग्नधीः ॥ २५ ॥ चेद्विमुच्याखिलं राज्यं सिद्धिसौधमनीप्ससि । त्वं तदा गर्हसे कस्मात् परं पर-
मसंयम ॥ २६ ॥ तस्योत्तरं नमिर्यावद्दत्ते तावदुत्सुकः । उवाच वचनं चेदं करकण्डुमुनीश्वरः ॥ २७ ॥
सिद्धिसौधाध्वनीनेषु साधुबुद्धिषु साधुषु । कथयत्सु हितं दोषं न हि वक्तुं त्वमर्हसि ॥२८॥ परो रुष्यतु वा
मा वा विषं वा परिवर्तताम् । भाषितव्या हिता भाषा स्वपक्षगुणकारिका॥२९॥चत्वारोऽपि ततः प्राप्य केवल-
ज्ञानमुज्वलम् । क्रमेण भाजनं तेऽथ बभूवुः शिवसम्पदाम् ॥ ३० ॥ इति निशम्य जनाः शिवदायिनीं,
विषयसङ्गमशर्मविरागताम् । कुरुत यत्नमिहैव तथा यथा, शिवभवानि सुखानि भवन्ति वः ॥ ३१ ॥

॥ इति प्रत्येकबुद्धकथा दिङ्मात्रमत्रिहिताः । विस्तरतोऽपरग्रन्थेभ्योऽवसेयाः ॥

व्याख्यातमिदमेकोनचत्वारिंशत्तमं वैराग्यद्वारं । अथोद्देशानुसारेण दानद्वारमाह—

सुप्रापं शुद्धपात्रं धनमपि विशदं किंतु निःपुण्यकानां,
नो चित्तं पात्रदानं प्रति भवति मतिर्यत्र शुद्धाशनाद्यैः ।
आद्योऽर्हन् वर्षमेकं प्रतिदिनमगमद्बुद्धभैक्ष्येऽपि देशे,
श्रेयांसस्त्वेकमाद्यं सुकृतिषु कृतवान् स्वं प्रभोः पारणेन ॥ ७१ ॥

व्याख्या—शुद्धपात्रं सुप्रापं सुलभं विशदं विमलं धनमपि सुप्रापं, किं तु परं निःपुण्यकानां नृणां

पात्रदानं प्रति तच्चित्तं न भवति, यत्र यस्मिँश्चित्ते शुद्धाशनाद्यैरेषणीयभक्तपानखादिमस्वादिमादिभिर्भक्तिर्दा-
नभक्तिर्भवति । अत्रोदाहरति–आद्योऽर्हन्नित्यादि आद्योऽर्हन् प्रथमजिनः एकं वर्षं यावद्बुद्धैर्देयेऽपि
देशे एषणीयभिक्षान्वितेऽपि जनपदे प्रतिदिनमगमत् प्रतिदिनं व्यहार्षीत्, परं न कोऽपि किमपि ददा-
विति शेषः । तथाऽनु (किन्तु) पश्चात् श्रेयांसः श्रेयांसकुमारः प्रभोः श्रीयुगादिदेवस्य पारणेन कृत्वा
स्वमात्मानं सुकृतिषु पुण्यवत्सु आद्यं मुख्यं कृतवान् अकार्षीदिति वृत्तार्थः । श्रेयांससंबन्धस्तु श्रीनाभे-
यचरित्रे उक्तत्वादिह नोच्यत इति ॥

द्रव्यमेव वस्तु पात्रे दत्तं बहुफलं स्यान्नान्यत्, य एवं न मन्यते मूढधीस्तस्योपदेशमाह—

यदपि तदपि शुद्धं चन्दनावत्प्रदत्तं,झटिति फलति पात्रेऽन्यत्र नो चार्वपि स्वम् ।
जलधिजलमसारं वारिवाहेऽमृतीस्यान्मधुरमपि हि दुग्धं पन्नगास्ये विषीस्यात् ॥ ७२ ॥

व्याख्या—शुद्धं द्विचत्वारिंशदाहारदोषरहितं यदपि तदप्यरसविरसमपि पात्रे दत्तं सत् झटिति शीघ्रं
फलति । किंवत् ? चन्दनावत् यथा चन्दनबालया यदपि तदपि शीतलकुल्माषाद्यपि पात्रे श्रीवीरे दत्तं
सत् शीघ्रं फलति स्म अत्र सार्धद्वादशकोटिस्वर्णवृष्ट्यादिना परत्र च मोक्षफलप्राप्त्या । अन्यत्र कुपात्रे
चार्वपि प्रधानमपि स्वं द्रव्यं दत्तं सन्नो फलति । एतदेवाह—जलधिजलमित्यादि असारमपेयमपि जल-
धिजलं वार्धिवारि वारिवाहे मेघेऽमृती स्यात्, एवं सुपात्रे । हि निश्चितं मधुरमपि दुग्धं पन्नगास्ये सर्प-
मुखे विषीस्याद्विषं भवति, एवं कुपात्रे दानमिति वृत्तार्थः । भावार्थं तु कथयाऽऽह (चन्दनबालाकथा)–

तिलकश्रीरिवाऽऽति धरणीहरिणीदृशः । कौशाम्बीति पुरी पौरलोकवारविराजिता ॥ १ ॥ गोपाङ्गना-स्तनाश्लेषक्लिष्टं मुक्त्वा हरेरुरः । वासं यथासुखं यत्र ततान श्रीः सनातनम् ॥ २ ॥ तत्र क्षत्रशिरोरत्न-मयत्नार्जितवार्धिजः । प्रत्यर्थ्यनिर्जितानीकः शतानीको नृपोऽजनि ॥ ३ ॥ अपि श्रोतस्विनीस्वामी यस्य गाम्भीर्यनिर्जितः । अन्तस्तापं दधात्युच्चैर्वाग्वाख्यानलवलात् ॥ ४ ॥ मृगावती प्रिया तस्य यस्या दृक्-साम्यकाम्यया । मृगा मन्ये तपस्यन्ति तापसा इव कानने ॥ ५ ॥ मन्त्री सुगुप्तमन्त्रोऽस्य सुगुप्तो नाम-तोऽभवत् । चतस्रो बुद्धयो यस्मात् प्रसरन्ति निरन्तरम् ॥ ६ ॥ रम्भेव रूपसंपन्ना तद्भार्या परमार्हती । नन्दा नाम्ना मृगावत्याः प्रीतिपीयूषभाजनम् ॥ ७ ॥ जलं जलधरस्येव त(य)स्य साधारणं धनम् । धनाव-होऽत्र श्रेष्ठ्यासीन्मूला नाम्ना च तत्प्रिया ॥ ८ ॥ इतश्चान्त्यो जिनः पुर्यामत्र बाह्यस्थ्यसंस्थितः । द्रव्य-क्षेत्रकालभावैरित्यभिग्रहमग्रहीत् ॥ ९ ॥ द्रव्यतः शूर्पकोणस्थाः कुल्माषाः क्षेत्रतस्त्था। कौशाम्बी कालतः सर्वभिक्षुवेलाव्यतिक्रमः ॥ १० ॥ दैवाद्दासत्वमापन्ना भावतो भूभुजोऽङ्गजा । मुण्डिता रुदती दाभ्यस्तु मे निर्गमितक्रमा ॥ ११ ॥ युग्मम् ॥ इत्यभिगृह्य तत्रास्थात् पौषाद्यप्रतिपद्यसौ । मध्यंदिनेऽकरोच्चेशो भिक्षाचर्यां दिने दिने ॥ १२ ॥ यतः परीषहा अस्यामुदीयन्तेऽखिला अपि । एवं च भ्रमतो मासाश्च-त्वारोऽगुः प्रभोः पुरि ॥ १३ ॥ नन्दाऽऽवासे प्रविष्टोऽथ स्वामी ज्ञातस्तया ततः । भिक्षामत्यादरेणोपानै-षीत्स च प्रभुर्निरैत् ॥ १४ ॥ सा कुर्वाणाऽधृतिं दासीभिरूचे देवि संततम् । गेहे समेति देवार्यो लाति

---

१ अयत्नेनार्जिता वार्धिजा लक्ष्मीर्येन सः.

न्निद्रां न जातुचित् ॥ १५ ॥ तयाऽथ सुधिया ज्ञातमस्ति प्रभुरनिग्रही । ततः श्याममुखी मन्त्रिपृष्टा सा साश्रुरित्यवक् ॥ १६ ॥ न्निद्रां प्रभुश्चतुर्मास्यां नैव गृह्णात्यनिग्रही । धीसखत्वेन तत्ते किमेतदेव न वेत्सि यत् ॥ १७ ॥ सोऽवक् तथा करिष्ये श्वो न्निद्रां लाति प्रभुर्यथा । अधृतिं मा प्रिये कार्षीद(र)त्रार्थे प्रियदर्शने ॥ १८ ॥ इत्यालापे प्रतीहारी मृगावत्याः समागमत् । सा तं श्रुत्वा समुल्लापं मृगावत्यै न्यवेदयत् ॥ १९ ॥ सा हि चेटकराजेन्द्रतनूजा परमार्हती । तदाकर्ण्य हृदाऽधार्षीन्महतीमधृतिं ततः ॥ २० ॥ ज्ञपालम्भि तयाऽधीशोऽधीशत्वे ते धिगस्तु यत् । नाज्ञासीत् प्रभुमायातं दुर्गान्निग्रहिणं नवान् ॥ २१ ॥ स्माह सोऽनिग्रहः कोऽस्य साऽप्यूचे वेद्मि तं न हि । किं तु नार्वाक् चतुर्मास्या लाति न्निद्रां भ्रमन्नपि ॥ २२ ॥ नृपोऽवग्मा स्म खिद्येथाः सर्वं नव्यं विधास्यते । इत्याश्वास्य ततो देवीमाह्वयत्सचिवं निजम् ॥ २३ ॥ अप्राक्षीद्भूपतिर्न्निद्रानिग्रहं स्वामिनश्च तम् । स प्राह नाहमीशोऽस्मि नाथ ज्ञातुमनिग्रहम् ॥ २४ ॥ सर्वदर्शनतत्त्वज्ञस्तथ्यवाद्यपि भूभुजा । पृष्टो न वेत्ति तावत्स ज्ञेयोऽतिशयशालिना ॥ २५ ॥ राजेत्यघोषयत् पुर्यां प्रभोर्न्निद्रार्थमीयुषः । प्रकारैर्विविधैर्देया न्निद्राऽऽदत्ते सं कांचन ॥ २६ ॥ जनस्तदाज्ञया नक्त्या चेत्थं कर्तुं प्रचक्रमे । परं न लाति न्निद्रां स दीयमानामपि क्वचित् ॥ २७ ॥ इतश्च नगरी चम्पा दधिवाहनभूपतिः । तां जिघृक्षुः शतानीकोऽगच्छत्स्वसैन्यसंवृतः ॥ २८ ॥ निशैकयाऽरुणच्चम्पामकस्मात्तत्पतिस्ततः । पलायिष्ट भटास्तस्य मुमुषुस्तां यदृच्छया ॥ २९ ॥ अग्रहीदौष्ट्रिकः कोऽपि दधिवाहन-

१ स प्रभुर्यतः कारणात् कांचन न्निद्रामादत्ते.

भूभृतः । वल्लभां धारिणीं साकं वसुमत्या तनूजया ॥३०॥ शतानीकः समायासीत् कृतकृत्यः पुरं निजम् । औष्ट्रिकोऽवन्तिशामेषा दयिता भविता मम ॥ ३१ ॥ एतत्सुतां च विक्रेष्ये सा निशम्येति दुःखिता । स्वशीलभ्रंशमाशङ्क्य राज्ञी हृत्स्फोटतो मृता ॥ ३२ ॥ अथौष्ट्रिको हृदा दध्यौ युक्तं नोक्तं मयाऽधुना । अथानीता प्रबोध्यासौ चाटुभी रुदती सुता ॥ ३३ ॥ तृणं तन्मूर्ध्नि विक्रेतुं दत्त्वा दध्रे चतुष्पथे । तां च लावण्यसंपन्नां वीक्ष्य दध्यौ धनावहः ॥३४॥ भूपस्य कस्यचित्पुत्री श्रेष्ठिनो वेयमीदृयतां (ते)। गता नीचकुले क्वापि मा स्म भूत्पदमापदाम् ॥ ३५॥ ततस्तदिष्टमूल्येन तां गृहीत्वा धनावहः । स्ववेश्मागत्य मूलायै सुतात्वेनार्पयच्च ताम् ॥ ३६ ॥ ततः स्वसद्मनीवासौ क्रीडन्ती श्रेष्ठिमन्दिरे । वशीचकार तल्लोकमखिलं विनयादिभिः ॥ ३७ ॥ ज्ञात्वा चन्दनवल्लीतप्रकृतिं तां जनो जगौ । चन्दनेति ततो नामाभूदन्यत्स्वगुणार्जितम् ॥ ३८ ॥ मध्यन्दिनेऽन्यदा ग्रीष्मे धनो गृहमुपागमत् । तदांहिक्षालकाभावे रुढौके चन्दना ततः ॥ ३९ ॥ धनेन वार्यमाणाऽपि सांही प्राक्षालयद्बलात् । क्षालयन्त्यास्तदाऽमुष्याः केशपाशी शिरश्च्युता ॥ ४० ॥ पङ्कसङ्करभीत्या सा श्रेष्ठिना पाणिना धृता । वातायनस्थिता मूला निजाख्येति व्यचिन्तयत् ॥ ४१ ॥ विनाशितं मया कार्यं यदेषा रक्षिता पुरा । श्रेष्ठी यद्युद्घहेदेतां तदाऽहं पतिता बहिः ॥ ४२ ॥ तदनागतमेवैतां यशःशेषीकरोम्यहम् । गते श्रेष्ठिन्यथाकार्यं नापितं तामभुण्मयत् ॥ ४३ ॥ नियन्त्र्य निगडैः पादौ क्वाप्यक्षेपि गृहान्तरे । कथयन् स्वजनः श्रेष्ठिपुरतोऽवारि चानया ॥ ४४ ॥ श्रेष्ठी भोक्तुम-

---

१ जनानाम्. २ अन्यगृहे.

थायासीत्पप्रच्छेति क्व चन्दना । जानन्नपि परीवारो मूलाज्जीतो न चाऽभणत् ॥ ४५ ॥ सोऽज्ञासीत् क्वापि क्रीणन्ती ऽविष्यत्यथ चन्दना । निश्यपि द्वितीये चाह्नि पृष्टा ख्याता न केनचित् ॥ ४६ ॥ तृतीयेऽह्न्यवीक्ष्य तां श्रेष्ठ्यप्राक्षीत् जनं निजम् । साग्रहं तन्निशम्याथ वृद्धा दासीत्यचिन्तयत् ॥ ४७ ॥ अहो मे जीवितेनेयं जीवतादिति साऽवदत् । तच्चारकक्रियां[1] चाथ स तद्वारमपावृणोत् ॥ ४८ ॥ क्षुत्तृषार्तां विलोक्यैतामाश्वास्याथ धनावहः । मूलोत्सारितसङ्गोज्ये संप्राप्तः स महानसे ॥ ४९ ॥ ऽओज्यमन्यदनालोक्य कुल्माषान् वीक्ष्य तत्र सः । शूर्पकोणे निधायास्यै दत्तवान् श्रेष्ठिपुङ्गवः ॥ ५० ॥ स्वयं कर्मारगेहेऽगान्निगडच्छेदनोत्सुकः । दुःखाकुला कुलं साथास्मार्षीत्सौवं शुभाशया ॥ ५१ ॥ क्व मे राजकुलं तादृगीदृशी दुर्दशा क्व मे । दुष्कृतं प्राक्कृतं किञ्चित्तद्विपाकस्त्वयं ननु ॥ ५२ ॥ किञ्चित्कस्मैचिदद्याहमदत्त्वाऽष्टमपारणम् । कथं करोमीति बुद्ध्या साऽपश्यदतिथेः पथम् ॥ ५३ ॥ पादमेकं च देहल्या मध्ये कृत्वा परं बहिः । रुदत्यास्ते द्वारशाखाविलग्ना मन्दमुन्मनाः ॥ ५४ ॥ प्रभुर्वीरस्तदाऽऽयासीद्विहरँस्तत्र वीक्ष्य सा । दध्यावस्ति वृषं[2] किञ्चिन्मयेदृक्पात्रमापि यत् ॥ ५५ ॥ युज्यते च प्रभोर्दातुमेतन्नैव परं मयि । प्रसद्यादत्स्व कल्पेत चेज्ज्ञात्वाऽथावधेः प्रभुः ॥ ५६ ॥ पूर्णो मेऽभिग्रहोऽद्येति पाणिपात्रममण्यत् । स्वं धन्यं मन्यमाना सा कुल्माषाँस्तान् ददौ प्रभोः ॥ ५७ ॥ युग्मम् ॥ स्वः[3] स्वर्णकोटयः साधास्तद्गृहे द्वादशापतन् । चेलोत्क्षेपः पुष्पवृष्टिस्तदाऽभूद्दुन्दुभिध्वनिः ॥ ५८ ॥ हेममञ्जीरतां जेजुर्निगडान्यंहियुग्मयोः ।

१ तस्याः कारागृहक्रियाम्. २ पुण्यम्. ३ स्वर्गात्.

केशपाशी तथैवाभूत् कान्तकान्तिरभूत्तनुः ॥ ५९ ॥ प्रमोदादागमद्भक्तो दुन्दुभिध्वनिना प्रभोः । पारणं तु शतानीको ज्ञात्वा सान्तःपुरस्तथा ॥ ६० ॥ चम्पेशकञ्चुकी धात्र्यानीतोऽभूत्संपुलाभिधः । तत्रागात्सोऽपि तां वीक्ष्योपलक्ष्यांह्री प्रणत्य च ॥ ६१ ॥ मुक्तकण्ठं रुदन् सोऽथ पृष्टः कैषेति भूभुजा । सोऽवग्वसुमती नाम्ना सेयं चम्पेशपुत्रिका ॥ ६२ ॥ मृगावतीति श्रुत्वाऽवग् हहाऽसौ मे स्वसुः सुता । मन्त्र्यप्यत्रागमत् पत्नीयुतोऽथावन्दत प्रभुम् ॥ ६३ ॥ प्रभुं प्रणम्य सर्वोऽपि लोकोऽगाच्चन्दनां स्तुवन् । भूपस्तत्कनकं गृह्णन् वारितो वह्निणेति सः ॥ ६४ ॥ स्वर्णं दास्यत्यसौ यस्मायेतत्तस्य भविष्यति । सा पृष्टाऽऽह पितुर्मे तत्ततोऽलात्तद्भनावहः ॥ ६५ ॥ मघवानादिशद्भूपं त्वया गोप्याऽथ चन्दना । प्रभोः केवल उत्पन्ने शिष्या मुख्या भविष्यति ॥ ६६ ॥ इन्द्राद्याः स्वालयं जग्मुश्चन्दनाऽस्थान्नृपौकसि । निन्दास्पदमभून्मूला चन्दना वन्दनास्पदम् ॥ ६७ ॥ दध्यौ चेद्दुर्दशेयं मे न स्यात्स्यात् पारणा कथम् । प्रभोः पारणया मेऽभूद्दुर्दशाऽप्युत्तमा दशा ॥ ६८ ॥ प्राप्य दीक्षां प्रभोः पार्श्वे केवलं च क्रमेण सा । प्रसादादानदेवर्भोर्निर्वृतिं प्राप चन्दना ॥ ६९ ॥ श्रुत्वेति सुन्दरधिया समवाप्य चात्र, सद्वित्तचित्तवरपात्रसमग्रभावान् । उद्यम्यतामिह जनाः स्म ततं यथैषा, निर्वाणशर्मपदवी न दवीयसी स्यात् ॥ ७० ॥

॥ इति चन्दनाचरित्रम् ॥

समाप्तमिदं चत्वारिंशत्तमं दानद्वारं । अथ शीलद्वारमाह—

स्त्रीविभ्रमैश्चलति लोलमना न धीरः, श्रीस्थूलभद्र इव तादृशसङ्कटेऽपि ।
चूर्णीभवेदृषदयोऽपि विलीयते च, वैडूर्यमेति विकृतिं ज्वलनात्पुनर्न ॥ ७२ ॥

व्याख्या—लोलमनाश्चलचित्तः पुमान् स्त्रीविभ्रमैः स्त्रीणां हावभावैश्चलति, परं न धीरश्चलति । क इव ? (श्रीस्थूलभद्र इव) यथा श्रीस्थूलभद्रस्तादृशसङ्कटेऽपि सति नाचालीत् । एतदेवाह—चूर्णीभवेदित्यादि दृषत् पाषाणो ज्वलनादग्निसंयोगाच्चूर्णीभवेत् अयोऽपि लोहमपि ज्वलनाद्विलीयते द्रवीभवति, परं वैडूर्यं रत्नं ज्वलनाद्विकृतिं चूर्णं द्रवीभावं नैति न याति । सर्वत्र भावना स्वयं कार्या । इति वृत्ताद्दरार्थः । भावार्थं तु कथयाह—

श्रीस्थूलभद्रकथा—

लक्षाटिका विष्टपमण्डलस्य, श्रीपाटलीपुत्रपुरं समस्ति । कल्याणकन्दो नवमोऽत्र नन्दोऽवनीपतिः श्रीपतिवच्छ्रियाऽभूत् ॥ १ ॥ निःसंकटः श्रीशकटालनामा, धियां पयोधिः परमार्हतोऽभूत् । मन्त्री तदीयो दयिता तु तस्य, लक्ष्मीवती मूर्तिमतीव लक्ष्मीः ॥ २ ॥ ज्यायाँस्तनूजोऽजनि कामरूपः, श्रीस्थूलभद्राभिधयोरुभद्रः । तयोः सुतः श्रीयकनामधेयो, गुणाकनिष्ठः समभूत् कनिष्ठः ॥ ३ ॥ पुरेऽत्र लावण्यगुणैककोशः, कोशेति वेश्याऽजनि सुप्रशस्या । अद्यापि तद्रूपपराजितैति, रम्भा नृदृग्गोचरचारितां न ॥ ४ ॥ श्रीस्थूलभद्रोऽनुभवँश्च भोगाँस्तया समं काम इवाभिरामः । सुखं सुखेन क्षणवद्व्येणातिनीतवान् द्वादश हायनानि ॥ ५ ॥ श्रीश्रीयकः प्रीतिपदं नृपस्य, तद्देहरक्षाकरणे नियुक्तः । तत्राग्रणीर्भूरिकवीश्वराणां, बभूव विप्रो वररुच्यभिख्यः ॥ ६ ॥ वृत्तैः प्रवृत्तोऽनुदिनं स नव्यैः, स्वनिर्मितैस्तोषयितुं नरेन्द्रम् । अष्टोत्तरेणाथ शतेन मिथ्यादृगित्यमुं न प्रशशंस मन्त्री ॥ ७ ॥ ततोऽस्य तुष्टोऽपि न तुष्टिदानं, धराधिनाथो

ददे कदाचित् । बुद्ध्वाऽथ विघ्नांस्तदलाभहेतुमाराधयामास स मन्त्रिपत्नीम् ॥ ८ ॥ पृष्टोऽन्यदाऽसौ परितुष्टयाऽथ, कृत्यं जगादेति शुभे पतिस्ते । सकृत्प्रशंसेन्मम वृत्तवृन्दं, यथा प्रसादात्तव निर्वहेऽहम् ॥ ९ ॥ तस्योपरोधेन तया पतिस्तद्भङ्गाप्यवादीत्सचिवोऽपि देवि । नामापि दोषावहमस्य मिथ्यादृष्टेः प्रशंसामि कथं वचोऽहम् ॥ १० ॥ प्रपन्नमेतत्कथमप्यमुष्याः, कदाग्रहेण गृहीतेन तेन । राज्ञः पुरस्तात्पठतोऽस्य तानि, सुभाषितं चेति जगाद मन्त्री ॥ ११ ॥ सदैव दीनारशतं ददानमष्टाग्रमालोक्य ततो नरेन्द्रम् । मा भूदनर्थोऽयमथेत्यवादीन्मन्त्री किमेतन्नृप दीयतेऽस्य ॥ १२ ॥ नन्दोऽवदत् ते सचिव प्रशंसावशाद्ददे दानमथाह मन्त्री । नाहं नृपैतं प्रशशंस किं तु, प्राशंसिषं वृत्ततितिं परस्य ॥ १३ ॥ अस्मत्पुरस्तात् परकीयकाव्यवारं स्वकीकृत्य पठत्ययं यत् । एतत्कथं सत्यतया प्रयातीत्युक्ते नृपेणाथ जगाद मन्त्री ॥ १४ ॥ प्रातः प्रभो तत्पठितानि काव्यान्यहं स्वबालाऽपि वः पठन्तीः। प्रदर्शयिष्ये शकटालमन्त्रीत्येवं प्रतिज्ञाय निजे गृहेऽगात् ॥ १५ ॥ पुत्र्योऽस्य यक्षा खलु यक्षदत्ता, भूताऽभिधानेन च भूतदत्ता ॥ सेणाऽथ वेणा किल रेणिकेति, प्रज्ञाप्रशस्ताः सचिवस्य सप्त ॥ १६ ॥ गृह्णाति मुख्या सकृदुक्तमन्या, द्वित्र्यादिवारेण यथाक्रमेण । तिरस्करिण्यन्तरिता नृपाग्रे, न्यवेशयत्ताः सचिवः प्रजाते ॥ १७ ॥ अष्टोत्तरं वृत्तशतं तदैव, विधाय विप्रोऽप्यवदन्नृपाग्रे । ततो यथाज्येष्ठमनूचुरेता, न्यषेधयद्दानमथोऽस्य नन्दः ॥ १८ ॥ ततः स विप्रोऽपि समेत्य यन्त्रं, स्वर्गापगायाः सलिलेऽप्यधत्त । मध्येऽस्य दीनारशतं न्यधत्त, चाष्टाधिकं वस्त्रपुटेन बद्ध्वा ॥ १९ ॥ पादेन यन्त्राक्रमणेन काव्यैर्गङ्गां प्रजाते स्तुवतोऽस्य पाणौ । समीक्ष्य दीनारगणं पतन्तं,

विसिष्मियेऽथाखिलपौरलोकः ॥ २० ॥ श्रुत्वेति नन्दः सचिवं जगाद, पश्यामि तच्चित्रमथाख्यदेषः । प्रकर ।
प्रातः प्रज्ञोऽहं तव दर्शयिष्ये, नृपोऽपि चैवं प्रतिपद्य तस्थौ ॥ २१ ॥ दत्त्वाऽथ शिक्षां सचिवेन सायं
ज्ञश्चरः प्रैषि सुरापगायाम् । गुप्तं तदानीं वररुच्यभिख्यो, विन्यस्य दीनारचयं गृहेऽगात् ॥ २२ ॥ ततः
स दीनारततिं गृहीत्वा, प्रज्ञन्नवृत्त्या सचिवाय चादात् । मन्त्री सदीनारगणः प्रजाते, जगाम गङ्गां सह
ऋलुजाऽथ ॥ २३ ॥ आगात्तदानीमपि ज्ञट्ट एष, क्षितीश्वरं वीक्ष्य दिदृक्षुमुच्चैः । स्तुत्वाऽथ तां[1] यन्त्रम-
चालयत्तत्पाणौ न दीनारततिः पपात ॥ २४ ॥ विलोकयँस्तां सलिलेऽप्यपश्यन्मौनी स्थितोऽज्ञाणि च
मन्त्रिणाऽसौ । मन्दाकिनी ते ननु किं न दत्ते, न्यासीकृतं येन विलोकसे स्वम् ॥ २५ ॥ स्वकं स्वमादत्स्व
खलूपलक्ष्य, जल्पन्नदोऽदाद्रविणं स तस्य । ऋपं जगौ सायमिह स्वमेष, न्यस्य प्रगे लाति पुरो जनानाम्
॥ २६ ॥ मन्त्रिन्निदं ज्ञ्ञ तु साधु बुद्ध्मेवं लपन् स्मेरमुखो नृपोऽज्ञूत् । क्रुद्धः स विप्रः प्रतिकर्तुमिच्छँश्चे-
ष्ट्याद्यपृच्छत्सचिवस्वरूपम् ॥ २७ ॥ तस्याथ काचित्सचिवस्य चेटीति प्राह् मन्त्रीश्वरमन्दिरेऽद्य । श्रीश्री-
यकोद्वाह उपायनार्थं, ऋपस्य शस्त्रादि च सज्यतेऽलम् ॥ २८ ॥ लब्ध्वा तदेव ज्ञलमेष भिन्नानपीपठ-
च्चेति न वेत्ति नन्दः । तुष्टोऽद्य मन्त्री यदयं विधाता, व्यापाद्य नन्दं स्वसुतं नरेन्द्रम् ॥२९॥ पदे पदेऽदः
पठतो निशम्य, भिन्नाँश्च दध्यौ क्षितिभृत् किमेतत् । सत्यं मृषा वेति परीक्षणार्थं, प्रैषीच्चरं मन्त्रिगृहे च ॥१७२॥
सौवम् ॥ ३० ॥ सर्वं यथादृष्टमथैष राज्ञे, न्यवेदयत्सोऽपि निशम्य रुष्टः । ततोऽस्य सेवासमये प्रणामं,

१ मन्त्री. २ गङ्गाम्.

प्रकुर्वतोऽस्याच्च पराङ्मुखोऽसौ ॥ ३१ ॥ मत्वा च तन्नावमवाप्य वेश्मामात्यो जगौ श्रीयकपुत्रमित्थम् । व्यज्ञापि केनापि नरेशितुर्मेऽन्नक्तिस्ततः स्यात्स्वकुलक्षयोऽथ ॥ ३२ ॥ तथापि रक्षामि करोषि यद्यादेशं ममेमं कुलरक्षक त्वम् । नृपाय मे नामयतः शिरोऽद्य, छिन्द्यास्तनूजारिरिवापशङ्कम् ॥ ३३ ॥ स्वस्वाम्यन्नक्तो जनकोऽपि वध्यो, ब्रूया इदं त्वं च जरान्निभूते । पञ्चत्वमासेदुषि नो मयीति, स्तम्नो नवेर्नः कुलमन्दिरस्य ॥ ३४ ॥ तं श्रीयकः स्माह रुदन्नशब्दं, तातेतिघोरं कथमाचरामि । मन्त्री जगादेति विचारयँस्त्वं, मनोरथान् पूरयसे रिपूणाम् ॥ ३५ ॥ मुखे विषं न्यस्य नमस्यतो मे, छिन्द्याः शिरस्ते न हि तातहत्या । अबोधि पित्रेति स तत्प्रपद्य, तथैव चक्रे कुलरक्षणार्थम् ॥ ३६ ॥ एतत्त्वया किं विहितं कुकर्मेत्युक्तो नृपेणाह स मन्त्रिपुत्रः । ऽोहीत्ययं नूमिनुजा ह्यबोधि, तन्मारितोऽसौ मयका नरेन्ऽ ॥ ३७ ॥ नन्दो विषण्णोऽथ विधाय तस्यौर्ध्वदेहिकं श्रीयकमूचिवाँश्च । बुऽोर्निधे वत्स गृहाण सर्वव्यापारमुऽामिति सोऽप्यवोचत् ॥ ३८ ॥ श्रीस्थूलनऽोऽस्ति ममाग्रजोऽत्र, पित्रा समानोऽनुनवँश्च नोगान् । कोशागृहे द्वादश हायनानि, सुखं सुखेनातिनिनाय राजन् ॥ ३९ ॥ नृपस्तमाकार्य जगौ च कार्यं, तत्सोऽवगाद्योच्य विन्नो विधास्ये । श्रीस्थूलनऽोऽथ ययावशोकवने स्वबुद्ध्या विममर्श चेति ॥ ४० ॥ यथा नृपार्थे ऽविणस्वदेहव्ययेन नित्यं परियत्यतेऽत्र । तथाऽऽत्मनोऽर्थे यदि यत्यते तत्स्वर्गापवर्गादि न दुर्लनं स्यात् ॥ ४१ ॥ ततो विचिन्त्येति विधाय द्योचं, कचोच्चयस्यैष च पञ्चमुष्टिम् । मुमुक्षुवेषेण सदः समेत्य, नृपं

१ हे पुत्र.

जगौ स्तात्तव धर्मलाभः ॥ ४२ ॥ ऋपौकसो निस्सरितेऽत्र साधौ, दध्यौ नृपोऽदः कपटं विधाय । वेश्या-
लयेऽयं तु गमिष्यतीति, वातायनस्थश्च निरैक्षतैनम् ॥ ४३ ॥ दुर्गन्धदेशेऽप्यपशङ्कमेतं, यान्तं समीक्ष्याथ
चमच्चकार । श्रीस्थूलऋजे गतरागसङ्गे, धिङ्मे कुचिन्तेति निनिन्द च स्वम् ॥ ४४ ॥ गत्वा तपस्यां सचि-
वाङ्गजन्मा, जग्राह संभूतिगुरोः सकाशे । नन्दो न्यधाद्भ्रीयक एव सर्वव्यापारमुद्दामथ विस्तरेण ॥ ४५ ॥
जगाम कोशौकसि नित्यमेव, भ्रातृप्रियाप्रेमवशंवदोऽसौ । सा स्थूलऋजस्य वियोगदुःखं, समीक्ष्य तं नव्य-
मिवाधरच्च ॥ ४६ ॥ ततश्च तां श्रीयक एवमाह, व्यापाद्य ऋजे जनकं ममासौ । वराद्रुचिर्नर्तृवियोगदुःखं,
तवाप्यकार्षीत् पविपातकल्पम् ॥ ४७ ॥ यावन्नवज्राम्युपकोशयाऽसौ, रमेत तावत्प्रतिकुर्वमुं स्राक् । यथा-
कथञ्चित्त्वनयाऽद्य मद्यपानं शुने कारय तत्त्वमस्य ॥ ४८ ॥ सा श्रीयकेणेत्युदिता प्रपद्य, तच्चोपकोशां
द्रुतमाददेश । कोशाज्ञया साऽपि तथाऽन्यधत्त, यथा सुरामाशु पपौ स विप्रः ॥ ४९ ॥ ऋष्टो मया
मद्यमपाय्यताद्य, सेत्याह कोशां सचिवात्मजोऽथ । श्रुत्वा ततश्चिन्तयति स्म तातवैरप्रतीकारमहं करिष्ये
॥ ५० ॥ पञ्चत्वमाप्ते शकटालमन्त्रिण्यऋत्स विप्रो नृपसेवनेऽलम् । नन्दस्तदा मन्त्रिगुणान् जगाद, सगद्गदं
श्रीयकमन्त्रिणोऽग्रे ॥ ५१ ॥ स स्माह देवेत्यकरोत्सुरापो, वराद्रुचिश्चाख्यदिलाधिनाथः । सत्यं स मद्यं
पिबतीति किं न, प्रत्याह स स्माधर दर्शये तत् ॥५२॥ सोऽथ स्वपुंसा परिशिक्षितेनार्पयत्पयोजानि सदो-
जनस्य । ऋष्टस्य तूद्दामकगन्धमिश्रं, घ्रातुं प्रवृत्ताः क्षितिपादयोऽथ ॥ ५३ ॥ विप्रस्तदाघ्राय सुरां ववाम,
वधादियोग्यो धिगसौ सुरापः । नृपादिभिश्चेति विनिन्द्यमानश्चण्डालवत्स्वात्सदसो निरस्तः ॥ ५४ ॥ विप्रा

जगुस्तस्य च मद्यपानाघघाति तप्तत्रपुपानमेव। ऋद्धेन तप्तं त्रपु तेन पीतं, तदाहऋीत्येव निरैत्तदात्मा॥९९॥ श्रीस्थूलऋषः श्रुतवार्धिपारदृश्वा व्रतं पालयति स्म चारु । वर्षागमेऽन्येद्युरिदं प्रणम्य, संभूतसूरिं मुनयोऽन्यगृह्णन् ॥ ९६ ॥ एकोऽवदत्सिंहगुहामुखेऽस्म्युत्सर्गेण मासाँश्चतुरोऽतिनेष्ये। ऊचेऽपरो दृग्विषसर्पगेहे, स्थास्यामि मासाँश्चतुरस्तथाहम् ॥ ९७ ॥ जगौ तृतीयोऽस्म्यपि कूपकण्ठे, नेष्यामि मासाँश्चतुरस्तथैव । विज्ञाय योग्यान् गुरुराज एतान् , ददावनुज्ञां खलु तत्तदर्थे ॥ ९८ ॥ श्रीस्थूलऋषोऽपि जगाद कोशाऽऽवासे विऋो षड्रसऋोजनोऽहम् । स्थास्यामि मासाँश्चतुरोऽथ सूरिर्मत्वा तदर्हं त्वनुमन्यते तम् ॥ ९९ ॥ मुमुक्षवः स्वस्वपदे गतास्ते, सिंहादयो वीक्ष्य च तान् प्रशान्ताः । श्रीस्थूलऋषोऽपि जगाम कोशाऽऽवासे ततः साऽपि तमभ्युदस्थात् ॥ ६० ॥ क्वायं कुमारः सुकुमारगात्रः, क्वेदं कठोरो व्रतभार एषः। ततोऽयमुद्विग्नमना इहागादेवं विचिन्त्यावददेतदेषा ॥ ६१ ॥ आदिश्यतां मे प्रिय किं करोमि, वपुर्धनं सर्वमिदं तवैव । सोऽवक् चतुर्मासनिवासहेतोः, प्रदीयतां सुन्दरि चित्रशाला ॥ ६२ ॥ प्रगृह्यतां मामनुगृह्य नाथ, तयोक्त इत्थं स तु तत्र तस्थौ । कृतेऽमुना षड्रसभोजनेऽथ, साऽमुं मुनिं क्षोभयितुं प्रवृत्ता ॥ ६३ ॥ रम्भेव सा तस्य पुरो निविष्टा, संस्मारयन्ती नवहावभावान् । अचेतनस्यापि विकारकर्तॄन् दिने दिने कामवनाम्बुवाहान् ॥ ६४ ॥ क्षोभाय यद्यद्विदधेऽत्र साधौ, तत्केवलं क्लेशफलाय तस्याः। बभूव वज्रे नखलेखनं वा, स क्षोभमाप्तो न मनागपीह ॥ ६५ ॥ अज्ञानतः पूर्वमिवेश धिङ्मां, रिरंसुमेवं

१ श्व.

परिनिन्द्य सा स्वम् । पपात तत्पादयुगे तदानीं, चाशिश्रियच्छ्रावकतां विरक्ता ॥ ६६ ॥ तुष्टोऽथ नृपो यदि कस्यचिन्मां, ददाति मुक्त्वा पुरुषं तमेव । नजामि नान्यं नियमं त्विमं सा, श्रीस्थूलभद्राजगृहे तदानीम् ॥ ६७ ॥ त्रयोऽपि वर्षासमये व्यतीते, पूर्णप्रतिज्ञा मुनयः समायुः । उत्थाय किञ्चित्स गुरुर्बभाषे, सुखं तपो दुष्करकारका वः ॥ ६८ ॥ श्रीस्थूलभद्रोऽप्यगमत्तदानीमुत्थाय सूरिः प्रबलप्रमोदात् । जगावदो दुष्करदुष्करस्य, कर्तुः समस्तीह सुखं तपस्ते ॥ ६९ ॥ समत्सरास्ते मुनयोऽथ दध्युरामन्त्रणेऽस्मिन् गुरुणा प्रदत्ते । विहाय तन्मन्त्रिसुतत्वमन्यः, संज्ञाव्यते कश्चन नापि हेतुः ॥ ७० ॥ चेदेष तत्षड्रसभोजनेन, विनिर्ममे दुष्करदुष्करत्वम् । वर्षान्तरे तर्हि तदेव नूनं, कर्तास्महे भो वयमप्यथापि ॥ ७१ ॥ अतीत्य मासान् कथमप्यथाष्टौ, ते प्राप्य वर्षासमयं प्रहृष्टाः । साधुस्तदा सिंहगुहानिवासीत्येवं न्यगादीत्स्वगुरोः पुरस्तात् ॥ ७२ ॥ मन्त्र्यङ्गजन्मेव करोमि सूरे आदिश्यतां सोऽप्यवबुद्धवृत्तः । जगाद तत्कर्तुमलं न कश्चि-द्भीस्थूलभद्रादपरः पृथिव्याम् ॥ ७३ ॥ स्पर्धां दधानस्य च तेन सार्धं, भावी तव प्राक्तपसोऽपि नाशः । स सूरिभिश्चेति निवारितोऽपि, कोशालयं प्रापदमात्यभूवत् ॥ ७४ ॥ स्पर्धां दधन्मद्गुरुणा सहायमागा-दिहैतेन परीक्ष्यतेऽसौ । ध्यात्वेत्यथो षड्रसभोजनेन, तं भोजयामास तदैव कोशा ॥ ७५ ॥ कृतोरुशृ-ङ्गारभरा मरालीवल्लीलयाऽऽगात् पुरतो मुमुक्षोः । स्मराङ्गना मूर्तिमतीव कोशा हेरम्बकुम्भारिपयोध-राङ्का ॥ ७६ ॥ वीक्ष्यैव तां क्षोभमवाप साधुश्चङ्क्राङ्गसङ्गां चकितैणिकाक्षीम् । कटाक्षविक्षेपनिरीक्षणेन, तस्या नु न स्याच्चलचेतनः कः ॥ ७७ ॥ क्व यासि भोस्तापसकातरातः, स्मित्वा स्मरेणेति गले गृहीतः ।

स याचमानोऽथ तयाऽऽणि वेश्याः, स्वेनैव वश्या जगवन् वयं स्मः ॥ ७८ ॥ सोऽवग्रती मारविकार-खिन्नः, खपुष्पवत् स्वं मम सुन्दरि क्व । तं साऽऽह नेपालनृपोऽथ रत्नोर्णायुं प्रदत्तेऽलमपूर्वसाधोः ॥७९॥ नेपालदेशाय चचाल सोऽथाकालेऽपि पङ्काकुलवर्त्मनाऽसौ । गत्वाऽथ लब्ध्वा नृपतेः सुरत्नोर्णायुं ततोऽयं ववले मुमुक्षुः ॥ ८० ॥ ततो मुनौ याति पथेऽथ कीरश्चौरेश्वरायाह च याति लक्ष्म् । सज्जाः किमेतीति बभूवुरेते, समाययौ तत्र मुनिस्तदानीम् ॥ ८१ ॥ न किञ्चिदस्तीति स वीक्ष्य मुक्तस्तैः कीरकोऽथापि जगौ तथैव । पृष्टः स तैर्ब्रूहि किमस्ति सत्यं, ततो न्यगादीत्स यथातथं तत् ॥ ८२ ॥ अत्रैव वंशे निहितोऽस्ति रत्नोर्णायुर्मया पण्यवधूनिमित्तम् । ततः समुत्पन्नदयस्तदानीं, चौरेश्वरस्तं मुमुचे मुमुक्षुम् ॥ ८३ ॥ गत्वा ददौ तं श्रमणोऽथ तस्या, गृहप्रणाड्यां निहितस्तया सः । ततश्च साधुः सविषादमूचे, कष्टार्जितोऽहेपि किमेष पङ्के ॥ ८४ ॥ सोचे कथं शोचसि कम्बलं तं, शोचातिकष्टार्जितमत्र मूढ । नृजन्म मज्जत्तमैंसीति तस्या, गिरा प्रबुद्धः श्रमणो जगौ ताम् ॥ ८५ ॥ संसारकान्तारधराप्रमुक्तो दीप्ते दवाग्नौ विषयस्वरूपे । संबोधितः साधु शुने त्वयाऽहमुन्मार्गसङ्गं कँरटीव कुर्वन् ॥ ८६ ॥ अथो गुरुं याम्यनघेऽस्मि तेऽद्य, स्ताद्धर्मलाभो निजगाद साऽपि । मया विघ्नो या तव बोधहेतोराशातनाऽकारि च तां क्षमस्व ॥ ८७ ॥ श्लेयमेवं निगदन् जगाम, गुरोः समीपे स विखिन्नचित्तः । आलोचनां प्राप्य ततस्तदानीं, दीक्षां पुनः प्राप नवामिवासौ ॥ ८८ ॥ महीभुजा सा रथिनेऽथ कोशाऽन्यदा ददे तद्गुणरञ्जितेन । सा राजवश्ये-

१ अण प्राणने इति धातोः कर्मणि लङ्. २ धनेनैव. ३ अज्ञाने. ४ गज श्व.

त्यन्नजद्दिनाऽपीङ्गां स्थूलज्ञङ्घं परिवर्णयन्ती ॥ ८९ ॥ तस्या रथी स्वीयकलाकलापं, प्रदर्शयन् स्वे शयने स्थितोऽसौ । तन्मंदिरोद्यानगतां च लुम्बीं, विवे(व्या)ध बाणेन सुधीः क्षणेन ॥ ९० ॥ स पुङ्खपुङ्खार्पित-बाणवृन्दैश्चकार लुम्बीं सुलज्जां करेण (रस्य) । छित्त्वाऽर्धचन्द्रेण च वृन्तमस्याः, शय्यास्थितोऽस्यै प्रददौ ततस्ताम् ॥ ९१ ॥ स्तुत्यै ततस्तन्मुखमैक्षतासौ, स्मित्वाऽऽह सा पश्य कलां ममापि । ततो व्यधात्सर्ष-पराशिमुच्चैः, शूची तदग्रे निहिता सपुष्पा ॥ ९२ ॥ नृत्यन्त्यसौ शूचिकया न विद्धा, तत्राचलत्पुष्पमदो मनाङ्न ! स नृत्यविज्ञानबलेन तुष्टोऽवग् ब्रूहि कान्तेऽद्य ददामि किं ते ॥ ९३ ॥ सा स्माह किं ज्ञो मयका व्यधायि, येनाधुना सुन्दर रञ्जितोऽसि । नृत्तं तुमे खे गतिवत्खगानामभ्यासासिद्धं नहि चित्रकारि॥९४॥ अभ्यासासिद्धं हि तवापि लुम्बीप्रवर्तनं मेऽपि च नर्तनं तत् । न दुष्करं दुष्करमेतदेव, यत्स्थूलज्ञङ्घो मुनिराट् चकार ॥ ९५ ॥ ज्ञोगान्मयाऽनुङ्क्ष्व समं स यत्र, यद्दत्तया द्वादश हायनानि । तां चित्रशाला-मयमध्युवासाद्दृतव्रतो मासचतुष्टयीं यः ॥ ९६ ॥ अहं वधूः षड्रसज्ञोजनं तत्, सा चित्रशालाऽपि च सोऽपि साधुः । मनःप्रमोदं न कदापि कुर्मः, पशोरिवामुष्य मुनीश्वरस्य ॥ ९७ ॥ श्रीस्थूलज्ञङ्घं स्तुवतीति कोशा, सप्रीतिवाक्यै रश्मिना बज्ञाषे । कः स्थूलज्ञङ्घः कथयैष ज्ञङ्घे, त्वयेति नित्यं परिवर्ण्यते यः॥ ९८ ॥ नन्दद्रुमाज्ञृङ्गकटाक्षमन्त्रिपुत्रं स्तवीमीत्युदिते तया सः । चमत्कृतश्चेतसि चाह तस्य, दासानुदासोऽस्मि य ईदृशोऽज्ञूत् ॥ ९९ ॥ संविज्ञमेनं परिज्ञाव्य कोशाऽथाबोधयद्धर्ममयैर्वचोज्ञिः । सोऽपि प्रबुद्धः प्रणि-पत्य वेश्यां, जग्राह दीक्षां सुगुरोः पुरस्तात् ॥ १०० ॥ श्रीस्थूलज्ञङ्घोऽपि नृशं तपस्यन्, दुष्कालमाप

त्रिजगज्जिघत्सुम् । तं द्वादशाब्दीमितमत्र साधुसङ्घोऽत्यगादम्बुधितीरवर्ती ॥ १०१ ॥ अगुण्यमाने क्रमतो यतीनां, श्रुते गते विस्मृतिमत्र सङ्घः । श्रीपाटलीपुत्रपुरे मुमुक्षूनेकत्र सर्वानपि चक्रुवान् स्माक् ॥ १०२ ॥ यद्यच्छ्रुतं साधुषु येषु येषु, ततस्ततोऽसौ परिगृह्य तत्तत् । एकादशाङ्गीं प्रगुणां विधायोद्यमं व्यधात्तस्य च दृष्टिवादे ॥ १०३ ॥ सङ्घोऽथ तज्ज्ञं खलु नव्यबाहुमाह्वातुकामः प्रजिघाय साधून् । व्यज्ञापि तान्यामिति तेन सङ्घो, ममागमो नाव्यधुना न तत्र ॥ १०४ ॥ प्रारब्धमस्त्यत्र यतो मयेदं, ध्यानं महाप्राण इति प्रतीतम् । सङ्घोऽनुशिष्यान्यमुनी तथैव, प्रैषीत्ततोऽवाप्य तमूचतुस्तौ ॥ १०५ ॥ स्वामिन् विधत्ते न हि योऽत्र सङ्घादेशं नवेत्तस्य च निग्रहः कः । श्रीनव्यबाहुर्निजगाद सङ्घबाह्यः क्रियेतैष मनीषिभिः स्माक् ॥ १०६ ॥ तावूचतुस्त्वां विदधाति सङ्घो, बाह्यं ततः सोऽपि जगौ प्रभुर्मे । सङ्घः प्रसद्य प्रहिणोतु साधून् यद्वाचनाः सप्त ददामि तेभ्यः ॥ १०७ ॥ निष्क्रागतोऽहं प्रथमां प्रदास्येऽन्यां वाचनां संश्रितकालवेलः । बहिर्भुवश्चागमने तृतीयां विकालवेलां समवाप्य तुर्याम् ॥ १०८ ॥ आवश्यकस्य क्षण एव तिस्रो, ममापि सङ्घस्य च कार्यमेवम् । नविष्यतीत्याद्युदितौ गतौ तौ सङ्घस्य चाचीकथतां समस्तम् ॥ १०९ ॥ हृष्टोऽथ सोऽपीति निशम्य सङ्घः, श्रीस्थूलभद्रादिमुनीन्ययुङ्क्त । ते वाचयन्तोऽपि हि तत्समीपे, तद्वाचनाल्पत्व-वशेन जग्नाः ॥ ११० ॥ ते स्थूलभद्रेण विना ययुः स्वं, स्थानं ततोऽसौ गुरुणा पप्रच्छे । नोज्ज्यसे भोः कथमाह सोऽप्युज्ज्येत कोऽप्यत्र कदाचनापि ॥ १११ ॥ तदल्पता किं तु न हन्ति तृष्णां, ततोऽथ सूरि-र्निजगाद साधो । ध्यानं तु मे पूर्णमिवास्ति तस्यान्ते वाचनास्ते प्रददे यथेष्टम् ॥ ११२ ॥ ध्यानेऽथ पूर्णे

तमवाचयत्स, यथेष्टमेषोऽपि पपाठ तूर्णम् । अध्यैष्ट पूर्वाणि दश द्विवस्तूनानि क्रमात् श्रीशकटालपुत्रः ॥ ११३ ॥ अत्रान्तरे वन्दितुमात्तदीक्षास्ताः स्थूलजऋस्य जगिन्य आयुः । स केति ताभिः प्रणिपत्य सूरिः, पृष्टो जगौ देवकुलेऽस्ति सोऽत्र ॥ ११४ ॥ ताः स्थूलजऋोऽपि निशाम्य तत्रायान्तीर्विसिष्मापयिषुस्तदाबीम् । हार्यद्दमङ्गं व्यतनोदथैताः, पुरो हरिं वीक्ष्य जिया प्रणष्टाः ॥ ११५ ॥ आचार्यमूचुश्च विदार्य तत्रार्य तं पुरो हस्तिरिपुः समस्ति । ज्ञात्वोपयोगेन गुरुर्बभाषे, याताश्च वन्दध्वमसौ हरिर्न ॥११६॥ गतास्ततो वीक्ष्य गुणैकमूलं, ताः स्थूलजऋं च चमत्कृता ऽाक् । प्रणम्य पृष्ट्वा च सुखं तपः स्वे, ऽपाश्रये ता मुदिताः प्रजग्मुः ॥ ११७ ॥ आचार्यमार्योऽपि जगाम वाचनार्थं स चोवाच गुरुस्तदानीम् । तस्या न योग्यस्त्वमिति स्वमागो, दध्यौ ततोऽसौ व्रतवासरादि ॥ ११८ ॥ जगौ स शास्तुर्मम किञ्चिदागो, नैति स्मृतिं सूरिरथावगेवम् । कृत्वाऽपि किं नो मनुषेऽधुना तत्स्मृत्वा मुनिः सूरिपदोः पपात ॥ ११९ ॥ ऋूयः करिष्यामि मुनीश नेदृगागः क्षमस्वेति स चान्यधत्त । तथापि दत्ते न स वाचनास्तऋोषच्छिदे सङ्घमसऋायत्सैः ॥ १२० ॥ ऊचे सँ सङ्घं विकृतो यथाऽसौ, तथा विकर्तार इहाल्पसत्त्वाः । अन्येऽपि तत्सत्त्वपराणि पूर्वाण्यस्मत्सु तस्यास्त्वयमेव दंरुः ॥ १२१ ॥ सङ्घाग्रहेणेति विचार्य पूर्वोच्छेदो हि मा स्तान्मयि तेन सूरिः । श्रीस्थूलजऋाय च शेषपूर्वाण्यवाचयत् पूर्ववदेव नित्यम् ॥ १२२ ॥ आवर्जिताचार्यपदोऽर्यमेव संबोधयन् जव्यपयोरुहाणि । श्रीस्थूलजऋोऽप्यथ सर्वपूर्वधरो धरायां विजहार हारी ॥ १२३ ॥ तपांसि

१ सिंहसंबन्धि. २ स्थूलजऋः, ३ सूरिः. ४ सूर्य इव.

तीव्राणि स तप्यमानो, मानोज्झितस्त्रैदशधामरामाम् । ब्रह्मव्रतालङ्करणादिभिः प्रागावर्जितामापदयं दयालुः ॥ १२४ ॥ एवं निशम्य ज्ञव्या ज्ञजतादरमुच्चकैर्व्रते तुर्ये । परिरम्ज्ञयति यथा वः सिध्विवधू-बन्धुरप्रीतिः ॥ १२५ ॥

॥ इति श्रीस्थूलज्ञद्रकथा ॥

पुनः सुशीलालोकप्रशंसामुखेनोपदेशमाह—

सद्रूपयौवनगुणागतसानुरागवित्तेशदत्ततनयानयनेष्वज्ञेदात् ।
वज्रेण वज्रमुनिना स्वयशोऽर्णसाऽसत्सङ्गाशुचि क्वचिदपूयत शीलमेव ॥ ७४ ॥

व्याख्या—वज्रमुनिना श्रीवैरस्वामिना स्वयशोऽर्णसा स्वयशोजलेन प्रत्युत शीलमेवापूयत पवित्री-चक्रे । पावने हेतुमाह—किंविशिष्टं शीलं ? असत्सङ्गाशुचि असतां कुशीलवतां सङ्गादशुचि अपवित्रं क्वचिन्नरादौ, अतो युक्तं तस्य पावनं । किंभूतेन वज्रमुनिना ? वज्रेण वज्रवदज्ञेद्येन । कस्मात् ? सद्रूप-यौवनेत्यादि रूपं च यौवनं च गुणाश्च रूपयौवनगुणाः सन्तः प्रधाना रूपयौवनगुणा यस्याः सा तथा, आगता संमुखं प्राप्ता सानुरागा च सस्नेहा च या वित्तेशदत्ततनया धनदत्तश्रेष्ठिकन्या तस्या नयना-

---

१ स्वर्गलक्ष्मीम् .

न्येवेषवो बाणा ज्ञेदकत्वात् तैः कृत्वाऽज्ञेदादज्ञेदनात् वज्रेण वज्रं किल बाणैर्न जिघ्यत इति काव्यार्थः । ज्ञावार्थस्तु कथयाह, सा च पूर्वोक्तापि किञ्चिदुच्यते—(वज्रस्वामिकथा)

नगरे पाटलीपुत्रे श्रेष्ठी श्रेष्ठतमो धनः । रूपलावण्यसंपन्ना कन्याऽज्ञूत्तस्य रुक्मिणी ॥ १ ॥ तस्थुस्तद्यानशालायां साध्व्यो वज्रगुणस्तवम् । कुर्वाणाः साऽपि तं श्रुत्वाऽज्ञवद्वज्रेऽनुरागिणी ॥ २ ॥ जगाद च विना वज्रं न वृणोम्यपरं वरम् । साध्व्योऽज्यधुश्च तामुच्चैर्मुधा रागोऽत्र दीक्षिते ॥ ३ ॥ साऽऽचख्यौ तर्हि श्रामण्यमप्यादास्येऽस्य सन्निधौ । इतश्च विहरन् वज्रस्वामी तत्रागमत् पुरे ॥ ४ ॥ नृपः श्रुत्वा तमायातं निनंसुः संमुखोऽगमत् । ज्ञव्याकृतीन् यतीन् वीक्ष्याचख्यौ युष्मासु को गुरुः ॥ ५ ॥ ते प्रोचुः प्राक्तने वृन्दे समागच्छन्ति सूरयः । ततः समीक्ष्य राजेन्द्रो मुदितस्तानवन्दत ॥ ६ ॥ अथोद्यानस्थिताः क्षीराश्रवलब्ध्या समादिशन् । धर्मं प्रीतोऽथ धात्रीशः प्राप्तसौधोऽज्यधात् प्रियाः ॥ ७ ॥ सुधामाधुर्यसधीची देशनाऽद्य मया श्रुता । श्रीमद्वज्रगुरोर्यात यूयं शृणुत तामथ ॥ ८ ॥ राज्ञाऽऽज्ञातास्ततो राज्ञीः प्राप्ता मत्वा गुरुस्तदा । कुत्सितं रूपमाधाय मनोज्ञां देशनां व्यधात् ॥ ९ ॥ गृहायाता जगुश्चेति ज्ञूपतिं ज्ञूपवल्लज्ञाः । वाण्येवास्य शुज्ञा देव तथारूपकथा वृथा ॥ १० ॥ ततः स्वरूपेण सूरिर्ज्ञूरिलब्धिः परेऽहनि । स्मेरहेमाब्जमध्यस्थो विदधे धर्मदेशनाम् ॥ ११ ॥ विरूपोऽजनि कल्येऽयं वामभ्रूप्रार्थनाज्ञयात् । मूलरूपमिदं त्वस्येत्याहुर्ज्ञूमीश्वरादयः ॥ १२ ॥ धनं रुक्मिण्यपि प्राह तातायातोऽस्ति सोऽधुना । यद्दुर्वाऽस्ति मे तन्मां यज्ञ यावन्न याति सः ॥ १३ ॥ कन्यां दातुं स वज्राय धनकोटियुतो धनः । पुरस्कृत्य

गतस्तत्र वज्रमेवं व्यजिज्ञपत् ॥ १४ ॥ कन्यां त्वमुद्वह स्वामिन्ममेमां त्वयि रागिणीम् । स्वर्णकोटीस्तवामुष्याः प्रदास्ये हस्तमोचने ॥ १५ ॥ बभाषे च गुरुर्नैव न स्त्रियं न धनं पुनः । वाञ्छन्ति साधवः सिद्धिवधूसंबन्धबुद्धयः ॥ १६ ॥ यदि सुन्दर कन्येयं तवास्मास्वनुरागिणी । आराधयतु तन्मेऽपि प्रियमेषाऽपि संयमम् ॥ १७ ॥ प्रशान्तविषयावेगाद्बुक्मिण्यपि गुरोर्गिरा । तदानीमाददे दीक्षां कल्याणद्रुममञ्जरीम् ॥१८॥ इति श्रुत्वा श्रियां मूले शील उद्यम्यतां तथा। यथा स्वर्गापवर्गश्रीरन्यायाति स्वयं जवात् ॥१९॥

॥ इति वयरस्वामिकथानकम् ॥

उक्तमिदमेकचत्वारिंशत्तमं शीलद्वारं । अथोद्देशानुसारेण तपोद्वारं विवरीषुराह—

तपः शिवकुमारवच्चरति मन्दिरस्थोऽपि यः, स देवपरिषद्यपि द्युतिमहत्त्वविस्फूर्तिभृत् ।
कृशान्वकृशतापनोल्लसितवर्णिकं काञ्चनं, न धातुषु विशिष्टतां नृपतिमौलितामेति च ७५

व्याख्या—यः पुमान् मन्दिरस्थोऽपि गृहस्थोऽपि तपश्चरति तपः करोति स देवपरिषद्यपि देवसभायामपि द्युतिमहत्त्वविस्फूर्तिभृत् भवति । किंवत् ? शिवकुमारवत् यथा शिवकुमारो मन्दिरस्थोऽपि तपः कृत्वा देवपरिषदि द्युतिमहत्त्वविस्फूर्तिभृदभूत् । एतदेवाह—कृशान्वित्यादि कृशानोर्वह्नेरकृशं महत्तापनं तेनोल्लसिता वर्णिका यस्य तत्तथा एवंविधं काञ्चनं हेम धातुषु मध्ये विशिष्टतां नैति केवलं न याति,

किं तु नृपतिमौलितामप्येति राज्ञां मुकुटत्वमपि याति । इति वृत्ताक्षरार्थः । भावार्थस्तु कथयाऽऽविर्भाव्यते (शिवकुमारकथा)—

ग्रामः सुग्रामनामास्ति मगधावनिमण्डनम् । आर्यवान् राष्ट्रकूटोऽभूत्तत्र कूटलवोज्झितः ॥ १ ॥ युवत्यां तस्य रेवत्यां सुतौ जातौ सुविश्रुतौ । भवदत्तभवदेवाभिधानौ स्नेहलौ मिथः ॥ २ ॥ क्रमं मनोरथैः पित्रोर्लब्ध्वा वृद्धिं परां ततः । तौ प्राप्तौ यौवनं केलिवनं लोलदृशां दृशाम् ॥ ३ ॥ भवदत्तस्तदाऽऽदत्तव्रतः सुव्रतसूरितः । बोधनायागमत्स्वानुजन्मनो विहरन् क्रमात् ॥ ४ ॥ वासुकीकुक्षिसंभूतां नागदत्तस्य पुत्रिकाम् । परिणिन्ये भवदेवो भवदत्तानुजस्तदा ॥ ५ ॥ कृतोद्वाहमहाः सर्वे भ्रातरोऽन्याययुर्मुनिम् । स्वं धन्यं मन्यमानास्ते भवदत्तं ववन्दिरे ॥ ६ ॥ सोऽन्यधाद्बान्धवानेवं विवाहव्याकुलाः स्थ तत् । धर्मलाभोऽधुना वोऽस्तु विहर्तुं यामि कुत्रचित् ॥ ७ ॥ ते प्रत्यबाभणन् शुद्धैर्भक्तपानादिभिर्मुदा । भवदत्ताभिधं साधुं जातरोमाञ्चकञ्चुकाः ॥ ८ ॥ तदैव भवदेवेन नवोढा प्रेयसी निजा । मण्ड्यमाना गवाक्षेऽस्थि वयस्याभिः परिवृता ॥ ९ ॥ चन्दनेन विधायाङ्गरागं तस्याः कपोलयोः । कस्तूर्या मण्डनं कृत्वा कुचे यावदमण्डयत् ॥ १० ॥ भ्रातुरागमनं तावदश्रौषीद्भुतिशर्मकृत् । स भ्रातृदर्शनोत्तालोऽत्यजत्तामर्धमण्डिताम् ॥ ११ ॥ अभ्येत्य भवदत्तं स ववन्दे सोऽपि तत्करे । निजाभ्यभाजनं दीक्षासत्यङ्कारमिवार्पयत् ॥ १२ ॥ स निन्ये भवदत्तेन क्रमादाचार्यसन्निधौ । कृतवक्रोष्ठिकाः क्षुल्लास्तं वीक्ष्येत्यवदन्मिथः ॥ १३ ॥ तरुणं दिव्यरूपाढ्यं भवदत्तोऽनुजं निजम् । प्रव्राजयितुमानिन्ये किमिमं सुकुमालकम् ॥ १४ ॥ तरुणः कोऽय-

मानीतः सूरिणोक्तो जगौ मुनिः । ज्ञवदेवोऽनुजो मेऽयमागाद्दीक्षाजिघृक्षया ॥ १५ ॥ गुरुणा पप्रच्छे सोऽपि ज्ञरू दीक्षां जिघृक्षसि ? । ज्ञातुर्मा ज्ञूरुचो मिथ्येत्योमित्येष प्रपन्नवान् ॥ १६ ॥ तदानीं ज्ञवदेवोऽथ पर्यत्राज्यत सूरिणा । मुमुक्षुयुग्मसहितो व्यहार्यन्यत्र कुत्रचित् ॥ १७ ॥ ज्ञवदेवः किमद्यापि नाययाविति चिन्तया । स्वजनाः पृष्टितोऽन्येत्य ज्ञवदत्तमदोऽवदन् ॥ १८ ॥ मुक्त्वार्धमणिकृतां कान्तां ज्ञवदेवोऽन्विष्याय च । स क्काधुना वयं येन जीवन्तस्तमृते मृताः ॥ १९ ॥ साऽप्यर्धमणिकृता बाला ज्ञूपीठे लोलुठीत्यधः । दाहज्वरार्तवत्क्वापि रतिं नाप्नोति सम्प्रति ॥ २० ॥ ज्ञवदेवं विना नष्टचेतनां तां सुरापवत् । अनुगृह्णन् तद्वार्ताकथनेन मुनीश्वर ॥ २१ ॥ मिथ्याऽप्यवग्मुनिर्ज्ञातृधर्मोदर्कविधित्सया । सोऽत्राथागतमात्रोऽपि न जानेऽहं क्वचिन्नतः ॥ २२ ॥ केनाध्वना गतश्चेति वार्तयन्तः परस्परम् । प्रत्यावृतिरे दीनवदनाः स्वजनास्ततः ॥ २३ ॥ नवोढां दयितां ध्यायन् करी रेवामिवापगाम् । केवलं ज्ञातृज्ञक्त्यैव स श्रामण्यमशिश्रियत् ॥ २४ ॥ कालेन ज्ञवदत्तर्षिः कालं कृत्वा समाधिना । सुरोऽज्ञूत् प्रथमे कल्पे किमेतद्धि महात्मनाम् ॥ २५ ॥ ज्ञवदेवस्ततो दध्यौ नागिला वल्लज्ञा मम । मरौ प्राप्ता मरालीव मां विना ज्ञाविनी कथम् ॥ २६ ॥ मयाऽग्रजोपरोधेन सुचिरं पालितं व्रतम् । स्वर्गं गतेऽधुना तस्मिन् क्लेशदेनामुना कृतम् ॥ २७ ॥ चेत्संप्रत्यपि जीवन्तीं तां लप्स्ये प्रेयसीमहम् । सुचिरं तर्हि गार्हस्थ्यं सुखं ज्ञोदये तया समम् ॥ २८ ॥ विचिन्त्य चेतसीत्येषोऽनापृच्छ्य स्वगुरूनपि । निर्गत्य सु(स्व)ग्रामसीमचैत्येऽस्थाद्द्रव्यलिङ्गज्ञृत् ॥ २९ ॥ तदानीं नागिला तत्र जराजर्जरिता गता । साधुबुध्या ववन्दे तं तामपृच्छदिदं मुनिः ॥ ३० ॥

राष्ट्रकूटोऽत्रवास्तव्यो रेवती तस्य गेहिनी । तौ जीवतो न वा जज्ञे ? मृतौ साऽवगुज्ञावपि ॥ ३१ ॥
पुनः पप्रच्छ साधुस्तां नवोढां राष्ट्रकूटजूः । जवदेवोऽत्यजद्यां सा वर्तते नागिला न वा ? ॥ ३२ ॥ सा
दध्यौ जवदेवोऽयं ज्रातुरङ्गीकृतव्रतः । ऊचे च जवदेवस्त्वं किमत्रागान्मुनीश्वर ॥ ३३ ॥ जवदेवोऽव-
दच्चारु त्वयाऽहमुपलक्षितः । स एव जवदेवोऽहं नागिलाप्राणवल्लजः ॥ ३४ ॥ प्राणप्रियां विमुच्यैतां जव-
दत्तोपरोधतः । अनिच्छताऽपि मयका दुःसाधं साधितं व्रतम् ॥ ३५ ॥ संप्राप्ते त्रैदशं धामाग्रजेऽहं तु
निरङ्कुशः । दिदृक्षुर्नागिलामागां मदीयविरहासहाम् ॥ ३६ ॥ दध्यौ सा नागिला प्रत्यज्ञिजानाति न
मामसौ । परावृत्तवयोरूपामात्मानं ज्ञापयाम्यतः ॥ ३७ ॥ सा स्माह नागिलाऽहं सा नवोढा त्याजिता
त्वया । सांप्रतं यौवने नीते निर्लावण्याऽजवं ननु ॥ ३८ ॥ स्वर्गापवर्गसंसर्गकरं रत्नत्रयं मुधा । त्यक्त्वा
कपर्दिकामात्रां मुने मा कामयस्व माम् ॥ ३९ ॥ श्वज्रपातप्रतिज्ञुवो वान्ता ये गृह्णता व्रतम् । कामान्
कामयमानस्तान् कुर्कुरादतिरिच्यसे ॥ ४० ॥ ज्रात्रा चेद्ग्राहितो दीक्षां बज्ञनाऽपि हितैषिणा । तन्मा
मुञ्च यतः सन्तः प्रतिपन्नं त्यजन्ति न ॥ ४१ ॥ निवृत्त्याद्यापि गुर्वन्ते सम्यगालोच्य पातकम् । मुने
पवित्रे चारित्रे एकतानं मनः कुरु ॥ ४२ ॥ प्रतिबुद्धस्ततः प्राह जवदेवो जवोन्मुखः । बोधितोऽस्मि शुने
साधु त्वयाऽहं खलु सांप्रतम् ॥ ४३ ॥ ततो गुर्वन्तिके गत्वा कृत्वाऽऽलोचनादिकम् । जवदेवमुनिः
शुद्धं पालयामास संयमम् ॥ ४४ ॥ गृहीतानशनः प्रान्ते प्रशान्तेनाथ चेतसा । विपद्य प्रथमे कल्पे
शक्रसामानिकोऽजनि ॥ ४५ ॥ इतश्चात्मा च्युतः स्वर्गात् जवदत्तमहामुनेः । विजये पुष्कलावत्यां विदे-

हावनिमण्डने ॥ ४६ ॥ नगर्यां पुण्डरीकिण्यां वज्रदत्तस्य चक्रिणः । राज्ञीयशोधराकुक्ष्यम्भोजे ज्ञेजे मरालताम् ॥ ४७ ॥ युग्मम् ॥ श्यामाष्टमीतमीवेन्दुं देव्यसूत सुतं ततः । पित्रा सागरदत्तेति नाम चक्रे मनोरमम् ॥ ४८ ॥ धात्र्युत्सङ्गगतो नित्यं पेयपानैर्नवैर्नवैः । बालः स बालशाखीव वृद्धिमासादयत् पराम् ॥ ४९ ॥ साक्षिमात्रमुपाध्यायं विधाय कुमरेश्वरः । अचिरादप्यधाग्यस्यन् जग्राह सकलाः कलाः ॥ ५० ॥ स प्राप्तयौवनः पित्रोर्घाहितः प्रेयसीसखः । वातायनस्थितोऽन्येद्युरद्राक्षीदुन्नतं घनम् ॥ ५१ ॥ घनाघनः प्रससार घनाघनपथे तथा । यथा न लक्ष्यते क्वापि दिवाकरकरोत्करः ॥ ५२ ॥ क्षणादाविर्भवन्ती च नश्यन्ती च प्रतिक्षणम् । किं वक्त्यनित्यतां सर्वभावेषु भविनां तडित् ॥ ५३ ॥ चित्रितं तं विचित्रास्त्रैर्वारिवाहं समीक्ष्य सः । कुमारो विस्मयं प्राप सुकुमारशरीरभृत् ॥ ५४ ॥ समुद्यतस्तदाऽकस्माद्वाढं खरसमीरणः । ततो व्यलीयताम्भोदो जलबुद्बुदवत् क्षणात् ॥ ५५ ॥ यथायं जलदो दृष्टनष्टस्तद्वत्तनूभृताम् । धनं च यौवनं योषित्पुत्रमित्रादयोऽपि च ॥ ५६ ॥ इत्थं ध्यात्वा महात्मासौ सूरेरमृतसागरात् । विविक्तो व्रतमादत्ताप्तावधिर्विजहार च ॥ ५७ ॥ इतश्चात्रैव विजये वीतशोकापुरीशिनः । श्रीपद्मरथराजस्य वनमालाप्रियाङ्गजः ॥ ५८ ॥ जीवोऽथ भवदेवर्षेश्च्युत्वा सौधर्मकल्पतः । अभूच्छिवकुमाराख्यो विख्यातो भूमिमण्डले ॥ ५९ ॥ युग्मम् ॥ कस्यापि सार्थवाहस्य धिष्ण्ये भिक्षार्थमागतम् । मुनिं सागरमैक्षिष्ट कुमारः स गवाक्षगः ॥ ६० ॥ कुमारो मुदितोऽथामुं वीक्ष्य चन्द्रं चकोरवत् । प्रीतचित्तोऽथ तं

१ आकाशे. २ गृहे.

गत्वा ववन्दे कृतपारणम् ॥ ६१ ॥ निशम्य देशनां तस्याप्राक्षीत्तं कुमरस्ततः । किं स्तोकसंस्तवे साधो चेतः स्निह्यति मे त्वयि ॥ ६२ ॥ प्राग्जन्म ज्ञानिनोऽमुष्मात् स्वीयं श्रुत्वा कुमारराट् । पप्रच्छ स्वच्छधी-र्गत्वा व्रतेप्सुः पितरौ निजौ ॥ ६३ ॥ अप्राप्तुवन्ननुज्ञां स पित्रोरकृतभोजनः । खिन्नोऽस्थात् पौषधागारे भावव्रतधरः शिवः ॥ ६४ ॥ भूभृन्निदेशमासाद्य श्राद्धेन दृढधर्मणा । बोधितो विदधावाचाम्लेनैष षष्ठ-पारणम् ॥ ६५ ॥ प्रासुकाशी व्रती चेट्टगेव चक्रे तपः शिवः । शुश्रूषां दृढधर्मास्य विदधे कर्मजित्कृते ॥ ६६ ॥ भूत्वा भावव्रतीत्येष द्वादशाब्दान्यथो मृतः । विद्युन्मालीत्यभूद्देवो ब्रह्मलोके महाद्युतिः ॥६७॥ कीर्त्या स्फूर्त्या प्रतापेन कान्तकान्त्या च निर्जरः । सर्वेषामपि लेखानां मुख्यः सोऽभूदुदाहृतिः ॥ ६८ ॥ ततश्च्युतो राजगृहे पुरे क्षत्रदत्तभूः । भूत्वा जम्बूकुमारः स सेत्स्यत्युत्पन्नकेवलः ॥ ६९ ॥

एवं तपः शिवकुमारनिदर्शनेन, स्वर्गापवर्गसुखसंततिदायि मत्वा । अत्रैव लब्धभविका भविका यतध्वं, यत्संपदः सपदि हस्तगता भवन्ति ॥ ७० ॥

॥ इति शिवकुमारकथा ॥

पुनस्तपो (पसो) विशेषप्रभावमाह—

तपः सकलकर्मजिद्विविधलब्धिकृन्निश्चितं, गृहे पुरि च दुर्भगोऽप्यहह नन्दिषेणो द्विजः ।
व्रते शमतपःपरः सुरनरैकवन्द्योऽभवत्, रविज्वलनतापितः श्रयति दीप्तिमामो घटः ॥ ७१ ॥

व्याख्या—तपो विद्धिः सकलकर्मनिर्विविधलब्धिकृच्च निश्चितं निर्णीतं। एतदेवाह—अहहेति खेदे नन्दिषेणो नाम द्विजो ब्राह्मणो गृहे पुरि च नगरे दुर्भगोऽपि व्रते शमतपःपरः सन् व्रतविषये उपशमतपः परायणः सन् सुरनरैकवन्द्योऽभवत्। अत्रोदाहरणमाह—रवीत्यादि आमोऽपक्को घटो रविज्वलनतापितः सन् सूर्याग्निभ्यां तापितः सन् दीप्तिं कान्तिमाश्रयति। रविज्वलनयोः सदृशं तपः घटरूपस्तत्कर्ता दीप्तिरूपा लब्धिरिति वृत्तसमासार्थः। भावार्थं तु कथयाविर्भावयति—

नन्दिषेणमुनिकथा—

बभूव ब्राह्मणः कश्चिन्नन्दिग्रामेऽतिदुःस्थितः। तद्वदेव तदीयाऽभूत्सोमिला सहचारिणी ॥ १ ॥ नन्दनो नन्दिषेणोऽभूत्तयोर्बाल्येऽपि तस्य च। विपन्नौ पितरौ मुक्त्वा दुस्तरे भाग्यसागरे ॥ २ ॥ निन्द्यो जगत्त्रयस्यापि वैरूप्यैकनिकेतनम्। समीक्ष्योदरिलश्चायं तत्यजे स्वजनैरपि ॥ ३ ॥ तं दुःस्थं मातुलो-ऽन्येद्युरनैषीन्निजमन्दिरे। तत्र तज्जेहकार्याणि कुर्वंस्तस्थौ यथासुखम् ॥ ४ ॥ अथ तेन वयःस्थेनान्यदा परिणिनीषुणा। विज्ञप्तो मातुलोऽवादीद्वत्स माऽधृतिमुद्वह ॥ ५ ॥ कन्यकाः सप्त मे सन्ति तास्वेका दास्यते तव। इत्थं पितुरभिप्रायं ज्ञात्वा ता ह्यचिरे ततः ॥ ६ ॥ वरं वह्नौ प्रवेक्ष्यामः करिष्यामो वन-स्थितिम्। वरं वयं तपस्यामः परिणेष्यामहे न तम् ॥ ७ ॥ ततस्तं मातुलोऽवादीदुद्वाहयितुमक्षमः। किं कुर्वेऽहमिति श्रुत्वा निरगात्स गृहाद्बहिः ॥ ८ ॥ धिग्मां वैरूप्यपात्रं यत्सप्त स्वजनकन्यकाः। तत्यजु-

श्चेति स ध्यायन्मुमूर्षुर्वनमाश्रयत् ॥ ९ ॥ निरीक्ष्य सुस्थितं सूरिं तत्र पुण्यमिवात्मनः । प्राणंसीत् प्रोल्ल-
सत्प्रीत्या साकं प्राग्दुष्कृतेन सः ॥ १० ॥ ज्ञानविज्ञाततत्त्वावः सूरिस्तु तमजाषत । ज्ञ वैरूप्यवैराग्यान्मा
कार्षीर्मृत्युसाहसम् ॥ ११ ॥ प्राक्कृताद्दुष्कृतादत्र वैरूप्यादिविपन्नवेत् । जवन्त्यकृतपुण्यानां संपदः क्व
जवान्तरे ॥ १२ ॥ तस्मात्संयमसाम्राज्यमङ्गीकृत्य निकृन्ततु । जवान् कर्माणि ते तेन संपदः स्युः सना-
तनाः ॥ १३ ॥ एवं वचनवीचीभिर्बोधयित्वा गुरुस्तु तम् । श्रामण्यं ग्राहयामास शिक्षयामास तद्विधीन्
॥ १४ ॥ गृहीताचारसंजारोऽगमज्जीतार्थतां क्रमात् । वैयावृत्त्यविधौ धीमानित्यजिग्रहमग्रहीत् ॥ १५ ॥
सर्वेषामपि साधूनां जक्तपानादिकं सदा । औषधादि च संपाद्य विधास्ये षष्ठपारणम् ॥ १६ ॥ यथा-
विधि मुमुक्षूणां वैयावृत्त्यविधायिनम् । शक्रोऽथ तं मुनिं वीक्ष्य प्रशशंस स्वसंसदि ॥ १७ ॥ पौरन्दरं
वचश्चेदं कश्चिदश्रद्दधत्सुरः । कृत्वा ग्लानमुने रूपं वनेऽस्थात्तत्परीक्षकः ॥ १८ ॥ कृत्वाऽन्यत्साधुरूपं
सोऽभागत्य तदुपाश्रये । तं मुनिं प्रत्यदोऽवादीत् षष्ठान्ते पारणोद्यतम् ॥ १९ ॥ वैयावृत्त्यं प्रतिश्रुत्य
कथं जोक्तुमुपाविशः । रे पाप यद्बहिः साधुस्तृषार्त्तोऽस्त्यतिसारकी ॥ २० ॥ मुक्त्वाऽन्नं पानमन्वेष्टुं
नन्दिषेणस्तदोद्यतः । अनेषणीयं देवोऽपि शक्त्याऽकार्षीच्च पानकम् ॥ २१ ॥ लब्धवान् लब्धिमान् शुद्धं
पानकं कस्यचिद्गृहे । तं मायामुनिमायातो नन्दिषेणमुनिस्ततः ॥ २२ ॥ नागतो जागतो धिक् त्वां मुनिं
ग्लानं निशम्य यत् । एवं रूक्षाक्षरैर्वाक्यैश्चुक्रुशे तेन स क्रुधा ॥ २३ ॥ मम क्षमस्वेदमागः सौमिलेयो
वदन्निदम् । पाययित्वा पयोऽमुं तूत्तिष्ठेत्याचष्टवान् पुनः ॥ २४ ॥ सोऽप्यूचे पाप रे किं मां न त्वमक्षम-

मीक्षसे । ततः स्कन्धेऽधिरोप्यैनं सोऽगमद्वसतिं प्रति ॥ २५ ॥ पदे पदे स्खलतोऽप्याक्रोशान् दत्तेऽस्य कर्कशान् । मन्दमन्दपदन्यासे वक्ति मे तपनातपः ॥ २६ ॥ वर्चसाऽलीलिपत्तस्य सर्वाङ्गं कापटो मुनिः । इत्याद्यगणयन् दध्यौ तदारोग्यं तपोधनः ॥ २७ ॥ तदाऽबोधि तमक्षोभ्यं विबुधोऽवधिसंविदा । वर्चोऽपहृत्य तन्मूर्ध्नि पुष्पवृष्टिं ततो व्यधात् ॥ २८ ॥ तं त्रिः प्रदक्षिणीकृत्य प्रणिपत्य मुनिं सुरः । क्षमयित्वाऽखिलं स्वं च कुचेष्टितमथाऽन्यधात् ॥ २९ ॥ किं तुभ्यं करवाणीति मुनिरूचे न केनचित् । कार्यं समस्ति मे जैनं यत्क्षेयोऽस्ति सनातनम् ॥ ३० ॥ प्रशंसा देवराजस्य ममागमनकारणम् । त्वामीदृशं समीक्ष्याहं चमच्चक्रे मुने ततः ॥ ३१ ॥ त्रिदशस्त्रैदशं धाम जगाम वसतिं मुनिः । सोऽथ व्यक्तमनुत्सिक्तो मुनिप्रष्टस्तदुक्तवान् ॥ ३२ ॥ द्वादशाब्दसहस्राणि तप्त्वैतद्दुस्तपं तपः । गृहीतानशनः प्रान्ते स स्वं दौर्भाग्यमस्मरत् ॥ ३३ ॥ भूयसा तपसाऽनेन भूयासं स्त्रीजनप्रियः । निर्मायेदं निदानं स महाशुक्रेऽगमद्दिवि ॥ ३४ ॥ अथ शौरिपुराधीशान्धकवृष्णेः सुता नव । समुद्रविजयाद्याश्चासन् सुभद्राङ्गसंभवाः ॥ ३५ ॥ ततो दिवश्च्युतो नन्दिषेणजीवो निदानकृत् । दशमो वसुदेवाख्यस्तयोरेवाभवत्सुतः ॥ ३६ ॥ सौभाग्यसेवधिः साधुवैदग्धीदुग्धवारिधिः । प्राग्भवीयतपोयोगाद्वसुदेवोऽभवद्गुणी ॥ ३७ ॥ समुद्रविजये पुत्रे राज्यं न्यस्य निजं नृपः । सुप्रतिष्ठमुनेः प्राप्य प्रव्रज्यां लब्धवान् शिवम् ॥ ३८ ॥ पुरे सहेलं खेलन्तं

---

१ तपनः सूर्यः. २ विष्टया. ३ अहंकाररहितः.

वसुदेवमथान्वगुः । सौभाग्यभङ्गिभिश्चेतश्चौरं पौराङ्गनाजनाः ॥ ३९ ॥ तदालोकनतद्रूपतदालापन-
कौतुकैः । आकृष्टचेतसः पौरनार्यस्तिष्ठन्ति नो गृहे ॥ ४० ॥ वसुदेवाङ्गिसचित्ता रमन्ते स्वान् पतीन्न च ।
भूतीभूता इवैता नो गेहकृत्यानि कुर्वते ॥ ४१ ॥ पौराश्च तास्तथा वीक्ष्य नृपं व्यज्ञपयन्निति । वसुदे-
वाभिलाषेण नार्योऽभूवन् विसंस्थुलाः ॥ ४२ ॥ समुद्रविजयेनाथेति श्रुत्वाऽकीर्तिंभीरुणा । वसुदेवोऽन्य-
दाऽवादि स्वकीयोत्सङ्गसङ्गतः ॥ ४३ ॥ दिवानिशं पुरभ्रान्तिश्रान्त्या भ्रातः कृशोऽस्यतः । तिष्ठेः सदा
मदावासे कलाभ्यसनमानसः ॥ ४४ ॥ शेषामिव शिरस्येष तां निधाय गुरोर्गिरम् । सौधमध्यस्थ एवासा-
वामनत्सकलाः कलाः ॥ ४५ ॥ शिवादेव्याऽन्यदा प्रैषि घुसृणं नृपतिं प्रति । तदाददे कराद्दास्या वसु-
देवोऽथ नर्मणा ॥ ४६ ॥ असौ दास्या ततोऽवादि सहासमिति योषिताम् । विलासलासत्वेन राज्ञाऽसि
त्वं नियन्त्रितः ॥ ४७ ॥ अथैष परमार्थेन मत्वाऽऽत्मानं नियन्त्रितम् । नगरान्निःससाराशु दिग्विलोक-
कृते कृती ॥ ४८ ॥ तेनाथ भ्रमता देशं विद्याभृद्भूभृतः (तां) सुताः । द्वासप्ततिः सहस्राणि कन्यकाः
परिणिन्यिरे ॥ ४९ ॥ दुर्लभा लेभिरे भोगाः प्राग्जन्मतपसाऽमुना । सौभाग्यमतिगंभीरं वसुदेवेन भूतले
॥ ५० ॥ आराधनां विधायान्ते विशुद्धध्यानमध्यगः । जगाम त्रैदशं धाम वसुदेवः क्षमापतिः ॥ ५१ ॥
एवं तपः सकलब्धिकरं निशम्य, श्रीनन्दिषेणमुनिराजनिदर्शनेन । भव्या भजध्वमिदमेव विशुद्धबुद्ध्या,
तद्भवन्ति भवतामपि संपदो यत् ॥ ५२ ॥

॥ इति वसुदेव (नन्दिषेण) कथानकम् ॥

उक्तं द्विचत्वारिंशत्तमं तपोद्वारं । अथ क्रमप्राप्तं भावमाह—

दानं वित्तव्ययेनापरयुवतिरतित्यागतः शीललीला,
नानाहाराप्रचारात्तप इह तदहो हृद्यपध्यानहीनाः ।
भावं कुर्वन्तु येनाप्यखिलसुखभृतां वल्कलस्येव मुक्ति-
र्मिष्टास्वादैर्यदि स्यान्ननु तनुपटुता को न तां कारयेत्तत् ॥ ८७ ॥

व्याख्या—वित्तव्ययेन द्रव्यव्ययेन दानं स्यात् । अपरयुवतिरतित्यागतः परस्त्रीभोगवर्जनात् शील-लीला स्यात् । नानाहाराप्रचारात् नानाविधाहारत्यागादिह लोके तपः स्यात् । तत्तस्मात् कारणाद्दान-शीलतपांसि पुष्कराणि अतो हे लोका अपध्यानहीना पुर्ध्यानरहिता हृदि भावं शुभध्यानरूपं कुर्वन्तु भवन्तः । तत्करणे फलमाह—येन भावेन च मुक्तिरभूत् भावस्य सुकरतां दृष्टान्तेन कृत्वाऽखिलसुख-भृतां समस्तसुखधारकाणां सतां जीवानां मुक्तिर्मोक्षो भवति । कस्येव वल्कलस्येव यथा वल्कलचीरि-नाम्नः सकलसुखभृतोऽपि भावेन मुक्तिरभूत् । भावस्य सुकरतां लौकिकदृष्टान्तेनाह—ननु निश्चितं मिष्टास्वादैर्मधुररसैर्यदि तनुपटुता शरीरपाटवं स्यात्तर्हि तां तनुपटुतां को न कारयेत् ? अपि तु सर्वोऽपि जनः कारयेत् तथाऽत्रापीति वृत्ताक्षरार्थः । भावार्थस्तु दृष्टान्तेनाह—

वल्कलचीरिकथा—

निःस्वत्ववारिधौ पोतः पोतनं नाम पत्तनम् । अभ्रंलिहैश्चैत्यशृङ्गैर्वक्रितार्करथायनम् ॥ १ ॥ सोमचन्द्रो नृपस्तत्राभिनवः कोऽपि चन्द्रमाः । विदधत्कुमुदोल्लासं निष्कलङ्कः कलोत्वणः ॥ २ ॥ गेहिनी देहिनी च श्रीर्धारिणी तस्य जूजृतः । प्रसन्नचन्द्रस्तत्सूनुरनूनः शर्मसंपदा ॥ ३ ॥ रहःस्थस्यान्यदा राज्ञो मूर्ध्नि केशान् विवृण्वती । प्रेक्ष्य प्रेतपतेर्दूततुलितं पलितं नु सा ॥ ४ ॥ ततोऽवादीदये दूत आगादथ निशम्य तत् । संभ्रान्तो जूजृदित्याख्यत् क्व स दूतः प्रिये वद ॥ ५ ॥ तयाऽदर्शि तदेवाथ पलितं स्वखलितश्रिया । विषादकलितः क्ष्माभृत् पलितालोकनादजूत् ॥ ६ ॥ राजाऽऽहाहो पूर्वजा मे सर्वेऽर्वाक् पलितोदयात् । परिजह्रुर्निजं राज्यं नास्मि तस्मिंस्तु सत्यपि ॥ ७ ॥ ततो राज्यं परिहरे द्रुतं जूजृदिति स्मरन् । बालं प्रसन्नचन्द्रं चानाय्य राज्येऽभिषिक्तवान् ॥ ८ ॥ वारिताऽपि नरेन्द्रेण वज्रताऽनुवज्रन्त्यथ । धारिणी धरणीनाथं ज्योत्स्ना चन्द्रमिवान्वगात् ॥ ९ ॥ नरनाथस्ततो गत्वा कानने सुन्दराननः । तपस्यामाश्रयत् पार्श्वे तापसानां च तापसीम् ॥ १० ॥ व्रतान्तरायजीत्याऽसावन्तर्वत्न्यपि धारिणी । न शशंस विशामीशं प्राव्राजीच्चात्र सत्यपि॥११॥क्रमेण वृद्धगर्भा सा प्रासूत तनयं ततः । प्रसवार्त्त्या मृता प्राप दिवं जूपतिवल्लभा ॥ १२ ॥ वल्कलैरावृतं बालमालोक्य खलु तापसाः । नाम्ना वल्कलचीरीति ते सर्वेऽपि बभाषिरे ॥ १३ ॥ धान्यैर्वानैः फलै रम्यैर्वर्धमानः क्रमादसौ । शैशवाद्युत्तरं प्राप वयो वल्कलचीर्यथ

१ वक्रीकृतः सूर्यरथमार्गो येन तत्. २ गर्भवती. ३ गर्भे. ४ वनसंबन्धिनिः.

॥ १४ ॥ भ्रातरं पितुरन्यर्णं प्रसन्नेन्दुर्निशम्य तम् । निस्सहायतयाऽऽत्मानमकृतार्थममंस्त च ॥ १५ ॥ सिंहपोतमिवानेतुमाह चाटु प्रलोभ्य तम् । दुःशीलमौलिमाणिक्यं गणिक्यं[1] स समादिशत् ॥ १६ ॥ गणिका ऋषिवेषेण संगतास्तापसाश्रमे । सितोपलाफलादीनि गृहीत्वा कुटिलाशयाः ॥ १७ ॥ अपश्यँस्ताः समायान्तं तं जन्मजटिलं मुनिम् । मत्वा वल्कलचीरीति ततस्तत्संमुखं ययुः ॥ १८ ॥ सोऽपि साधुधियाऽवादीत्तेषामित्यभिवादये । के यूयं क्वाश्रमो वोऽदो वदँस्ताभिः स भाषितः ॥ १९ ॥ वीतरागा वयं साधो स्थातारः पोतनाश्रमे । विलोकितुं तवातिथ्यमत्रागच्छाम सांप्रतम् ॥ २० ॥ सोऽप्यवादीत् फलान्येतान्याददीध्वं मुनीश्वराः । प्रोचुरेताः फलेष्विच्छा नीरसेष्वस्ति नो न हि ॥ २१ ॥ फलानां वर्णिकां पश्य पोतनाश्रमशाखिनाम् । इत्युक्त्वा प्राशयामासुस्तं मोदकसितोपलाम् ॥ २२ ॥ सोऽभूत्तत्स्वादमास्वाद्योद्विग्नो बिल्वफलादिषु । कारितश्चाङ्गसङ्गं ताः पृष्टवान् किमिदं मृदु ॥ २३ ॥ प्रोचुरेता मुनीशा ये पोतनस्य तपोवने । त ईदृङ्मार्दवोद्दामाः किं तपो यदमार्दवम् ॥ २४ ॥ ततस्त्वमप्यमुं साधो त्यक्त्वा निःश्रममाश्रमम् । पोतनाश्रममेत्यास्मन्मैत्रीं फलवतीं कुरु ॥ २५ ॥ इत्थं तेनोररीकार्यं तापसोपस्करानिमाः । संगोप्य निरयुस्तं तु गृहीत्वा बालकं मुनिम् ॥ २६ ॥ काँश्चित्तास्तापसान् वीक्ष्य दूरे तरुशिरःस्थितान् । तत्रसुश्च तदातङ्कात्त्यक्त्वा तत्रैव तं मुनिम् ॥ २७ ॥ संभ्रमी बंभ्रमीत्येष वनेषु मृगपोतवत् । रथिकं पथिकं वीक्ष्यावादीत्तातेति वादये ॥ २८ ॥ इतस्ततो मुने भ्राम्यँस्त्वं क्व गन्तेति भाषितः ।

---

१ गणिकासमूहम्. २ तद्भजेयात्.

सोऽवादीत्तात याताहं पोतनस्य तपोवने ॥ ३९ ॥ यियासुरस्मि तत्रापीत्युक्त्वाऽसौ रथिना रथे । आरोपितः स मार्गेऽवक् तात तातेति तत्प्रियाम् ॥ ३० ॥ रथी वशीकृतोऽनेनार्जवेनातिजवेन सः । मोदकान् ददे सोऽपि तानास्वाद्य जगाविदम् ॥ ३१ ॥ अहो ज्ञातानि तान्येव फलानि यान्यवासवान् । पोतनाश्रमवृक्षाणां तदानीतान्यहं तदा ॥ ३२ ॥ तदीयैर्वचनैरेवं विस्मितो रथिकः पथि । क्रमेण पोतनं प्राप्य तं मुक्त्वा तत्र सोऽचलत् ॥ ३३ ॥ इतस्ततो भ्रमन् बालमुनिर्वेश्यागृहेऽगमत् । प्रत्यभिज्ञाय सा तं च गृहान्तः प्राविशद्द्रुतम् ॥ ३४ ॥ नखादिकल्पनान्यङ्गौ तं नेतुन्तमकारयत् । सोऽपि सर्वसहः सेहे तत्कृतान्युपसर्गवत् ॥ ३५ ॥ वश्यः सन् वेश्ययाऽकारि स्वपुत्र्याः पाणिपीडनम् । मेने मुनिजनानन्दि तदातिथ्यमयं मुनिः ॥ ३६ ॥ तदा मङ्गलगानान्यश्रौषीद्राजा गवाक्षगः । स्माहेदृग्यस्य तूर्यश्रीर्धन्यः सोऽयमलौकिकः ॥ ३७ ॥ तदा कश्चिज्जगादेति वेश्यावेश्मस्वयं ध्वनिः । तज्ज्ञस्तदैव तां वेश्यामाकार्याख्यत् क्षितीश्वरः ॥ ३८ ॥ किमेषा वद तूर्यश्रीः स्माह सा बालसाधवे । दैवज्ञवार्तयाऽदायि मया देव तनूरुहा ॥ ३९ ॥ तद्विवाहऋणेनाद्य ऋणोऽकारि मया नृप । तदज्ञानात् कृतं सर्वं क्षमाधीश क्षमस्व मे ॥ ४० ॥ कर्णयोर्माकर्ण्य तां वार्तां तस्या वेश्मागतो नृपः । उपलक्ष्यानुजं चक्रे तद्विवाहमहामहम् ॥ ४१ ॥ अथादित्योदयेऽनैषीत्सौधे स्वे तं धराधिपः । विवत्सङ्गादभूदेषोऽचिरेण व्यवहारवित् ॥ ४२ ॥ अथान्याः कन्यका राज्ञः परिणाय्य विधाय च । युवराजमिमं भूपस्ततः स्वमकृतार्थयत् ॥ ४३ ॥ अथ द्वादशवर्षा-

१ अन्तर्भावितण्यर्थत्वात्प्रावेशयत्. २ मनोहराम्.

न्तेऽन्यदा भूमिभृतो मुदा । अङ्काऽऽत्तीर्थं पुत्रोऽगादङ्के वल्कलचीरिणः ॥ ४४ ॥ बालं ललन्तमालोक्य स्वीयं सस्मार शैशवम् । अथ तातमपश्यत्स कृतार्थं स्वममंस्त च ॥ ४५ ॥ निष्पुण्योऽहमधन्योऽहमकृतज्ञोऽस्मि निर्दयः । तिष्ठामि निष्ठुरोऽत्राहं तातं विस्मार्य संयतम् ॥ ४६ ॥ चिरं चित्ते विचिन्त्येति पितरं द्रष्टुमुत्सुकः । निजगाद प्रसन्नेन्दुमेवं वल्कलचीर्यथ ॥ ४७ ॥ युग्मम् ॥ भ्रातः प्रातरहं तातं प्रणिपत्यैव भोजनम् । करिष्ये नान्यथा तत्र प्रेषणेन प्रसीद तत् ॥ ४८ ॥ भूपस्तस्येति विज्ञप्त्योत्कण्ठितः स्वयमप्यसौ । जगाम सानुजः शीघ्रं मुदितस्तत्तपोवने ॥ ४९ ॥ मुमुदे वीक्ष्य वृक्षादि स्वीयं वल्कलचीर्यथ । दृष्ट्वोटजं ततस्तान्यां प्रणिपेते पिता मुदा ॥ ५० ॥ तदा कवोष्णहर्षाश्रुवारा सोमर्षिणा ततः । प्रह्वादितः क्षणादेष वल्कली क्रोडसंस्थितः[2] ॥ ५१ ॥ पश्यन्नितस्ततः सोऽथ तापसोपस्करांस्तदा । गोपितान् पर्णशालान्तर्वीक्ष्यागात् प्रतिलेखितुम् ॥ ५२ ॥ सरजस्कान् स्वोत्तरीयाञ्चलेन प्रतिलेखयन् । पूर्वमेवं कृतं क्वाप्यूहातः प्राग्जातिमस्मरत् ॥ ५३ ॥ पूर्वे भवेऽहं श्रामण्यं कृत्वा स्वर्गे गतस्ततः । च्युत्वोत्पन्नोऽत्र सोऽबोधि तदा जातिस्मृतेरिति ॥ ५४ ॥ धिङ्मां हा हारयामीहाध्यास्य बोधिसुधां मुधा । इति ध्यायन्नबोध्येष स श्रामण्यं यथातथम् ॥ ५५ ॥ क्षान्त्यादिदशधा धर्मं बुद्ध्वा संवेगमागमत् । ध्यानाग्निदग्धकर्माथ वल्कली प्राप केवलम् ॥ ५६ ॥ ततो विरचयामासुर्हेमाब्जं निर्जरेश्वराः । भूयो रोमाञ्चिताङ्गास्तेऽस्याकार्षुः केवलोत्सवम् ॥ ५७ ॥ उपादेदेट् तदासीनो वल्कली धर्ममार्ह-

१ विस्मृत्येति साधु, २ उत्संगस्थितः.

तम् । सोमचन्द्रप्रसन्नेन्दोः पुरस्तात् प्राप्तकेवलः ॥ ५८ ॥ अहो असारसंसारसागरे परिभ्रमताम् । जैनं धर्मं विहायान्यच्छरणं न शरीरिणाम् ॥ ५९ ॥ श्रुत्वेति तौ प्रबुद्धावाश्रयतां धर्ममार्हतम् । कालेन सिद्धिसौधं सोऽध्यास्त कर्मलवोज्झितः ॥ ६० ॥ एवं विज्ञाय भव्याश्चित्ते भावप्रज्ञावसंभारम् । तेन भवन्तु भवन्तः सुदृढाः सिद्धीच्छयैव ॥ ६१ ॥

॥ इति वल्कलचीरिकथा ॥

भूयोऽपि भावप्रज्ञामाविर्भावयति—

यो दानं न ददौ कथैव न तपःशीलार्हदर्चागमे,
यस्यानार्ययुजोऽत्र केवलमभूद्भावादिलानन्दने ।
स्वर्णादौ ज्वलनेन वह्निदृषदोर्बाढं मिथो घट्टनै-
रादर्शे रविणा महौषधिवने किंतु स्वभावेन सा ॥ ७८ ॥

व्याख्या—य इलानन्दनो दानं न ददौ । कथैव तपश्च शीलं चार्हदर्चा चागमश्चेति द्वन्द्वः तत्रापि यस्यानार्ययुजो दुष्टजनयुक्तस्य सतो नाभूत् शिथिलोऽभूदिति भावः । तस्मिन्निलानन्दने भावादेव केवलमभूत् केवलज्ञानमुत्पन्नं । एतदेवाह—स्वर्णादौ ज्वलनेन सा प्रज्ञा स्यात् वह्निदृषदोरग्निपाषाणयोर्बाढं

मिथो घट्टनैः परस्परास्फालनैर्ना स्यात् । आदर्शे रविणा ना स्यात् । किं तु परं महौषधिवने स्वनावेनैव ना नवति । तथा दानशीलतपोनिर्नावयुक्तैरेव सिद्धिर्नवति, नावेन तु केवलेनैवेति नावः । इति वृत्ताक्षरार्थः । नावार्थस्तु कथया कथ्यते—

इलापुत्रकथा—

नाम्नेलावर्धनं ऋङ्गमिलामंमलमण्कनम् । तस्मिन्निलानिधानेन संजज्ञे श्रेष्ठिपुङ्गवः ॥ १ ॥ इलापुत्र इति ख्यातोऽजनिष्टास्य तनूरुहः । सोऽन्यदा बहिरुद्याने जगाम च रिरंसया ॥ २ ॥ काञ्चित्तत्रैव खेलन्तीं वीक्ष्यासौ लंखकन्यकाम् । सानुरागोऽजनिष्टाथ तस्यां लावण्यवेश्मनि ॥ ३ ॥ ऊव्यं बहु प्रदास्यामि दत्त मह्यं कनीमिमाम् । एवं जल्पन्निलासूनुर्लंखमुख्येन जल्पितः ॥ ४ ॥ अव्ययः शेवधिर्नोऽसौ तद्मो न घनैर्धनैः । यदीच्छा स्यान्नटीनूय तदस्मान्निः सहैहि च ॥ ५ ॥ कुलं शीलं तथा लज्जां त्यक्त्वाऽगादेष तैः समम् । को विवेकः स्मराग्नौ यत्प्रदीप्ते हृत्तृणौकसि ॥ ६ ॥ अचिरेणाप्ययं नृत्यमेतेषामशिषत्ततः । नटैः सममटन्नैष ययौ बेनातटेऽन्यदा ॥ ७ ॥ लंखेनैष तदाऽवादि विवाहाय स्वमर्जय । ततः स नूपतेः पार्श्वे गतः सर्वैर्नटैर्युतः ॥ ८ ॥ गवाक्षं क्ष्मापतिर्देव्या समलङ्कृतवान् समम् । अभ्रंलिहस्तत्र वंशो निखातस्तत्पुरोऽमुना ॥ ९ ॥ सज्जीचक्रे च वंशाग्रे तिर्यक्काष्ठं सकीलकम् । पादुके परिधायाथ तत्रारोहदिलासुतः ॥ १० ॥ खड्गखेटकनृच्चारीसूत्रस्थोऽदादयं ततः । नूपेऽददति तुष्टोऽपि कोऽपि

१ नटकन्याम्. २ अक्षयः.

किञ्चिन्न यच्छति ॥ ११ ॥ प्रत्युताचिन्तयद्भूपो लंखकन्यानुरागतः । वंशाग्रतः पतत्येष यदि तत्स्यान्नटी मम ॥ १२ ॥ ध्यात्वेति न्यगदद्भूपो व्यग्रचित्तेन नो मया । दृष्टा न चारिका तेन नटेयं दीयतां पुनः॥ १३ ॥ ऊव्यबुध्यो ददौ नृपश्चारिकां स नृपाज्ञया । लेजे न किञ्चित् कृत्वैवं चतुष्कृत्वोऽपि नृपतेः ॥ १४ ॥ वंशसंस्थित एवाथ त्रस्तराग इलासुतः । चित्ते व्यचिन्तयच्छिक्षामजितेन्द्रियमीदृशम् ॥ १५ ॥ वेधाऽधः कृतवंशेन नृत्यं नित्यं कृतं मया । श्रममाप परं कीर्तिः पूर्वजानां गुरुर्भुवि ॥ १६ ॥ एवं विचिन्तयन्नेष वेश्मनीन्यस्य कस्यचित् । प्रतिलाभ्य मुनीन् स्त्रीभिर्वन्द्यमानान्निरैक्षत ॥ १७ ॥ दध्यौ च साधवो धन्या येषामीदृङ्मृगीदृशः । मनःक्षोभाय नैवात्र प्रभवन्ति कदाचन ॥ १८ ॥ अहं तु संपरित्यज्य साधुवादं सह ह्रिया । अज्ञो जङ्गेऽत्र नीचस्य कन्यायामपि रागवान् ॥ १९ ॥ स्वमेवं निन्दतोऽथास्य विषयेषु विरागिणः । घातिकर्मक्षयात् प्रादुरासीत्केवलमद्भुतम् ॥ २० ॥ गृहीत्वा देवतादत्तं लिङ्गं चोत्तीर्य वंशतः । पद्ममध्यास्त हैमं स विधित्सुर्भव्यबोधनम् ॥ २१ ॥ जिनोदितं ततः श्रुत्वा धर्मं सन्त्या नृपादयः । इत्यब्रुवन्मुने रागो नश्यां ते किंनिबन्धनः ॥ २२ ॥ बभाषे केवली विप्रः श्रीवसन्तपुरेऽभवम् । बभूव प्रेयसी तत्र जन्मन्येषा तु मे प्रिया ॥ २३ ॥ प्रतिपन्नौ तदा काले श्रावप्यार्हतं व्रतम् । जातेर्मदं न तत्याज सुश्रामण्यधराऽप्यसौ ॥ २४ ॥ समाधिना विपद्यावां जज्ञाते दिवि निर्जरौ । ततश्च्युतोऽथ जातोऽहं श्रेष्ठिपुत्रोऽत्र जन्मनि ॥ २५ ॥ जाता जातिमदादेषा स्वर्गाच्च्युत्वा नटाङ्गजा । कामं रागो ममामुष्यां ततो दृढतरोऽभवत् ॥ २६ ॥ श्रुत्वेति जातिस्मृतिमाप्य साऽपि नटाङ्गजा केवलमापदाशु । धराधिराजस्य

तदङ्गनाया, जातं तदा केवलमुज्ज्वलं च ॥ २७ ॥ एवं सम्यग् निशम्यात्र भावं केवल्यकारणम् । तथा कुर्वन्तु यदः स्यात् (स्युः) तदत्कैवल्यसंपदः ॥ २८ ॥

॥ इति इलापुत्रकथा ॥

एवं दानादिधर्मप्रभावमाविर्भाव्य सांप्रतं सर्वधर्मप्रभावं प्रकटयति—

मातुर्गर्भावतारे चतुरधिकदशस्वप्नसंसूचितौ प्रा-
ग्जातौयावेकरात्रावजितसगरयोः पुण्ययोः पश्य जातिम् ।
आगर्भोत्पादमिन्द्रैरसुरसुरनरैः सेवनीयस्त्रिलोकी-
नाथोऽर्हन्नेक आसीद्भरतनृपनतोऽन्यश्च चक्री द्वितीयः ॥ ८९ ॥

व्याख्या—यावजितसगरौ प्राक् प्रथमं मातुर्गर्भावतारे चतुरधिकैर्दशभिः स्वप्नैः संसूचितौ प्रख्यापित-सौभाग्यौ एकरात्रौ जातावुत्पन्नौ । यत्तदोर्नित्याभिसंबन्धात् तयोरजितसगरयोः पुण्ययोर्जातिं पश्य हे भव्येति शेषः । तामेवाह—तयोर्मध्ये एकः श्रीअजितस्त्रिलोकीनाथो द्वितीयोऽर्हन्नभूत् । किंभूतः ? आगर्भोत्पादं गर्भोत्पादादारभ्येन्द्रैरसुरसुरनरैः सेवनीयः । अन्यः सगरश्च द्वितीयश्चक्री आसीत् । किंविशिष्टः ? भरतनृपनतो भरतक्षेत्रवर्तिनृपनत इत्यक्षरार्थः । भावस्त्वयं—

श्रीअजितसगरयोः संबन्धः—

अयोध्यायां जितशत्रो राज्ञो राज्ञ्या विजयायाः कुक्षिकमले चतुर्दशस्वप्नसूचिततीर्थंकृद्देवः स्वर्गाच्युतः श्रीअजितजिनजीवो यदाऽवतीर्णस्तदानीमपि तत्पुण्यात् कृष्टा बहवो देवास्तं सेवन्ते स्म। तथा पूर्वं राज्ञी राज्ञा समं द्यूते क्रीडन्ती जिताऽपि तदा गर्भानुभावेन तेन न जीयते। ततो राज्ञा जातजन्मनो जिनस्याजितेति नाम कृतं। ततश्च क्रमेण प्राप्तयौवनः परिणीतबहुराजकन्यः सुचिरं पालितराज्यः तत आत्तव्रतः क्रमात् प्राप्तकेवलज्ञानः सुरेन्द्रनिर्मिताष्टमहाप्रातिहार्यविराजमानः प्रकाशितसकललोकस्वरूपः कृतसमस्तकर्मान्तः सम्मेतशिखरिणि सिद्धिवधूं पर्यणैषीत् द्वितीयजिनः। तथा विनीतायां पुरि श्रीसुमित्रधात्रीशवह्मज्ञायशोमतीकुक्षिसंभूतः चतुर्दशस्वप्नाख्यातचक्रितेन्दिरः श्रीसगरः क्रमेण प्राप्तचक्ररत्नतत्पुरस्कारसाधितसमस्तभरतखण्डवर्तिभूपतिप्रवृत्तचक्रित्वाभिषेको द्वितीयश्चक्री बभूव। ततस्त्यक्तराज्यो लब्धदीक्षो मोक्षमाप्तवान्। इति ग्रन्थगौरवभयेन क्लेशतः श्रीअजितसगरयोः संबन्धोऽभिहितः। विस्तरार्थिना तु श्रीअजितचरित्रतोऽवसेयः॥

॥ इति श्रीअजितसगरयोः संबन्धः॥

पुनर्धर्मफलं प्रकारान्तरेणाह—

तुल्यं तीर्थाधिपत्यं बलमपि सदृशं सर्वतीर्थंकराणां,
किंतु श्रीमल्लिनाथः प्रथयति सुकृतैः किञ्चिदाश्चर्यमुच्चैः।

पूर्वाह्णे यस्य जज्ञे व्रतमपि सुलभं केवलं चापराह्णे,
ज्ञानं नाभेयवीरप्रभृतिजिनपतेरप्यभूद्यच्चिरेण ॥ ९० ॥

व्याख्या—सर्वतीर्थंकराणां तीर्थाधिपत्वं तुल्यं, अपि पुनर्बलं वीर्यं सदृशं, किंतु परंतु श्रीमल्लिनाथः सुकृतैः पुण्यैः कृत्वा किञ्चिदाश्चर्यमुच्चैरतिशयेन प्रथयति विस्तारयति । तदेवाह—यस्य श्रीमल्लिनाथस्य पूर्वाह्णे प्रथमयामे व्रतं जज्ञे, अपि पुनरपराह्णे केवलं जज्ञे, यज्ज्ञानं नाभेयवीरप्रभृतिजिनपतेश्चिरेणापि चिरकालेनाप्यभूत् इत्याश्चर्य इति समासार्थः । विस्तरार्थः कथया कथयति (मल्लिनाथकथा)—

जम्बूद्वीपेऽत्र सत्प्रत्यग्विदेहोर्वीविभूषणम् । स्थानं सर्वश्रियो नाम्ना विजयः सलिलावती ॥ १ ॥ वीतशोका पुरी तत्र सान्वयाख्या मनोरमा । नृकथा श्रूयते यस्यामिव पौराणिकी कथा ॥ २ ॥ तस्यां प्रचण्डदोर्दण्डबलाकृष्टद्विषद्बलः । नाम्ना बलः क्षमापालः पालयामास नृस्पृशः[1] ॥ ३ ॥ सारिणी स्नेहवृक्षस्य त्रिलोकहितकारिणी । हारिणी चेतसोऽस्याभूद्भारिणी सहचारिणी ॥ ४ ॥ महाबलाख्यया तस्य तनुजोऽजनि विश्रुतः । कलाकलापसंपूर्णः शशीव सरितां पतेः ॥ ५ ॥ कमलश्र्यादिभिः पित्रोर्घाहिताग्निः कुमारराट् । रेमे युवतिभिर्गोपाङ्गनाभिरिव केशवः ॥ ६ ॥ षभेते सुहृदस्तस्य धरणः पूरणोऽचलः । वसुवैश्रवणश्चाथाभिचन्द्र इति नामभिः ॥ ७ ॥ कुमारस्तैः समं कालं रममाणोऽत्यगाद्घनम् । इतश्च भूपतिः

---

१ मनुष्यान्.

प्राप्तव्रतः शिवमवाप सः ॥ ८ ॥ अभिषिक्तस्ततो राज्ये मन्त्रिभिः स महाबलः । अपालयत्तथा राज्यं यथाऽनीतिः क्षयं गता ॥ ९ ॥ जगिन्यो विश्ववर्तिन्यो जामिन्योऽस्याखिला यतः । तद्भागिनेयं त्रैलोक्यं स्थानेऽपुष्यन्महाबलः ॥ १० ॥ अन्येद्युर्बहिरुद्यानेऽगमन्मित्रैः समं स तैः । वरधर्ममुनिं चात्राऽद्राक्षीदूर्ममिवाङ्गिनम् ॥ ११ ॥ लघुकर्मतया भूपः समित्रो मुदितस्ततः । प्राणंसीत्तं मुनिं सोऽपि दत्ताशीरिदमभ्यधात् ॥ १२ ॥ राजन्नसारसंसारकान्तारे भ्राम्यतां सताम् । देहिनां न विना धर्मं शरणं मृगपोतवत् ॥ १३ ॥ धर्मोऽर्हद्भिर्द्विधा प्रोक्तः साधुश्राद्धविभेदतः । तत्राद्यो दशधा क्षान्त्यादिकः साधुषु संस्थितः ॥ १४ ॥ श्रद्धाबन्धुरबुद्धीनां श्रद्धालूनां जिनोत्तमैः । उपादेशि च सम्यक्त्वमूलः सद्दादशव्रतः ॥ १५ ॥ मुख्योऽत्रासौ मोक्षदः स्तोककालेन तु व्राजिनाम् । अपरश्चिरकालेन महानन्दप्रदो मतः ॥ १६ ॥ निशम्येति धराधीशो विरक्तो भवबारिधेः । कृताञ्जलिपुटः साधुमभ्याशिष्टेति शिष्टधीः ॥ १७ ॥ मुमुक्षोऽपारसंसारपारावारतरीसमाम् । देहि दीक्षां महाशिष्यां (क्षां) जैनीं सद्यः प्रसद्य मे ॥ १८ ॥ बलभद्रे सुते न्यस्तनिजराज्यं महाबलम् । सुहृद्भिस्तैः समं षड्भिः स मुनिस्तमदीक्षत ॥ १९ ॥ मुनयस्तेऽथ सप्तापि क्रमाज्जज्ञुर्बहुश्रुताः । तप्यन्ते स्म तपोऽत्युग्रं नित्यं स्वर्गापवर्गदम् ॥ २० ॥ सुविशिष्टफलाभीप्सुः पारणाया दिनैऽप्यसौ । पारयामास नो रोगादिमिषेण महाबलः ॥ २१ ॥ एवं स मायया नित्यं तपस्यन् शस्यशक्तिभृत् । उपार्जयत्तरां कर्म स्त्रीवेद इति विश्रुतम् ॥ २२ ॥ अर्हद्भक्तिमुखैरेष विंशत्या स्थानकैः क्रमात् । विधिचीर्णैस्तीर्थकरनामकर्मार्जयत् स्फुटम् ॥ २३ ॥ ते साधवोऽथ सप्तापि विधायान-

शनं मृताः। विमाने वैजयन्त्या(न्ता)ख्ये बभूवुस्त्रिदशोत्तमाः ॥ २४ ॥ जम्बूद्वीपान्निधद्वीपन्नरतेऽस्ति श्रिते श्रिया। नगरी मिथिला यत्र न धर्मे शिथिला जनाः ॥ २५ ॥ वनेऽप्यनेकशो रम्भा यस्यां च बहवो बुधाः। गुरवोऽपि घनाः सन्ति तत्तुल्या कामरावती ॥ २६ ॥ कुम्भ इत्यभवद्भूपस्तस्यामश्यामकीर्तिभृत्। सद्वृत्तः कामदो नृणां कामकुम्भ इवोत्सवः ॥ २७ ॥ स्थिरोऽपि विश्वविश्वस्य परिभ्रमणतत्परः। शीतलोऽपि सतां द्वेषियोषित्संतापकोऽधिकम् ॥ २८ ॥ विशदोऽपि सदा कुर्वन्मुखानि मलिनान्यरेः। वृद्धोऽप्याशावशावक्त्रचुम्बने चतुराशयः ॥ २९ ॥ एकोऽपि सुतरां लोकत्रितयव्यापनक्षमः। रेजे गुणगणो यस्य प्रशस्यः श्लाघतेऽन्वहम् ॥ ३० ॥ त्रिभिर्विशेषकम् ॥ बभूव महिषी प्रेमवती तस्य प्रभावती। पीनस्तनी परं चित्रं खलासक्तिपराङ्मुखी ॥ ३१ ॥ जीवो महाबलस्याथ पूर्णायुः स्वर्गतश्च्युतः। फाल्गुनान्त्यचतुर्थ्यां स तस्याः कुक्षाववातरत् ॥ ३२ ॥ महाबलभवे माया ही तपोविषयाऽपि सा। कृता जाता तदा स्त्रीत्वदायिकाऽर्हन्नवेऽप्यहो ॥ ३३ ॥ चतुर्दशमहास्वप्नविज्ञप्तजिनसंभवा। सुखं सुखेन सा देवी तं गर्भमवहद्बुभम् ॥ ३४ ॥ मासासीत्तृतीये तस्या माद्ये शयनदोहदः। अपूर्यत तदप्याशु नित्यसेवापरैः सुरैः ॥ ३५ ॥ मार्गशीर्षस्य विंशदैकादशीवासरे शुभे। देव्यसूत सुतां कल्पलतां वा नन्दनावनिः ॥ ३६ ॥ दिशः प्रसन्नतां प्राप्ता मरुतोऽपि शुभा ववुः। आस्तामन्यो जनोऽशेषो हृष्टा नैरयिका अपि ॥ ३७ ॥ दिक्कुमार्यस्तदाऽऽगत्य षट्पञ्चाशदपि द्रुतम्। विदधुः सूतिकर्माणि सर्वाणि मुदितास्ततः ॥ ३८ ॥ निर्ज-

१ मासे.

राधीश्वराः सर्वे जिनजन्ममहामहम् । हेमाद्रौ विदधुर्नक्त्योल्लसद्रोमाञ्चकञ्चुकाः ॥ ३९ ॥ पूजयित्वा तथा नत्वा स्तुत्वा मुक्त्वा च वासवः । तं जिनं जननीपार्श्वे स्वीयं स्थानं जगाम च ॥ ४० ॥ ततः पित्रा कृतं वर्धापनं पुत्रोज्ञवाधिकम् । तस्याः स दोहदेनाथ मल्लिरित्यभिधां व्यधात् ॥ ४१ ॥ धात्र्युत्सङ्गगता नित्यं पयोऽभिरधिकाधिकम् । वृद्धिमासादयन्मल्लिर्वल्लिवद्घातवर्जिता ॥ ४२ ॥ धनुषां पञ्चविंशत्या तनुमानमभूत् क्रमात् । तस्यास्तु पुण्यतारुण्यं तदा द्युतिमनोरमम् ॥ ४३ ॥ इतश्च भरतेऽत्रैव श्रीमत्साकेतपत्तने । स्वर्गाच्च्युत्वाऽचलस्यात्मा प्रतिबुद्धिर्नृपोऽजनि ॥ ४४ ॥ क्रीडन् वनेऽन्यदा पद्मावत्या सप्रियया समम् । तद्गुणै रञ्जितो मन्त्रिपुरस्तद्रूपमस्तवीत् ॥ ४५ ॥ ततो मन्त्री नृपं प्राह राजन् विश्वेऽपि तादृशी । न कुंभभूभुजो मल्लिसंज्ञा कन्याऽस्ति यादृशी ॥ ४६ ॥ या वीचिमालिनो वीचिमालां सङ्ख्यातुमक्षमाः । बुधानां बुद्धयोऽतोऽलं ताः किं तद्रूपवर्णने ॥ ४७ ॥ सुबुद्धिमन्त्रिणो वाचमिमां श्रुत्वा स राज्यभूत् । मल्लिं वरीतुं श्रीकुंभान्ते प्रैषीद्दूतमात्मनः ॥ ४८ ॥ अथो धरणजीवोऽपि चंपायां स्वर्गतश्च्युतः । चन्द्रच्छायोऽभवद्रूपश्चन्द्रच्छायेव सुन्दरः ॥ ४९ ॥ पुर्यां तस्यां नयो नाम्ना श्राद्धो वसति सोऽन्यदा । वाणिज्यार्थं गतो पोतमारुह्य सरितां पतौ ॥ ५० ॥ चक्रे शक्रेण तस्यार्हद्धर्मस्थैर्यप्रशंसनम् । तदैकोऽश्रद्दधद्देव आगतस्तं परीक्षितुम् ॥ ५१ ॥ तत्पोतमाकुलीकृत्य स्फुरत्कल्पान्तवायुना । स आकाशस्थितोऽवादीद्दिवि तं श्रेष्ठिनं प्रति ॥ ५२ ॥ चेत्त्यजस्यार्हतं धर्मं त्वत्पोतं तत्सुखं नये । अगाधवारिधौ नो चेन्मज्जयिष्याम्यमुं जवात् ॥ ५३ ॥ श्रेष्ठ्याचख्यौ हृणध्वंसिस्वप्राणत्राणहेतवे । कः कुधीः कुरुते नित्यं सातकृद्भ्र-

तखण्मनम् ॥ ५४ ॥ इत्यक्षुब्धमनोवृत्तेः प्रत्यक्षीभूय तस्य सः । जगौ श्लाघा यथेन्द्रेण कृता ते त्वं तथाऽसि भोः ॥ ५५ ॥ वदँश्चैवं स मोघं हि न स्यात्त्रिदशदर्शनम् । स्वर्गं जगाम दत्त्वाथास्य कुण्डलचतुष्टयम् ॥ ५६ ॥ नयोऽपि कुशलेनागान्मिथिलां नगरीं ततः । दिव्यं कुण्डलयुग्मं च कुढौके कुंभभूभुजः ॥ ५७ ॥ मल्लेस्तत्र स्थितायाः स परिधानार्थमार्पयत् । क्रयाणकं तु विक्रीय श्रेष्ठी चम्पामवाप सः ॥ ५८ ॥ चम्पेशितुरढौकिष्टान्यत्स कुण्डलयोर्युगम् । तद्वाभवृत्तमप्राक्षीत्स विस्मितमना नयम् ॥ ५९ ॥ कुण्डलचतुष्टयस्य प्राप्तिमुक्त्वा नयोऽप्यथ । श्रीमन्मल्लेः प्रसङ्गेनासदृरूपं रूपमस्तवीत् ॥ ६० ॥ श्रुत्वाऽपीति वचस्तस्य प्राग्जन्मस्नेहतोऽभवत् । रागी तद्धरणायासौ प्रैषीत् कुम्भान्तिके जनम् ॥ ६१ ॥ पूर्णजीवोऽपि पूर्णायुः श्रावस्त्यां स्वर्गतश्च्युतः । रुक्मी राजाऽभवत्तस्य धारिणी सहचारिणी ॥ ६२ ॥ प्रशंसन् धारिणीरूपं मन्त्रिणाऽज्ञाणि भूपतिः । कुंभभूमल्लिरूपात्तु लक्षांशेनापि नात्र तत् ॥ ६३ ॥ प्राच्यप्रेमवशाद्रुक्मी तच्छ्रुत्वाऽप्यनुराग्यभूत् । दूतं च प्राहिणोन्मल्लिं वरीतुं कुंभसन्निधौ ॥ ६४ ॥ च्युत्वाऽथ वसुजीवोऽपि विमानाद्विजयन्ततः । वाराणस्यां पुरीशोऽभूत् शंखः शंखशुभाशयः ॥ ६५ ॥ श्रीमल्लेरन्यदा दिव्या सा भग्ना कुण्डलद्वयी । तत्समारचने स्वर्णकारानादिशदीशिता ॥६६॥ नादेवशक्तयस्ते स्युस्तत्समारचने क्षमाः । ततः कोपान्निरस्तास्ते स्वपुरात्कुंभभूभुजा ॥ ६७ ॥ वाराणस्यामगुस्तेऽथ पृष्टाः शंखेन भूभुजा । कुतः समागताः प्रोचुः स्वस्वरूपमथाप्यमी ॥ ६८ ॥ चक्रुश्च ते प्रसङ्गेन श्रीमल्ले रूपवर्णनम् ।

---

१ असमानम्.

रागी शंखो वुवूर्षुस्तां प्रैषीत्कुंजान्तिके नरम् ॥ ६९ ॥ जीवो वैश्रवणस्यापि च्युतो गजपुरे ततः । अदीन-
शत्रुरित्यासीदहीनशत्रुर्नरेश्वरः ॥ ७० ॥ श्रीमल्लेरनुजन्माथ मल्लाख्यश्चित्रशालिकाम् । विधाप्य विविधैश्चि-
त्रैश्चित्रकृच्चिरचित्रयत् ॥ ७१ ॥ तेष्वेकश्चित्रकृच्चैकाङ्गस्य संदर्शने सति । सर्वाङ्गचित्रलब्धिः सोऽपश्यन्मल्लेः
पदाङ्गुलीम् ॥ ७२ ॥ आलिखत्तत्समग्रं स मल्ले रूपं यथातथम् । रन्तुं तत्रागतो मल्लो हीणः साक्षादिवैक्ष्य
ताम् ॥ ७३ ॥ चित्रमित्युदिते धात्र्या क्रुद्धश्चित्रकरस्य सः । कर्तयित्वा ततः पाणिसन्दंशं तं निरस्तवान्
॥ ७४ ॥ ततो गजपुरे सोऽगात् पृष्टश्चादीनशत्रुणा । श्रीमल्लीमल्लिरूपादि सर्वं तस्मै स शस्तवान् ॥ ७५ ॥
सोऽपि प्राग्यजनिप्रेमवशाद्भाग्यजनि द्रुतम् । श्रीमल्लिवरणाय स्वं कुंजान्ते प्राहिणोन्नरम् ॥ ७६ ॥ अथ
जीवोऽजितचन्द्रस्य च्युतस्तस्माद्विमानतः । कांपील्यनगरे नाम्ना जितशत्रुर्नृपोऽजनि ॥ ७७ ॥ मिथिला-
पुरि चोद्राख्या तापसी स्वं वृषं स्फुटम् । वदन्त्यन्तःपुरे मल्ल्या विजित्यैषा निरासिता ॥ ७८ ॥ सा
कांपील्यपुरेऽत्रास्याग्रे मल्ले रूपमस्तवीत् । रागी तथैव दूतं स तत्र प्रैषीच्च तत्कृते ॥ ७९ ॥ मल्लिः प्राक्-
सुहृदां षण्णां बोधं बुध्वाऽवधेस्ततः । स्वतुल्यां षण्मुखे धिष्ण्ये हैमीं पुत्रीमचीकरत् ॥ ८० ॥ तस्यास्ता-
वुत्थरन्ध्रे सा सर्वाहारस्य पिंडिकाम् । प्रक्षिप्यास्थगयदन्ध्रं कनकाब्जेन संततम् ॥ ८१ ॥ इतश्च जृम्भजां
दूतास्ते कुंजनृपतेः पुरः । स्तुत्वा स्वं स्वं प्रभुं मल्लिं तत्तदर्थं ययाचिरे ॥ ८२ ॥ सुरैरपि न मे प्राप्या
कन्या तत्कुनृपैः कथम् । इत्युक्त्वा तेऽखिला दूता दूरिताः कुंजजृम्भृता ॥ ८३ ॥ दूतैस्तैः कुपितैः

१ हीनाः शत्रवो यस्मात्सः २ उक्तवान्. ३ जनिर्जन्म. ४ गृहे. ५ पुत्तलिकाम्.

स्वस्वस्वामिन्यः कुंजजाषितम् । ऊःश्रवं श्रावितं तेऽथ कुब्जाः सर्वे धराधवाः ॥ ८४ ॥ अमी समापमानेन मिथित्वा षमपि क्रमात् । क्षापालाः सबलाः प्राप्य रुरुधुर्मिथिलापुरीम् ॥ ८५ ॥ कुंजजूपमथो मल्लिः पूरोधात् खिन्नमित्यवक् । तातैतेषां नरान् राज्ञां प्राहिणु स्वान् पृथक् पृथक् ॥ ८६ ॥ अदोऽन्निधापयेश्चेमान्मल्लिर्वो दास्यते मया । सायमेकाकिन्निस्तेनागम्यं श्रीमन्निरत्र नोः ॥ ८७ ॥ हैमपुत्रीगृहे तेऽत्र त्वया तात समागताः । प्रवेश्या युगपत्सर्वे द्वारेणात्र पृथक् पृथक् ॥ ८८ ॥ तथा चक्रे नृशक्रेण तेषामागन्नतां ततः । हैमी सा पुत्रिकाऽदर्शि मल्ल्या दृकूतोषपोषकृत् ॥ ८९ ॥ ते विस्मिता यतः न्निऊपिधानं तालुदेशगम् । मल्लिर्व्यपानयत्तस्माद्दुर्गन्धो ऊःसहोऽजनि ॥ ९० ॥ मुखं विकूणयामासुस्तेऽथ मोटितनासिकाः । श्रीमल्लिर्मधुरारावा तेषामेवमुपादिशत् ॥ ९१ ॥ हेममय्या अप्यमुष्या ऊर्गन्धोऽन्नूद्यदीदृशः । तत्सप्तधातुमय्यां को मादृश्यां शुचिरीक्ष्यते ॥ ९२ ॥ पश्यन्त्यन्यं न्नजन्त्यन्यं याः स्मरन्त्यपरं नरम् । वात्यावत्तरलास्ताः स्युः कथं कथय शर्मदाः ॥ ९३ ॥ तासु क्षणिकचित्तासु महामोहं विहाय नोः । विवेकमेकमेवाथालम्बन्तां बत निश्चलम् ॥ ९४ ॥ इति देशनया मल्लेः प्राग्जन्मकथनेन च । बुब्धास्ते षमपि प्राप्तप्राग्जातिस्मरणाः क्षणात् ॥ ९५ ॥ तामित्यूचुश्च नः स्वामी त्वं गुरुस्त्वं च देवता । त्वमेव ज्ञानपाथोधिस्तत्कृत्यमधुनाऽऽदिश ॥ ९६ ॥ ततस्तानित्यवग्मल्लिरुत्पन्ने केवले मम । दीक्षा वो न्नवितेत्येतान् विससर्जाखिलानपि ॥ ९७ ॥ श्रीमल्लिर्जन्मतो वर्षशतेऽतीते विरक्तधीः ।

१ पुरः रोधात्.

लोकान्तिकसुराख्यातदीक्षाकालः कलानिधिः ॥ ९८ ॥ प्रदाय वार्षिकं दानं राज्ञीजनसमाश्रिता । कृताष्टमतपा मार्गविशदैकादशीतिथौ[1] ॥ ९९ ॥ पूर्वाह्णे च नमस्कृत्य सिद्धान् दीक्षामुपाददे । तुर्यं ज्ञानं तदा पूर्वसंकेतितमवाप च ॥ १०० ॥ त्रिभिर्विशेषकम् ॥ तत्रैव दिने क्षपकाख्यश्रेणेरधिरोहतः । कंकेल्लिद्रोरधो मल्लिर्ज्ञानं लेभेऽथ केवलम् ॥ १०१ ॥ त्रिप्राकारं सुरा व्याख्यावेश्म चक्रुर्मनोरमम् । तत्रोपविश्य तीर्थेशो विधा धर्ममुपादिशत् ॥ १०२ ॥ तत्रायाताश्च ते पूर्वसुहृदो निखिला अपि । दीक्षिताः प्रभुणा संघः स्थापितश्च चतुर्विधः ॥ १०३ ॥ द्वितीयदिवसे विश्वसेनवेश्मनि पारणम् । चकार परमान्नेन प्रभुः पापनिवारणम् ॥ १०४ ॥ गन्धाम्बुकुसुमस्वर्णवृष्टिः सदुन्दुनिध्वनिः । चेलोत्क्षेपश्च दिव्यानीमानि पञ्च तदाऽभवन् ॥ १०५ ॥ चत्वारिंशत्सहस्राणि साधूनामभवत् प्रभोः । साध्वीनां पञ्चपञ्चाशत्सहस्राणि तथा स्फुटम् ॥ १०६ ॥ श्रावकाणां सहस्राणि त्र्यशीतिर्लक्षमेककम् । लक्षास्त्रयः सहस्राश्च सप्ततिः श्राविकास्तथा ॥ १०७ ॥ द्वादशात्मेव भव्याब्जविकाशं विदधद्भुवि । विजहार चिरं साधुसाध्वीवृन्दयुतः प्रभुः ॥ १०८ ॥ पञ्चपञ्चाशदब्दानां सहस्राण्यायुरीशिना । कौमारेऽपि च दीक्षायां प्रपाल्य जिनपुङ्गवः ॥ १०९ ॥ संमेताद्रौ साधुसाध्वीसहस्रेण समं मुनिः । क्षीणकर्मा फाल्गुनान्त्यदादश्यां शिवमासदवान् ॥ ११० ॥ जिनस्य साधुसाध्वीनां देहानां निर्जरेश्वराः । संस्कारप्रमुखं सर्वं कर्म चक्रुस्तदाऽद्भुतम् ॥ १११ ॥ श्रीअराख्यजिनाधीशे सिद्धिसौधमुपेयुषि । वर्षकोटिसहस्रेऽथ गते मल्लिशिवोऽ-

१ मार्गस्य मार्गशीर्षस्य शुक्लैकादशीतिथौ. २ सूर्य इव.

ऋवत् ॥ ११२ ॥ मल्लेश्चरित्रशतपत्रमिदं जिनस्य, शुक्लद्वयैः सुचरणैः परिसेव्यमानम् । प्रीत्यै सदा मधु-कृतामिव सत्कवीनां, ऋूयाद्भुवीह ननु तद्गुणकेसराढ्यम् ॥ ११३ ॥ इत्याद्यार्हतपुण्यप्रज्ञावमाकर्ण्य नोः खलु सकर्णाः । ऋजत तदार्हतधर्मं स्वयं यथाऽन्येति सिद्धिश्रीः ॥ ११४ ॥

॥ इति श्रीमल्लिचरितं संक्षेपतोऽन्निहितं । विस्तरार्थिना तु विशेषग्रन्थेन्योऽवसेयम् ॥

उक्तं चतुश्चत्वारिंशत्तमं धर्मप्रज्ञावद्वारं । अथ सामान्येन पञ्चविषयविषयां दुरन्ततामाविर्ज्ञावयति—

श्रुत्वाऽऽह्वानं स्त्रियस्तामनुसरति रसो हंसकोन्नादपादे-
नाशोकः स्पृष्टमात्रस्तिलककुरुबकौ चुम्बनालिङ्गनाभ्याम् ।
पुष्पेद्वक्त्राब्जवासाधिकरससुरया केसरश्चेद्विकारो-
ऽप्येषां तत्सत्यकीवाधिकविषयरतिर्यातु नो किं ऋवार्तिम् ॥ ९१ ॥

व्याख्या—रसः पारदः स्त्रिय आह्वानमाकारणशब्दं श्रुत्वा तां स्त्रियमनुसरति अनुगच्छति तस्येति शब्दविषयलांपट्यं । अशोको वृक्षो हंसकोन्नादपादेन स्पृष्टमात्रो हंसकं नूपुरं तेनोन्नादः प्रबलशब्दो योऽसौ पादस्तेनाहतः पुष्पेदिति स्पर्शलोलता । तिलककुरुबकौ वृक्षौ यथासंख्यं चुम्बनालिङ्गनाभ्यां पुष्पेतां । केसराख्यस्तरुर्वक्त्राब्जवासाधिकरससुरया वक्त्राब्जवासेनाधिकः सुरन्निरूपो रसो यस्याः सा

तथा वक्त्राब्जवासाधिकरसा चासौ सुरा च तया कृत्वा पुष्पेत् इति गन्धदौष्ट्यं। चेद्यदि एषां वृक्षादीनामेकेन्द्रियाणामपि विकारोऽस्ति तर्त्तार्हि पञ्चेन्द्रियाधिकविषयरतिः पुरुषोऽत्यन्तविषयरागो न्नवार्तिं संसारपीरां किं नो यातु ? अपि तु यात्वेव। क इव ? सत्यकीव यथा सत्यकी अधिकविषयरागः सन् न्नवार्तिमगमदिति संक्षेपार्थः। व्यासार्थः कथयोच्यते (सत्यकिकथा)—

पद्मविशाला[1] वैशाल्लीत्यस्ति स्वस्तिकरी पुरी। राजा राजेव[2] तत्रासीद्धितमाश्चेटकान्निधः ॥ १ ॥ सुज्येष्ठा चेल्लणा चेति सुते तस्य मनोरमे। परस्परं स्फुरत्प्रीतिस्यूतमानसवाससौ ॥ २ ॥ रसे (मे) ते ते समं प्रीत्या भुञ्जाते च समं तथा। तथैव कुरुतः स्वापं स्नेहले चक्षुषी इव ॥ ३ ॥ काचित्प्रव्राजिकाऽन्येद्युः पुरतोऽन्तःपुरी[3]विशाम्। वर्णयन्ती निजं धर्मं निराचक्रे सुज्येष्ठया ॥ ४ ॥ सपत्नीसंकटेऽस्म्येतां पातयामीति रुष्टया। सुज्येष्ठारूपमालेखि पट्टे निरुपमं तया ॥ ५ ॥ ततो राजगृहे गत्वाऽदर्शि श्रेणिकभूभृतः। ततः स मोहितो दूतं प्रैषीत्तत्पुरि तत्कृते ॥ ६ ॥ दूतेनायाचि सुज्येष्ठां स्वस्वाम्यर्थं स चेटकः। क्रुद्धोऽन्यधात्स किं हीनवंशस्यास्य ददे सुताम् ॥ ७ ॥ श्रुत्वेत्यथाभयो मन्त्री रूपं श्रेणिकभूभृतः। पट्टेऽसरूपमालेख्य वैशालीं नगरीं ययौ ॥ ८ ॥ तत्र चान्तःपुरासन्नमापणं मणिकयत्यसौ। तत्रैवान्तःपुरीचेट्योऽथायान्ति बहुदानतः ॥ ९ ॥ यदा चेटयः सुज्येष्ठाया हट्टमायान्त्यसौ तदा। स्तौति निष्कास्य

१ वद्मन्या विशाला. २ चन्द्र इव. ३ अन्तःपुरीजनानाम्.

तत्पट्टं नमस्यति च भक्तिभाक् ॥ १० ॥ तास्तु पृच्छन्ति कस्येदं रूपं स वक्ति मे प्रभोः । विस्मितास्ता वदन्त्येतत्सुज्येष्ठायाः पुरोऽखिलम् ॥ ११ ॥ तया विस्मितया ताभिः पट्टमानाय्य सत्वरम् । वीक्षामासेऽसरूपं तद्रूपं व्यामोहिता ततः ॥ १२ ॥ एकतानं मनोऽमुष्या अथ तस्मिन्नजायत । ज्ञापितं तत्तु चेटीभिरभयाय यथातथम् ॥ १३ ॥ तेनापि तन्मनो मत्वा श्रेणिकेशः सुरङ्गया । आकार्य ज्ञापितस्तस्या हृष्टा सागात्सचेल्लणा ॥ १४ ॥ आरोपिता रथे तेनावक् साऽऽभरणपेटिका । ममावासे स्थिता तत्तां लात्वाऽऽयाम्यधुना नृप ॥ १५ ॥ विज्ञप्येति गता तत्र सा तदाऽऽहाभयः प्रभो । युज्यते न गृहे स्थातुं रिपोस्तद्भुज सत्वरम् ॥ १६ ॥ चेल्लणां स गृहीत्वाऽगात्सुज्येष्ठाऽप्याययावथ । सुरङ्गाद्वार्यदृष्ट्वा तां पूच्चक्रे सा खरस्वरम् ॥ १७ ॥ तं श्रुत्वेयाय संभ्रान्तश्चेटकस्तत्र भूपतिः । चेल्लणां ह्रियमाणां स ज्ञात्वा रुष्टस्तमन्वगात् ॥ १८ ॥ तेन चैकास्त्रमात्रेण द्वात्रिंशत्सुलसासुताः । सामुदायिककर्मत्वान्मारितास्तस्य सेवकाः ॥ १९ ॥ सुज्येष्ठा चिन्तयामास हा मयाऽन्यद्विचिन्तितम् । संजातं दैवतोऽन्यत्तद्भिगस्तु विधिचेष्टितम् ॥ २० ॥ संवेगोत्तुङ्गगाङ्गोर्मिमालाप्लावितकल्मषा । भोगान्नागानिवोपेक्ष्य व्रतं वीरान्तिकेऽग्रहीत् ॥ २१ ॥ इतश्च खेचरः कश्चित् पेढाल इति नामतः । समीहते स्वविद्यानां न्यासपात्रमनुत्तरम्[1] ॥ २२ ॥ निष्कामायाः परब्रह्मण्यालीनायाश्च योऽङ्गजः । जातो ब्राह्मणतो विद्यापात्रं स स्यादनुत्तरम् ॥ २३ ॥ पेढालेनान्यदाऽदर्शि तादृक्सुतकाम्यता । सुज्येष्ठा व्रतिनी मूर्तिमतीव स्मर-

---

१ उत्तमम्.

वह्नजा ॥ २४ ॥ मुष्टिग्राह्यं तमस्तोमं विकृत्य धूमरीनिभम् । तयाऽप्यज्ञात एवायं शक्त्याऽस्यां वीर्यमक्षिपत् ॥ २५ ॥ गर्भचिह्ने सुज्येष्ठायाः स्फुटीभूते क्रमात्ततः । ज्ञानिभिर्निर्विकारेति बोधिता पुरतो विशाम् ॥ २६ ॥ जातोऽसौ ववृधे श्राद्धेधिष्ण्ये सत्यकिसंज्ञकः । साध्वीमध्ये स्थितः कर्णश्रुत्या श्रुतमलात् कियत् ॥ २७ ॥ कालसंदीपकोऽन्येद्युः खेचरोऽपश्चिमं जिनम् । वीक्ष्याप्राक्षीत् प्रभो भीतिर्भविता मे कुतो वद ॥ २८ ॥ इतः सत्यकितस्ते भो भीतिरित्युदितेऽर्हता । स तं वीक्ष्येति दध्यौ मे कुतो भीतिरितः शिशोः ॥ २९ ॥ इत्यवज्ञाय तन्मूर्ध्नि क्रममारोप्य सोऽगमत् । ततः स सत्यकी गाढममर्षोत्कर्षजागभूत् ॥ ३० ॥ रोहिणीप्रमुखा विद्याः पेढालोऽस्य वितीर्णवान् । ततः साधयतो विघ्नं कालसंदीपकोऽकरोत् ॥ ३१ ॥ प्राग्जन्मस्नेहतो रुद्धं सिद्धास्मीति ब्रुवाणया । रोहिण्या साधयन् यत्प्राक् सोऽप्याचि भवपञ्चके ॥ ३२ ॥ षष्ठेऽथ मासशेषायुः सिध्यन्तीं तां निषिद्धवान् । भवान्तरेऽथ सिध्येस्त्वमयत्नेनेति सोऽब्रवीत् ॥ ३३ ॥ अतो गाढतमप्रेमप्रोढिप्राप्ताऽब्रवीदियम् । यद्येकमङ्गं येनाहं तवाङ्गे प्रविशाम्यहं(र)म् ॥ ३४ ॥ तदर्शितेन भालेन गात्रमाविश्य तस्य सा । चक्रे विलापलापाय तत्र नेत्रं तृतीयकम् ॥ ३५ ॥ हाऽमुना मामकीनेयं जननी व्रतिनी सती । धर्षितेति स पेढालं प्राहिणोद्यमसद्मनि ॥ ३६ ॥ वीक्ष्येति कालसंदीपो वाताहतप्रदीपवत् । अनेशत्सोऽपि तत्पृष्ठे लग्नोऽगाच्च कृतान्तवत् ॥ ३७ ॥ तदञ्जनचिकीर्षुश्चक्रे गगने स पुरां त्रयम् । चिरं युद्ध्वा च दग्ध्वा तत् नश्यन्नीशेन सोऽ-

१ जनानाम्. २ श्रावकगृहे.

वधि ॥ ३८ ॥ ततो जातबलोत्कर्षोऽप्रतिमल्लतया भुवि । पेढालस्य रुषा भुंक्ते स्वैरं विप्रर्षिकन्यकाः ॥ ३९ ॥ त्रिसन्ध्यं विदधन्नृत्ताद्यार्हतायतनेषु सः । सम्यक्त्वं क्षायिकं तीर्थकृत्त्वं चार्जयदीश्वरः ॥ ४० ॥ अन्यदोज्जयिनीनाथचण्डप्रद्योतभूभृतः । निशायां स निशान्तस्त्रीः सर्वा जेजे विना शिवाम् ॥ ४१ ॥ प्रद्योतोऽन्तःसभं क्रोधादन्यधादस्य कोऽन्तकृत् । उमा वेश्या वधं तस्य प्रपद्यागात्तदा गृहम् ॥ ४२ ॥ गवाक्षगाऽन्यदा तस्मै तत्रायाताय नार्पयत् । सेराबं याचमानाय ददौ किं त्वस्फुटाम्बुजम् ॥ ४३ ॥ उक्तं च त्वं नियोग्योऽसीदृक्षस्यैवाविदग्धधीः । मुग्धाङ्गना जजस्येता हित्वा त्वं येन मादृशीम् ॥ ४४ ॥ सत्यक्यथ तदालापकौशलाकृष्टमानसः । नित्यं समेति तद्गेहे बद्धः सौन्दर्यरज्जुना ॥ ४५ ॥ तद्भावण्यावर्जितस्य तस्य तस्यामबोऽवीत् । रागोत्कर्षो निवृत्तोऽथ तर्षोऽपरमृगीदृशाम् ॥ ४६ ॥ संजातात्यन्तविश्रम्भस्तया सोऽन्विदधे ततः । समये क्वावसर्पन्ति त्वत्तो विद्या न वा वद ॥ ४७ ॥ चापलं चपलाक्षीणां चेतसोऽनाकलय्य सः । प्राह प्रियेऽन्वहं ताः स्युः पार्श्वे हित्वा रतक्षणम् ॥ ४८ ॥ प्रद्योताय तया तच्च तदानीं कथितं रहः । उक्तं च स कथं वध्यस्तादवस्थ्यस्थितो नृप ॥ ४९ ॥ ततः प्रत्यायिता राज्ञा साऽपि मायागृहं नरैः । यथेष्टपत्रच्छेदादिकृतान्यासमुकोविदैः ॥ ५० ॥ न त्वया भीरु जेतव्यं स एवैको हनिष्यते । इत्याश्वास्य नृपेणैषा प्रेषिता गृहमात्मनः ॥ ५१ ॥ भूभुजाऽथ द्वयं वध्यमिति प्रच्छन्नशिक्षितैः । तस्यां (म्यां) स सुरतारूढः सत्यकी मारितो भटैः ॥ ५२ ॥ तदा विषयलांपट्याद्भतोऽसौ दुर्गदुर्गतिम् । उत्सर्पिण्यां तु भाविन्यां भविता तीर्थकृद्वरः ॥ ५३ ॥

नन्दीश्वरं गिरीशस्य शिष्यमाविश्य वह्वज्ञम् । विद्याः क्रोधेन दिव्येता व्यकार्षुर्महतीं शिलाम् ॥ ५४ ॥ नन्दीश्वरोऽम्बरे संस्थो रुषा ज्ञीममज्ञषात । उपस्थितो विनाशो वोऽधुना मद्गुरुघातिनाम् ॥ ५५ ॥ निशम्येति ज्ञयोद्भ्रान्तो नृपोऽवादीत्सनागरः । प्रसीद सह देवैतदजानानामनुष्ठितम् ॥ ५६ ॥ सोऽप्यवादीत्तादवस्थ्यस्थितयोः शङ्करोमयोः । कुरुध्वं यदि पूजां तन्मोक्षो वोऽस्ति हि नान्यथा ॥ ५७ ॥ ततो ज्ञीतो जनः सर्वः कारयित्वा पदे पदे । जलधाराश्रयं लिङ्गं ज्ञक्त्या ज्ञूपोऽप्यपूजयत् ॥ ५८ ॥ अन्येष्वायतनेष्वन्यैरपि लोकैस्तदर्च्यते । तदधिष्ठातृदेवास्तु तेषां यच्छन्ति कामितम् ॥ ५९ ॥ ततः प्रज्ञृति सर्वत्र मिथ्यात्वं तदजायत । गतानुगतिकी येन त्रिलोकी निखिलाऽप्यहो ॥ ६० ॥ इत्थं गिरीशस्य निदर्शनेन, क्रुरन्ततां वैषयिकीं निशम्य । विधीयतां तत्र विरागज्ञावं, स्वयंवरा सिद्धिवधूर्यथैति ॥ ६१ ॥

॥ इति सत्यकिसंबन्धः ॥

पुनः प्रकारान्तरेणैतदेवाह—

संसारारण्यमध्ये मधुरमुखकटुप्रान्तभृत्कामधूर्तो,
मूढान्दृष्ट्वाँश्च तत्तत्सुखलवज्ञजनैः प्राणिनो विप्रतार्य ।

हृत्वा तत्पुण्यवित्तं गमयति कुगतिं ब्रह्मदत्तं यथा त-
त्पूर्वभ्रातेव धीरः शिवमटति पुनस्तं तपोस्त्रेण जित्वा ॥ ९२ ॥

व्याख्या—कामधूर्तः स्मरधूर्तः प्राणिनो जन्तून् विप्रतार्य संसाराटव्यां तेषां पुण्यवित्तं हृत्वा च कुगतिं गमयति प्रापयति । अन्योऽपि धूर्तो लोकान् विप्रतार्यारण्ये तद्वित्तं हृत्वा कुगतिं कुमार्गं गमयतीति भावः । किंविशिष्टः कामधूर्तः ? मधुरं च तन्मुखं च मधुरमुखं, कटुश्चासौ प्रान्तश्च कटुप्रान्तः, मधुरमुखकटुप्रान्तौ बिभर्तीति स तथा । किंरूपान् प्राणिनः ? दक्षान्मूढाँश्च । कैर्विप्रतार्य ? तत्तत्सुखलवज्ञजनैः तत्तत्प्रसिद्धमैन्द्रियिकं यत्सुखं तस्य लवो लेशस्तज्ज्ञजनैस्तत्सेवनैरिति । कमिव ब्रह्मदत्तमिव यथा ब्रह्मदत्तं विप्रतार्य तत्पुण्यवित्तं च हृत्वा कुगतिं गमयति स्म कामो धूर्त इति । पुनर्धीरः पुमान् तं कामधूर्तं तपोऽस्त्रेण जित्वा शिवमटति गच्छति । क इव ? तत्पूर्वभ्रातेवेति काव्याक्षरार्थः ॥ भावार्थश्च कथयोच्यते—

ब्रह्मदत्तचक्रिकथा—

साकेतपत्तने चन्द्रावतंसेशसुतो व्रतम् । जग्राह मुनिचन्द्राख्यो मुनेः सागरचन्द्रतः ॥ १ ॥ सार्थभ्रष्टं तमन्येद्युर्मूर्छितं गोपबालकाः । चत्वारोऽथ पटूचक्रुः प्रतिचर्याशनादिना ॥ २ ॥ तत्रादिश्यार्हतं धर्मं मुनिचन्द्रमुनिस्ततः । एतान् प्रव्राजयामास चतुरश्चतुरोऽपि हि ॥ ३ ॥ सुचिरं तेऽथ चत्वारो दुस्तपं

तेपिरे तपः । तेषां मध्ये मुनी द्वौ तु जुगुप्सां चक्रतुर्वृषे ॥ ४ ॥ तौ जातौ निर्जरौ च्युत्वा ततः शंखपुरे पुरे । शांकिल्यविप्रजौ दास्याः सुतौ जातौ ततः परम् ॥ ५ ॥ सर्पदष्टौ मृतौ जातौ मृगौ कालिञ्जराचले । हतौ व्याधेन तौ जातौ हंसौ गङ्गातटे ततः ॥ ६ ॥ मृतौ काशीपुरे भूतदत्तमातङ्गजौ ततः । अन्योन्यं स्नेहलौ चित्रसंभूताह्वौ बभूवतुः ॥ ७ ॥ तत्र शंखः क्षमास्वामी नमुचिं निजमन्त्रिणम् । सागसं[1] भूतदत्तस्य हन्तुं प्रबन्नमार्पयत् ॥ ८ ॥ आख्यन्नमुचिमेषोऽपि चेन्मे पाठयसे सुतौ । मुञ्चे त्वां तर्हि सोऽप्येतद्याचं मेने मृतेर्भिया ॥ ९ ॥ तौ पाठयँस्तयोरेव सोऽथारमत मातरि । किं किं कुचेष्टितं न स्यात्तादृक्षे दुर्जने जने ॥ १० ॥ जिघांसतो पितुः सौवादेतौ स्वगुरुरित्यथ । मोचयामासतुस्तं तु नमुचिं विहितागसम् ॥ ११ ॥ हस्तिनापुरमायातो नमुचिर्निर्गतस्ततः । सनत्कुमारचक्रीन्दोस्तत्रासीत्सचिवः परः ॥ १२ ॥ इतश्च चित्रसंभूतौ गान्धर्वकलयाऽखिले । पुरे चेतश्चमत्कारं कस्य कस्य न चक्रतुः ॥ १३ ॥ चित्रसंभूतचच्चर्या[2] मधौ मधुरगीतया । चच्चर्यो निर्जिताः पौरजनानां निखिला अपि ॥ १४ ॥ राज्ञा रुष्टेन जङ्घान्तस्तत्प्रवेशो निवारितः । प्रविष्टौ तौ पुरेऽन्येद्युराज्ञां विस्मार्य[3] भूपतेः ॥ १५ ॥ उपलब्धयाथ गायन्तौ तौ लोको लकुटादिभिः । प्रहत्य नगरारक्षैस्तथैव निरवासयत् ॥ १६ ॥ गीतं च यौवनं रूपं निन्दन्तौ तौ निजं निजम् । वने मुमूर्षू कस्याप्यथारूढौ शिखरे गिरेः ॥ १७ ॥ साधोस्तत्र स्थिताद्बोधिं समासाद्य भवाम्बुधिम् । तितीर्षू व्रतमादाय तौ तेपाते चिरं तपः ॥ १८ ॥ विहरन्तौ कदा-

१ सापराधम्. २ चच्चरी गायकमंमली. ३ विस्मृत्य इति साधु.

चित्तौ हस्तिनापुरमागतौ । संभूतः प्राविशत्साधुः पुरे गोचरचर्यया ॥ १९ ॥ भ्राम्यन्तं तं समालोक्य नमुचिर्नगरान्तरे । तं निर्वासयितुं पत्तीन् प्राहिणोल्लङ्कितो निजान् ॥ २० ॥ स मुनिस्ताड्यमानस्तैः क्रुद्धस्तेभ्यो मुखात्ततः । तेजोलेश्यां महाभीममुच्चूममुदमन् ॥ २१ ॥ पौरवारपरीवारस्तज्ज्ञात्वा चक्रवर्त्यथ । तत्रागत्याक्षमयच्च तं मुनिं वचनैः शुभैः ॥ २२ ॥ संभूतमन्यगाच्चित्रो ज्ञातवार्तस्ततोऽस्य च । रुरोध क्रोधदावाग्निमुपदेशवचोऽम्बुभिः ॥ २३ ॥ पुनश्चित्रमुनिर्निन्ये शान्तं तं तत्र कानने । चक्रवर्त्यादयः प्रापुर्वन्दित्वा तं निजास्पदम् ॥ २४ ॥ संभूतश्चित्रमित्यूचेऽशनमात्रार्थिनोरपि । भवत्येवं पराभूतिस्ततस्तदपि मुच्यते ॥ २५ ॥ भावप्यभजतामेवं विमृश्यानशनं मुनी । अतिभक्तिपरः पौरजनोऽवन्दत तत्पदम् ॥ २६ ॥ पराभवकरं साध्वोर्बुद्ध्वाऽथ नमुचिं नृपः । बद्ध्वा साध्वोः सन्निधाने चानाय्यादर्शयत्तयोः ॥ २७ ॥ मोचितोऽथ नृपात्ताभ्यां तादृशोऽप्यनुकम्पया । योषारत्नं सुनन्देति तत्रागाद्वन्दितुं मुनी ॥ २८ ॥ संभूतक्रमयोर्जङ्घेऽलकस्पर्शो नतिद्वणे । तस्यास्ततस्तदङ्गेऽभून्महारोमाञ्चकञ्चुकः ॥ २९ ॥ बलाबलं विधत्तेऽत्र दैवमेवेति नान्यथा । अनङ्गेनापि सोऽभ्राम्येकादशाङ्गधरोऽपि यत् ॥३०॥ तथा रागोरगेणायं दृढं दष्टः स मर्मणि । यथोपदेशसुधया सिक्तोऽप्याधान्न पाटवम् ॥ ३१ ॥ नटवन्नर्तितः शंभुः पुत्र्यां रागी कृतो विधिः । हन्तात्मयोनिना येन किमेतत्तस्य कथ्यते ॥ ३२ ॥ स्त्रीरत्नवल्लभोऽनेन भूयासं तपसा ततः । निदानं विदधे चायं स रागग्रस्तचेतनः ॥ ३३ ॥ तं चित्रोऽथाह

१ मदनेन.

मुच्येत किं ही लब्धा सुधा मुधा । संसारपातिन्नोगार्थं त्यजता सिद्धिदं तपः ॥ ३४ ॥ बोधितोऽपीति चित्रेण दुष्कर्मालोचयन्न तत् । ततो विपद्य सौधर्मे जज्ञतुर्निर्जरौ वरौ ॥ ३५ ॥ पूर्वं च्युतस्ततश्चित्रजीवः प्रथमकल्पतः । कस्यापीभ्यस्य पुत्रोऽभूत् पुरे पुरिमतालके ॥ ३६ ॥ काम्पील्यपत्तनेऽजिह्मगुणब्रह्मनरेशितुः । गेहिनीचुलनीकुक्षिनलिनीं राजहंसवत् ॥ ३७ ॥ अलंचकार पूर्णायुश्च्युतः सौधर्मकल्पतः । जीवः पीवरपुण्यर्द्धिः संभूताख्यमहामुनेः ॥ ३८ ॥ युग्मम् ॥ चतुर्दशमहास्वप्नप्रोक्तचक्रित्ववैभवम् । सुतं प्रासूत हेमाद्रिमहीव सुरपादपम् ॥ ३९ ॥ ब्रह्मदत्ताख्यया प्राप्तवृद्धिनाथामुना कला । सकलाऽपि कलाचार्याद्गृहीता कतिभिर्दिनैः ॥ ४० ॥ दीर्घः करेणुदत्तश्च कटकः पुष्पचूलकः । सुहृदस्तस्य भूपस्य चत्वारोऽमी गुणाधिकाः ॥ ४१ ॥ ब्रह्मदत्तकुमारोऽभूद्यावद्द्वादशवार्षिकः । तावद्ब्रह्ममहीभर्तुर्मृत्युरासीच्छिरोरुजा ॥ ४२ ॥ राज्यमारोप्य तत्पुत्रे तं त्रातुमपरैस्त्रिभिः । दीर्घः संस्थापितः सोऽपि व्यधात्कोशाद्यथात्मसात् ॥ ४३ ॥ चुलिन्या सममेकान्ते तिष्ठन्मन्त्रादिहेतवे । अदीर्घदर्शी दीर्घोऽथाकार्षीद्विप्लवमुल्बणम् ॥ ४४ ॥ ब्रह्मद्रुमापविश्वासभ्राजनं सचिवो धनुः । तद्दुर्वृत्तं क्रमाद्बुद्ध्वा ब्रह्मदत्तमबोधयत् ॥ ४५ ॥ हंस्या बकं द्विकं कोकिलया खर्या तुरङ्गमम् । संयोज्यान्तःपुरे गत्वा स साकूतमदोऽवदत् ॥ ४६ ॥ अन्यायं ये करिष्यन्ति मम राज्येऽपरेऽपि ते । एवमेव मया वध्या इत्यसौ तानमारयत् ॥ ४७ ॥ अदोवचोविचारेण शङ्कितश्चुलनीं जगौ । दीर्घो भ्रातः भवत्पुत्रान्मृत्युः संभाव्यतेऽथ नौ ॥ ४८ ॥ ततो लाक्षागृहं ज्वाल्यं तस्यां सुप्तवधूवरम् । कुमारमिति सोद्योढुं प्रपन्ना पुष्पचूलजाम् ॥ ४९ ॥

तद्बुद्ध्वा दीर्घराजेन्द्रं धनुर्मन्त्री व्यजिज्ञपत् । देव त्वदाज्ञया धर्मं वृद्धोऽहं विदधेऽधुना ॥ ५० ॥ माऽयं दूरस्थितोऽनर्थकृदित्याख्यत्स धीसखम् । त्वां धौरेयं विना राज्यधुरां निर्वाहयेत कः ॥ ५१ ॥ अत्र गङ्गा-तटस्थस्तद्धर्मं सत्रादिना कुरु । इत्यादिष्टो व्यधान्मन्त्री तत्र सत्रमनारतम् ॥ ५२ ॥ लाक्षासद्मसत्रसद्मा-न्तरे क्रोशद्वयीमिताम् । मर्त्यैः प्रत्यायितैर्मन्त्री स सुरङ्गामकारयत् ॥ ५३ ॥ धनुःसंकेततः पुष्पचूलः स्वक-सुतापदे । प्रैषयच्चेटिकां चैकां सोद्वोढा कुमरेण तु ॥ ५४ ॥ चुल्लनी सस्नुषं लाक्षालये प्रैषीदमुं ततः । मन्त्रिणा प्रेषितस्तत्र तन्मित्रं स्वसुतोऽपि च ॥ ५५ ॥ जज्वाल ज्वलनस्तत्र वाससौधे महानिशि । किमे-तदिति पृष्टोऽवक्कुमारेण स मन्त्रिजूः ॥ ५६ ॥ मित्र मात्राऽत्र ते दीर्घरागिण्योज्जयथाऽपि हि । विदधेऽद-स्ततोऽवादीत्कुमारः किं करोमि तत् ॥५७॥ तातेन दापिताऽस्त्यत्र सुरङ्गा कर्षणाय ते । प्रहारं पाणि(र्ष्णि)ना देहि तत्त्वं देशेऽत्र संप्रति ॥ ५८ ॥ तेनेति भाषितः सोऽपि तथा कृत्वा रसातलम् । प्रविश्यातीत्य चैतां झाक् सहमित्रो विनिर्गतः ॥ ५९ ॥ सोऽथ मन्त्रिसुतोपेतो ग्राम्यन् भूमितलेऽन्वहम् । विद्याभृद्भूभृतां कन्या घनाश्च परिणीतवान् ॥ ६० ॥ ततो नानानृपानीकयुतः काम्पील्यपत्तनम् । सदीर्घं प्राप्य रुरुधे निजैर्योधकदम्बकैः ॥ ६१ ॥ चुल्लन्यपि तदा भोगविरक्ता व्रतमग्रहीत् । तपोऽपि तप्तपं तप्त्वा निष्पङ्का मोक्षमासदत् ॥ ६२ ॥ दीर्घोऽपि सौवसेनायुग्युधे ऽङ्गाधिनिर्ययौ । रणोऽथ दारुणो जज्ञेऽनयोः सैन्यक-योर्द्वयोः ॥ ६३ ॥ क्रमान्निष्ठितसर्वास्त्रो युध्यमानः स राजसूः । चक्रमासाद्य दीर्घाख्यं दीर्घनिद्रामथानयत् ॥ ६४ ॥ लीलया साधयित्वाऽसौ षट्खण्डभरतं ततः । निधिभिर्नवभी रत्नैश्चतुर्दशभिरन्वितः ॥ ६५ ॥

काम्पील्यपत्तनेऽथागादन्निषेकोऽप्यजायत । महर्द्ध्या ब्रह्मदत्तस्य तस्य द्वादशवार्षिकः ॥ ६६ ॥ अत्रान्तरे चित्रजीवः स महेभ्यतनूरुहः । आसाद्य गुरुसंयोगं विरक्तो व्रतमास्तवान् ॥ ६७ ॥ अन्येद्युर्ब्रह्मदत्तोऽपि पश्यँश्चक्रित्वसंपदम् । जातिस्मरणमासाद्य सस्मार भवपञ्चकम् ॥ ६८ ॥ स व्यधाच्चेति श्लोकार्धं ज्ञातुं प्राग्भवबान्धवम् । आस्व दासौ मृगौ हंसौ मातङ्गावमरौ तथा ॥ ६९ ॥ पुरे चाघोषयद्योऽदः श्लोकार्धं पूरयिष्यति । राज्यार्धं तस्य दास्यामि तन्न केनाप्यपूरि च ॥ ७० ॥ स्पष्टमध्यैष्ट राज्यार्थी तदर्धमखिलो जनः । विहरन्नन्यदा तत्र चित्रजीवर्षिरागमत् ॥७१॥ श्रुत्वारघट्टकाच्छ्लोकमुद्यानेऽपूरयन्मुनिः । एषा नौ षष्ठिका जातिरन्योऽन्यं प्रवियुक्तयोः ॥ ७२ ॥ साधोरधीत्य तद्भूपपुरो गत्वा पपाठ सः । तद्भुत्वा भूपतिः स्नेहान्मूर्छितः सज्जितः पुनः ॥ ७३ ॥ स पृष्टोऽवक् मुनिं श्लोकपूरकं चक्रवर्त्यथ । मुनिमभ्येत्य वन्दित्वा चोपाविक्षत् प्रहर्षुलः ॥ ७४ ॥ साधुः प्रदत्तधर्माशीः प्रारेभे धर्मदेशनाम् । कृपापीयूषपुष्टाङ्गः प्राच्यभ्रातृहितेच्छया ॥७५॥ राज्यादिसंपदः सर्वाश्चपलाश्चपला इव । राज्यं च यौवनं सिन्धुतरङ्ग इव गत्वरम् ॥७६॥ विषया विषवन्नित्यं मूर्छयन्ति पदे पदे । चक्रिन् कृतान्तदन्तान्तर्वर्त्ति जीवितमङ्गिनाम् ॥ ७७ ॥ संसारानित्यतां मत्वा स्मृत्वा प्राग्दुःखसंततिम् । राजन् राज्यमहामोहं मुक्त्वा कुरु मनो व्रते ॥ ७८ ॥ चक्र्याह प्राज्यं मे राज्यं भुङ्क्ष्वेदं हि तपःफलम् । मुक्त्वा रसं करप्राप्तं कूर्परस्थं विलेढि कः ॥ ७९ ॥ तं बुर्बोधं मुनिर्बुद्ध्वा निदानिनमथान्यतः । व्यहार्षीत्क्रमतो लब्धकेवलः शिवमासदत् ॥ ८० ॥ वर्षसप्तशती

१ विद्युत इव.

तस्य षोडशोना यथासुखम् । व्यतीता तावदागात्तन्मित्रं कश्चित् द्विजस्ततः ॥ ८१ ॥ प्रार्थितश्चक्रवृत्तेन भोजनं चक्रिणोऽशनैः । स जगादेति मे भोज्यमन्येषामतिदुर्जरम् ॥ ८२ ॥ अन्नदानेऽप्यहो अस्य कार्पण्यमित्यसौ लपन् । सूपेन निजभोज्येन सकुटुम्बोऽपि भोजितः ॥ ८३ ॥ तस्यातिकामतस्तस्यां सपुत्रस्याप्यजायत । अनाकलयतः सौवकुलाचारं पशुक्रिया ॥८४॥ न मात्रादिह्रिया प्रातर्वक्त्रं दर्शयितुं क्षमः । विप्रोऽध्यायत्कथं पापसूपेनाहं विडम्बितः ॥ ८५ ॥ द्विजो ग्राम्यन् बहिः कञ्चित्पशुपालमथैक्षत । कर्करैस्तरुपत्राणि काणयन्तं यदृच्छया ॥ ८६ ॥ दानादिना तमावर्ज्य सोऽवक् प्रक्षिप्य गोलिके । चक्र्यक्षिगोलके त्वं भोः कर्षयेः सोऽकरोच्च तत् ॥ ८७ ॥ हन्यमानो जगौ विप्रं तं स भूपतिपूरुषैः । श्रुत्वेति कुपितश्चक्र्यघातयत्तं कुलान्वितम् ॥ ८८ ॥ इत्यादिशच्च सचिवान् भृत्वा स्थालं द्विजाक्षिभिः । ममाग्रे मुच्यतां तेऽपि चक्रुरित्थं कृपालवः ॥ ८९ ॥ श्लेष्मणाक्तफलैर्भृत्वा स्थालं ते तत्पुरोऽमुचन् । स्पृशन्निमान्ययं चक्षुर्धिया प्रमुदितस्ततः ॥ ९० ॥ षोडशाब्दी व्यतीयाय तस्येत्थं कुर्वतः सतः । विपद्य सप्तमीं श्वभ्रभूमिं चागात्स दुर्मनाः ॥ ९१ ॥ एवं विषयात्यागत्यागौ सम्यग्निशम्य भवशिवदौ । यस्मिन् रमते चेतः स एव सेव्यः सदा विबुधैः ॥ ९२ ॥ ॥ इति ब्रह्मदत्तचक्रवर्तिकथा ॥

उक्तं पञ्चचत्वारिंशत्तमं सामान्यविषयदुरन्तताद्वारं । अथ शब्दविषयदुरन्ततामाविर्भावयति—

गीतामृतातिरतिकर्णपुटस्त्रिपृष्ठपर्यङ्कपाल इव कष्टमुपैति घोरम् ।
सप्तभ्मलुब्धककृताद्भुतगीतलुब्धं, बद्धं विलोकय मृगं भयविह्वलाङ्गम् ॥ ९३ ॥

व्याख्या—गीतान्येवामृतानि तत्रातिरतिरत्यासक्तत्वं ययोस्तौ तथा एवंविधौ कर्णपुटौ यस्य स घोरं कष्टमुपैति । क इव ? त्रिपृष्ठपर्यङ्कपाल इव । तथा सङ्गेति उद्गसहितेन लुब्धकेन कृतानि यान्युद्गुत-गीतानि तेषु लुब्धमासक्तं मृगं बद्धं नयविह्वलाङ्गं हे साधो विलोकयेत्यक्षरार्थः । भावार्थस्तु कथयाऽऽह—

पर्यङ्कपालकथा—

श्रीपोतनपुराधीशप्रजापतिनरेशितुः । मृगावत्यां प्रणयिन्यां जीवो वीरजिनेशितुः ॥ १ ॥ अर्धचक्र-धरत्वेन त्रिपृष्ठ इति नामतः । जज्ञे तनूजतां सोऽथ कृतजातिमदात्ततः ॥ २ ॥ युग्मम् ॥ संप्राप्तयौवनः प्राच्यतपसाऽतिप्रतापवान् । त्रिखण्डेष्वप्यखण्डाज्ञां क्रमेणासाववीवृतत् ॥ ३ ॥ अन्यदा तत्पुरस्तम्यां गातुमारेभिरे नटाः । निषेधनीया एते जोः प्रमीलां मिलिते मयि ॥ ४ ॥ पर्यङ्कपालमादिश्याथैवं सुप्तो हरिस्ततः । सुन्दरं गायन्तीत्येतान्नटान्नैष निषिद्धवान् ॥ ५ ॥ जजागार धराधीशस्तदीयमधुरारवैः । पर्य-ङ्कपालमित्याख्यद्भृकुटीभीषणाननः ॥ ६ ॥ त्वया किं रे निषिद्धा नो गायन्तोऽमी नटा ननु । सोऽवग्देव निषिध्यन्ते गायन्तोऽमी वरं कथम् ॥ ७ ॥ रुष्टोऽआपूरयत् कर्णौ संतप्तत्रपुणाऽस्य सः । शय्यापालोऽपि दुःखार्तो मृत्वा दुर्गतिमाप्तवान् ॥ ८ ॥ प्रपाल्याथ हरी राज्यं प्राज्यं प्रान्ते स दुर्मनाः । विपद्य दुर्गतिं दुर्गदुःखसंततिमासदत् ॥ ९ ॥ एवं सुवैराग्यधिया सकर्णैराकर्ण्य कर्णेन्द्रियदुर्गदुःखम् । विरागभावं कुरुतात्र येन, सुखोत्तरः संसृतिवारिधिः स्यात् ॥ १० ॥

॥ इति पर्यङ्कपालकथानकम् ॥

एतेन शृङ्गारादिगीताश्राव्यत्वमुक्त्वा साम्प्रतं सदुपदेशरूपं गीतं श्रोतव्यमित्याह—

स्यात् क्षुल्लकाभिधकुमारवदस्थिरेषु, स्थैर्याय गीतमपि बोधकरं कदाचित् ।
बालोऽपि निर्वृतिमुपैति निशम्य सम्यग् , मात्रोदितानि किल मन्मनगीतकानि ॥९४॥

व्याख्या—अस्थिरेषु गीतमपि बोधकरं कदाचित् स्थैर्याय स्यात् । किंवत् ? क्षुल्लकनामकुमारवत् । तथा बालोऽपि सम्यग्मात्रोदितानि मात्रा भणितानि मन्मनगीतकानि निर्वृतिं संतोषमुपैति । मन्मनेतिशब्दोऽनुकरणे इति संक्षेपार्थः । भावं तु कथयाऽऽह (क्षुल्लककुमारकथा)—

श्रीणां संकेतसुस्थानमस्ति साकेतपत्तनम् । तत्र वित्रासितारातिपुण्डरीकोऽजनि प्रभुः ॥ १ ॥ युवराजः कण्डरीकोऽवरजस्तस्य भूभुजः । यशोभद्राऽभवत्तस्य वल्लभा वल्लभाकृतिः ॥ २ ॥ वीक्ष्यासरूपं तद्रूपं मोहितः स महीपतिः । तां जगाद शुभे त्वं मां प्रतिपद्यस्व सम्प्रति ॥ ३ ॥ साऽभ्यधत्त प्रभो नैतत्तव कुलस्य युज्यते । त्वय्येव संश्रितो न्यायमार्गो भूपाखिलोऽपि हि ॥ ४ ॥ पररामारिरंसाद्यमार्गयातोऽपरान्नरान् । त्वं निषेद्धाऽधुना तत्र यान्तं त्वां को निषेत्स्यति ॥ ५ ॥ तदा तद्भागदावाग्निस्तयाऽशाम्यान्निरुक्तिभिः । स भूषादिभिरावर्ज्य प्रार्थयत्तां यदा तदा ॥ ६ ॥ तया याच्यापरोऽन्येद्युरित्यभाणि धराधवः । राजन् वदन्निदं किं त्वं लज्जसेऽनुजतोऽपि न ॥ ७ ॥ मन्ये मां न भजत्येषा कण्डरीकस्य

शङ्कया । ध्यात्वेति सोऽतिथीचक्रे यमौकस्यनुजं निजम् ॥ ८ ॥ यो जनो विषयग्रस्तो गुणौघं हन्ति देह-
जम् । को बान्धववधे तस्य निन्दां नाम करोत्यहो ॥ ९ ॥ हतः सहोदरो येन मन्ये तस्य दुरात्मनः ।
हरतः शीलरत्नं मे को वारयितुमीशिता ॥ १० ॥ एवं विचार्य सा सौवशीलरक्षाविधित्सया । गुर्विणी
निरगादेकाकिनी नगरतो निशि ॥ ११ ॥ वह्वर्यः सहचर्यो मे कान्तारं सुन्दरं पुरम् । रक्षितं क्षितिपात्त-
स्माच्छीलरत्नं मया यदि ॥ १२ ॥ सा ध्यायन्त्यध्वनीत्येवं देवदेवं स्मरन्त्यथ । कतिभिर्वासरैः प्राप्य श्राव-
स्तीनगरीं स्थिता ॥ १३ ॥ समं विहारं कुर्वाणाऽजितसेनेन सूरिणा । तत्र कीर्तिमती नाम्ना तयाऽवन्दि
प्रवर्तिनी ॥ १४ ॥ विरागताङ्कुरो धर्मोपदेशसलिलैस्तया । प्रवर्तिन्या तदा सिक्त्वा वर्धितस्तद्धृदि स्थितः
॥ १५ ॥ ततः प्रव्रज्य सा तस्याः पार्श्वे विदधती तपः । ज्ञानवृद्धिं पूर्वजातगर्भवृद्ध्या सहाश्रिता ॥ १६ ॥
प्रवर्तिन्याऽथ सा पृष्टा जगौ गर्भो हि पूर्वजः । मया न कथितोऽयं वो व्रतविघ्नभिया पुरा ॥ १७ ॥
अथासश्राद्धगेहे तां प्रच्छन्नं श्राविकाजनः । साध्वीमुपचचारात्र प्रसूत्यादिक्षणे तदा ॥ १८ ॥ सुतं प्रासूत
सा काले कल्पाङ्कुरमिवोल्बणम् । वृद्धिं श्राद्धकुले लेभे सुरशैलद्रुवीव सः ॥ १९ ॥ स क्षुल्लककुमाराख्यो
वयःस्थो ग्राहितो व्रतम् । गुरुणा सोऽपि कतिचिद्दिनान् नावादपालयत् ॥ २० ॥ विषयेच्छाऽभवत्तस्य
चारित्रावरणोदयात् । दध्यौ स मातरं यामि पृष्ट्वा भोगादिहेतवे ॥ २१ ॥ स तन्ज्ञवेदयन्मातुः साऽप्या-
हामुं सगर्भदम् । वत्स तुच्छं सुखं नृणामिदं विषयसंभवम् ॥ २२ ॥ अतुच्छं शर्म सर्वत्र स्वव्रतप्रतिपत्ति-

१ कल्पवृक्षाङ्कुरम् ।

जम् । तत्पुत्राऽपकृतेऽनऽपं विद्वान् को नाम मुञ्चते ॥ २३ ॥ ज्ञप्ता यदि व्रतेच्छा ते तथापि कथितेन मे । हायनान् द्वादश स्थित्वा पश्चात् कुर्या यथेप्सितम् ॥ २४ ॥ इत्थमस्त्विति सोऽप्युक्त्वा स्थितो द्वादशवत्सरीम् । आपृच्छ्य गन्तुकामं तं जननी व्याहरत्त्विदम् ॥ २५ ॥ वत्स गच्छ ममापृच्छ्य स्वामिनीं त्वं प्रवर्तिनीम् । तां सोऽपृच्छत्तया यावद्बोधितोऽपि न तिष्ठति ॥२६॥ तावत्तयाऽपि तन्मातृव्रतिन्येवोपरोध्य सः । द्वादशाब्दानि भूयोऽपि तदा संस्थापितो व्रते ॥ २७ ॥ तथैव पाठकस्यायमाचार्यस्योपरोधतः । द्वादश द्वादशाब्दानि तस्थिवान् व्रतमाचरन् ॥ २८ ॥ हायनान्यष्टचत्वारिंशतमित्युपरोधतः । विषयेष्वेव वैमुख्यं नाधार्षीत् पालयन् व्रतम् ॥ २९ ॥ ततोऽस्य गच्छतः पुण्डरीकभूपान्तिके प्रसूः । पूर्वानीतं ददौ रम्यं सोर्मिकं रत्नकम्बलम् ॥ ३० ॥ तयोक्तश्चेत्यभिज्ञानं स्वोपलक्षणहेतवे । त्वयोपनेयं भूपायेदं स त्वाङ्गीकरोति यत् ॥ ३१ ॥ ऊर्व्यलिङ्गं धरन्नेष ततो निर्गत्य गच्छति । साकेतपत्तनं प्रापद्यासरान्ते व्रजन् क्रमात् ॥ ३२ ॥ अहं प्रातः क्षमानाथं ऊदयामीति क्षमाभुजः । निर्यानो यानशालायामतिनेतुं तमीं स्थितः ॥ ३३ ॥ तदानीं भूभुजो बाह्यसभायां नाटकक्षणम् । देशान्तरागतं कर्तुं प्रारेभे नटपेटकम् ॥३४॥ दृष्ट्वा काञ्चिन्नटीं चारु नटन्तीं कौतुकेन सः । कटपावृतशिरास्तत्रोपविष्टो भूपपर्षदि ॥ ३५ ॥ भूपादयोऽथ नर्तक्यास्तेन नृत्येन रञ्जिताः । प्रशशंसुः परं दानं नाऽस्तत्खंभनाभिया ॥ ३६ ॥ खिन्नाऽथ चिरनृत्येन नृत्यन्त्यन्ते निशोऽभवत् । उद्घूर्णनवशेनैषा शिथिला नृत्तकर्मणि ॥३७॥ रङ्गभङ्गोऽस्य नृत्यस्य मा भूदिति

१ ला त्वाम् .

महत्तरा । उद्दिश्य तामिदं गीतमगायन्मधुरध्वनिः ॥ ३८ ॥ सुष्ठु गीतं सुष्ठु नृत्तं सुष्ठु सुन्दरि वादितम् । कृपाऽपि कृपिता दीर्घा साम्प्रतं मा प्रमादय ॥ ३९ ॥ निशम्येति नटी जज्ञे सावधाना स्वकर्मणि । क्षुल्लकेनाथ तुष्टेनादाय्यस्यै रत्नकम्बलम् ॥ ४० ॥ यशोज्ञदेण राजेन्द्रसूनुना कर्णकुण्डलम् । प्रोषितप्रियया हारः श्रीकान्ताभिधया तथा ॥ ४१ ॥ जयसन्धिर(ना)मात्येन प्रददे बाहुभूषणम् । कर्णपालाह्वमिण्ठेनाङ्कुशश्च मणिभूषितः ॥ ४२ ॥ प्रस्तावपठनात्तुष्टैः पञ्चभिः क्षुल्लकादिकैः । लक्षमूल्यानि तान्यस्यै प्रदत्तानि पृथक् पृथक् ॥ ४३ ॥ दानेनानुचितेनाथ विस्मितेन महीभृता । आपृष्टास्तेन वा तावत्तुष्टिदाननिबन्धनम् ॥ ४४ ॥ क्षुल्लकोऽथ जगौ राजन् परिपाल्य व्रतं चिरम् । साम्प्रतं विषयासक्तः किं प्रमादं करोम्यहम् ॥ ४५ ॥ श्रुत्वा गीतिमिमां चित्तेऽयं मे बोधोऽभवत्ततः । तुष्टेनार्पितमेतस्या मयेदं रत्नकम्बलम् ॥ ४६ ॥ कुमारोऽथ जगौ तात त्वामहं राज्यलोभतः । हन्तुकामोऽभवं राजन्नद्य श्वो वा विषादिभिः ॥ ४७ ॥ गीत्याऽनयेत्यभूच्चित्ते मम वृद्धोऽभवन्नृपः । स्वयं विपत्स्यते किं तदुत्सुकः पापमर्जये ॥ ४८ ॥ प्रोचे च सचिवो राजन् खेदितोऽहं तवारिभिः । गीत्याऽनयाऽथ बुद्धोऽवक् ततः प्रोषितभर्तृका ॥ ४९ ॥ अद्य श्वो वाऽभवं स्वामिन् रिरंसुरपरं नरम् । कथं लुंपाम्यहं स्वीयं सतीत्वं पालितं चिरम् ॥ ५० ॥ गीत्याऽनया ममेत्यासीन्मिण्ठोऽथावक् तवारयः । खेदयित्वेति मामाहुर्यदेनं पट्टदन्तिनम् ॥५१॥ देहि त्वं नस्ततो गीत्याऽनयेत्यासीच्च चेतसि । सुचिरं स्वामिनो भक्तिः कृता लुम्पाम्यहं कथम् ॥ ५२ ॥ एवं सर्वे जगुः स्वं स्वं तुष्टिदाननिबन्धनम् । अथाख्यद्भूपतिः स्वं स्वमीप्सितं कुरुताधुना ॥ ५३ ॥ ते

प्रोचुः कः सुधीर्बुद्ध्वा धर्मं पापं समाचरेत् । समासाद्य सुधां पानं काङ्क्षिकस्य करोति कः ॥ ५४ ॥ कुमारमन्त्रिश्रीकान्तामिष्टान् संबोध्य स व्रती । प्रव्राज्य चानयत् पार्श्वे गुरोर्नवविरागवान् ॥ ५५ ॥ सौवं दुर्ध्यातमालोच्य लब्ध्वा नवमिव व्रतम् । विपद्य चाश्रयत्स्वर्गगतिं स क्रमतो मुनिः ॥ ५६ ॥ एवं हितोपदेशः श्रोतव्यः सुगतिकारणं सततम् । येन भवन्तु भवन्तः स्थानं शिवशर्मणां विमलम् ॥ ५७ ॥

॥ इति क्षुल्लककुमारकथा ॥

उक्तं षट्चत्वारिंशत्तमं शब्दद्वारं । अथ द्वितीयं रूपविषयं निरूपयति—

नो विन्दत्युष्णशीताद्यपि न सदसदप्युक्तमाविष्करोति,
दुःसङ्गन्धान्न वेत्ति प्रथयति न रसान् रूपनिर्मग्नदृष्टिः ।
तद्दृष्ट्येकेन्द्रियेऽस्मिन्नहितहितमतिः का कुमाराग्रनन्दौ,
चम्पापूःस्वर्णकारे विवशदृशि यथा पञ्चशैलेशदेव्योः ॥ ९५ ॥

व्याख्या—रूपनिर्मग्नदृष्टिः पुमान् उष्णशीताद्यपि न विन्दति न जानातीति स्पर्शनेन्द्रियाभावः । सङ्गव्यं असदभव्यमप्युक्तं नाविष्करोति न प्रकटयतीति श्रवणेन्द्रियाभावः । दुर्गन्धान् सङ्गन्धाँश्च न वेत्तीति घ्राणेन्द्रियाभावः । रसान्न प्रथयतीति रसनेन्द्रियाभावः सूचितः । तत्तस्मात्कारणादस्मिन् रूपनिर्मग्नदृष्टौ नरेऽहिता हिता च मतिः का स्यात् ? अपि तु न कापि । किंविशिष्टेऽस्मिन् ? दृष्टिरेवैकमि-

न्द्रियं यस्य स तथा तस्मिन् , एकेन्द्रियेऽपि हिताऽहिता मतिः कापि न स्यात्तथाविधचेतनाविकलत्वा-
दिति भावः । यथा चम्पापूःस्वर्णकारे कुमाराग्रनन्दौ कुमारनन्दिनाम्नि । किंविशिष्टे ? पञ्चशैलेशदेव्यो-
र्विषये विवशदृशि विह्वललोचने इति समासार्थः । व्यासार्थं तु दृष्टान्तेनाह—

कुमारनन्दिकथा—

आसीत् कुमारनन्दीति चम्पायां स्वर्णकृत्स च । दर्शं दर्शं पर्यणैषीत् स्त्रियः पञ्चशतीमिताः ॥ १ ॥
इतश्च पञ्चशैलेशो नर्ता हासाप्रहासयोः । विपेदे ते च नर्त्रर्थं भ्रमन्त्यौ तत्र चेयतुः ॥ २ ॥ स्वर्णकार-
स्तदावीक्ष्य रूपं हासाप्रहासयोः । मोहितः प्रार्थयत्ते तु प्राहतुर्गिरमित्यथ ॥ ३ ॥ यदि प्रयोजनं नौ ते पञ्च-
शैलेशमेहि तत् । इत्युक्त्वा ते तिरोऽभूतां व्यन्तर्यौ स्वप्नबुद्धिवत् ॥ ४ ॥ केनापि वृद्धवणिजा प्रापितो
वित्तलोभतः । पञ्चशैलाभिधं द्वीपं सोऽमिलच्च तयोः क्रमात् ॥ ५ ॥ स्वर्णकारस्ततोऽवोचद्वृत्तान्तमिममा-
त्मनः । अथ मां भजतं तेनेत्युक्ते ते ऊचतुर्वचः ॥ ६ ॥ सङ्गमो युज्यतेऽत्रौदारिकवैक्रियदेहयोः । कथं
तेन त्वमप्याशु विदध्या वैक्रियां तनुम् ॥ ७ ॥ सोऽन्यधात्स्यात्कथं सा ते प्राहतुश्चेङ्गिनीमृतेः । सोऽवग्मां
मुञ्चतं पुर्यां स्वस्यां यत्साधयामि ताम् ॥ ८ ॥ ताभ्यामुत्पाट्य मुक्तः स स्वर्णकृत्तत्र तत्क्षणात् । ते एव
केवलं ध्यायन् सोऽपि स्वगृहमागमत् ॥ ९ ॥ मित्रेण नागिलेनापि वारितोऽपीङ्गिनीमृतिम् । विधाय
विद्युन्मालीति सुरः सोऽभूत्तयोः पतिः ॥ १० ॥ कथाशेषं तु जैनेन्द्रबिम्बद्वारे सविस्तरम् । प्रपञ्चितं

ततो नात्र साम्प्रतं तत्प्रपञ्चयते ॥ ११ ॥ इति निशम्य जना ननु चाक्षुषीं, विषयदुर्धरवैरिदुरन्तताम् ।
कुरुत तत्र निवृत्तिमहो यथा, भवति हस्तगता खलु निर्वृतिः ॥ १२ ॥

॥ इति हासाप्रहासा (कुमारनन्दि) कथा ॥

आलेखितमपि स्त्रीरूपं ब्रह्मचारिणा न निरीक्ष्यं तथाविधरागोत्पत्तेः । एतदेवाह—

आस्तां सत्यं रूपमालेख्यबिम्बं, स्याद्वोकेऽपि क्लेश एवातिरागात् ।
सुज्येष्ठाश्रीश्रेणिकक्ष्मापवत्तत्, नैणभ्रान्तिभ्रान्तवारीक्षणात् किम् ॥ ९६ ॥

व्याख्या—सत्यं रूपं क्लेशकारीत्यास्तां तिष्ठतु स्त्रियाः । अपेक्ष्यवहितसंबन्धादालेख्यबिम्बमपि लोकेऽतिरागात् क्लेश एव स्यात् क्लेशकार्येव स्यादिति । किंवत् ? सुज्येष्ठाश्रीश्रेणिकक्ष्मापवत् सुज्येष्ठा च श्रीश्रेणिकक्ष्मापश्च तौ तयोरिव तद्वत् यथा सुज्येष्ठारूपचित्रपटं श्रेणिकस्य क्लेशकार्यभूत् तस्य च तस्या इति । एतदेवाह—भ्रान्तवारीक्षणाद्भ्रान्तजलदर्शनात् किं एणभ्रान्तिमृगस्य श्रमो न स्यात् ? अपि तु स्यादेव, तथाऽत्रापीति वृत्ताक्षरार्थः । कथा तु प्राक्कथिता ॥

उक्तं सप्तचत्वारिंशत्तमं रूपद्वारं । अथ तृतीयं (रस) विषयमाह—

रुक्पथ्यं च रसैर्यथा बहुतया संसेवितैर्लोलुपै-
र्धीरैर्यद्विधिना भवेदपि तथा संसारमोक्षावपि ।

यन्नानारसलालसः स मथुरामंगुर्जवं भ्रान्तवान् ।
यत्तीर्णश्च स ढंढणः सममघैः सन्मोदकक्कोदकः ॥ ९७ ॥

व्याख्या—लोलुपैर्गृद्धैः पुंभिर्बहुतयाऽत्यतृप्ततया संसेवितै रसै रुग् रोगो भवेत् यद्यथा धीरैर्विधिना सेवितैस्तैः पथ्यं हितं भवेत् । तथा तेनैव प्रकारेण संसारमोहावपि भवतः । तदेवाह—यद्यतो नानारसलालसो बहुविधाहारलम्पटः सन् मथुरामंगुर्जवं संसारं भ्रान्तवान् बभ्राम, यद्यतः स ढंढणो ढंढणकुमारोऽघैः पापैः समं सन्मोदकक्कोदकः प्रधानमोदकचूर्णयिता भवं तीर्ण इति वृत्ताक्षरार्थः । भावस्तु दृष्टान्तेनाह—

मंगुसूरिकथा—

पुरन्दरपुरीवास्ति प्रथिता मथुरापुरी । तत्रासीन्मंगुराचार्यो यतिपञ्चशतीयुतः ॥ १ ॥ रसलाम्पट्यतः सोऽत्र नित्यवासमशिश्रियत् । चकार बहुकालेन कालं स किल दुर्मनाः ॥ २ ॥ पुरनिर्धमनासन्नायतने व्यन्तरोऽभवत् । विभङ्गावधिनाऽबोधि प्राग्जन्मकुरनुष्ठितम् ॥ ३ ॥ पश्चात्तापपरः सर्वान् प्रतिबोधयितुं मुनीन् । बहिर्यातां यतीनां तद्व्यन्तरप्रतिमा मुखे ॥ ४ ॥ निष्कास्य महतीं जिह्वां दर्शयत्यथ ते जगुः । किमेवं कुरुषे यक्ष ततस्तान् सोऽप्यभाषत ॥ ५ ॥ युग्मम् ॥ अहं युष्माकमाचार्यो मंगुर्नाम्ना स साम्प्रतम् । रसलाम्पट्यतोऽभूवमीदृग्दुःखाकुलो ध्रुवम् ॥ ६ ॥ नो नो मुनीश्वराः कार्यं तेन नैतत् कदाचन ।

ईदृग्दुःखानि यद्यः स्युर्नासन्नानि कदाचन ॥ ७ ॥ तेऽपि श्रुत्वेति संविग्ना व्रतेऽजूवन् सुनिश्चलाः । इत्युक्त्वा पुरतस्तेषां व्यन्तरः स तिरोऽजवत् ॥ ८ ॥ जव्याः सम्यग्निशम्येति जिह्वेन्द्रियकुरन्ताम् । विरमन्तु ततो यद्यो रमन्ते शिवसंपदः ॥ ९ ॥

॥ इति मंगुसूरिकथानकम् ॥

अथ ढंढणकुमारकथां प्रथयति—

बजूव द्वारिकापुर्यां श्रीजनार्दननन्दनः । कुमारो ढंढणाराज्ञीकुक्षिजूर्ढंढणाजिधः ॥ १ ॥ श्रीनेमेर्देशनां श्रुत्वा पित्रा कृतव्रतोत्सवः । प्रव्रज्य प्रजुणा सार्धं व्यहार्षीत्साधुमध्यगः ॥ २ ॥ अत्रान्तरेऽन्तरायाख्यकर्मोदयवशादसौ । जिक्षां न लजते क्वापि जमन्नप्यखिले पुरे ॥ ३ ॥ ततो व्यज्ञापि मुनिजिः स्वामी शिष्यस्तव प्रज्ञो । ढंढणो लजते जिक्षां न यत्किं तत्र कारणम् ॥ ४ ॥ स्वाम्यूचे मगधे ग्रामे विप्रोऽसौ धान्यपूरके । परास (श) रो नृपादिष्टो ग्राम्यैः क्षेत्राण्यवापयत् ॥ ५ ॥ अन्यदा क्षुधितैः श्रान्तैर्हालिकैर्वृषजैश्च सः । प्राप्ते जक्तेऽपि स्वक्षेत्रे वंजामेकामदापयत् ॥ ६ ॥ ततोऽन्तरायकं कर्मोपार्ज्य मृत्वा जमन् जवान् । जज्ञेऽयं ढंढणस्तस्योदगात्तत्कर्म सम्प्रति ॥ ७ ॥ श्रुत्वेत्युत्पन्नसंवेगो ढंढणः सविधे प्रज्ञोः । परलब्धिर्न जोक्तव्या मयेत्यजिगृहीतवान् ॥ ८ ॥ परीषहमलाजाख्यं सहन् श्रीढंढणो मुनिः । कालं कञ्चिदनैषीत्स परलब्धिव्रतस्ततः ॥ ९ ॥ प्रजुं कृष्णोऽन्यदा प्राक्षीत् स्वामिन् सर्वमुमुक्षुषु । को दुष्करकरः स्वाम्यप्याख्यत्सर्वे महर्षयः ॥ १० ॥ किं तु श्रीढंढणो गाढं सहतेऽत्र परीषहान् । ततो

हृष्टः प्रभुं नत्वा प्राविशद्वारिकां हरिः ॥ ११ ॥ समीक्ष्य ढंढणं साधुं गजाऽुत्तीर्य सोऽनमत् । दृष्ट्वेति दध्यिवान् श्रेष्ठी कोऽपीत्येष महामुनिः ॥ १२ ॥ ततो निमंत्र्य तेनार्यमोदकैः प्रतिलाभितः । सोऽपि व्यजिज्ञपन्नेमिं किं ह्रीणं कर्म मे प्रभो ॥ १३ ॥ नेत्याह भगवान् सोऽवग्मोदकान् कथमाप्तवान् । कृष्णोपाधेरिति स्वामिप्रोक्तं श्रुत्वा महामुनिः ॥ १४ ॥ परलब्धिरियं ध्यायन्निति चित्ते ततो बहिः । परिष्ठापयितुं जन्तुमुक्ते क्षेत्रे प्रचक्रमे ॥ १५ ॥ शुक्लध्यानाग्निना भस्मीभूतकर्मेन्धनस्तदा । कुमारो ढंढणाभिख्यो लब्धवान् केवलश्रियम् ॥ १६ ॥ निशम्येति विधेयोऽत्र रसनेन्द्रियनिग्रहः । तद्देव शिवश्रीर्यत्परिरंभयति वोऽप्यहो ॥ १७ ॥

॥ इति ढंढणकुमारकथानकम् ॥

महात्मा रसनेन्द्रियेण न जीयत इत्याह—

किं जेयो रसनेन्द्रियेण स महान् यः सत्त्वरक्षारुचि-
र्यद्भूर्मरुचिः कुतुम्बकमपि पक्वाम्रवद्भक्षयन् ।
किं वा विश्वहिताय नोदरगतं सिन्धुर्दधौ वाडवं,
सारग्राहिसुरास्तमाशु न विषं किं नीलकण्ठः पपौ ॥ ए८ ॥

व्याख्या—यः सत्त्वरक्षारुचिर्भवति जीवदयारुचिः स्यात् स किं रसनेन्द्रियेण जेयो जेतव्यः स्यात् ?

अपि तु न स्यात् । यद्यथा धर्मरुचिः कटुतुम्बकमपि पक्वाम्रवत् पक्वचूतवन्नश्नन् (प्राज्याज्यवदिति साधीयसि पाठान्तरे प्रचुरघृतवन्नश्नन्) न जितः । तथा सिन्धुः समुद्रो विश्वहिताय वाडवं वडवानलं उदरगतं किं न दधौ ? अपि तु दधावेव । सारग्राहिसुरास्तं सारग्राहिभिर्देवैरस्तं निराकृतं विषं किं नीलकण्ठो न पपौ ? अपि तु पीतवानेवेत्यक्षरार्थः । कथा चेयम्—

धर्मरुचिकथानकम्—

विहितारिप्रकंपायां चंपायां पुरि सोदराः । सोमदेवः सोमभूतिः सोमदत्तस्त्रयोऽभवन् ॥ १ ॥ नागश्रीरथ भूतश्रीर्यक्षश्रीश्च क्रमादिमाः । वह्वभ्राः समजायन्त तेषां प्रीतिमतां मिथः ॥ २ ॥ संभूय सोदरैरित्थमथान्येद्युर्व्यवस्थितम् । सर्वैरेकैकवसथे भोक्तव्यं वारकेण तु ॥ ३ ॥ कुर्वाणानां तथाऽमीषां सोमदेवालयेऽन्यदा । नागश्रीः प्रगुणीचक्रे भुक्तिकालेऽशनादिकम् ॥ ४ ॥ पक्त्वा च व्यञ्जनीचक्रेऽजानाना कटुतुम्बकम् । कीदृक्षमेतदित्येवं ज्ञातुमादच्च सा स्वयम् ॥ ५ ॥ अभोज्यमिति थूत्कृत्वे विषण्णाऽगोपयच्च तत् । तद्गर्जापरभोज्यैः साऽभोजयत् पतिदेवरान् ॥ ६ ॥ उद्याने समवासार्षीद्धर्मघोषगुरुस्तदा । विहर्तुं प्रावृणोत्तस्य शिष्यो धर्मरुचिर्मुनिः ॥ ७ ॥ पारणे मासभक्तस्य भ्राम्यन् वेश्मनि वेश्मनि । गतेषु तेष्वगादेष तदा नागश्रियो गृहे ॥ ८ ॥ सा विमृश्येत्यनेनासौ तोषितोऽस्त्वस्य तद्ददौ । अलाबुव्यञ्जनं सोऽपि विहृत्यागादुपाश्रये ॥ ९ ॥ गुरुराघ्राय तद्गन्धं प्राहेति यदि नोदयसि । मरिष्यसि मुने तर्हि परि-

१ अयं पाठः प्रत्यंतरेऽस्ति पक्वेतिपाठे छन्दोभंगोऽस्ति.

ष्ठापय तत्ततः ॥ १० ॥ इत्युक्तो जन्तुमुक्तेऽसौ बाह्येऽथ स्थण्डिलेऽगमत् । तत्र पात्रात् प्रमादात्तद्विन्दु-
रेकोऽपतत् स्वयम् ॥ ११ ॥ कीटिकास्तत्र संश्लिष्टा विपन्ना वीक्ष्य दध्यिवान् । स परिष्ठापितेऽत्र स्याज-
न्तूनां कियतां मृतिः ॥ १२ ॥ एको वरं विपन्नोऽहं न पुनः प्राणिनां गणः । विचार्येति धर्मरुचिराहार्षी-
त्तत्कुतुम्बकम् ॥ १३ ॥ आराधनां विधायान्ते कालं कृत्वा समाधिना । सर्वार्थसिद्धिवध्वा हृद्यारी हारी
बभूव सः ॥ १४ ॥ इतश्च सूरिणा धर्मरुच्यन्वेषणहेतवे । साधवः प्रहितास्तैस्तु विपन्नः स विलोकितः
॥ १५ ॥ न्यवेदि गुरवे तैस्तत्सोऽपि ज्ञानोपयोगतः । जगौ दुश्चेष्टितं नागश्रियस्तद्व्रतिनां पुरः ॥ १६ ॥
तत्कुक्ष्यैर्यतिभिः सोमदेवादीनां निवेदितम् । तैरपि स्वौकसः साध्व शुनिकेवापहस्तिता ॥ १७ ॥ कासश्वा-
सादयोऽभूवँस्तस्या रोगास्ततश्च तैः । दुःखार्त्ता सा विपद्यागात् षष्ठिकां श्वभ्रभूमिकाम् ॥ १८ ॥ उद्धृत्य
नरकात्तस्मान्म्लेच्छीभूय विपद्य च । सप्तमीं दुर्गतिं नागश्रीर्जगाम ततश्च्युता ॥ १९ ॥ म्लेच्छोऽभूत्सप्तमे
श्वभ्रेऽगमन्म्लेच्छोऽभवत् पुनः । एवं द्विर्द्विः समस्तेषु पापा श्वभ्रेषु सा ययौ ॥ २० ॥ ततश्च पर्यटन्ती सा
पृथ्व्यादिषु बहून् भवान् । अकामनिर्जरायोगादक्षिपत् कर्म तद्बहु ॥ २१ ॥ साऽथ सागरदत्तस्य सुभ-
द्राकुक्षिजा सुता । तस्मादुद्धृत्य चम्पायां नाम्नाऽभूत्सुकुमालिका ॥ २२ ॥ जिनदत्ताङ्गजस्तत्र सागरः
परिणीय ताम् । तया सहैव सुष्वाप निशायां वासवेश्मनि ॥ २३ ॥ दह्यमानस्तदा तस्याः स्पर्शतः साग-
रोऽधिकम् । तां विहाय गृहे स्वेऽगान्निद्रामुद्रितलोचनाम् ॥ २४ ॥ प्रातः पतिमपश्यन्त्या प्रारेभे रोदितुं
तया । तत्पित्रा ज्ञातवृत्तान्तेनोपालम्भ्यथ तत्पिता ॥ २५ ॥ आकार्य जिनदत्तोऽपि रहः पुत्रं स्वमब्र-

वीत् । त्वया वत्सोचितं चक्रे मुञ्चता न तदङ्गजाम् ॥ २६ ॥ अथापि तत्र याहि त्वमित्युक्तः सोऽप्यऋाषत । वरं वह्नौ प्रवेक्ष्यामि यास्यामि न तदन्तिके ॥ २७ ॥ तत् कुड्यान्तरितोऽश्रौषीत्तदा सागरदत्तकः । गृहे गत्वा निरानन्द इत्याख्यत्सुकुमालिकाम् ॥ २८ ॥ सागरो विरराम त्वत्ततस्तेऽथापरं वरम् । विलोक्याहं करिष्यामि वत्से धत्सेऽधृतिं कथम् ॥ २९ ॥ श्रेष्ठ्यथान्येद्युरऋाक्षीत्कञ्चिन्निह्नाचरं नरम् । आकार्य त्याजयामास कर्पराद्यखिलं ततः ॥ ३० ॥ ऋोजितः स्नपितस्तेन ऋषितश्चोदितस्त्विति । अस्मत्पुत्र्या समं ऋोगान् ऋुंक्ष्व सङ्ख्यातिगान् सुखम् ॥ ३१ ॥ इत्युक्तः प्रेषितो वासवेश्मन्यथ तया समम् । सुप्तस्तत्स्पर्शतो वह्निस्पृष्टवत्सोऽप्यजायत ॥ ३२ ॥ सोऽप्युत्थाय पलायिष्ट वेषमादाय साऽप्यदः । निरीक्ष्य मुषितेवास्थात्ततस्तां जनको जगौ ॥ ३३ ॥ पूर्वकर्मोदयो वत्से हेतुरत्र न चापरः । तपस्यन्ती ततस्तिष्ठ संतुष्टा मद्गृहे सुखम् ॥ ३४ ॥ अथैषाऽऋुत्तपस्यन्ती शान्ता धर्मानुरागतः । आर्या गोपालिका नाम्नाऽन्यदाऽऽजग्मुस्तदालये ॥ ३५ ॥ शुद्धैः पानाशनाद्यैः सा प्रत्यलाऋयदार्यिकाः । धर्मं निशम्य सम्बुद्धा प्राव्राजीच्च तदन्तिके ॥ ३६ ॥ षष्ठाष्टमादितपसा शोषयन्ती निजाङ्गकम् । कदाचिदार्यिकाणां सा पुरस्तादित्यऋाषत ॥ ३७ ॥ बहुधाऽहं तपस्यन्ती पश्यन्ती सूर्यमण्डलम् । बाह्योद्यानस्थिता कुर्वे नित्यमातापनामथ ॥ ३८ ॥ प्रवर्तिन्या निषिद्धाऽपि स्थिता नैव कदाग्रहात् । गत्वोद्यान उपाक्रंस्त कर्तुमातापनां च सा ॥ ३९ ॥ क्रोडीकृतामथैकेन धृतच्छत्रां च कामिना । अन्येन वीज्यमानां चापरेण मधुरानिलम् ॥ ४० ॥ संयम्यमानकेशां चैकेनान्येन धृतांह्रिकाम् । देवदत्तान्निधां वेश्यां तत्रायान्तीं ददर्श

सा ॥ ४१ ॥ अपूर्णकामभोगेच्छा सा निदानमदो व्यधात् । अनेन तपसैषेव भूयासं पञ्चभर्तृका ॥ ४२ ॥ सा प्रमादपरा वार्यमाणा साध्वीभिरन्वहम् । इति दध्यौ गृहस्थाऽहं पुरा गौरविताऽभवम् ॥ ४३ ॥ साम्प्रतं तर्जयन्त्येता प्रतिनीं मां पदे पदे । एकाकिनी ततस्तस्थौ सा विभिन्ने प्रतिश्रये ॥ ४४ ॥ स्वैरिणी सा चिरं दीक्षां प्रपाल्यान्तेऽष्टमासिकीम् । संलेखनां विधायैतत्त्वनालोच्य मृता ततः ॥ ४५ ॥ नवपल्योपमायुष्काऽऽदिमायां देव्यभूद्दिवि । च्युत्वा द्रुपदराजस्य द्रौपदीति सुताऽभवत् ॥ ४६ ॥ तस्याः स्वयंवरे विश्वे विश्वेशाः पञ्च पाण्डवाः । रूपमाराः कुमाराश्चाहूता राज्ञाऽऽययुस्तदा ॥ ४७ ॥ स्वयंवरसदोऽध्यस्थुस्तेऽथ पञ्चापि पाण्डवाः । सखीपरिवृता द्रौपद्यगान्माल्योल्लसत्करा ॥ ४८ ॥ सख्या प्रदर्श्यमानेषु नामग्राहं नृपादिषु । पश्यन्ती सा ययौ तत्र यत्र ते पञ्च पाण्डवाः ॥ ४९ ॥ स्वयंवरणमालाऽत्र तयाऽक्षेप्यनुरागतः । पाण्डवानां च पञ्चानामपतद्युगपत्फले ॥ ५० ॥ ततस्तैः पञ्चभिः साकं तत्पित्रा परिणायिता । प्राक्कृतैतन्निदानेन साऽभवत् पञ्चभर्तृका ॥ ५१ ॥ इति रसनेन्द्रियविजयः कर्तव्यः सिद्धिमीप्सुभिः पुंभिः । यदुक्तदभवतामपि भवति स्वर्गशर्मौघः ॥ ५२ ॥

॥ इति द्रौपदीमहासती (धर्मरुचि) कथानकम् ॥

अथ परसमयोक्तो वडवानलसंबन्धः प्रोच्यते—

उत्पेदेऽत्रासुरः कश्चिद्वडवानलनामतः । सर्वानपि सुरान् सोऽथ लुब्धो हन्तुं प्रचक्रमे ॥ १ ॥ तदानीं

१ सर्वे. २ पृथ्वीशाः.

निर्जराः सर्वे संभूय सपुरन्दराः । समायाता भयभ्रान्ता देवीश्रीभारतीपुरः ॥ २ ॥ विघ्नघ्नपार्श्वोजभृङ्गिके देवि भारति । रक्ष रक्षेति नो मंक्षु क्षिप्त्वाब्धौ वरुवानलम् ॥ ३ ॥ वारिधौ त्वां विना नैनं क्षमः क्षेप्तुं तु कश्चन । सरस्वतीति विज्ञप्ता सुप्रसन्नाऽभवत्तदा ॥ ४ ॥ ततः श्रीशारदा क्षिप्त्वा घटे तं वरुवानलम् । वार्धिमध्ये ततो गत्वा प्राहैप्सीत्तत्र तं तदा ॥ ५ ॥ सागरोऽपि जगज्जन्तुजातस्य हितहेतवे । बाधामवगणय्यैतं (नं) दध्रे स्वोदरसङ्गतम् ॥ ६ ॥

अथ नीलकण्ठसंबन्धः कथ्यते—

प्रागेकदा त्रयस्त्रिंशत्कोटिभिस्त्रिदिवौकसाम् । स्वयंभूशंभुभान्विन्दुकृष्णप्रभृतिभिः पुनः ॥ १ ॥ संभूय किल वैशाखीकृत्याथ कनकाचलम् । सिन्धुनाथो ममन्थे तै रत्नराजिमभीप्सुभिः ॥ २ ॥ युग्मम् ॥ तस्मिन्नवसरे लक्ष्मीकौस्तुभाद्यापदच्युतः । विष्णोजाः पारिजातादिरत्नं रम्भां च निर्जराः ॥ ३ ॥ शंभुनाऽभाणि नो किञ्चिदपि भागे ममागतम् । तेनाथापि पयोराशिर्मथ्यतां मत्कृतेऽधुना ॥ ४ ॥ निर्जराः प्रोचुरत्यर्थं मथितं कालकूटताम् । गच्छेत्परं तथाप्येष वारिधिं तैरमन्थयत् ॥ ५ ॥ ततः प्रादुर्बभूवाब्धेर्विश्वमग्नीति संलपत् । कालकूटाभिधानेन यमवद्विषमं विषम् ॥ ६ ॥ विचार्याथ स्वकर्मांशमिदमेव ततो हरः । स्वकण्ठे स्थापयामास नीलकण्ठस्ततोऽभवत् ॥ ७ ॥

॥ इति नीलकण्ठसंबन्धकथा ॥

---

१ मन्थानीकृत्य.

उक्तमष्टचत्वारिंशत्तमं रसद्वारं । अथ चतुर्थं गन्धविषयमाह—

स्याद्गन्धोऽपि यतस्ततोऽप्यधिगतः क्लेशाय नाशाय वा,
तच्चाणक्यधियातुरः श्रुतिमगान्मंत्री सुबन्धुर्न किम् ।
पश्य क्लिश्यति पुष्पसौरभहृतः सर्पः सदर्पोऽपि सन्,
सायं चाम्बुजकोशबन्धनमलिः प्राप्नोति गन्धातितृट् ॥ ९९ ॥

व्याख्या—यतस्ततोऽप्यागतो गन्धः क्लेशाय पीडायै (वा) नाशाय मरणाय स्यात् तत्तस्मात् कारणात् सुबन्धुर्नाम मन्त्री चाणक्यमन्त्रीश्वरधिया आतुरः पीडितः सन् किं श्रुतिं लोकप्रसिद्धिं नागात् ? अपि तु अगादेव । तथा हे साधो पश्य सर्पः सदर्पोऽपि पुष्पसौरभहृतः कुसुमपरिमललुब्धः सन् क्लिश्यति गारुडिबन्धं लभते । च पुनरलिर्भ्रमरो गन्धातितृट् गन्धातिलोभी सन् सायं सन्ध्यायां अम्बुजकोशबन्धनं प्राप्नोतीत्यक्षरार्थः । कथा त्वसौ (सुबन्धुमन्त्रिकथा)—

पुरेऽत्र पाटलीपुत्रे चन्द्रगुप्तक्षितीशितुः । चाणक्याभिधया मन्त्री दध्यावेवं स्वचेतसि ॥ १ ॥ मा विषोपद्रवो राज्ञः क्वचिद्भूदरिनिर्मितः । अन्नं तेनौषधैरेनं भोजयेऽपि विषान्वितम् ॥ २ ॥ आहारः सविषो जज्ञे तदादि वसुधापतेः । अन्येद्युर्दोहदादेवी भोक्तुं मध्ये ऽपाविशत् ॥ ३ ॥ गुर्विणी साऽथ तद्भोज्यं भुञ्जाना विषभावितम् । प्रतिषिद्धा तदैवात्र दृष्ट्वा चाणक्यमन्त्रिणा ॥ ४ ॥ सद्यो विपद्यमानाया-

स्तस्याश्चाणक्यधीसखः । उदरं दारयित्वा स्राक् बुध्या गर्भं गृहीतवान् ॥ ५ ॥ विषाहारेण तेनास्य शिशोर्बिन्दुः शिरस्यभूत् । बिन्दुसार इति ख्यातं तस्य पित्राऽथ निर्मितम् ॥ ६ ॥ चन्द्रगुप्ते मृते बिन्दुसारोऽभूद्भूधनस्ततः । स्थितं रहसि तं प्रोचे सुबन्धुर्धीसखोऽन्यदा ॥ ७ ॥ यद्यप्यस्म्यप्रसादस्य पदं देवस्य सर्वदा । तथापि स्वामिभक्तिं न त्यजाम्यत्र कदाचन ॥ ८ ॥ न विश्वस्यं त्वया विप्रब्रुवस्यास्य प्रभो यतः । चाणक्योऽयं खलो मातुस्तवोदरमदारयत् ॥ ९ ॥ धात्री धात्रीधवेनाथ पृष्टा तत् सरलाशया । तथैव साऽप्यजानिष्टानधिगत्य तदाशयम् ॥ १० ॥ पतिर्विप्रतिपत्तिं स भेजे चाणक्यधीसखे । बुधः सोऽप्यवबुध्येति दध्यिवान्निजचेतसि ॥ ११ ॥ कुश्चेष्टितमिदं सर्वं सुबन्धोस्तेन मेऽधुना । समीपवर्तिमृत्योः किमेतया राज्यचिन्तया ॥ १२ ॥ परं सुबन्धुरप्येष विधायापकृतिं मयि । भोगाननुभवेत्तत्किं बुध्या मेतीक्ष्णयाऽनया ॥ १३ ॥ द्रव्यैः संयोज्य सम्बन्धान् बद्ध्वा भूर्जेन सोऽक्षिपत् । संपुटे तालकं लाक्षामुद्रितं तदुपर्यदात् ॥ १४ ॥ लघ्व्यां तं च ततो गुर्व्यां मञ्जूषायामिति क्रमात् । स दत्ततालकेऽक्षैप्सीत्तां पेटासप्तके पुटीम् ॥ १५ ॥ क्षमयित्वाऽखिलान् जीवाननापृच्छ्य स भूपतिम् । पुरीद्वारीङ्गिनीनाम्नि ततश्चानशने स्थितः ॥ १६ ॥ आगत्यामानयज्ज्ञातवृत्तान्तस्तं महीपतिः । भूयोऽपि दीयमानं स नैच्छन्मन्त्रिपदं ततः ॥ १७ ॥ मा गात्सानुशयश्चायं भूपोऽपीति सुबन्धुना । पूजा विधातुमारब्धा तस्यापृच्छ्य क्षमापतिम् ॥ १८ ॥ धूपोत्क्षेपवशाद्वह्निकणोऽक्षेप्यमुना क्षितौ । मन्त्री करीषलग्नेन दग्धस्तेन मृतस्ततः ॥ १९ ॥

याचितो वित्तलुब्धेन तेन चाणक्यमन्दिरम् । नृपोऽथ तेन प्रत्तं[1] तु तस्य तद्वासहेतवे ॥ २० ॥ प्रविश्य सुमुहूर्त्तेऽथ तालकान्युदजीघटत् । गन्धाँस्ताँश्चायमाघ्राय ऋर्जे वर्णान् स्म पश्यति ॥ २१ ॥ आघ्राय य इमान् गन्धान् सेविता विषयान्ननु । स यास्यति जवेनैव यमवेश्मनि निश्चितम् ॥ २२ ॥ चाणक्येन मृतेनापि मारितोऽहं दुरात्मना । दध्यौ वाचितवर्णोऽसौ विषादमिति[2] चेतसि ॥ २३ ॥ वर्णप्रतीतये गन्धानाघ्राप्यान्येन केनचित् । स भोगान् भोजयामास स तु सद्यो व्यपद्यत ॥ २४ ॥ भावेनापि विना हित्वा भोगान् पञ्चापि संयमी । कुर्वन्निव भवभ्रान्त्यन्यासं सर्वत्र सोऽभ्रमत् ॥ २५ ॥ एवं विचार्य चतुरैर्न विधातव्यं सुगन्धलाम्पट्यम् । भवतां भवन्ति यस्माच्छाश्वतपदसंपदः सपदि ॥ २६ ॥

॥ इति सुबन्धुमन्त्रिकथानकम् ॥

अथ गन्धद्रव्यैः शरीरे यत्नो न कार्य इत्याह—

विस्रैर्धातुभिरङ्गमेतदघटि प्रागेव तत्राप्यहो,
दुर्गन्धाः प्रतिकर्मणाऽपि हि बहिः प्राक्कर्मतः केचन ।
दुर्गन्धेव मृगातनूजवदतः सौरभ्ययत्नोऽत्र को,
गन्धद्रव्यचयैर्निबोध शुचिता का नीलिकाभाजने ॥ १०० ॥

१ प्रदत्तम्. २ सविषादमिति साधु.

व्याख्या—विस्रैर्बीभत्सैर्धातुभिर्मज्जास्थिशुक्ररुधिरादिभिः कृत्वा प्रागेव पूर्वमेवैतदङ्गं शरीरमघटि घटितं । तत्रापि शरीरेऽपि अहो इत्याश्चर्ये केचिज्जीवाः प्राक्कर्मतः पूर्वकर्मवशात् प्रतिकर्मणापि शरीररक्षालनचन्दनविलेपादिनाऽपि बहिर्दुर्गन्धा भवन्ति । केव ? दुर्गन्धेव यथा काचिद्दुर्गन्धानाम्नी वेश्यापुत्री प्राक्कर्मतो दुर्गन्धा सती प्रतिकर्मणा कृत्वा दुर्गन्धैवाभवत् । पुनः किंवत् ? मृगातनूजवत् अतः कारणादत्राङ्गे सौरभ्ययत्नो गन्धद्रव्यचयैः कर्पूरादिभिः सुरभिकरणोद्यमः कः ? अपि तु कोऽपि न । तथा हे साधो त्वं निबोध जानीहि बुध अवगमने इति धातुप्रयोगः, नीलिकाभाजने गुल्लीभाण्डे शुचिता का स्यात् ? अपि तु न कापीत्यक्षरगमनिका। दुर्गन्धाकथा व्याख्यायामेवाभिहिता, मृगातनूजकथा त्वियम्—

अस्त्यकम्पा पुरी चम्पा दत्त्वा कम्पामुपागमत् । पुरन्दरपुरी यस्यामिव यद्धर्मकाम्यया ॥ १ ॥ तत्रान्वर्थो महीनाथो जितशत्रुः पवित्रधीः । तस्य राज्ञी मृगा गङ्गावारिवद्विशदाशया ॥ २ ॥ अन्येद्युरुदरे तस्याः कश्चिज्जीवोऽतिपापभृत् । अवातरत्तयाऽप्येष प्रसूतः कतिभिर्दिनैः ॥ ३ ॥ पादौ पादपवन्नास्य भुजौ नाति (पि) भुजङ्गवत् । [1]दृक्कर्णवन्न वा कर्णौ न ग्रीवा [2]सैंहिकेयवत् ॥ ४ ॥ जात्यन्धस्येव नो नेत्रे निर्मुखश्चान्धगण[3]वत् । लेष्टुलोढकवन्नाङ्गोपाङ्गमन्यदपि त्वभूत् ॥ ५ ॥ तस्याकृत्यनुसारेण नाम चक्रे जनैरपि । लोढकश्चेत्यसौ दुःखैः सार्धं वृद्धिमयाप्नुत ॥ ६ ॥ धान्यराशिं विधायाथ तस्योपरि व्यलुलुठत् । प्राप्नोति खरवत्तृप्तिं रोमाहृत्या[4] मृगाङ्गभूः ॥ ७ ॥ इतश्च समवासार्षीत्तत्र वीरजिनेश्वरः । विहर्तुं प्राविश-

१ सर्पवत्. २ राहुवत्. ३ गुप्तस्फोटकवत्. ४ लोमाहारेण.

श्रीमान् गौतमो गणभृत् पुरे ॥ ८ ॥ निर्व्यञ्जनपदे[1] सोऽपि गौतमः पश्यति स्म तम्। चित्ते चमत्कृतोऽस्मार्षीत् कस्यैतत्कर्मणः फलम् ॥ ९ ॥ वीरान्तिके समागत्याथाप्राक्षीदिति गौतमः। अनेन निर्ममे कर्म किं पुरा जन्मनि प्रभो ॥ १० ॥ येन निन्दापदं जात ईदृशोऽयं सुदुःखितः। तद्वृत्तान्तं प्रभुः प्राह पुरस्ताद्बृहमेधिनाम् ॥ ११ ॥ सुग्रामनामनि ग्रामे पुरा जन्मन्यजन्ययम्। नीमनामा सदा दुष्टबुद्धिश्च क्षत्रियाधमः ॥ १२ ॥ प्रकृत्या निष्कृपः क्रूरकर्मनिर्माणकर्मठः। गोकुलं[2] चारयत्येष जनानामनिशं तदा ॥ १३ ॥ सुखं सुखेन तिष्ठन्ति चरित्वा तास्तृणादिकम्। गोष्ठाने यावता रोमन्थायमानास्तु धेनवः ॥१४॥ छिनत्ति तावताऽथैष गवां कासाञ्चन श्रुतीः। कासां पुच्छादि कुर्वीत चतुरङ्गाश्च काश्चन ॥ १५ ॥ एवं स पातकं कृत्वा मृत्वा दुर्ध्यानमानसः। अत्रैव लोढकत्वेनोत्पेदे आस्पदमापदाम् ॥ १६ ॥ एवं श्रुत्वेति संसारवृत्तान्तं जनतास्ततः[3]। अधर्मन्नीरवो धर्मं जगृहुर्गृहमेधिनाम् ॥ १७ ॥ भृशं दुःखायमानोऽथ लोढको नवपूरणम्। विधायामृत दुर्गां च दुर्गतिं गतवाँस्ततः ॥ १८ ॥ एवं विचार्य विबुधैर्देहे गेहे पुरीषमूत्रादेः। गन्धैर्विहाय यत्नं कार्यो धर्मः सदा सुखदः ॥ १९ ॥

॥ इति लोढककथा ॥

---

१ निर्जनस्थाने. २ इदं कथानकं विपाकसूत्रेऽन्यथा दृश्यते, तत्र ह्यानेन जीवेन मनुष्यपीडा विविधाः कृताः, गोत्रासादिकं तु कर्मान्येन जीवेन कृतमिति अत्र लिखितं गोत्रासादिकं न संघटते इति प्रतिभाति। ३ जनसमूहाः.

किं तु ब्रूहि शुभे किं ते साहाय्यं विदधाम्यहम् । सा दध्यावञ्जयो नैवोपायैर्यद्गृह्यतेऽपरैः ॥ २१ ॥ तद्ध-
र्मब्रह्मणा कृत्वा वाचं सफलयामि नः (मे) । द्वितीयवयसौ नार्यावयाचत तथो (दो) ञ्जये ॥ २२ ॥
प्रद्योतोऽदात्तदा ते द्वे ऽविणं चातिपुष्कलम् । उपास्योपास्य ताः साध्वीस्तिस्रो जाता बहुश्रुताः ॥ २३ ॥
बहुसार्थयुतास्तास्त्वगञ्छन् राजगृहं पुरम् । बहिः सार्थं निवेश्यागुर्मध्ये जिननिनंसया ॥ २४ ॥ जगञ्ज-
नमनोहारिविहारे नृपकारिते । नैषेधिकीत्रयीं कृत्वा नन्तुमारेभिरेऽर्हतः ॥ २५ ॥ ववन्दिषुस्तदा देवाँ-
स्तत्रायातोऽञ्जयोऽपि च । निशम्य मुमुदे तासां सुधावन्मधुरान् ध्वनीन् ॥ २६ ॥ प्रणिधानस्तुतिं कृत्वो-
त्तस्थुष्यस्ताश्च यावता । तावतैवाञ्जयोऽन्यागात्सानन्दं ताः प्रशंसयन् ॥ २७ ॥ वन्दित्वाथाञ्जयोऽवा-
दीत् का यूयं चागताः कुतः । वैराग्यकारणं किं वा ब्रूत नूतनभावनाः ॥ २८ ॥ ब्रह्मश्राऽऽऽन्यधाद्गृ-
ह्णाऽवन्तीन्यवणिजः खलु । पाणिगृहीत्यहं मन्त्रिन् दुर्दैवाद्विधवाऽभवम् ॥ २९ ॥ पुत्रस्येमे कलत्रे द्वे
विधवे विधियोगतः । अभूतामथ पुण्यार्थं तीर्थयात्रां विदध्महे ॥ ३० ॥ मुदितोऽथाञ्जयोऽवादीदतिथी-
भवताद्य नः । सतीर्थ्यस्यातिथेयं यज्जिनार्चनमिवाद्भुतम् ॥ ३१ ॥ प्रत्याहाथाञ्जयं युक्तमेतत् परमुपो-
षिताः । वयं सोऽवक् तदा प्रातरागन्तव्यं गृहे मम ॥ ३२ ॥ ऊचुस्ता देहिनां जन्म पूर्यते यत् क्षणा-
दपि । प्रातरित्थं प्रकर्ताऽस्मि वक्तुं युक्तं भवेत् कथम् ॥ ३३ ॥ इत्यादिवचनैस्तासामञ्जयोऽतिचमत्कृतः ।
भोजये श्वो निमन्त्र्येति चिन्तयन् स्वगृहं ययौ ॥ ३४ ॥ प्रातराकार्य ता मन्त्री भोजयामास सादरम् ।
अन्येद्युर्भोजनार्थं चाञ्जयस्तानिर्निमन्त्रितः ॥ ३५ ॥ भोजनान्ते चन्द्रहाससुरामिश्रपयांसि सः । पायितो

विह्वलो नीतोऽवन्तीं प्राक् स्थापितै रथैः ॥ ३६ ॥ ततोऽञ्जयान्वेषणार्थं राज्ञाऽऽदिष्टा निजा नराः । सर्वत्रान्वेशयन्तस्ते तत्राप्याजग्मुरीदृकाः ॥ ३७ ॥ किमायातोऽञ्जयोऽत्रेति तैरुक्ता इदमब्रुवन् । आगतोऽत्र परं सोऽगात्तदानीमेव मन्त्रिराट् ॥ ३८ ॥ तद्वाक्प्रत्ययतो जग्मुरन्यत्राथ गवेषकाः । ताश्च तत्र क्रमात्प्राप्ताः प्रद्योताय तमार्पयन् ॥ ३९ ॥ तस्यानयनवृत्तान्तं सर्वं तस्मै न्यवेदयन् । सोऽपि प्राहाञ्जयं बब्रूस्त्वं कथं बुद्धिमानपि ॥ ४० ॥ त्वमेव देव धन्योऽसि यस्येदृग्धीयुतैर्जनैः । राज्यं निर्वहतेऽथेति स प्रोक्तोऽञ्जयमन्त्रिणा ॥ ४१ ॥ लज्जितः कुपितश्चासौ सममेव महीपतिः । तं काष्ठपञ्जरेऽक्षैप्सीदञ्जयं राजहंसवत् ॥ ४२ ॥ देवी शिवा लोहजंघो लेखवाहोऽग्निभीरुकः । रथो नलगिरिर्हस्ती रत्नान्येतानि भूपतेः ॥ ४३ ॥ भृगुकच्छे नृपः प्रैषील्लोहजंघं मुहुर्मुहुः । तद्गतागतसंक्लिष्टास्तत्रत्या इत्यचिन्तयन् ॥ ४४ ॥ दिनैर्नैत्ययमेकेन पञ्चविंशतियोजनीम् । उज्जाटयति नस्तेन हन्मोऽमुमधुना ततः ॥ ४५ ॥ ते तस्याकुर्वतां नस्त्रां[1] शम्बले विषमोदकैः । मार्गे त्रिश्चोटयन् सोऽथ शकुनैरप्यरुदयत ॥ ४६ ॥ क्षुधितः स पुरं प्राप्यावन्तीशाय न्यवेदयत् । तत्सर्वं सोऽपि चाग्राह्मीदिति श्रेणिकसंभवम् ॥ ४७ ॥ तामाघ्रायाञ्जयोऽज्ञाणीद् दृग्विषाहिरिहोदभूत् । तदा दग्धो भवेदेष नस्त्रामुद्घाटयेद्यदि ॥ ४८ ॥ ततः पराङ्मुखीभूयाऽरण्ये मोच्य इतीरिते । तथैव मुमुचे सोऽहिर्दग्ध्वा वृक्षान्मृतो ययात् ॥ ४९ ॥ तुष्टोऽथावग्नृपो बन्धमोक्षं मुक्त्वाऽपरं वरम् । याचस्वेत्यञ्जयोऽवादीद्भ्यासीभूतोऽस्तु मे वरः ॥ ९० ॥ अन्यदोदयनं भूपं छद्मनाऽऽनाय-

१ नस्त्राम्.

स्पर्शातिगृध्नुरतिबल्यपि याति दुःखं, प्रद्योतन्नृप इव मन्त्रयन्नयेन बद्धः ।
को वाऽग्रहीष्यदिन्नमेष न चेत्करेणुस्पर्शान्धधीः स्थगितगर्तगतोऽन्नविष्यत् ॥ १०१ ॥

व्याख्या—अतिबल्यपि अतिबलिष्ठोऽपि स्पर्शातिगृध्नुः सन् स्त्रीस्पर्शलम्पटः सन् दुःखं याति । क इव ? प्रद्योतन्नृप इव मन्त्रयन्नयेन बद्धः अन्नयकुमारेण बद्धश्चण्डप्रद्योत इव तथा । वा पुनः कः पुमानिन्नं गजमग्रहीष्यद्बन्धं प्रापयिष्यत् ? अपि तु न कोऽपि । परं चेत् यदि एष इन्नः करेणुस्पर्शान्धधीर्हस्तिनीस्पर्शान्धबुद्धिः सन् स्थगितगर्तगतस्तद्ग्रहणार्थं जनैराद्यादिता या गर्ता तत्र गतः पतितो नान्नविष्यदिति समासार्थः । व्यासार्थस्तु दृष्टान्तेन प्रपञ्च्यते (चण्डप्रद्योतकथा)—

अवन्तीति श्रियः स्थानमस्ति स्वस्तिकरी पुरी । तत्र धात्रीधवश्चण्डप्रद्योत इति विश्रुतः ॥ १ ॥ इतश्च श्रेणिको नाम्ना राजा राजगृहे पुरे । तं रोद्धुं सबलोऽचालीच्चतुर्दशनृपैः समम् ॥ २ ॥ तमायान्तमथ श्रुत्वा श्रेणिको दध्यिवानिति । दुर्निवार्यो नु कार्योऽयं विशांरारुबलः कथम् ॥ ३ ॥ विज्ञायवक्रमालोक्य श्रेणिकं त्वन्नयोऽन्नणत् । का चिन्ता यद्यवन्तीशोऽतिथिस्ते जायते प्रभो ॥ ४ ॥ राजेन्द्र तेन सङ्ग्रामकथां त्वं मा कृथा वृथा । बुद्धिसाध्येऽत्र कार्येऽहं प्रयोक्ष्ये बुद्धिमेव तत् ॥ ५ ॥ अथ बाह्येऽरिसैन्याना-

---

१ जन्नसैन्यः.

मावासस्थानकानने । अयस्कुम्भान् स दीनारैर्भृत्वा तत्र न्यधापयत् ॥ ६ ॥ अवन्तीशस्य सैन्येन ततो राजगृहं पुरम् । पर्यवेष्टयत भूपीठं वारिधेरिव वारिणा ॥ ७ ॥ अथैवं प्रेषयामासाभयः स्वैर्गुप्तपूरुषैः । लेखमेष विशेषज्ञश्चण्डप्रद्योतभूभृतः ॥ ८ ॥ नेदं मनागपीहेऽहं शिवाचेल्लणयोर्न हि । शिवासम्बन्धतो भूप मान्यस्त्वमपि मेऽन्वहम् ॥ ९ ॥ तेन विज्ञपयामीत्यहमेकान्तहितेच्छया । नेदिता भूभृतः सर्वे तव श्रेणिकभूभुजा ॥ १० ॥ तान् कर्तुमात्मसात्तेभ्यो दीनारान् प्राहिणोदसौ । तदादानेन ते त्वां तु बद्ध्वा दास्यन्ति मे पितुः ॥ ११ ॥ तदावासेषु दीनारा निखाताः सन्ति तत्कृते । प्रत्ययस्ते न चेत्तत्त्वं खानयित्वा विलोकय ॥ १२ ॥ ज्ञात्वेत्यचीखनत् पुंसैकस्यावासं महाद्भुतान् । दीनारान् प्राप्य तत्राथ पलायिष्ट स भूधनः ॥ १३ ॥ नष्टे तस्मिँस्तु तत्सैन्यं विमथ्याम्भोधिवद्बलौ । कोशेभाश्वादिकं सारं मगधाधीश्वरस्तदा ॥ १४ ॥ नासावंशाधिरूढात्मा वायुवाजेन वाजिना । कथञ्चिच्चण्डप्रद्योतो जग्मिवान्नगरीं निजाम् ॥ १५ ॥ काकनाशमनश्यँस्ते ये राजानस्तथाऽपरे । येन निर्नायके सैन्ये कः स्थाता स्यान्महानपि ॥ १६ ॥ नृपं चानुव्रजन्तस्ते जग्मुरुज्जयिनीं पुरीम् । वञ्चिताः स्मो वयं देव मायया ऽनयमन्त्रिणा ॥ १७ ॥ इत्यादिवादिभिः प्रत्यायितस्तैः शपथैस्तु सः । प्रद्योतोऽदोऽन्यदाऽवादीदन्तःसन्नममर्षणः ॥१८॥ स मे कोऽप्यस्ति यो बद्ध्वा प्रददात्यभयं मम । श्रुत्वेति हस्तमुत्क्षिप्य जगौ वेश्येति काचन ॥ १९ ॥ प्रभो क्षमाऽस्मि कार्येऽत्र तदादेशं प्रदेहि मे । प्रद्योतो मुदितोऽवादीद्यद्येवं त्वं त्वरस्व तत् ॥ २० ॥

१ वायुवेगेन.

यन्नृपः । पुत्र्या वासवदत्ताया गान्धर्वाध्यापनाकृते ॥ ५१ ॥ इतश्चालानमुन्मूल्याधो निक्षिप्य निषादिनौ । पौरान् वित्रासयामास ग्राम्यन्नलगिरिः करी ॥ ५२ ॥ राजाऽन्नयं तदाऽपृच्छद्वशीकार्यः कथं न्वसौ । स प्राहास्य पुरो गीतं गायत्युदयनो यदि ॥ ५३ ॥ न्यूनृता गीतगानं चोदयनोऽकारि तत्पुरः । तद्गीत-श्रवणाक्षिप्तो बद्धो नलगिरिर्गजः ॥ ५४ ॥ वरं ददौ तदा न्यूपोऽन्नयो न्यासीचकार च । निर्विच्छेदमथो-त्पेदे पुर्यन्येद्युः प्रदीपनम् ॥ ५५ ॥ प्रशाम्यति कथं न्वेतदित्युक्तो न्यूनुजाऽन्नयः । विषस्यान्यद्विषं तद्व-द्वह्नेर्वह्निस्तथौषधम् ॥ ५६ ॥ तद्वह्निः क्रियतामन्यो यथा शाम्येत् प्रदीपनम् । तथैव विदधे राज्ञा तच्च शान्तिमुपागमत् ॥ ५७ ॥ वरं तृतीयं न्यूपोऽदान्न्यासीचक्रे तथाऽन्नयः । अन्येद्युरशिवं दुर्गमवन्त्यामुद-बोन्नवत् ॥ ५८ ॥ पृष्टस्तदाऽन्नयो राज्ञा कथं शाम्यत्यदः पुनः । स स्माह सा निवेद्या मे राज्ञी या त्वां दृशा जयेत् ॥ ५९ ॥ तथैव कृतवान् न्यूपोऽन्या राज्ञीर्जितवान् दृशा । शिवां विज्ञाय दुर्जेयां सोऽन्न-याय न्यवेदयत् ॥ ६० ॥ अन्नाषताऽन्नयो न्यूत्यां न्यूतानां प्रबलं बलिम् । करोत्योदनमादाय महाराज्ञी शिवा स्वयम् ॥ ६१ ॥ शिवारूपेण यद्भूतमुत्तिष्ठतेऽथ वासते । तस्यानने तदा क्षेप्यो देव्या क्रूरबलिः स्वयम् ॥ ६२ ॥ तथैव विहिते देव्याऽशिवशान्तिरबोन्नवीत् । न्यूपोऽथादाद्वरं तुर्यमन्नयोऽयाचतेति च ॥ ६३ ॥ मिंठीन्यूते नलगिरौ त्वय्याऽऽरूढः शिवाङ्गगः । विशाम्यहमग्निन्नीरुदारुन्नी रचितां चिताम् ॥ ६४ ॥ ततः प्रद्योतन्नूनर्तेमान् वरान् दातुमक्षमः । विससर्जाञ्जलिं कृत्वा सुतं श्रेणिकन्नूनुजः ॥ ६५ ॥

१ रात्रौ.

प्रत्यज्ञासीदसावेवं त्वयाऽऽनीतोऽस्मि मायया । मध्यंदिने रटन्तं त्वां नेष्याम्येष चतुष्पथे ॥ ६६ ॥ ततो राजगृहं प्रापन्मगधाधीश्वराङ्गजः । अवतस्थे कथमपि कञ्चित्कालं स मेधिरः[1] ॥ ६७ ॥ अन्नयो रूपवत्यौ द्वे गृहीत्वा गणिकाङ्गजे । गतोऽवन्त्यां वणिग्वेषो राजमार्गेऽग्रहीद्गृहम् ॥ ६८ ॥ प्रद्योतोऽन्येद्युरुद्याह्नीत्ते गच्छन् राजवर्त्मनि । ते पश्यतः स्म प्रद्योतं पञ्चास्त्रेण[2] गले धृतम् ॥ ६९ ॥ राज्ञाऽथ रागिणा प्रैषि दूती तत्सङ्गमीप्सुना । तिरश्चक्रेऽर्धचन्द्रेण ताभ्यां स्राक् शुनिकेव सा ॥ ७० ॥ प्रार्थयन्ती द्वितीयेऽह्नि निरस्ता सा मनाक्कृतः । तृतीयेऽह्न्यागताऽज्ञाणि भ्राता नावेष रक्षति ॥ ७१ ॥ सप्तमेऽह्नि समायाते मद्भ्रातरि बहिर्गते । यदि ह्यन्न इहायाति भूपः स्यात्तर्हि सङ्गमः ॥ ७२ ॥ प्रद्योतसदृशः कोऽप्यथाऽन्नयेन निजः पुमान् । उन्मत्तीकृत्य प्रद्योतनाम्नाऽसौ भ्राम्यते पुरि ॥ ७३ ॥ भ्राता मे ग्रहिलीभूतः सञ्जीकार्यो मया कथम् । वदतेत्यन्नयेनासौ नीयते वैद्यसद्मनि ॥ ७४ ॥ नीयमानः स उन्मत्तो रारटीति यथा तथा । प्रद्योतोऽहं ह्रियेऽनेनेत्युच्चकैः पुरतो नृणाम् ॥ ७५ ॥ तत्र ह्यन्नो नृपोऽथागादेकाकी सप्तमेऽहनि । बद्ध्वाऽन्नयपुंभिः स आशापाशैर्यथा पुरा ॥ ७६ ॥ नीयतेऽद्यान्नयेनासौ वैद्यसद्मेति भाषिणा । मध्यन्दिने पुरीमध्याज्जह्रे पर्यङ्कगो रटन् ॥ ७७ ॥ ततो राजगृहं निन्येऽन्नयेनोज्जयिनीपतिः । मुमुचे च पुरस्तात्स मगधाधीशितुस्ततः ॥ ७८ ॥ क्रुद्धः कृपाणमाकृष्य दधावे श्रेणिकोऽन्नि तम् । तं प्रबोध्यान्नयो वस्त्रैः

१ धीमान्. २ मदनेन.

सत्कार्यं च व्यसर्जयत् ॥ ७९ ॥ एवं ह्यवन्तीशनिदर्शनेन, स्पर्शानुरागं त्वरितं त्यजेति हेतुम् । विज्ञाय भव्या विरता भवन्तु, तस्माद्यथा स्युः खलु संपदो वः ॥ ८० ॥

॥ इति चण्डप्रद्योतोदाहरणम् ॥

भूयोऽप्यत्रैव विशेषमाह—

यः स्पर्शसौख्यलवमिच्छति मूढबुद्धिः, सिद्धिप्रदेन तपसा सुकुमालिकेव ।
चिन्तामणेः सकलभूतलराज्यदातुर्बालः स भृष्टचणकान् वृणुते क्षुधार्तः ॥ १०२ ॥

व्याख्या—यो मूढबुद्धिः सिद्धिप्रदेन तपसा कृत्वा स्पर्शसौख्यलवमिच्छति स बालो मूर्खः क्षुधार्तः सन् सकलभूतलराज्यदातुश्चिन्तामणेः सकाशात् भृष्टचणकान् वृणुते याचते । केव ? सुकुमालिकेवेति समासार्थः । कथा तु प्रागुक्ता ॥

उक्तं पञ्चाशत्तमं स्पर्शद्वारं । अथ सामान्येन व्यसनसप्तकदुरन्ततामाह—

निःस्वत्वं निर्दयत्वं विविधविनटनाः शोचनाशात्महानी,
अस्वास्थ्यं वैरवृद्धिर्व्यसनफलमिहामुत्र दुर्गत्यवाप्तिः ।
चौद्युक्त्यद्धापवर्त्तद्व्यसनविरमणे किं न दक्षा यतध्वं,
जानन्तो माऽन्धकूपे पतत चलत मा दृग्विषाहेः पथा हे ॥ १०३ ॥

व्याख्या—द्यूतान्निःस्वत्वं दारिद्र्यं स्यात्, मांसाशनान्निर्दयत्वं स्यात्, मद्यपानाद्विविधा विनटना विडम्बनाः स्युः, वेश्यासङ्गाद्धौचनाशः स्यात्, आखेटकादात्महानिः स्यात्, चौर्यादस्वास्थ्यं व्याकुलत्वं स्यात्, परदारसेवातो वैरवृद्धिर्भवतीतीहलोके व्यसनफलं, अमुत्र परलोके तु दुर्गत्यवाप्तिः फलं, तत्तस्मात् कारणात् हे दक्षा व्यसनविरमणे यूयं यतध्वमिति संटङ्कः । किंवत् ? चौलुक्यक्ष्मापवत् कुमारपालभूपालवत् । तथा हे दक्षा जानन्तः सन्तोऽन्धकूपे मा पतत, दृग्विषाहेर्दृष्टिविषसर्पस्य पथा मा चलत मा गच्छतेत्यक्षरार्थः । कथा त्वियम् (कुमारपालकथा)—

भरतेऽत्रैव सौराष्ट्रलाटगुर्जरसीमनि । स्वःपत्तनमिवाभाति नाम्नाऽणहिल्लपत्तनम् ॥ १ ॥ एकातपत्रसाम्राज्यं यत्रार्हद्धर्मभूपतेः । प्रायेण सकलो लोकः श्रमणोपासकः पुनः ॥ २ ॥ श्रीवर्धमाननिर्वाणात् षोडशाब्दशती तथा । एकोनसप्तत्यधिका व्यतीता यावता तदा ॥ ३ ॥ कुमारपालो भूपालोऽभवत्तत्र महामतिः । भूमिभृन्मौलिश्चौलुक्यकुलाम्बरनभोमणिः ॥ ४ ॥ प्राचीमागङ्गमाविन्ध्यं याम्यामापयोनिधि । प्रतीचीमातुरुष्कं स तूदीचीं खड्वसाधयत् ॥ ५ ॥ हेमचन्द्रं गुरुं वीक्ष्य मूर्तं पुण्यमिवान्यदा । ववन्दे तं त्रिधा शुद्ध्या स तत्त्वमविदन्नपि ॥ ६ ॥ सम्यग्निशम्य तद्धर्मदेशनां मुदितस्ततः । अयं सम्यक्त्वमूलान्यणुव्रतानि प्रपन्नवान् ॥ ७ ॥ ततोऽभूत् प्राप्तबोधोऽसौ श्रावकाचारपारगः । धर्मोपदेशं लोकानां यच्छति स्म स सूरिवत् ॥ ८ ॥ जिनधर्मद्विषो ये च तेऽपि नित्यं तदाज्ञया । श्रृङ्खलव इव श्रृङ्खां दधिरे साधुषु स्फुटम् ॥ ९ ॥ पाण्कुप्रभृतयो नैव मुमुचुर्यां कदाचन । मृगया सा जनैस्त्यक्ता यस्य शास-

नतः स्वयम् ॥१०॥ मृगयादिकमप्यास्तां नित्यमेतस्य शासने । जघान नान्त्यजोऽपीह यूकामत्कुणकाद्यपि ॥ ११ ॥ आजवं ये पलादास्ते वार्तामपि पलस्य च । विस्मारयन्ति स्वःस्थमवत्तदाज्ञावशंवदाः ॥ १२ ॥ यत्पुरा तत्यजुर्नैव दशार्हाः श्रावका अपि । स्वप्नेऽपि कोऽपि तन्मद्यं न पिबत्येतदाज्ञया ॥ १३ ॥ तत्यजेऽनर्थमूलं यद् द्यूतं नैव नलादिभिः । तदाज्ञया कोऽपि वेत्ति तन्नामापि न मूकवत् ॥ १४ ॥ स्थूलभद्रादिभिर्वेश्याव्यसनं सेवितं च यत् । वैरिवत्तज्जना मूलान्मूलयन्ति तदाज्ञया ॥ १५ ॥ रिरंसा परदाराणां न त्यक्ता रावणादिभिः । तदाज्ञया साऽपि त्यक्ता प्रियेव व्यभिचारिणी ॥ १६ ॥ रौहिणेयादिभिश्चौर्यं जव्यैर्नात्याजि यत्पुरा । तद्धितिता न गृह्णन्ति तन्नामापीव योगिनः ॥ १७ ॥ तेन भूपतिनाऽन्येद्युः पुराद्यसनसप्तकम् । मषीलिप्तानानं मूर्तिमच्च कृत्वा निरास्यत ॥ १८ ॥ प्रतिग्राममपि प्रायोऽर्हच्चैत्यानि विधाप्य सः । चकार काश्यपीपीठं जिनायतनमण्डितम् ॥ १९ ॥ वारिता तेन द्यूतेऽपि मारिरित्यक्षरद्वयी । कुर्कुटादेरपि प्रायो योधनं च निवर्तितम् ॥ २० ॥ प्रज्ञाढ्य शासनं जैनमेवमेव दिने दिने । समाधिना विपद्यासौ संप्राप्तस्त्रिदशालयम् ॥ २१ ॥ एवं विचिन्त्य व्यसनेषु सप्तस्वपीह भव्या न रमन्त एव । सत्यं यतोऽन्येऽपि पिबन्त्यवाप्तगोक्षीरपाणा ननु काङ्क्षिकं किम् ॥ २२ ॥

॥ इति कुमारपालकथा ॥

---

१ मांसाशिनः.

अत्यासेवया सत्कर्मणोऽपि व्यसनतामाहुः । तदेवाह—

सप्तापि व्यसनानि पापसदनान्येतानि वर्ज्यानि तत्,
सत्कर्मापि न शस्यते व्यसनमत्यासेवया यद्यथा ।
स्नेहोऽर्हत्यपि गौतमस्य गणनाऽकाले च कोशागुरो-
र्म्लानिः पारदभाविते च कनके रिष्टं फलेऽनार्तवे ॥ १०४ ॥

व्याख्या—सप्तापि व्यसनानि पापसदनानि पापस्थानानि तत्तस्मात्कारणाद्वर्ज्यानि यद्यस्मात्सत्कर्मापि प्रधानकार्यमपि अत्यासेवया व्यसनमेवेति न शस्यते, यथा गौतमस्यार्हत्यपि स्नेहो न शस्यते । च पुनरकाले गणना कोशागुरोः श्रीस्थूलभद्रस्य न शस्यते । तथा हि यस्मात्कारणात् पारदभाविते कनके पारदमिश्रिते स्वर्णे म्लानिर्विरूपता स्यात् । तथाऽनार्तवेऽकालोत्पन्ने फले रिष्टं स्यादित्यक्षरार्थः । कथा त्वियं श्रीगौतमस्य—

मुक्तिं गतेषु गणभृत्सु नवस्वधीशः, सिद्धार्थपार्थिवतनूरुह आजगाम । चिक्षाम गौतमसुधर्मगणेशसेव्योऽपापापुरि त्रिदशनाथनतांघ्रिपद्मः ॥ १ ॥ चक्रुः सदोऽत्र विशदं द्युसदस्त्रिवर्गं, मत्वान्तिमो जिनवरोऽपि निजायुरन्तम् । भूपालभालतिलकोपमहस्तिपालक्ष्मापालजालपुरतः प्रदिदेश धर्मम् ॥ २ ॥ श्रीपूर्णपालनरपालविलोकिताष्टस्वप्नप्रभावमनुमादिशदर्हदीशः । धर्मेऽर्हतां शिथिलता भविता जगत्यां,

लब्धम्यां तथा क्षितिप दुःसमयानुभावात् ॥ ३ ॥ स्वामी स्वरूपमपरं च निरूप्य सर्वमागामि धाम करुणाहरिणेक्षणायाः । संशीतिसन्ततिमथाङ्गभृतां निरस्य, सर्वं तमो रविरिवाशु बिभेद वीरः ॥ ४ ॥ विज्ञाय तद्दिननिशि प्रभुरात्मनोऽथ सप्रीतिमुक्तिललनासुभगाङ्गसङ्गम् । श्रीहस्तिपालजनपालकशुल्कशालामन्त्यो जिनः सुगुणधाम जगाम नाम ॥ ५ ॥ अस्मासु भासुरतरः प्रवरोऽनुरागो, जागर्ति गौतमगणाधिपतेर्निताम्तम् । छेदो भविष्यति कथं खलु मद्वियोगाद्भात्वेति तीर्थपतिनाऽऽशपि गौतमाख्यः ॥६॥ ग्रामे ऋजुर्द्विजवरोऽस्ति परत्र देवशर्मा स यास्यति मुने भवतः प्रबोधम् । उक्त्वेत्यथो गणनभोऽङ्गणवासरेशं, प्रायुङ्क गौतममुनिं जिनपस्तदर्थम् ॥ ७ ॥ स्वातौ गते शशिनि कार्तिकदर्शरात्रिप्रातःक्षणे विहितषष्ठतपा विपापः । संसज्जितः शिवपुरं प्रतिगन्तुमन्त्योऽर्हन्नाययुः सुरवराश्चलितासनाश्च ॥ ८ ॥ विज्ञप्तिमित्यतनुत प्रति तं सुरेन्द्रो, भस्मग्रहो जननभं तव तीर्थनाथ । संक्रामति व्रतिप सम्प्रति तन्मुहूर्त्तमेकं प्रतीक्ष्य कुरु वाञ्छितमात्मनस्त्वम् ॥ ९ ॥ देवेश्वरं प्रभुरभाषत नेदमत्र, भूतं भविष्यति भवत्यपि नैव वज्रिन् । आयुःक्षये क्षणमपि जिनपोऽपि कोऽपि, स्थातुं क्षमस्तदहमत्र कथं प्रतीक्षे ॥ १० ॥ तीर्थेश्वरोऽथ शिवसङ्गतिमङ्गति स्म, चक्रुः सुरा जिनपतेस्तनुसंस्कृतिं ते । दुःखाकुला निजनिजं प्रययुर्विमानं, निर्वाणमार्हतमबोधि च गौतमोऽपि ॥ ११ ॥ दध्यौ ततः स विभुना ननु वञ्चितोऽहं, निर्वाणयानसमये प्रहितोऽस्मि येन । ज्ञातं च बालक इवाञ्चलमेष लाता यातो मृतेऽप्यभिलषन् मम केवलर्द्धिम् ॥ १२ ॥ ध्यायन्नदः स तु बभूव विरागचित्तो, दध्यौ कुचिन्तितमिदं मम तद्धिगस्तु । स्नेहं जिनाः

प्रदधते ननु कुत्रचिन्न, स्नेहो हि कारणमनर्थपरंपरायाः ॥ १३ ॥ एवं स्मरन् विगतरागलवो गणेशः, श्रीगौतमो मुनिवरो गतकर्मलेशः । विज्ञानमापदथ केवलनामधेयं, सिद्धिं जगाम च सुरेन्द्रकृतांहिसेवः ॥ १४ ॥ स्नेहमूलानि दुःखानि विचिन्त्येति मुनीश्वरैः । रागः कार्यः क्वचिन्नो यन्नीरागाणां परं सुखम्॥१५॥

॥ इति गौतमकथानकम् ॥

॥ श्रीस्थूलभद्रकथा तु प्राक्थिता ॥

उक्तमेकपञ्चाशत्तमं सामान्येन व्यसनद्वारं । अथ विशेषतः सप्तापि व्यसनानि विवरीषुः पूर्वं द्यूतव्यसनदुरन्ततां विवृणोति—

द्यूतेनार्थयशःकुलक्रमकलासौन्दर्यतेजःसुकृ-
त्साधूपासनधर्मचिन्तनगुणा नश्यन्ति सन्तोऽपि हि ।
यद्भूत्पाण्डुसुतेषु तच्च्युतसुधीष्वादित्यजावर्जिते,
विश्वे किं तमसा स्फुटं घटपटस्तम्भादि वा लक्ष्यते ॥ १०५ ॥

व्याख्या—द्यूतेन सेवितेनैते गुणाः सन्तोऽपि वर्तमाना अपि नश्यन्तीति संटङ्कः । अर्थो द्रव्यं, यशः कीर्तिः, कुलक्रमकला निजान्वयशोभा, सौन्दर्यं मनोहरत्वं, तेजो बलं, सुकृत् पुण्यं, साधूपासनं साधुसेवा, धर्मचिन्तनं धर्मचिन्ता, अर्थश्चेत्यादिद्वन्द्वः त एव गुणा इति तत्पुरुषसमासः । यद्यथा पाण्डुसु-

तेषु पाण्डवेष्वेते गुणा नेशुः । किंभूतेषु पाण्डुसुतेषु ? तच्च्युतसुधीषु तेन द्यूतेन च्युता गलिता सुधीः सुबुद्धिर्येषां ते तथा (तेषु) । एतदेवाह—आदित्यभावर्जिते विश्वे दिनकरकरप्रसररहिते जगति तमसान्धकारेण स्फुटं प्रकटं घटपटस्तम्भादि वस्तु किं लक्ष्यते ? अपि तु नेत्यर्थः । कथा त्वेषा (पाण्डुसुतकथा)—

कुरुविषये हस्तिनागपुरे श्रीयुधिष्ठिरो भीमार्जुननकुलसहदेवबान्धवयुतो राज्यं भुनक्ति । स्वकारितश्रीशान्तिनाथप्रासादप्रतिष्ठामहोत्सवोपरि इन्द्रप्रस्थपुराद्दुर्योधनादय आकारिताः । मणिचूलविद्याधरनिर्मितमणिमयसहस्रस्तम्भसभायामागच्छन् । राजा दुर्योधनो मणिकुट्टिमे जलभ्रान्त्या वस्त्राद्यूर्ध्वीकुर्वन् भीमादिभिरुपहसितः । तेन क्रोधेन मातुलशकुनिबुद्ध्या सहस्रस्तम्भसभां कारयित्वा युधिष्ठिरादींश्चाकार्य दुर्योधनादयस्तैः सह द्यूतं रन्तुमुपक्रान्ताः सदैवतपाशकैः । ततश्च पाण्डवै राज्यं द्रौपदी च हारिता । इति कथालेशः । विस्तरस्तु श्रीपाण्डवचरित्रादवसेयः । इह तु ग्रन्थगौरवभयान्न कथ्यते ॥

पुनरस्यैव विशेषोपदेशमाह—

द्यूतं न किं त्यजत किं दहत स्वगेहं, श्वानं च मूत्रयत किं वदने स्वकीये ।
तत्तादृशप्रियतमासहितो नलोऽपि, जानीत रोर इव राज्यसुखान्निरस्तः ॥ १०६ ॥

व्याख्या—हे जना द्यूतं किं न त्यजत ? स्वगृहं किं दहत ? स्वकीये मुखे श्वानं किं मूत्रयत ? तत्त-

स्मात् कारणादेवं जानीत तादृशीप्रियतमासहितः सुशीला या तादृशी दवदन्तीरूपा प्रिया तया सहितोऽपि नलो द्यूतात् राज्यसुखाज्जोर इव दरिद्रजन इव निरस्तो निष्कासित इति काव्यार्थः। कथा तु प्राक्श्रुतेति ॥

उक्तं द्विपञ्चाशत्तमं द्यूतद्वारं। अथ मांसव्यसनदुरन्ततामाह—

मांसाशनान्नरक एव ततः स देवस्तद्भोलुपं हरिनृपं कृतवान् सरोषः।
किं पाकपेशलतराशनदत्ततृष्णे, किंपाकभोजिनि मृतेरपि संशयोऽस्ति ॥ १०७॥

व्याख्या—मांसाशनान्मांसभक्षणान्नरक एव स्यात्। ततस्तस्माद्धेतोः स देवस्तद्भोलुपं मांसाशनलोलुपं हरिनृपं कृतवाँश्चक्रे। सरोषो मत्सरी। तथा किंपाकभोजिनि विषवृक्षफलभक्षके पुरुषे किं मृतेर्मरणस्य संशयोऽस्ति? अपि तु न। किंविशिष्टे किंपाकभोजिनि पुरुषे? पाकपेशलतराशनदत्ततृष्णे पाकेन पचनेन पेशलतराणि मनोज्ञतराणि यानि अशनान्यन्नानि तेषु दत्ता तृष्णाऽभिलाषो येन स तथा तस्मिन्। इत्यक्षरगमनिका। दृष्टान्तस्त्वयं—

हरिनृपकथा—

मधुपिङ्गलजीवोऽथ विपद्य त्रिदशोऽभवत्। प्राक्तनं स निजं जन्माबोधि चावधिसंविदा ॥ १ ॥ हरिवर्षे तदा क्षेत्रे युगलिनं स्ववैरिणम्। निरीक्ष्य रोषतोऽथैवं चिन्तयामास चेतसि ॥ २ ॥ कृत्वा कदर्थ-

नामेनं साम्प्रतं मारयामि चेत् । ततोऽयं स्वर्गमासाद्यासादयेदधिकं सुखम् ॥ ३ ॥ अतस्तथा करोम्यस्मि यथा स्यादेष दुःखभाक् । ततः स मिथिलापुर्यामानैषीद्युग्मिनं सुरः ॥ ४ ॥ तं राज्ये तत्र संस्थाप्य हरिरित्यन्निधां व्यधात् । मांसाशने मद्यपाने लोलुपं च चकार सः ॥ ५ ॥ ततः स भूपतिर्मांसमश्नन् मद्यं पिबन् भृशम् । दिने दिनेऽशुभध्यानान्मृत्वा दुर्गतिमासदत् ॥ ६ ॥ हरिवंशकुलोत्पत्तिः संजाता भूपतेस्ततः । विचार्येति कदाचिन्न मांसं भक्ष्यं विचक्षणैः ॥ ७ ॥

॥ इति हरिनृपकथा ॥

भूयोऽप्यत्रैवोपदेशमाह—

स्नेहो दयाऽपि हृदि काऽऽमिषलोलुपानां, किं चेच्चणापि पतिमांसदलानि नैष्यत् ।
नाश्नाति किं निजकुटुम्बमपि द्विजिह्वी, स्थानं स्वमन्यदपि किं दहतीह नाग्निः ॥१०७॥

व्याख्या—आमिषलोलुपानां मांसभक्षणलम्पटानां पुंसां हृदि स्नेहो दयाऽपि का स्यात् ? अपि तु न काऽपीति । चेच्चणाऽपि महासत्यपि, आस्तामन्या, किं पतिमांसदलानि नैष्यत् ? अपि तु ववाञ्छैव । तथा द्विजिह्वी सर्पिणी निजकुटुम्बमपि किं नाश्नाति ? अपि त्वत्त्येव । तथाऽग्निर्वह्निः स्वमन्यदपि स्थानं किं न दहति ? अपि तु दहत्येवेत्यक्षरार्थः । कथा त्वसौ (चेच्चणाकथा)—

श्रीवसन्तपुराधीशजितशत्रुमहीपतेः । पद्म्यामभरसुन्दर्यां कुमारोऽभूत्सुमङ्गलः ॥ १ ॥ कुरूपभाजनं

तत्र मन्त्रिसूः श्येनकाख्यया । सुमङ्गलस्तु तं वीक्ष्य वक्रोक्त्या हसति स्फुटम् ॥ २ ॥ सुमङ्गलकुमारेण हस्यमानो मुहुर्मुहुः । दुःखगर्भं स वैराग्यं श्येनकः प्राप्तवान् कुधीः ॥ ३ ॥ क्वचिद्देशान्तरे गत्वा स परिव्राजकान्तिके । दृष्टिकाग्निग्रहोपेतो दीक्षां जग्राह दुःखभीः ॥ ४ ॥ पित्रा संस्थापितो राज्ये निजे सोऽथ सुमङ्गलः । श्येनकोऽपि परिभ्राम्यँस्तत्रागाच्च महातपाः ॥ ५ ॥ तपस्वी मन्त्रिपुत्रः स प्राग्मित्रमिति वन्दितुम् । तमागाद्भूपतिस्तं तु पारणाय न्यमन्त्रयत् ॥ ६ ॥ मासान्ते पारणायागाच्छ्येनको नृपमन्दिरे । अस्वास्थ्यं भूपतेर्देहे तदा स्मोत्पद्यते महत् ॥ ७ ॥ राजलोकस्ततो व्यग्रो मुनिं तं कोऽपि नैक्षत । निवृत्त्य सोऽप्यन्यमासक्षपणे संस्थितस्ततः ॥ ८ ॥ स्वस्थीभूतो नृपः स्मृत्वा तत्पारणनिमन्त्रणम् । विषण्णात्मा ययौ तस्य समीपेऽक्षमयच्च तम् ॥ ९ ॥ विज्ञप्तश्चेति मद्गेहेऽदः कार्यं पारणं विभो । प्रपन्नं तेन तच्चागान्मेदिनीशः स्वमन्दिरे ॥ १० ॥ तपस्व्येष ययौ यावत्पारणाहनि तद्गृहे । तावद्गुरुतरं जज्ञे प्रागिवास्वास्थ्यमीशितुः ॥ ११ ॥ तथैव विनिवृत्त्यासौ मासक्षपणमादधौ । स्वस्थीभूतोऽनुनेतुं तं भूयोऽप्यागात्सुमङ्गलः ॥ १२ ॥ पादौ प्रणम्य तत्सर्वं क्षमयित्वा क्षमापतिः । भूयोऽपि मानयामास पारणार्थं मुनिं तु तम् ॥ १३ ॥ संपूर्णमासक्षपणो यावत्तत्र ययौ मुनिः । तावद्बृहत्तरं राज्ञो जज्ञेऽस्वास्थ्यमकारणम् ॥ १४ ॥ तं वीक्ष्य राजलोकास्ते दध्युरेवं यदा यदा । अयमेति नृपस्य स्यात् सहसा रुक् तदा तदा ॥ १५ ॥ इति तैः श्येनकः क्रुद्धैः कुट्टितो यष्टिमुष्टिभिः । सोऽपि स्व आश्रमे गत्वा चेतसीति व्यचिन्तयत् ॥ १६ ॥ नूनं सुमङ्गलो भूमानद्यापि मयि मत्सरी । जन्मान्तरेऽस्य मृत्यै तद्भूयासं तपसाऽमुना

॥ १७ ॥ निदायेति विपद्याजूदल्पर्द्धिर्व्यन्तरोऽथ सः । तापसीजूय जूपोऽपि मृत्वाऽजूज्यन्तरस्ततः ॥१८॥ श्रीकुशाग्रपुरे श्रीमत्प्रसेनजिदधीशितुः । ततश्च्युतः सुतः सोऽजूच्चारिण्यां श्रेणिकाख्यया ॥ १९ ॥ पित्रा प्रदत्तराज्यस्य श्रेणिकस्य ततश्च्युतः । श्येनकश्चेल्लणाकुक्षौ सुतत्वेनोदपद्यत ॥ २० ॥ प्राग्निदानेन गर्ज्ञस्थे तस्मिन् वृद्धिमुपेयुषि । दोहदः समजूद्देव्या जूर्तुः पिशितभक्षणे ॥ २१ ॥ देव्या शेके न कस्यापि पुरः स जूषितुं ततः । कृष्णपक्षेन्दुजूवैषा क्षीयतेऽपूर्णदोहदा ॥ २२ ॥ कृशां तां वीक्ष्य तच्छेतुं जूपोऽपृच्छन्न सा जगौ । सनिर्बन्धं ततः पृष्टा राज्ञा साऽप्याह दोहदम् ॥ २३ ॥ प्रोचे नृपोऽजूयायैतत्सोऽपि तं तमसि न्यधात् । मांसमन्यज्ञ्यधाच्चर्मपुटे तदुदरोपरि ॥ २४ ॥ तत्रानीयाथ तां राज्ञीं छद्मना निर्जूयोऽजूयः । तत्तन्मांसं ददौ तस्यै छित्त्वा दोहदपूर्तये ॥ २५ ॥ मन्यमाना पतेर्मांसमश्नती चेल्लणा ततः । ध्यायन्ती मुदिता गर्ज्ञं विषण्णा नृपतिं तथा ॥ २६ ॥ सा पूर्णदोहदा वध्यो गर्ज्नोऽयं जूपतेररिः । तत्कृतं जीविते[1]नास्यागदैः साऽपातयच्च तम् ॥ २७ ॥ तथाऽपि सोऽधिकं वृद्धो देव्याश्च सुषुवे सुतः । दास्या च त्याजितोऽशोकवने वैरीति जूमतः ॥ २८ ॥ दास्यशोकतले त्यक्त्वा तमायन्त्याङ्गपीशिना । क्कागास्त्वं साऽप्यवग्देव्याः सुतं त्यक्तुमहं गता ॥ २९ ॥ नृपस्तत्र द्रुतं गत्वा वीक्ष्य तं सुन्दरं श्रिया । तं चादाय ययौ देवीचेल्लणासन्निधौ नृपः ॥ ३० ॥ किमकार्षीः प्रिये कर्म कठिनं सुकुलोज्ञवे । यद्यादिममपत्यं त्वं त्यक्ष्यस्यन्यानि [2]तन्न ते ॥ ३१ ॥ तर्जयित्वेति तां क्ष्मापोऽवर्धयत्तं सुतं स्वयम् । स वने कुर्कुटछिन्नाङ्गु-

१ राज्ञः. २ तर्हि अन्यान्यपत्यानि ते तव न भविष्यन्तीत्यर्थः.

व्यर्त्या रोदिति ध्रुवम् ॥ ३२ ॥ मुखेऽक्षिपत्ततः क्ष्मान्नृत् पूतिक्लिन्नां तदङ्गुलीम् । सुखासिकां मनाक् प्राप दारकोऽपि मुखोष्मणा ॥ ३३ ॥ अशोकचन्द्र इत्यस्य नाम चक्रे महीपतिः । कुण्यङ्गुलितया बालाः कूणिकाख्यां वितेनिरे ॥ ३४ ॥ ततोऽष्टवार्षिकः पित्रा कलादानं स कारितः । पद्मावतीं नृपसुतां यौवने परिणायितः ॥ ३५ ॥ ग्रन्थविस्तरभीत्याऽत्र कथास्याथ न कथ्यते । श्रीमच्चरमतीर्थेशचरित्रात्सा च गम्यताम् ॥ ३६ ॥ एवं निशम्य जानीध्वं क्व दया मांसभोजिनाम् । निर्दयानां कुतः श्रेयस्तस्मान्मांसं विमुच्यताम् ॥ ३७ ॥

॥ इति चेल्लणोदाहरणम् ॥

उक्तं त्रिपञ्चाशत्तमं मांसद्वारं । अथ मद्यव्यसनोपदेशमाह—

नाकृत्यकृत्यविदलं मधुपानमत्तो, नूतान्निनूत इव शून्यमनोवचोऽङ्गः ।
किं देवकीपरिणये मधुमत्तयाहो, नाश्लेषि जीवयशसाऽप्यतिमुक्तकर्षिः ॥ १०९ ॥

व्याख्या—अकृत्यं परदारादिसेवनं कृत्यं देवगुरुपूजादिकं तयोर्विद् ज्ञाता मधुपानमत्तो मद्यपानोन्मत्तो नैवेति । किंविशिष्टः ? शून्यमनोवचोऽङ्गः शून्यानि अकार्यकारीणि मनोवचोऽङ्गानि यस्य स तथा । क इव ? नूतान्निनूत इव । तथा देवकीपरिणये देवकीविवाहे जीवयशसा कंसपत्न्या अहो इत्याश्चर्ये मधुमत्तया सत्या किमतिमुक्तकर्षिर्नाश्लेषि नालिङ्गितः ? अपित्वालिङ्गित एवेत्यक्षरगमनिका । निदर्शनं चेदम् (जीवयशःकथा)—

आसीद्वौर्यपुरे शौर्यैश्वर्यशाली महाबलः । कुमारो वसुदेवाख्यः समुद्रविजयानुजः ॥ १ ॥ कंसाहूतोऽन्यदा सोऽगात् स्नेहेन मथुरापुरि । कंसस्तत्राधिपोऽन्येद्युः शौरिमित्यन्वयुक्त सः ॥ २ ॥ नगर्यां मृत्तिकावत्यां मत्पितृव्योऽस्ति भूपतिः । देवको देवकी तस्याङ्गजा देवाङ्गनोपमा ॥ ३ ॥ गत्वा परिणय त्वं तामेषोऽस्म्यनुचरस्तव । मा कृथाः प्रार्थनाभङ्गं सखेऽमुं मम सम्प्रति ॥ ४ ॥ ॐमिति प्रतिपद्यैतद्वौरिर्दाक्षिण्यवारिधिः । चचाल साकं कंसेनाऽऽरुहीच्च पथि नारदम् ॥ ५ ॥ वन्दितः कंसशौरिभ्यां प्रीतोऽप्राक्षीत्कुतो युवाम् । हेतोः कुत्र प्रचलितौ ततः शौरिरदोऽवदत् ॥ ६ ॥ कंसेन सुहृदा देव चालितो देवकाङ्गजाम् । परिणाययितुं नाम्ना देवकीमस्मि साम्प्रतम् ॥ ७ ॥ नारदोऽप्यवदत्साधु कंसेनेदं विधीयते । नालं धाता विधायाप्यनुरूपाणां हि योजने ॥ ८ ॥ यथाऽसमानरूपस्त्वं शौरे रूपेण नृष्वसि । तथा सा देवकी सर्वयुवतीष्वपि वर्तते ॥ ९ ॥ योग्यसंयोग एवास्मिन्मा भूद्विघ्नः कुतोऽपि हि । शौरे तव गुणान् गत्वा देवक्याः कथयाम्यहम् ॥ १० ॥ उक्त्वेति नारदो देवक्यालये जग्मिवान् जवात् । तया स प्रणतोऽवादीद्वरः शौरिस्तवास्तु सः ॥ ११ ॥ कः शौरिरिति साऽवादीन्मुनिराख्यत् कलानिधिः । विद्याभृत्कन्यकानाथो दशार्हो दशमोऽस्ति यः ॥ १२ ॥ तिरोऽभून्मुनिरित्युक्त्वा देवक्या हृदि तज्जिरा । विवेश वसुदेवोऽथ सर्वविद्याविशारदः ॥ १३ ॥ क्रमादाजग्मतुस्तत्र कंसशौरी महाभुजौ । देवकोऽन्यर्च्य पप्रच्छ तावागमनकारणम् ॥ १४ ॥ कंसो जगाद योग्यां हि शौरये देवकीं सुताम् । परिणाय्याधुना राजन् रत्नं रत्नेन योजय ॥ १५ ॥ देवकः स्माह योग्यो नायं कन्यार्थमुपक्रमः । देवकीं शौरये दास्ये स्वयमेव वराय

न ॥ १६ ॥ तौ विलद्धौ ततो जातौ देवकोऽन्तःपुरेऽगमत् । देवक्या प्रणतः स्माहानुरूपं वरमाप्नुहि ॥ १७ ॥ देवकोऽथ जगौ राज्ञीं शौरये देवकीं सुताम् । कंसो दापयितुं देवि मामयाचत सम्प्रति ॥ १८ ॥ मया नादायि सा पुत्री तद्वियोगन्नियाऽधुना । श्रुत्वेति व्यषदद्राज्ञी देवक्यपि रुरोद च ॥ १९ ॥ देवकोऽपि तयोर्ज्ञावं सम्यग्विज्ञाय चावदत् । मा विषीदतमत्रागां युवां प्रष्टुमना ह्यहम् ॥ २० ॥ जगौ राज्ञीति योग्योऽयं देवक्या वसुदेवराट् । वरो धर्मैरमुष्याः स वरणार्थमुपागतः ॥ २१ ॥ तयेत्युक्तो देवकोऽथ मन्त्रिणा तावमानयत् । चक्रे च शौरिदेवक्योः पाणिपीरुनमङ्गलम् ॥ २२ ॥ ददौ हेमादिकं न्नूरि शौरये देवको नृपः । गवां कोटिं च हर्षेण ततस्तत्करमोचने ॥ २३ ॥ मथुरायां कंसशौरी आयातौ प्रीतमानसौ । कंसो मित्रविवाहोरुमहं कर्तुं प्रचक्रमे ॥ २४ ॥ अतिमुक्तो मुनिः कंसानुजः पूर्वात्तसंयमः । तपःकृशतनुः कंसौकस्यागात् पारणाकृते ॥ २५ ॥ तदा कंसाङ्गना जीवयशाः पीतसुरा मुनिम् । वीक्ष्य दध्यौ महेऽमुष्मिन् चार्वागादेवरोऽपि यत् ॥ २६ ॥ अकस्मादेव कण्ठेऽथ समाश्लेषि महामुनिः । गायन्त्या परिनृत्यन्त्या स्वतया कंसन्नार्यया ॥ २७ ॥ ज्ञानी मुनिरुवाचैवं कोऽयं सुन्दरि दृश्यते । विषादस्य पदे हर्षः साम्प्रतं तव सद्मनि ॥ २८ ॥ न्नवद्भिः क्रियतेऽद्यात्रायं यत्कारणिको महः । तद्भर्त्रः सप्तमो न्नर्तृपित्रोर्हन्ता त्वदीययोः ॥ २९ ॥ श्रुत्वा तद्वचनं जीवयशा गतमदाऽन्नवत् । मुक्त्वा मुनिं च गत्वा तत्कंसायाख्यद्यथातथम् ॥ ३० ॥ कंसेन वसुदेवस्य पुरस्ताद्याचितोऽपि हि । देवकीसप्तमो गर्भो वृद्धिं दैवानुन्नावतः ॥ ३१ ॥ जगाम गोकुले तेन मारितः कंसन्नृपतिः । जरासन्धश्च कृष्णेन रुषिन्नाषा मृषा न

यत् ॥ ३१ ॥ युग्मम् ॥ इति श्रुत्वा सुरापानां वैकट्यं सर्वसंविदाम् । पेया सुरा कदाचिन्न बुधैर्बुद्धि-विनाशिनी ॥ ३२ ॥

॥ इति जीवयशःसंबन्धलेशोऽत्रिहितः । विस्तरस्तु श्रीनेमिचरित्रादवसेयः ॥

अथापीहलोके च सुरापानफलमाह—

मधु मधुरवचोभिः प्रेयसीप्रेरितो यः, पिबति निजकुलोच्चाचारचिन्तां विमुच्य ।
वररुचिवदिहापि प्रेक्षते दुर्गतिं स क्व च तनुदृढता वा भोगिभुक्ताज्यभोगैः ॥११०॥

व्याख्या—यः पुमान् मधुरवचोभिः प्रेयस्या प्रियया प्रेरितः सन् निजकुलोच्चाचारचिन्तां विमुच्य स्वकुलप्रधानाचरणचिन्तां त्यक्त्वा मधु मद्यं पिबति स पुमान् आस्तां परत्र इहापि इह लोकेऽपि दुर्गतिं विडम्बनारूपां प्रेक्षते पश्यतीति । किंवत् ? वररुचिवत् । तथा भोगिभुक्ताज्यभोगैः सर्पोच्छिष्टघृतभोजनैः कृत्वा तनुदृढता शरीरपाटवं क्व च स्यात् ? अपि तु न क्वापीत्यक्षरार्थः । कथा तु कथितचरा ॥

उक्तं चतुःपञ्चाशत्तमं सुराद्वारं । अथ चतुर्थं वेश्याव्यसनमाह—

वेश्या विश्वकलत्रमत्र तदहो पानीयशालाजले,
यद्भुत्कान्द्विकाशने च शुचिता क्व प्रायशस्तादृशी ।

तस्मात्सा कृतपुण्यवत्कृतकमुद्योकोदया किं प्रिया,
पूर्णेऽलं विशदा स्वन्नावकलुषा दोषाऽपि नेन्दौ कृशे ॥ १११ ॥

व्याख्या—वेश्या विश्वकलत्रं सर्वजनभार्या वर्तते, तत्तस्मादत्र वेश्यायां अहो इत्याश्चर्ये प्रायशो बाहुल्येन तादृशी शुचिता पवित्रता क्व ? न क्वापीति । यद्वद्यथा पानीयशालाजले प्रपापयसि च पुनः कान्दविकगृहनिष्पन्नभोजने प्रायशस्तादृशी शुचिता क्व ? न क्वापीति । तस्माद्धेतोः सा वेश्या कृतकमुद्योकोदया सती कृतकः कृत्रिमो हर्षशोकोदयो यस्याः सा तथा । एवंविधा सती किं प्रिया वल्लभा स्यात् ? अपि तु न । किंवत् ? कृतपुण्यवत् यथा कृतपुण्यस्य वेश्या प्रिया नाभूत् । यथा दोषाऽपि रात्रिरपि स्वभावकलुषा स्वरूपेण मलिना सती पूर्णे इन्दौ चन्द्रेऽलमतिशयेन विशदा निर्मला कृशे क्षीणे इन्दौ न विमला स्यात् तथा वेश्यापि पूर्णद्रव्ये नरे मुदं दर्शयति क्षीणद्रव्ये शोकं चेत्यक्षरयोजनिका । उदाहरणमिदम् (कृतपुण्योदाहरणम्)—

पुरे राजगृहे राजगृह इव रमाश्रिते । आसीद्दासीकृतद्वेषिश्रेणिः श्रेणिकभूपतिः ॥ १ ॥ पुरे तत्रैव सार्थेशो धनिनामग्रणीर्धनः । यद्यशःकुसुमं विश्वत्रयं सौरभयत्यहो ॥ २ ॥ प्रेयस्यां तस्य भद्रायां कृतपुण्याभिधः सुतः । बभूव भुवि विख्यातः कलासर्वस्वमन्दिरम् ॥ ३ ॥ स प्राप्तयौवनः पित्रा कस्यापीभ्यस्य कन्यकाम् । महामहेन प्रोद्दामयौवनां परिणायितः ॥ ४ ॥ तं सतां सङ्गतो वीक्ष्य विषयेभ्यः परा-

ञ्जुखम् । यौवनेऽपि पिताऽथास्य नटगोष्ठीमकारयत् ॥ ५ ॥ कुसंसर्गवशादेष वेश्यावश्योऽभवत्क्रमात् । चातुर्यावर्जितोऽनङ्गसेनासङ्गमन्यथ स्थितः ॥ ६ ॥ तृतीयं पुरुषार्थं सोऽन्यस्यँस्तत्सन्निधौ ततः । स्वन्यस्तामपि व्यस्मार्षीत् पुरुषार्थद्वयीं पराम् ॥ ७ ॥ कुट्टिन्यनङ्गसेनाऽथ धनानि धनंतो[1] भृशम् । दास्याथानाययामास सोऽप्यदात्सुतमोहतः ॥ ८ ॥ धनो धनानि सर्वाणि पुत्रवात्सल्यतो ददत् । क्रमान्निष्ठापयामास रसामध्यगतान्यपि ॥ ९ ॥ तन्नोगसङ्गिनस्तस्यात्यगाद् द्वादशहायनी । पित्राऽपि तद्गृहे प्रैषि क्रमात्सङ्ख्यातिगं धनम् ॥ १० ॥ विधाय निर्धनं धिष्ण्यं[2] निर्धनं[3] पितरौ गतौ । तत्तु न वेत्त्ययं भोगसङ्गमग्नो धनाङ्गजः ॥ ११ ॥ तथाऽपि वित्तलोभेन कृतपुण्यस्य वेश्मनि । कुट्टिन्या काचन प्रैषि चेटी चाटुपटुः स्वका ॥ १२ ॥ रयादयादियं तस्य वेश्म शुश्रूषयोज्झितम् । स्फुरन्मरुत्पताङ्कित्तिवलभीगुरुगोपुरम् ॥ १३ ॥ नर्तृमङ्गलमाख्यान्ती कौसुम्भाऽुत्तरीयतः । सुरनारीसमा नारी तत्रैका वीक्षिता तया ॥ १४ ॥ मत्वाऽनुमित्या तत्पत्नीं तामेवं निजगाद सा । कान्तेन ते तवोपान्ते प्रेषिताऽहं धनार्थिना ॥ १५ ॥ सहर्षं सा बभाषेऽथ नर्तृभक्तिपरायणा । श्रियः प्रियाङ्गजायादाद्विजयी ते पिताऽखिलाः ॥ १६ ॥ इदं मदङ्गभूषार्थं पित्रा किञ्चन काञ्चनम् । दत्तमेतत्तदादत्स्व शीलं भूषाऽस्तु मेऽधुना ॥ १७ ॥ अभिधायेति सा कुट्टयाँ देहाऽुत्तार्य भूषणम् । उपानिन्येऽन्यथा भक्तिः कुलस्त्रीणां न भर्तरि ॥ १८ ॥ तदादायैत्य चौकः सा कुट्टिन्यै तद्ददन्त्यदात् । अनङ्गसेनासंयुक्ते कृतपुण्येऽथ पश्यति ॥ १९ ॥ यत्तया प्रेषिता देहभूषाऽपि

---

१ धननाम्नस्तत्पितुः, २ गृहम्. ३ मरणम्. ४ कुलीना.

कुलयोषिता । तदिक्षुकूर्चकल्पेन निर्धनेनामुना कृतम् ॥ २० ॥ ध्यात्वेति तस्य गेहिन्यां कृपालुः शंभुसखी ततः । ऋषां प्रत्यर्पयामास दीनारायुतसंयुताम् ॥ २१ ॥ अनङ्गसेनां सा प्राह त्यज्यतां पुत्रि सम्प्रति । निर्धनः कृतपुण्योऽपि दूना सेति निशम्य च ॥ २२ ॥ विज्ञायास्ते कथं मातर्वक्तुं युक्तं ऋवेदिदम् । सेव्या कृतज्ञता क्वापि लोऋ एव न केवलः ॥ २३ ॥ सदा सर्वस्वदातारमेनं त्यक्तुं न चोत्सहे । प्राणा न यं विना स्थातुं देहे गेहे मम क्षमाः ॥ २४ ॥ तस्या इत्याग्रहं साऽथ निश्चित्य निजचेतसि । कृत्वाऽवज्ञां कुट्टिनी तं स्वगृहान्निरसारयत् ॥ २५ ॥ पश्चात्तापपरो बाढं सोऽपि स्वगृहमागतः । प्रियोपचरितः सर्वं व्यस्मार्षीत्तत्परान्नवम् ॥ २६ ॥ रात्रौ सुरतसंपर्काज्जर्ज्जे ऋाग्योदयाद्धौ । बाला सा खलु बालार्कमिव पूर्वाऽञ्चूलिका ॥ २७ ॥ तामूचे कृतपुण्योऽथ प्रेयसि व्याहरामि किम् । ऋस्मन्याहुतिवह्नास्त्राधीतिर्जाता वृथा मयि ॥ २८ ॥ धनं पित्रा धनेनाहं निधनं नीतवान् समम् । त्वय्युपकृतवान् यन्न तदाख्यातुमपि क्षमः ॥ २९ ॥ निःश्रीकः साम्प्रतं दौःस्थ्यव्यालेन व्याकुलीकृतः । मूलऽद्रव्यं विना तन्वि वाणिज्यं करवाणि किम् ॥ ३० ॥ सा सहर्षमऋाषिष्ट प्रियालङ्करणादि मे । गृहीत्वा कुरु वाणिज्यं दुर्गदौःस्थ्यद्रुमाशनिम् ॥ ३१ ॥ पण्यं क्रीत्वाऽथ तैर्नानादेशोचितमसौ जवात् । प्राचीं प्रति प्रतिष्ठासौ सार्थे सन्ध्याक्षणेऽगमत् ॥ ३२ ॥ अन्वायान्तीं प्रियां तत्र निर्वर्त्य कृतपुण्यकः । विशश्राम क्वचिन्निऋोज्झितो देवकुले तदा ॥ ३३ ॥ इतश्चेन्यप्रिया काचिदस्ति वैषीयसी तदा । वास्तव्या तत्र तस्यास्तु पुत्रः सांयात्रिकोऽजनि॥३४॥

१ कुट्टिनी. २ अयुतं दशसहस्रम्. ३ प्रिययोपचरितः सेवितः. ४ कुट्टिनीपरान्नवम्. ५ वृद्धा.

अपुत्रो यानपात्रस्यान्तं गतोऽमृत सोऽम्बुधौ । ऋणो मा ह्रातु मे लक्ष्मीं सेति वार्तामगोपयत् ॥ ३५ ॥
तं साथ सार्थमन्येत्य दृष्ट्वा च कृतपुण्यकम् । स्वौक आनीय चाऽम्ब्य गलं तस्य रुदत्यवक् ॥ ३६ ॥
ध्यन्तं कालं हा पुत्र कुत्र त्वं प्रस्थितोऽनवः । मां मातरं परित्यज्य ऋण कुत्र स्थितोऽसि वा ॥ ३७ ॥
त्वं जात जननादेव हृतः केन दुरात्मना । नामतः श्रीविलासोऽसि मा कार्षीर्हृदि संशयम् ॥ ३८ ॥
सार्थेऽत्रैव निमित्तैरद्यैव तव सङ्गमः । सूचितस्तेन त्वद्धेतोरानीतं स्त्रीचतुष्टयम् ॥ ३९ ॥ एतासां सुऋ-
गाङ्गानां श्रीणां स्त्रीणां चतसृणाम् । अवियोगेन ऋोगेन वृद्धिं त्वं वत्स गच्छ ऋोः ॥ ४० ॥ ततस्तस्या
निशम्येति वचोवैचित्र्यमद्भुतम् । विस्मितः कृतपुण्योऽदश्चिन्तयामास चेतसि ॥ ४१ ॥ अयं स्वयंवरो
योगः श्रीणां स्त्रीणामुपस्थितः । तदनेन विचारेण कृतं मे स्वार्थशत्रुणा ॥ ४२ ॥ तां चोचेऽम्ब न मेऽ-
त्रास्ति स्मृतिः काऽपि पटीयसी । परं स्थवीयसी चात्र प्रमाणं मे त्वमेव हि ॥ ४३ ॥ तस्य वध्वश्चत-
स्रोऽपि प्रीतिस्फीतिस्पृशः स्वयम् । वेधाऽपि कृतपुण्येशेऽवर्तन्त स्वपताविव ॥ ४४ ॥ अङ्गजान् जन-
यामासुश्चतस्रोऽपि क्रमेण ताः । तस्येति ऋोगसंसर्गाद् द्वादशाब्दी ततोऽत्यगात् ॥ ४५ ॥ वृद्ध्या सन्ता-
नवृद्ध्या स्वं कृतार्थं गणयन्त्यसौ । वधूचतुष्टयं तुष्टाऽऋाषिष्ट स्फुटमित्यथ ॥ ४६ ॥ सुतप्राप्त्या कृतार्थाः
स्थाधुनाऽलं तेन मुञ्चत । कस्याग्रहः सुगृहीतामोदे माद्ये ऋवेदिह ॥ ४७ ॥ ॐमिति प्रतिपद्यैतत्ता
अप्येतस्य शम्बले । मोदकै रत्नगर्भैः स्राक् ऋस्त्रां कृत्वोपधौ न्यधुः ॥ ४८ ॥ वृद्ध्याऽयं सपर्यङ्को निद्रा-
मुद्रितलोचनः । चेटीभिर्मोचितस्तस्मिन्नेव देवगृहे निशि ॥ ४९ ॥ प्राच्यः स एव सार्थोऽपि तस्थौ तत्रैव

तत्पुरः । घटने घटमानस्य पाटवं नास्ति किं विधेः ॥ ५० ॥ जरत्या जागरूकः स ज्ञात्वा तत्कर्मनिर्मितम् । निरुपार्जनमात्मानं निन्दति स्म मुहुर्मुहुः ॥ ५१ ॥ श्रुत्वा सार्थं तमायातं कृतपुण्यस्य वह्वन्ना । प्राहिणोदेककं पत्तिं प्रियोदन्तबुभुत्सया ॥ ५२ ॥ ऋऊ ऋऊं समस्त्यस्या अपत्यं किमऋत् पुनः । तेनेति ऋाषितः पत्तिः सुतजन्म न्यवेदयत् ॥ ५३ ॥ दत्त्वा पत्तिकरे ऋक्तां मोदकानां धनात्मजः । धनानर्जनविद्ायो गच्छति स्म गृहे निजे ॥ ५४ ॥ सत्कृत्य ऋक्तितः साऽथो अभ्युत्थानादिना प्रियम् । चक्रे स्नानार्थमभ्यङ्गं तस्य शस्यमतिः क्षणात् ॥ ५५ ॥ तदानीं लेखशालाया आयाताय सुताय सा । तन्मध्यात्सा ददावेकं मोदकं चित्तमोदकम् ॥ ५६ ॥ तं खादन् रममाणः स ययौ कांदविकापणे । पपात मोदकाऽऽत्तं जलामत्रे[1] शिलामये ॥ ५७ ॥ तद्दीप्याम्बु द्विधा ऋतं जलकान्तममुं मणिम् । मत्वा कान्दविको बालं तं विप्लाव्य तमग्रहीत् ॥ ५८ ॥ इतश्च सेचनाख्योऽगात् पट्टदन्ती क्षितीशितुः । नद्यन्तः स पदोर्बद्धस्तन्तुना तोयजन्तुना ॥ ५९ ॥ तद्विज्ञफजपालोऽथ महीशित्रे न्यवेदयत् । सोऽपि जाग्रच्चतुर्बुद्धिनिधयेऽभयमन्त्रिणे ॥ ६० ॥ जलकान्तमणिः क्वापि नापि तेनाप्यदस्ततः । घोषितं पटहेनोच्चैर्नगरे निखिलेऽपि हि ॥ ६१ ॥ जलकान्तमणिं कश्चिदुपानयति यो जवात् । तस्मै यच्छति धात्रीशः सुतां राज्यार्धसंयुताम् ॥ ६२ ॥ श्रुत्वेति मुदितः कान्दविकः स क्षोण्यधीशितुः । ढौकयामास वेगेन जलकान्तमहामणिम् ॥ ६३ ॥ द्विधा व्यधान्मणिः सोऽथोरुप्रज्ञावो नदीपयः । नीराज्ञावेन जन्तुः स ज्ञिया

१ जलपात्रे.

नंष्ट्वा गतः क्वचित् ॥ ६४ ॥ कुशलेन करी स्थानमाजगाम निजं क्षणात् । घौषिकोऽपि हि तद्वाक्यं कांक्षन् हृष्टोऽधिकं हृदि ॥ ६५ ॥ दास्यामि कन्दुवित्ताय कथं पुत्रीमहं निजाम् । नृपोऽभूत्कान्दविन्येव व्याकुलश्चिन्तयाऽनया ॥ ६६ ॥ नरेश्वराशयं ज्ञात्वाऽभयोऽथ भयकारिणा । वचश्चयेन निर्भर्त्स्य तं यथार्थमचीकथत् ॥ ६७ ॥ अभयोऽभिदधौ युक्तस्तव हेहे रत्नसंभवः । संभवेत् सुरतरुः क्वापि किं नन्दनवनं विना ॥ ६८ ॥ भूपकन्याऽगण्यपुण्या कृतपुण्येन सा ततः । परिणीता च संप्राप्तं राज्यार्धं हस्तमोचने ॥ ६९ ॥ सौहृदं ववृधे तस्याभयेन सह मन्त्रिणा । पुष्पचापस्येव पुष्पकालेनोत्फुल्लपुष्पिना ॥ ७० ॥ ऊचेऽभयं कदाचित्स ससुताः सन्ति मे प्रियाः । चतस्रो नगरेऽत्रैव परं नो वेद्मि तद्गृहम् ॥ ७१ ॥ स्मित्वाऽभयस्तमूचेऽथ स्वगेहं गेहिनीमपि । त्वं न वेत्सि यदेतन्मेऽधुना कौतुकमद्भुतम् ॥ ७२ ॥ ततः स्वेनानुभूतं तद्वृत्तं द्वादशवार्षिकम् । कृतपुण्येन निःशेषं न्यवेद्यभयमन्त्रिणे ॥ ७३ ॥ पुरीपरिसरे यक्षायतनं मन्त्र्यचीकरत् । प्रवेशनिर्गमार्थं च द्वारद्वयमकारयत् ॥ ७४ ॥ प्रतिमां स्थापयामास कृतपुण्याकृतिं तदा । तत्र चेत्यभयो वेगाद् घोषयामास धीसखः ॥ ७५ ॥ नमस्कर्तुममुं यक्षं यः कश्चिन्नागमिष्यति । सकुटुम्बस्य तस्योपद्रोष्यन्ति व्याधयोऽखिलाः ॥ ७६ ॥ श्रुत्वेति तं नमस्कर्तुमागतः पूर्जनोऽखिलः । कृतपुण्याभयाभ्यां तु विशन्निर्यन् विलोकितः ॥ ७७ ॥ तदा वृद्धा चतस्रोऽपि वध्वो यक्षालये क्षणात् । आयातास्तत्र चूमालबालोद्यत्करपल्लवाः ॥ ७८ ॥ वीक्ष्य यक्षं निजप्रेयः सदृशं साश्रुद-

१ मदनस्य. २ वसन्तेन. ३ चूमावन्तो ये पुत्रास्तैरुद्यन्तो हस्तपल्लवा यासां ताः.

ग्युगाः । खिन्ना इत्येवमाहुस्ता विरहेण वितार्दिताः ॥ ७९ ॥ जीवितेशेन चेन्नः स्याद्यद्धराजाद्य संगतिः । तर्हि मोदकसंभारं ढौकयिष्यामहे तव ॥ ८० ॥ उक्त्वेतीतस्ततो दत्तनेत्रास्तत्र स्थितं प्रियम् । निरीक्ष्य सस्पृहा जेजुर्भृशं स्मरशरव्यथाम् ॥ ८१ ॥ बाला यद्दाङ्कमारुह्य तात तातेति वादिनः । सह कण्ठपीठेनाथ विलेगुः प्रस्खलद्गिरः ॥ ८२ ॥ बुद्ध्वान्नयोऽथ तत्सर्वं वृद्धां निर्धाट्य धीसखः । स्त्रियः श्रियश्च ताः सर्वाः कृतवान् कृतपुण्यसात् ॥ ८३ ॥ मिलिताऽनङ्गसेनाऽपि क्रमाद्गोमाञ्चिताऽधिकम् । क्रीमँस्ताभिः प्रियाभिः सोऽतिनैषीद्दायनान् बहून् ॥ ८४ ॥ विहरन् समवासार्षीत्तीर्थकृच्चरमोऽन्यदा । इति व्यज्ञपयन्नार्थं वन्दित्वा कृतपुण्यकः ॥ ८५ ॥ स्वामिन् ग्राम्यन् जवारण्ये किं कर्म कृतवानहम् । जल्प येनात्र संजातः संपदामापदां पदम् ॥ ८६ ॥ निर्व्याजं व्याजहारार्हद्धामे कुत्राप्यजायत । निर्वंशा स्थविरा काचिद्दावदग्धाङ्घ्रिद्रुमिवत् ॥ ८७ ॥ तस्याः सुतो बन्धुवैको बालको वत्सपालकः । स्वां मातरं महे क्वापि ययाचे पायसं तु सः ॥ ८८ ॥ रुदतीं तां तदप्राप्त्या प्रातिवेश्मिकयोषितः । दत्त्वा क्षीरादिसामग्रीमचिरेण न्यवारयन् ॥८९॥ पक्त्वा सा पायसीं तस्य जाजने परिवेष्य च । कार्येण केनचित् प्राप्ता प्रातिवेश्मिकसद्मनि ॥ ९० ॥ तत्रागमत्तदा कोऽपि मासक्षपणकृद्यतिः । तं दृष्ट्वा कुमरः सोऽप्युदस्थाद्गोमाञ्चितः स्वयम् ॥ ९१ ॥ जागमेकमदात्तस्मै पायसस्य स संमदात् । मासोपवासिनः स्तोकमेतदित्यन्यमप्यदात् ॥ ९२ ॥ अदात्तृतीयवेलायां स सर्वमपि पायसम् । जीवः स वत्सपालस्य कृतपुण्योऽजवोऽसिंजोः ॥९३॥

१ त्वम्.

त्रिजिर्ज्ञागैस्त्वया दत्तं पायसं यत्तदा ततः । सुखसंपत्तयस्तेन समजायन्त खण्डिताः ॥ ९५ ॥ श्रुत्वेति प्राग्ज्ञवं स्मृत्वा श्रीमद्वीरपदान्तिके । तपस्तप्त्वा कृतपुण्योऽज्ञवत् सुगतिज्ञाजनम् ॥ ९९ ॥ निःस्नेहत्वं निशम्येति वेश्यानां दयितेष्वपि । विरमन्तु ततो मुक्तिरामाज्ञजनिनोऽपि यत् ॥ ९६ ॥

॥ इति कृतपुण्योदाहरणम् ॥

पुनरत्रैव विशेषोपदेशमाह—

क्व लघुनि गणिकानां हृद्यनेके गवाक्षा, दधति यदनुवेलं ता रसं नव्यनव्यम् ।
तदजनि हृतवृत्तः कूलवालोऽपि तान्निर्गलति हिमगिरिर्वा ज्ञानुज्ञान्निर्दृढाज्ञिः ॥ ११२ ॥

व्याख्या—गणिकानां हृदि हृदयेऽनेके बहवो गवाक्षाः क्व सन्ति ? लघुनि वस्तुनि बहूनामसंज्ञवादित्याश्चर्यं । एतत्कथमित्याह—यद्यस्मात्कारणादनुवेलं प्रतिक्षणं ता वेश्या नव्यनव्यं रसं शृङ्गारहास्यादिकं रसं दधति धरन्ति । तत्तस्माद्धेतोः कूलवालो महात्मा महातपःकर्ताऽपि तान्निर्गणिकाज्ञिर्हृतवृत्तो ज्ञष्टाचारोऽजनि जातः । महान् स कथं जातस्तादृगित्याह—वा यथा दृढाज्ञिर्ज्ञानुज्ञान्निर्निर्विज्ञाज्ञिः सूर्यकान्तिज्ञिर्हिमाचलो हिमगिरिर्गलतीत्यक्षरार्थः । ज्ञावार्थं तूदाहरति—

कूलवालकमुनिकथा—

गच्छेऽजनि मुनिः क्वापि कोऽपि नित्यं प्रमादवान् । शुज्ञोदर्केऽवस्तस्य सूरयः शिक्षयन्ति तम् ॥१॥ शिक्षय-

माणोऽन्यदा दध्यौ गुरुन्निर्गुरुकर्मकः । अहो श्वश्रूवदेते मां तर्जयन्ति पदे पदे ॥ २ ॥ तन्मारयामीति बुद्ध्या गिरिनारगिरेर्गुरोः । तेनावरोहतः क्षिप्तो महालेष्टुः प्रकोपतः ॥ ३ ॥ खाङ्कारेण तमायान्तं मत्वा सूरिर्निजौ क्रमौ । प्रासारयत्ततो लेष्टुर्विचाले निरयाऽयात् ॥ ४ ॥ दृष्ट्वा तद्दुष्टशिष्यस्य चेष्टितं सूरिराट् तदा । प्रोचे चेदीदृशस्त्वं तत्स्त्रीभ्यो भ्रष्टो भविष्यसि ॥ ५ ॥ स प्राह तत्र यास्यामि यत्र तस्या न दर्शनम् । ततः स कानने क्वापि नद्यन्तः प्रतिमां व्यधात् ॥ ६ ॥ तन्नदीदेवताऽन्यत्र तन्माहात्म्यचमत्कृता । स्वकूलं वाहयामास दुःसाधं तपसा हि किम् ॥ ७ ॥ गोपालकादिभिस्तत्रायातैस्तं कूलवालकम् । साधुं समीक्ष्य नाम्नाप्याचचक्षे कूलवालकः ॥ ८ ॥ इतश्च पुरि चम्पायां कोणिकेन महीभुजा । निजौ हल्लविहल्लाख्यौ भ्रातरौ स्नेहसुन्दरौ ॥ ९ ॥ गजं सेचनकं दिव्ये वाससी कुण्डले तथा । याचितौ प्रेयसीवाक्यप्रेरितेन मुहुर्मुहुः ॥ १० ॥ पित्रा दत्तं कथं दन्त्यादिकं दद्म इति त्विमौ । मातामहं तदादाय चेटकं भूपतिं श्रितौ ॥ ११ ॥ दूतेन कोणिकेनैतौ याचितावपि नार्पयत् । चेटकः शरणप्राप्तार्पणं क्षात्रो वृषो न हि ॥ १२ ॥ तं रोषारुणदृक्कोणः कोणिकोऽथान्यषेणयत् । दशान्वीयुः कुमारास्तं कालाद्याः श्रेणिकाङ्गजाः ॥ १३ ॥ इभ्यास्त्रीणि सहस्राणि तावन्तोऽश्वा रथा अपि । त्रिकोट्यः पत्तयस्तेषां प्रत्येकं मिलितं बलम् ॥ १४ ॥ एतावत्कोणिकस्यापि बलं तु प्रभुताधिकम् । सहाष्टादशभिर्भूपैश्चेटकोऽवेष्टयच्च तत् ॥ १५ ॥ बलसङ्ख्या तदा तेषां कालादीनामिवाभवत् । सङ्ख्ययाष्टादशैते तु बलाधिक्यमभूत्ततः ॥ १६ ॥ परस्परं ततो योद्धुं प्रवृत्ताः सुभटास्तयोः । कोपाटोपेन वाञ्छन्तो जयं निजनिजप्रभोः ॥ १७ ॥ कोणि-

केनाऽभिषिक्ताँस्तान् कालादीन् कुमारान् दश । दिव्यैकैकेषुणाऽहिंसीच्चेटको दशभिर्दिनैः ॥ १८ ॥ खिन्नो-ऽथ कोणिको दध्यौ नायं जय्योऽखिलैर्नृपैः । यतोऽसुरानुभावेनेषुणैकेनापि हन्त्यरिम् ॥ १९ ॥ ततोऽहं तं पराजेतुं वरिष्यामि देवताः । एवं ध्यात्वा स्थितः कृत्वाऽष्टमभक्तं स कोणिकः ॥ २० ॥ आकृष्टौ तपसा तस्य सुरासुरवरौ तदा । प्राप्तौ तेनादितावेवं हतं चेटकभूपतिम् ॥ २१ ॥ तावूचतुर्न वध्योऽयं सधर्मत्वेन नौ पुनः । यत्नं शरीररक्षायां विधास्यावस्तवाधुना ॥ २२ ॥ प्रातर्युयुधिरे वीरास्तयोः क्रुद्धोऽथ चेटकः । संदधे कोणिकं हन्तुं बाणं धनुषि दैवतम् ॥ २३ ॥ निर्मितो वज्रिणा वज्रकवचः कोणिकाग्रतः । सन्नाह आयसश्चक्रे चमरेन्द्रेण पृष्ठतः ॥ २४ ॥ आस्फाल्य मार्गणस्तत्र नृपमुक्तोऽपतत् क्षितौ । सत्यसन्धः सोऽपि बाणं तद्दिनेऽन्यं न चामुचत् ॥ २५ ॥ द्वितीयेऽपि दिने बाणो मुक्तोऽभूत्तस्य निष्फलः । एवं दिने दिने नीमं तयोर्युद्धमभूत्तदा ॥ २६ ॥ कोटिर्याऽशीतिलक्षाग्रा सैन्ययोरुभयोरपि । मृता भटानां सोत्पेदे तिर्यक्षु नरकेष्वपि ॥ २७ ॥ भूपाश्चेटकभूपस्य बुद्ध्वा भाग्यविपर्ययम् । स्वं स्वं पुरं ययुः सोऽपि प्रविवेश निजे पुरे ॥ २८ ॥ अथ तस्य बले हल्लविहल्लौ सौप्तिकं सदा । पुर्याः सेचनकारूढौ निर्गत्याक्षिपतां निशि ॥ २९ ॥ ताभ्यां भीतः कोणिकोऽथ तदागमपथेऽकरोत् । खातिकां खादिराङ्गारैः पूर्णां भग्नां तथोपरि ॥ ३० ॥ तस्यां सेचनकारूढौ तत्पार्श्वेऽथागताविमौ । दन्ती सोऽपि विभङ्गेन तां ज्ञात्वाऽग्रेऽगमन्न हि ॥ ३१ ॥ दुर्वाक्यैस्तर्जितस्ताभ्यां तावुत्तार्य स पृष्ठतः । कम्पां दत्त्वा खातिकान्तर्मृत्वाऽगा-

---

१ रात्रियुग्मम्.

दाद्यदुर्गतौ ॥ ३२ ॥ सानुतापौ ऋवाङ्नीतौ नीतौ देव्या जिनस्य तौ । वर्धमानस्य पादान्ते व्रतमाश्रयतः स्म च ॥ ३३ ॥ विशालां नगरीं चम्पाधिप आदातुमक्षमः । प्रत्यङ्गासीदिति श्रान्तचेताः श्रीश्रेणिकात्मजः ॥३४॥ न खनामि पुरीमेनां खरयुक्तैर्हलैरहम् । तर्हि प्राणपरित्यागं क्रियेऽनलजलादिभिः ॥ ३५ ॥ कियत्यतीते कालेऽथायं विखिन्नोऽम्बरस्थया । देव्येत्यमुदितः साधौ रुष्टया कूलवालके ॥ ३६ ॥ "गणियं च मागहियं समणे कूलवालके । रमिज्ज कूणिए राए तो विसालिं गहिस्सए ॥ ३७ ॥" सैन्यार्धसंयुतो गत्वा स्वयं चम्पापुरि त्वयम् । वेश्यां मागधिकां प्रैषीत्कूलवालकसन्निधौ ॥ ३८ ॥ सा ऊचेऽश्राविकीभूय तस्मै पारणके ददौ । मोदकान् रेचकैर्द्रव्यैः पूर्वं संयोजितान्मुदा ॥ ३९ ॥ अतिसारकिणं साधुं तं तन्मोदकभक्षणात् । उपचारमिषात् स्वाङ्गस्पर्शसौख्यास्पदं व्यधात् ॥ ४० ॥ तं पतीकृत्य साऽनैषीत्क्रमात् कोणिकसन्निधौ । संप्राप्य कोणिकानुज्ञां वैशाल्यां प्राविशत् पुरि ॥ ४१ ॥ स ऊर्ध्वरुद्धकं पुर्याः स्तूपं श्रीसुव्रतार्हतः । बुद्ध्वा पृष्टः पुरीवेष्टखिन्नैर्लोकैरपातयत् ॥ ४२ ॥ स्तूपेऽत्र पातिते लोकैश्चेटकक्षापपुण्यवत् । अभज्यत्तदा वप्रं कोणिकः सुभटैर्निजैः ॥ ४३ ॥ आगत्य सत्यकी तस्यां दौहित्रश्चेटकस्य सः । विद्ययोदस्य पूर्लोकमानैषीन्नीलवत्यगे ॥ ४४ ॥ उक्त्या मातामहस्यैष प्रजां मातामहीमिमाम् । नित्यं कुसुमदामेवालीलयत्तत्र संस्थिताम् ॥ ४५ ॥ सर्वाहारपरीहारं विधाय विधिना सुधीः । बद्ध्वाऽयःपुत्रिकां कण्ठेऽदाज्झम्पां चेटको जले ॥ ४६ ॥ निमज्जन्तं तमुद्धृत्य धरणेन्द्रोऽभ्यसस्तः । निजं भवनमानीय प्राशंसद्धर्मबान्धवम् ॥ ४७ ॥ विधायाराधनां तत्र स्थितश्चेटकभूधनः । विपद्य त्रैदशं धाम जगाम सुसमाहितः ॥४८॥

भुक्त्वा द्वादशभिर्वर्षैः पुरीं रासभयोजितैः । हलैर्विखन्य संपूर्णसङ्करः कोणिकोऽभवत् ॥ ४९ ॥ तस्मिन्नेव भवे दुःखं दृष्ट्वा नारकसन्निभम् । स कूलवालकः साधुरभूद् दुर्गतिभाजनम् ॥ ५० ॥ एवं निशम्य वेश्याया वश्यानां दुःखमुल्बणम् । भवन्तु विरतास्तत्रेच्छा वश्येच्छाश्वते सुखे ॥ ५१ ॥

॥ इति कूलवालकसाधुकथा ॥

उक्तं वेश्याद्वारं पञ्चपञ्चाशत्तमं । अथ पञ्चमं मृगयाव्यसनमाह—

व्याधो नान्यहिताय सत्यमसकृद्विश्वस्तजन्तूँस्तुदन्,
न स्वस्मिन्नपि तुष्टये च्युतशरक्रोडादितोऽन्तं व्रजन् ।
मृत्यौ दुर्गतिमाप्नुवँश्च मृगया लोकद्वयार्त्यै ततो,
गांगेयेन स शान्तनुक्षितिपतिस्तस्या निषिद्धस्ततः ॥ ११३ ॥

व्याख्या—एतत्सत्यं, व्याधो मृगयासक्तः पुमान् अन्यहिताय लोकतुष्टये न स्यात्, यतः सोऽसकृद्वारं वारं विश्वस्तजन्तून् विश्वासमापन्नान् जीवान् तुदन् पीडयन् स्यात् । तथा स्वस्मिन्नप्यात्मन्यपि तुष्टये प्रीतये न स्यात् । यतः किं कुर्वन् ? च्युतशरक्रोडादितः च्युतो भ्रष्टः शरो बाणो यस्मात्स तथा क्रोडः शूकरः आदिशब्दाद्व्याघ्रवृकादिपरिग्रहः, च्युतशरश्चासौ क्रोडादिश्च स तथा तस्मादन्तं मरणं व्रजन् गच्छन् सन्निति । च पुनर्मृत्यौ मरणे सति दुर्गतिं नरकगतिं तिर्यग्गतिं वाऽऽप्नुवन् सन् न स्वहितायेति भावः । ततो हेतोर्मृ-

गयाऽऽखेटकव्यसनं लोकद्वयार्त्यै इहलोकपरलोकपीडायै स्यादिति । ततस्तस्मात्कारणात्स प्रसिद्धः शान्त-
नहितिपतिः शान्तनो नाम राजा गाङ्गेयेन तस्या मृगयायाः सकाशान्निषिद्धो निवारित इत्यक्षरार्थः ।
कथा त्वेषा (शान्तननृपकथा)—

हस्तिनागपुरे भूपः शान्तनाख्यो महाबलः । सोऽन्यदा मृगयासक्तो जगाम क्वापि कानने ॥ १ ॥
जह्नुविद्याधराधीशपुत्री गङ्गेति नामतः । परिणीता तेन साऽपि पापर्धेस्तं न्यषेधयत् ॥ २ ॥ क्रमेण
गुर्विणी जज्ञे गङ्गा देवी महाशया । गाङ्गेयो नामतः पुत्रो जात उष्णद्युतिद्युतिः ॥ ३ ॥ भूयोऽपि
मृगयासक्तो बभूव खलु भूपतिः । निषिद्धोऽपि महादेव्या गङ्गया न स्थितस्ततः ॥ ४ ॥ रुष्टा गङ्गा
महादेवी गाङ्गेयतनयं निजम् । गृहीत्वाऽगात्तदा सौवपितृवेश्मनि सत्वरम् ॥ ५ ॥ मातुलैः शस्त्रशास्त्रा-
दिकलाकौशलमद्भुतम् । शिक्षितं भागिनेयस्य गाङ्गेयस्य महौजसः ॥ ६ ॥ लोकोपालम्भभीताऽथ गङ्गा
स्वतनयान्विता । कृत्वा सौधं वने तस्थौ स्वीयशीलेन भूषिता ॥ ७ ॥ तस्मिन्नेव वने भूपः समागान्मृग-
याकृते । बहु युद्ध्वा जितो राजा गाङ्गेयेन सुतेन सः ॥ ८ ॥ तदैव गङ्गयाऽऽगत्य निजं वृत्तं निवेदितम् ।
राज्ञेऽथ मुदितः सोऽप्यश्लिष्यद्गाङ्गेयमङ्गजम् ॥ ९ ॥ भूयोऽपि नृपतिस्तेन निषिद्धो मृगयांहसः । दृष्टा-
न्तोऽयं प्रसिद्धोऽस्ति प्रायस्तु परशासने ॥ १० ॥

॥ इति शान्तननृपकथानकम् ॥

न्यूनोऽप्यस्यैव विशेषोपदेशमाह—

पापर्द्धौ तनुमद्वधोज्झितघृणः पुत्रेऽपि दुष्टाशय-
श्चण्डः खाण्डवपावकादपि मुधा कं कं न हन्याज्जडः ।
किं बाणेन जरासुतो वनगतो विव्याध नो बान्धवं,
प्रापोच्चैर्मुनिघातपातकनरं किं नाजराजाङ्गजः ॥ ११४ ॥

व्याख्या—पापर्द्धौ मृगया विषये तनुमतां प्राणिनां वधेनोज्झिता त्यक्ता घृणा दया येन स तथा । पुनः किंविशिष्टः ? खाण्डवपावकादपि चण्डो रौद्रः । तथा पुत्रेऽपि दुष्टाशयो मारणान्निप्रायः स मुधा वृथा कं कं न हन्यात् जडो मूर्ख इति । तथा जरासुतो जराकुमारो वनगतोऽरण्यवासी सन् बाणेन बान्धवं कृष्णं किं न विव्याध किं न जघान ? अपि तु विव्याध एवेति । तथाऽजराजाङ्गजः श्रीदशरथो मुनिघात-पातकनरं श्रवणनामर्षिहत्यापापसमूहमुच्चैरतिशयेन किं न प्राप किं न लेभे ? अपि तु प्रापेति वृत्ता-क्षरार्थः । उदाहरणानीमानि—

खांडवाग्निकथा—

जनमेजयनृपत्रा यज्ञेऽग्निस्तर्पितस्तथा । घृताहुत्या यथा वृद्धिमध्यास्तैषोऽधिकाधिकम् ॥ १ ॥ तं नि-रीक्ष्य जगद्विघ्नहरणं वज्रिणं व्यधात् । अन्यो न हि क्षमः कश्चिज्जगत्रातुममुं विना ॥ २ ॥ सखाय-

मर्जुनं सोऽपि कृत्वोदस्याग्निमुत्कटम् । मुमोचैतं जगत्त्रातुं वने खाण्डवनामनि ॥ ३ ॥ तेनाग्निना वनं सर्वं रौद्रेण ज्वालितं क्षणात् । ततश्चण्डत्वतः ख्यातः खाण्डवाग्निरिति क्षितौ ॥ ४ ॥

॥ इति परसमयप्रसिद्धा खाण्डवाग्निकथा ॥

अथ जरासुतकथा—

अन्यदा समवासार्षीन्नेमिर्द्वारकापुरि । हरिः पौरपरीवारः स्वामिनं वन्दितुं ययौ ॥ १ ॥ देशनान्ते नमस्कृत्याप्राक्षीत्तीर्थेश्वरं हरिः । द्वारकाया यदूनां च क्षयो मृत्युश्च मे कुतः ॥ २ ॥ स्वाम्यूचे शौर्यदुर्ग्रस्य बाह्योद्याने स्थिताश्रमे । पाराशर इति ख्यातस्तापसाग्रेसरोऽभवत् ॥ ३ ॥ गत्वाऽसौ यमुनाद्वीपे काञ्चिन्नीचकुलां स्त्रियम् । सिषेवेऽभूत्तयोः पुत्रस्ततो द्वीपायनाभिधः ॥ ४ ॥ परिव्राट् सोऽपि दान्तश्च यदूनां सौहृदाद्वने । तपस्यन्नत्र मद्यान्धैः शाम्बाद्यैर्निहनिष्यते ॥ ५ ॥ स क्रुद्धो द्वारकादाहं विधाता सह यादवैः । जराकुमारः स्वभ्राता तवान्तं तु करिष्यति ॥ ६ ॥ कुलाङ्गारोऽयमित्येष निन्द्यमानोऽथ यादवैः । दध्यौ स्वभ्रातृघाती स्यां कथं कुर्वे तदन्यथा ॥ ७ ॥ ततोऽसौ कृष्णरक्षार्थं कोदण्डी कानने गतः । मद्यमूलो ह्यनर्थोऽयं कृष्णो मद्यं न्यषेधयत् ॥ ८ ॥ कदम्बवनकुण्डेषु कृष्णादेशेन पूर्जनः । नीत्वा मद्यानि सर्वाण्यत्याक्षीत्तज्ञाणकान्यपि ॥ ९ ॥ अन्येद्युर्माधवे मासि कश्चिद्भाम्बस्य पूरुषः । तत्राटव्यामटन् दृष्ट्वा तृषार्तस्तां सुरां पपौ ॥ १० ॥ हृष्टस्ततोऽयमापूर्य दृतिं तेनैव सीधुना । ददौ शाम्बाय सोऽप्याशु पायं पायं जहर्ष तत् ॥ ११ ॥ क्वास्तीति पृष्टः सोऽवादीत्तत्रस्थं शीधु तत्ततः । कुमारैर्निखिलैः साकं

शाम्बः स्वाक् तत्र जग्मिवान् ॥ १२ ॥ पिबन्तस्ते सुरां तृप्तिं चिरप्राप्तेति नाप्नुवन् । मद्यान्धैस्तत्र क्रीरु-
ङ्निर्दृष्टो द्वीपायनो मुनिः ॥ १३ ॥ शाम्बोऽवक् स्वान् जनानेवं हन्ताऽयं नः पुरीकुले । ततो ऽग्मार्य-
तामेष मृतः किं मारयिष्यति ॥ १४ ॥ सोऽथ तैस्ताडितो रुष्टैश्चपेटालेष्टुमुष्टिभिः । मृतप्रायं विधायैतं
ते ययुः स्वस्ववेश्मसु ॥ १५ ॥ कृष्णो विषण्णो विज्ञाय तत्तेषां दुष्टचेष्टितम् । ततो रामयुतोऽगच्छत्तत्र
सान्त्वयितुं मुनिम् ॥ १६ ॥ मत्पुत्रैर्मद्यपानान्धैर्यत्तवापकृतं मुने । तत्सहस्व हि ते कोपो नोचितीमञ्चति
प्रभो ॥ १७ ॥ हरिणेत्युच्यमानोऽप्यशाम्यद्द्वीपायनो न हि । आख्यच्च किं तवोक्त्या यन्निदानं प्राग्मया
कृतम् ॥ १८ ॥ सलोका द्वारकापूर्मे हन्तव्येति युवां विना । ततो निषिद्धो रामेण गोविन्दस्तं प्रशामयन्
॥१९॥ ततो हरिः पुरीमेत्य जनान् सर्वानचीकरत् । विशेषधर्मकृत्यानि धर्मो हि दुरितच्छिदे ॥२०॥ इतश्च
समवासार्षीन्नेमिस्तत्र तीर्थकृत् । प्रबुद्धाः प्राव्रजन् केचित्कुमाराः स्वामिसन्निधौ ॥ २१ ॥ कृष्णपृष्टो
जिनोऽवादीद्वादशेऽब्देऽथ धक्ष्यति । द्वीपायनो द्वारकां तद्धत्वा विष्णुर्विषण्णवान् ॥ २२ ॥ व्यचिन्तय-
दरिर्धन्याः समुद्रविजयादयः । येऽग्रे प्रव्रजुर्धिङ्मां महामोहविमम्बितम् ॥ २३ ॥ विज्ञाय तदभिप्रायं
स्वाम्यूचे मा विषीदतु । जनार्दनाः प्रव्रजन्ति न यतस्ते निदानिनः ॥ २४ ॥ निश्चितं यान्ति ते श्वभ्रे
त्वं गन्ता वालुकाप्रभाम् । ततश्च्युतोऽत्र भरते तीर्थकृत्त्वं भविष्यसि ॥ २५ ॥ ब्रह्मलोकं बलो गन्ता
भावी मर्त्यस्ततश्च्युतः । सुरी भूत्वा ततस्तस्माच्च्युत्वा भाव्यत्र मानवः ॥ २६ ॥ उत्सर्पिण्यां तु भाविन्यां
तीर्थे तीर्थकृतस्तव । लब्धा सिद्धिं ततो नेमिं नत्वाऽगाद्द्वारकां हरिः ॥ २७ ॥ विपद्याग्निकुमारेषूत्पेदे

द्वीपायनो मुनिः । पूर्ववैरमनुसृत्याथागच्छद्द्वारकां पुरीम् ॥ २८ ॥ षष्ठाष्टमादितपस्यासक्तं वीक्ष्याखिलं जनम् । ग्लान्यालोकयत्सोऽथ तत्रोपद्योतुमक्षमः ॥ २९ ॥ ततोऽब्दे द्वादशे लोकः प्रमादान्मद्यपोऽभवत् । द्वीपायनस्तदा लब्धच्छिद्रो लोकमुपाद्रवत् ॥ ३० ॥ वातोन्मूलिततरुन्निः प्रपूर्य द्वारकापुरीम् । षष्टिं बाह्याः कुलकोटीर्द्वासप्ततिं च मध्यगाः ॥ ३१ ॥ संपिण्ड्य व्रजतो लोकान्नंष्ट्वाऽप्यानीय चाखिलान् । अथोददीपयत्पुर्यामग्निं द्वीपायनः सुरः ॥ ३२ ॥ युग्मम् ॥ सबालवृद्धाः पौरास्ते सुरेण स्तम्भिनास्तथा । यथा गन्तुं पदमप्यशक्ता निगडिता इव ॥ ३३ ॥ बलाच्युतावथोचे स युवां यातमितो द्रुतम् । न मोह्यो व्यसनादस्माद्यतेऽन्यस्य कस्यचित् ॥ ३४ ॥ निर्यातौ तौ ततः पुर्या दधानावधृतिं हृदि । कृष्णः स्माहार्य यावः क्व विरुद्धं सर्वमावयोः ॥ ३५ ॥ आख्यद्रामः पाण्डवा नो बान्धवाः सन्ति तद्गृहे । यावोऽधुनेति तौ पाण्डुमथुरां प्रति चेलतुः ॥ ३६ ॥ यान्तौ तावन्यदा प्राप्तौ हस्तिकल्पं पुरं पथि । क्षुत्क्षाममच्युतं मत्वा बलभद्रो जगावदः ॥ ३७ ॥ अप्रमत्तो भव भ्रातर्यथाऽहं भक्तहेतवे । गच्छाम्यत्र पुरे कष्टे सति द्वेम्ना करिष्यते ॥ ३८ ॥ तां श्रुत्वा शीघ्रमागच्छेरित्युक्त्वाऽसौ पुरेऽगमत् । पौरैः सीरीत्युपालक्ष्य निजराज्ञे न्यवेदि सः ॥ ३९ ॥ अङ्गुलीयेन रामोऽप्यग्रहीन्नोज्यादि सुन्दरम् । गोपुरे यावदायातो बलदेवो महाबलः ॥ ४० ॥ अवदन्तस्तदा भूपः पुरेऽत्र धृतराष्ट्रभूः । हृतशेषीकृतः पूर्वं कृष्णादेशेन पाण्डवैः ॥ ४१ ॥ पौरेभ्यो राममायातं श्रुत्वा वैरं स्मरँश्च तत् । आययौ गोपुरे सोऽपि हन्तुं तावद्बलं बली॥४२॥ भक्तादिकं बलो मुक्त्वेभस्तम्भमुदपाटयत् । द्वेम्नां कृत्वाऽरिसैन्यं तु निहन्तुमुपचक्रमे ॥ ४३ ॥ श्रुत्वा

द्वेरुं च गोविन्दोऽप्यागतस्तद्बलं खलु । हत्वा केशैश्च धृत्वा तं वश्यं कृत्वा जगाविति ॥ ४४ ॥ नागा-
दद्यापि दोर्दण्डबलं मे क्काप्यरे कृतम् । त्वया किमथ राज्यं स्वं भुंक्ष्व मुक्तो मयाऽधुना॥ ४५ ॥ उक्त्वेति
तौ वने गत्वा भुक्त्वा च प्रस्थितौ ततः । कौशाम्बीकानने रामगोविन्दौ जग्मतुः क्रमात् ॥ ४६ ॥ कृष्णं
तृष्णातुरं मत्वा जलार्थं हलभृत्त्वगात् । पीतवस्त्रावृतः कृष्णः सुप्त्वापाध्वतरोस्तले ॥ ४७ ॥ कोदण्डपा-
णिस्तत्रागाज्जराघ्नत्वक्कृचीवरो भ्रमन् । जारेयोऽपि हरिं चैणधियाऽहँस्तीक्ष्णपत्रिणा ॥ ४८ ॥ रयादुत्थाय
कृष्णोऽथ विनाऽऽगोऽस्म्याहतः पदे । केनचित्सोऽप्यथाख्यातु कुलं स्वं हेतु नाम च ॥ ४९ ॥ स वृक्षा-
न्तरितोऽवादीद्वसुदेवतनूरुहः । जराकुमार इत्याख्यो रामकृष्णानुजोऽस्म्यहम् ॥ ५० ॥ निशम्य नेमिनो
वाचं कृष्णरक्षार्थमागमम् । अत्र निर्मानुषेऽरण्ये कस्त्वमित्थं वदन्नसि ॥ ५१ ॥ गोविन्दोऽथ जगादैव-
मागच्छागच्छ सत्वरम् । तव भ्राता स एवाहं यदर्थं वनवास्यसि ॥ ५२ ॥ श्रुत्वा तत्किमयं कृष्ण इति
ध्यायन् जरासुतः । तदैवागाद्धरिं वीक्ष्यातुष्टां मूर्ध्नां जगाम च ॥ ५३ ॥ भ्रातः किं द्वारका दग्धा यदूनां
किं क्षयोऽजनि । यत्त्वत्रागमश्चेति पृष्टं सर्वं शशंस सः ॥ ५४ ॥ असमाधिं दधानं तं हरिः संबोध्य
बान्धवम् । रामाज्ञीतिं प्रदर्श्याथ प्राहिणोत् पाण्डवान्तिके ॥ ५५ ॥ ततो जनार्दनः पादवेदनार्तः कृता-
ञ्जलिः । श्रीनेमीशगुणानस्तौत् प्रणत्य परमेष्ठिनः ॥ ५६ ॥ ततोऽसौ संस्तरे तार्णे स्थित्वा पीताम्बरोऽस्म-
रत् । धन्या नेमिमुखा मोक्षं गन्तारो ये प्रव्रज्य च ॥ ५७ ॥ धिङ्मां विरुम्बनापन्नमेवं भावयतो हरेः ।
कल्पान्तकालानिलवत् प्रववौ प्रबलोऽनिलः ॥ ५८ ॥ तेनार्दितोऽथ गोविन्दः पुनरेवमचिन्तयत् । द्वीपा-

यनेन पापेन निन्येऽहं कीदृशीं दशाम् ॥५९॥ चेत् पश्याम्यधुनाऽप्येतं हन्मि द्वैपायनं ततः । एवं ध्यायन् हरिर्मृत्वा तृतीये नरके गतः ॥ ६० ॥ रामः पानीयमानीय विज्ञाय भ्रातरं मृतम् । निर्मूलद्रुमवत्पूर्णं पृथ्वीपीठेऽलुठत्ततः ॥ ६१ ॥ स्कन्धेऽधिरोप्य तत्कायं भ्रातृस्नेहाद्बलोऽन्वहम् । पर्यटन्नटवीं मासानतिचक्राम षट् तदा ॥ ६२ ॥ बोधितो मित्रदेवेन रामः संस्कृत्य तद्वपुः । परिव्रज्य गुरूपान्ते मृत्वाऽगात् पञ्चमीं दिवम्॥६३॥श्रुत्वेत्यकृत्यकारित्वं लुब्धकानां महांहसाम्। पापर्द्धिपापमासेव्यं न धीरैः शिवकांक्षिभिः॥६४॥

॥ इति जरासुतोदाहरणम् ॥

अथ श्रीदशरथकथा—

श्रीअयोध्याधिपतिः श्रीदशरथनृपः कदाचिन्मृगयासक्तो वने क्रीडन् गजगर्जितं श्रुत्वा सहसा तन्मारणाय बाणं मुमोच तेन बाणेनान्तरा नद्यां घटमम्भसा पूरयन् श्रवणो मुनिपुत्रो मारितः । ततस्तत्रायातयोस्तत्पित्रो रुदतोः शब्दमाकर्ण्य भूपोऽपि तत्रायातोऽसमाधिं दधत्तयोः पादयोः पतितः, क्षमयन् सँस्ताभ्यां त्वमपि पुत्रदुःखेन मरिष्यसीति शप्तः । ततः सोऽपि स्वपुत्ररामलक्ष्मणदुःखेन मृत इति क्लेशतोऽयमत्रिहितो दृष्टान्तः । विस्तरस्तु परसमयपुराणादवसेय इति ॥

उक्तं पञ्चमं पापर्द्धिव्यसनद्वारं । अथ षष्ठं चौर्यव्यसनमाह—

चौरा दुःखमुपैति नारकसमं सत्योऽपि तत्सन्निधेः,
शुष्केप्रज्वलतीह सार्द्रमपि किं नो वह्निना दह्यते ।

सङ्घोल्लुण्टनसञ्जादग्धचरटग्रामेऽग्नितप्तप्रजा-
मध्योत्पत्तिन्नवे समं सगरजैः किं किं न लेन्ने तदा ॥ ११५ ॥

व्याख्या—चौरा नारकसमं नारकीयसमानं दुःखमुपैति प्राप्नोति तद्युक्तं, परं सत्योऽपि तत्सन्निधेश्चौरसङ्गतेर्नारकसमं दुःखमुपैति । तथा शुष्के तृणादौ प्रज्वलति सार्द्रमपि किं नो (वह्निना) दह्यते ? अपि तु दह्यत एवेति । तथा सङ्घोल्लुण्टनरूपो योऽसौ दोषो मन्तुस्तेन दग्धो योऽसौ चरटनामग्रामस्तस्मिन्नग्नितप्तप्रजा अग्निना ग्रामदाहाग्निना या तप्ता प्रजा लोकस्तन्मध्योत्पत्तिन्नवेऽन्तरोत्पत्तिन्नवे सगरजैः सगरचक्रिपुत्रैः समं सह किं किं दुःखं न लेन्ने ? अपि तु सर्वमपि लेन्ने प्राप्तमित्यक्षरार्थः । कथा त्वियम् (सगरपुत्रकथा)—

अष्टापदगिरेः पार्श्वे ग्रामोऽस्ति चरटाभिधः । तत्र सर्वो जनः प्रायो रक्तश्चौर्यादिकर्मसु ॥ १ ॥ अन्यदाऽष्टापदे तीर्थे गच्छन् जिननिनंसया । सङ्घः कश्चिच्च तत्रत्यैर्लुण्टाकैर्लुण्टितः पथे ॥ २ ॥ ततः सङ्घजनैर्देशाधीशायैतन्निवेदितम् । तेनापि कुपितेनाथ ग्रामः स ज्वालितोऽखिलः ॥ ३ ॥ द्वितीयचक्रभृत्पुत्रजीवास्तत्र जनास्तदा । वह्निप्रज्वलिताः षष्टिसहस्रप्रमिता मृताः ॥ ४ ॥ सर्वेष्वनेन प्राज्येषु सामुदायिककर्मणा । म्रियमाणाः सममेवाक्षिपँस्ते कर्म तद्बहु ॥ ५ ॥ ततः संसारकान्तारे भ्रमन्तस्ते मुहुर्मुहुः । द्वितीयचक्रिणः पुत्रत्वावेनोत्पेदिरे क्रमात् ॥ ६ ॥ अन्यदाऽष्टापदस्याऽधेः परितः परिखाममी । कुर्वन्तो

भवनपतिसुरैस्ते वारिता अपि ॥ ७ ॥ न स्थिताश्चानीतगङ्गाम्बुना तद्भवनोपरि । कुर्वन्तः कर्दमं वह्नि-
कुमारैर्ज्वालिताः समम् ॥ ८ ॥ युग्मम् ॥ इति दृष्टान्तलेशोऽयं ग्रन्थविस्तरभीरुणा । दर्शितोऽजितचरित्रं
विलोक्यं विस्तरार्थिना ॥ ९ ॥

॥ इति सगरपुत्रकथा ॥

कुटुम्बमध्येऽपि चौर्यं कृतं दुःखाय स्याद्यतो "मित्रपुत्रकलत्राणि भ्रातरः पितरोऽपि हि । संसज्जन्ति
क्षणमपि न म्लेच्छैरिव तस्करैः ॥ १ ॥" इत्येवमेव दर्शयति—

चोर्यं स्वेन च वर्णकेन च कृतं मूढा दुरन्तं भवे-
द्राज्ञा मण्मिकशालकोऽपि न हतः श्रीमूलदेवेन किम् ।
किं चैतत्त्रिजगत्प्रियोऽपि मदनस्तच्चित्तचौर्योद्यतः,
शापं प्राप न किं प्रजापतिगिरा दाहं च रौद्राग्निना ॥ ११६ ॥

व्याख्या—हे मूढाश्चौर्यं स्वेन च निजेनापि वर्णकेन च सम्बन्धिनाऽपि कृतं सद्दुरन्तं दुःखावहं स्याद्भ-
वेदिति । राज्ञा मूलदेवेन मण्मिकशालकोऽपि किं न हतो न मारितः ? अपि तु हत एवेति । तथा च
पुनरेतत् किं ? न किञ्चिदित्यर्थः, यतस्त्रिजगत्प्रियोऽपि त्रैलोक्यवल्लभोऽपि मदनः कामस्तच्चित्तचौर्यो-
द्यतः तयोः प्रजापतिरुद्रयोश्चित्तचौर्याय मनोहरणायोद्यतः सावधानः सन् प्रजापतिगिरा ब्रह्मवाण्या किं

शापं न प्राप ? अपि तु प्रापैवेति । च पुना रौद्राग्निना गिरिशवह्निना दाहमपि किं न प्राप ? अपि तु प्रापैवेत्यक्षरार्थः । कथाश्चेमाः—

मणिकचौरकथा—

पुरं बेन्नातटं नाम धाम रम्यतमश्रियाम् । जनो यस्मिन् दानपुण्यव्यसनी निखिलोऽपि हि ॥ १ ॥ मूलदेवो नृपस्तत्र यस्यात्र यशसः पुरः । नीहारहारकल्पोऽपि सोमः श्यामवपुर्बभौ ॥ २ ॥ तस्याथ देवतादत्तं राज्यमाशासतः सतः । तस्करोपद्रुतोऽन्येद्युरिदं व्यज्ञपयज्जनः ॥ ३ ॥ दुर्लभा नीतिवार्ताऽप्यद्य यावज्जवति प्रजौ । परं सम्प्रति नः कश्चित्संतापयति तस्करः ॥ ४ ॥ ततस्तेनाखिलाः प्रोक्ता नगरारक्षका इति । किं रे स्वापपरैः पुर्यां तस्करोऽपि न शिक्ष्यते ॥ ५ ॥ तेऽथ प्रोचुः प्रजो कश्चिच्चौरो दिव्यपराक्रमः । निश्यन्येति परं विद्याबलोऽसौ शिक्ष्यते कथम् ॥ ६ ॥ नृपो लोकं विसृज्याथ परिव्राजकवेषभृत् । रात्रौ भ्रान्त्वाखिले ऽङ्गे तस्थौ जीर्णशिवालये ॥७॥ तदानीं मणिकाभिख्यश्चौरस्तत्र समागतः । कोऽप्यस्तीति वदन्नाज्ञाऽप्यहमस्मीति जल्पितः ॥ ८ ॥ कस्त्वमित्युदितो भूमान्मन्दं मन्दमदोऽवदत् । भ्रान्त्वा क्षोणितलं खिन्नः परिव्राड् निर्धनोऽस्म्यहम् ॥ ९ ॥ धनार्थी चेत्त्वमागच्छ सार्थे मे यद्धनं धनम् । ददामीत्युदितस्तेन मूलदेवस्तमन्वगात् ॥ १० ॥ सोऽथ कस्यचिदिज्यस्य गृहे क्षात्रमपातयत् । रत्नपेटीं च निष्कास्य ददौ भूधनमूर्धनि ॥ ११ ॥ पुरस्कृत्य नृपं सोऽपि कस्मिँश्चिद्दुर्गमे वने । गत्वा स्थानेऽतिगहने निन्येऽथ

निजकन्दराम् ॥ १२ ॥ गृहीत्वा रत्नपेटीं स सुष्वापान्तर्गृहं कुधीः । पूर्वसंकेतितां जामिं नियोज्यास्यां-
ह्रिधावने ॥ १३ ॥ साथ तं दिव्यरूपाढ्यं निन्नाल्याम्नोजलोचना । दध्यावद्य मम भ्राता कञ्चिद्राजान-
मानयत् ॥ १४ ॥ कूपे मयाऽत्र पापिन्या पादधावनवह्नना । क्षिप्ता भ्रात्राज्ञयाऽनेके मानवा लोपुत्रवा-
हकाः ॥ १५ ॥ परमेनं कथं पृथ्वीनाथं हन्मि मुधाऽधुना । ततस्तया निजाचारः सर्वो राज्ञे निवेदितः
॥ १६ ॥ उक्तश्च जीवितार्थी त्वं चेत्तद्याहि द्रुतं नृप । नष्टे तस्मिँस्तया चायं याति यातीति पूत्कृतम् ॥१७॥
ततः कृपाणमाकृष्य मणिरुकोऽपि तमन्वगात् । दारूर्ध्वीकृत्य मार्गेऽथ भूपोऽप्यस्थाद्घने स्वयम् ॥ १८ ॥
तेनाप्यागत्य सहसा छित्त्वा तद्दारु मार्गगम् । स्वगुहामाययौ सौधं निजमागान्नृपोऽपि हि ॥ १९ ॥
तत्प्राप्तिमुदितः प्रातर्भूपोऽयात्तद्गुहामपि । उपविष्टं क्वचिद्दृष्ट्वा तं वीक्ष्याकारयत्ततः ॥ २० ॥ दानादि-
नाऽथ सत्कृत्य तं ययाचे क्षमापतिः । तदीयां भगिनीं सोऽपि चेतस्येवमचिन्तयत् ॥ २१ ॥ प्रनष्टो यस्तु
शर्वर्यां स एवायं नृपो ननु । नो चेद्वेत्ति कथं जामिं मम तत्र स्थितामयम् ॥ २२ ॥ परिणाययाम्यस्याहं
चेदेतां न च साम्प्रतम् । तर्हि मां मारयित्वाऽयं स्वयं तु परिणेष्यति ॥ २३ ॥ तत उद्वाहयामास
स्वसारं स्वां नृपस्य सः । बहुग्रामादिदानेन नृपोऽपि सत्कचार तम् ॥ २४ ॥ आनाय्यानाय्य रत्नादि
वस्तु पौरविशामदात् । क्रमेण सर्वं सर्वेषां ददौ स कतिभिर्दिनैः ॥ २५ ॥ तदा दध्यौ नृपः कोऽपि वीक्ष्य
सत्कृतमेतकम् । मा कुर्याच्चौर्यपापानि दुःखदानि भवद्वये ॥ २६ ॥ ततो मिषं समापाद्य किञ्चिद्भूमिपु-

रन्दरः । तं शूलायां समारोप्य मारयामास मण्डिकम् ॥ २७ ॥ निशम्य वधबन्धादि फलं चौर्यतरोरिदम् । ततो निवर्त्य विबुधैरत्र कल्याणकांक्षिभिः ॥ २८ ॥

॥ इति मण्डिकचौरकथा ॥

अथ ब्रह्मसम्बन्धः—

एकदा ध्यानसंलीनमनसो वेधसः पुरः । स्फारशृङ्गारसाराङ्गी गता देवी सरस्वती ॥ १ ॥ स्वपुत्र्यामेव तस्यां तन्मनोऽभूदथ रागवत् । कस्य न स्यान्मनो रागि तादृशीमुखवीक्षणात् ॥ २ ॥ वेधा दध्यावहो केन पुत्र्यां राग्यस्मि कारितः । एवं स्मरन् स्मरं पार्श्वे स्थितं वीक्ष्य चुकोप सः ॥ ३ ॥ इत्थं स वेधसा शप्तस्तच्चित्तस्तैन्यतस्ततः । त्रिनेत्रतृतीयनेत्राग्निना भस्मीभविष्यति (सि) ॥ ४ ॥

॥ इति ब्रह्मसम्बन्धः ॥

अथ रुद्रसम्बन्धः—

षष्टिं वर्षसहस्राणि कृत्वा संभोगमन्यदा । विरक्तो ध्यानमाधाय कैलासाद्रौ स्थितः शिवः ॥ १ ॥ गौरी सत्त्वपरीक्षार्थं स्वपत्युः पुरतो गता । विधाय शबरीरूपमसरूपं रतेरपि ॥ २ ॥ शम्भुस्तां शबरीं वीक्ष्य विस्मृतध्यानचिन्तनः । रिरंसुः प्रार्थयामास तां सुधाबन्धुना गिरा ॥ ३ ॥ साऽप्याख्यन्मत्पुरो नृत्तं वितनु प्राक्ततस्तव । वाचं सफलयामीति सोऽप्यनृत्यच्च तत्पुरः ॥ ४ ॥ पार्वत्यपि विहस्याथ निजं रूपमदर्शयत् । तां वीक्ष्य लज्जितः शम्भुरध्यासीदिति चेतसि ॥ ५ ॥ केन मे पापिना ध्यानं चालितं

किल निश्चलम् । तदा पार्श्वस्थितं कामं समीक्ष्य कुपितो हरः ॥ ६ ॥ ततस्तृतीयनेत्रस्य स नश्यन् ज्वालितोऽग्निना । स्वचित्ततस्करं तं तु कथं मुञ्चत्युमापतिः ॥ ७ ॥

॥ इति रुद्रसम्बन्धः ॥

उक्तं सप्तपञ्चाशत्तमं चौर्यव्यसनद्वारं । अथ सप्तमं परस्त्रीरिरंसाव्यसनद्वारन्तावत् निरूपयति—

पुण्यापुण्यचयेन बुद्धिरमला स्यात्कश्मलाऽप्यङ्गिनां,
वातेनेव युगन्धरी सदसता मुक्ताफलाङ्गारजा ।
लङ्केशो नलकूबरप्रियतमां नाम्नोपरम्भां रता-
मत्याक्षीदरतां च रामवनितां सीतां जहाराशु यत् ॥ ११७ ॥

व्याख्या—अङ्गिनां प्राणिनां पुण्यचयेन धर्मोदयेनामला निर्मला बुद्धिर्भवति, अपुण्यचयेन पापोदयेन कश्मला मलिना बुद्धिः स्यात् । केन केव कीदृशी स्यात् ? इव यथा वातेन सता शुभ्रेन युगन्धरी मुक्ताफलाजा मुक्ताफलसदृशी स्यात्, असताऽशुभ्रेन वायुनाऽङ्गारसदृशी स्यात् इति तात्पर्यार्थः । एतदेवाह—यद्यस्माद्धेतोर्लङ्केशो रावणो धर्मोदयवशान्नलकूबरप्रियतमां नाम्नाऽभिधया उपरम्भां रतां रागिणीमत्याक्षीत्तत्याज, पापोदयादरतां नीरागां रामवनितां श्रीरामप्रियां सीतामाशु सहसा जहार हृतवानित्यद्भरार्थः । कथा चेयम् (रावणकथा)—

पुरं काञ्चनमित्यस्ति काञ्चनश्रीसमाश्रितम् । निधानैर्यस्य रत्नानां रत्नगर्भा नु भूरभूत् ॥ १ ॥ आसीद्दासीकृतारातिर्नृपोऽत्र नलकूबरः । यत्प्रतापानले वैरियशसां शलभायितम् ॥ २ ॥ इतश्च कुर्वन् दिग्यात्रां तत्रागादशकन्धरः । मेलयित्वा निजं सैन्यं संमुखोऽस्य नलोऽप्यभूत् ॥ ३ ॥ दशास्यसैनिकैस्तस्य सैन्यं भग्नं क्षणादपि । किं पञ्चास्यपुरो दन्तिसन्ततिः स्थिरतां श्रयेत् ॥ ४ ॥ दुर्गमध्ये गतो भग्नबलोऽथ नलकूबरः । सैन्ये भग्ने नरेशानां शरणं वप्र एव हि ॥ ५ ॥ असालीविद्यया वह्निप्राकारं परितः पुरम् । निर्माय नृपतिः पुर्या मध्ये तस्थौ स्वयं सुखम् ॥ ६ ॥ आसन्नोऽपि न कोऽप्यस्मिन् दुर्गे भवितुमीशिता । दशास्यसैनिकस्तेन खिन्नः सोऽस्थाद्बहिर्वने ॥ ७ ॥ इतश्च कानने तस्मिन् वसन्तर्तुर्विजृम्भिते । श्रीरभूदधिकादित्यभ्राजिष्णाविव विष्टपे ॥ ८ ॥ प्रोल्लसन्मालतीनव्यकुन्दादिकुसुमच्छलात् । ध्वान्तभ्रान्त्याऽऽगतास्ताराः किं भीतास्तपनातपात् ॥ ९ ॥ तमालालितमःस्तोमश्यामले काननाम्बरे । मालतीनव्यपुष्पाणि राजन्ते तारका इव ॥ १० ॥ तदानीं कानने तस्मिन्नलकूबरवल्लभा । क्रीडितुं स्वेच्छयाऽऽयाता सखीभिः परिवारिता ॥ ११ ॥ क्रीडन्त्याश्च तया तत्र दृष्टः श्रीदशकन्धरः । तद्रूपमोहिता तस्मिन् रिरंसुरिति साऽन्यधात् ॥ १२ ॥ अद्य प्रपद्यसे राजन् प्रियाभावेन मां यदि । तदाऽधुनैव तद्दुर्गभङ्गविद्यां ददामि ते ॥ १३ ॥ खिन्नेन रावणेनाथ प्रपेदे तद्वचस्तदा । तयाऽपि ददे दुर्गभङ्गविद्याऽस्य भूपतेः ॥१४॥ तेनापि साधयित्वा तां विद्यां दुर्गो व्यभज्यत । नलकूबरभूभर्ता बद्धश्च तत्क्षणादपि ॥ १५ ॥

प्रार्थयन्तीं तु तत्पत्नीमुपरम्भामुवाच सः । त्वं मे विद्यागुरुर्भद्रे त्वामिच्छामि कथं ततः ॥ १६ ॥ परं तवापरं कञ्चिदुपकारं करोम्यहम् । इत्युक्त्वा रावणो राज्यं तत्पत्युः प्रत्यदात्ततः ॥ १७ ॥ तेनेत्युक्तश्च मङ्क्षामिमुपरम्भान्निधामिमाम् । पट्टराज्ञीं विधेहि त्वं ततः सोऽपि तथाऽकरोत् ॥ १८ ॥ लङ्केश्वरोऽप्यात्मपुण्योदयादेतां परस्त्रियम् । त्यक्त्वा सौवपुरीं प्राप्य चाऽवत् कीर्तिभाजनम् ॥ १९ ॥

॥ इति रावणसम्बन्ध उपरम्भात्यागे । सीताहरणसम्बन्धस्तु प्रागभिहित इति ॥

अथ परस्त्रीसङ्गान्मूढानां किं किं स्यादित्याह—

मूढः परस्त्रियमुपेत्य कुवाक्यबन्धघातापकीर्तिमृतिदुर्गतिदुःखपात्रम् ।
स्याद्ब्रह्मदारचुलनीरतदीर्घवत्किं, लक्ष्मक्षयादि न विधोर्गुरुतल्पगस्य ॥ ११८ ॥

व्याख्या—मूढो मूर्खः परस्त्रियमुपेत्य प्राप्य कुवाक्यादिदुःखपात्रं स्यात् कुवाक्यानि गालिवचांसि, बन्धो बन्धनं, घातो दण्डादिना ताडनं, अपकीर्तिर्जनापवादः, मृतिर्मरणं दुर्गतिर्नरकतिर्यग्रूपा गतिः, एतासां दुःखानि पीडास्तेषां पात्रं स्थानमिति । किंवत् ? ब्रह्मदारचुलनीरतदीर्घवत् ब्रह्मनामनृपस्य दारा भार्या या चुलनी तस्यां रत आसक्तो यो दीर्घनामभूपस्तस्येव तद्वदिति । तथा गुरुतल्पगस्य बृहस्पतिशय्यागतस्य सतो विधोश्चन्द्रस्य लक्ष्मक्षयादि कलङ्कक्षित्यादिकं कष्टं किं न स्यात् ? अपि तु स्यादेवेत्यक्षरार्थः । चुलनीदीर्घकथा प्राक्थिता । चन्द्रकथा त्वियम्—

दृष्ट्वा गुरुप्रियारूपं राज्यभ्रष्टविधुरन्यदा । जगाम च रिरंसुः स्वाक् तत्सकाशे स्मरातुरः ॥ १ ॥ गृहायातोऽथ धिषणस्तं दृष्ट्वा कुपितो भृशम् । शेपे ततोऽभवच्चन्द्रो लाञ्छनह्रयभाक् सदा ॥ २ ॥

॥ इति चन्द्रसम्बन्धः ॥

उक्तमष्टपञ्चाशत्तमं परस्त्रीरिरंसाव्यसनद्वारं । अथ कषायदुरन्ततामाह—

सुभ्रूमजमदग्निजप्रतिमपुंद्रुमाघर्षजे, कषायदवपावके विषयवात्यया दीपिते ।
महद्गुणवनं दहत्यहह पुण्यकल्पद्रुमस्ततोऽस्ति यदि दैवतः शमघनाघनो वर्षति ॥११९॥

व्याख्या—सुभ्रूमोऽष्टमचक्री जमदग्निजः परशुरामस्ताभ्यां प्रतिमास्तुल्या ये पुंद्रुमाः पुरुषरूपद्रुमास्तेषामाघर्ष आघर्षणं तस्माज्जे जाते, अन्योऽपि पावको द्रुमाघर्षजः स्यादिति भावः । कषायदवपावके कषायदावानले । किंविशिष्टे ? विषयवात्यया दीपिते विषयाः शब्दादयस्त एव वात्या समीरणसमूहस्तेन दीपिते ज्वालिते सति महतां सतां गुणा एव वनं तस्मिन् दहति ज्वलयति सति अहहेति खेदे ततस्तदा पुण्यकल्पद्रुमो धर्मसुरतरुरस्ति धातूनामनेकार्थत्वात्तिष्ठति यदि शमघनाघन उपशमरूपो मेघो वर्षति कषायास्तु गुणान् दहन्ति । यतः—

"कोहो पिइं पणासेइ माणो विणयनासणो । माया मित्ताइं नासेइ लोभो सव्वविणासणो ॥ १ ॥

---

१ गुरुः.

कोहो य माणो य अणिग्गहीया, माया य लोहो य पवड्ढमाणा ।
चत्तारि एए कसिणा कसाया, सिंचंति मूलाइं पुणब्भवस्स ॥ २ ॥"

कषायास्तु शमं विना पुण्यमपि दहन्ति, यतः—

"जह वणदवो वणनिवहमवस्स जलिउं खणेण निद्दहइ । एवं कसायपरिणउं जीवो तवसंजमं दहइ॥१॥"

इत्यादि । इत्यक्षरगमनिका । कथा चेयम्—

सुन्नूमजमदग्निकथा—

श्रीवसन्तपुरात् क्षीणकुटुम्बः कोऽपि बालकः । देशान्तरे व्रजन् सार्थाद्भ्रष्टोऽटव्यां पपात च ॥ १ ॥ सोऽग्निकाख्यो व्रजन्नाम्ना यमं कुलपतिं तदा । संवीक्ष्य दीक्षितस्तेन तपो दुश्चरमाचरत् ॥ २ ॥ यमेन वर्धितोऽयं तन्नाम्नाऽखिलजनेष्वपि । जमदग्निरिति ख्यातिमासवानग्निकस्ततः ॥ ३ ॥ इतश्च मित्रौ द्वौ वैश्वानरधन्वन्तरी सुरौ । मुनितापसभक्तौ स्वस्वगुरून् प्रशशंसतुः ॥ ४ ॥ श्राद्धदेवोऽवदद्दूरे तिष्ठन्तु मुनिपुङ्गवाः । धर्माच्चालयितुं जैनो गृहस्थोऽपि न शक्यते ॥ ५ ॥ अश्रद्दधानस्तद्वाक्यमन्यधादपरः सुरः । तत्परीक्षां विधातास्व इत्युक्त्वा तौ प्रचेलतुः ॥ ६ ॥ इतश्च मिथिलापुर्यां युवा पद्मरथो नृपः । जिघृक्षुः संयमं वासुपूज्यान्ते चलितस्तदा ॥ ७ ॥ पथ्येतान्यां निर्जराभ्यां विहितैः क्षुत्तृषादिभिः । परीषहैर्नृपस्यास्य चारित्रेच्छा न खण्डिता ॥ ८ ॥ यमदग्नेरिमौ कूर्चे वृक्षस्याथ तपस्यतः । नीडं कृत्वा स्थितौ तौ तु चटकद्वन्द्वरूपिणौ ॥ ९ ॥ चटकश्चटि (ट) कामेवं बभाषे मर्त्यभाषया । शुभे तवाज्ञया यामि

हिमाद्रिं सा ततोऽब्रवीत् ॥ १० ॥ तत्रान्यचटि (ट) कारागाद्विलम्बो ऽविता तव । तन्न गन्तव्यमित्युक्तः स चक्रे शपथानिमान् ॥ ११ ॥ पञ्चानामपि हत्यानां लिप्ये पापेन सत्वरम् । चेन्नागच्छामि साऽप्यूचे शपैः प्रत्येमि नेदृशैः ॥ १२ ॥ त्वमेवं वद यल्लिप्ये पापेनास्य तपस्विनः । श्रुत्वेति तापसोऽयं तौ क्रुद्धो दध्रे स्वपाणिना ॥ १३ ॥ जगौ च किं कृतं पापं मया यदिति कथ्यते । तान्यां प्रोक्तं कथं पुत्रोज्झितः पाप्यसि नो मुने ॥ १४ ॥ अथैतत्सत्यमित्युक्त्वा मुक्तावेतौ तपस्विना । दृष्ट्वा तं क्षुन्नितं जैनोऽन्नवऋन्वन्तरिः सुरः ॥ १५ ॥ जितशत्रुमहीभर्तुः पितुः कन्याशतस्य सः । यमदग्निर्ययौ ऽङ्गं मृगकोष्ठान्निधं ततः ॥ १६ ॥ [1]नत्वाऽपृच्छच्च भूपः किं ते वद प्रददाम्यहम् । जगौ स कन्यकां सोऽप्याख्यदादत्स्व यथारुचि ॥ १७ ॥ कन्या दृष्ट्वा तमायान्तं जहसुर्निखिला अपि । जगुश्च लज्जसे नात्मपलितेन्योऽपि तापस ॥ १८ ॥ कुब्जीकृत्य रुषा ताः स निर्यानेकां तदङ्गजाम् । ददर्श रेणुदिग्धाङ्गीं क्रीडन्तीं रेणुवर्त्मनि ॥ १९ ॥ प्रदर्श्य बीजपूरं स इत्याख्यत्तां किमिच्छसि । तयाथोर्ध्वीकृते हस्ते तदस्यै तापसो ददौ ॥ २० ॥ गृहीत्वा तां प्रयान्तं तं राज्ञा दृक्संज्ञयेरितः । कुब्जा उत्थाय तत्पुत्र्यः सहासमिदमूचिरे ॥ २१ ॥ अविधाय कथं भर्तुः सङ्गा निजशालिकाः । प्राप्यते यातुमित्युक्तः सङ्गीचक्रेऽथ ता मुनिः ॥ २२ ॥ रेणुन्नी रममाणेयं प्राप्ता तद्रेणुकेत्यसौ । निजगादान्निधानेन यमदग्निर्नृपाङ्गजाम् ॥ २३ ॥ संप्राप्तयौवनामेनां स रेमे उपयम्य ताम् । क्रमात् पुष्पवतीमेतदवादीच्चान्यदा स्फुटम् ॥ २४ ॥ साध-

---

१ "नत्वाऽपृच्छत भूपेन मुने किं ते ददाम्यहं" इति वा पाठः.

यामि चरुं यत्ते प्रिये विप्रवरः सुतः । जायतेऽथ जगौ साऽपि यमदग्निमिति द्रुतम् ॥ २५ ॥ हस्तिनापु-
रनाथेनानन्तवीर्येण मे स्वसा । व्यूढाऽस्ति साध्यतां क्षात्रस्तच्छेतोरपरश्चरुः ॥ २६ ॥ तौ तेन साधितौ
साथास्मार्षीद्घनमृगीसमा । जाताहं मेऽङ्गजोऽपीदृङ्मा भूद्ब्रह्मवरो रतः ॥ २७ ॥ भुंक्ते सा स्म चरुं क्षात्रं
तद्भगिन्यपरं तथा । तयोर्नाम्ना सुतौ रामकृतवीर्यौ बभूवतुः ॥ २८ ॥ कश्चिद्विद्याधरं ग्लानं रामोऽथ
प्रतिचर्य सः । प्राप्य पारशवीं विद्यां साधयामास तां क्रमात् ॥ २९ ॥ मिलितुं रेणुका जामेरथागाद्धस्ति-
नापुरे । तत्रासक्ता सहानन्तवीर्येणैषाऽनुरागतः ॥ ३० ॥ पतिस्तां गुर्विणीं निन्ये स्वाश्रमे बुद्धवाँश्च तत् ।
रामोऽप्यस्याशयं मत्वा रुष्टोऽहँस्तां स्वपर्शुना ॥ ३१ ॥ रामोऽथ स्वपितुर्लेभे माहेशं शस्त्रमद्भुतम् ।
रेणुकां निहतां श्रुत्वाऽनन्तवीर्योऽपि रुष्टवान् ॥ ३२ ॥ भंक्त्वा तदाश्रमं लात्वा होमधेनूश्च यान् पुरि ।
रामेण रोषिणाऽन्वेत्यानन्तवीर्यस्त्वहन्यत ॥ ३३ ॥ मन्त्रिन्निस्तस्य राज्येऽथ कृतवीर्योऽन्यषिच्यत ।
ताराख्या तस्य देव्यस्ति रूपसौन्दर्यसेवधिः ॥ ३४ ॥ गर्भानुभावतः स्वप्नास्तया दृष्टाश्चतुर्दश । निमित्त-
ज्ञैस्ततः पृष्टैश्चक्रयस्यां कथितः सुतः ॥ ३५ ॥ जनकं जनकारातेर्यमदग्निं क्रमेण सः । कृतवीर्योऽवधीदेत्य
वैरं यन्न शुभायति ॥ ३६ ॥ पर्शुना पर्शुरामोऽपि कृतवीर्यं परासुताम् । नीत्वा तदाधिपत्यं स आत्म-
सात् कृतवान् क्षणात् ॥ ३७ ॥ इतश्च गुर्विणी तारा देवी नष्टा भयाकुला । शरणं निर्भयं प्राप्ता ताप-
साश्रममञ्जसा ॥ ३८ ॥ क्षिप्ता भूमिगृहे तैः सा भूमिवल्लभवल्लभा । सुतं प्रासूत वक्रेण स खादन् पतितो
भुवम् ॥ ३९ ॥ सुभूमनामतो वृद्धिं लेभे भूमिगृहे स्थितः । बालोऽयं बालचूतद्रुरिवात्र पयसा ततः ॥४०॥

यत्र यत्र क्षत्रियोऽभूत्परशुरामस्य पर्श्वकः । जज्वाल तत्र तत्रायं सहैवैतस्य चेतसा ॥ ४१ ॥ यातोऽस्या-
थाश्रमोपान्तेऽन्यदा पर्शुरदीप्यत । तत्पृष्टैस्तापसैः प्रोचेऽथेति प्राक् क्षत्रिया वयम् ॥ ४२ ॥ क्षत्रियान्
सप्तकृत्वोऽयं पापधीरनयत् क्षयम् । तेषामेवाथ दंष्ट्राग्निः स्थालमेकमपूरयत् ॥ ४३ ॥ नैमित्तिकमथाप्रा-
क्षीन्मृत्युर्नावी कुतो मम । सोऽपि स्वकीयशास्त्राणि विचार्येति व्यजिज्ञपत् ॥ ४४ ॥ राजन्नत्रासनासी-
नोऽमूर्य आस्वादयिष्यति । दंष्ट्राः पायसतां प्राप्ता नावी मृत्युस्ततस्तव ॥ ४५ ॥ नीतोऽथ स्थापयामास
सिंहासनमयं रयात् । स्थालं च तत्पुरः क्षात्रदंष्ट्रानिकरपूरितम् ॥ ४६ ॥ इतश्च खेचरो मेघनादाख्यः
कृतवीर्यजम् । पतिं पद्मश्रियः पुत्र्या गणकाद्वेद नाविनम् ॥ ४७ ॥ नाविजामातृवात्सल्यात्स सुनूमा-
न्तिकं न च । मुमोच खेचरो देहच्छायेव मुदितः क्षणम् ॥ ४८ ॥ किमेतावानयं मातर्लोक एवं सुतेन
सा । पृष्टा ताराऽन्यदा सर्वं सबाष्पं तदचीकथत् ॥ ४९ ॥ त्वया गम्यं न कुत्रापि तन्नियाऽतस्ततः सुतः ।
रोषणो निर्ययौ नूमिवेश्मतोऽथ स्खलादयम् ॥ ५० ॥ प्राप्यायं हास्तिनपुरं प्रविष्टः सत्रसद्मनि । निविष्टो
विष्टरे तत्र नष्टाधिष्ठातृदेवते ॥ ५१ ॥ नुञ्जानं पायसीनूता दंष्ट्रास्तं हन्तुमुद्यताः । यामिकब्राह्मणा मेघ-
नादेन त्रविता द्रुतम् ॥ ५२ ॥ पर्शुरामं समायान्तं संनह्य प्रेक्ष्य तत्क्षणात् । नुक्त्वोत्थितोऽन्यगाद्ज्ञात्वा
नाजनं चक्रतां गतम् ॥ ५३ ॥ शीर्षं रामस्य चिच्छेद चक्रेणैषोऽमुना ततः । नरतं साधयित्वाऽथ चक्रि-
त्वश्रियमाश्रयत् ॥ ५४ ॥ विप्रान् हत्वाऽथ त्रिःसप्तकृत्वोऽखिलनुवि क्रुधा । रौद्रध्यानवशान्मृत्वा

सोऽगादन्तिमदुर्गतिम् ॥ ९५ ॥ एवं सम्यग्निशम्यात्र कषायाणां दुरन्तताम् । वर्जनीया अमी धीरैः सिद्धिसौधसुखार्थिभिः ॥ ९६ ॥

॥ इति सुन्नूमयमदग्निकथा ॥

केचिज्जीवा बहुकषायपारवश्यात्कृत्यमकृत्यं वा न जानन्तीत्याह—

जीवाः कषायविवशा न विचारयन्ति, चाणक्यवत् किमपि कृत्यमकृत्यमत्र ।
कल्पान्तवातवितताद्भुजितस्य पूर्णरोदोऽन्तरस्य जलधेर्ननु को विवेकः ॥ १२० ॥

व्याख्या—कषायविवशाः क्रोधादिपरवशा जीवा अत्र जगति किमपि कृत्यमकृत्यं वा न विचारयन्ति । किंवत् ? चाणक्यवत् चाणक्यमन्त्रिवदिति । तथा नन्विति वितर्के कल्पान्तवातवितताद्भुजितस्य युगान्तमरुन्निकरद्भुजितस्य पूर्णरोदोऽन्तरस्य पूर्णं रोदोऽन्तरं आकाशपृथ्वीमध्यं येन स तथा तस्य जलधेः समुद्रस्य को विवेको विचारः स्यात् ? अपि तु न कोऽपीत्यक्षरार्थः । कथा चेयम् (चाणक्यकथा)—

अत्रैव गोल्लविषये ग्रामे चणकनामनि । चणी नाम्नाऽग्रवह्निप्रस्तत्प्रिया तु चणीश्वरी ॥ १ ॥ बभूवतुर्दम्पती तावाजन्म परमार्हतौ । ज्ञानिनो मुनयोऽन्येद्युस्तस्थिवांसस्तदालये ॥ २ ॥ तदानीमुक्षतैर्दन्तैर्बभूव तनयस्तयोः । चणी गत्वा मुनिन्योऽमुं जातदन्तं न्यवेदयत् ॥ ३ ॥ ते प्रोचुर्ज्ञानिनो राजा बाल-

कोऽयं भविष्यति । स दध्यौ श्वभ्रभाग्मा भूद्राज्यारम्भेण मे सुतः ॥ ४ ॥ ततः सोऽघर्षयद्दन्तान् व्यथामवगणय्य सः । मुनीनां कथितं तत्तु तेऽपि प्रोचुरिदं वचः ॥ ५ ॥ दन्तघर्षणतो बिम्बान्तरितो भाव्ययं नृपः । चाणक्य इति तस्याख्यां चणी चक्रेऽङ्गजन्मनः ॥ ६ ॥ बभूव श्रावकः सोऽपि सर्वविद्याविशारदः । चणी कुलीनविप्रस्यैकां कन्यां पर्यणाययत् ॥ ७ ॥ चाणक्यदयिताऽन्येद्युरयासीत् पितृवेश्मनि । तत्र तद्भ्रातुरुद्वाहमहः संजायते तदा ॥ ८ ॥ महे तत्र भगिन्योऽन्यास्तस्याः सर्वाः समागमन् । भूषणैर्भूषिताः सर्वैः साक्षादेवाङ्गना इव ॥ ९ ॥ तज्जाया जीर्णकौसुम्भोत्तरीया मलिनाङ्गका । काव्यवन्निरलङ्कारा तज्जामिभिरहस्यत ॥ १० ॥ सा दधत्यधृतिं गाढं प्रविष्टा कोणके ह्रिया । ततः स्वपतिगेहेऽगाद्विषण्णा तत्परावृत्तात् ॥ ११ ॥ तां म्लानवदनां वीक्ष्य सायं कमलिनीमिव । तद्दुःखादन्यधादेवं चाणक्यो वचनं स्फुटम् ॥ १२ ॥ मद्गेहविहितः किं तेऽपमानोऽन्यकृतोऽथवा । तेनेत्युक्ताऽपि सा दुःखात्तदाख्यातुमनीश्वरी ॥ १३ ॥ ततः सा साग्रहं पृष्टा तं स्वपत्ये न्यवेदयत् । दध्यौ स स्वार्जनोपायं ज्ञात्वा तद्दुःखकारणम् ॥ १४ ॥ द्विजानां दक्षिणां दत्ते विशिष्टां पाटलीपुरे । नन्दस्तत्र तदर्थं [1]गे ध्यात्वेत्थं तत्र सोऽगमत् ॥ १५ ॥ तत्र नृपालये गत्वाऽऽक्रम्य नन्दादिमासने । स्थितोऽसौ नन्दचेट्योचे निषीदान्यासने द्विज ॥ १६ ॥ कमण्डलुर्ममात्रावस्थास्यतेऽदोऽभिधाय सः । कमण्डलुं निधायात्र नात्याक्षीत् प्रथमासनम् ॥ १७ ॥ तृतीयमिति दण्डेन तुर्यं च जपमालया । उत्थाप्यमानोऽरौत्सीत्स चोपवीतेन

१ गाङ् गतौ इतिधातोर्लटि उत्तमपुरुषैकवचनं.

पञ्चमम् ॥ १८ ॥ धृष्टं विज्ञाय तं चेटी पादेनाहत्य सत्वरम् । स्मोत्थापयति चाणक्यं सा रोषेणातिभी-
षणा ॥ १९ ॥ चाणक्योऽपि तदा रुष्टः प्रतिज्ञामकरोदिमाम् । नन्दमुन्मूलयिष्यामि राज्यलब्ध्या सहैव
हि ॥ २० ॥ निर्गत्य सदसः सोऽथ क्रुधा वह्निरिव ज्वलन् । दध्यौ जावी यतो बिम्बान्तरितोऽहं धरा-
धवः ॥ २१ ॥ तद्राज्यार्हं नरं कञ्चित् पश्यामीति क्षुवि भ्रमन् । मयूरपोषकग्रामे जगाम चणिदेहजः
॥ २२ ॥ मयूरपोषकाधीशावासे प्राविशदेषकः । परिव्राजकवेषेण कणभिक्षाकृते सुधीः ॥ २३ ॥ तदानीं
क्षुहितुस्तस्य गुर्विण्या दोहदोऽजनि । इन्दुपानाय तल्लोकैश्चाणक्याय न्यवेदि सः ॥ २४ ॥ कथं जोः पूर-
णीयोऽयमित्युक्तः सोऽवदद्यदि । जातमात्रः सुतोऽस्या मे दीयते पूरयामि तत् ॥ २५ ॥ दध्यतुः पितरौ
तस्या मा मृतापूर्णदोहदा । क्षुहितेत्यथ तद्दानममंसातामदः पुरः ॥ २६ ॥ अचीकरच्च चाणक्यश्चित्र-
युक् तृणमण्मपम् । तस्योपर्यमुचन्मर्त्यं छत्रं पिधानधारिणम् ॥ २७ ॥ स्थालं तु पयसा पूर्णं तस्याधो-
ऽस्थापयत्सुधीः । [1]ऊर्जराकाशशाङ्कोऽत्र रजन्यां प्रतिबिम्बितः ॥ २८ ॥ पूर्णेन्दुस्तत्र संक्रान्तो गुर्विण्या-
स्तेन दर्शितः । पिबेत्युक्ता प्रमोदेन साऽपि पातुं प्रचक्रमे ॥ २९ ॥ यथा यथा पिबत्येषा छत्रपुंसा तथा
तथा । तृणमण्मपजं छिद्रं पिधानेन प्यधीयत ॥ ३० ॥ सा पूर्णदोहदा पूर्णे काले ऽसूत सुतं वरम् ।
चन्द्रगुप्त इदं नाम पितृभ्यां च व्यधीयत ॥ ३१ ॥ ग्राम्यँश्च क्षुवि चाणक्यः स्वर्णार्जनधिया ततः ।
धातुवादविदः पश्यँस्तमेव ग्राममागमत् ॥ ३२ ॥ शिशून् काँश्चिच्चयीकृत्य गजीकृत्य च काँश्चन । आरो-

१ कार्तिकपूर्णिमाचन्द्रः.

हन्तं चन्द्रगुप्तं तदाऽसौ वीक्ष्य विस्मितः ॥ ३३ ॥ चाणक्योऽवोचदेतस्य परीक्षार्थमिदं वचः । दक्षिणा दीयतां मेऽपि काचिद्राजेन्द्र सम्प्रति ॥ ३४ ॥ उवाच चन्द्रगुप्तोऽपि गृहाण ग्रामगा गुरो । चाणक्योऽप्यवदत् स्मित्वा गोपालेन्यो बिभेम्यहम् ॥ ३५ ॥ चन्द्रगुप्तो जगौ विप्र मा त्रैषीस्ते मया ह्यमूः । गावः प्रदत्ता आदत्स्व वीरभोज्या यतः क्षमा ॥ ३६ ॥ चाणक्यो विस्मितोऽग्राहीत् कोऽयमित्यर्भकस्तदा । परिव्राजकपुत्रोऽयमित्युक्त्वा तेऽहसन् भृशम् ॥ ३७ ॥ सोऽपि नत्वा स्वयं प्राप्तं तं बालं स्म वदत्यदः । सोऽहं यस्यासि भोस्त्वं तद्राज्यमागच्छ ते ददे ॥ ३८ ॥ चन्द्रगुप्तोऽलगत्तस्याङ्घ्र्योः राज्यान्निलाषतः । चाणक्योऽपि पलायिष्ट गृहीत्वा तं तु चौरवत् ॥ ३९ ॥ धनेन धातुवादेनार्जितेन चणिनन्दनः । चक्रे पत्त्यादिसामग्रीं नन्दोन्मूलनहेतवे ॥ ४० ॥ पत्त्यादिसेनया नन्दपुरं सर्वमवेष्टयत् । ततो नन्दोऽपि निर्गत्याकुट्य तद्बलं बली ॥ ४१ ॥ प्रस्तावज्ञोऽथ चाणक्यो नंष्ट्वाऽगाच्चन्द्रगुप्तयुक् । प्राणान् यथा तथा रक्षेत्तेषु सत्सु धनाः श्रियः ॥ ४२ ॥ आदिश्य सादिनौ (नः) तावादातुं नन्दमहीपतिः । प्राविशत् पाटलीपुत्रपुरं सह महामहैः ॥ ४३ ॥ सादिनां धावतामेको वायुवेगेन वाजिना । सादी समागमद्याभ्यां ताभ्यां देशे दवीयसि ॥ ४४ ॥ चाणक्योऽपि तमायान्तं समीक्ष्येति समादिशत् । चन्द्रगुप्ताय वत्सात्र सरोवारिणि मज्जतु ॥ ४५ ॥ चन्द्रगुप्तो ममज्जाश्वगाधे पयसि धीरधीः । चाणक्योऽपि सरस्तीरे योगीवास्थात्समाधिना ॥ ४६ ॥ नन्दाश्ववारोऽथागत्याप्राक्षीच्च चणिनन्दनम् । भगवन् किं त्वयापैक्षि

१ गच्छभ्याम्.

कश्चिन्ना नवयौवनः ॥ ४७ ॥ ध्यानञ्जनयादेषोऽङ्गुल्या तद्दार्यदर्शयत् । तं समाकृष्टुकामोऽसावायुधान्यमुचद्यदा ॥ ४८ ॥ तदैवादाय तन्नस्त्रं चाणक्यस्तच्छिरोऽच्छिनत् । एह्येहीत्युदितस्तेन चन्द्रगुप्तस्ततो निरैत् ॥ ४९ ॥ तस्याश्वे चन्द्रमारोप्य चाणक्यः स्माह तं यदा । निवेदितः सादिने त्वं तदा किं चिन्तितं त्वया ॥ ५० ॥ चन्द्रगुप्तो जगावार्य तदैवं चिन्तितं मया । एतदेवाधुना श्रेयो यदार्यो विदधाति मे ॥ ५१ ॥ दध्यौ चणिप्रसूनूनं न हि मे व्यभिचार्ययम् । ततो यातोस्तयोर्नन्दसादी कोऽप्यागमत्तदा ॥ ५२ ॥ प्राग्वच्चन्द्रं च चाणक्यः सरोमध्ये न्यमज्जयत् । अवोचच्च जकं चैतद्वारितीरस्थितं ततः ॥ ५३ ॥ रुष्टो राजा समेत्येष नश्य चेज्जीवितार्थ्यसि । सोऽप्यश्ववारं तं वीक्ष्याकृष्टखड्गं पलायत ॥ ५४ ॥ तद्दस्त्रह्वालने लग्नश्चाणक्यश्चतुराशयः । नन्दसाद्यागतः पृष्ठन्मारितस्तेन पूर्ववत् ॥ ५५ ॥ ततः प्रचेलतुश्चन्द्रगुप्तचणक्यङ्गजौ पथि । क्षुत्क्षामश्चन्द्रगुप्तोऽभूद्ग्रामेऽथागाच्चणिप्रसूः ॥ ५६ ॥ ग्रामादालोक्य तत्कालमायान्तं विहिताशनम् । विप्रं पप्रच्छ लोकोऽत्र भुक्तिं यच्छति वा न वा ॥ ५७ ॥ विप्रोऽप्याह ददात्येव पुनरूचे चणिप्रसूः । त्वयाऽद्य भट्ट किं भुक्तं सोऽवक्कूरकरम्बकम् ॥ ५८ ॥ दध्यौ चणिप्रसूर्ग्रामं भक्तार्थं भ्रमतो भवेत् । विलम्बो मे कथं चन्द्रो भाव्येकाकी मया विना ॥ ५९ ॥ ततः करम्बकं चास्य ब्राह्मणस्योदरादहम् । ददाम्याकृष्य तस्मै यद्भक्ष्यतेऽसौ यथा तथा ॥ ६० ॥ इति तस्योदरं सद्यो विदार्यैतं करम्बकम् । आकृष्य भोजितस्तेन चन्द्रश्चण्यङ्गजन्मना ॥ ६१ ॥ ततस्तौ चलितौ प्राप्तौ क्वचिद्ग्रामे दिनात्यये । चाणक्योऽपि भ्रमँस्तत्र रोरवृश्च्यागृहेऽगमत् ॥ ६२ ॥ स्वशिशूनां पर्यवेष्यत्युष्णरब्बा तया तदा । भृशं

बुभुक्षया क्षामस्तत्र चैकोऽक्षिपत् करम् ॥ ६३ ॥ दग्धहस्तो रुदन्नूचे साक्षेपं वृक्ष्या शिशुः । चाणक्य इव जानासि न किञ्चिदपि पुत्रक ॥ ६४ ॥ एतत्तद्वचनं श्रुत्वा प्राह्लीकृष्णां चणिप्रसूः । चाणक्योदाहृतिं कस्माद्बालकेऽदित सम्प्रति ॥ ६५ ॥ साऽप्यवादीद्बहिर्देशमसंसाध्य चणिप्रसूः । रुन्धन्नन्दपुरीमादावेव नष्टो गलद्बलः ॥ ६६ ॥ पूर्वं पार्श्वेष्वनुक्त्वैव विचाले स्वं करं क्षिपन् । दह्यते स्म शिशुस्तद्वत् पाणावत्युष्णरब्बया ॥ ६७ ॥ ततोऽतिविस्मितश्चन्द्रगुप्तयुक् चणिनन्दनः । हिमवत्कूटमासाद्य सन्निवेशे गतः क्वचित् ॥ ६८ ॥ तत्र पर्वतकाख्येन सौहृदं सह भूभुजा । बाढं चकार चाणक्यस्तत्साहाय्यस्य वाञ्छया ॥ ६९ ॥ अन्येद्युरवदत्तं स नन्दमुत्साद्य भूपतिम् । सोदराविव तद्राज्यं विभज्यादद्महे सखे ॥ ७० ॥ नृपः पर्वतकोऽप्येतत् प्रपेदे तद्वचस्ततः । सन्नद्धौ चन्द्रचाणक्यौ सह तेन महीभुजा ॥ ७१ ॥ साधयित्वाऽखिलं देशं तस्य ङङ्गमवेष्टयन् । ततः क्षीणबलो नन्दो धर्मद्वारमयाचत ॥ ७२ ॥ चाणक्योऽप्यादिशत्त्वं नो रथेनैकेन याह्यतः । यथेष्टं द्रविणं तत्राधिरोप्य निरुपद्रवः ॥ ७३ ॥ यथेष्टं द्रविणं सोऽपि दिव्यरूपां च कन्यकाम् । रथमारोप्य नगरान्निरसार्षीदधोमुखः ॥ ७४ ॥ वीक्ष्यायान्तं चन्द्रगुप्तं साऽभूत्कन्याऽनुरागिणी । तथा मत्वाऽवदन्नन्दो भव वत्से स्वयंवरा ॥ ७५ ॥ स्वस्ति तेऽस्तु शुभे मुञ्च मां रथादुत्तराधुना । वृणु वत्से वरं स्वैरमित्युक्तोदतरद्रथात् ॥ ७६ ॥ चान्द्रं च रथमारोढुं प्रवृत्ता तत्सुता यदा । तदा नवारकास्तस्य रथस्य स्राग्बभञ्जिरे ॥ ७७ ॥ अकल्याणकृदेषेत्यारोहन्तीं तां न्यषेधयत् । चन्द्रगुप्तोऽथ चाणक्योऽवग्मेमां प्रतिषेधय ॥ ७८ ॥ शुभाय शकुनं ह्याद्येतत्ते वत्स फलं शृणु । नव

यावत् पुंयुगानि गन्ताऽनेन तवान्वयः ॥ ७९ ॥ चन्द्रपर्वतकौ चाथ प्रविष्टौ नन्दमन्दिरे । प्रचक्रमाते नन्दस्य संविग्नकुं पयोधिजाम् ॥ ८० ॥ तत्रैका कन्यकाऽथाऽनूद्रहिताऽतिप्रयत्नतः । पर्वतः प्रेक्ष्य तां रागाद्धृदि विद्यामिवाधरत् ॥ ८१ ॥ चाणक्योऽदादिमां तस्मै पर्यणैषीच्च सोऽपि ताम् । विषकन्यातया तस्याः संक्रान्तं तत्तनौ विषम् ॥ ८२ ॥ स संक्रान्तविषः पीतविषवद्दुरुक्तुमक्षमः । चन्द्रमूचे कथमपि म्रियमाणं सखेऽव मामू ॥ ८३ ॥ वैद्यानाकारयन्तं तं मान्त्रिकाँस्तान्त्रिकानपि । चाणक्योऽथानुशास्ति स्म चन्द्रगुप्तमिति स्फुटम् ॥ ८४ ॥ हंहो विनौषधेर्व्याधिर्याति वैद्यान् विनाऽपि ते । जपेक्षस्वाधुना वत्स स्वस्ति तेऽस्तु विनाऽमुना ॥ ८५ ॥ अर्धराज्यहरं मित्रं यो न हन्यात् स हन्यते । तेन मार्यः स्वयं चेत्स म्रियते भाग्यवानसि ॥ ८६ ॥ अनुशिष्येति चाणक्यश्चन्द्रगुप्तं न्यवारयत् । ततः पर्वतको भूपो यशःशेषी बभूव सः ॥ ८७ ॥ ततश्च चन्द्रगुप्तस्य राज्यद्वयमजायत । अखण्डिताज्ञः सर्वत्राधिपत्यमनुशास्ति सः ॥ ८८ ॥ श्रीवर्धमाननिर्वाणात् पञ्चपञ्चाशदुत्तरे । गते वर्षशते चन्द्रगुप्तोऽभून्नृपपुङ्गवः ॥८९॥ नन्दस्य सेवकाः केचिच्चन्द्रगुप्तस्य शासने । चक्रुश्चौर्यं ततोऽपश्यत्तन्निहार्थं नरं नृपः ॥ ९० ॥ तदर्थमेव चाणक्योऽगमत् कौलिकवेश्मनि । अग्निं क्षिपति तत्रैको मत्कोटकदरीष्वलम् ॥ ९१ ॥ चाणक्योऽथ तमप्राक्षीत् किं करोषीत्यवक् स च । मत्पुत्रोच्चाटकानेतान् हन्मि मत्कोटकानहम् ॥ ९२ ॥ चाणक्यश्चन्द्रगुप्तेन तमाकार्याथ कौलिकम् । शिक्षाविचक्षणं ज्ञात्वा पुरारक्षमकारयत् ॥ ९३ ॥ तान्नन्दसेवकाँश्चौ-

१ लक्ष्मीम्.

रान् यानपानाशनादिभिः । विश्वास्य मारयामास स आरब्धः कुशाग्रधीः ॥ ९४ ॥ चन्द्रगुप्तगुरुर्यस्मिन् ग्रामे निद्रामनाप्तवान् । अखिन्नानपि तद्ग्रामलोकानाकारयद्रुषा ॥ ९५ ॥ कोपाटोपेन चाणक्यस्तानूचे क्षुद्रबुद्धिकः । वृतिं विधत्त वंशीनां चूतानामधुनैव भोः ॥ ९६ ॥ आम्रद्रुमाणां ग्रामीणैर्वंशीभिस्तैर्वृतिः कृता । सकोपमूचे चाणक्यो न मयाऽऽदिष्टमीदृशम् ॥ ९७ ॥ किं तु चूतैस्तु वंशीनां कारिता वृतिरित्यसौ । दोषमुत्पादयामास कृत्रिमं तत्कुटुम्बिनाम् ॥ ९८ ॥ तद्ग्रामं ज्वालयामास प्राग्रोषेण चणिप्रसूः । एवं बुध्यैव कोशादि सर्वं चन्द्रस्य सोऽकरोत् ॥ ९९ ॥ क्रमेण श्रावकीचक्रे श्रीमौर्यश्चणिजन्मना । विविधैरुपदेशैर्यन्मन्त्रिभिः क्रियते न किम् ॥ १०० ॥ श्रावकत्वप्रभावेण मौर्यराजो दिवं ययौ । तेन मन्त्र्यपि तत्रागात् समा हि स्युः समक्रियाः ॥ १०१ ॥ एवं कषायवशवर्तितया मनुष्या, नाकृत्यकृत्यरचनां तु विचारयन्ति । तद्दुर्गतिप्रतिभुवस्त्यजतात् कषायान्, यत्सिद्धिसौधपदवी न दवीयसी स्यात् ॥ १०२ ॥

॥ इति चाणक्यकथा ॥

इत्येकोनषष्टितमं सामान्यकषायद्वारमभिधाय प्रथमकषायक्रोधदुरन्ततामाह—

मिष्टान्नं मुंद्व हृद्यं पिब जलमपि ताँस्तान् रसान्मा च रुन्धि,
कायक्लेशाँस्त्यजाङ्गं विमलय सुकरः कूरकुंभर्षिणोक्तः ।

मोक्षोपायोऽस्ति कोपं जय त्यज शिवजं शर्म साधो निबोध,
आदेक्षुक्षीरखण्डप्रभृति रसबलात्सन्निपातेऽप्यदुष्टम् ॥ १२१ ॥

व्याख्या—हे साधो मिष्टान्नं क्षीरघृतखण्डादि जुंक्ष्व, हृद्यं सुन्दरं जलमपि पिब, ताँस्तान् प्रसिद्धान् रसान् च पुनर्मा रुन्धि, कायक्लेशं लोचादिक्रियां त्यज मुञ्च, अङ्गं शरीरं विमलय पवित्रय, हे साधो निबोध जानीहि यत् कूरकुंजर्षिणोक्तः कूरगडुकमुनिनोक्तो मोक्षोपायः सुकरोऽस्ति । हे मुने कोपं जय, शिवजं मोक्षजवं शर्म त्यज सेवस्व, तथा आदेक्षुक्षीरखण्डप्रभृति वस्तु रसबलात् रससामर्थ्यात् सन्निपातेऽपि सन्निपातरोगेऽपि अदुष्टमदोषकारीति, तद्देव कोपजये सति मिष्टान्नभोजनादिकं सिद्धिगमनं प्रति अदुष्टमिति भावः । इति शब्दार्थः । भावार्थस्तु कथया कथ्यते—

कूरगडुकमुनिकथा—

श्रीकुंभनृपपुत्रो ललिताङ्गो गृहीतव्रतो वेदनीयकर्मप्राबल्याद्घारं वारं बुभुक्षितः सन् कूरादि बहु भुंक्ते । ततोऽन्यरूपकैः कूरगडुक इति प्रतिष्ठितं नाम । अन्येद्युः पर्युषणादिनेऽपि भोक्तुमसावुपविष्टस्तदा तैः रूपकैः रुष्टैस्तत्पात्रमध्ये थूत्कृतं, रे पापाद्य पर्वण्यपि कथं भुञ्जानोऽसीत्याक्रोशितश्च । ततः स क्षमामन्दिरमात्मनिन्दां कुर्वन् तत्थूत्कृतमपि भुञ्जानः शुक्लध्यानवशात् केवलमाप्तवान् । तदैवागत्य केवलमहिमां कुर्वत्सु देवेषु ते रूपका अपि तत्पादलग्नाः केवलज्ञानमवापुः ॥

॥ इति कूरगडुकमुनिकथालेशः ॥

क्रोधजयोपदेशमाह—

यदि शिवगतिरिष्टा साऽऽर्यमेतार्यवत्तज्जय रुषमुपसर्गेऽपीप्सिता दुर्गतिश्चेत् ।
करुकुरुवत्तत्क्रोध उच्चैर्विधेयः, सुरतरुकनकद्वोर्यो मतस्तं भजस्व ॥ १२१ ॥

व्याख्या—हे साधो यदि सा प्रसिद्धा शिवगतिस्ते इष्टा वाञ्छिताऽस्ति तत्तर्हि उपसर्गेऽपि सति क्रोधं जय । किंवत् ? आर्यमेतार्यवत् यथा मेतार्य उपसर्गेऽपि रोषं जिगाय । यदुक्तं—"सिरसा वेढेण सिरम्मि"इत्यादि । तथा चेद्यदि दुर्गतिर्नरकतिर्यग्गतिरीप्सिताऽस्ति तत्तर्हि करुकुरुवदुच्चैरतिशयेन क्रोधो विधेयः । तथा हे मुने सुरतरुकनकद्वोः कल्पद्रुधत्तूरकद्वोर्मध्ये यो मतोऽभीष्टोऽस्ति तं भजस्व सेवस्वेत्यक्षरार्थः । कथे त्विमे—

मेतार्यकथा—

साकेतपत्तने सर्वश्रीसंकेतनिकेतने । चन्द्रावतंसको भूपो बभूव परमार्हतः ॥ १ ॥ प्रेयस्यौ गुणश्रेयस्यौ नृपस्यास्य बभूवतुः । मुख्या सुदर्शना नाम्ना तथाऽन्या प्रियदर्शना ॥ २ ॥ ज्यायसी श्रेयसी बुद्ध्या सुतौ प्रासूत सुन्दरौ । मुख्यं सागरचन्द्राख्यं मुनिचन्द्राख्ययाऽपरम् ॥ ३ ॥ बालचन्द्रगुणचन्द्राख्यौ सुतौ सुषुवेऽपरा । पुत्रयुग्मद्वयेनायं राजा रेजे महाभुजः ॥ ४ ॥ अदात्सागरचन्द्राय यौवराज्यं नराधिपः । मुनिचन्द्रसुतस्यापि पुरीमुज्जयिनीं च सः ॥ ५ ॥ प्रदीपावधिना कायोत्सर्गेऽस्थान्निखिलां नि-

शाम् । ऋनृत्ततो गतो मृत्युं नाकिधाम जगाम सः ॥ ६ ॥ तस्यौर्ध्वदेहिकं कृत्वा सागरेन्दुर्विमातरम् । जगाद ते सुते न्यस्य राज्यं स्वार्थं करोम्यहम् ॥ ७ ॥ साऽप्यूचे सममेवास्ति त्वयि पुत्रे च मे मनः । ईक्षितुः किं विशेषोऽस्ति वामदक्षिणनेत्रयोः ॥ ८ ॥ ततो राजा ऋवानस्तु सेवामेवास्मदङ्गजः । विधास्यति यतो ज्यायःसेवा युक्ता कनीयसः ॥ ९ ॥ सचिवैरन्निषिक्तोऽथ राज्ये सागरचन्द्रमाः । दिनानि कतिचिद्राज्यं धर्मन्यायमपालयत् ॥ १० ॥ ज्योत्स्नयेव श्रितं लक्ष्म्या तं राजानमवेक्ष्य सा । नलिनीवाश्रयन्म्लानिमतुलां प्रियदर्शना ॥ ११ ॥ दध्यौ च हा मया राज्यं दीयमानं निराकृतम् । दूये तेनाङ्गजं हीनं पश्यन्ती साम्प्रतं खलु ॥ १२ ॥ तच्चापाद्य नृपं राज्यं पुत्रे संक्रमये स्वयम् । अन्यथा मे सुतो राजा ऋविता नात्र जीवति ॥ १३ ॥ अन्यदोद्यानगे राज्ञि विमातृजसमन्विते । दासिका निर्गता सौधाऋस्ते कृत्वा च मोदकम् ॥ १४ ॥ प्रियदर्शनयाऽऋाणि क्व यासीति जगावसौ । कथ्यवार्तायैमि दातुं मोदकं मेदिनीपतेः ॥ १५ ॥ विषलिप्तौ करावेषा बिभ्रती तत्करात्तदा । तं वीक्ष्य कौतुकव्याजादेव्यादत्ते स्म मोदकम् ॥ १६ ॥ लोलयन्ती कराभ्यां ऋाग् विषमिश्रं विधाय तम् । राज्ञी सा प्रत्यदात्तस्याश्चेटिकायाः करे ततः ॥ १७ ॥ ऋनुजे भोजनायादाच्चेटी गत्वाऽऽशु मोदकम् । सोऽपि दध्यौ लघुभ्रात्रोरयं दातुं पुरोचितः ॥ १८ ॥ ददौ पार्श्वस्थयोर्भूपो बालेन्दुगुणचन्द्रयोः । मोदकं तं द्विधाकृत्य स्निग्धं स्निग्धमनास्ततः ॥ १९ ॥ तस्य ऋक्षणमात्रेण विषावेगेन मूर्छितौ । मन्त्रतन्त्रोपचारेण जीवयामास ताव-

१ प्रातर्भोजनाय.

सौ ॥ २० ॥ श्रुत्वा दासीमुखात्तस्याः करस्पृष्टं स मोदकम् । स्वमत्या निश्चिकायात्र मोदके विषभाव-
नाम् ॥ २१ ॥ दध्यौ च चेष्टितं धिङ्मे विमातुर्यन्मया तदा । राज्यं प्रदीयमानं स्वं निराकृत्याधुनेच्छति
॥ २२ ॥ मोदकं यद्यभक्षिष्यं तद्दुर्ध्यानवशादहम् । अभविष्यं दुःखपात्रमुत्पन्नो दुर्गदुर्गतौ ॥ २३ ॥
कृतमेतेन राज्येन कलिमूलेन मे ततः । राज्यं विमातृजे न्यस्य स्वयं संयममाददे ॥ २४ ॥ विहरन्नन्य-
दाऽवन्तीं पुरीं प्राप बहुश्रुतः । मुनींस्तत्र स्थितान् सोऽथ निर्विघ्नं पृष्टवान् सुधीः ॥ २५ ॥ भूभृत्पुरो-
धसोः पुत्रौ तैर्दिष्टौ विघ्नकारणम् । पुरोधसोऽविशद्देशमन्ययं जिघ्रामिषात्ततः ॥ २६ ॥ धर्मलाभमदात्सा-
धुर्गुरुस्वरमयं तदा । तद्दास्योचे मा वदोच्चैर्नो चेच्छ्रोता नृपात्मजः ॥ २७ ॥ महास्वरं तथाऽप्यूचे मुनि-
स्तद्बोधहेतवे । प्रसङ्गेनागतस्तत्राश्रौषीत्तन्नृपनन्दनः ॥ २८ ॥ नृपविप्राङ्गजावेतं बलान्नीत्वा गृहोपरि ।
साक्षेपमाहतुर्मुण्ड त्वं नृत्तं कुरु नौ पुरः ॥ २९ ॥ मुनिः प्राह युवां तालं धत्तं नृत्यामि सम्प्रति । ततो-
ऽवादयतां तालं हस्ताभ्यां तौ कुशिक्षितौ ॥ ३० ॥ नृत्तं क्षणं विधायैष तौ खलीकर्तुमभ्यधात् । मूढा-
वीदृक्तालेन कथं मां नर्तयिष्यथः ॥ ३१ ॥ श्रुत्वेति कोपाटोपेन कुट्टनोद्यतयोस्तयोः । वियोज्याङ्गानि
सन्धिभ्यः स मुनिर्वनमन्वगात् ॥ ३२ ॥ श्रुत्वाऽथ भूपतिस्तत्रायातस्तौ पतितौ क्षितौ । वीक्ष्यमाणावी-
क्षणाभ्यामक्षमाङ्गौ समैक्षत ॥ ३३ ॥ सोदरेण विना मेऽत्र कोऽपरः सागरेन्दुना । ईदृग्युध्ये पणिरतो-
ऽस्तीति चित्तेऽचिन्तयच्चिरम् ॥ ३४ ॥ सूरीनुपाश्रये गत्वा प्रणत्य क्षितिनायकः । तत्सञ्जीकृतये भक्त्या

१ नेत्राभ्याम्.

प्रार्थयामास सत्वरम् ॥ ३५ ॥ जगुस्तेऽथ धराधीश नेदृशः कोऽपि नो मुनिः । युष्मवेत्ताऽस्ति चेत्कश्चि-
दतिश्चिस्तु भविष्यति ॥ ३६ ॥ काननस्थस्य तस्याथ प्रवृत्तिं प्राप्य भूपतिः । अगात् स्वयं लज्जितश्च
मत्वा तं निजबान्धवम् ॥ ३७ ॥ क्रमयोः प्रणतं पृथ्वीनाथं स मुनिरन्यधात् । वंशे चन्द्रावतंसस्य सुतो-
ऽभूस्त्वं महागुणः ॥ ३८ ॥ क्षान्ते दान्ते तपःपात्रे यन्मुमुक्षुकदम्बके । पुत्रं वारयसि स्वीयं विघ्नयन्तं
न नो कुधीः ॥ ३९ ॥ आगः क्षमस्व साधोऽदः प्रसद्य मयि सम्प्रति । जीवयैतौ वराकौ नैव भूयोऽपि
करिष्यतः ॥ ४० ॥ जल्पन्तमिति धात्रीशं भूयोऽप्यूचे मुनीश्वरः । चेत्प्रव्रज्यां प्रपेदाते तदेतौ सजया-
म्यहम् ॥ ४१ ॥ ओमित्यङ्गीकृते तान्यां सजायामास तौ मुनिः । तच्छितैषी च संबोध्य प्रव्राज्य विजहार
च ॥ ४२ ॥ तारितोऽहं भवाम्भोधिं पितृव्येनापि दुस्तरम् । इति भद्राशयस्तेपे तपांसि क्षितिपात्मजः
॥ ४३ ॥ दीक्षितः कपटेनाहमिति द्विजसुतः पुनः । सजुगुप्सं तपोऽकार्षीन्नैकधा यन्मनो भवेत् ॥ ४४ ॥
चिरं तीव्रतपः कृत्वा कालं कृत्वा समाधिना । तौ देवौ जज्ञतुर्देवलोके स्निग्धौ परस्परम् ॥ ४५ ॥ स्वर्गा-
च्यवति यः पूर्वं धर्मे बोध्योऽपरेण सः । प्रतिज्ञातमिदं तान्यां निर्जराभ्यां मिथो मुदा ॥ ४६ ॥ इतश्च
धर्मराजस्य गृहे राजगृहे पुरे । श्रीश्रेणिकाभिधो भूपो राजते परमार्हतः ॥ ४७ ॥ तस्मिन् द्विजाङ्गजा-
तस्य जीवश्च्युत्वा तनूजताम् । उदरे मेदभार्याया जुगुप्साकर्मतोऽभजत् ॥ ४८ ॥ कस्यचित्सार्थवाहस्य
प्रिया निर्दूरिहास्ति सा । बभूव मेदभार्याया दृढा प्रियसखी तदा ॥ ४९ ॥ म्लानास्यामन्यदा वीक्ष्य

१ मृतपुत्रा.

तां प्रोचे मेदवल्लभ्रा । सखि दूनेव दीनास्या साम्प्रतं दृश्यसे कथम् ॥ ५० ॥ सा प्राहापत्यसंपत्तिविपत्त्या व्यथिताऽस्म्यहम् । इदानीमुपनेष्ये ते चेन्मे पुत्रो ऋविष्यति ॥ ५१ ॥ इत्युक्ते मेदपल्याऽथ हृष्टा निन्दूश्च दैवतः । सुतागर्भं दधौ वृद्धिः सहैव गर्भयोरभूत् ॥ ५२ ॥ सा मेदवल्लभ्रा काले सुतं प्रासूत सुन्दरम् । मार्तण्डमण्डलमिव प्राच्यपर्वतचूलिका ॥ ५३ ॥ जातमात्रां मृतां पुत्रीं निन्दूः स्वां मेदिनीगृहे । प्रहित्याप्तैर्जनैश्छन्नमानिन्येऽस्यास्तनूरुहम् ॥ ५४ ॥ मेदपल्यास्ततो वेश्मागतायाः क्रमयोः पुरः । तं सुतं पातयित्वोचे सार्थवाहस्य वल्लभ्रा ॥ ५५ ॥ पुत्रोऽयं ते न मे पुत्रो वराको जीवतादिति । स्माऽभाषयति तं दृष्ट्वा मेतार्य इति नामतः ॥ ५६ ॥ अन्यदा यौवनस्थोऽयं प्राच्यमित्रेण नाकिना । बोधितोऽपि हि नाबुद्ध प्राच्यकर्मवशेन सः ॥ ५७ ॥ ऋविष्यति न बोधोऽस्य सुदुःखोत्पादनं विना । ध्यात्वेति स सुरस्तस्य मेदस्य प्राविशत्तनौ ॥ ५८ ॥ अष्टानां श्रेष्ठिपुत्रीणां विवाहं कर्तुमुद्यतः । मेतार्यः स्फारशृङ्गारस्तदाऽचालीत् प्रमोदतः ॥ ५९ ॥ वर्यतूर्यरवाकृष्टसर्वपौरपरिच्छदः । रङ्गत्तुरङ्गमारूढो यावद्राजपथेऽगमत् ॥ ६० ॥ तदा मेदः सुराविष्टस्तं समीक्ष्य निजप्रियाम् । समीपस्थामिति प्राह क्रन्दन्नुच्चैर्मुहुर्मुहुः ॥ ६१ ॥ अहाहमहमप्यद्याकरिष्यं यदि साऽङ्गजा । विपन्ना जातमात्रैव नाऽभविष्यत्तदा प्रिये ॥ ६२ ॥ अपि तुल्येन योषानां स्वभावेन प्रणोदिता । सा जगौ कान्त मा रोदीरसावपि सुतस्तव ॥ ६३ ॥ ज्ञाततत्त्वः स धावित्वा तमाकृष्यांह्रिणा क्रुधा । अश्वादपातयज्जीवं कर्मव्रातमिव व्रतात् ॥ ६४ ॥ मेदाङ्गजस्त्वमाः

---

१ पुत्रम्.

पाप ज्ञूत्वाऽमूनार्यमानवान् । किं रे मलिनयस्यत्र मेदः स तमतर्जयत् ॥ ६५ ॥ मलमूत्रादिगर्तायां बाहौ धृत्वाऽक्षिपद्बलात् । तमित्यूचे च देवः स किमद्यापि न बुध्यसे ॥ ६६ ॥ मेतार्योऽपि जगौ म्लानिकलङ्कं पूर्वमेव मे । निराकुरु ततो धर्मं त्वदादिष्टं श्रयामि यत् ॥ ६७ ॥ कथं त्वां शोधयामीति सुरेणोक्ते जगाद सः । परिणायय मे पुत्रीं श्रीश्रेणिकनरेशितुः ॥ ६८ ॥ ततोऽमरेण तस्यैको दत्तश्चगलकः स तु । व्युत्सृजत्यन्वहं मध्येपुरीषं रत्नसंहतिम् ॥ ६९ ॥ रत्नव्रातमुपानीय तं मेदोऽथ महीपतिम् । पुत्रीं ययाचे पुत्राय तर्जयामास सोऽपि तम् ॥ ७० ॥ उपहृत्योपहृत्यायं रत्नानि प्रतिवासरम् । लोकैर्निषेध्यमानोऽपि याचते क्ष्मापमङ्गजाम् ॥ ७१ ॥ मणीनां संज्ञवोऽत्रायं जलजानामिव स्थले । कुत इत्थं विमृश्योचे मेदं तं सचिवोऽज्ञयः ॥ ७२ ॥ त्वं मेद सुन्दरं रत्नस्तोममानयसे कुतः । स प्राहैतानि रत्नानि पुरीषं ज्ञगलस्य मे ॥ ७३ ॥ तं ज्ञागं देहि यद्भूपस्त्वां कृतार्थयति द्रुतम् । तेनार्पितोऽमुचत्सोऽपि मलमेव नृपौकसि ॥ ७४ ॥ गेहेऽस्य व्युत्सृजत्येष मणीन् प्रत्यर्पितश्चगः । सुरानुज्ञाव एवेति निरवैषीत् स धीसखः ॥ ७५ ॥ मतिमानज्ञयः प्रोचे वैज्ञाराद्रौ विधेहि ज्ञोः । रथपन्थानमीशस्य यातो वन्दितुमर्हतः ॥ ७६ ॥ सुरेण निर्मिते तत्राज्ञयः पुनरदोऽवदत् । वप्रं स्वर्णमयं कृत्वा वैज्ञाराद्रौ तथा कुरु ॥ ७७ ॥ देवेन विहिते तत्राथाप्येवमज्ञयो जगौ । आनयात्र स्वपुत्रस्य स्नानहेतोः सरित्पतिम् ॥ ७८ ॥ उपराजगृहं देव आनिनायाम्बुधिं क्षणात् । स्नपयित्वेह मेतार्यं क्ष्मापः पुत्रीं व्यवाहयत् ॥ ७९ ॥ व्युवाह श्रेष्ठिनामष्टौ पुत्रीस्ताः पूर्वया-

१ नितरामवैषीदज्ञासीत्.

चिताः । इति क्षापाङ्गजोपेतास्तस्यासन्नव वह्वज्ञाः ॥ ८० ॥ द्वादशाब्दीमयं यावत्तमनुज्ञाप्य दैवतम् । भुञ्जानो विविधान् भोगान् सुखं तस्थौ वधूसखः ॥ ८१ ॥ भूयोऽपि द्वादशाब्दानि वधूभिर्याचितोऽमरः । चतुर्विंशतिवर्षाणि तस्यागुरिति भोगिनः ॥ ८२ ॥ ततो विरक्तो भोगेभ्यो मेतार्यो वह्वज्ञान्वितः । प्रपेदे व्रतमापच्च पूर्वाणि नव सद्गुरोः ॥ ८३ ॥ अन्यदा विहरन् राजगृहेऽगान्नगरे मुनिः । भ्राम्यन् भिक्षाकृते गेहे स्वर्णकारस्य चाविशत् ॥ ८४ ॥ अष्टोत्तरं शतं स्वर्णयवानामयमन्वहम् । जिनं पूजयतो राज्ञः स्वस्तिकार्थं करोत्यथ ॥ ८५ ॥ यवान्नवानयं हैमान् घटयित्वा तदैव सः । स्वर्णकारोऽविशत् केनचित्कार्येण गृहान्तरे ॥ ८६ ॥ यवान् सर्वानमून् भक्ष्यभ्रान्त्या क्रौञ्चस्तदङ्गणे । क्रीडन्नथागिलत्तस्य साधोरूर्ध्वस्य पश्यतः ॥ ८७ ॥ अवीक्षमाणस्तानेष स्वर्णकारो मुनिं जगौ । को जहाराजिरादस्मान्मुने स्वर्णयवान् वद ॥ ८८ ॥ जिनार्चनक्षणः साधो व्यतिक्रामति भूपतेः । निवेदय प्रसद्य त्वं साधवः स्युर्दयालवः ॥ ८९ ॥ दारयिष्यत्ययं पापबुद्धिः क्रौञ्चखगोदरम् । चिन्तयन्निति मेतार्यमुनिर्मौनमशिश्रियत् ॥ ९० ॥ मुनिं स्तेनं मन्यमानस्तमेवाज्ञाषणेन सः । कपाटसंपुटं द्वारे ददौ तत्कुट्टनाकृते ॥ ९१ ॥ न जल्पिष्यत्ययं तावद्यावद्गाढं न कुट्टितः । चौरस्याज्ञाषणं मुख्यं दक्षा लक्षणमूचिरे ॥ ९२ ॥ विमृश्येत्यार्द्रवध्रेण बबन्ध मुनिमस्तकम् । वध्रावलिविचाले सोऽक्षिपच्च दृढकीलिकाम् ॥ ९३ ॥ तयैव व्यथया स्थानात् प्रच्युते लोचने मुनेः । वध्रपट्टं मुनिर्मेने पुष्पमालामिवालिके[1] ॥ ९४ ॥ अचिन्तयच्च मे प्राणैः पश्चादपि तु

१ ललाटे.

गत्वरैः । मया क्षेत्रे न किं नाम यदि प्राणित्ययं खगः ॥ ९५ ॥ लब्धा न वेदनाः काः का भवता दुर्ग-
दुर्गतौ । निरर्थास्ताः साम्प्रतं तु प्राणित्राणाय जीव रे ॥ ९६ ॥ इति संवेगवेगेन तस्योत्पेदेऽथ केवलम् ।
तदैव शिवमापच्च क्षान्त्या किं किं भवेन्न हि ॥ ९७ ॥ इतश्च पाच्यमानस्येन्धनकाष्ठस्य तद्गृहे । खण्डमेकं
समुत्पत्य लग्नं कौञ्चखगोदरे ॥ ९८ ॥ यवानुदगिलत्सोऽपि जवात्तद्घातसंभ्रमात् । तत्समीक्ष्य कला-
दोऽपि पश्चात्तापपरोऽभवत् ॥ ९९ ॥ भूभृन्नीत्या स्वयं दीक्षां कक्षीकृत्याशु हेमकृत् । धर्मलाभाशिषा
भूपमभिगम्यान्यनन्दयत् ॥ १०० ॥ क्षापोऽपि ज्ञाततत्त्वस्तं कलादर्षिमशिक्षयत् । नीत्याऽऽत्ताऽपि
परिव्रज्या यलात् पाल्या त्वया मुने ॥ १०१ ॥ श्रुत्वेति क्षान्तिमाहात्म्यं मेतार्यर्षिनिदर्शनात् । सैव
कार्या यतो वः स्याद्विनाऽपि तपसा शिवम् ॥ १०२ ॥

॥ इति मेतार्यकथा ॥

अथ करकुरकसाधुकथा—

द्वौ मुमुक्षू कुणालायां विहरन्तौ समागतौ । एकं पदं तपोलक्ष्म्याः करकः कुरकस्त्विति ॥ १ ॥ पुरी-
निर्धमनासन्नस्थानेऽभूत्तदुपाश्रयः । तदानीमाययौ वर्षाकालो दुष्काललेखिनित् ॥ २ ॥ मा भूत्साध्वोर्म-
हानीरोपसर्गोऽत्रानयोरिति । अरौत्सीत्तत्पुरस्यान्तर्देवताऽम्भोदवर्षणम् ॥ ३ ॥ शमिनावपि तौ पौरैर्नि-
न्द्यमानौ मुहुर्मुहुः । क्रोधज्वलनज्वालाभिर्ज्वलन्तावित्यवोचताम् ॥ ४ ॥ वर्ष मेघ कुणालायां दिनानि

दश पञ्च च। धारानिर्मुष्टिमानाग्निर्यथा रात्रौ तथा दिवा ॥ ९ ॥ श्लोकस्यांद्यतृतीयांङ्घ्री करभो मुनिरूचिवान्। कुररुः प्राह तस्यैव समपादौ शमोज्झितः ॥ ६ ॥ गतौ साकेतमित्युक्त्वा कुणालामपि वारिदः। प्लावयामासिवान् यावद्वर्षन् पञ्चमहर्निशम् ॥ ७ ॥ तृतीये हायने तौ द्वावपि साकेतपत्तने। विपन्नौ नरकावासे कालाख्ये सप्तमावनौ ॥ ८ ॥ द्वात्रिंशत्सागरायुष्कौ नारकौ च बभूवतुः। एवं दुर्गतिदः क्रोधो ज्ञवेदपि तपस्विनाम् ॥ ९ ॥ युग्मम् ॥ कुणालाप्लावनाकालादब्दे जाते त्रयोदशे। वर्धमानार्हतो ज्ञानमुत्पेदे केवलाग्निधम् ॥ १० ॥

॥ इति करभकुररुसाधुकथा ॥

उक्तं षष्टितमं क्रोधद्वारमिदं। अथ द्वितीयं कषायं मानमाह—

मानी तपःश्रुतशमव्रतधर्महीनः, स्यान्नन्दिषेण इव पण्यवधूपहास्ये।
किं तारकः कमलजूवरदुर्धरोऽपि, नाकारि शम्भुशिशुना हृतसर्वगर्वः ॥ १२३ ॥

व्याख्या—मानी पुमान् तपोऽनशनादि प्रतीतं, श्रुतमाचाराङ्गादि, शम उपशमः, व्रतानि प्राणातिपातविरत्यादीनि, धर्मो दानादिः, तैर्हीनो रहितः स्यात्। क इव ? नन्दिषेण इव पण्यवधूपहास्ये वेश्यो-

---

१ प्रथमतृतीयपादौ.

पहास्ये । तथा कमलऋूवरदुर्धरोऽपि विधिवरदुर्दान्तोऽपि तारकस्तारकदैत्यः शम्भुशिशुना कार्तिकेयेन हृतसर्वगर्वो निरुत्साहः किं नाकारि ? अपि तु कृत एवेत्यक्षरगमनिका । उदाहरणे इमे—

नन्दिषेणकथा—

लक्ष्मीविलाससंवासगृहे राजगृहे पुरे । तृणीकृतरिपुश्रेणिः श्रेणिकोऽऋूत् क्षमापतिः ॥ १ ॥ तस्य शास्यमतेः पुत्रः पात्रं रूपश्रियामऋूत् । नन्दिषेण इति ख्यातः सागरस्येव चन्द्रमाः ॥ २ ॥ तत्रान्येद्युः समायातमन्त्यार्हन्तं विवन्दिषुः । साकं श्रीश्रेणिकेशेन नन्दिषेणो ययौ मुदा ॥ ३ ॥ नत्वा प्रदक्षिणीकृत्योपविष्टे ससुते नृपे । धर्मं स्वाम्यादिशऽम्भागर्ऋसोदरया गिरा ॥ ४ ॥ देशनान्ते प्रभुं नत्वा नृपं स्वस्थानमागतम् । दीक्षार्थं पप्रछे नन्दिषेणो ऋविरक्तधीः ॥ ५ ॥ तं कथमप्यनुज्ञाप्य व्रतार्थं यान्तमध्वनि । तमित्यूचे तदा व्योमस्थिता शासनदेवता ॥ ६ ॥ मा ऋूस्त्वमुत्सुको वत्स व्रताङ्गीकृतये यतः । चारित्रावरणं कर्मास्ति ते ऋोगफलप्रदम् ॥ ७ ॥ कालं कञ्चित्प्रतीक्षस्व क्षीणे ऋोगफले ततः । ऋजेर्दीक्षां यतः कालकृतं सर्वं प्रशस्यते ॥ ८ ॥ अर्हत्सेवापरे कर्म चारित्रावारकं मयि । किं कर्तेत्यऋिधायासौ जगाम जिनसन्निधौ ॥ ९ ॥ एवमुक्तोऽर्हताऽप्येष ऋवितव्यवशादथ । जग्राह साग्रहो दीक्षां समीपे चरमार्हतः ॥ १० ॥ सहन् परीषहानुग्रान् कुर्वाणो दुस्तपं तपः । स कर्मद्रुममुछेत्तुं दधौ श्रुतकुठारिकाम् ॥ ११ ॥ अजानन् स ययौ साधुरन्यदा षष्ठपारणे । एकाकी वेश्म वेश्यायाः धर्मलाऋं जगाद च ॥ १२ ॥ द्युम्नलाऋेन मे कार्यं धर्मलाऋोस्तु ते मुने । सोपहासमिति प्रोचे सा तं पण्याङ्गनाऽपि हि ॥ १३ ॥

किं मामुपहसत्येषा वराकीत्यभिमानतः। नीव्राकृष्टतृणादेष स्वलब्ध्याऽपातयन्मणीन् ॥ १४ ॥ द्युम्नलाभस्तवास्त्वेष इत्युक्त्वा प्रस्थितो गृहात्। वेश्याऽपि विस्मिताऽन्वेत्य तं प्रोचे मुनिमित्यथ ॥ १५ ॥ दत्त्वाऽवैक्रयमेतत्क नाथ यास्यसि मे गृहात्। नर्मदाऽहं पुरस्ते तद्भोगान् भुंक्ष्व मया समम् ॥ १६ ॥ एवं वचनवैचित्र्यात्तया रुद्धो विदन्नपि। स मेने तद्वचो भोगफलकर्मवशंवदः ॥ १७ ॥ देव्या जिनस्य च ध्यायन् वाक्यं दीक्षानिषेधकम्। विमुच्य मुनिलिङ्गं स वेश्यावेश्मन्युवास च ॥ १८ ॥ नरान् दशाधिकाँश्चापि बोधयिष्ये निरन्तरम्। नो चेद्व्रतं स्वयं लास्याम्यमुं सङ्कल्पमादधे ॥ १९ ॥ भोगाँस्तया समं भुञ्जन् स जनान् दश नित्यशः। प्रबोध्य प्रेषयामास दीक्षार्थं जिनसन्निधौ ॥ २० ॥ क्षीणे भोगफलेऽन्येद्युस्तस्य बोधयतोऽबुधन्। जनान्नवैव नो टङ्कजातीयो दशमः परम् ॥ २१ ॥ तस्मिन्नबुध्यमाने सा पण्यनारी विचक्षणा। भूयो भूयो बभाषे तं स्वामिन् रसवती कृता ॥ २२ ॥ अपूर्णसंगरः सोऽपि नोदस्थाद्भोजनाय यत्। तद्बुद्ध्या सा जगावद्य दशमस्तु त्वमेव हि ॥ २३ ॥ ततः प्रमुदितो नन्दिषेणः कर्मक्षयादयम्। गच्छन् गुर्वन्तिकेऽज्ञाणि तया मधुरया गिरा ॥ २४ ॥ मामनाथां विहाय त्वं स्वामिन् क्व प्रस्थितोऽधुना। स प्राह यामि गुर्वन्ते क्षीणकर्मा व्रतेच्छया ॥ २५ ॥ त्वयाऽपि श्रयणीयोऽर्हद्धर्मो देवद्रुमोपमः। स्वर्गापवर्गशर्माणि स्युः करस्थानि येन वै ॥ २६ ॥ विषयाः सेव्यमाना हि भवेयुः श्वभ्रदुःखदाः। एवं प्रबोध्य तां नन्दिषेणो वीरान्तिके ययौ ॥ २७ ॥ प्रतिक्रम्य तदालोच्य सम्यग्दुर्वृत्तमात्मनः। समा-

१ नीव्रं नीध्रं "नेवां" इति भाषायाम्. २ मूल्यम्. ३ क्रीमादायिनी. ४ प्रतिज्ञाम्.

धिना विपन्नोऽभूत्सोऽथो सुगतिभाजनम् ॥ २८ ॥ श्रुत्वेत्यहङ्कृतिर्दैन्यैः स्वचारित्रविनाशिनी । स्वप्नेऽपि न विधेया यत् को भजेद्विषवल्लरीम् ॥ २९ ॥

॥ इति नन्दिषेणकथानकम् ॥

अथ तारककथा—

पूर्वं प्रचण्डदोर्दण्डखण्डितारातिमण्डलः । नाम्ना तारकदैत्योऽभूत् प्रतापाक्रान्तविष्टपः ॥ १ ॥ एकदाऽसौ पर्युपास्त्या रुद्रयामास वेधसम् । स तुष्टो विश्वदुर्जेयो भवेत्यस्मै वरं ददौ ॥ २ ॥ ततः सोऽप्रतिमल्लत्वात्त्रैलोक्यमभिमानतः । सर्वत्रोच्चाटयामास निर्नाथमिव रोषणः ॥ ३ ॥ तेनाथोपद्रुते विश्वे विश्वे संभूय निर्जराः । गिरिशं संश्रिता भीत्या दैत्योच्छेदनहेतवे ॥ ४ ॥ शम्भुस्ततो निजं पुत्रं कार्तिकेयाख्यमादिशत् । ब्रह्मचर्यभृता तेन तारको निहतः क्षणात् ॥ ५ ॥ अभिमानद्रुमस्यैष ईदृशः कुसुमोत्करः । फलं त्वपारसंसारसागरे परिभ्रमणम् ॥ ६ ॥

॥ इति तारककथा ॥

मानी अवहीलां प्राप्नोतीत्याह—

स्वस्यापरस्य च बलान्यविचिन्त्य मानी, शक्राभ्यमित्रचमरेन्द्रवदापदे स्यात् ।
शुक्रः कदाचिदिह चेत्तनुते प्रकाशलेशं, ततः स्थगयतीन्दुमहो महत् किम् ॥ १२४ ॥

व्याख्या—स्वस्यात्मनोऽपरस्यान्यस्य च बलानि शक्तीरविचिन्त्याविचार्य मानी पुमानापदे कष्टाय स्यात् । किंवत् ? शक्राज्यमित्रचमरेन्द्रवत् इन्द्रवैरिपातालेन्द्रवदिति । तथा मानी सन् शुक्रः शुक्रग्रहश्चेद्यदि प्रकाशलेशं तेजोलवं तनुते विस्तारयति तर्हि महऋरिष्टं इन्दुमहश्चन्द्रकान्तिं किं स्थगयति आच्छादयति ? अपि तु नाच्छादयतीति शब्दार्थः । कथा चेयम् (चमरेन्द्रकथा)—

पुरे गजपुरे नाम्ना पूरणः श्रेष्ठिपुङ्गवः । वैराग्यात्तापसो भूत्वा तपस्तेपे सुदुस्तपम् ॥ १ ॥ मृत्वा तपःप्रभावेण देवभूयं जगाम सः । पुर्यां चमरचञ्चायां चमरेन्द्रेतिनामतः ॥ २ ॥ अन्यदाऽवधिना सौधशीर्षोपरि ददर्श सः । सौधर्माधिपतेः पादौ ततः क्रुद्धः स्वचेतसि ॥ ३ ॥ जगौ च सचिवान् सौवान् अयंपापः कथं ननु । आस्ते कृत्वा क्रमौ शीर्षोपरि मे वदत स्फुटम् ॥ ४ ॥ परं साम्प्रतमेवाहं शिक्षां कुर्वेऽस्य दुर्धियः । दुष्टा नाशिक्षिता मार्गे प्रचलन्ति कदापि यत् ॥ ५ ॥ क्रोधं विधेहि मा स्वामिन् स्थितिरेषा हि शाश्वती । इत्यादि शिक्षितोऽप्येष मन्त्रिभिः कुपितोऽवदत् ॥ ६ ॥ यदि मे पूर्वजत्रातोऽक्षमोऽभूत्तस्य शिक्षणे । तन्मयाऽपि क्षमेणायं शिक्षणीयो न किं कुधीः ॥ ७ ॥ इति मानेन निर्गत्य स्वपुर्या द्रुवमागमत् । स दध्यौ च हृदा प्राप्तविवेकश्चमरो हरिः ॥ ८ ॥ कदाचित्त्वराभूतस्तत्क यास्याम्यहं ततः । करोमि शरणं कञ्चिन्नरण्यं साम्प्रतं न(व)रम् ॥९॥ ततो वीक्ष्य जिनं वीरं शरणीकृत्य च क्रमात् । विकुर्व्य दारुणं रूपं श्याममत्यद्भुतं द्रुतम् ॥ १० ॥ स्वकान्त्या श्यामयन् स्वर्गिविमानानि मुखानि वै । जगाम

१ स्वार्थे वशब्दः.

चमरेन्द्रोऽथ सौधर्मेन्द्रसदोऽन्तरे ॥ ११ ॥ दृष्प्रेक्ष्यं प्रेक्ष्य तं देवाः पूच्चक्रुरखिला अपि । संभ्रान्तेनाथ शक्रेण प्रयुक्तोऽवधिरात्मनः ॥ १२ ॥ मत्वा तं चमरं स्मित्वा वज्री वज्रं मुमोच तत् । भीतः सोऽपि द्रुतं नंष्ट्वा प्रत्यचालीज्जलद्बलः ॥ १३ ॥ दध्यौ च सुरनाथोऽत्र चमरः कथमागतः । ततोऽबुद्ध प्रभुं वीरं तीर्थपं शरणीकृतम् ॥ १४ ॥ हा मया पापिना वज्रं मुक्तं साधर्मिकं प्रति । ध्यात्वेति चास्य रक्षार्थं सौधर्मेन्द्रस्तमन्वगात् ॥ १५ ॥ चमरोऽपि तदा बिभ्यत् कुन्थूभूय प्रविष्टवान् । कायोत्सर्गस्थितस्यान्त्यार्हतः पादतले जवात् ॥ १६ ॥ तदपि[1] प्रविशत्तत्राग्रहीद्देवेश्वरः क्षणात् । ततः साधर्मिकत्वेन तयोः प्रीतिरजायत॥१७॥एवमन्येऽपि मानेन ये स्वं जानन्ति नो बलम् । तेऽप्येवमापदां पात्रं भवन्ति भुवि दुर्धियः ॥१८॥

॥ इति चमरेन्द्रकथा ॥

उक्तमेकषष्टितमं मानद्वारं । अथ तृतीयां मायामाह—

माया दुर्गतिकृद्भवेत् परभवे क्लेशाय वास्मिन् पुनः,
श्रीवीरेण सुरोऽपि कैतवसखा कुञ्जीकृतो मुष्टिना ।
किं कर्णस्य न निष्फला युधि कला विप्रच्छलात्ताऽभवत्,
किं श्रीशो न जगाम वामनतनुर्दैन्यं बलेर्बन्धने ॥ १२५ ॥

१ वज्रमपि.

व्याख्या—माया कपटं परत्रवेऽन्यजन्मनि दुर्गतिकृन्नवेत् । वा पुनरस्मिन्नपि इह त्रवेऽपि क्लेशाय कष्टाय स्यात् । श्रीवीरेण कैतवसखा कपटमित्रं सुरोऽपि मुष्टिना मुष्टिप्रहारेण कुब्जीकृतः । तथा कर्णस्य कर्णनामन्नृपस्य युधि संग्रामे कला समस्तारिविजयरूपा किं न निष्फला सफला बभूव ? अपि तु नाभवत् । कस्मात् (कथंभूता कला) ? विप्रछलात् (त्ता) ब्राह्मणकपटात् (विप्रछलेन ब्राह्मणवेशेन आत्ता स्वीकृता) । तथा श्रीशो नारायणो बलेर्बन्धने बलिदैत्यस्य बन्धने वामनतनुः सन् किं दैन्यं न जगाम ? अपि तु गत एवेति वर्णार्थः । कथास्त्वेताः—

श्रीमहावीरकथा—

सिद्धार्थवसुधाधीशसौधे क्रीडति सुन्दरः । श्रीवर्धमानकुमरो राजेन्द्रकुमरैः समम् ॥ १ ॥ सौधर्माधिपतिः स्वीयसदोऽन्तः स्वर्गिणां पुरः । व्याख्यानं जिनसत्त्वस्य चकारेति प्रहर्षुलः ॥ २ ॥ बालोऽप्यबालभावोऽयं वीरोऽबालपराक्रमः । नैनं क्षोभयितुं शक्ताः शक्रा अपि सनिर्जराः ॥ ३ ॥ श्रुत्वेत्यश्रद्दधत् कोऽपि देवोऽत्रागत्य सत्वरम् । क्रीडितुं स्वामिना सार्धं प्रवृत्तः कैतवार्जकः ॥ ४ ॥ पुरःस्थं शाल्मलीवृक्षं पूर्वं स्पृशति योऽर्जकः । स आरोहति सर्वेषां स्कन्धेऽमुं संगरं व्यधुः ॥ ५ ॥ ततस्ते शाल्मलीवृक्षं संस्पृष्टुं धावितास्तदा । सुरेणाहिस्तरुस्कन्धे विकृतोऽतिभयङ्करः ॥ ६ ॥ तं प्रेक्ष्य शिशवः सर्वे भीता नष्टाश्च सत्वरम् । वीरस्त्वाकृष्य तं रज्जुवन्निर्व्यास्पृशत्तरुम् ॥ ७ ॥ ततो जिते[1] जिनेनायं स्कन्धमारोप्य

१ जिनेन जिते सति.

तं सुरः । ववृधे मायया मंक्षु यावदादित्यमण्डलम् ॥ ८ ॥ निशम्येति प्रज्ञोः पित्रोस्तत्र संगतयोर्नृशम् । शोकोऽपि ववृधे तस्य सुरस्य स्पर्धयेव नु ॥ ९ ॥ तं मत्वा तीर्थनाथेन सुरः स्मित्वा च मुष्टिना । प्रहृत्य वामनीचक्रे क्षणेन बलशालिना ॥ १० ॥ इति तीर्थेशसत्त्वेन देवः सोऽपि चमत्कृतः । क्षमयित्वा प्रभुं स्वर्गं जगाम प्रस्तुवन् जिनम् ॥ ११ ॥

॥ इति श्रीमहावीरकथा ॥

अथ कर्णकथा—

श्रीकर्णभूभृदन्येद्युर्द्विजरूपेण संततम् । पर्शुरामसमीपे तद्विद्यां पठितवानथ ॥ १ ॥ अन्यदा पठत-स्तस्योत्सङ्गे सुष्वाप रामकः । तदैव दष्टः सर्पेण जङ्घायां कर्णभूपतिः ॥ २ ॥ तत्र रक्तप्रवाहेण वहता पर्शुरामकः । जजागार तमूचे च किमिदं रुधिरं शुभ्र ॥ ३ ॥ तेनापि कथिते तत्र यथार्थे यमदग्निजः । दध्यावीदृशसत्त्वेन क्षत्रियोऽयं न वै द्विजः ॥ ४ ॥ ऊचे च भोस्त्वया विद्या गृहीता ब्राह्मणाद्बलात् । क्षत्रियेण ततस्ते न भाविनी सफला युधि ॥ ५ ॥ ततः कर्णस्यापि विद्या साऽभवत्सफला न हि । तथा मायायुतो धर्मो न भवेत् सफलः क्वचित् ॥ ६ ॥

॥ इति कर्णकथा ॥

अथ श्रीशकथा—

अन्यदा बलिभूमीशे ददाने दानमद्भुतम् । अच्युतः कुपितो येनातिकृतं न शुभायति ॥ १ ॥ तत-

स्तन्निग्रहार्थं स वामनीभूय रंहसा । ययाचे त्रिपदीमानं भूमिभागं बलिं नृपम् ॥ २ ॥ दत्ते तस्मिँस्तु कृष्णेनाक्रान्तं सर्वं महीतलम् ॥ द्वाभ्यामेव क्रमाभ्यां झाक् प्रोक्तं चेति स्फुरत्क्रुधा ॥ ३ ॥ रे पाप तृतीयं पादं क्व मुञ्चामि ततोऽमुना । पृष्ठे स्वे दर्शिते पादं मुमोच स्वं जनार्दनः ॥ ४ ॥ महाबलः प्रचिक्षेप पाताले तं रुषा बलिम् । तुतोष चास्य सत्त्वेन निजगाद च तं प्रति ॥ ५ ॥ वरं याचस्व तुष्टोऽहं साहसेनेदृशेन ते । बलिरप्यवदद्वारि द्वाःस्थीभूयासि तिष्ठ मे ॥ ६ ॥ तथेति प्रतिपद्यायं तस्याभूद्वारपालकः । एवं माया कस्य कस्य न स्याद्दैन्यावहा भुवि ॥ ७ ॥

॥ इति श्रीशकथा ॥

भूयोऽपि मायायाः सर्वकषायाधिक्यं ज्ञापयति—

सर्वेऽप्येते कषायाः सदृशबलभृतः किंतु तीव्रैव माया,
या जित्वाषाढभूतिं नटमिव नटयामास गौरीव रुद्रम् ।
स्त्रीत्वं स्त्रीलिङ्गभावादिह नृषु न ददौ मल्लिमुख्येषु या किं,
सत्यं दुर्दान्तदैत्यं कितवमृगदृशीभूय विष्णुर्जघान ॥ १२६ ॥

व्याख्या—एते क्रोधादयः कषायाः सदृशबलभृतः समानबलवन्तः । किंतु परंतु माया तीव्रैव । एत-

---

१ असीति त्वमित्यर्थेऽव्ययम्.

देवाह—या माया आषाढभूतिमुनिं जित्वा (नटं) नर्तकमिव नटयामास । केव कं ? गौरीव उमेव रुद्रं शम्भुं । या माया पुनः श्रीमद्विमुख्येषु नृषु मनुष्येषु स्त्रीत्वं किं न ददौ ? अपि तु ददावेव । कस्मात् ? स्त्रीलिङ्गभावात् । सत्यमेतत्, विष्णुर्नारायणः कितवमृगदृशीभूय कपटस्त्रीरूपं कृत्वा दुर्दान्तदैत्यं जघान हतवानेवेति वर्णार्थः । भावार्थः परिकथ्यते कथाभिः—

आषाढभूतिकथा—

आषाढभूतिरित्यासीद्भिक्षे क्वापि मुनीश्वरः । पदं सुन्दरलब्धीनां बुद्धीनामभयो यथा ॥ १ ॥ अन्यदा षष्ठभक्तस्य पारणाकारणेन सः । क्वचित् पुरि परिभ्राम्य प्रविवेश नटौकसि ॥ २ ॥ तदा तस्य गृहे सर्वभिक्षूणामेकमोदकः । दीयतेऽथ तदाषाढभूतेरपि स आर्प्यत ॥ ३ ॥ मुनिस्तद्वारदेशेऽथ समागत्येत्यचिन्तयत् । सूरीणां मोदकोऽयं तु भावी [1]मे नैमि तत् पुनः ॥ ४ ॥ लब्ध्या विधाय स क्षुल्लरूपं निरुपमं ततः । भूयोऽपि प्राविशत्तस्य वेश्म मोदकवाञ्छया ॥ ५ ॥ स लब्धमोदको दध्यौ पुनस्तद्वारमागतः । ग्रहीताऽमुमनूचानस्तद्यामि स्वकृते पुनः ॥ ६ ॥ स विधाय वृद्धसाधुरूपं गत्वा च तद्गृहे । लब्ध्वा च मोदकाँश्चित्तमोदकान् वसतौ गतः ॥ ७ ॥ तं परावर्तयन्तं स्वरूपाणि गृहनायकः । तदा गवाक्षगो वीक्ष्य चेतसीति व्यचिन्तयत् ॥ ८ ॥ मम सद्मन्ययं तिष्ठेद्यदि कामितरूपकृत् । कल्पद्रावि संतुष्टे तत् किं न स्यान्ममेप्सितम् ॥ ९ ॥ निजपुत्र्यौ ततस्तेनादिष्टे तं क्षोभितुं मुनिम् । रूपाक्षिप्तरतिप्रीती पात्रं प्रेंखत्क-

१ मे न भावी, तत्तस्मात् पुनः एमि गच्छामि.

लावलेः ॥ १० ॥ मोदकार्थी मुनिः सोऽपि द्वितीयेऽपि दिने यदा । आगतः स तदैतान्यां हावभावैस्तु चालितः ॥ ११ ॥ यावन्नवगृहे मद्याद्यासक्तिर्न भविष्यति । तावत्स्थास्यामीति प्रोच्य स मुनिस्तद्गृहे स्थितः ॥ १२ ॥ नटेन स्वकलाः सोऽथ पाठितः कतिभिर्दिनैः । रूपैर्विस्मापयामास स तदा विरचितैर्नृपान् ॥ १३ ॥ ततो बहुतरं वित्तमुपात्तममुनाऽचिरात् । किं किं स्याद्दुर्लभं लोके तादृशानां कलावताम् ॥ १४ ॥ बहिर्गतेऽन्यदाषाढभूतौ ते नटपुत्रिके । पीत्वा मद्यं विह्वलाङ्ग्यौ गायतः स्म यदृच्छया ॥ १५ ॥ अकस्मादागतः सोऽपि दृष्ट्वा तच्चेष्टितं तयोः । विरक्तो व्रतहेतोर्यान् रक्षितो निखिलैर्नटैः ॥ १६ ॥ तथापि तिष्ठत्येषोऽथ न यावत्प्रार्थितस्ततः । सकृन्मृत्यकृते सोऽपि तद्दाक्षिण्यात्प्रपन्नवान् ॥ १७ ॥ ततो नटपरीवारो जितशत्रुनृपान्तिके । गत्वा प्रचक्रमे कर्तुं नाटकं भरताग्रिधम् ॥ १८ ॥ स स्वं भरतचक्रीव पश्यन्नादर्शवेश्मनि । केवलज्ञानमाषाढभूतिः संप्राप सन्मनाः ॥ १९ ॥ तन्नटाश्च तथैवापुः केवलं ज्ञानमुज्ज्वलम् । क्षमापादयोऽपि ते तेन बोधिताः परिवव्रजुः ॥ २० ॥ एवं माया मनुष्याणां विडम्बनविधिप्रदा । विधेया विबुधैर्नैवापवर्गसुखकांक्षिभिः ॥ २१ ॥

॥ इति आषाढभूतिकथा ॥

श्रीमल्लिनाथरुद्रयोः कथा प्राक्कथिता । अथ दुर्दान्तदैत्यकथा—

एकदा दुर्दान्तदैत्येन ब्रह्माराधने दुर्जेयवरो लब्धे । ततः स यस्य शिरसि स्वहस्तं प्रतिघपूरेण[1] मुञ्चति

---

१ रोषसमूहेन.

स स्पर्शमात्रेण ऋस्मावशेषीऋवति । अन्यदा यथाकामं ब्रह्माएके क्रीऋन् गौरीरूपमोहितस्तां जिघृक्षुः पशुपतिसमीपमागतः । ऋीतस्ततः सोऽपि दामोदराऋ्यर्णं गतो मां पाहि पाहीति जल्पाकः । ततः कृष्णस्तं स्वस्थीकृत्य गौरीरूपं कृत्वा तद्दैत्यसविधे जगाम । तं गौरीं मत्वा मुदितः प्राह—"हे सुन्दरि मां ऋर्तृत्वेन प्रतिपद्यस्व" । सा प्राह—"यदि ममाग्रे नृत्यं कुरुषे तर्हि त्वां ऋजामि" । ततः स नृत्तं कर्तुमारेऋे । विष्णुना ऋस्मीऋवेत्युक्तो ऋस्मीबऋूव दैत्यः । एवं विष्णुरपि मायया स्त्रीत्वं ऋगामेति ॥

॥ इति दुर्दान्तदैत्यकथा ॥

उक्तं द्विषष्टितमं मायाद्वारं । अथ चतुर्थं लोऋकषायमाह—

लोऋी तृप्यति नो घनैरपि धनैरिच्छन्नवं स्वं नवा-
दप्याद्यः पितृकल्पितानुजपदं किं चार्षऋिर्नाच्छिदत् ।
अश्रान्तं सरितां शतैरपि भृतः किं वाम्बुधिः पूर्यते,
किं वा शाम्यति काष्ठकोटिऋिरपि ज्वालाकरालोऽनलः ॥ १२७ ॥

व्याख्या—लोऋी पुमान् घनैः प्रचुरैरपि धनैर्द्रव्यैः कृत्वा नो तृप्यति तृप्तिं न याति । किं कुर्वन् ? नवादपि स्वाद्रव्यान्नवं स्वमिच्छन्नऋिलषन् । तथा चार्षऋिः श्रीप्रथमजिनतनूज आद्यो मुख्यो ऋरताख्यः पितृकल्पितानुजपदं पित्रा श्रीआदिनाथेन कल्पितं दत्तमनुजानां बाहुबल्यादीनां यत् पदं राज्यं किं

तन्नाच्छिदत् प्रसह्य किं नाग्रहीत् ? अपि तु अच्छिददेव । अश्रान्तं निरन्तरं सरितां नदीनां शतैरपि नृतो नरितोऽपि किमम्बुधिः समुद्रः पूर्यते ? अपि तु नेति । तथाऽनलोऽग्निर्ज्वालाकरालो ज्वालाभीमः सन् वाऽथवा काष्ठकोटिभिरपि किं शाम्यति शमं याति ? अपि तु नेत्यक्षरार्थः । कथा चेयम्—(भरतकथा)—

श्रीयुगादिजिनः सौवतनयेभ्यः पृथक् पृथक् । दत्त्वा जनपदं सर्वं स्वयं व्रतिपदं श्रितः ॥ १ ॥ भरत प्राप्य चक्रादिरत्नजातं क्रमादथ । संसाध्य भारतं वर्षं पुर्ययोध्यामधिश्रितः ॥ २ ॥ तदानीमिति सेनानीर्भरतेशं व्यजिज्ञपत् । स्वामिन्नद्यापि नो चक्ररत्नमेत्यायुधौकसि ॥ ३ ॥ भरतः प्राह किं कोऽपि शिष्टिं नाङ्गीकरोति मे । येन चक्रान्निधं रत्नं नायात्यायुधसद्मनि ॥ ४ ॥ स जगौ तेऽनुजन्मानः सर्वेऽप्याज्ञां तव प्रभो । न मन्यन्ते पितृदत्तराज्येनैते यदीश्वराः ॥ ५ ॥ अतितृष्णतया चक्री स्वाज्ञाङ्गीकारणाय सः । प्रजिघाय निजान् दूताँस्तेषामेवानुजन्मनाम् ॥ ६ ॥ दूतैस्तत्तत्पुरो गत्वा जल्पाकैरित्यजल्प्यत । अग्रजोऽसाधयत्सर्वं भरतं भरतोऽत्र वः ॥ ७ ॥ प्रपद्यध्वं ततो यूयमप्याज्ञां तस्य भूपतेः । यथा वोऽप्याधिपत्यादेर्लाभो भवति साधिकः ॥ ८ ॥ ज्यायसः शिष्टिकारित्वं युक्तं येन कनीयसाम् । आज्ञां कुर्वत्सु युष्मासु चक्रिताऽस्याप्यवस्यति ॥ ९ ॥ नो चेत्कुप्यति तत्रास्तामिन्दिरामन्दिरादिकम् । युष्माकं दुर्लभं भावि प्राणधारणमप्यहो ॥ १० ॥ इत्युक्तास्तेऽनुजन्मानो विना बाहुबलिं नृपम् । सर्वे संभूय

१ आज्ञाम्.

चान्योऽन्यं वार्तयामासुरित्यमी ॥ ११ ॥ हंहो पित्रार्पितं राज्यं तस्यास्माकं च तेन किम् । आक्षीप्सति साम्प्रतं नोऽग्रजन्मौदरिकः कुधीः ॥ १२ ॥ स तद्बुधि पराजित्यास्मान्निर्न्यक्रियतेऽधुना । परं न चोचितं तन्नो युद्धं सहाग्रजन्मना ॥ १३ ॥ ततो गत्वाऽधुना तातः पृच्छ्यते कृत्यमात्मनः । यथाऽऽदिष्टा स भगवाँस्तथाऽस्मान्निः करिष्यते ॥ १४ ॥ एवमालोच्य तेऽयाष्टानवतिः प्रभुसूनवः । प्रणत्य शिरसा तीर्थनाथमेवं व्यजिज्ञपन् ॥ १५ ॥ प्रभो त्वयाऽर्पितं राज्यमग्रजो नो जिघृक्षति । दक्षः कुर्मोऽथवा युद्धं युक्तमादिश सम्प्रति ॥ १६ ॥ प्रभुर्जगाद हे वत्सा अतुल्याः स्वेनात्मना । इन्द्रोपेन्द्रश्रियो भुक्ता नापि सौहित्यमञ्चति ॥ १७ ॥ अनलः काष्ठसंभारैः सरिद्भिः सरितां पतिः । न यथा तृप्तिमाप्नोति तथाऽऽत्मा भोगसंचयैः ॥ १८ ॥ स्फुरत्सुरसरित्क्षीरनीरधिनीरहारिणः । अवियोगान् स्वर्गिभोगान् भुक्त्वा स्वैरमनेकशः ॥ १९ ॥ ग्रीष्मे मरौ क्षारकूपादर्भपूलाहताम्बुना । समैर्मानवभोगैः कस्तृप्येद्घाऽङ्गारदाहकः ॥ २० ॥ युग्मम् ॥ किंपाकफलसंकाशराज्यस्यार्थे हि कः सुधीः । कुर्याद्भ्रात्रा समं युद्धं यद्विपाको दुरायतिः ॥ २१ ॥ मुक्त्वा राज्यस्पृहां वत्सा भवन्तो दधतां मनः । स्वर्गापवर्गसंसर्गालंकर्मीणे व्रताध्वनि ॥ २२ ॥ इत्युक्ताः प्रभुणा तेऽथ निर्वेदं दधतो हृदि । दीक्षां कक्षीकृत्य सर्वैर्लेभिरे केवलं क्रमात् ॥ २३ ॥ तत्रैत्य भरतस्तेषां राज्येऽस्थापयदङ्गजान् । जनं बाहुबलेः प्रैषीत्स्वाज्ञाङ्गीकारणाय च ॥ २४ ॥ सोऽपि तेन तथै-

---

१ तृप्तिम्.

वोक्तः प्राह राज्ये निजे स्थितः । कथं कुर्वे त्वदीयाज्ञां विना तादृक् प्रयोजनम् ॥ २५ ॥ अहंयुरथ ते नाथश्चेत्तद्युद्धा मया समम् । शुभंयुर्भवतादेवमुक्त्वा तं विससर्ज सः ॥ २६ ॥ दूतोऽपि स्वपुरे गत्वा तत्स्वरूपं व्यजिज्ञपत् । सोऽपि क्रुद्धो निजं सैन्यं मेलयित्वा तमभ्यगात् ॥ २७ ॥ तमायान्तं निशम्याथ बलं बाहुबलिर्निजम् । मेलयामास सैन्ये द्वे क्रमात्संमिलिते ततः ॥ २८ ॥ दध्यौ बाहुबलिः स्वार्थसाधनायाखिलं बलम् । मार्यते किमिति क्षापं तं दूतेनेत्यवादयत् ॥ २९ ॥ राज्याशंसाऽस्ति नावेव किं सैन्यायासनेन तत् । युध्यतेऽन्योऽन्यमावाभ्यां नावी जेता तु राज्यभाक् ॥ ३० ॥ करीकृतेऽत्र तेनापि योद्धुं लग्नाविमौ क्रमात् । वचोयुद्धादिभिर्बाहुबलिना भरतो जितः ॥ ३१ ॥ दण्डयुद्धेऽथ वैराग्यमभूद्बाहुबलेस्ततः । कृत्वा लोचं कचानां स तत्र प्रतिमया स्थितः ॥ ३२ ॥ भरतोऽप्यथ तत्सूनुं तत्पदे न्यस्य हर्षभाक् । जगाम स्वपुरीं पूर्णचक्रभृद्भिभवो जवात् ॥ ३३ ॥ उत्पन्नकेवलान् सौवानुजान् वन्देऽधुना कथम् । इति ध्यायन् बाहुबलिस्तत्रास्थाद्वर्षमेककम् ॥ ३४ ॥ स्वाम्याज्ञया ततो ब्राह्मीसुन्दरीभ्यां प्रबोधितः । केवलं प्राप्य संप्राप्तः श्रीमत्तीर्थेशसन्निधौ ॥ ३५ ॥ एवं लोभाभिभूतानां कः स्नेहः का विचारणा । तस्माल्लोभं परित्यज्य भजन्तां शाश्वतं सुखम् ॥ ३६ ॥

॥ इति भरतकथा ॥

---

१ अभिमानी.

सामान्येन लोभस्य दुरन्ततामुक्त्वाऽथ तस्यैव कलितवौपम्यं दर्शयति—

चित्तावन्यां जनानां कपिलसमधियां वित्तलेशाप्तिमूलः,
प्रत्याशावारिसिक्तो धनिविविधधनप्रार्थनाऽऽभोगवद्गुः ।
ऋूपेन्द्रत्वादिसंपन्मतिकुसुमततिर्भोगचिन्ताफलर्द्धि-
र्लोभो धृत्या श्रवन्त्या व्रजतु कलितरुर्वप्युरप्यर्तिहेतुः ॥ १२८ ॥

व्याख्या—लोभ एव कलितरुर्बिभीतकवृक्षो वप्युरपि लोभकृतोऽपि अर्तिहेतुः पीडाकारकत्वेन व्रजतु क्षयं यातु । कया ? धृत्या सन्तोषरूपया श्रवन्त्या नद्या । किंविशिष्टो लोभकलितरुः ? चित्तावन्यां मनोभूम्यां कपिलसमधियां[1] कपिलविप्रतुल्यबुद्धीनां जनानां वित्तलेशो वित्तबलवस्तस्याप्तिर्लोभस्तदेव मूलं यस्य स तथा । पुनः किंविशिष्टः ? प्रत्याशा प्रतिवाञ्छा सैव वारि जलं तेन सिक्तः । भूयोऽपि किंभूतः ? धनिनां यानि विविधानि नानाप्रकाराणि धनानि तेषां प्रार्थना याच्ञा तस्या आभोगो विस्तारस्तेन वद्गुः कान्तः । पुनः किंभूतः ? भूपेन्द्रत्वादिका या संपल्लक्ष्मीस्तस्या मतिः प्राप्तुमिच्छा सैव कुसुमततिः पुष्पश्रेणिर्यत्र स तथा । पुनः किंविशिष्टः ? भोगचिन्तैव फलर्द्धिर्यत्र स तथा । अन्योऽपि बिभीतकवृक्षो वप्युरेवार्तिहेतुः स्यादिति युक्तोपमेयमिति वृत्ताक्षरार्थः । कथा त्वेषा (कपिलमहर्षिकथा)—

१ कलिर्बिभीतको नाम वृक्षः.

अयोध्यायां पुरि कस्यचिद्भूपस्य पुरोधसः । पुत्रः कपिलनामाऽभूद्भूपपद्मावण्यसेवधिः ॥ १ ॥ शैश-
वेऽपि पिता तस्य पञ्चत्वं प्राप दैवतः । पुरोधःपदवीं तस्यान्यस्यादाद्भूपतिस्ततः ॥ २ ॥ कपिलाम्बा-
ऽन्यदा वीक्ष्य तं वसन्तं पुरोधसम् । दुःखिता रुदती प्रोचे कपिलेनेति सत्वरम् ॥ ३ ॥ मातः किं रुद्यते
ब्रूहि रुदनं निर्निबन्धनम् । सा प्राह वत्स ते तातोऽप्यासीदीदृक्समृद्धिनाक् ॥ ४ ॥ निष्कलं त्वाधुना
मत्वा क्षितीशस्ते पितुः पदम् । ददावन्यस्य तं वीक्ष्य तथा सम्प्रति रोदिमि ॥ ५ ॥ सोऽप्यूचेऽम्ब मा
विषीदाधीत्याहं सकलाः कलाः । प्रतिलास्यामि तत्तातपदं कुलक्रमागतम् ॥ ६ ॥ सा जगौ वत्स ते पित्रा
मदान्धेनाखिला द्विजाः । पीडितास्तेन ते विद्यां कोऽपि दास्यति नाधुना ॥ ७ ॥ करवाण्यम्बाहं तत्
किमित्युक्ता साऽप्यभाषत । अवन्त्यामस्ति ते तातमित्रं सोऽध्यापयिष्यति ॥ ८ ॥ ततः स सङ्गतस्तत्र
पठँस्तस्य समीपके । भुञ्जानः श्रेष्ठिनो गेहेऽभूद्दास्यामनुरागभाक् ॥ ९ ॥ अन्यदा प्रार्थितो दास्या स
हेम्नो माषकद्वयम् । चुर्विधस्तदभावेन विज्ञायवदनोऽजनि ॥ १० ॥ मा विधेह्यधृतिं स्वामिन्नुपायं वच्मि
तेऽधुना । अत्रत्यद्भापतेः पूर्वमाशीर्वादं ददाति यः ॥ ११ ॥ स्वर्णमाषकयुग्मस्य स दत्ते तस्य दक्षिणाम् ।
तयेत्युक्तस्तमुच्चन्नेऽप्याशीर्वादयितुं निरैत् ॥ १२ ॥ वाञ्छन् हेमलवं शीघ्रं स व्रजन् राजवर्त्मनि । तत्र-
स्थारक्षकैर्दस्युरिति संदानितस्तदा ॥ १३ ॥ नीतश्च पुरतो राज्ञः सोऽपि तं वीक्ष्य विह्वलम् । नायं पाटच्चर

---

१ त्वा त्वाम्. २ गृहीतः.

इति निश्चिकायेङ्गितादिज्ञिः ॥ १४ ॥ कस्त्वमित्युदितो राज्ञा कपिलोऽवग् यथाश्रुतम् । ततस्तुष्टो नृपः प्रोचे ज्ञो याचस्व स्वमीहितम् ॥ १५ ॥ विमृश्य मार्गयामीति प्रोच्यागात् कपिलो वने । दध्यौ च याच्यते हेममाषकाणां शतं नृपः ॥ १६ ॥ अथ स्यात्तेन मे तादृग्नर्मकर्म न शर्मदम् । तत्सहस्रं न तेनापि निर्वाहो मे सनातनः ॥ १७ ॥ एवं चिन्तयतश्चित्तं कोटाकोटावपि स्थितम् । कपिलस्य न तद्भोगविरक्तस्त्वित्यचिन्तयत् ॥ १८ ॥ अहो दास्या प्रार्थितस्य मम माषद्वयार्थिनः । तुष्टे राज्ञ्यधुना चित्तं न कोटावपि निष्ठितम् ॥ १९ ॥ महालोभाग्निभूतस्य कृत्यान्धबधिरस्य मे । धिगस्तु चेष्टितं दुष्टं ज्ञवद्वयविनाशकृत् ॥ २० ॥ इत्थं विमृशतस्तस्य वैराग्याख्यो रसाधिपः । जग्राह मानसे तैलबिन्दुवत्पाथसि प्रथाम् ॥ २१ ॥ समं लोभद्रुणा केशानुत्पाट्य देवतार्पितम् । वेषं स्वीकृत्य राजानं कपिलोऽधर्मलाभयत् ॥ २२ ॥ विस्मितः सोऽपि तं प्रोचे किमिदं वद सुन्दर । ततः सोऽदोऽवदत् क्षापं स्ववृत्ताख्यानपूर्वकम् ॥ २३ ॥ यथा लाभस्तथा लोभो लाभाल्लोभः प्रवर्धते । द्विमाषकार्थिनश्चित्तं कोटावपि न मे स्थितम् ॥ २४ ॥ ततः स प्रणतो राज्ञा सपौरेण प्रमोदतः । विहरँश्च केवलं प्राप्य कपिलो निर्वृतिं गतः ॥ २५ ॥ लोभस्फूर्जितमित्येवं निशम्य विबुधा जनाः । लोभं निगृह्यतां यद्वो मुक्तिः स्यात्कुटहारिका ॥ २६ ॥

॥ इति कपिलमहर्षिनिदर्शनम् ॥

---

१ घटहारिका दासीत्यर्थः.

उक्तं त्रिषष्टितमं लोत्तरद्वारं । अथ क्रमायातं पुण्यदिनप्रक्रमं विवक्षुः पूर्वं वर्षाद्दमाश्रमणोचितमुपदेशमाह—

स्वर्न्नूमेर्मातृगर्ज्जेऽगमदुदयमहो यः सुरैर्मेरुशैले,
सिक्तस्तातालयेऽगादुपचयमनिशं ज्ञाययाऽऽक्रान्तविश्वः ।
पादोपान्तावनम्रत्रिजुवनजनताखीकृतोच्चैःफलर्द्धिः,
श्रीवीरो वोऽस्तु चिन्ताधिकतरवरदः कल्पशाखी नवीनः ॥ १२९ ॥

व्याख्या—श्रीवीरो वो युष्माकं चिन्ताधिकतरवरदोऽस्तु चिन्ता वाञ्छा तस्या अधिकतरं वरं ददातीति तथा ज्ञवतु । अत एव नवीनः कल्पशाखी । अन्यस्तु कल्पद्रुश्चिन्तितमेव ददातीति ज्ञावः । ज्ञूयोऽपि विशेषणमुखेन नवीनत्वं निरूपयति—यः श्रीवीरः सुरद्रुर्नवीनः स्वर्न्नूमेः सकाशात् मातृगर्ज्जे श्रीत्रिशलादेवीकुक्षौ ज्ञदयं ज्ञत्पत्तिमगात् गतः । पश्चात्सुरैर्मेरुशैले अहो इत्याश्चर्ये सिक्तः स्नानं कारितः । तातालये पितृगृहे ज्ञपचयं वृद्धिं गतः अनिशं निरन्तरं ज्ञाययाऽऽक्रान्तविश्वः ज्ञायया प्रतापेनाक्रान्तं विश्वं येन स तथा । पादयोरुपान्ते समीपेऽवनम्रा प्रणता या त्रिजुवनजनता तया स्वीकृताऽङ्गीकृता ज्ञच्चैरतिशयेन फलर्द्धिर्यस्मात्स तथा । अन्यः कल्पशाखी स्वर्न्नूमावुदयमासादयति, न तु मातृगर्ज्जे । देवैर्मेरुशैले सिक्तस्तत्रैव वर्धते, न तु तातालये । स तु ज्ञायाक्रान्तैकदेशो ज्ञवति, न ज्ञाययाक्रान्तविश्वः ।

तथा स तु पादोपान्तावनम्रत्रिभुवनजनतया स्वीकृतोच्चैःफलर्द्धिर्नस्यात्, अयं तु तथा, न हि कुतोऽपि वृक्षतः पादोपान्तावनम्रत्रिभुवनजन उच्चैःफलर्द्धिमुच्चदेशस्थां फलर्द्धिं स्वीकरोतीति भावः, इत्यादिविशेषणैर्नवीनत्वमिति वृत्तार्थः ॥

एवमाशीर्वादमुक्त्वा विशेषोपदेशमाह—

स्युर्द्वात्रिंशत्सहस्रा भरतजनपदाः सार्धपञ्चाग्रविंश-
त्यार्येष्वर्हत्प्रबोधः सुगुरुभिरधुना पञ्चषेष्वस्ति धर्मः ।
सत्क्षेत्रं तत्र चाल्पं लवणभुवि यथा पल्वले ग्रीष्मतप्ते,
पद्मं हंसस्य तुष्ट्यै तदिह बहुगुणे सच्चतुर्मासकं नः ॥ १३० ॥

व्याख्या—वृत्तमिदं सुगमम् । नवरं तत्र पञ्चसु षट्सु वा देशेषु सत्क्षेत्रं प्रधानं अल्पं स्तोकं, यथा लवणभुवि क्षारभूम्यां ग्रीष्मतप्ते उष्णकालेनाल्पजले पल्वले तडागे हंसस्य तुष्ट्यै पद्ममल्पमिति, तत्तस्माक्षेत्रोरिह बहुगुणे स्थाने नोऽस्माकं चतुर्मासकं सद्युक्तमिति काव्यार्थः ॥

उक्तं चतुःषष्टितमं वर्षाक्षमाश्रमणोपदेशद्वारं । ननु नोः साधवः पर्युषणाया अर्वागत्र चतुर्मासकमवस्थास्यामहे इत्यादिनियोगमपि न कुर्वन्ति कथं नाम क्षमाश्रमणं वर्षास्थितेर्दापयन्तीत्ययुक्तोऽयमस्य द्वार-

स्योपन्यासः । सत्यं, सुविहितानामिदं वर्षाऋमाश्रमणदापनमयुक्तं, परं त्विदं प्रकरणं कानकसूरिकृतं ततो दोषकृदिदं द्वारं चतुःषष्टितमं वर्षाऋमाश्रमणोपदेशद्वारम् ॥

अथ ऋमायातं पञ्चषष्टितमं प्राघूर्णकवन्दनोपदेशद्वारमाह—

यन्नश्चिरं विहाराज्जिननतिपुण्यं तदाशु वो भूयात् ।
कर्षुकशालेर्यत्नाद्वर्धुकशालेर्द्रुतं तु फलम् ॥ १३१ ॥

व्याख्या—प्राघूर्णकवन्दनकोद्यतानां लोकानां पुरतो गुरव उपदिशन्ति—हे भव्या यन्नोऽस्माकं चिरं विहारकरणाज्जिननतिपुण्यमभूत्तत्पुण्यं वो युष्माकं अत्र वन्दनके दीयमानेऽभूत् (भूयात्) । अत्रार्थे दृष्टान्तमाह—यत्नाद्बहुकालप्रयासात् कर्षुकलोकशालेः फलं भवति तथा तु पुनर्वर्धुकशालेः फलं द्रुतं यत्नं विनापि स्यात् । यः शालिः केदारादि कृत्वा वपनप्रयासेन जलपानादिना यत्नेन निष्पाद्यते स कर्षुकशालिः, अतस्तस्य यत्नतः फलं । यः शालिः सपादादिवृद्धिमुक्त्वा दीयते स वर्धुकशालिः । यथा कस्यापि कलशीप्रमाणं शालिं दत्त्वा कथ्यते एतावद्भिर्दिनैः सपादकलशीप्रमाणं लास्यामीति तस्य यत्नं विनाऽपि फलं भवति । केचित् वर्धुकशालिं चक्रिवर्धकिरत्नोत्पन्नं शालिं वदन्तीति गाथार्थः ॥

अथ वन्दनके नावाऽनावयोः फलविशेषं विवृणोति—

कृतिकर्म कर्ममर्महिदे नवेद्भावतोऽन्यथा श्रान्त्यै ।
पुण्याधिकनिःपुण्यककृतकामदमन्त्रसाधनवत् ॥ १३२ ॥

व्याख्या—कृतिकर्म वन्दनकं । अपरं सुगमम् ॥

अथ षट्षष्टितमआषाढचतुर्मासकोपदेशद्वारमाह—

राजा विश्वहितो जिनो नयपरा व्यापारिणः श्रावकाः,
स्थाने सर्वगुणोज्ज्वलेऽत्र शमिनः कौटुम्बिकास्ते वयम् ।
जैनाज्ञागुणपत्रदत्तविधिना वर्षासु तेन स्थिता,
ज्ञानक्षेत्रमुपास्महे बहु मिथः स्याद्येन पुण्यं धनम् ॥ १३३ ॥

व्याख्या—विश्वहितो जगद्वत्सलो जिनो राजा जातः । न्यायैकनिष्ठाः श्रावका व्यापारिणो मन्त्रीश्वरादयो जाताः । अत्र सर्वगुणोज्ज्वले स्थाने शमिनो महात्मानः कौटुम्बिकास्ते च वयं तेन कारणेन जैनाज्ञागुणपत्रदत्तविधिना जैनाज्ञागुणानां पत्राणि पुस्तकानि तैर्दत्तः शिक्षितो यो विधिस्तेन कृत्वा वयमत्र वर्षासु वर्षाकाले स्थिताः सन्तो ज्ञानक्षेत्रमुपास्महे सेवामहे, येन कारणेन मिथः परस्परं पुण्यं धनं बहु स्यादिति काव्यार्थः ॥

फुल्लक्रोधविषद्रुमं बहुरजोमानप्रचण्डानिलं,
मायोद्यन्मृगतृष्णिकं परिलसल्लोभाब्धिमापन्निधिम् ।
निन्दन्मोहनिदाघकालमजितः सद्ध्यानवृष्ट्या नव-
व्रान्तिश्रान्तिनिदेऽस्तु वो नवघनश्रीमच्चतुर्मासकम् ॥ १३४ ॥

व्याख्या—नवघनश्रीरस्यास्तीति नवघनश्रीमत् तच्च तच्चतुर्मासकं च नवघनश्रीमच्चतुर्मासकमाषाढचतुर्मासकं वो युष्माकं नवव्रान्तिश्रान्तिनिदेऽस्तु संसारव्रमणश्रमापनोदायास्तु । किं कुर्वत् ? मोहोऽज्ञानं स एव निदाघकाल उष्णकालस्तं निन्दत् विध्वंसयत् अजितः सामस्त्येनेति । कया कृत्वा ? सद्ध्यानवृष्ट्या शुभध्यानवर्षणेन । किंभूतं मोहनिदाघकालं ? फुल्लन् विकसन् क्रोध एव विषद्रुमो यत्र स तथा तं । बहु प्रचुरं रजः पापं यत्र स बहुरजा एवं विधो यो मानः स एव प्रचण्डोऽनिलः प्रचण्डवायुर्यत्र स तथा तं । मायैवोद्यन्ती मृगतृष्णिका मरुमरीचिका यत्र स तथा तं । परिलसन् वर्धमानो लोभरूपोऽब्धिः समुद्रो यत्र स तथा तं । आपदो निधिं स्थानमिति काव्यार्थः ॥

अथ सप्तषष्टितमं पारणकोपदेशमाह—

प्रतिदिनमपि दानं पुण्यसंपन्निदानं, पुनरधिकफलं स्यात्पारणाहोत्तराहे ।
दिशति जलभृदन्नं कृत्तिकादौ सुवृष्टः, पुनरमलमनर्घ्यं मौक्तिकं स्वातियोगे ॥ १३५ ॥

व्याख्या—पारणाहोत्तराहे इति पारणकदिने उत्तरपारणकदिने च । निगदसिद्धमन्यत् ॥

पुनरत्रैव विशेषोपदेशमाह—

जितभवदकषायः पाक्षिकादेर्दिनोऽग्र्यो वितरणकरणैः प्राक्पश्चिमावप्युदारौ ।
विहितभुवनमुत्किं पार्वणश्चन्द्र एकस्तदितरशशिनौ किं नो मुहूर्त्तप्रकाशौ ॥ १३६ ॥

व्याख्या—पाक्षिकादेः पर्वणो दिनो दिवसस्तपःक्रियादिनाऽग्र्यो मुख्यः । किंभूतः ? जिता भवदाः संसारदायकाः कषायाः क्रोधादयो यत्र स तथा । तद्वत् प्राक्पश्चिमावपि दिनावुदारावुत्कृष्टौ वितरणकरणेन दानपुण्यकरणेन । यतः—"पहसंतगिलाणम्मि य आगमगहणे य लोयकरणे य । पारण उत्तरगम्मि य दाणं पि बहुफलं होइ ॥ १ ॥" एकः पार्वणश्चन्द्र एव भुवनस्य विहिता कृता मुत्प्रीतिर्येन स तथा । एवंविधः किं स्यात् ? तदितरशशिनौ राकाशशाङ्कादन्यौ चन्द्रौ प्राक्पश्चिमौ मुहूर्त्तप्रकाशौ मुहूर्त्तमात्रमप्रकाशकौ सन्तौ विहितभुवनमुदौ किं न स्यातां ? अपि तु स्यातामेवेति वृत्ताक्षरार्थः ॥

अथाष्टषष्टितमं व्याख्यानप्रारम्भयोग्योपदेशद्वारमाह—

व्याख्यानश्रवणं सदैव हि मुदे पीयूषपानं यथा,
वर्षास्वस्य पुनर्विशेषमहिमा यद्वन्मयूरध्वनेः ।

तद्भव्या इह कुत्रिकापणनिभे पूज्यप्रसादोदयात्,
दानाद्यं गणिमादिवस्तुवदलं गृह्णन्तु पुण्यर्द्धये ॥ १३७ ॥

व्याख्या—व्याख्यानश्रवणं हिनिश्चितं सदैव मुदे स्यात्, यथा पीयूषपानं सुधास्वादनं सर्वदा मुदे स्यात्। पुनरस्य व्याख्यानस्य वर्षासु वर्षाकाले विशेषमहिमाऽस्ति विशिष्टप्रज्ञावोऽस्ति। यद्वद्यथा मयूरध्वनेर्वर्षासु विशेषमहिमाऽस्ति। तत्तत इह व्याख्यानश्रवणे कुत्रिकापणनिभे सर्ववस्तुभृतहट्टसमे गणिमादिवस्तुवत् पूगीफलादिवस्तुवत् दानाद्यं पुण्यर्द्धये पुण्यलब्ध्यै गृह्णन्त्विति काव्यार्थः ॥

तथा—

वर्षान्तर्बहुवर्धिनो नवरसैर्जाड्यक्रुधोर्वह्निदः,
शश्वन्नूजिनसन्निधेरभिनवाद्ध्याख्यानरत्नाकरात्।
मादृग्वाग्लहरीस्फुटं शमसुधासम्यक्त्वचिन्तामणि-
श्रेयःस्वस्तरुमुख्यरत्ननिवहं गृह्णन्त्वनायासतः ॥ १३८ ॥

व्याख्या—हे भव्या अभिनवादपूर्वाद्ध्याख्यानरत्नाकरात् मादृशां वाचो वचांसि ता एव प्रसरणशीलत्वाल्लहर्य इव लहर्यस्ताभिः स्फुटं प्रकटीभूतं शमसुधासम्यक्त्वचिन्तामणिश्रेयःस्वस्तरुमुख्यं रत्ननिवहं

रत्नसमूहमनायासतः प्रयासं विनाऽपि गृह्णन्तु भवन्त इति । अभिनवत्वं विशेषणद्वाराऽऽह—किंभूतात् ? वर्षान्तर्वर्षाकालमध्ये बहु प्रचुरं वर्धिनो वर्धनशीलात् । पुनः किंभूतात् ? जाड्यं मूर्खत्वं कुधीर्व कोपवह्नानलं भिनत्तीति तथा तस्मात् । भूयः किंविशिष्टात् ? शश्वन्निरन्तरं श्रीजिनस्य श्रीतीर्थंकरस्य सन्निधिः सन्निधानं यस्य स तथा तस्मात् । अन्योऽब्धिस्तु वर्षासु बहु न वर्धते, अयं तु बहु वर्धते इत्यभिनवत्वं । तथाऽन्यस्तु जाड्यं जलभावं और्वं च न भिनत्ति प्रत्युत जाड्येन वर्धते वह्नाग्निना शुष्यते, अयं तु जाड्यकुधौर्वभिदिति । अन्यस्य वर्षाकाले एव श्रीजिनसन्निधिः लक्ष्मीनारायणसन्निधिः स्यात् , अस्य तु सर्वदैवेति नवीनत्वमिति वृत्तार्थः ॥

अथैकोनसप्ततितमपुण्यतिथिद्वारोपदेशमाह—

साष्टमी व्यभिचाराय श्रेयःकर्मणि किं यया ।
तुल्यः पक्षद्वयेऽपीन्दुर्धृतः पक्षान्तरस्थया ॥ १३९ ॥

व्याख्या—साऽष्टमी श्रेयःकर्मणि पुण्यकार्ये व्यभिचाराय व्यभिचरणार्थं किं स्यात् ? अपि तु न । सा का ? यया इन्दुश्चन्द्रः पक्षद्वयेऽपि सितासितपक्षयोरपि तुल्यो धृतः । किंभूतया ? पक्षयोरन्तरे विचाले तिष्ठतीति तथा तया । अन्ययाऽपि यया पक्षद्वयान्तरस्थया पक्षद्वयेऽपि इन्दुः स्वामी तुल्यो ध्रियते सा श्रेयःकर्मणि कल्याणकृत्ये व्यभिचाराय न स्यादिति भावः ॥

एकैकाऽपि हि पुण्याय ऋतेष्टापि तदन्तिमे ।
योगे किं त्वब्धिवेलायां गङ्गायमुनयोरिव ॥ १४० ॥

व्याख्या—एकैकाऽपि ऋतेष्टा चतुर्दश्यपि हिर्यस्मात् पुण्याय स्यात् तर्हि तदन्तिमे पूर्णिमामावास्ये किं कथ्येते ? पुण्याय ऋवत एवेति ऋावः । तथाऽब्धिवेलायां गङ्गायमुनयोर्योग इव यथा पुण्यस्य किं कथ्यत इति ऋावः ॥

अथ रक्षापर्वोपदेशमाह—

अर्हंश्चिन्तामणित्वं कनककुसुमतां पञ्च यद्भूषणानि,
यस्यां सत्कङ्कणत्वं दधति च सततं पञ्च यद्वल्कणानि ।
धर्मः सिद्धार्थसार्थः सुगुरुपदरजो दोरकस्तद्गुणाली,
धार्या सम्यक्त्वरक्षा कुगतिभयजिदे सद्गतिश्रेयसे च ॥ १४१ ॥

व्याख्या—हे भव्याः सम्यक्त्वरक्षा कुगतिभयजिदे सद्गतिश्रेयसे च धार्या । यस्यां सम्यक्त्वरक्षायां अर्हन् जिनश्चिन्तामणित्वं दधाति पञ्च यद्भूषणानि सम्यक्त्वभूषणानि यस्यां कनककुसुमतां हेमपुष्पत्वं दधति धारयन्ति, तानि चामूनि—"स्थैर्यं प्रभावना भक्तिः कौशलं जिनशासने । तीर्थसेवा च पञ्चास्य भूषणानि प्रचक्षते ॥ १ ॥" तथा च पुनः पञ्च यद्वल्कणानि सम्यक्त्वलक्षणानि यस्यां सत्कङ्कणत्वं

दधति । तानि चैतानि—"शमसंवेगनिर्वेदानुकम्पास्तिक्यलक्षणैः । लक्षणैः पञ्चभिः सम्यक् सम्यक्त्व-
मुपलक्ष्यते ॥ १ ॥" धर्मः सिद्धार्थसार्थः सर्षपसमूहः सुगुरुपद एव रजः सम्यक्त्वगुणावली दोरको
यस्यां अजूदिति वृत्तार्थः

चउ सद्दहण ४ तिलिंगं ३ दस विणय १० तिसुद्धि ३ पंच गयदोसं ५ ।
अट्ठ पभावण ८ भूसण ५ लक्खणपंचेव संजुत्तं ५ ॥ १ ॥
छव्विहजयणा ६ गारं ६ छप्पावण ६ भावियं च छहाणं ६ ।
इय सत्तसट्ठिलक्खणभेयविसुद्धं तु सम्मत्तं ॥ २ ॥

एतद्गाथाद्वयमन्यशास्त्रीयमपीह सिद्धान्तगाथाभिर्व्याख्यायते—"चउ सद्दहण त्ति"—"परमत्थ
संथवो वा १ सुदिट्ठपरमत्थसेवणा वावि २ । वावन्न ३ कुदंसणवज्जणा य ४ सम्मत्तसद्दहणा ॥ १ ॥"
तिलिंग त्ति—"सुस्सूस १ धम्मराउ २ गुरुदेवाणं जहासमाहीए । वेयावच्चे नियमो ३ सम्मद्दिट्ठिस्स
लिंगाइं ॥ २ ॥" दस विणय त्ति—"अरिहंत १ सिद्ध २ चेइय ३ सुए य ४ धम्मे य ५ साहुवग्गे य
६ । आयरिय ७ उवज्झाए ८ पावयणे ९ दंसणे आवि १० ॥ ३ ॥ भत्ती पूया वन्नजणणं नासणमवन्नवा-
यस्स । आसायणपरिहारो दंसणविणउ समासेणं ॥ ४ ॥" तिसुद्ध त्ति—"मुत्तूण जिणं १ मुत्तूण जिणमयं
२ जिणमयट्ठिए मुत्तुं ३ । संसारकन्नवारं चिंतिज्जंतं जगं सेसं ॥ ५ ॥" पंच गयदोस त्ति—"संका १
कंखा २ वितिगिच्छा ३ पसंस ४ तह संथवो ५ कुलिंगीसु । सम्मत्तस्सइयारे परिहरियव्वा पयत्तेणं ॥ ६ ॥"

अट्ठ पन्नावण त्ति—"पावयणी १ धम्मकही २ वाई ३ निमित्तिउं ४ तवस्सी य ५। विज्जा ६ सिद्धो य ७ कवी ८ अट्ठेव पन्नावगा भणिया ॥ ७ ॥" भूसण त्ति—"जिणसासणकोसलया १ पन्नावणा २ तित्थसेवणा ३ थिरया ४। भत्ती य ५ गुणा सम्मत्तदीवया उत्तमाणं च ॥ ८ ॥" लक्खणपंचेव संजुत्तं ति—"उवसम १ संवेगो २ विय निव्वेउं ३ तहय होइ अणुकंपा ४। अत्थिक्कं ५ विय एए सम्मत्तलक्खणा पंच ॥ ९ ॥" उवबृहजयण त्ति—"नो अन्नतित्थिए अन्नतित्थदेवेवि तह सदेवेवि। गहिए कुतित्थिएहिं वंदामि न १ वा नमंसामि २ ॥ १० ॥ नेव अणालत्ते आलवेमि ३ नो संलवेमि ४ तह तेसिं। देमि न असणाईयं ५ पेसेमि न गंधमल्लाइं ६ ॥ ११ ॥" आगार त्ति—"रायाभियोगो य १ गणाभियोगो २, बलाभियोगो य ३ सुराभियोगो ४। कंतारवित्ती ५ गुरुनिग्गहो य ६, उ ठिंमियाउं जिणसासणम्मि ॥ १२ ॥" उब्भावण त्ति—"मूलं १ दारं २ पइट्ठाणं ३ आहारो ४ भायणं ५ निही ६। उवएसावयधम्मस्स सम्मत्तं परिकित्तियं ॥ १३ ॥" उ ठाण त्ति—"अत्थिय १ निच्चो २ कुणई ३ कयं च वेएइ ४ अत्थि निव्वाणं ५। अत्थि य मुक्कोवाउं ६ उ सम्मत्तस्स ठाणाइं ॥ १४ ॥"

एते सम्यक्त्वभेदाः। एषां पालनं सम्यक्त्वगुणा इति ॥

उक्तं सप्ततितमं रक्षोपदेशद्वारं। अथैकसप्ततितमं पर्युषणोपदेशद्वारमाह—

कल्पाख्यानकपञ्चदिव्यनिहितः कृष्णाभिषेकोत्सवो,
भव्यैः पर्युषणामहद्भिरतिपतिर्मिथ्यात्वकोपादिकम्।

कृत्वा पञ्चकुलं जनेऽतिविषमं भव्यं नवं स्थापयन्,
सम्यक्त्वं शममार्दवार्जवनिरीहत्वं शिवायास्तु वः ॥ १४२ ॥

व्याख्या—पर्युषणामहर्द्धितिपतिः पर्युषणापर्व एव भूपतिः वो युष्माकं शिवायास्तु । किंविशिष्टः ? कल्पाख्यानकानि कल्पव्याख्यानानि तान्येव पञ्च दिव्यानि गजाश्वछत्रचामरादीनि तैर्निर्हितो राज्ये स्थापितः । ततो भव्यैर्भव्यजनैः कृतो विहितोऽभिषेको यस्य स तथा । किं कुर्वन् ? मिथ्यात्वकोपादिकं मिथ्यात्वक्रोधमानमायालोभरूपं पञ्चकुलं जने लोकेऽतिविषमं दुष्टं कृत्वा निराकृत्य भव्यं न्यायपरं नवं नवीनं सम्यक्त्वशममार्दवार्जवनिरीहत्वलक्षणं पञ्चकुलं स्थापयन् । इति वृत्ताक्षरार्थः ॥

चेतः स्थालं विशालं कलमकणगणः श्रावकाणां गुणाली,
सम्यक्त्वं सद्दुकूलत्रितयमनुपमं नाम्निकेरं विवेकः ।
जैनाज्ञा मूर्ध्नि दूर्वा मलयजघुसृणे भावलोकानुरागौ,
सत्कीर्तिः पुण्यवर्धापनमिति भवतादान्तरद्विड्जये वः ॥ १४३ ॥

व्याख्या—इति वक्ष्यमाणं पुण्यवर्धापनं वो युष्माकमान्तरद्विड्जयेऽस्तु आभ्यन्तरवैरिजयार्थं भवतु । इतीति किं ? चेतो मनो विशालं स्थालं जातं, श्रावकाणां गुणाली एकविंशतिगुणश्रेणिरेव कलमशालितंडुलसमूहोऽभूत्, सम्यक्त्वं सद्दुकूलत्रितयं प्रधानपट्टकूलवस्त्रत्रयमभूत्, विवेकोऽनुपमं निःसमानं नाम्नि-

केरमजूत्, मूर्ध्नि मस्तके जैनाज्ञैव दूर्वा जाता, जावो धर्मश्रद्धानं लोकस्यानुरागो धर्मकरणवाञ्छा तौ जावलोकानुरागौ मलयजघुसृणे जाते, ततः सत्कीर्तिर्जवतीति काव्यार्थः ॥

अथाष्टाह्निकोपदेशमाविर्जावयति—

सौख्यं शाश्वतमेक एव हि जिनः कुर्यात्तु शेषैः सुरैः,
स्याच्चेदैहिकमेव किञ्चन ततो यद्वा सवित्रा यथा ।
तद्वत् किं शशिदीपतारमणिजिर्विश्वप्रकाशो जवे-
देवं मङ्गलदीपकोच्चशिखयाऽऽद्याऽष्टाह्निका शंसति ॥ १४४ ॥

व्याख्या—आद्या प्रथमाऽष्टाह्निका मङ्गलदीपकोच्चशिखया कृत्वा एवं शंसति ज्ञापयति । एवमिति किं ? हे जव्या एक एव जिनो हि निश्चितं शाश्वतं सुखं कुर्यात् । तु पुनः शेषैः सुरैर्देवैः कृत्वा सुखं चेद्यदि स्यात्तर्हि ऐहिकमेवेहलोकसम्बन्धि एव स्यात् किञ्चन स्तोकमिति । यद्वाऽथवा यथा सवित्रा सूर्येण कृत्वा विश्वप्रकाशो जवेत्तथा चन्द्रदीपकनक्षत्ररत्नैः किं विश्वप्रकाशो जवेत् ? अपि तु नेति काव्यार्थः ॥

अथ द्वितीयाष्टाह्निकामाह—

रागद्वेषजितोऽर्हतोंऽघ्रियुगलं पाणिद्वयेनार्चयन्,
साधुश्रावकधर्मजाक् परजवे स्वर्गापवर्गौ जजेत् ।

दृक्कर्णद्वितयेन रूपगुणभृच्चेहापि तोषं परं,
घंटाचामरचेष्टितेन विवृणोत्यष्टाह्निकैकोत्तरा ॥ १४५ ॥

व्याख्या—एकोत्तरा द्वितीयाऽष्टाह्निका घंटाचामरचेष्टितेन कृत्वेति विवृणोति प्रकाशयति । तदाह—साधुश्रावकधर्मज्ञाक् पुमान् परत्रवे स्वर्गापवर्गौ त्रजेत् । किं कुर्वन् ? रागद्वेषजेतुरर्हतोंऽघ्रियुगलं पाणिद्वयेनार्चयन् पूजयन् । च पुनरिहापि दृक्कर्णद्वितयेन चक्षुर्न्यामर्हतो रूपं पश्यन् कर्णाभ्यां च गुणभृत् अर्हतो गुणानाकर्णयन् इहापीहलोकेऽपि परमुत्कृष्टं तोषं त्रजेदिति काव्यार्थः ॥

अथ तृतीयामाह—

त्रैलोक्यं त्रिपदीतनुस्त्रिपथगा प्रीणाति यस्यान्वहं,
कालेषु त्रिषु तं त्रिकालविदुरं देवं त्रिशुद्ध्या मह ।
स्वत्रत्रयसंपदे दिशति वो येनैष रत्नत्रयं,
त्रिः पुष्पाञ्जलिसंज्ञया ज्ञपयतीत्यष्टाह्निका द्व्युत्तरा ॥ १४६ ॥

व्याख्या—द्व्युत्तरा तृतीयाऽष्टाह्निका त्रिर्वारत्रयं पुष्पाञ्जलिसंज्ञया ज्ञपयति आदिशति एवमिति शेषः । एवं किं ? हे भव्य यस्य देवस्य "उप्पन्नए वा विगमए वा धुवए वा" इति त्रिपदीरूपा तनुः शरीरं यस्याः सा तथा सैव त्रिपथगा गङ्गा त्रैलोक्यं अन्वहं निरन्तरं प्रीणाति तर्पयतीति आद्यपुष्पा-

अञ्जलिसंज्ञया वक्ति । हे भव्य तमेव जिनं त्रिशुद्ध्या मनोवचोऽङ्गनैर्मल्येन मह पूजय । त्रिषु प्रज्ञातमध्याह्नसन्ध्यारूपेषु । किंरूपं ? अतीतानागतवर्तमानरूपं त्रिकालं वेत्तीत्येवंशीलस्तथा तं एवं द्वितीयपुष्पाञ्जलिसंज्ञया ब्रूते । हे लोका येन कारणेनैष पूज्यो जिनः स्वकीयरत्नत्रयलक्ष्म्यै वो युष्माकं रत्नत्रयं ज्ञानदर्शनचारित्ररूपं दिशति ददाति इति तृतीयपुष्पाञ्जलिसंज्ञया ज्ञापयतीति वृत्तार्थः ॥

अथ चतुर्थीमाह—

व्याख्यासद्म चतुर्विधामरकृतं प्राप्यावदद्यं चतु-
र्मूर्तिस्तीर्थपतिश्चतुर्गतिहितं धर्मं चतुर्धा बुधाः ।
तं कुर्वन्तु चतुष्कषायरहिता वर्गे चतुर्थे रता,
ब्रूते संघकृतस्तुतिप्रतिरवैरष्टाह्निका त्र्युत्तरा ॥ १४७ ॥

व्याख्या—त्र्युत्तरा चतुर्थी अष्टाह्निका चतुर्विधश्रीसंघकृतस्तुतिप्रतिरवैरेवं ब्रूते । एवं किं ? चतुर्विधैर्वैमानिकज्योतिष्कभवनपतिव्यन्तररूपैरमरैः कृतं व्याख्यासद्म समवसरणं प्राप्य चतुर्मूर्तिः श्रीतीर्थपतिर्यं धर्मं चतुःप्रकारं दानादि अवदत् । किंभूतं ? चतसृषु देवमानवतिर्यङ्नारकरूपासु गतिषु हितं । हे बुधाः पण्डिताः । चतुष्कषायरहिताश्चतुर्थे वर्गे मोक्षलक्षणे रता आसक्ताः सन्तो भवन्तस्तं धर्मं कुर्वन्तु इति वृत्तार्थः ॥

अथ पञ्चमीमाह—

किं पञ्चेन्द्रियशर्म पञ्चविषयैर्मूढा मितं वाञ्छतो—
दध्वत्पञ्चसुभावनानि दधतां पञ्च व्रतान्युच्चकैः।
पञ्चज्ञानवतां यथा बहुसुखा वः स्याद्गतिः पञ्चमी,
स्पष्टं जल्पति पञ्चशब्दनिनदैरष्टाह्निका पञ्चमी ॥ १४७ ॥

व्याख्या—पञ्चमी अष्टाह्निका पञ्चशब्दनिनदैः कृत्वा स्पष्टमेवं जल्पति। तदाह—हे मूढाः पञ्चविषयैः शब्दाद्यैः कृत्वा पञ्चेन्द्रियशर्म कर्णादिपञ्चेन्द्रियसुखं मितं स्तोकं किं वाञ्छत? अपि तु उच्चकैरतिशयेन पञ्च व्रतान्यहिंसादीनि दधतां धारयतां। किंरूपाणि? उदञ्चन्त्य उज्झन्त्यः पञ्च पञ्च सुष्ठु भावना येषां तानि तथा भावना व्रतानामिमाः—"मनोगुप्त्येषणादानेर्याभिः समितिभिः सदा। दृष्टान्नपानग्रहणेनाहिंसां भावयेत् सुधीः ॥ १ ॥ हास्यलोभभयक्रोधप्रत्याख्यानैर्निरन्तरम्। आलोच्य भाषणेनापि भावयेत् सूनृतव्रतम् ॥ २ ॥ आलोच्यावग्रहयाच्याभीक्ष्णावग्रहयाचनम्। एतावन्मात्रमेवैतदित्यवग्रहधारणम् ॥ ३ ॥ समानधार्मिकेभ्यश्च तथावग्रहयाचनम्। अनुज्ञापितपानान्नाशनमस्तेयभावनाः ॥ ४ ॥ स्त्रीषंढपशुमद्वेश्मासनकुड्यान्तरोज्झनात्। सरागस्त्रीकथात्यागात् प्राक्कृतस्मृतिवर्जनात् ॥ ५ ॥ स्त्रीरम्याङ्गेक्षणस्वाङ्गसंस्कारपरिवर्जनात्। प्रणीतात्यशनत्यागाद्ब्रह्मचर्यं तु भावयेत् ॥ ६ ॥ स्पर्शे रसे च गन्धे च

रूपे शब्दे च हारिणि । पञ्चस्वितीन्द्रियार्थेषु गाढं गार्ध्यस्य वर्जनम् ॥ ७ ॥ एतेष्वेवामनोज्ञेषु सर्वथा द्वेषवर्जनम् । आकिञ्चन्यव्रतस्यैवं भावनाः परिकीर्तिताः ॥ ८ ॥" यथा वो युष्माकं पञ्चज्ञानसहितानां सतां पञ्चमी गतिर्मोक्षगतिर्बहुसुखा स्यादिति काव्यार्थः ॥

अथ षष्ठीमाह—

जित्वा षड्विकृतिस्पृहां षडपि तान्मुक्त्वा रसान् शक्तितः
षड्जीवावनतस्तपः कुरुत षड्भेदं बहिश्चाबहिः ।
हित्वा षड्गजयो मतः षडृतुजा पूजा च चेन्मानसे,
भद्रोन्नादितषट्पदध्वनिरुवाचाष्टाह्निका षष्ठिका ॥ १४९ ॥

व्याख्या—षष्ठिकाऽष्टाह्निका भद्रैरुन्नादिता उल्लपिता षट्पदध्वनयो यस्यां सा तथा ईदृशी सती उवाच हे भव्या क्षुधादीनां षण्णां विकृतीनां स्पृहां लौल्यं जित्वा तान् प्रसिद्धान् मधुरादीन् षडपि रसान्मुक्त्वा परिहृत्य शक्तितो यथाशक्ति पृथिव्यादिषड्जीवानामवनतो रक्षणतः बहिर्बाह्यं अबहिराभ्यन्तरं च षड्भेदं तपो यूयं कुरुत षट्सङ्ख्याका भेदा यस्य तत्तथा । ते चामी—"अणसणमूणोयरिया वित्तीसंखेवणं रसच्चाओ । कायकिलेसो संलीणया य बज्झो तवो होइ ॥ १ ॥ पायच्छित्तं विणओ वेयावच्चं

तहेव सज्झावो । झाणं उस्सग्गो विय अप्पिंतरङ्गं तवो एसो ॥ २ ॥" चेद्यदि अन्तरङ्गारिषड्वर्गपरिहारो मतोऽस्ति । च पुनर्मानसे षड्तुजा पूजा मताऽन्नीष्टाऽस्तीति वृत्तार्थः ॥

अथ सप्तमीमाह—

सप्तापि व्यसनानि सप्तनरकद्वाराण्यहो सप्तभी-
हेतूनि त्यजताशु पुण्यनृपतेः क्षेत्राणि राज्याङ्गवत् ।
सप्ताप्याप्नुत सप्तभूमिकगृहे तत्त्वे वसन्तु स्वयं,
सत्सप्तस्वरगीतकैतवमुवाचाष्टाह्निका सप्तमी ॥ १५० ॥

व्याख्या—सप्तम्यष्टाह्निका सत्सप्तस्वरगीतकैतवं यथा भवति तथेत्युवाच हे भव्याः सप्तापि व्यसनानि त्यजत । अन्यानि विशेषणानि सुगमानि । तत एव पुण्यनृपते राज्याङ्गवत् सप्तापि क्षेत्राणि आशु शीघ्रं आप्नुत यूयं लभध्वं । अत एव सप्तभूमिकगृहे तत्त्वे वसन्तु स्वयं भवन्त इति वृत्तार्थः ॥

अथाष्टमीमाह—

मुक्त्वाष्टौ मदकारणान्यविरतं सत्प्रातिहार्याष्टकं,
देवं पूजय पूजयाऽष्टविधया येनैष तुष्टः पदम् ।

तद्यो यन्ति यत्र नास्ति पतनं दुष्टाष्टकर्मापदा-
चष्टे माङ्गलिकाष्टदीपकमिषादष्टाह्निकाऽप्यष्टमी ॥ १५१ ॥

व्याख्या—अष्टम्यष्टाह्निका माङ्गलिकाष्टदीपकमिषादेवमाचष्टे । अन्यत्सुगमम् ॥

अथ सर्वासामासां फलमाह—

नैतेऽप्येत इवोपमानविगमादष्टाह्निकावासरा,
एकैकोच्चकला इतीन्दुसदृशा किञ्चित्त्वभूवन्निमे ।
श्राद्धस्वान्तपयोधिनेत्रकुमुदश्रेणीचकोरेक्षणो-
ल्लासाय स्मरतापमोहतिमिरोच्छित्त्यै यतोऽहर्निशम् ॥ १५२ ॥

व्याख्या—एतेऽष्टाह्निका वासरा एत इवाष्टाह्निकादिना इव न सन्तीत्युपमानविगमादन्योपमानाभावादेकैकोच्चा एकैकाधिका कला महिमा येषु ते तथा ईदृशाः सन्त इमेऽष्टाह्निकादिनाः किञ्चित्त्विन्दुतुल्या अभूवन् । यतः कारणादिमे दिनाः श्राद्धानां स्वान्तं मनस्तदेव पयोधिः समुद्रः श्राद्धानां नेत्राण्येव कुमुदश्रेणीचकोरेक्षणानि कैरवराजिचकोरनेत्राणि श्राद्धस्वान्तपयोधिश्च नेत्रकुमुदश्रेणीचकोरेक्षणानि च तेषामुल्लासाय स्मरतापमोहतिमिरोच्छित्त्यै चाहर्निशं निरन्तरं भवन्तीति चन्द्रतुल्याः । चन्द्रोऽपि दिने दिनेऽधिककलावान् भवतीति स्वयं योज्यमित्यक्षरार्थः ॥

उक्तं द्विसप्ततितममष्टाह्निकाद्वारं । अथ त्रिसप्ततितमं दीपालिकोपदेशद्वारमाह—

सद्ध्यानोज्ज्वलदीपकः प्रविलसत्स्वाध्यायमेरात्रिकः,
कल्पाहारसुभोजनः सुगुणवाक्ताम्बूलशोभाशुभः ।
अश्रीनिर्गमलक्ष्म्युपागमजयज्येष्ठावनामोत्तरः,
शीलालङ्कृतिभाग्मुदे भवतु वोऽर्हद्धर्मदीपोत्सवः ॥ १५३ ॥

व्याख्या—अर्हद्धर्म एव दीपोत्सवो वो युष्माकं मुदे भवतु । किंभूतः ? शुभध्यानान्येवोज्ज्वला दीपका यत्र स तथा । प्रविलसन्तो देदीप्यमानाः स्वाध्याया एव मेरा[1]त्रिकाणि यत्र स तथा कल्पः श्रीवर्धमानचरित्ररूपः स एवाहारोऽशनादिस्तस्य सुभोजनं प्रधानं पालनं जेमनं वा यत्र स तथा । सुगुणा या वाग्वाणी सैव ताम्बूलशोभा तया शुभः । अश्रीरलक्ष्मीस्तस्या निर्गमेन लक्ष्म्युपागमेन च जयज्येष्ठानां गुरूणामवनामेन प्रणामेनोत्तर उत्कृष्टः । शीलालङ्कृतिभागिति वृत्तार्थः ॥

अथ चतुःसप्ततितमव्याख्यासमर्थनोपदेशद्वारमाह—

व्याख्यानं श्रुतदुग्धसारमधिकस्निग्धं निपीयादरात्,
मा त्याक्षू रसिता मुधा शमदधिश्रेयोघृतोद्भायकृत् ।

१ भाषायां मेरायां इति.

अस्मात्तस्य समर्थनाद्य तदिदं कालेन नव्यैः पुनः,
सम्यक्त्वाङ्गविवृद्धिकृद्बहुतृषा पेयं तमस्तापजित् ॥ १५४ ॥

व्याख्या—सुगुरूणां व्याख्यानं पीत्वा रसिता[1] मुधा मा त्याक्षुरिति संटंकः । किंभूतं ? श्रुतमेव दुग्धं तेन सारं, अधिकस्निग्धं परमप्रीतिकरं । शम एव दधि श्रेय एव घृतं तयोरुद्गायं वृद्धिं करोतीति तथा । अस्मात् कारणात्तस्य व्याख्यानस्याद्य समर्थना विधीयते तदिदं व्याख्यानं कालेन प्रस्तावेन बहुतृषा बहुपिपासया नवभिर्नव्यैः पेयं । पुनर्भूयोऽपि । किंविशिष्टं तत् ? सम्यक्त्वाङ्गविवृद्धिकृत् । पुनः किंविशिष्टं ? तमोऽज्ञानं तस्य तापं संतापं जिनत्तीति तथा इति वृत्तार्थः ॥

विशेषोपदेशमत्रैवमाह—

सिद्धान्ताम्बुधिसंभवेऽद्य विरते व्याख्याघने सदृसै-
र्दृष्टान्तैः सकषायतापजनहृद्भूमिं शमित्वाऽमितः ।
सप्तक्षेत्रधरासु वित्तवपनं कुर्वन्तु वः पुण्यतो,
निःसप्तव्यसनेतिजीति विविधं शस्यं यथा स्याज्जनाः ॥ १५५ ॥

व्याख्या—हे जना अद्य व्याख्याघने व्याख्यानमेघे सदृसैर्दृष्टान्तैः कृत्वा कषायतापेन सह वर्तन्ते

१ तृप्ता.

ये तथा ते च ते जनाश्च तेषां हृद्भूमिमञ्जितः सामस्त्येन शमित्वोपशमय्य विरते (सति) सप्तक्षेत्रधरासु वित्तवपनं कुर्वन्तु, यथा वो युष्माकं पुण्यतो विविधं शस्यं मङ्गलं वा स्यात् । कीदृशे व्याख्याघने ? सिद्धान्ताम्बुधिसंज्ञवे समयाम्भोध्युद्भवे । कीदृशं शस्यं ? निःसप्तव्यसनेतिज्ञीति सप्तव्यसनसप्तेतिसप्तभयरहितमिति काव्यार्थः ॥

अथ पञ्चसप्ततितमं विहारद्वारमाह—

वृष्टे धर्मकथोपदेशसलिलैर्भव्योर्वरायां गुरा-
वब्दे संयमधान्यसप्तदशकं रूढं क्रियामारुतैः ।
स्पष्टैः स्पष्टगुणं विशोधितमतः शाल्यादिशस्योद्गमं,
स्यादेवोद्यमरक्षपालदलितापायं फलस्फातिमत् ॥ १५६ ॥

व्याख्या—धर्मकथोपदेशसलिलैः कृत्वा गुरावब्दे सुगुरुरूपे मेघे (भव्योर्वरायां भव्यप्राणिरूपायां पृथिव्यां) वृष्टे सति संयमधान्यसप्तदशकं संयमस्यैव धान्यस्य सप्तदशकं रूढमुद्गतं । हे भव्याः स्पष्टैरनुकूलैः क्रियामारुतैर्दानाद्याचरणवातैः कृत्वा विशोधितं निरतिचारं कृतं । अतः कारणात् स्पष्टगुणं प्रकटगुणं सत्तच्छाल्यादिसस्योद्गम इव शाल्यादिधान्योत्पत्तिरिव उद्यमेन रक्षपालैर्दलिताः स्फेटिता अपाया उपद्रवा यस्य तत्तथा, ईदृशं सत् फलस्फातिमत् फलविस्तारवृत् स्यादेवेति काव्यार्थः ॥

अथ वर्षाचतुर्मासकोपदेशमाह । ननु नो "राजा विश्वहित" इति (१३२) काव्ये पूर्वमेवाषाढचतुर्मासकोपदेश उक्तः । अथ कथमुच्यते ? सत्यं, परं तत्र स्वस्थितिमधिकृत्योक्तः, अत्र तु तत्स्वरूपेणोच्यते इत्यदोषः । तथाऽस्य ग्रन्थस्योपदेशपरत्वेनापि नायं पौनरुक्त्यदोषः । यतः—सज्झायज्झाणतवोसहेसु उवएसथुइपयाणेसु । संतगुणकित्तणेसु य न हुंति पुनरुत्तदोसाउ ॥ १ ॥" श्रीउपदेशमालायामपि—"न कुलं इत्थ पहाणं हरिएसबलस्स किं कुलं आसी । आकंपिया तवेणं, सुरावि जं पञ्जुवासंति ॥१॥ आसि नंदिसेणस्स कुलं, जं हरिकुलस्स विउलस्स । आसी पियामहो सुचरिएण वसुदेवनामु त्ति ॥ २ ॥ इत्यादावित्थमेवास्तीति सूक्तमिदम् ।

व्याख्यानाम्बुधरोपदेशसलिलैः सुश्राद्धचेतःसरः-
पूर्तिः कीर्तिनदीततिर्मलरजश्छित्तिश्च यत्राजवत् ।
बालश्रावकनेककेकिपठनस्वाध्यायकोलाहलं,
सत्कृत्यान्नफलाय वो भवतु तद्वर्षाचतुर्मासकम् ॥ १५७ ॥

व्याख्या—सत्कृत्यं पुण्यं तदेवान्नं धान्यं तस्य फलाय संपत्तये वो युष्माकं तद्वर्षाचतुर्मासकं भवतु । किंरूपं ? बालाश्च ते श्रावकाश्च त एव नेककेकिनः दर्दुरमयूरास्तेषां पठनं वन्दनकसूत्राद्यध्ययनं, स्वाध्यायस्तु पूर्वाधीतस्मरणं, तावेव कोलाहलो यत्र तत्तथा । निगदसिद्धमन्यत् ॥

उक्तं षट्सप्ततितमं द्वारं । अथ सप्तसप्ततितमं कार्तिकचतुर्मासकोपदेशद्वारमाह—

घस्रे शीतोष्णकाले प्रथमवयसि तत्कर्म कुर्वीत विद्वान्,
येनान्ते स्यात्सुखीतो वयमपि तदिहावेत्य कुर्मो विहारम् ।
नानार्हत्तीर्थयात्रा श्रुतधरनमनं संशयान्तः श्रुतायः,
शुद्धान्नोपध्यवाप्तिः प्रवचनमहिमा मूढबोधाद्यतः स्यात् ॥ १५८ ॥

व्याख्या—विद्वान् घस्रे दिवसे शीतकाले चोष्णकाले प्रथमवयसि च तत्कर्म कुर्वीत येन कर्मणा घस्रान्ते रात्रौ, शीतोष्णकालयोरन्ते वर्षाकाले, प्रथमवयोऽन्ते वृद्धावस्थायां च सुखी स्यात् । इतः कारणात् वयमपि तदवेत्य बुद्ध्वा विहारं कुर्मः, यतो विहारान्नानार्हत्तीर्थयात्रा स्यात्, श्रुतधरनमनं, संशयान्तः संशयविनाशः, श्रुतायः सिद्धान्तप्राप्तिश्च, शुद्धान्नोपध्यवाप्तिः शुद्धौ द्वाचत्वारिंशद्दोषरहितौ यावशनोपधी तयोरवाप्तिः प्राप्तिश्च स्यात् । तथा मूढबोधात् प्रवचनमहिमा शासनप्रभावना च स्यादिति वृत्तार्थः ॥

अथ कार्तिकचतुर्मासकपारणोपदेशमाह—

चातुर्मासिकमेकपारणदिनं नूनं फलं प्राप्नुयात्,
नेतुर्वार्षिकमप्यवाप न कथं श्रेयांस एकाह्नयपि ।

स्थानस्थाननिखातकोटिविभवः कोटीश्वरः किं भवेत्,
कोटीमूल्यमहामणिं करतले किं खेलयन्नापरः ॥ १५९ ॥

व्याख्या—एकमेव पारणदिनं नूनं निश्चितं चातुर्मासिकं तपःफलं प्राप्नुयात्। तथा श्रेयांसकुमार एकस्मिन् दिनेऽपि भर्तुः श्रीनाभेयस्य वार्षिकं तपःफलं किं न प्राप? अपि तु प्रापैवेति। स्थाने स्थाने निखातो निधीकृतः कोटिसङ्ख्यो विभवो द्रव्यं यस्य स तथा किमीदृश एव कोटीश्वरो भवेत्? अपरोऽन्यः कोटीमूल्यं महारत्नं करे खेलयन् सन् किं न कोटीश्वरो भवेत्? अपि तु सोऽपि भवत्येवेति वृत्तार्थः ॥

अथाष्टसप्ततितमं संघार्चोचितोपदेशद्वारमाह—

तीर्थेशैर्व्रतधर्मघोषणपुरस्कारात् परामुन्नतिं,
नीतं यच्च ददाति भूतिमतुलां श्रीशालिभद्रादिवत्।
तन्निःसत्त्वतिरस्क्रिया लघु कलौ दानं त्वयोल्लासितं,
कैः कैर्नङ्क्ष्यति पुनः फलिष्यति फलैस्तत्ते जिनो वेत्ति यत् ॥ १६० ॥

व्याख्या—यद्दानं तीर्थेशैर्व्रतधर्मघोषणपुरस्कारात् व्रतानि अहिंसादीनि तत्राभयदानमेव पुरस्कृतं, धर्मोऽपि दानाद्यस्तत्रापि तदेव पुरस्कृतं, व्रतधर्मयोर्घोषणे विशेषेणोपदेशे पुरस्कारात् परामुन्नतिं नीतं

प्रकृष्टां ख्यातिं प्रापितं । यद्दानं श्रीशालिभद्रादिवद्दायकस्यातुलां भूतिं लक्ष्मीं ददाति । हे भद्र तद्दानमद्य त्वयोल्लासितं प्रकटितं लघु कलौ दुःषमाकाले । किंविशिष्टं दानं ? निःसत्त्वतिरस्क्रिया निःसत्त्वस्य कार्पण्यस्य तिरस्करणं यत्ते तव दानं कैः कैरपूर्वैः फलैः फलिष्यति तज्जिन एव वेत्ति नान्य इति वृत्तार्थः ॥

पुनर्विशेषोपदेशमाह—

मान्यस्तीर्थपतेः परिग्रह इव क्ष्मापस्य सङ्घो ध्रुवं,
धन्यो यस्य गृहाङ्गणं स चरणाम्भोजैः पुनीतेतराम् ।
किं ब्रूमः फलमस्य तद्भरतवद्योऽर्चत्यमुं संमदात्,
श्रीरप्यस्य गृहे स्थिरा प्रतिभुवः श्रीजैनपादा इमे ॥ १६१ ॥

व्याख्या—ध्रुवं निश्चितं तीर्थपतेरर्हतः श्रीसङ्घो मान्योऽस्ति । कस्येव कः ? क्ष्मापस्य राज्ञः परिग्रह इव । स सङ्घो यस्य पुरुषस्य गृहाङ्गणं चरणाम्भोजैः स्पृशति (पुनीतेतराम्) स धन्यः । तत्तस्माद्येतोर्यः पुमानमुं सङ्घं संमदाद्धर्षेणार्चति पूजयति तस्यास्य पुंसः फलं वयं किं ब्रूमः वचोऽगोचरत्वात् । किंवत् ? भरतवत् भरतस्येव । तथाऽस्य पुंसः श्रीरपि गृहे स्थिरा स्यात् । अत्रार्थे इमे श्रीजैनपादाः प्रतिभुवः साक्षिणः इति वृत्तार्थः ॥

अथैकोनाशीतितमं फाल्गुनचतुर्मासकयोग्योपदेशद्वारमाह—

नीत्वा क्षेत्रे पवित्रे घनसमयममी संयता राजहंसा-
स्तत्तत्स्थाने विजह्रुः सुकृतिभिरनिशं जाड्यशीतं च भिन्नम् ।
शीलक्षौमैस्तपोऽग्निव्रतनियमगृहैर्भावनागन्धतैलै-
र्यत्राचार्यार्कगोभिर्हिमसमयचतुर्मासकं तन्मुदे स्तात् ॥ १६२ ॥

व्याख्या—यत्र हिमसमयप्रारंभे एव अमी संयता राजहंसास्तत्तत्स्थाने तस्मिँस्तस्मिन्नगरादौ विजह्रुर्विहारमकार्षुः । किं कृत्वा ? पवित्रे क्षेत्रे घनसमयं वर्षाकालं नीत्वाऽतिवाह्य । तथा यत्र सुकृतिभिः पुण्यवद्भिरनिशं निरन्तरं शीलक्षौमैर्ब्रह्मव्रतरूपवस्त्रैः तपोऽग्निव्रतनियमगृहैश्च भावनागन्धतैलैः आचार्यार्कस्य गोभिर्वाणीभिः कान्तिभिश्च जाड्यशीतं मूर्खत्वमेव शीतं भिन्नं अपास्तं तत् हिमसमयचतुर्मासकं फाल्गुनचतुर्मासकं मुदे स्ताद्भवतु इति वृत्तार्थः ॥

पुनर्विशेषमाह—

चातुर्मासिकपर्वसंभवतपोवह्नेस्तदावश्यक-
व्रश्यत्कर्मदलोद्भूतद्वगणकस्तोमेऽत्र भस्मीकृते ।

प्रातर्वन्दनके मुखांशुकविधिव्याजाद्विकीर्णे सति,
धन्योऽर्हन्नुणफाल्गुनो गतरजाः स्यादागमान्नः प्लवात् ॥ १६३ ॥

व्याख्या—अर्हन्नुण एव फाल्गुनो मासः आगमादेव जलस्नानात् गतरजा निष्पापो निर्धूलिर्वा धन्योऽस्तु। क्व सति ? चातुर्मासिकपर्वसंज्ञवं षष्ठरूपं यत्तपस्तदेव वह्निस्तस्मात् तदावश्यकेन चातुर्मासक-प्रतिक्रमणेन ज्रश्यन्ति पतन्ति यानि कर्मदलानि तान्येवोल्बूतानि उपचितानि उगणकानि तेषां स्तोमे समूहेऽत्र जस्मीकृते सति मुखांशुकविधेर्मुखवस्त्रिकाकर्तव्यस्य व्याजात्कपटात् प्रातर्वन्दनके विकीर्णे विक्षिप्ते सतीति। वृत्तार्थः ॥

अथाशीतितमकल्याणकदिवसवर्णनद्वारमाह—

स्पर्धा महत्सु नरवाक् शुकवत्क्लमाय, सत्यं पुनः पदमुपैति जनः समर्थः।
मर्त्या हि पञ्चमगुणस्थितिमुक्तियोग्याः श्राद्धेषु तज्जिनमहेऽनुचितेन्द्रताऽपि ॥ १६४ ॥

व्याख्या—महत्सु स्पर्धा क्लमाय स्यात्। किंवत् ? शुकवत् यथा शुकेषु नरवाणी क्लमाय जवति इति सत्यमेव। पुनः समर्थः जनः पदं स्थानमुपैति आगच्छति। हि यस्मात्कारणात् श्राद्धेषु मर्त्याः पञ्चम-गुणस्थितिमुक्तियोग्या वर्तन्ते तत्तस्माद्धेतोः जिनमहे तीर्थंकरकल्याणके श्रावकाणामिन्द्रताऽपि अनुचि-ताऽयोग्या देवेन्द्रस्य चतुर्थगुणस्थानस्थायित्वादिति काव्यार्थः ॥

कल्याणकं च दिवसे धुरि यत्र सोऽतिश्रेष्ठः स एव दिवसः पुनरागतोऽद्यः ।
श्रीवीरमोक्षदिवसोद्भवदीपपर्व, यद्वत्ततः सुकृतिनोऽत्र महोऽनुवर्षम् ॥ १६५ ॥

व्याख्या—यत्र दिवसे कल्याणकं जिनानां च्यवनादिकल्याणं समभूत् धुरि आदौ स दिवस एवातिश्रेष्ठो भवति । पुनरागतोऽपि वर्षे वर्षे स दिवसः प्राप्तोऽपि अद्य उत्कृष्ट एव स्यात् ततः कारणादनुवर्षं वर्षमनु लक्ष्यीकृत्य प्रतिवर्षं सुकृतिनः पुण्यवतः पुरुषस्य महः पर्व स्यात् । यद्वत् यथा श्रीमहावीरस्य मोक्षदिवसे उद्भवमुत्पन्नं दीपपर्व दीपालिकामहोत्सवः प्रतिवर्षमभूत् । इति काव्यार्थः ॥

देवैर्जिनस्य यदि जन्ममहादि चक्रे, न श्रावकैरनुकृतिः क्रियतां तदेषाम् ।
स्वःशक्रदन्तिमदतुंबुरुगानरम्भानृत्यादि चेद्भुवि न कोऽपि ततः करोतु ॥ १६६ ॥

व्याख्या—यदि देवैर्जिनस्य जन्ममहादि जन्मोत्सवादिकं चक्रे तर्त्तार्हि श्रावकैरेषां देवानामनुकृतिरनुकारो न क्रियतां ? अपि तु क्रियतामेव । स्वरित्यव्ययं स्वर्गे शक्रदन्तिमद ऐरावणहस्तीन्द्रमदजलं, तुंबुरूणां देवगायनानां गानं, रंभानामप्सरसां च नृत्यादिकं वर्तते ततस्तर्हि भुवि पृथिव्यां कोऽपि मनुष्यो मदं गानं रंभानृत्तादिकं च न करोतु ? अपि तु करोत्वेवेति काव्यार्थः ॥

उक्तमशीतितमं कल्याणकदिवसद्वारं । अथ महापूजास्वरूपमाह—

जैनार्चयाऽपि नवनिः कुसुमैरशोक उच्चोच्चसंपदभवन्नवशेवधीशः ।

लब्धार्चनेन तु फलं जिन एव वेत्ति, सद्भूस्थकालघनसिक्तसुबीजवत्तत् ॥ १६७ ॥

व्याख्या—नवसङ्खैरपि कुसुमैः कृत्वा जैनार्चया जिनपूजया(अशोकः) उच्चोच्चसंपत् अधिकाधिकलक्ष्मीकः सन् नवानां शेवधीनां निधानानामधीशः स्वामी जातः इति नवपुष्पैः पूजाफलं । तु पुनर्लब्धार्चनेन लब्धद्रव्यपूजया फलं भवति तत्फलं जिन एव वेत्ति बहुफलत्वात्, न तु उद्मस्थः । किंवत् ? यथा सती भव्या भूर्भूमिका तत्र वर्तमानं काले प्रस्तावे घनसिक्तं मेघसेकपूर्णं सुबीजं बहुफलमेव स्यात् ॥

आश्चर्यकारि फलमप्यतुलं प्रदास्यत्याश्चर्यभङ्गिभिरियं विहिता जिनार्चा ।
कार्यं हि कारणगुणेन भवेत्तु चित्रं, पुष्पैरिमैस्त्रिदशवृक्षफलप्रसूतिः ॥ १६८ ॥

व्याख्या—इयं प्रत्यक्षेण दृश्यमानाऽर्चा आश्चर्यविच्छित्तिभिर्विहिता कृता सती अतुलं निःसमानं आश्चर्यकारि फलमपि प्रदास्यति । एवं कथं ज्ञायते ? हि यस्मात्कारणात् कारणगुणेन कृत्वा कार्यं जायते । तु पुनरेतच्चित्रं इमैः प्रत्यक्षैः पुष्पैः कृत्वा त्रिदशवृक्षस्य कल्पवृक्षस्य फलप्रसूतिर्जाता इति ॥

उक्तमेकाशीतितमं महापूजाद्वारं । अथ चैत्यपरिपाटीयोग्यं काव्यद्वयमाह—

अप्येकजैनभवनस्नपनादिना यज्जावाऽुपार्जि सुकृतं शिवकृद्भवद्भिः ।
स्थानं क्व चैत्यपरिपाटिकयाऽर्जितस्य, ज्ञातं महस्तुतिकृतां हृदयानि सन्ति ॥ १६९ ॥

व्याख्या—हे भव्या भवद्भिर्युष्माभिर्भावादन्तरङ्गप्रीत्या एकस्य जैनभवनस्य जिनप्रासादस्य स्नपना-

दिनाऽपि स्नात्रविलेपनपूजादिनाऽपि शिवकृन्मोहकारकं सुकृतं पुण्यं समुपार्जि । परं तु चैत्यपरिपाटिकयाऽर्जितस्य पुण्यस्य स्थानं क ? तस्य पुण्यस्य स्थानं न ज्ञायते । अथ पुनस्तस्य स्थानं ज्ञातं महस्तुतिकृतां महोत्सववर्णनकारकाणां हृदयान्येव चैत्यपरिपाटिकयाऽर्जितस्य सुकृतस्य स्थानानि सन्ति वर्त्तन्ते इति ॥

अद्योदियाय सुदिनो भवतां कला वा, जज्ञे यदल्पवसुनाऽपि हि भूरिलाभः ।
चैत्यावलीषु यदुपार्जि शिवाय पुण्यं, भक्त्या खलम्भि दलपुष्पफलोपहारैः ॥ १७० ॥

व्याख्या—हे भव्या भवतां युष्माकं अद्य सुदिनो भव्यदिवस उदियाय उदेति स्म, वा पुनर्भवतां कला विज्ञानं चाद्योदियाय । कथं ? यद्यस्मात् कारणात् हि निश्चितं अल्पवसुना स्तोकद्रव्येणापि भूरिलाभो जज्ञे जातः । स च कथं ज्ञायते भवद्भिः ? चैत्यावलीषु चैत्यपरिपाटीषु शिवाय मोक्षाय पुण्यं यदुपार्जि तत् पुण्यं भक्त्या दलानां पत्राणां पुष्पाणां फलाणां चोपहारैरुपढौकनैः कृत्वा भवद्भिः स्वलम्भि सुखेन प्राप्तं स्तोकद्रव्यरूपैर्दलपुष्पफलोपहारैः कृत्वा मोक्षलक्षणो भूरिलाभोऽभूदिति भावः ॥

उक्तं द्व्यशीतितमं चैत्यपरिपाटीद्वारं । अथोद्यापनवर्णनमाह—

शुद्धं तपः केवलमप्युदारं, सोद्यापनस्यास्य पुनः स्तुमः किम् ।
हृद्यं पयो धेनुगुणेन तत्तु, द्राक्षासिताक्षोदयुतं सुधैव ॥ १७१ ॥

व्याख्या—हे भव्याः केवलं उद्यापनकरणरहितमपि शुद्धं निर्मलं तप उदारं बहुफलदायि भवति

पुनरस्य तपसः सोद्यापनस्य सतः किं फलं स्तुमो वर्णयामः ? अपि तु सर्वमपि फलं वर्णयाम एव । एतदेव दृष्टान्तेन दृढयति—पयो दुग्धं धेनुगुणेन कृत्वा हृद्यं मधुरमेव । तु पुनस्तत्पयो द्राक्षया हारहूरया सिताह्वोदेन च शर्कराचूर्णेन च युतं सत् सुधैवामृतप्रायमेव भवति ॥

वृक्षो यथा दोहदपूरणेन, कायो यथा सद्रसभोजनेन ।
विशेषशोभां लभते यथोक्तं, सूद्यापनेनैव तथा तपोऽपि ॥ १९२ ॥

व्याख्या—यथा वृक्षो दोहदपूरणेन कृत्वा विशेषशोभां लभते । यथा च कायः शरीरं सद्रसभोजनेन कृत्वाऽत्यन्तलक्ष्मीं लभते । तथा तपोऽपि यथोक्तं सिद्धान्तकथितं सूद्यापनेनैव विशेषशोभां लभते ॥

सिंहस्तपःप्रक्रम एव तावद्दुःकर्मदन्तावलमण्डलीनाम् ।
तदद्य तस्मिन् प्रखरानिवेशो, यद्भक्तद्युद्यापनविस्तरोऽयम् ॥ १९३ ॥

व्याख्या—दुःकर्मदन्तावलमण्डलीनां दुष्टाष्टकर्महस्तीन्द्रश्रेणीनां तावत्तपःप्रक्रम एव तपःप्रारम्भ एव सिंहोऽस्ति । तत्तस्मात्कारणादद्य तस्मिँस्तपःप्रक्रम एव सिंहे प्रखर उत्कट आटोपाडम्बरो यद्भवेत्था स्यात्तादृगयं प्रत्यक्षोपलभ्यमानः तद्युद्यापनविस्तरोऽस्ति तस्य तपस उद्यापनविस्तारो विजयते ॥

उक्तं त्र्यशीतितममुद्यापनवर्णनद्वारं । अथ ध्वजारोपमुद्दिश्याह—

राज्ञां चारुगुरूदरे च तुरगे छत्रे रथे वा वृतौ, लोकानां कटसुंरुकादिषु मया धौरेयतां बिभ्रता ।

नैतत्क्वापि महत्त्वमापि विलसत्केत्वग्रहस्तो रण-
द्घण्टावाग्निरिति ध्वजस्त्वरयते वो देवताराधने ॥ १७४ ॥

व्याख्या—हे भव्या वंशमयो ध्वजो देवताराधने जैनदेवसेवने रणद्घण्टावाग्निः शब्दायमानाया रणरणत्कारं कुर्वत्या घण्टायाः शब्दैः कृत्वा वो युष्मान् त्वरयते शीघ्रीकरोति । किंरूपः ? विलसन् चालयन् केतुरेव पताकैवाग्रहस्तो यस्य स तथा । अन्योऽपि हस्तं चालयन् कार्ये जनं त्वरयते । कथं ? हे लोका मया ध्वजेन एतत्प्रासादोपरिवर्तमानलक्षणं महत्त्वं क्वापि स्थाने नगरादौ न प्रापि न लेभे । किं कुर्वता मया ? राज्ञां भूपालानां तुरगे अश्वे रथे वा पुनर्वृतौ लोकभाषया वागीतिनाम्नां धौरेयतां धुर्यत्वं बिभ्रता धारयता सता । च पुनर्लोकानां कटसुंरुकादिषु लोकभाषया किमासुंरुला इति प्रसिद्धेषु धौरेयतां बिभ्रता मया यादृगत्र महत्त्वं लब्धं तादृगन्यत्र क्वापि न लब्धमिति । अतो हेतोर्यूयमपि अमुं देवं सेवध्वं यथा महत्त्वं लभध्वं इति त्वरयते ध्वजः ॥

उक्तं चतुरशीतितमं ध्वजारोपद्वारं । अथ अष्टविधजिनपूजाफलमाह—

नैवेद्यैः सजलैः शिवाध्वसुखदं स्पष्टं समं शम्बलं,
धूपेनोर्ध्वगतिः सुगन्धितदिशावासेन शुभ्रं यशः ।

नृस्वर्गादिफलं फलैश्च कलमैर्जैनाढकार्चात्मनः,
पुष्पैर्लोकशिरःस्थितिः शिवतनुर्दीपैर्जिनार्चाफलम् ॥ १९५ ॥

व्याख्या—सजलैर्नैवेद्यैः कृत्वा शिवाध्वसुखं मोक्षमार्गसौख्यदायकं स्पष्टं प्रकटं समं समग्रं शम्बलं स्यात् । धूपेनोर्ध्वगतिर्भवति । सुगन्धिताः सुरभीकृता दिशो येन स तथा एवंविधेन चन्दनकर्पूरादिलक्षणेन वासेन कृत्वा शुभ्रं धवलं यशः स्यात् । फलैश्च कृत्वा नृस्वर्गादिफलं मनुष्यस्वर्गलोकसम्बन्धि भोगफलं स्यात् । कलमैः शालीनामक्षतरूपैः कृत्वाऽऽत्मनः स्वस्य जैनाढकार्चा जिनसम्बन्धिनी आढकबलिकरणरूपाऽर्चा पूजा च स्यात् तीर्थकृत्त्वं स्यादिति भावः । पुष्पैः कृत्वा लोकशिरःस्थितिः लोकाग्रमस्तकावस्थानं स्यात् । दीपैः कृत्वा शिवतनुर्मोक्षशरीरं स्यादिति अष्टविधजिनपूजाफलं ज्ञेयम् ॥

उक्तं पञ्चाशीतितमं जिनपूजाफलद्वारं, अथ मङ्गलाष्टकमाह—

आदर्शोदितकेवलर्द्धिरसमैश्वर्यश्च भद्रासना-
द्ब्रह्माण्डस्य शरावसंपुटतनोर्यः कामकुम्भः पुरः ।
श्रीवत्सात्सुगतिस्तिमेः स्फुटतनुर्नित्योत्सवः स्वस्तिका-
न्नन्द्यावर्तवदद्भुताकृतिकृतानन्दः स वोऽव्याज्जिनः ॥ १९६ ॥

व्याख्या—स जिनो वो युष्मानव्याऽऽहतु । किंभूतः ? आदर्शवदुदिता केवलार्द्धिः केवलज्ञानलक्ष्मीर्यस्य स तथा ऋजासनादसममपूर्वमैश्वर्यं यस्य स तथा । शरावसंपुटतनोर्ब्रह्माण्डस्य पुरोऽग्रे यो जिनः कामकुम्भः पूर्णकलशः श्रीवत्सात् सुगतिः प्रधानगतिमान् योऽस्ति । तथा [1]तिमेः स्फुटतनुः प्रकटशरीरः प्रकटप्रज्ञावो योऽस्ति । स्वस्तिकान्नित्यं सर्वदोत्सवा यस्य स तथा । नन्द्यावर्तवदद्भुतयाऽऽश्चर्यकारिण्याऽऽकृत्याऽऽकारेण कृत आनन्दो येन स तथा ॥

उक्तं षडशीतितमं मङ्गलाष्टकद्वारं । अथ मुक्तिमुद्दिश्याह—

मुक्तेः सौख्यप्रमाणं भवतु सुरगिरिः सोऽस्ति वा योजनानां,
लक्षं वार्धिः स्वयंभूरमण इति पुनः सोऽस्ति रज्जुप्रमाणः ।
लोकातीतं तदेतज्जिनपतिरपि वा नोपमातुं प्रगल्भो,
भूयुग्भोगानुभूतिं स्वजनमनुवदन् यद्वदन्यं पुलिन्दः ॥ १७७ ॥

व्याख्या—मुक्तेः सिद्धेः सौख्यप्रमाणरूपो मेरुगिरिर्भवतु मेरुपर्वतप्रमाणं मुक्तेः सौख्यमस्तीति यदि वाच्यं तर्हि स मेरुर्योजनानां लक्षमस्ति । ततः स्वयंभूरमणो वार्द्धिः समुद्रो मुक्तेः सौख्यप्रमाणं भवतु इति पुन-

१ मत्स्यात् ।

श्चेदस्ति तर्हि स स्वयंभूरमणसमुद्रो रज्जुप्रमाणोऽस्ति। अतः कारणान्मेरुस्वयंभूरमणसमुद्रयोः प्रमाणरूपं उच्चै-स्तरत्वेन विपुलत्वेन च मुक्तेः सौख्यं नास्ति, किं तु मुक्तेः सौख्यं लोकातीतत्वान्निरुपमानं, तत्तस्मात्का-रणादेतत् पूर्वोक्तं मुक्तेः सोख्यप्रमाणं लोकातीतं सत् उपमातुमुपमानं दातुं जिनपतिरपि जिनेश्वरोऽपि न प्रगल्भो न वावदूकः। यद्यत् यथा अन्यं स्वजनमनुलक्ष्यीकृत्य भूभुजो भूपालस्य भोगानामनुभूतिमनुभ-वनं वदन् ब्रुवन् सन् भूभुग्भोगानुभूतिं उपमातुं पुलिन्दः कश्चिद्राजोपकारी प्रगल्भो नाभूत् ॥

यत्पादाम्बुजभृङ्गतामविरतं भेजे त्रिलोकीजनो,
यश्चिन्तामणिवत्तदीयहृदयान्नीष्टार्थसंपादकः।
सोऽप्यर्हन्मुदितो यदर्थमनिशं तत्तत्तपस्तप्तवान्,
नाभीष्टं हृदि कस्य कस्य तदहो नैःश्रेयसं मंगलम् ॥ १७८ ॥

व्याख्या—तत् नैःश्रेयसं मुक्तिसम्बन्धि मङ्गलं माङ्गलिक्यं अहो आश्चर्ये कस्य कस्य पुरुषस्य हृदि हृदये नाभीष्टं न वल्लभं ? अपि तु सर्वस्यापि हृदयेऽभीष्टमेव। तत् किं ? यदर्थं यस्य नैःश्रेयसस्य मङ्ग-लस्यार्थं निमित्तं सोऽप्यर्हन् जिनो मुदितो हर्षितः सन् अनिशं प्रत्यहं तत्तत् प्रसिद्धं तपस्तप्तवान्। स कोऽर्हन् ? त्रिलोकीजनो यत्पादाम्बुजभृङ्गतां यस्यार्हतः पादकमले भ्रमररूपतामविरतं सदा भेजे सेवि-

तवान् यथा नृङ्गोच्चयः कमलं सेवते तथा त्रिलोकीलोको यस्यार्हतः पदकमलं नेजे । पुनरपि स कोऽर्हन् ? योऽर्हन् तदीयानां तेषां पदकमलसेवकजनानां संबन्धिनां हृदयानामभीष्टार्थस्य संपादको निष्पादकोऽस्ति । किंवत् ? चिन्तामणिवत् यथा चिन्तामणिः सेवकजनानामभीष्टार्थं पूरयति तथाऽयमपि । यदुक्तम् "नात्यद्भुतं भुवनभूषण भूतनाथ, भूतैर्गुणैर्भुवि भवन्तमभिष्टुवन्तः । तुल्या भवन्ति भवतो ननु तेन किं वा, भूत्या श्रितं य इह नात्मसमं करोति ॥ १ ॥" इति ॥

उक्तं सप्ताशीतितमं मुक्तिद्वारं । विहारकाव्ये वर्षाचतुर्मासके च कार्तिक्यां च फाल्गुनचतुर्मासके च रजोत्सवे च किञ्चिन्नदागणनात् चतुरशीतिद्वाराण्येव सन्ति । अन्यथा तु तत्र किञ्चिन्नदसप्तावगणनात् सर्वेषां मेलनात्सप्ताशीतिद्वाराणीह कर्पूरप्रकरणे ज्ञेयानि । अथ प्रकरणकर्ता स्वकीयं नाम दर्शयति—

श्रीवज्रसेनस्य गुरोस्त्रिषष्टिसारप्रबन्धस्फुटसद्गुणस्य ।
शिष्येण चक्रे हरिणेयमिष्टा, सूक्तावली नेमिचरित्रकर्त्रा ॥ १७ए ॥

व्याख्या—हरिणा इयं कर्पूरप्रकराभिधा सूक्तावली सुभाषितमाला चक्रे कृता । किंभूतेन हरिणा श्रीनेमिनाथचरित्रस्य कारकेण । पुनः किंभूतेन ? श्रीवज्रसेनस्य गुरोराचार्यस्य शिष्येण । किंभूतस्य वज्रसेनस्य गुरोः ? त्रिषष्टिशलाकापुरुषचरित्राणां सारप्रबन्धेन नवीनकरणरूपेण स्फुटाः प्रकटाः सद्गुणा विद्वत्त्वादिप्रधानगुणा यस्य स तथा तस्य ॥

इति श्रीखरतरगणनभोऽङ्गणदिनमणिश्रीजिनवर्धनसूरिशिष्यश्रीजिनसागरसूरिविर-
चिता श्रीकर्पूरप्रकरटीका ॥

श्रीश्रीखरतरगणराजश्रीवर्धनसूरिशिष्येण । श्रीजिनसागरगुरुणा रचिता कर्पूरटीकेयं ॥ १ ॥
प्रथमादर्शे लिखिता तच्छिष्येणेह धर्मचन्द्रेण । उत्सूत्रं यल्लिखितं तच्छोध्यं सज्जनैरत्र ॥ २ ॥
यदवापि मया पुण्यं टीकाकारेण मन्दमतिनाऽपि । तेन सकलेऽपि लोके प्रतिपत्तिर्जैनधर्मेऽस्तु ॥३॥

॥ इति कर्पूरप्रकरमहाकाव्यटीका संपूर्णा ॥